BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE PATRONAGE OF THE

Hon. Court of Directors of the East India Company,

AND THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

Nos 39, 40, 42, 45, 46 & 52

THE UTTARA NAISHADHA CHARITA,

By S'rí Harsha,

WITH THE

COMMENTARY OF NÁRÁYANA.

Edited by Dr E Röer

Vol XI. Part I Cantos 12 to 17.

Sa BK
SRI/ROE

CALCUTTA:

PRINTED BY J THOMAS, AT THE BAPTIST MISSION PRESS

1855.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE PATRONAGE OF THE

Hon Court of Directors of the East India Company,

AND THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

Nos. 67, 72, 87, 90, 120 & 124

THE UTTARA NAISHADHA CHARITA,

BY S'RI' HARSHA,

WITH THE

COMMENTARY OF NARAYANA.

EDITED BY DR. E. RÖER.

VOL. XI. PART II. CANTOS 18 TO 22.

CALCUTTA:

PRINTED BY J THOMAS, AT THE BAPTIST MISSION PRESS.

1855.

उत्तरनैषधचरितं

श्रीहर्षमहाकविविरचितं

श्रीनारायणपण्डितकृतटीकासहितं ।

श्रीमद्भारतवर्षाधिपतीनामर्थसहायेन·

एशियाटिक् समाजियध्यक्षमहोदयानामनुमत्या

श्रीडाक्तर् एड्वार्ड रोयर् साहेबेन संस्कृत्य

कलिकताख्यराजधान्यां बाप्तिस्तमिशन्मुद्रायन्त्रे मुद्रितं
पूर्वार्द्धं सप्तदशसर्गान्तं ।

शकाब्दाः १७७३। ई० १८५१ साल्।

PREFACE.

S'rí Harsha's *Naishadha, a poem on the life of Nala, King of* Nishadha, is divided into two parts, the Púrva and Uttara Naishadha, or the first and second Naishadha, each of them containing eleven cantos, a division, for which there is no apparent reason, as the second is a mere continuation of the first part, nor are the two separated by any remarkable turn in the narrative The Púrva Naishadha was published in 1836, under the auspices of the General Committee of Public Instruction, by Premchander Pandit of the Calcutta Sanscrit College, and accompanied with a Commentary of his own The present edition of the Uttara Naishadha was undertaken at the suggestion of Professor Lassen, and concludes the last of the six Mahakávyas* of the Hindus which remained unpublished.

A Mahákávya, or great poem, although belonging to the narrative kind, is not an epic poem, which treats of heroic characters and deeds the Mahabhárata and Ramáyana best correspond with our idea of an heroic poem, and they are classed under the head of Itihása The eminence denoted by the prefix "great" refers rather to the length and general *excellence of a poem, and in one instance, Kálidása's* Meghaduta, to its excellence alone. Tradition, resting on general consent, declares the six poems above enumerated, alone worthy of that distinguishing title

The treatises on poetical composition give a more tangible account of this class of poetry. A Mahákávya, *according to*

* They are the following, the Raghuvans'a, the Kumara Sambhava and the Meghaduta all three ascribed to Kalidasa, the Kiratarjuniya by Bharavi, the S'isupalabadha by Magha, and the Naishadha by S'ri Harsha

the definition of the Sahitya Darpana one of those treatises, is a poem of many cantos, the hero is either a god, or a Kshatriya of good family, and of firm and elevated character, or *the subject of the poem may be, as in Kálidása's Raghu Vans a,* several princes of the same race the principal qualities illus trated are, love, heroism and meekness the narrative itself should be taken from an Itihasa, as the Mahábhárata, or from *some other approved authority*, it should *exceed eight cantos*, each of moderate length, and be interwoven with descriptions of morning, of the sun, moon, night, the heavens, the city, sacrifice, war, travelling to another country, marriage, etc

According to this definition, the form and mode of treatment are the test for deciding, whether or not a poem be a Mahakávya, consequently, the author of the Sahitya excludes Kalidasa's Meghaduta, and not only assigns the name of Mahakavya to others than those above mentioned, but gives it to some of his own composition Notwithstanding the difference in the popular and the more learned definition of a Mahakavya, there is this common to both, that they are narratives of lofty or elevated style and aspire to the rank of the highest order of poetry in the language

The Naishadha is one of those poems to which the name of Great is given par excellence, and certainly, as respects the subject matter of the poem, it is one of the most romantic and pathetic to be found in the literature of any language It is *the well known story of the love between* Nala *king of* Nishadha, and Damayanti, the daughter of Bhima, the king of Vidarbha, which is briefly this Nala was the most beauteous and high minded of men, Damayanti, the loveliest of women—hearing everywhere of each other's virtues and accomplishments, they were reciprocally inspired with an ardent love, which they communicated to each other by the mediation of swans—the *father, not aware of their* mutual attachment, seeing the beauty of his daughter fading, resolved that she should marry, and, with this view invited the neighbour-

ing kings to Damayantí's Swayamvara, a festival, where, in accordance with the ancient Hindu rite, she was to choose her own husband—along with the princes came Indra, Agni, Yama and Varuna, the four Lokapálas, or divine guardians of the world, in the likeness of Nala to deceive Damayantí—having invoked those deities to aid her in recognising her lover, she selected the true Nala. The story proceeds to describe their marriage and happiness, the vengeance vowed to Nala by Kali (the personified deity of the present or fourth age), his getting hold of Nala, through an omission of a ceremony by the king, Nala's addiction to gambling under the evil influence of Kali, thereby his loss *of the kingdom and banishment, his separation from the* faithful Damayanti (who had borne him company through his reverses of fortune, when all had abandoned him), Nala's madness, their mutual sufferings and varied miseries, the final recovery of Nala from his mental malady, and his happy reunion with Damayantí. The love of Nala and Damayantí had been first related in the Mahabhárata, containing in the third part, the Vanaparva, the episode of Nala.* Since then, it has remained a favourite theme with Hindu poets, who have adorned it, as a triumphal arch, with their poetical festoons and garlands. The most celebrated of these productions are the Nalodaya† generally ascribed to Kalidása, which, owing to its continuous play upon words, is one of the most difficult of Sanscrit poems, the Nala Champú by Vikrama Bhatta, a narrative partly prose and partly verse, and S'rí Harsha's Naishadha.

* Bopp published a separate edition of the text with a Latin version under the title "Nalus Mahabharati Episodium. Altera emendata editio. Berolini 1832. Milman translated it into English "Nala and Damayanti, and other poems translated from the Sanscrit into English verse, by H. H. Milman." There are German versions of the poem by Kosegarten, Ruckert and Bopp.

† Nalodaya, with the commentary of Prajnakaramisra, 1813, (Calcutta?) Nalodaya, una cum Pradschnakari Mithilensis scholiis ed., lat. interpretatione atque annotationibus criticis instruxit F. Benary, Berol., 1836. Nalodaya accompanied with a metrical translation by W. Yates, Calcutta, 1844.

The treatment of this subject in the Mahábhárata and Naishadha is wholly different The Mahábharata tells the whole story in simple, but vigorous and noble language It is full of powerful descriptions of passion, the poet nowhere pays any undue attention to the mere form of language, his chief *exertion is devoted to attract our sympathy to the qualities* and passions which he represents Refer, for example, to the deep pathos in the description of the grief of Damayantí, when *abandoned by her husband in the solitude of the forest*

S'ri Harsha gives only a part of Nala's adventures and carries the story no further than the return of Nala to his capital with *his bride* Damayanti, *and the description of their first* unalloyed affection and happiness It is poor in incident, the greater part of the long poem being occupied with descriptions *of the kind mentioned before as indispensable in a* Mahakávya It does not exhibit, as the Mahabharata does, a comparatively simple state of manners and society, but a highly artificial *one, and mirrors the terrible social corruption existing at the* time when the poet flourished Instead of ennobling the affections, or appealing to the tenderest and most sacred feelings of *man, the love which the poet describes is earth born and sen*sual in a degree far exceeding the lasciviousness of some of the Roman poets Scenes such as described in the feast of Dama (Canto 16, pp 353—401) *are degrading and revolting, nor* are similar extravagancies confined to an episode like that just alluded to—the absence of decent shame pervades throughout, and pollutes even the hearts of the *females,* as is evident, for instance, from the speech of Damayanti's companions (Canto 16, pp 352—59) Even the love of Nala and Damayanti, although generally tender and delicate and adorned with all the graces of the poet's exuberant fancy, approaches often to unveiled sensuality, and may, in truth, in several places, be designated a practical illustration of the Kámas'ástra And very well has the author himself described the basis upon which rested *the fabric of* a large *portion of Hindu society in his day,* in

the speech which he puts into the mouth of the Chárváka (Canto 17, pp 435—74), the founder of an atheistical system, who admirably demonstrates the hollowness, absurdity, and moral turpitude of the Hindu pantheon—a speech, which, indeed, the gods attempt to refute, but their rejoinder is rather a confirmation

With the structure or frame of the poem our delight is nearly unqualified The language is highly elaborate, bearing the mirror's polish It never becomes common-place, and bears throughout a sustained tone of sprightliness and elevation Although we find a continual play upon words for many verses together, yet, not only is the sense not lost in a mere jingle of syllables, but the general effect is often much enhanced by the harmonious contrast of open and concealed meanings The variety of metres are handled by the poet with admirable art and propriety, and the subject sparkles under his tread as gleams the ocean track in a ship's wake, rich in imagery showered unceasingly from the cornucopia of the poet's mind He draws upon the countless stores of Hindu mythology, weaves quaint and monstrous shapes, furnished by Heaven, Earth and Hell, into a rich string of arabesques, blending together their strange variety so that they harmonise Yet may the whole be likened to dissolving views Perfection of form and general effect are the poet's aim, not what we moderns consider real intrinsic excellence, that is, elevation of idea, power of invention and insight into human character, rather than skill in the mere structure of language and in the stringing together of imagery, truly a high but not the highest gift The effort of the Sanscrit poet is brilliant—so brilliant as to blind the reader with its blaze, until he loses, or becomes unconscious of, any defined creation of the poet's fancy Saraswati's description of the five Nalas is a ready instance of the characteristic peculiarities we have attempted to describe The poet tells of the five Nalas each verse has what we may term an overt and a sub meaning or meanings, the former applying to Nala,

the latter to the god who had assumed Nala's form, and, in conclusion, the same collocation of words has a reference to the character and manifold attributes of the five Nallas (Canto 13, pp 146—148) Among the best parts of the poem, I would name the whole 17th Canto, *especially the powerful description of the* personified deities of the chief vices, and the twenty second, in which *the description of the moon* by Damayanti and Nala is in exquisite taste and sometimes pathetic, each verse containing a complete picture in itself, in which the rich and melodious flow of the language is in perfect harmony with the subject

To sum up, in structure, force and elegance of diction, in propriety and graceful ease of vythou metre, in power of description and felicitous use of imagery—the Naishadha ranks high, and may enter the lists with any work of Sanscrit literature, but, to fit it for a place among the poems of the first order, it wants incident, action and dignity The hero does not rouse our higher sympathies, he revels constantly in the gardens of Armida—not as a Rinaldo who lays by his armour for a while, but as one native to the place, whose soul never soars beyond its delusive pleasures

The MSS of the text and commentary which I have collated for the present edition, are the following,—

Of the Text

A No 655, *complete, belonging to the Calcutta Sanscrit* College It bears the date of 1711, and the name of the writer is Ananda Parivrájaka *It is very correct*

B Complete, it is the property of my Pandit, S rí Sakhá *ráma S'ástri, who, about 50 years ago, received it from his* father It is also a good copy, as may be expected, having been so long *in the possession of Pandits*

Of the Commentary

C No 655, belonging to the Asiatic Society, procured from Benares It is a commentary both on the Purva and the Uttara Naishadha It is, however, not complete, containing only

Cantos 12, 14 to 17 and 21, more or less complete It has the date of Samvat 1815, and is tolerably correct

D No 131, belonging to the Calcutta Sanscrit College It contains parts of the 14 to 17 Cantos, the 18 to 20 Cantos are complete

Text and Commentary

E This belongs to the Asiatic Society, and is copied from a MS in the Library of the Sanscrit College at Benares. It is incomplete, containing Cantos 13 to 17 and 20 to 22 It is dated 1807, and is not very correct

F Nos 128 130, belonging to the Calcutta Sanscrit College It is without date, contains Cantos 12 to 16, 18 and 21, and is tolerably correct

An edition of the text was urgently required, for even in Sri Narayana's commentary, which according to a traditional account was written about 500 years ago, a great number of various readings are enumerated The commentary itself is very good Sri Narayana has a thorough appreciation of the beauties of his author, and is fully able to follow him into the labyrinthine windings whether of fancy or expression He explains with accuracy and nicety all those passages which, from the double meanings of words or their rare use, from the elaborate structure of the sentence or the obscurity of allusion or circumstance, would otherwise remain unintelligible Nor is he prolix, as is frequently the case with such commentators The MSS of the commentary would seem to have become very rare I have not seen one that was complete, and those which have been at my disposal are very incorrect, evidently owing to the carelessness and misapprehension of the copyists, so that I have, in many instances, found it very difficult to restore the text of the commentary I considered it, however, unnecessary to notice all the discrepancies among the MSS, the greater part of them are palpable mistakes, and to enumerate or give an account of them would be to furnish, not various readings, but a list of mere clerical errata

The text has been given in accordance with the reading approved of by the commentary, and although I have been *frequently disposed to adopt a reading not favourably considered* by the commentary, I have foreborne to do so, that I might maintain the uniformity of relation between the text and commentary.

CONTENTS.

Twelfth Canto

Other Kings arrive at the Swayamvara, they are joined by those who came before, pp 1 2 Damayanti, accompanied by Saraswati the goddess of speech, enters the assembly, pp 2 3 Saraswatí describes the kings to Damayanti Her account of Rituparna, King of Ayodhyá, pp 3 11, of the King of Pandya, pp 12 17, of the king of Kalinga, pp 18 24, of the King of Kánchi, pp 25 31, of the King of Nepala, pp 32 39, of the king of the Malaya mountain, pp 40 47, of the king of Mithilá, pp 48 53, of the King of Kámarupa, pp 54 60, of the King of Utkala, pp 61 67, of Jayanta, King of Kíkata pp 68 87 The loves of Nala and Damayanti pp 88 93

Thirteenth Canto

Saraswatí's description of the four Lokapálas in the form of Nala, and of Nala in the likeness of the four Lokapálas, p 94, of Indra in the form of Nala, pp 95 102, of Agni in the form of Nala pp 103 109, of Yama in the form of Nala, pp 110 116, of Varuna in the form of Nala pp 117 121 Description of Nala in the likeness of the four Lokapálas, in the likeness of Indra, pp 115 126, in the likeness of Agni, p 127, in the likeness of Yama, pp 128-129, in the likeness of Varuna, pp 130 131 Description of the five Nalas pp 146 148 Damayanti's doubt as to the real Nala, pp 149-161

gift to Nala, pp 329 344 Description of the marriage ceremony, continued, pp 344 351 Converse of the town women, 352 359 Damayanti s brother, Dama, gives a feast to the assembled Kings, pp 360 401 Nala departs with Damayanti to his own country, pp 402 407 Arrival at his capital, pp 408 415

Seventeenth Canto

The five gods return to heaven, pp 416 421 They meet the hosts of the gods, p 421 Description of Kama, the god of love, pp 421 424, of Krodha, the god of anger, pp 425 427, of Lobha, the god of covetousness, pp 428 430, of Moha, the god of folly, pp 431 434 Among the crowd of their worshippers the gods see several, previously unknown to them A follower of Chárvaka expounds to them his atheistical system, pp 435 474 Indra replies, pp 475 482 Agni replies, pp 482 484 Yama replies, pp 485 489 Varuna replies, pp 489 493 The Chárváka s apology, p 494 The gods observe among the crowd the personified deities of the Kali and Dwapara Yugas Kali asks about Damayanti s Swayamvara Indra tells him that she has chosen Nala as her husband, pp 494 501 Kali s scornful reply He vows vengeance to Nala, pp 501 508 Saraswati s answer, pp 508 509 Kali vows that he will compel Nala to desert his country and his wife, pp 510 511 Indra prophesies Kali s ultimate defeat, pp 512 521 The gods and Kali mock at each other, pp 522 528 The gods go to heaven, p 529 Kali together with Dwapara repairs to Nala's capital, pp 529 531 On account of the holiness of the town they cannot find a place of abode, pp 531 555 At last Kali discovers in the garden of Nala a Vibhitaka tree which he selects for his dwelling Here he remains a long time, vainly seeking for a fault in Nala s conduct which would give him an opportunity of compassing his ruin, pp 555 562

Eighteenth Canto

Nala delivers the administration of his kingdom into the hands of his ministers, and retires to a splendid palace, pp 563-565 Description of the palace, pp 565 585, of Nala and Damayantí s love, pp 586 675

Nineteenth Canto

Morning Song of the bards to awake Nala, pp 676 750

Twentieth Canto

Nala performs the morning rites and re-enters the palace, where he meets Damayanti, pp 751-762. Their playful conversation and love, pp 763-832 Noon song of the bards, pp 833-836

Twenty first Canto

Nala performs the mid-day rites, pp 837 942 Sportive songs of Damayanti's companions in the presence of Nala, pp 943-964 Conversation between Nala and Damayanti, pp 965 984.

Twenty second Canto

After the performance of the evening rites Nala joins Damayanti, p 985 His description of the evening, pp 586 1006, of the night, pp 1007 1018, of the rise of the moon, pp 1018-1032 Damayanti's description of the moon, pp 1033 1094 Nala's description of the moon, pp 1094 1102 Conclusion, 1103-1108

उत्तरनैषधसूचिपत्रं।

कथासन्दर्भश्च ।

	पृष्ठाङ्कः	
अथ नूतनागतानां राज्ञां वर्णनार्थं द्वादशसर्गारम्भः	१	
अन्येषामपि राज्ञां स्वयंवरसदस्यागमनं	”	
ततो भैम्यास्तत्र प्रवेशः	२	
ततस्तान् राज्ञः क्रमेण सरस्वती वर्णयितुमारेभे ..	३	
तत्र च ऋतुपर्णस्यायोध्याधिपतेर्वर्णनं	३ ..	११
ततश्चन्द्रवंश्यपाण्ड्यराजवर्णनं	१२ ..	१७
ततो महेन्द्रपर्वतेश्वरवर्णनं	१८ ...	२४
ततः काञ्चीपुरेश्वरवर्णनं	२५ ..	३१
ततो नेपालदेशीयराज्ञो वर्णनं	३२ ..	३९
ततो मलयेश्वरवर्णनं	४० ..	४७
ततो मिथिलाधिपतेर्वर्णनं	४८ ..	५३
ततः कामरूपेश्वरवर्णनं	५४ ..	६०
तत उत्कलाधिपतेर्वर्णनं	६१ ..	६७
ततो जयन्तनामककीकटेश्वरवर्णनं	६८ ..	८७
ततो भैमीनलयोः परस्परमनुरागवर्णनं	८८ ..	९३

अथ त्रयोदशसर्गारम्भः।

तत्रादौ नलवेषधारिणामिन्द्रादिदिक्पालानां नलस्य च श्लेषेण वर्णनं	९४ ..	
तत्र इन्द्रनलयोर्वर्णनं	९५ ..	१०२
ततोऽग्निनलयोर्वर्णनं	१०३ ..	१०९

पृष्ठाङ्क

ततो यमनलयोर्वर्णनं .. .. ११० .. ११९
ततो वरुणनलयोर्वर्णनं.. .. .. १२० .. १२४
आदौ दिक्पालानुद्दिश्य नलसाम्येन वर्णनं।
इदानीं नलमुद्दिश्य दिक्पालसाम्येन वर्णनं।
तत्र च नलेन्द्रयोर्वर्णनं .. .. १२५ .. १२६
ततो नलाऽनलयोर्वर्णनं.. .. .. १२७
ततो नलयमयोर्वर्णनं .. .. १२८ .. १२९
ततो नलवरुणयोर्वर्णनं.. .. .. १३० .. १३१
पूर्वोक्तवर्णनाश्रवणात् सन्दिहानाया भैम्याः संशया-
पनोदनाय नलवेषधारिणां श्यागपूर्वकानलग्रह-
णाय च क्रमेण पुनःश्लेषेण तेषां वर्णनं.. .. १३२ .. १४०
तद्दर्शनेनापि नलनिश्चयाभावात् सन्दिहानाया
भैम्याः सन्तापवर्णनं.. .. .. १४० .. १४२
तस्या नलानुरागे सौन्दर्यमेव न कारणं किन्तु पूर्व-
जन्मकृतसुकृतविशेषजन्यानुराग इति वर्णनं .. १४३ .. १४५
नलनिश्चयाभावाद्भैमी अनुरागतरला सती पूर्वपरि-
चितं परमार्थं नलविज्ञानकुशलं हंसं सस्मार.. १४६ .. १४८
ततो भैमी प्रत्येकं मुहुर्मुहुर्निरीक्षमाणापि तेषु पञ्चसु
कमपि भेदं ज्ञातुमशक्नुवाना बहुतरमचिन्तयत् १४९ .. १९१

अथ चतुर्दशसर्गारम्भः।

तदादौ भैमी नलनिश्चयार्थं देवान् पूजयितुमुपचक्रमे। १९२
ततो भैम्या देवपूजादिकृत्यावर्णना.. .. .. .. १९३ .. १९९
ततो भैम्या भक्तिविशेषेण ते देवाः प्रसादिताः। तेषु
प्रसन्नेषु भैमी सरस्वतीवाक्यं श्रुत्वा श्लेषार्थेन-

पृष्ठाङ्क

सन्देहं परित्यज्य सरस्वत्युक्तगाथाक्रमेणेन्द्रा-
दीन् ज्ञात्वा परित्यज्य तं पञ्चमं नलं ज्ञातवतीति १६७ .. १६८
ततस्तज्ज्ञानप्रकारवर्णनं .. .. १६९ .. १७६
ततो भैमी तेषां नलस्य च भेदज्ञानार्थं निमेष-
तदभाववत्त्वादिरूपमनुष्यदेवपरिज्ञापक-
चिह्नविविदिषया भूदर्शनादि चकारेति वर्णनं १७७ .. १८०
ततस्तत्तच्चिह्नावलोकनेन भैम्याः संशयापनोद
इति वर्णनं १८१
अथ नले वरस्रजं निधातुकामाया भैम्या लज्जाबा-
हुल्याद्धर्षातिरेकाच्च चेष्टाविशेषवर्णनं .. .. १८२ .. १८४
तत भैम्याऽऽकूतज्ञसरस्वत्युक्तिवर्णनं १८५
ततो भैम्या नेति नलनामांशमुच्चारयन्त्या लज्जावर्णनं १८६
ततः सरस्वत्या हस्तपथे नीयमानाया भीताया भैम्याः
सरस्वत्याश्च तात्कालिकपरस्परवाग्भङ्गीवर्णनं १८६ .. १९२
ततो वागाडम्बरविश्वसितां भैमीमिन्द्रादिषु नम-
स्कार्यं तामनुनेतुं प्रचक्रमे सरस्वतीति वर्णनं .. १९३ .. १९५
ततः परितुष्टेष्विन्द्रादिषु भ्रूभङ्ग्याज्ञताभ्यनुज्ञेषु देवी
भैमीनलं प्रति वरस्रजं निनायेति वर्णनं .. १९६
ततो भैमी वरस्रमाल्यया नलं कृतार्थयति स्मेति वर्णनं १९७
ततस्तयोर्वधूवरयोस्तात्कालिकसात्त्विकभाववर्णनं १९८ .. २०५
तत इन्द्रादीनां सरस्वत्याश्च स्वस्वरूपस्वीकारवर्णनं २०६ .. २१२
ततस्तद्दर्शनेन तत्सदोगतानां नृपाणामतिविस्मयवर्णनं २१३
ततः सरस्वतीसहितानामिन्द्रादीनां परितुष्टानां
भैमीनलयोर्यौतुकरूपवरप्रदानपुरःसरोक्तिवर्णनं २१४ .. २२५
ततः सरस्वतीमहितेषु देवेषु स्वर्गं यियासिषु तत्र-
स्थनृपाणां जयजीवेति परिजनालापवर्णनं .. २२६

पृष्ठाङ्काः

ततो भैमोऽपि दूतेन नलं पुनरागमयां बभूवेति
वर्णनं २५१
ततो राज्ञादिष्टाः पुरन्ध्र्यस्तत्कालोचितचित्रादिकर्म्म
तथाऽपूपादिखाद्यद्रव्यञ्च प्रस्तुती चक्रुरिति वर्णनं २५१
ततस्तात्कालिकपुरपौरशोभामुरजादिवाद्य-
वैचित्र्यवर्णनं .. .. २५२ .. २५५
ततो भैम्या मङ्गलस्नानप्रसाधनादिवर्णनं .. .. २५६ .. २८१
ततो भैमीकृतकौतुकमङ्गला पित्रादिभ्य आशीर्ल-
म्भनवर्णनं २८२
ततो नलस्य तात्कालिकमङ्गलस्नानप्रसाधनादि-
शोभावर्णनं .. .. २८३ .. २९५
ततो नलदर्शनार्थमागतानां पौरस्त्रीणां सम्भ्रमवर्णनं २९६ .. ३०३
ततस्तासां परस्परालापवर्णनं.. .. .. .. ३०४ .. ३१६

अथ षोडशसर्गारम्भः ॥

तत्रादौ नलस्य भीमगृहयात्रावर्णनं .. .. ३१७ .. ३२४
ततो भीमस्य प्रत्युत्थानादिना नलमभ्यर्च्य स्वदुहितृ-
प्रतिपादनवर्णनं .. .. ३२५ .. ३२७
ततो विवाहकौतुकं निरीक्ष्य भैमीसखीनां परि-
हासवर्णनं.. .. .. ३२८
ततो विवाहोचितयौतुकदानवृत्तान्तवर्णनं .. ३२९ .. ३४४
ततो यौतुकानन्तरोचितमाङ्गल्यविधिवर्णनं .. ३४५ .. ३५२
ततो भीमेन वरयात्रिणां परिवेषणार्थं निर्दिष्टानां
वाराङ्गनानां परिहासादिचेष्टावर्णनं .. .. ३५३ .. ३५९
ततः परिवेष्टुमागतवारयोषितां दर्शनेन वरयात्रिणां
कामविकारचेष्टापूर्वकभोजनपारिपाट्यवर्णनं ३६० .. ४०१

पृष्ठाङ्क

ततः सर्वैर्नलपुरे स्थानप्राप्त्यभावेन तदुद्यानप्रवेशः .. ५५५ .. ५६२

अथ अष्टादशसर्गारम्भः ।

तत्र नलस्य भैम्या सह सम्भोगवर्णनं .. .. ५६२ .. ६०५

अथोनविंशःसर्गारम्भः ।

तत्राद्यन्तं वैतालिकवर्णनं .. .. ६०६ .. ७५०

अथ विंशःसर्गारम्भः ।

तत्र समापितप्रातःक्रियस्य नलस्य सौधप्रवेशः .. ७५१
ततस्तत्र प्रत्यागतां भैमीं विलोक्य नलोक्तिः .. ७५१ .. ७६२
ततो नलस्य कांचित्कलानाम्न्या प्रियसख्या सह
भाषणं .. .. ७६३ .. ७६९
ततस्तस्या नलेन सह प्रत्युक्तिः .. .. ७७० .. ७८०
ततो नलस्यापि भूयस्तया सह प्रत्युक्तिः .. .. ७८१ .. ७८५
ततो नलस्य भैम्यासह विलासवर्णनं .. .. ७८६ .. ८३२
ततो माध्याह्निकवैतालिकवर्णनं .. .. .. ८३३ .. ८३६

अथ एकविंशःसर्गारम्भः ।

तत्र नलस्य स्नानपूजादिमाध्याह्निकविधिवर्णनं .. ८३७ .. ९४२
ततः कासाञ्चिद् भैमीसखीनां नलमुपवीणयितु-
मागतानां चाटुगाथावर्णनं .. .. .. ९४३ .. ९६४
ततो भैम्या केलिकुल्यादिकनिरीक्षणपूर्वकं प्रियेण
सह प्रियभाषणं .. .. ९६५ .. ९६८
ततः प्रियया सह नलस्य सम्भाषणं .. .. .. ९६९ .. ९८४

अथ द्वाविंशसर्गारम्भः ।

तत्रादौ नलस्य सन्ध्यावर्णनं .. .. ९८५ .. १००६

	पृष्ठाङ्काः
ततस्तमोवर्णनं	१००७ .. १०१८
ततश्चन्द्रोदयवर्णनं	१०१९ .. १०३२
ततो दमयन्तीचन्द्रवर्णनं	१०३३ .. १०६४
ततो नलस्य चन्द्रवर्णनं	१०६४ .. ११०२
कवेः स्वदर्पपरिहारपूर्वकस्वातिशयोक्तिसहित-सर्गसमाप्तिः	११०२ .. ११०८

उत्तरनैषधस्य शुद्धिपत्रं ।

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	शुद्धं
१	८।१२	स्वयम्वरो	स्वयंवरो
६	८	निषेधा	निषेधा
७	१७	ग्रामीति	ग्रामीनि
७	२०	स्वगाधे	स्वगाधे
८	३	वन्दि	वन्दि
८	२।२०।२२	बिम्ब	बिम्ब
		अत्र पुस्तके यत्र यत्र स्वयम्बरेति बिम्बेति दृश्यते तत्र तत्र स्वयंवरेति विम्बेति ज्ञातव्यं	
१०	५	रम्भा	रम्भा
११	१२	षष्ठी	षष्ठी
१२	१८	न	नु
१३	१८	वंशं	वंशं
१५	२०	वह्निः	वह्निः
१८	२१	वचदीय	वचनीय
१९	२१	लापि	लपि
६६	२१	वल्लभ	वल्लभ
७२	१३	वेलायां	वेलायां
७२	१७	न्तय	न्तव्य
७३	१०	भस्माद्दरेगो	भस्माद्दरगो
७३	२	स्रजस्येष	स्रजस्येष
७५	२०	धवन	धवल
८०	१४	एष्टं	एष्टं
१०९	१०	चवखण्डयति	व्यवखण्डयति
११९	१३।२०	निबिड। बिन्दु	निविड। विन्दु
१३१	९	वह्निः	वह्निः
१५७	१३	बद्धमुष्ठि	बद्धमुष्टि
२५९	१४	सम्वाद	संवाद

पृष्ठाङ्क	पङ्क्त्यङ्क	अशुद्ध	शुद्ध
१८३	१८	सम्वलित	संवलित
१८७	४	सम्विभाग	संविभाग
१८८	४	विडौज'	विडौजः
१९३	१५	नवल	नलव
१९५	१५	युक्तान्तर	युक्त्यन्तर
२०८	११	नुकूला	नुकूल
२१८	९	धूमावलि	धूमावलि
२३५	१३	विभ्रतौ	विभ्रतो
२३७	४।६।२	दीमाया। निश्वाक-रुचरस	दीमया। निश्वाक-रुचरस
"	१३	करुणरस	करुणरस
२५२	१४	आकालिक	आकाल्निक
२७०	१६	उदीता	उदीरिता
२७७	६	ववाधे	ववाधे
२९५	१२	परस्परेग	परस्परेण
२९७	९	सर्व्वोऽपि	सर्व्वा अपि
२९९	१०	अस्तु	अस्तु
३०१	५	विभायाः	विभायाः
३३५	२३	इत्यनुमान	इत्यनुमान
३४०	२१	अभ्योद्यत्	अभ्योद्यत
३५६	२०	कुर्व्वत	कुर्व्वन
३५८	५	विधुन्वती	विधुन्वती
३६१	३	धनुर्विद्या	धनुर्विद्या
"	१०	आसितुर्वञ्चसि	आसितुर्वञ्चसि
३६५	१०	ऊर्द्धित	ऊर्द्धित
३७२	१४	यद्वधेन	यद्वधेन
३७८	७	एवमाहेन	एवमाहेन
३८२	१२	काटक	कटक
३८४	८	सहृय	सहृय
३८४	१५	दग्धानि	बद्धानि

पृष्ठाङ्क	पंक्त्यङ्क	अशुद्ध	शुद्ध
३८५	७	द्वैमत्यात्	वैमत्यान्
३८५	१४	दुभेऽपि	दुभे अपि
३८७	१७	अपहरत्	अपहरन्
३९४	८	मुक्थे	मुक्तो
३९९	१०	वारम्वारं	वारंवारं
४०८	१३	ऽत एव	अत एव
४२२	१४	वधभयं	बधभयं
४२६	५	करोत्युचैरंञ्जनं	करोत्युचैरञ्जनं
४३२	१६	वाल्ये	बाल्ये
४३३	२	उज्वल	उज्ज्वल
४५१	३	स्थूलोऽ	स्थूलोऽहं
४५४	१५	लङ्घितः	लङ्घिता
४५८	१५	पण्डितमन्यै	पण्डितम्मन्यैः
४६८	१६	अशरीरं	अशरीरं
४७७	१९	रूढयाः	रूढायाः
४८५	१०	कणाकोर्मुं	कणाकोसुं
४९४	१४	चार्वाकं	चार्वाक
४९६	१२	छेन	छेन
४९७	६	शिखिन्नग्ने	शिखिन्नमे
५०७	१५	इर्ष्याजुषः	ईर्ष्याजुषः
५१५	५	वादृशं भक्ति	तादृशभक्ति
५३९	६	गालीप्रदानमेव	गालिप्रदानमेव
५४२	१२	कर्त्तभिप्राये	कर्त्तभिप्राये
५५३	१७	दृष्ट्वा	दृष्ट्वा
५५५	४	ददर्शकं	ददर्शकं
५६०	४	छद । काया	च्छद । च्छाया
"	१९	भावक्तता	भावक्तता
"	२०	प्रसून । उज्वल	प्रसूने । उज्ज्वल
५६४	१३	मलितं	मलिनं
"	१६।१८	आहार्यां	आहार्य्यां

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	शुद्धं
५६९	७	स्डा	स्द्या
५७४	११	नलयोर्रते	नलयोरते
५७६	११	बाद्यविशेष	वाद्यविशेष
५८२	६	ग्रथितैः	ग्रंथितैः
५८५	४	र्रति	रति
५८७	३	न प्राप्तं च्यत्यल्पं प्रापीत्यर्थः ।	प्राप्तं च्यत्यल्पं न प्रापीत्यर्थः
५९८	१	मूलदसीय	मूलमदसीय
६०८	२	वागुपमर्दे	'वाक्मोपमर्दे
६१६	१५	स तेन	सा तेन
६२०	१५	धुनति	धृति
"	१८	विश्रंस	विश्रय.
६२२	११	दिव्ययुवतेर्रम्भा	दिव्ययुवतेरम्भा
"	१२	मेति	सेति
६३५	१४	केलतीमदनयोर्र-तिकामयो	केलतिमदनयोर तिकामयो
६४२	२०	यस्याः	यस्य
६४३	१४	वीक्षात्	वीच्छ्यात्
६८८	१५	च्छायायां	च्छ द्वायां
६९६	१४	छवि	च्छवि
७५०	१०	नजाः	नजः
"	९	वा	चा
७५५	१४	विच्छेता	विच्छेत्ता
७८९	९	मैव	सैव
८०६	२२	दष्ट्	रुष्ट्
७७८	२०	ह्रदस्य	हृदयस्य
७८६	१५	स्याप	स्वप
८१०	१०	दम्यादेशा	दम्पादेशा
८१४	५	स्पृष्ट्	स्पृष्ट्
८१६	२१	मुसात्	मुखात्

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	शुद्धं
८३२	५	पूर्सं	पूर्सां
८४२	१	बधित	बन्धित
८६०	१२	ग्रन्थः	ग्रन्थिः
८७२	१	निर्वेद्ये	निवेद्ये
८७७	१८	च्युत	त्यत
८९३	१	दज	ध्वज
८९९	४	बवन्ध	बबन्ध
९००	१	नर्हं	नर्हैं
९०२	१३	रजु	ऋजु
९०५	१८	विभ	विभ
९०७	१६	ह्रजि	ह्रलि
९०८	१७	वज्र	वज्र
९१६	६	यय	यद्
९५१	६	समौद्धृत्यं	समौद्धृत्यं
९६३	१२	नयनान्दकारिणं	नयनानन्दकारिणं
९६६	९	गन्तु	गन्तुं
९६९	१९	त्वद्भुवौ	त्वद् भुवौ
९७४	३	रज्वा	रज्ज्वा
”	१२	विशे	विशेषे
९७९	१०	भिन्दतीति	भिन्दन्तीति
९८३	१४	मृगमतां	मृगयतां
९८५	२	रागण	रागेण
१०११	१३	चोज्वलैः	चोज्ज्वलैः
१०२७	९	उपयानन्तर	उदयानन्तर
१०३१	६	वत्वा	वत्त्वा
१०३५	१८	उपचिचोपि	उपचितोपि
१०३८	१३	पौष्टिकाति	पौष्टिकानि
१०४५	२।८	विभर्त्तिं	विभर्त्तिं
१०४७	२	विधिना	विधुना
१०४८	१८	याथात्म्य	याथार्थ्यं

द्वादशः सर्गः ।

ॐ गणेशाय नमः ।

प्रियाक्रियालम्ब्य विलम्बमाविला
विलासिनः कुण्डिनमण्डनायितं ।
समाजमाजग्मुरथो रथोत्तमा-
स्तमासमुद्रादपरेऽपरे नृपाः ॥ १ ॥

इदानीं नूतनसमागतराजवर्णनार्थं द्वादशं सर्गमारभते ॥ प्रियेति ॥ अथो अनन्तरं अपरे अन्ये नृपा आसमुद्रात् समुद्रमवधीकृत्य दिगन्तेभ्यः सकाशादित्यर्थः । तं कुण्डिनस्य मण्डनायितं भूषणवदाचरितमलङ्कारकं समाजं स्वयम्वरसभामाजग्मुः । किम्भूताः प्रियाभ्यः स्वनायिकाभ्यः सकाशाद्या क्रीः तासामनुरागजनितमुखदाक्षिण्येन कृत्वा विलम्ब स्थैर्यमालम्ब्य आविलाः व्याकुलान्तःकरणाः । प्रियामुखदाक्षिण्यानुरोधेनाकाले विलम्बे जाते भैमीस्वयम्वरो जातो माऽभूदिति बुद्ध्या नातिसोत्साहाः । तथा विलासिनः शृङ्गारभङ्गीसहिताः । तथा रथोत्तमाः येषां रथा इत्यनेन विलम्बे जातेऽपि शीघ्रागमन सूचितं । विलासिनः वीकषल्लसेति घिनुण् (पा० ३ । २ । १४३ ।) रथैरुत्तमा इति समासः । अपरेऽपरे । वीप्सायां द्विरुक्तिः ॥ १ ॥

ततः स भैम्या ववृते वृते नृपै-
र्विनिःश्वसद्भिः सदसि स्वयम्वरः।
चिरागतैस्तर्कितत‌द्विरागितैः
स्फुरद्भिरानन्दमहार्णवैर्नवैः॥ २॥
चलत्पदस्तत्पदयन्त्रणेङ्गित-
स्फुटाश्रयामासयति स्म राजके।
श्रमं गता यानगतावपीयमि-
त्युदीर्य्य धुर्य्यः कपटाज्जनीज्जनः॥ ३॥

तत इति। ततः सदसि समाजे स भैम्याः स्वयम्बरो ववृते। किम्भूते सदसि। भैम्याः स्वस्मिन् वैराग्येण विनिःश्वसद्भिर्विशेषेण मुक्तश्वासैश्चिरागतैः पूर्व्वमायातैर्नृपैर्वृते। तथा तर्किता ऊहितास्तेषु पूर्व्वागतेषु राजसु विरागिता अर्थाद्भैम्या यैस्तैः। स्फुरद्भिः शृङ्गारभङ्ग्या प्रकाशमानैः। तथा एतेन हतान् स्वयम्बरशेषं प्राप्तानस्मानियं प्रायेण वरिष्यतीति बुद्ध्या आनन्दस्य महार्णवैरगाधसमुद्रैः प्रमुदिततरैर्नवैस्तत्कालसमागतैर्नृपैर्वृते॥ २॥

चलदिति। चलन्ति पदानि यस्य पुरस्तात् गच्छन् धुरं वहति धुर्य्यः शिविकादण्डवाही जनः जनीं भैमीं राजके राजसङ्घमध्ये भ्रामयति स्म अभ्यापयत्। किं कृत्वा। यानगतावपि शिविकारोहणेनापि गमने सत्यपि इयं भैमी श्रमङ्गता निःसहा जातेति कपटाद्व्याजात् उदीर्य्य उक्त्वा। किम्भूता शिविका पटान्तरितेन तत्पदेन भैमीचरणेन यद्यन्त्रणं यन्त्रणा वा पीडनं धुर्य्यस्य तदेव यदिङ्गितं अवस्थापनसूचिका चेष्टा

नृपानुपक्रम्य विभूषितासनान्
सनातनी सा सुषुवे सरस्वती ।
विहारमारभ्य सरस्वतीः सुधा-
सरःस्वतीवार्द्रतनूरनूत्थिताः ॥ ४ ॥
वृणीष्व वर्णेन सुवर्णकेतकी-
प्रसूनपर्णा*दृतुपर्णमादृतं ।

तेन स्फुट आशयो नवनृपदिदृक्षामात्रविषयोऽभिप्रायो यस्या-स्तां । जनीं । जायतेऽस्यां गर्भ इति जनिघसिभ्यां चेति औणा-दिक इ प्रत्यये जनिवध्योरिति (पा॰ ७ । ३ । ३५ ।) वृद्धिनिषेधे कृदिकारादिति (पा॰ ४ । १ । ४१ । सू॰ वार्तिकेन ङीष् ॥ ३ ॥

नृपानिति । सा सनातनी नित्या सरस्वती देवता विभूषितं स्वीयसौन्दर्य्येणालङ्कृतमासनं यैस्तान्नृपानुपक्रम्योद्दिश्य सरस्व-तीर्वाचः सुषुवे उवाचेत्यर्थः । किम्भूता वाचः । सुधासरस्सु अमृ-तसमुद्रेषु विहारं जलक्रीडामारभ्य स्नातीवातितरामार्द्र-तनूः । तथाऽनु पश्चादविलम्ब्यैव उत्थितास्तस्मान्निर्गताः । अति मधुरा इत्यर्थः । सनाभवा । अव्ययत्वात्त्युन्तुट् च ॥ ४ ॥

वृणीष्वेति । गौरत्वलक्षणेन वर्णेन सुवर्णकेतकीप्रसूनस्य गौरत्वलक्षणादर्णादादृतं प्रेमास्पदीकृतं तस्मादधिकं वा अति गौरं सुकुमारशरीरं ऋतुपर्णनामानं नृपं त्वं वृणीष्व । अय-मवनीपतिः भवन्मयस्त्वदेकचित्तः सन् निजामात्मीयां पर-म्परायातां पावनीं पवित्रीकरणशीलां अयोध्यां मुक्तिपुरीमपि

* पर्णादिति टीकासम्मतः पाठः ।

निजामयोध्यामपि पावनीमयं
भवन्मयो ध्यायति नावनीपतिः ॥ ५ ॥
न पीयतां नाम चकोरजिह्वया
कथञ्चिदेतन्मुखचन्द्रचन्द्रिका ।

न ध्यायति न स्मरति । परमानन्दरूपत्वान्मुक्तेस्सकाशादपि तव प्राप्तिरेतस्याधिकेत्यर्थः । अन्योऽपि विलासी गुणवतीमपि निजां प्रियामचिन्तयन्नन्यामेव ध्यायतीत्युक्तिः । लभ्यतितरामनुरक्तोऽयमेतं वृणीष्वेति भावः । वर्णात् । पञ्चमी विभक्ते इति (पा° २ । ३ । ४२ ।) पञ्चमी । भवन्मयः । सर्व्वनाम्नो वृत्तिमात्रे स्त्रियाः पुंवत् (पा° ६ । ३ । ३४ । सू° वार्तिकेन पुंवद्भावः ॥ ५ ॥

नेति । हे भैमि चकोरजिह्वया एतस्य च्रतुपर्णस्य मुखमेवचन्द्रस्तस्य चन्द्रिका प्रसन्नतारूपा ज्योत्स्ना कथञ्चित्केनापि प्रकारेण न पीयतां नाम । चकोरजिह्वया सत्यं चन्द्रचन्द्रिका पीयते । इयं त्वलीकमुखचन्द्रिकेति पीयतां मा वा । अत्रास्माकमौदासीन्यमित्यर्थः । परन्तु चिरं भवन्मुखस्पृशौ त्वदीयमुखमेवनतत्परे चकोरस्य चक्षुषी इमां एतन्मुखचन्द्रचन्द्रिकां किमिति न आचामयसे पाययसे अपि तु पाययस्व । अलीकत्वात्तादृग्पानाभावात् चकोरजिह्वया पानेऽकृतेऽपि तथा सुन्दरत्वात् वर्णनायामस्मदादीनामशक्तत्वेऽपि तादृगाह्लादकत्वस्य सौन्दर्यस्य च प्रत्यक्षेण द्रष्टुं शक्यत्वादेतन्मुखचन्द्रचन्द्रिकां चक्षुषी पाययस्वेत्यर्थः । अथ चकोरजिह्वया भवन्मुखमेवाया अक्षतत्वादेतन्मुखचन्द्रचन्द्रिकापानं कर्त्तुमशक्यमिति युक्तं । त्वदीयचक्षुर्भ्यां

इमां किमाचामयसे न चक्षुषी
चिरं चकोरस्य भवन्मुखस्पृशी ॥ ६ ॥

तु चिरकालमुत्तमस्य भवन्मुखस्य सेवनात् तयोरेतन्मुखचन्द्रचन्द्रिकापानं युक्तं । उत्तमसेवया हि दुष्प्रापमपि वस्तु सुप्रापं भवतीत्याशयः । चिरकालमेतन्मुखकान्तिं सादरं किं न पश्यस्यपि तु पश्यैनं वृणीष्वेति भावः । यद्वा जिह्वाया अन्य एवास्वाद्ये सामर्थ्यादेतन्मुखचन्द्रचन्द्रिकायास्त्वतिबहुलाच्चकोरजिह्वयेयं कथञ्चिन्न पीयतां नाम । त्वन्मुखस्पृशोश्चकोरनेत्रयोस्तु पानं युक्तमल्पीयसोरपि नेत्रयोर्भूयसो विषयस्य ग्रहणे सामर्थ्यसद्भावात् किं पुनर्विशालयोरनयोरिति भावः । एते चकोरस्यैव नेत्रे भवन्मुखं स्पृशत इति नेत्रयोरमणीयत्वं चन्द्रिकापानयोग्यत्वं विलोकनचातुर्य्यं च सूचितं । अत्र चमेः प्रत्यवसानार्थत्वाद्गतिबुद्धीत्यादिना (पा॰ १ । ४ । ५२ ।) चक्षुषोः कर्म्मत्वं । णिचश्चेति (पा॰ १ । ३ । ७४ ।) कर्त्रभिप्राये क्रियाफलविवक्षायामात्मनेपदे प्राप्तेऽपि निगरणत्वान्निगरणचलनार्थेभ्यश्चेति (पा॰ १ । ३ । ८७ ।) परस्मैपदप्राप्तेराचामयस इति चिन्त्यं । एवं सति चकोरस्य चक्षुषी चिरं भवन्मुखस्पृशी वर्त्तेते । यतः त्वन्मुखसेवां बहुकालं कुर्व्वात इत्यर्थः । अत एवेमामेतन्मुखचन्द्रचन्द्रिकां किं नाचामयसे सामर्थ्याच्चक्षुर्भ्यामिति ध्येयं । इति समाधानं । आचमनमाचामः सोऽस्या अस्तीति आचामवती करोतीत्यर्थे तत्करोतीति (पा॰ ३ । १ । २६ ।) सुबन्ध्यवार्तिकेणान्तस्य मचणप्रतिपदोक्तपरिभाषया प्रतिपदोक्त-

अपां विहारे तव हारविभ्रमं
करोतु नीरे पृषदुत्करस्तरन्।
कठोरपीनोच्चकुचद्वयीतट-
त्रुटत्तरः सारवसारवोर्म्मिजः ॥ ७ ॥

प्रत्यवसानाभावात् निगरणादि (पा॰ १। ३। ८७।) सूत्रेणानुवृत्तपरस्मैपदसञ्ज्ञया परस्मैपदस्य विधानात्सञ्ज्ञापूर्व्वको विधिरनित्य इति परिभाषयाच परस्मैपदं न भवतीति वा। आचाम इति न कम्यमिचमाम् इति मित्वनिषेधाद्ध्रस्वलाभावः ॥ ६ ॥

अपामिति। हे भैमि आरवेण सहिताः सारवाःसरय्वा इमे सारवा एवम्भूता ऊर्म्मयस्तेभ्यो जातः पृषदुत्करो बिन्दुसमूहः अपां विहारे अनेन सह जलक्रीडायां सत्यां तव हारविभ्रमं त्वत्सन्निहारविलासं करोतु। किम्भूतः। नीरे तरन् प्लवमानः। तथा कठोराऽतिकठिना पीना उच्चा त्वदीया कुचद्वयी स्तनद्वयी तस्यास्तटे परिसरे त्रुटत्तर अतिशयेन त्रुट्यत् विशीर्य्यमाणतरः। जलक्रीडावशाद्विच्छिन्नस्त्वदीयो मुक्ताहार इव शोभतां। अथ च पश्यतो लोकस्य भैमीहारः किमयमिति विशिष्टां भ्रान्तिं जनयतु। विगतहारे देशे हारविलास इति विरोधश्च। अथ च पृषदुत्करो हरिणसङ्घः क्रीडाप्रदेशे क्रीडां करोत्विति युक्तं। सरयूक्रीडाप्राप्त्यर्थं एनं वृणीष्वेति भावः। देविकायां सरय्वां च भवेदाविकसारवावित्यमरः। दाण्डिनायनादिसूत्रेण (पा॰ ६। ४। १७४।) साधुः ॥ ७ ॥

अखानि सिन्धुः समपूरि गङ्गया
कुले किलास्य प्रसभं स भंत्स्यते ।
विलङ्घ्यते चास्य यशःशतैरहो
सतां महत्सम्मुखधावि पौरुषं ॥ ८ ॥
एतद्यशःक्षीरधिपूरगाहि
पतत्यगाधे वचनं कवीनां ।

अखानीति । अस्य कुले वंशे पूर्व्वजैः सगरपुत्रैः इन्द्रनीताश्वाहरणार्थं सिन्धुः समुद्रः पातालपर्य्यन्तं अखानि खातः । कपिलशापदग्धानां तेषामेवोद्धरणार्थं भगीरथेनानीतया गङ्गया समपूरि पूर्णीकृतः । तथा श्रीरघुनाथेन रावणवधार्थं प्रसभं हठेन स सिन्धुः भंत्स्यते बन्धनं नेष्यते किलेति पुराणप्रसिद्धमेतत् । स एवेदानीं अस्य यशःशतैः विलङ्घ्यते च । सर्व्वे समुद्रमेव प्रति पौरुषं किमिति कृतवन्त इत्यत आह अहो युक्तमेतत् । सतां महतां पौरुषं महतामेव सम्मुखं धावति प्रसरतीत्येवंशीलं । क्षुद्रान् कृपयोपेक्षत एवंविधा अस्य पूर्व्वजाः । श्रीरघुनाथस्य यस्मिन् वंशे समुत्पत्स्यते तस्मिन् वंशे समुत्पन्नो ऽयं अस्य यशांसि समुद्रपारगामीति एवं वर्णयेति भावः । भंत्स्यते । बधेः कर्म्मणि लृटि यभातेश्चर्ले च रूपं ॥ ८ ॥

एतदिति । एतस्य यश एव क्षीरधेर्यः पूरः तं गाहते एवंशीलं एतदीययशोवर्णकं कवीनां वचनं आगधे अतलस्पर्शे स्थाने पतति निमज्जति । स्तोतुमसामर्थ्यादागगोचरोऽस्य यशःसमुद्र इत्यर्थः । अन्योऽपि समुद्रः प्रवाहावगाही अगाधे बुडति । तथा

एतद्गुणानां गणनाङ्कपातः
प्रत्यर्थिकीर्त्तीः खटिकाः चिणोति ॥ ९ ॥
भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यता-
मध्युष्टापि हि कोटिरस्य समरे रोमाणि सत्त्वाङ्कुराः ।
नीतः संयति वन्दिभिः श्रुतिपथं यन्नामवर्णावली-
मन्त्रः स्तम्भयति प्रतिचितिभुजां दोस्तम्भकुम्भीनसान्॥१०॥

एतस्य शौर्यादीनां गुणानां गणनार्थं अङ्कपातोऽङ्कविन्यासः प्रत्यर्थिनां वैरिणां कीर्त्तीरिव खटिकाः चिणोति छिनत्ति । बह्वङ्कविन्यासे हि खटिकाचयो भवति । एतद्गुणा अत्यतिभूयस्त्वाद्गणयितुमशक्याः । एतद्गुणानां पुरस्तादरिकीर्त्तिर्न प्रतिभासत इत्यर्थः । एनं वृणीष्वेत्यर्थः । चिणोति । लघूपधत्वात् (पा॰ ७।३।८६।) गुणप्रसक्तावपि सञ्ज्ञापूर्व्वकविधेरनित्यत्वाद्गुणाभावः ॥९॥

भास्वदिति । हे भैमि भास्वतो वंशस्य करीरतां तदङ्कुरत्वं दधानः सूर्य्यवंशोत्पन्नो वयःसन्धौ वर्त्तमानः अथ च मुक्ताफलत्वाद्भास्वान्यो वंशो वेणुस्तदङ्कुरत्वं दधदतितेजस्वी अयमृतुपर्णनामा वीरः कथं केन प्रकारेण कथ्यतां वर्ण्यतां अपि तु वर्णयितुं न शक्यत इत्यर्थः । हि यस्मात् समरे वर्त्तमानस्यास्य अध्युष्टापि सार्द्धत्रयोति प्रसिद्धापि कोटिः सार्द्धत्रिकोटीनि मानुषशरीरे स्थितानि रोमाणि सत्त्वस्यान्तर्वीररसोत्सेकस्याङ्कुरा इवाङ्कुराः वीररसोत्साहेन सङ्ग्रामे रोमाञ्चयुक्तोऽयं भवतीत्यर्थः । तथा अस्य नामवर्णावलीमन्त्रः ऋतुपर्ण इति नामा-

* चितिभृतामिति टीकासम्मतः पाठान्तरः ।

तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः।

शरपङ्क्तिरूपो मन्त्रः संयति वन्दिभिः श्रुतिपथं कर्णपथं नीतः प्रापितः सन् प्रतिक्षितिभृतां रिपूणां देहो वाहव एव स्तम्भास्त एव शौर्याद्दैर्घ्याच्च ये कुम्भीनसाः सर्पास्तान् स्तम्भयति। एतन्नाममात्राकर्णनाद्भीतानां शत्रूणां वाहवो युद्धाय न प्रसरन्तीत्यर्थः। सिद्धवैदिकमन्त्रश्रवणाच्च फणिनां स्तम्भो भवति। अध्युष्टेति सार्द्धकोटित्रयस्य सञ्ज्ञा। अङ्कुरो नित्यपुंलिङ्गः। कुम्भीनसो लेलिहान इत्यमरः॥ १०॥

तादृगिति। हे भैमि अस्य राज्ञः स प्रताप एव तपनः सूर्य्यः कामाङ्गिरां पारं परतीरं न गाहते। कस्यापि वर्णयितुमशक्य इत्यर्थः। स कः। अहं तादृग्दीर्घं चतुर्दशमन्वन्तरपरिमितत्वान्महापरिमाणं विरिञ्चिवासरं ब्रह्मदिनं तस्य विधौ करणे यस्य यदीयचाक्षतेजोरूपस्य सूर्य्यस्य कर्तृतां निर्मातृतां जानामि। सूर्य्यस्य दिवसकर्तृत्वाद् ब्राह्ममपि दिनं दिनत्वात् सूर्य्येण कर्त्तव्यं तच्चतुर्युगसहस्रपरिमाणत्वादेतद्दिननिर्म्माता सूर्य्येण निर्म्मातुमशक्यमिति तद्दिवसचणेन चिरकालावस्थायिनाऽतिदीर्घेणैतदीयप्रतापतपनेनैव निर्म्मातुं शक्यं न त्वन्येनेत्यहमुत्प्रेक्ष इत्यर्थः। तथा अहं अम्बुधिपयसः पूरे प्रवाहमध्ये वाडवो वडवानलः यस्यैतदीयप्रतापतपनस्य प्रतिबिम्बरूप इति शङ्के। जलानलयोः सहावस्थानविरोधात् वाडवोऽग्निर्न भवति किन्तु प्रतापसूर्य्यस्य सलिले प्रतिबिम्बं भवति। किम्भूतः सः। व्योम-

व्योमव्यापिविपक्षराजकयशस्ताराः पराभावुकः
कासामस्य न स प्रतापतपनः पारङ्गिरां गाहते ॥ ११ ॥
द्वेष्याकीर्त्तिकलिन्दशैलसुतया नद्याऽस्य यद्दोर्द्वयी-
कीर्त्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे।
तत्तस्मिन्विनिमज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥ १२ ॥

व्यापिन्यो विपक्षराजकस्य रिपुराजकस्याप्यलायशांस्येव ताराः नक्षत्राणि स्वप्रभावेण पराभावुकः तिरस्कर्त्ता। सूर्य्येणापि व्योमव्यापिवैरिचन्द्रस्य चन्द्रिकारूपं यशो नक्षत्राणि च पराभूयन्ते। एतत्प्रतापसूर्य्यस्य पुरस्तादैरियशांसि न प्रसरन्तीत्यर्थः। पराभावुकः। लषपतपदस्थाभूवृषेत्युकञ्। ३। २। १५४ ॥ तद्योगे न लोकेति षष्ठीनिषेधात् (पा० २। ३। ६९।) तारा इति द्वितीया ॥ ११ ॥

द्वेष्येति। अस्य राज्ञः दोर्द्वयी बाहुद्वयं तया जनिता कीर्त्तिश्रेणिः कीर्त्तिपरम्परा तन्मयी तद्रूपा श्वेतत्वाद्गङ्गा द्वेष्याणां रिपूणां पलायनाज्जनिताऽकीर्त्तिः सैव कलिन्दशैलसुता यमुना तया नद्या सह यद्यस्मात् रणप्राङ्गणे सङ्ग्रामभूमौ समागममगात् संयोगं प्राप तत्तस्मात् कारणात् तस्मिन् प्रयागमञ्ज्ञके गङ्गायमुनासङ्गमे बाहुजभटैः क्षत्रिययोधैः शूरतरैः विशेषेण निमज्य लक्षणया देहं त्यक्त्वा रम्भापरीरम्भानन्दस्य निकेते नन्दनवने देवोद्याने क्रीडायां यः आदर आसक्तिस्तस्याडम्बरो बाहुल्यं आरम्भि आरब्धं। योऽपि प्रयागे

इति श्रुतिस्वादितनद्गुणस्तुतिः *
सरस्वतीवाङ्मयविस्मयोत्थया ।
शिरस्तिरःकम्पनयैव भीमजा
न तं मनोरन्वयमन्वमन्यत ॥ १३ ॥
युवान्तरं सा वचसामधीश्वरा
स्वरामृतन्यक्कृतमत्तकोकिला ।

निमज्जति सोऽपि सितासिते सरिते इत्यादि श्रुत्या* नन्दनवने रम्भाद्यप्सरोभिः सह क्रीडति । वाङ्गजः चत्रियो विराडित्यमरः । आरम्भि । रभेरशब्लिटोरिति नुम् (पा० ७।१।६३।) परीरम्भेति । उपसर्गस्य घञीति (पा० ६।३।१२२)दीर्घः॥ १२॥

इतीति । भीमजा शिरसस्तिरःकम्पनयैव वक्रचालनयैव कृत्वा तं मनोरन्वयं सूर्य्यपुत्रं मनुवंशमनुत्पन्नस्तुपर्णं नान्वमन्यत नाङ्गीचकार। किम्भूता । इति पूर्व्वोक्तप्रकारेण श्रुतिभ्यां कर्णाभ्यां स्वादिता सादरमाकर्षिता तद्गुणस्तुतिर्यया । किम्भूतया । सरस्वत्या वाङ्मयेन जनितो विस्मय आश्चर्यं तस्मादुत्थयोत्पन्नया । शिरःकम्पनस्याभयसूचकत्वादाश्चर्य्याभिनयस्ततः कम्पस्तन्निराकरणार्थो जात इत्यर्थः । अस्य मनुवंशत्वात्स्वस्य सोमवंशे साभिलाषत्वात् कन्याभिलषितसौन्दर्य्याद्यवर्णनाद्वाऽननुरागः॥१३॥

युवेति । सा वचसामधीश्वरा सरस्वती निशाकरस्य शातिः

---

* सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति ।
ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ।
इति ऋग्वेदः ।

* शुश्रुतिरिति पाठान्तरं । सं० मु० पु० ।

शशंस संसक्तकरैव तद्दिशा
निशाकरज्यानिमुखीमिमां प्रति ॥ १४ ॥
न पाण्ड्यभूमण्डनमेणलोचने
विलोचनेनापि नृपं पिपाससि ।
शशिप्रकाशाननमेनमीक्षितुं
तरङ्गयाऽपाङ्गदिशा दृशस्त्विषः ॥ १५ ॥

सदृशं मुखं यस्यास्तां चन्द्राननामिमां प्रति युवान्तरं अन्यं वरं शशंस वर्णयामास। किम्भूता। स्वरामृतेन न्यक्कृतस्निग्धस्वनः मत्तो वसन्तहृष्टः कोकिलो यया। तथा हि तद्दिशा यस्यां दिशि वर्णनीयो युवा तिष्ठति तद्दिशा तदीयया दिशाऽऽभिमुख्येन संसक्तकरैव सम्बद्धहस्ता हस्तेन तं निर्दिश्येति यावत्। सरस्वतीं वाणीं माधुर्य्येणैवाग्रहणोऽस्तु राजन्यनुरागेणेति स्वरामृतपदेन सूचितं। ईश्वरेति। स्थेशेति वरच् (पा॰ ३।२।१७५।) अथ प्राणेश्वरीत्यादेः कथं साधुत्वं। अन्येभ्योऽपि दृश्यन्त इति (पा॰ ३।२।७५।) ईशेर्वनिपि ङीप्रयोः सतोरित्यवेहि ॥ १४ ॥

नेति। हे एणलोचने मृगाक्षि त्वं पाण्ड्यभूमण्डनं नेत्राभ्यां न पिपाससि परमेकेनापि न पाण्ड्यदेशस्य चूडामणिं मुकुटरत्नभूतं नृपं पिपाससि न न पश्यसि तावत् पातुमिच्छसि नेत्यर्थः। अनुचितमेतदित्यर्थः। अधरेण तावन्न पिपाससि परं विलोचनेनापि न पिपाससीति द्वाभ्यां नेत्राभ्यां न पिपाससि परमेकेनापि न पिपाससीति वा। तस्मात् त्वं शशिवत् प्रकाशं प्रसन्नं आननं यस्य तमेनं नृपं ईक्षितुं दृशस्त्विषः नेत्ररश्मीन्

भुवि भ्रमित्वाऽनवलम्बमम्बरे
विहर्त्तुमभ्याससपरम्परापरा ।
अहो महावंशममुं समाश्रिता
सकौतुकं नृत्यति कीर्त्तिनर्त्तकी ॥ १६ ॥
इतो भिया भूपतिभिर्वनं वना-

अपाङ्गदिशा नेत्रप्रान्तदेशेन तरङ्गय अतिसुन्दरमेनं कटाक्षै-र्विलोकयेति भावः ॥ १५ ॥

भुवीति। हे भैमि महावंशं महाकुलीनं अमुं समाश्रिता एतदीयेति यावत् एवंविधा कीर्त्तिरूपा नर्त्तकी सकौतुकं यथा तथा धनाभिलापराहित्येन नृत्यति अहो आश्चर्यं लोकगतं कौतुकं नर्त्तकीगतमिति न पौनरुक्तं। किम्भूता। पूर्व्वं भुवि भ्रमित्वा सकलं भूमण्डलं व्याप्येत्यर्थः। पश्चादनवलम्बं यथा तथाम्बरे गगने विहर्त्तुं चरणाभ्यासपरम्परायां परा आसक्ताऽभ्यासपरम्परया चापरोत्कृष्टा एतदीया कीर्त्तिर्भूलोकं पूर्व्वमभिव्याप्य लोकान्तरं व्याप्नोतीत्यर्थः। मेनाद्यनवलम्बनेन महोत्साहवन्तममुमिति वा। नर्त्तक्यपि पूर्व्वं भूमौ भ्रमित्वा निराश्रयं गगने नर्त्तितुं अभ्यासपरा सती महान्तं वेणुमाश्रित्य वेणोरुपरि सकौतुकं नृत्यति। अथच महान्तं पृष्ठवंशं आश्रिता नर्त्तकीति वा। या हि झटिति भूमावपि गन्तुं न शक्नोति सा निरालम्बं महान्तं वेणुमाश्रित्य नृत्यतीत्यतीव चित्रं इत्यादि ज्ञातव्यं। वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि चेति विश्वः ॥ १६ ॥

इत इति। इत अस्माद्राज्ञः सकाशात् भिया भयेन वनाद्-

दटद्भिरुच्चैरटवीत्वमीयुषी ।
निजापि साऽवापि चिरात्पुनः पुरी
पुनः समध्यासि विलासमन्दिरं ॥ १७ ॥
आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्त्तिः
• सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः ।

नान्तरमटद्भिर्गच्छद्भिर्भूपतिभिरुच्चैरतिशयेनाटवीत्वमरण्यानीत्वमीयुषी प्राप्ता सा प्रसिद्धा निजा स्वीयापि पुरी चिरादनान्तरभ्रमात् पुनरवापि प्राप्तं। तथा तत्र पुर्यां स्वं स्वीयं विलासमन्दिरं रतिगृहं पुनरप्यध्यास्यधिष्ठितं वनवृत्त्यैवेत्यर्थः। राज्यभ्रंशद्याप्तेच्छया ऽनेकवारं तत्रागत्य पुनरन्यत्र गत्वा पुनस्तत्रागच्छन्तीत्यर्थः। अनेन वैरिनगराण्युद्वासितानीति भावः। उपेयिवानित्यत्र सूत्रे (पा॰ ३। २। १०९।) उपसर्गस्यातन्त्रत्वादीयुषीत्यत्र क्वसुः ॥ १७ ॥

आसीदिति। हे भैमि अस्मादीरात्पर उत्कृष्टोऽन्यो वा क आसीद्भवेद्वा अपि तु एवंविधोऽयमेव नलन्यः कश्चिदित्यर्थः। किम्भूतः। सीमां समुद्रलक्षणां आ अभिव्याप्य सीमासहितं भूमीवलयं तस्य मलयजालेपनं चन्दनाङ्गरागस्वरूपं नेपथ्यं भूषणं तदेव कीर्त्तिर्यस्य कीर्त्तिचन्दनधवलितसमुद्रमुद्रितभूमण्डलः। तथा सप्तानां अकूपारपारीणां समुद्रपरतीराणां समाहारः सप्ताकूपारपारी सैव सदनं निवासस्थानं यस्य सप्तसमुद्रपरतीरवासी यो जनो लोकस्तेन घनमविच्छिन्नं उद्गीत उच्चैर्गीयमानश्चापप्रतापो यस्य चापस्य प्रतापस्य वा यस्य सः। तथा

वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः ॥१८॥
भङ्गाकीर्त्तिमषीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।

पदयुगे चरणयुगले युगपत्समकालमेव पातिनः पतनशीला नमस्कारकारिणो भूपास्तेषामतिभूयांसि अतिबहूनि यानि चूडारत्नानि तान्येव वर्त्तुलत्वादुज्ज्वलत्वादुडुपत्न्यो नक्षत्ररूपाश्चन्द्रस्त्रियः तासां कराणां किरणानां परिचरणं सर्वतः सञ्चरणं तेन अथ च तासां हस्तैर्यत्परिचरणं चरणसेवा तया कृताऽमन्दं नन्दन्तोऽतितरां समृद्धकान्तयो नखा एवेन्द्रवश्चन्द्रा यस्य चरणपतितसकलराजशिरोमणिकिरणसंवर्द्धितनखकान्तिः । यशस्वी प्रतापवान् अत एव सर्व्वनृपतिवन्द्यचरणः एतादृशः कोऽपि नास्ति तस्मादेनं वृणीष्वेति भावः । अन्यो ऽपि पत्नीकरकृतचरणसंवाहनेन नन्दति ॥ १८ ॥

भङ्गेति । अस्य प्रतापानलः भङ्गेन पराजयेन जनिताऽकीर्त्तिः सैव श्यामलत्वान्मषी तया मलीमसतमा अतितरां मलिनीभूताः प्रत्यर्थिसेनाभटाः शत्रुसैनिकशूराः तेषां श्रेणी समूहः सैव श्यामलात्तिन्दुककाननानि तेषु विलसति विशेषेण दीप्यते। तस्मादेतदीयात्प्रतापानलादुत्पतिता उत्थिता भाल्लासलाटादुद्भूतं भवाचि हरतृतीयनेत्रं भानुः सूर्य्यः हुतभुग्वह्निः जम्भारेरिन्द्रस्य दम्भोलिर्वज्रः एते स्फुलिङ्गाः स्फुटं अग्निकणा इव जगदुत्सङ्गे जगतां भुम्यादीनां मध्ये स्फुरन्ति शोभन्ते ।

तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाचिभानुकृतभुग्जम्भारिदम्भोलयः ॥ १९ ॥
एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियं ॥ २० ॥

तिन्दुकवनानि हि श्यामानि भवन्ति तत्र पतितोऽग्निः चटच-टाशब्दं कुर्व्वन् स्फुलिङ्गान् मुञ्चति। महत्स्वपि हरनेत्रादिषु स्फुलिङ्गत्वारोपेण प्रतापानलस्यातितरां माहात्म्यं सूचितं। यस्य कणा एवम्भूताः स कथम्भूतो भवतीति ॥ १९ ॥

एतदिति। हे भैमि एतस्य पाण्ड्यस्य उग्रसमरस्य प्रेक्षायै उपनम्रा समागताऽमरश्रेणी देवसङ्घः तन्मध्यचरः तस्य मध्ये विद्यमानो देवत्वं प्राप्त इति यावत् एवम्भूतः पृथुर्व्वैण्यः पृथ्वीन्द्रः पुनः क्षितिधराणां पर्व्वतानां क्षेपाय प्रोत्सारणाय धियं बुद्धिं धत्ते। किं कृत्वा सङ्ग्रामाङ्गणस्य सीम्नि मर्य्यादायां जङ्गमानां स्थानात् स्थानान्तरं गच्छतां गिरीणां स्तोमस्य भ्रमाधायिभिः भ्रान्तिं कुर्व्वाणैः चलदुच्चतरगिरितुल्यैः एतस्य दन्तिबलैः निखिलां भुवं आलिङ्गिताङ्गीं व्याप्तदेशां विलोक्य। पूर्व्वं पृथुना स्वधनुःकोट्या जङ्गमपर्व्वतानुत्सार्य्य क्षेत्रादिविभागः कृतः। एतद्गजान् दृष्ट्वा सङ्ग्रामदर्शनार्थमागतेन पृथुना एते पर्व्वता इति बुद्धा एतदुत्सारणे पुनरपि बुद्धिः कृतेत्यर्थः। उच्चतरग-जघटात्वं दारुणरणरसिकत्वस्य सूचितं ॥ २० ॥

प्रशंस दासीङ्गितविद्विदर्भजा-
मितो ननु स्वामिनि पश्य कौतुकं।
यदेष सौधाग्रनटे पटाञ्चले
चलेऽपि काकस्य पदार्पणाग्रहः॥ २१॥
ततस्तदप्रस्तुतभाषितोत्थितैः
सदस्तदश्वेति हसैः सदःसदां।

प्रशंसेति। इङ्गितवित् भैम्यभिप्रायज्ञा काचिद्दासी विदर्भजां शशंस बभाषे। ननु हे स्वामिनि इतोऽस्यां दिशि त्वं कौतुकं पश्य। किं तत्। सौधः सुधाधवलितग्टहं तस्याग्रमूर्द्धदेशस्तत्र वर्त्तमाने नटे चललान्नर्त्तकतुल्ये वायुवशाच्चलेऽपि पटाञ्चले पताकावसनाञ्चले यत् एष काकस्य पदार्पणे चरणस्थापने आग्रहः तत्रोपवेशनार्थं पौनःपुन्येन प्रवृत्तिर्निर्बन्धः तत्कौतुकं पश्येति सम्बन्धः। अननुरक्तायां भैम्यां शृङ्गारचेष्टां भावयतः पाण्ड्यस्यायं यथा पटाञ्चले उपवेशनार्थं काकस्याग्रहोऽनुचितस्तथा। एतस्य पाण्ड्यस्यायं भैम्यां दुरभिनिवेश इति सूचनार्थं सरस्वतीकृततद्वर्णननिवारणार्थं वा इयमुक्तिः। इतः एतद्दर्शनकौतुकात् सकाशादिति वा॥ २१॥

तत इति। ततः तस्या दास्याः पूर्व्वोक्तमप्रस्तुतं भाषितं वचनं तस्मादुत्थितैः सदःसदां सभ्यानां हसैः हास्यैः तत्सदः सा सभा अश्वेति श्वेतीकृतं। तद्वचनं श्रुत्वा सभ्या हसन्ति स्मेत्यर्थः। अतः सदःश्वेतीकरणाद्धेतोरस्य भूपतेर्ग्लानिः लज्जा वैवर्ण्यं

स्फुटाऽजनि म्लानिरतोऽस्य भूपतेः
सिते हि जायेत शितेः सुलक्षता ॥ २२ ॥
ततोऽनु देव्या जगदे महेन्द्रभू-
पुरन्दरं सा जगदेकवन्द्यया।
तदार्जवावर्जिततर्जनीकया
जनी कयाचित्परचित्स्वरूपया ॥ २३ ॥

स्फुटा अजनि। अत्रार्थान्तरन्यासमाह। हि यस्मात् सिते शुभ्रवस्तुनि शितेः कृष्णवर्णस्य सुलक्षता प्रकटता जायेत। सभ्यहास्यवशात् सोऽधिकविवर्णो जात इत्यर्थः। सः स्वत एव श्यामः सभ्यहास्यवशादधिकः श्यामो जात इति वार्थः। शितेति। श्यितिङ् गौल्ये इत्यस्मात् एयन्तात्कर्माणि लुङात्मनेपदं ॥ २२ ॥

तत इति। ततः कयाचिल्लोकोत्तरया अनिर्वचितरूपया देव्या वाण्या महेन्द्रभुवः महेन्द्रनामकपर्व्वतसम्बन्धिनो देशस्य पुरन्दरं स्वामिनं अनु लक्षीकृत्य सा जनी स्वयम्वरा जगदे उक्ता। किम्भूतया जगतः एका देवतान्तरपरित्यागेन वन्द्यया। यतः परा श्रेष्ठा चिज्ज्ञानलक्षणं स्वरूपं यस्यास्तया। तया तस्या भैम्या यदार्जवं ऋजुता तेनावर्जिता वर्णनार्थमूर्द्धीकृता तर्जनी यया। तस्मिन् वर्णनीये नृपे विषये वा देव्या एव वा यदार्जवं कृपा तया। जगदे कर्म्मणि तङ्। वाचयमपुरन्दरौ चेति निपातनात् पुरन्दरः साधुः। तर्जनीकयेति नद्यृतश्चेति कप्। (पा॰ ५।४।१५३) अनुर्लक्षणे (१।४।८४) कर्म्मप्रवचनीयत्वात् पुरन्दरमिति द्वितीया ॥ २३ ॥

स्वयम्वरोद्वाहमहे वृणीष्व हे
महेन्द्रशैलस्य महेन्द्रमागतं ।
कलिङ्गजानां स्वकुचद्वयश्रिया
कलिङ्गजानां शृणु तत्र कुम्भयोः ॥ २४ ॥
अयं किलायात इतीरिपौरवाग्-
भयाद्यदस्य रिपुर्वृथा वनं ।

स्वयमिति । हे भैमि स्वयम्वर उद्वाहस्तन्मह्णे महे उत्सवे आगतं महेन्द्रशैलस्य महेन्द्रं स्वामिनं वृणीष्व । तत्र पर्व्वतोपलचिते देशे कलिङ्गदेशे जातानां गजानां कुम्भयोः स्वकुचद्वयश्रिया सह कलिं समानशोभाख्यद्व्याभिलाषनिमित्तं कलहं शृणु । हस्तिकुम्भास्तत्कुचसाम्यमभिलषिष्यन्ति परं न प्राप्स्यन्तीति भावः । स्वयम्वरोद्वाह एव महः उत्सवो यस्मात्तत्सम्बुद्धिरिति वा ॥ २४ ॥

अयमिति । अयं कलिङ्गदेशाधिप आयातः किल श्रूयत इति ईरयन्तीति ईरिणः पौरास्तेषां वाक् तस्याः सकाशाद्भयं तस्माद्धेतोः अस्य रिपुर्यद्वनं अयात् पलाय्य गतवान् तद्वृथा । रिपुरिति जात्येकवचनं । वैयर्थ्ये हेतुमाह । तान्येव अयं समायात इत्येवंरूपाण्यक्षराणि यासु ताः श्रुताः शुकैरेवाकर्षिताः सकृत्तदीयरिपोरुल्लापगिरः अतिशयितनिद्राप्रमादप्रपाचः एकस्याप्यक्षरस्य व्यत्यासं विना पठद्भिः शुकैर्वनेऽपि स रिपुरत्रासि भीषितः । पलाय्य वने गतानामपि रिपूणां उल्लापप्रलापि-

श्रुतास्तदुत्थापगिरस्तदध्वराः *
पठद्भिरत्रासि शुकैर्वनेऽपि सः ॥ २५ ॥
इतस्त्रसद्विद्रुतभूभृदुज्झिता
प्रियाऽथ दृष्टा वनमानवीजनैः ।
शशंस पृष्टाद्भुतमात्मदेशजं
शशित्विषः शीतलशीलतां किल ॥ २६ ॥

तास्ता गिरो बहुशः पठद्भिः शुकैर्वनेऽपि त्रासिता वैरिणः स्थातुं न शक्नुवन्तीत्यर्थः। अतिशूरोऽयमिति भावः ॥ २५ ॥

इत इति। इत अस्माद्राज्ञः सकाशात्त्रसन्तो भीता अत एव विद्रुताः पलायिता भूभृतो राजानः तैरुज्झिता परित्यक्ता प्रिया स्वस्वप्राणेश्वरी वनमानवीजनैर्भिल्लिजनैर्दृष्टा। अथ पश्चात् आत्मदेशजं भवत्या देशे किमपूर्व्वमिति अद्भुतं पृष्टा सती शशित्विषश्चन्द्रस्य शीतलशीलतां किल प्रसिद्धां हिमस्वभावत्वमेव स्वदेशजातमाश्चर्यं शशंस अकथयत्। स्वदेशे वियोगाभावाच्चन्द्रकराणां शीतलत्वं वने च वियोगादुष्णत्वमित्यर्थः। प्रियेति जात्येकवचनं। भर्तृत्यक्ता वियोगज्वरभराक्रान्ता सती वने चन्द्रकान्तिमुष्णामनुभवतीत्यर्थः ॥ २६ ॥

---

* अधीत्य समास्तर एव तां गिरमिति पाठान्तरः। परन्तु एष न टीकासम्मतः।

इतोऽपि किं वीरयसे न कुर्व्वतो
नृपान्धनुर्व्वाणगुणैर्व्वशंवदान् ।
गुणेन शुद्धेन विधाय निर्भरं
तमेनमुर्व्वीवलयोर्व्वशी वशं ॥ ९७ ॥
एतद्गीतारिनारी गिरिविलविगलद्दासरा निःसरन्ती
स्रक्क्रीडाहंसमोहग्रहिलशिशुम्हशप्रार्थितोन्निद्रचन्द्रा ।

इत इति । हे भैमि त्वं इतोऽपि राज्ञः सकाशात् किमिति न वीरयसे शूरा भवसि अपि तु तस्मादपि शूरा भव । किं वीरा न भवस्यपितु वीरा भवस्येवेति वा । किं भूतादितः । नृपान् शत्रून् धनुश्च बाणाश्च गुणश्च चापशरमौर्व्वीरूपैर्व्वक्रभिरुपकरणैः कृत्वा वशंवदान् वश्यान् कुर्व्वतः । किम्भूता त्वं । उर्व्वीवलये उर्व्वशीरूपाऽतिसुन्दरी । किं कृत्वा । तमेनं बहुभिर्धनुरादिभिरुपकरणैर्व्विद्विषां जेतं शुद्धेन केवलेन चापादिलेशसंस्पर्शरहितेन सौन्दर्य्यादिना गुणेन मौर्व्या च कृत्वा निर्भरमतितरां आयासरहितं वा यथा तथा वशं विधाय । बहुसाधनैः पराजयतोऽस्यैकेनैव साधनेन जयकरणादित्यर्थः मौर्व्वीमात्रेण जयादाश्चर्य्यञ्च । अयं सर्व्वेभ्योऽपि वीरः अस्मादपि त्वमित्यपेरर्थः । वीरयसे । शूरवीरविक्रान्ताविति चुरादिः ॥ ९७ ॥

एतदिति । एतस्माद्भीतानामरीणां नारी एतद्भीतारिनारी गिरियिले पर्व्वतकन्दरायां विगलद्दासराऽतिवाहितदिवसा । तथा रात्रौ निःसरन्ती विलादहिर्निर्गच्छन्ती । तथा

आक्रन्दद्भूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुविम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्न्यश्वसीच्च ॥ २८॥
अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायती
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा।

तदनन्तरं सः स्वकीयो मदीयः क्रीडाहंस एवायमिति मोहो भ्रान्तिस्तया ग्रहिलः मदीयमेनं हंसं देहीति आग्रहवान् शिशुस्तेन भृशं प्रार्थितो याचित उन्निद्रश्चन्द्रो यामेवंभूता सती चन्द्रदाने सामर्थ्याभावात् तदाग्रहशान्त्यभावात् दुःखवशाद्यस्माद्भूरि बहु आक्रन्दत् सरोद तस्माद्धेतोर्बहुतरे नयनजले मिलन् प्रतिबिम्बरूपेण सङ्घट्टमानो यश्चन्द्ररूपो हंसस्तस्य योऽनुबिम्बः मिलन् यश्चन्द्रहंसस्यानुबिम्बो वा तस्य प्रत्यासत्त्या सामीप्येन मदीयः क्रीडाहंसोऽयमागत इति बुद्ध्या प्रहृष्यतो मोदमानस्य तनयस्य विहसितैर्हासैः कृत्वा तदाग्रहशान्तेराश्वसीत् आश्वासं प्राप। परित्यक्तस्वीयसम्पत्स्मरणात् कनकहंसे तथैव भ्रान्तोऽभीत्यादि मनसि कृत्वा न्यश्वसीच्च शोकनिःश्वासं चामुञ्चत्। आश्वसीत्। लङि रुदश्च पञ्चभ्य इत्यपृक्तसार्वधातुकस्येडागमः। लुङि वा ह्यन्तक्षणेति वृद्धिनिषेधे रूपं। न्यश्वसीत्। लङि अड्गार्ग्यगालवयोरित्यपृक्तसार्वधातुकस्याडागमः (पा॰ ७। ३।९९) ॥ २८॥

अस्मिन्निति। हे भैमि अस्मिन् राज्ञि दिग्विजयायोद्यते सति रिपवश्च ते क्षोणीन्द्रा राजानस्तेषां दाराः प्रिया वशवर्त्तिनी धरा पृथ्वी अयं राजा मे पतिः स्वामी स्याद्भूयादिति ध्यायती .

अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्द्धं निजः
पन्था भास्वति दृश्यते विलमयः प्रत्यर्थिभिः पार्थिवैः ॥ २९ ॥
विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्त्तते यदि भटः कीर्त्त्या जगत्युद्भटः।
आगच्छन्नपि सम्मुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण ठणिति छिन्नापसर्पच्छिराः ॥ ३०॥

चिन्तयन्ती सती सात्त्विकेषु मध्ये कम्पलक्षणं सात्त्विकभावं अश्नुति गच्छति। अन्यस्वामिसूचकं भूकम्पलक्षणं भौममुत्पातं प्राप्नोतीत्यर्थः। एवमन्याप्येवं ध्यायती सात्त्विकं भावं प्राप्नोति। तथा समरे अस्यैवाभिमुखं शस्त्राघातैर्निपत्य ऊर्द्धं ऊर्द्धदेशमयवोत्तमं स्वर्गलोकं यास्यद्भिः गमिष्यद्भिः प्रत्यर्थिभिः पार्थिवैः भास्वति सूर्यमण्डलमध्ये निजः स्वीयो विलमयः पन्था दृश्यते। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हत इति वचनात्। अथ च सूर्ये बिलरूपो स्तुत्यातोऽपि म्रियमाणैर्दृश्यते। अतिशूरोऽयमिति भावः ॥ २९ ॥

विद्राण इति। त्रस्ते भीतेऽत एव रणचत्वरात् रणाङ्गणात् विद्राणे पलायिते समस्तेऽरिगणे मध्ये कोऽपि भटः शूरः कोपाद्यदि पुनर्निवर्त्तते। यतो जगति कीर्त्त्या यशसा उद्भटः स्यातः असौ भटः अस्य सम्मुखमागच्छन्नपि विमुखतामेव विगमगुखतां प्राप्नोति अधिगच्छति। अथ च सम्मुखमागच्छन्नपि पराङ्मुखो जात इति विरोधाभासः। यतः। द्राक् शीघ्रं

ततस्तदुर्व्वीन्द्रगुणाद्भुतादिव
स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी।
विधीयतामाननमुद्रणेति सा
जगाद वैदग्ध्यमयेङ्गितैव तां ॥ ३१ ॥
अनन्तरं तामवदन्नृपान्तरं
तदध्वदृक्सारतरङ्गरिङ्गणा।

एतस्य छुरिकार्येण ठणिति यथा तथा खण्डितमपसर्पद्धः पतत् शिरो यस्य सः। ठणिति लोहकण्ठास्थिसङ्घट्टजशब्दानुकरणं। अतिशूरोऽयमिति भावः ॥ ३० ॥

तत इति। ततः सा भैमी तां वाणीं प्रतिवचनमन्तरेणैव इति जगाद। इति किं। आननमुद्रणा मौनं विधीयतामिति। किम्भूता। तस्य उर्व्वीन्द्रस्य गुणाकर्णनसमुत्पन्नादद्भुतादाश्चर्य्यादिव स्ववक्त्रपद्मे अङ्गुलिरूपं नालं तस्य दायिनी अत एव वैदग्ध्यमयं एतच्चातुर्य्यबहुलं इङ्गितं चेष्टितं यस्याः सा। वचननिषेधार्थं आश्चर्य्याभिनयार्थञ्च मुखेऽङ्गुलिर्दीयते। वर्णननिषेधार्थं दत्ताङ्गुलिस्तद्गुणाद्भुतादिवेति लोकैरुत्प्रेक्षितमित्यर्थः। पद्मे च नालं भवति ॥ ३१ ॥

अनन्तरमिति। अनन्तरं तद्वर्णननिषेधानन्तरं सरस्वती नृपान्तरं तां भैमीं प्रत्यवदत्। किम्भूता तस्य वर्णनीयनृपान्तरस्याध्वनि तद्दिशि दृक्सारानामतिविशालानां तरङ्गाणां दृग्व्यापाराणां रिङ्गणं गतिर्यस्याः। दृग्व्यापारदर्शितवर्णनीय-

तूणीभवत्पुष्पशरं सरस्वती
स्वतीव्रतेजःपरिभूतभूतलं ॥ ३२ ॥
तदेव किन्नु क्रियते न का क्षति-
र्यदेष तद्दूतमुखेन काङ्क्षति ।
प्रसीद काञ्चीमयमाच्छिनत्तु ते
प्रसह्य काञ्चीपुरभूपुरन्दरः ॥ ३३ ॥
मयि स्थितिर्नम्रतयैव लभ्यते
दिगेव तु स्तब्धतया विलङ्घ्यते ।

नृपान्तरा । किम्भूतं नृपान्तरं । तूणीभवत् क्षीणीभवत्पुष्पशरः कामो यस्मात् तं । तथा स्वतीव्रतेजसा परिभूतं वशीकृतं भूतलं भूमण्डलं येन तं । तरङ्गितेक्षणेति च पाठः ॥ ३२ ॥

तदिति । नु भैमि एष काञ्चीपुरस्य सम्बन्धिन्या भुवः पुरन्दरः तस्य त्वां प्रति प्रहितस्य दूतस्य मुखेन सन्देशवचनेन कृत्वा यत्त्वदीयवरणादि काङ्क्षति तदेव किं न क्रियते अपि तु तदेव क्रियतां । एतदुक्तं कुर्व्वन्त्यास्तव का क्षतिः का हानिरपि तु न कापि । अस्मिन् प्रसीद । अयं नवरते लज्जया असन्यमानाया अपि ते काञ्चीं मेखलाबन्धं प्रसह्य हठात् आच्छिनत्तु शिथिलयतु । अधीरतया ग्रन्थिमोचनमसहमानस्त्रोटयतु वा । एनं वृणीष्वेति भावः ॥ ३३ ॥

मयीति । चापं दधत् आशुगं वैरिषु क्षिपन्नयं राजा इति पूर्व्वोक्तं दिशां नयं नीतिं सम्यग् उपादिशदिव । इति किं । हे

इतीव चापं दधदाशुगं क्षिप-
न्नयं नयं सम्यगुपादिशद् द्विषां ॥ ३४ ॥
अदःसमित्सम्मुखवीरयौवत-
त्रुटद्भुजाकम्बुमृणालहारिणी ।
द्विपद्भटस्त्रैणदृगम्बुनिर्झरे
यशोमरालावलिरस्य खेलति ॥ ३५ ॥

द्विषः। मयि मत्समीपे नम्रतयैव विनीततयैव स्थितिर्निवासोऽथ च स्वराज्ये स्थितिर्लभ्यते। स्तब्धतयाऽविनीततया तु पुनर्दिगेव विलङ्घ्यतेऽतिक्रम्यते। चेन्मयि नम्रा भविष्यथ तर्हि चापवत् स्थितिं प्राप्स्यथ। अन्यथा बाणवत् दिगन्तं यास्यथेति वचनं विनैवोक्तवानित्यर्थः। नम्रस्तब्धशब्दयोर्वक्रावक्रविनीतार्थपरतयोत्प्रेक्षा ॥ ३४ ॥

अद इति। अस्य राज्ञः यशोरूपा मरालावलिर्हंसपङ्क्तिर्द्विषतां भटानां गणाः सङ्घास्तेषां स्त्रैणं स्त्रीवृन्दं तस्य दृगम्बुनिर्झरे नेत्रवाष्पप्रवाहे खेलति। किम्भूता। अदःसमिति अमुष्य रणे सम्मुखागता ये वीरास्तेषां यौवतं स्त्रीसमूहः तस्य वैधव्यवशात् त्रुटन्तो ये भुजाकम्बवः शङ्खवलयानि त एव मृणालानि हरति अपनयति भक्षयति वेत्येवंशीला। हंसाश्च मृणालाहारान्निर्झरोदके क्रीडन्ति। रणे सम्मुखागतानां शत्रूणां वधात् तत्स्त्रियः शङ्खवलयानि स्फोटयन्ति रुदन्ति च तेन चास्य कीर्तिर्भवति ॥ ३५ ॥

सिन्दूरद्युतिमुग्धमूर्द्धनि धृतस्कन्धावधिश्यामिके
व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति ।
जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसन्ध्याधिये-
वाऽस्तं यान्ति समस्तवाङ्गनभुजातेजःसहस्रांशवः ॥ ३६ ॥

सिन्दूरेति । नु शैलि समरस्यारम्भे उद्धुरे उद्युक्तेऽस्य सिन्धुरे गजे धावति सति समस्ता वाङ्गनाः क्षत्रियास्तेषां भुजातेजांस्येव सहस्रांशवः सूर्याः यदस्तं विनाशमस्ताचलञ्च यान्ति गच्छन्ति तत्प्रदोषतिमिरेण रजनीमुखसम्बन्धिना तमसा व्यामिश्रा मिश्रिता या सन्ध्या तस्या धिया बुद्ध्या भ्रान्त्येवेति वयं जानीमः । वाक्यार्थः कर्म । दिवारजन्योः सन्धौ भवः सान्ध्यो रागस्तद्भ्रान्त्येत्यर्थः । किम्भूते सिन्धुरे । सिन्दूरद्युत्या मुग्धो मनोज्ञः मूर्द्धा यस्य तस्मिन् । तथा धृता स्कन्धावधि श्यामिका स्वाभाविकी कज्जललेपसम्भवा वा कालता येन तस्मिन् । तथा उच्चतया व्योमान्तःस्पृशि गगनमध्यस्पर्शिनि । तथा समरारम्भाद्रणादूर्ध्वश्रवणात्कोपदुःसहे वा । यदस्तं यान्ति तर्हि सायङ्कालतिमिरसंयुक्तसन्ध्याधियेवेति वा । सन्ध्यापि किञ्चित्कज्जलतुल्यतिमिरयुता सिन्दूरवच्च रक्ता वरुणदिगन्तस्पर्शिनी चेति पूर्वोक्तविशिष्टहस्तिदर्शने सति सायं सन्ध्येतिबुद्ध्येव तेजःसूर्याणामस्तगमनं युक्तं । एवंविधं गजं दृष्ट्वा सर्व्वेऽपि पलायन्त एवेत्यर्थः । जानीमोऽद्य तदेपि पाठे अयमर्थो यदित्यर्थे तदा तदित्यर्थे ज्ञेयः । श्यामैव श्यामिकेति स्वार्थे कप्रत्यये । प्रत्ययस्थादितीत्वं (पा॰ ७ । ३ । ४४) ॥ ३६ ॥

हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटसन्निभसितच्छत्रीभवत्कौस्तुभं ।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरस्य भुजयोः श्रीरस्य विश्राम्यति ॥ ३७ ॥
सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्त्तिपूर्त्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः ।

हित्वेति । श्रीर्लक्ष्मीरस्य अस्य भुजयोरन्तर्मध्ये विश्राम्यति शोभा च । किं कृत्वा । दैत्यरिपोर्विष्णोः स्वभवनं स्वस्य गृहं उरः हित्वा । तथा तन्निजसद्म पद्ममपि उज्झित्वा । किम्भूतमुरः । लक्ष्म्या त्यक्तत्वात् शून्यत्वलक्षणेन दोषेण स्फुटं आसीदन्तः स्थिरीभवन्तः मर्कटकीटा ऊर्णनाभकीटास्तेषां करणेन निर्वृत्तं तैरर्चितं छत्रिमं सितछत्र इव सितछत्रं मण्डलाकारं श्वेतं गर्भाण्डस्थापनस्थानं तद्भवन् तद्रूपीभवन् कौस्तुभाख्यो मणिर्यत्र । किम्भूतं पद्मं । तैर्लूतातन्तुभिः मर्कटीसूत्रैः मर्कटीसूत्रसदृशैः कमलसूत्रैरित्यर्थः । व्यक्तं प्रकटमवनद्धीकृतं बद्धं विमतन्तूनामेव लूतातन्तुत्वेनोक्तिः । परस्परमतिदूरे द्वेऽपि भवने प्रति गतागताभ्यां श्रान्ता सती गृहद्वयं परित्यज्यातिसमीपवर्त्तिनोरस्य भुजयोरेव भवनयोः सुखेन निषीदत्यत्रैव स्थिरीभवतीत्यर्थः । कौस्तुभस्य धवलत्वाभूताच्छत्रत्वेन कमलसूत्राणाञ्च सादृश्यात् लूतातन्तुत्वेनोत्प्रेक्षा । लूता स्त्री तन्तुवाये स्यादित्यमरः ॥ ३७ ॥

सिन्धोरिति । अयं सिन्धोर्जैत्रं समुद्रस्य जेतृ पवित्रमुज्ज्वलं पावनञ्च तत्कीर्त्तिपूर्त्ताद्भुतं यशोरूपतडागाद्याश्चर्यं असृजत् नि-

यद्विन्दुश्रियमिन्दुरञ्चति जलञ्चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूर्जागर्त्ति यागेश्वरः ॥ ३८ ॥

मर्मे। यत्र कीर्त्तितडागे जगन्ति स्नान्ति उज्ज्वलीभवन्ति स्नानं च कुर्व्वन्ति। यद्दर्शनविषये के वा कवयः स्फुरन्नूतनार्था अपि वाचंयमा मौनिनो न सन्ति अपि तु सर्व्वेऽपि मौनिन एव भवन्ति इत्यर्थः। अथ च के वयो जलपक्षिणः कवयः। यत्र के जलपक्षिण. के वा तापसा न सन्ति अपि तु महति तडागे बहवः पक्षिणस्तापसाश्च विन्द्यते। इन्दुर्यस्य कीर्त्तितडागस्य बिन्दुश्रियं अञ्चति प्राप्नोति यदपेक्षया चन्द्रोऽल्पीयानित्यर्थः। अथ च महतस्तडागस्य जलबिन्दुशोभामिन्दुरञ्चति यदीयो बिन्दुरिवेन्दुरित्यर्थः। यस्य च जलं आविश्य प्रविश्येव दृश्येतरो ऽस्मदादिनेत्रयोरविषयभूतोऽसौ जगति विद्यमानः स्फुटिका एव भूर्यस्य स कैलास एव यागेश्वरः स्फाटिकशैशिवलिङ्ग-रूपो जलदेवता जागर्त्ति स्फुरति। समच्छायत्वाज्जले क्षिप्तः स्फटिको न दृश्यते इयमेव स्फटिकपरीक्षा। उज्ज्वलतरैतत्-कीर्त्तिकल्लोलप्लावित इव कैलासो न दृश्यते। इन्दुर्जले चा-विश्य जले प्रतिबिम्बितः सन् यद्बिन्दुश्रियमञ्चतीति वा असा-विन्दुरेव यस्य जलमाविश्यादृश्यः स्फटिकनिर्म्मितो यागेश्वरः सन् जलदेवता जागर्त्ति। कीर्त्तिमध्यपाती चन्द्रोऽपि समच्छा-यत्वान्न दृश्यत इत्यर्थ इति वा। स्पृश्येदिति वचनात्पर्व्वातिरिक्ते काले समुद्रस्यास्पृश्यत्वात् अस्य तु सर्व्वदा पवित्रत्वात्। समुद्रस्य च भूलोकस्यैव कतिपयस्यैव जनस्य स्नानार्हत्वादस्य तु लोक-

अन्तःसन्तोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गेनानस्थिलोमाऽऽरचयति पुलकश्रेणिमानन्दकन्दां।
न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः
शृण्वन्नेतस्य कीर्त्तीः कथमुरगपतिः प्रीतिमाविष्करोति॥२९॥

वर्णयितुं शक्यत्वादस्य चाशक्यत्वात्तस्य च चन्द्रेकसर्व्वस्वत्वादस्य च विन्दुरूपचन्द्रत्वात् समुद्रे च श्रीविष्णुरूपाया जलदेवताया: सुप्तत्वाद्‌च च वागेश्वरस्य जाग्रत्त्वात्। एवंविधो यशस्वी कोऽपि नास्तीति भाव:। वागेश्वर इति असौ जलदेवता जागर्त्ति। असौ का या स्फटिकभू: वागेश्वर: कैलासो जागर्त्तीति। वाचि यमो व्रत इति (पा० ३।२।४०) खचि वाचंयमपुरन्दरौ चेति (पा० ६।३।६९) साधुः॥ २८॥

अन्तरिति। यस्मात् उरगपति: शेष: अन्तःसन्तोषबाष्पैरानन्दाश्रुभि: कृत्वा दृशो नेत्राणि न स्थगयति नाच्छादयति। यतस्ताभिर्दृग्भि: एतद्गुणानाकर्णयिष्यन् सन् चक्षुःश्रवस्त्वादश्रुभिर्नेत्राच्छादने गुणाकर्णनशङ्कया आनन्दाश्रुभिर्दृशो नाच्छादयति। तथा आनन्द एव कन्दो मूलं यस्यास्तां पुलकश्रेणिं रोमाञ्चपङ्क्तिमपि आरचयति करोति। यत: अनस्थिरोमाऽविद्यमानरोमा। तथा सन्तोषात् शिर:कम्पनं न करोति। यत: क्षोणीभङ्गभीरु:। यद्यहं मूर्द्धानं कम्पयिष्यामि तर्हि भूमि: पतिष्यतीति भिया। तस्मात् कारणादेतस्य कीर्त्ती: शृण्वन् शेषोऽन्त:करणे समुत्पन्नां प्रीतिं कथं केनान्येन प्रकारेणाविष्करोति प्रकटयति वयं तन्न विद्म:।

आचूडाग्रममज्जयज्जयपटुर्यच्छल्यदण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् ।
सा सेवास्य पृथुः प्रसीदसि तया नास्मै कुतस्त्वत्कुच-
स्पर्द्धागर्द्धिषु तेषु तान् धुतवते दण्डान् प्रचण्डानपि ॥४०॥

आश्चर्यरूपकीर्त्तिरयमिति भावः। सहस्रमुखत्वादृश इति वक्तव्यं ॥ ३८ ॥

आचूडेति । संरम्भे युद्धसम्भ्रमे सति जये पटुरयं राजा रिपवश्च ते राजानश्च तेषां कुञ्जरघटाकुम्भस्थलेषु दूरनिखाततया स्थिरान् शल्यायसोच्चस्य सम्बन्धिनो दण्डान् शरान् प्रासान् वा आचूडाग्रं पुङ्खाग्रं मर्यादीकृत्य यदमज्जयन्निचखान। सा एतत्कर्त्तृका त्वदीया पृथुर्महती सेवा तया सेवया त्वं अस्मै कुतो न प्रसीदसि। किम्भूताय। तव कुचस्पर्द्धागर्द्धिषु कुचसाम्याभिलाषिषु तेषु कुम्भस्थलेषु तान् पूर्व्वोक्तान् प्रचण्डान्दण्डान् धृतवते कृतवतेऽपि। येन हि महती सेवा क्रियते तस्मै प्रसन्नीभूयते। अतिशूरोऽयं तस्माद् वृणीष्वेत्यर्थः ॥ ४० ॥

स्मितेति । सा भैमी स्मितश्रिया तं राजानं उपाहसत् हसितवती यतः कीर्त्त्यं वर्णयितुं शक्यं महत्त्वं यस्य एवम्भूतमेव। हि यस्मात् निषधेन्द्रवैभवं नलमाहात्म्यं गिरां पारे वागगोचरं वर्णयितुमपि न शक्यत इत्यर्थः। नलादेतस्य न्यूनत्वादुपहास इत्यर्थः। किम्भूतया स्मितश्रिया। तद्गुणशर्म्मणा तदीयगुणाकर्णनसमुत्पन्नेन सुखेन वितीर्णयेव दत्तयेव कृतयेव। तया स्वकपि

स्मितश्रिया स्वक्वणिलीयमानया
वितीर्णया तद्गुणशर्म्मणेव सा।
उपाहसत् कोत्यमसत्त्वमेव तं
गिरां हि पारे निषधेन्द्रवैभवं ॥ ४१ ॥
निजाक्षिलक्ष्मीहसितैणशावका-
मसाऽवभाणीदपरं परन्तपं।
पुरैव तद्दिग्वलनश्रियो भुवा
भुवा विनिर्दिश्य सभासभाजितं ॥ ४२ ॥
कृपा नृपाणामुपरि क्वचिन्न ते
नतेन हाहा शिरसा रसादृशां।

ओष्ठप्रान्ते लीयमानया संसर्गिण्या। कीर्त्यमिति असद्गुणारोपणार्थसूचकं पदं ॥ ४१ ॥

निजेति। असौ वाणी अपरमन्यं परन्तपं राजानं भुवा पुरैव पूर्व्वमेव विनिर्द्दिश्य दर्शयित्वा तां भैमी अभाणीत् उवाच। किंभूतां तां। निजाक्ष्णोर्लक्ष्म्या शोभया हसित एणशावको मृगशिशुर्यया। किंभूतया भुवा। तस्य वर्णनीयस्य राज्ञो दिशा तन्मुखं वलनेन दृक्पातेन कृता याः श्रियस्तासां भुवा स्थानभूतया। किंभूतमेनं। सभया सभास्थैर्मनोज्ञतया सभाजितं दृष्टं पूजितं वा। रिपुतापकारत्वादन्वर्थकनामानं वा ॥ ४२ ॥

कृपेति। हे भैमि ते तव नृपाणां मध्ये कश्चिदप्युपरि कस्याप्युपरि कृपा नास्ति हाहा कष्टं किमप्यवलोकयसि नेति न

भवन्तु तावत्तव लोचनाञ्चला
निपेयनेपालनृपालपालयः ॥ ४३ ॥
ऋजुत्वमौनश्रुतिपारगामिता
यदीयमेतत्परमेव हिंसितुं ।

युक्तेत्यर्थः । किंभूतानां । लज्जितावज्ञावशाम्नया नतेन शिरसा रमायां भूमौ दृग्येषां रमां पश्यन्तीति च । अन्यत्र कृपा मा भूत्राम तावत् किन्तु तव लोचनाचलाः अपाङ्गदृग्गंशः निपेयः सादरावलोकनार्हः यो नेपालानां देशानां नृपालो राजा तं पिवन्ति सादरं पश्यन्ति एवंभूता अलयो भ्रमरभूता भवन्तु । एनं तावत् कटाक्षैर्विलोकयेत्यर्थः ॥ ४३ ॥

ऋजुत्वेति । ऋजुत्वमवक्रता नम्रत्वं प्रियवादित्वादिरूपा विनीतता च तथा मौनं निःशब्दत्वं वाङ्नियमश्च श्रुतिपारगामिता आकर्णपूर्णता वेदपारगामिता च एवंरूपमतीवातितरां विश्रामविधायि विश्रामकारि विगतश्रामकारि मनसि हितप्रत्ययकारकञ्च अलीकपवनाभ्यासवशादा श्रामाभावकारि यदीयमेतच्चेष्टितं परं शत्रुं स्वव्यतिरिक्तञ्च सर्वं जनं हिंसितुमेव हन्तुमेव प्राणप्रियधनग्रहणार्थमेव च न तु लक्ष्यव्यधनमात्रप्रयोजनं न चार्जवादिगुणार्जनप्रयोजनं । सोऽस्य वङ्करमञ्जः महान् चक्षयोऽतिदीर्घश्च शरः दाम्भिको दम्भेन चरति इति रूपकं । अतिक्रूरोऽयमिति भावः । दाम्भिके यावद्वृत्तं तत् सर्वं एतस्य शरे विद्यत इत्यर्थः । दाम्भिकेन यत्क्रियते तदेतच्छरेण क्रियत इत्यर्थ इति वा । दम्भो हिंसा माया च प्रयोजन-

अतीव विश्वासविधायि चेष्टितं
बकर्मदानस्य स दाम्भिकः परं ॥ ४४ ॥
रिपूनवाप्यापि गतोऽवकीर्णितां-
मयं न यावज्जनरञ्जनव्रती ।
भृशं विरक्तानपि रक्तवत्तरान्
निकृत्य यत्तानसृजात्सृजद्युधि ॥ ४५ ॥
पतत्येतत्तेजोऽद्भुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।

मस्य प्रयोजनमिति (पा ५ । १ । १०९) ठञ्। तेन चरति वा चरतीति (पा ४ । ४ । ८) ठक्॥ ४४ ॥

रिपूनिति। यावन्तो जनास्तावतां रञ्जनं तदेव व्रतं तदस्यास्तीति एवंभूतोऽयं राजा रिपूनपि अवाप्य मायापि वा अवकीर्णितां चलव्रतत्वं न गतः प्राप्तः। यद्यस्मात् स्वशरीरादिविषये भृशं विरक्तानननुरागिणोऽपि अथ चैनं दृष्ट्वा विगतरुधिरानपि तान् रिपून् युधि निकृत्य बाणैश्छित्वाऽसृजा रुधिरेण कृत्वा रक्तवत्तरान् रक्तवन्तोऽनुरागिणोऽथच रक्तं विद्यते येषु ते रक्तवन्तः अतिशयेन रक्तवन्तो रक्तवत्तरा एवंभूतानसृजत् चकार। वैरिणामपि रञ्जनात् चलव्रतत्वं न जातमित्यर्थः। रक्तवत्तरान् क्तवतुमंतुप् च॥ ४५ ॥

पतमीति। पतङ्गः सूर्यः एतस्य तेज एव अद्भुतभुगग्निः तस्मिन् यदि कदाचित् कस्मिन्नपि समये पतति तदा तर्हि अङ्गी-

यशोऽमुष्येवोपार्जयितुमसमर्थेन विधिना
कथञ्चित् चीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥ ४६ ॥
यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमलेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्त्तिः ।

कृततमः भृशमङ्गीकृतः पतङ्गानां शलभानां देहदाहलक्षणा या आपदस्तासां उदयो येनैवम्भूत एव स्यात् तत्तेजसाऽतितरां सन्तापवशात् पीडितः स्यात्। एतत्तेजोऽपेक्षया सूर्य्यो हीनो वह्न्यपेक्षया शलभतुल्य इत्यर्थः। तथाऽमुष्य यशः कथञ्चित् केनापि प्रकारेण उपार्जयितुमसमर्थेनेव विधिना ब्रह्मणाऽतिमहान् चीराम्भोनिधिरपि तस्यैतदीययशसः प्रतिनिधिरनुकल्पः कृतः कथञ्चित् कृत इति वा। यश इव यशःसदृशमिति वा। मुख्याभावे हि प्रतिनिधिरपि क्रियते। चीरादप्युज्ज्वलं अस्य यश इत्यर्थः। एवंविधः प्रतापवान् यशस्वी च को ऽपि नास्तीति भावः। मुख्यापेक्षया प्रतिनिधेर्न्यूनत्वादेकदीपव्यापिनः चीरोदादशेषदीपव्यापिन्याः कीर्त्तेराधिक्याच ॥ ४६ ॥

यावदिति। हे भैमि सेतुप्रालेयशैलौ श्रीरघुनाथकृतः सेतुः प्रालेयशैलस्य हिमाचलस्तौ यावत् यावन्तं देशमभिव्याप्य तिष्ठतः यावत्कालं तौ वर्त्तेते वा एतस्य नरपतेः कीर्त्तिस्तावत्पर्य्यन्तं चरति भ्रमति। किंभूतौ सेतुशैलौ। पुलस्त्यगोत्रापत्ययोर्द्रावणकुवेरयोरवास्तु अगृहभूमिभूते ऽपि वास्तुभवन्तौ गृहभूमित्वं प्राप्ते उभे द्वे ऽपि ये हरितौ दक्षिणोत्तरे दिशौ तयोः क्रमेण श्यामत्वाच्छुभ्रत्वाच रोमरेखा रोमाली उत्तरीयं

यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रा-
वद्री सन्ध्यापताकारुचिरचितशिखाशोणशोभावुभौ च ॥ ४७ ॥
युद्धा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्धान्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः ।

पूर्व्वकायावरणवस्त्रं तद्रूपौ । समुद्रबन्धनशिलापरम्परा दक्षिणदिशो रोमस्थानीया । हिमाचलश्च उत्तरदिग्वस्त्रस्थानीयः । तथा प्राक् च प्रत्यक् च आशे प्राचीप्रतीच्यौ दिशौ तयोः परिवृढौ स्वामिनाविन्द्रवरुणौ तयोर्ये नगरे तयोर्यदारम्भणं आरम्भः तस्मिन् स्तम्भयोरिव सुन्दरी मुद्रा आकारो ययोस्तावुभावद्री उदयास्तास्तौ च यावन्तं देशमभिव्याप्य तिष्ठतः पूर्ववत् । किंभूतावद्री । प्रातःसायंसन्ध्ये एव रक्तत्वात्पताकारुची ताभ्यां रचिता निर्मिता शिखायां शिखरे शोणा रक्ता शोभा ययोस्तौ । पौलस्त्येति । गोत्रापत्ये गर्गादित्वाद्यञ् (पा० ४।१।१०५।) वास्त्वभवदिति । चौ चेति (पा० ७।४। २६।) दीर्घः । उभाववयवौ ययोस्ते उभय्यौ ते हरितौ चेति समासे पुंवद्भावः इति वा ॥ ४७ ॥

युद्धेति । अनेन राज्ञा अरीणां शिरः भूमौ हठात् बलात्कारेण विलोठितं झटिति छेदात् लुरद्भ्रमणमभूत् । किम्भूतानामरीणाम् । आदसीयस्य अमुष्यायं आदसीयस्तस्य रणस्याभिमुखं सम्मुखं मारणमभिमन्त्रीकृत्य वा बाणावलीः शरपङ्क्तीरुन्मुच्य मुक्त्वा युद्धा वा निपततां बाणपङ्क्तिवर्षणेन युद्धं कृत्वा रणभूमौ पतितानामिति यावत् । अथ च अन्तःकरणे स्वपरान्तरं स्वस्या-

छिन्नं वावनतीभवन्निजभियः खिन्नं भरेणाथवा
राज्ञाऽनेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥ ४८ ॥
न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि।
नृणां पश्यत्यस्य क्व च न विशिखान् किन्तु पतित-
द्विपद्वक्षःश्वभ्रैरनुमितिरमून् गोचरयति ॥ ४९ ॥

तमनः परस्य चान्तरं न्यूनाधिकत्वतारतम्यं बुद्ध्वा वा आदयीयस्य चरणस्यैव अभिमुखं बाणावलीरुन्मुच्य निरायुधीभूय निपततां एतच्चरणयोर्दण्डवन्नमस्कारं कुर्व्वतां। किम्भूतं शिरः।रणसम्मुख-पक्षे छिन्नं वा बाणैः खण्डितं सदाऽवनतीभवत् नतग्रीवं भूमौ पतितं सत्। तथा चरणपक्षे। अथवा निजभियो भरेण स्वीय-भयपाऽऽक्रम्येन वा खिन्नं सत् अवनतीभवत्। द्वितीयपक्षे बलाद् विलोठितं वामदक्षिणभागस्पर्शकारीकृतं। वैरिणो यदि युध्यन्ते तर्हि म्रियन्त एव। ये च विचारका भीरवश्च ते शस्त्राणि परि-त्यज्य राजानमेव शरणं गच्छन्ति जीवन्तीति। एवकारेणान्यः शरण्यो न विद्यत इति सूचितं। अन्यदपि भाराक्रान्तं नतम्भ-वति। वा शब्दः प्रत्येकविकल्पे॥ ४८॥

नेति। युद्धकौतुकदर्शिनां नृणां दृष्टिः अस्य विशिखान् क्व च न कस्मिन्नपि तूणादुद्धारे निष्काशने उपादानकाले न पश्यतीति सर्व्वत्र सम्बन्धः। तथा कस्मिन्नपि गुणघटने मौर्व्याः सन्धानकाले न। आश्रुतिशिखं कर्णाग्रं मर्य्यादीकृत्य समाकृष्टौ

दमस्वसुश्चित्तमवेत्य चासिका
जगाद देवीं कियदस्य वक्ष्यसि ।
भण प्रभूते जगति स्थिते गुणै-
रिहाप्यते सङ्कटवासयातना ॥ ५० ॥

क्ष न कस्मिन्नपि सम्यगाकर्षणकाले न। तथा मोचनानन्तरं वियति कस्मिन्नपि गगनदेशे न। तथा कस्मिन्नपि लक्ष्ये वेध्यवेधे न। तथा शत्रून्विभिद्य ततो निर्गत्य भुवि कस्मिन्नपि भूप्रदेशे पतितान्न पश्यन्ति। तर्हि किन्तु पतितानां बाणाघातक्षतमर्म्मवेधवशाद्गतप्राणानां ऽभिद्यानां द्विषतां वक्षःश्वभ्रैः दृढं प्रहृत्य बहिर्निर्गतशरक्षतछिद्रैः कृत्वा याऽनुमितिरनुमानज्ञानं अमून् बाणान् गोचरयति ज्ञापयति। चेदनेन बाणा न मुक्तास्तर्ह्येतेषां वक्षसि छिद्राणि कथं भवेयुरित्याद्यनुमितिः। चक्षुःश्वभ्रैरिति पाठे चक्षुःष्वेव विध्यतीति भावः ॥ ४८ ॥

दमेति। हासयतीति हासिकाऽतिनीचा चेटी दमस्वसुश्चित्तं तद्दर्शनबाहुल्यनिरपेक्षं तस्मिन्नरक्तं वाऽवेत्य ज्ञात्वा देवीं सरस्वतीं जगाद। हे देवि त्वं अस्य कियत् एतदीयं कियच्चरितं वक्ष्यसि वर्णयिष्यसि अपि तु बहुत्वात् प्रत्येकं वर्णयितुं न शक्यत इत्यर्थः। गुणैः सौन्दर्य्यादिभिः प्रभूते महति जगति स्थितेऽपि इह नृपे सङ्कटवासरूपा सम्मर्द्दवसतिरूपा यातना सङ्कटावासेन वा यातना तीव्रवेदना आप्यते प्राप्यते इति भण कथय। सर्व्वे गुणाः सर्व्वं जगत्परित्यज्यास्मिन्नेव सम्मर्द्देन निवसन्तीति एकेनैवकारेण वर्णय। पृथग्वर्णनाऽसामर्थ्यादि-

ब्रवीति दासीह किमप्यसङ्गतं
ततोऽपि नीचैयमतिप्रगल्भते।
अहो सभा साधुरितीरिणः क्रुधा
न्यषेधदेतत्क्षितिपानुगान् जनः॥ ५१॥

त्यर्थः। वाक्यार्थः कर्म। अथ च भूयसि। वर्त्तमाने जगति मध्ये गुणैरिहैव कष्टरूपवमतिपीडा प्राप्यते न त्वन्यत्र। एतस्मिन्निवासे गुणा उद्दिजन्त एवानर्हत्वादेकोऽपि गुणोऽत्र नास्तीति भणैत्युपहासः। अस्य कियद्वदस्यसि कथय। अतःपरं मा स्म वादीः। तस्मान्निर्गुणमेनं गुणित्वेन कियन्तं कालं वर्णयिष्यसीति कथयेति वा। स्थितैरिति पाठे गुणविशेषणं। प्रभूतैरिति च॥ ५०॥

ब्रवीतीति। जनः प्रेक्षकः क्रुधा स्वस्वामिवर्णनविघातसमुत्पन्नेन क्रोधेन इतीरिणो भाषमाणानेतस्य क्षितिपस्यानुगाननुचरान्न्यषेधत् निवारयामास। इति किं। इह सभायां भैम्या दासी किमपि असङ्गतमयुक्तं ब्रवीति वदति का कस्येत्यादि भाषते। ततोऽपि दास्या अपि सकाशान्नीचा इयं चेटी अति प्रगल्भते नितरां धृष्टतया भाषते। नियामकः कोऽपि नास्ति। अहो अयुक्तत्वादाश्चर्यं साधुः सभा। विरुद्धलक्षणया काका वा प्रकारश्लेषेण वा असाधुरेतादृशी सभा न कुत्रापीति। ब्रवीति वर्त्तमानसामीप्ये भूते लट् (पा ३। ३। १३५।) प्रसंमेति पाठः समीचीनः। गल्भ्ह धृष्टत्वे॥ ५१॥

अथान्यमुद्दिश्य नृपं कृपामयी
मुखेन तद्दिङ्मुखसम्मुखेन सा।
दमस्वसारं वदति स्म देवता
गिरामिलाभूवदतिस्मरश्रियं ॥ ५२ ॥
विलोचनेन्दीवरवासवासितैः
सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः।

अथेति। अथ कृपामयी बहुलकृपा सा गिरां देवता मुखेन अन्यं नृपं उद्दिश्य दमस्वसारं वदति स्म। किम्भूतेन। तस्योद्दे-श्यस्य नृपस्य दिङ्मुखं दिग्विभागः तस्य सम्मुखेन। किम्भूतं नृपं। इलाभूवत्पुरूरवसमिव। किम्भूतां। अतिस्मरा अतिक्रान्तस्मरा श्रीर्यस्यास्तां ॥ ५२ ॥

विलोचनेति। हे भैमि त्वं अपाङ्गाध्वगाया नेत्रप्रान्तरूप-भागगामिन्याश्चन्द्रिकायाः नेत्रमध्यगनीलगोलकस्याञ्चलैरिवा-ञ्चलैरतिदीर्घैर्विलोकनव्यापारैः कटाक्षैरिति यावत् तैः कृत्वा निभात् वस्त्वन्तरविलोकनव्याजात् अपाममपाकृत्य मालयं मल-याद्रिस्वामिनं माया: मम्यङ्रूपाया लक्ष्म्या आलयं वा चिति चित्तं निभालय विलोकय। किंभूतं। रुचः कायकान्तेः आलयं आस्पदीभूतं। किंभूतैरञ्चलैः। विलोचने एव इन्दीवरे नीलो-त्पले नीलोत्पलतुल्ये नेत्रे तयोर्मध्ये वासः स्थितिस्तया वासि-तैर्भावितैः नयननीलिम्ना नीलीकृतैरित्यर्थः। तथा सितैः शुभ्रैः। नीलश्वेतकान्तिभिः कटाक्षैर्विलोकयेत्यर्थः। अथ च विशेषण-

चपामपाकृत्य निभान्निभालय
चितिच्चितं मालयमालयं रुचः ॥ ५३ ॥
इमं परित्यज्य परं रणाद्रिः
स्वमेव भग्नः शरणं मुधाविशत् ।
न वेत्ति यत्त्रातुमितः कृतस्मयो
न दुर्गया शैलभुवाऽपि शक्यते ॥ ५४ ॥

तुल्यानां नीलोत्पलानां वासेन परिमलेन सुगन्धीकृतैः सितैः तिर्यगायतशीललादपाङ्गतुल्यमार्गगामिन्या ज्योत्स्नाया अञ्चलैः करैरुपलचितं। तथा रुचः कान्तेः आलयं स्थानं। तथा मः शिवः आलयो यस्य शिवमौलिनिवासिनं चन्द्रमेवैनं राजानं चपामपाकृत्य पश्येत्यर्थः। मः शिवे मा च पद्मायामिति विश्वः। निभालय। चुरादावात्मनेपदिनः पाठात् परस्मैपदं चिन्त्यं। निभालनं निभालस्तदाचिभालवांस्तादृशं कुर्व्विति। तत् करोतीति णिचि (पा० ३।१।२६।सू० १वा०) मतुल्लोपे साधनीयं ॥५३॥

इममिति। हे भैमि रणाद्भग्नः पलायितः कृतस्मयः कृतगर्व्वः अरिः एतस्य शत्रुः परं शत्रुभूतमथचातिमदान्तं इमं परित्यज्य स्वमेव स्वीयमेव शरणं गृहं मुधा वृथाऽऽविशत्। त्वदीयोऽहं मां रचेत्युक्ता एतमेव शरणं रक्षितारं कृतगर्व्वता-दप्राप्य स्वगृहं वृथैव गत इत्यर्थः। यद्यस्मात् दुर्गया विषमया शैलस्य भूः तया गिरिदुर्गेणेत्यर्थः। तथापि इतोऽस्मान्नृपात् त्रातुं न शक्यते इति न वेत्ति। गिरिदुर्गं प्रविष्टोऽपि यस्मात् ततोऽपाकृत्य

अनेन राज्ञाऽर्थिषु दुर्भगीकृतो
भवन् घनध्वानजरत्नमेदुरः ।
तथा विदूराद्रिरदूरतां गमी
यथा स गामी तव केलिशैलताम् ॥ ५५ ॥

छन्यते खगृहं प्रविष्टो छन्यत इति किं वाच्यं । अतः खगृहप्रवेशो व्यर्थ इत्यर्थः । अथ च पर्व्वतपुत्र्या दुर्गयापि त्रातुं न शक्यते । तद्रूपं छलेव शरणागतञ्च रक्षत्येवायमिति भावः । शरणं गृहरक्षित्रोरित्यमरः ॥ ५४ ॥

अनेनेति । एतद्रणे सोऽतिप्रसिद्धो विशेषेण दूरोऽद्रिरथ च रोहणाचलस्तथा तेन प्रकारेण अदूरतां सामीप्यं गमी गतो यथा येन प्रकारेण तव केलिशैलतां क्रीडापर्व्वतत्वं गामी गमिष्यति । किंभूतः । अतिवदान्येनानेन राज्ञाऽर्थिषु याचकेषु विषये दुर्भगीकृतः उपेक्षाविषयतां अयाचनीयतां प्रापितः । अत एव व्ययाभावात् नवा घना मेघास्तेषां ध्वानः शब्दस्तस्माज्जातैरत्नैर्मेदुरः परिपुष्टो भवन् । विदूराद्रौ हि नवमेघशब्दाद्रत्नशलाका उत्पद्यन्ते तास्च याचकैर्नीयन्ते । अस्मिंस्तु वदान्ये सति तत्र कस्यापि याचकस्यागमनाद्यभावाद्रत्नैः कृत्वा त्वदुपवनान्तं यावन्मेदुरो भवति स एव रत्नमयत्वात्तव क्रीडापर्व्वतस्थाने भविष्यति । अति वदान्योऽयमिति भावः । भवद्घनध्वानेति पाठे भवद्भ्य उत्पन्नेभ्यो घनध्वानेभ्य इति व्याख्येयं । गमी गामीति पूर्व्ववत् ॥ ५५ ॥

नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताम्भृङ्गजात-
छायान्तःपातचन्द्रायितचरणनखश्रेणिरैणेयनेत्रे ।
दृप्तारिप्राणवाताम्रतरसलहरीभूरिपानेन पीनं
भूलोकस्यैष भर्त्ता भुजभुजगयुगं सांयुगीनं बिभर्त्ति ॥ ५६ ॥

नम्रेति। हे ऐणेयनेत्रे ऐणेयो हरिणपोतस्तन्नेत्रवन्नेत्रे यस्या-स्तत्संबुद्धिः । एण्यवयवभूते वा नेत्रे यस्याः। भूलोकस्य भर्त्ता एष राजा संयुगे साधु सांयुगीनं रणरसिकं भुजद्वयरूपं भुज-गयुगं सर्पद्वयं बिभर्त्ति । किंभूतः । नम्राः प्रत्यर्थिपृथ्वीपतयः शत्रुनृपास्तेषां मुखान्येव कमलानि तेषां म्लानतया म्लानता तद्रूपा भृङ्गेभ्यो जाता छाया भ्रमरसम्बन्धिनी या शोभा कृष्ण-ता तस्या अन्तःपातेन नखमध्ये प्रतिबिम्बितेन चन्द्रायिता चन्द्रवदाचरिता चरणनखश्रेणिर्यस्य । किंभूतं। दृप्तानां मद-र्पाणामरीणां प्राणाख्यवात एवातिप्रियत्वादमृतरसस्तस्य लह-रीणां तरङ्गाणां भूरि अतितरां पानेन पीनं पीवरं। सगर्व-नृपप्राणवियोगकरणेनोर्जस्वि । समानाकारत्वादतिक्रूरकर्म-त्वाच्च भुजयोः सर्पत्वं । सर्पाणाञ्च पवनाशनत्वात् प्राणाख्यैः पवनैः पीनत्वं युक्तं। दर्परहितांश्चरणपातिनो वैरिणो रक्षति सदर्पानमश्रान्मारयत्ययमिति भावः। ऐणेयं। एण्या अपत्यं स्त्रीभ्यो ढक् (पा॰ ४।१।१२०)। एण्या अवयवा इत्यर्थे एण्या ढञ् (पा॰ ४।३।१५८)। सांयुगीनं। साध्वर्थे प्रतिज-नादित्वात् खञ् (पा॰ ४।४।९९)॥ ५६ ॥

अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयः फणसमुचितः काययष्टीनिकायः।
दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्त्यदःकीर्त्तिपूरः॥५७॥

अध्याहार इति। अमुष्य कीर्त्तिपूरः क्व कस्मिन् जगति न जागर्त्ति न प्रकाशते अपि तु स्वर्गपातालमर्त्यलोकेषु स्फुरति। लोकत्रयव्यापित्वं क्रमेणाह। किम्भूतः। स्मरहरशिरसि यश्चन्द्रः तस्य यः शेष एकला तस्या अध्याहारो लक्षणया पञ्चदशकलाभिः पूरकः। स्वर्गङ्गला शिवशिरःस्थितश्चन्द्रो येन षोडशकलः क्रियत इत्यर्थः। अन्यत्राप्यपूर्णवाक्ये किमपि योग्यं पदान्तरमध्याहृत्य वाक्यपूरणं क्रियते। तथा शेषस्याहेः सर्पराजस्य भूयांसः सहस्रसङ्ख्याकाः फणास्तेषां समुचितो योग्योऽतिदीर्घः काययष्टीनिकायः शरीरखण्डिकासमूहः। फणसहस्रस्य शरीरं सहस्रेण भवितव्यं। पातालं गत्वा तदीयशिष्टशरीरपूरणं क्रियत इत्यर्थः। तथा मुनेरगस्त्यस्य चुलुकनं सङ्कुचितहस्तपानं तस्माद्यस्त्रासो भयं तस्य नाशो निरासे अभि सामञ्जस्येनोपायः साधनं दुग्धाम्भोधेः। कायव्यूहः शरीरसङ्घः। पूर्वमेकाकित्वेन पानाद्भयमभूदिदानीमेतमेतद्यशोरूपानेकशरीरधारणात् एकस्यानेकपाने सामर्थ्याभावात्क्लमसाचस्य च धीरतापादनाद्दुग्धपयोभोस्य स्वरूपत्वाद्दुग्धे पयोभ्रमो यशसि दुग्धभ्रम इति दुग्धपयोभोनिर्भिर्गुणशबलत्वात् पानाभावात्। चयाभावसाधनभूतः क्षीरोदधेः कायव्यूहरूप इत्यर्थः॥५७॥

राज्ञामस्य शतेन किं कलयतो चेतिं शतघ्नीं हतं
लक्षैर्लक्षभिदो दृशैव जयतः पद्मानि पद्मैरलं।
कर्त्तुं सर्व्वपरच्छिदः किमपि नो शक्यं परार्द्धेन वा
तत्संख्यापगमं विनाऽस्ति न गतिः काचिद्वतैतद्‌द्विषां ॥ ५८ ॥

राज्ञामिति। नाम्ना शतघ्नीं चतुःशतीलोहकण्टकसञ्चितां चेतिं शस्त्रं कलयतो धारयतः अस्य राज्ञां शतेन किं हतं। तेन शस्त्रेण मारणात् तैरनेकैरप्यस्य किमपि कर्त्तुं न शक्यत इत्यर्थः। अथ च यः शतमारणसमर्थः शस्त्रं गृह्णाति तस्य शतसंख्यामितैर्राजभिः किमपि कर्त्तुं न शक्यते। तथा राज्ञां लक्षैः किं। हतं पूर्य्यतां। यतः लक्षं वेध्यं भिनत्तीति लक्षभित्तस्य लक्षभिदः। यो हि कुत्रचिदप्यप्रतिहतसायकस्तस्य लक्षसंख्यैरपि किमपि कर्त्तुं न शक्यत इत्यर्थः। तथा राज्ञां पद्मैः पद्मसंख्यैः राजभिरपि किं। तैरप्यस्य किमपि कर्त्तुं न शक्यते। यतो दृशैव पद्मानि कमलानि पद्मसंख्याकान्रिपूंश्च जयतः। यो हि कमलतुल्यनेत्रस्तस्य शत्रुतः पराभवो न। अथ च यो भ्रूक्षेपमात्रेण पद्मसंख्यापरिमितान् राज्ञो जयति तस्य पद्मसंख्यैः राजभिः किञ्चित् कर्त्तुं न शक्यते। तथा वा समुच्चये राज्ञां परार्द्धेनापि परार्द्धसंख्यैर्राजभिः अस्य किमपि कर्त्तुं नो शक्यं। यतः सर्व्वे च ते परे शत्रवश्च तांश्छिनत्ति तस्य। यो हि वैरिमात्रहनने समर्थस्तस्य परार्द्धसंख्याः शत्रवः किं कुर्व्वन्ति। तत्तस्मादेतस्य द्विषां संख्याद्गणादपगमं पलायनं अथ च परार्द्धरूपायाः संख्याया अप्यपगमं परित्यागमसंख्यत्वं विना काचिद्गतिर्नास्ति

वयस्ययाऽऽकूतविदा दमस्वसुः
स्मितं वितत्याभिदधेऽथ भारती ।
इतः परेषामपि पश्य याचतां
भवन्मुखेन स्वनिवेदनत्वरां ॥ ५९ ॥
ज्ञाताऽत्र देवी वचनाधिकारिणी
त्वमुत्तरं दासि ददासि का सती ।
ईतीरिणस्तन्नृपपारिपार्श्विकान्
स्वभर्त्तुरेव भ्रूकुटिर्न्यवर्त्तयत् ॥ ६० ॥

वत खेदे असह्येयाखेदभविष्यंस्तर्ह्यजीविष्यन् असह्येयत्वं नास्ति तस्मात्पलायनमेव जीवनोपायः । पलायितास्त्र इत्यर्थः । लघं शरव्ये सह्यायां । शतघ्नीं । अमनुष्यकर्तृके चेति ठक् (पां ३ । २ । ५३) ॥ ५८ ॥

वयस्ययेति । अथ दमस्वसुराकूतविदाऽभिप्रायज्ञया वयस्यया सख्या स्मितं वितत्य हसितं कृत्वा भारतीति अभिदधे उक्ता । इति किं । हे भारति त्वं भवन्मुखेन त्वन्मुखेन स्ववर्णनं याचतां प्रार्थयमानानामितोऽस्मान्नृपात्परेषामन्येषां राज्ञां स्वनिवेदने स्ववर्णने एव त्वरां कालविलम्बासहनत्वं पश्य एतद्वर्णनाद्विरमेति भावः । अन्यानपि वर्णयेत्यर्थः ॥ ५८ ॥

ज्ञातेति । स्वभर्त्तुः स्वस्वामिन एव भ्रुकुटिः कोपवशाद्भ्रूभङ्गः इति पूर्व्वोक्तं ईरिणो भाषमाणांस्तान्नृपपारिपार्श्विकान् राजसेवकान् न्यवर्त्तयत् न्यषेधत् । भ्रूक्षेपमात्रेण तेनैव ते निवारिता ।

धराधिराजं निजगाद भारती
तदुन्मुखेषद्दलिताङ्गसूचितं * ।
दमस्वसारं प्रति सारवत्तरं
कुलेन शीलेन च राजसूचितं ॥ ६१ ॥
कुतः कृतैवं वरलोकमागतं
प्रति प्रतिज्ञाऽनवलोकनाय वा ।

इत्यर्थः। इति किं। हे दासि अत्र राजवर्णने वचनाधिकारिणी भाषणाधिकारिणी देवीकृता त्वं का सती का भवन्ती केन प्रयुक्ता सती अथ चासती कुलटा का त्वमुत्तरं ददासि। अत्र त्वं वक्तुमयोग्येति। पारिपार्श्विकान्। परिपार्श्वं वर्त्तन्ते परिमुखञ्चेति (पा० ४। १। २८) चकाराट्ठक्॥ ६०॥

धरेति। भारती दमस्वसारं प्रति धराधिराजं नृपं निजगाद कथयति स्मेत्यर्थः। किंभूतं। तस्य वर्णनीयस्य नृपस्य उन्मुखं सम्मुखं ईषद्दलितेन किञ्चित्परिवर्त्तितेनाङ्गेन करादिना सूचितं ज्ञापितं। तथा सारवत्तरमतिबलिष्ठं। तथा कुलेन शीलेन स्वभावेनाचरणेन वा राजसु मध्ये सूचितं योग्यं श्रेष्ठं। कुलशीलाभ्यां सारवत्तरं श्रेष्ठतरं वा॥ ६१॥

कुत इति। हे भैमि ते त्वया आगतं स्वयम्वरार्थं वरलोकं परिणेतृवृन्दं प्रति लक्षीकृत्य अनवलोकनाय अदर्शनायैवममुना दृश्यमानेन प्रकारेण प्रतिज्ञा कुतः कस्मात् कारणात् कृता

* वलिताङ्गसूचितमिति पाठान्तरं। सं० पु०।

अपीयमेनं मिथिलापुरन्दरं
निपीय दृष्टिः शिथिलास्तु ते वरं ॥ ६२ ॥
न पाहि पाहीति यदब्रवीरमुं
समौष्ठ तेनैवमभूदिति क्रुधा।
रणच्छितावस्य विरोधिमूर्द्धभि-
र्विदश्य दन्तैर्निजमोष्ठमास्यते ॥ ६३ ॥

अपि त्वयुक्तमेतत्। वेति पाठे कुतो वेत्यन्वयः। अनवलोकनार्थैवेति अवधारणार्थो वा। न केवलं वरणायैव किन्तु अनवलोकनायापीति अप्यर्थो वा। किन्तर्हि कर्त्तव्यमित्यत आह। हे भैमि ते इयं दृष्टिः एनं मिथिलाया नगर्याः पुरन्दरं स्वामिनं निपीयैव शिथिलाऽस्तु एतद्वरं। सर्व्वथाऽनवलोकनाद्विलोकनं वरमिति राजान्तरवदनानुरागेण्येनं विलोकयेत्यर्थः। अन्ये यद्यपि नावलोकितास्तथाप्येनं विलोकय। विलोकनेनापि एनं सभावयेत्यर्थः। पूर्व्वश्लोके सामान्यत उक्तत्वात्। अन्वादेशे (पा॰ २। ४। ३४) एनमिति समर्थनीयं ॥ ६२ ॥

न पाहीति। अस्य विरोधिमूर्द्धभिर्व्वैरिशिरोभिः इति क्रुधा रणच्छितौ निजमोष्ठं दन्तैर्व्विदश्य विशेषेण दष्ट्वा आस्यते स्थीयते। इति किं। हे ओष्ठ त्वं अमुं नृपं प्रति पाहि पाहि इति यत् अब्रवीः तेन कारणेन समौष्ठविलुण्ठनपूर्व्वकं मरणमभूदिति। पाहि पाहीति यो वदति तमधं रक्षति। पाहीति पदोच्चारणे प्रथमं तत्रैव सामर्थ्यं पकारस्यौष्ठ्यत्वात् तथा प·

भुजेऽपसर्पत्यपि दक्षिणे गुणं
सचेषुणाऽऽदाय पुरः प्रसर्पिणे ।
धनुः परीरम्भमिवास्य सम्मदात्
महाहवे दित्सति वामबाहवे ॥ ६४ ॥
अस्योर्व्वीरमणस्य पार्व्वणविधुद्वैराज्यसज्जं यशः
सर्व्वाङ्गोज्ज्वलशर्व्वपर्व्वतसितश्रीगर्व्वनिर्व्वासि यत् ।

मदर्पत्वात्तदनुचारणान्मामयं मारितवानिति त्वमेवापराधीत्यर्थः । शवमुष्टिन्यायेन दष्टैव न तु मुक्तेति आस्यत इत्यनेन सूचितं ॥ ६३ ॥

भुज इति । महाहवे महति रणसम्मर्द्दे दक्षिणेऽपसव्ये अथ च सरले अनुकम्पेऽपि भुजे इषुणा सह गुणं मौर्व्वीमपि आदाय गृहीत्वाऽपसर्पति कर्णपश्चाद्देशं गच्छति सति पुरः प्रसर्पिणे रिपुसम्मुखयायिने दृढतरमुष्टयेऽस्य वामबाहवे सव्यभुजाय धनुः सम्मदादिव दृढतरत्वजाताद्धर्षादिव परीरम्भमालिङ्गनं दित्सति दातुमिच्छति। दित्सतीति वा। अन्यस्मिन्नपि गुणिनि विश्रामपात्रे सङ्ग्रामात् स्वजनमादाय पलायिते सति सङ्ग्रामं कर्त्तुं सम्मुखाय वामाय दुष्टायापि अयमेव साधुरिति मत्वा स्वाङ्गजेन केनचित्साध्यसेनालिङ्गनं दीयते। दृढमुष्टिरतिशूरोऽयमिति । सङ्ग्रामे कर्णान्तपर्य्यन्तमाकर्षणाद्धनुश्चकीत्य शरान्मुञ्चन्नेवास्ते इति भावः । वामबाहव इति । इदातियोगाच्चतुर्थी ॥ ६४ ॥

अस्येति । अस्योर्व्वीरमणस्य राज्ञः यद् यशः एतादृशं ।

तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्य्यायः किमु दुग्धसिन्धुपयसां सर्व्वानुवादः किमु ॥ ६५ ॥
निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटाऽवट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायङ्करः ।

कीदृश यशः। पर्व्वणि भवः पार्व्वणः पूर्णो विधुश्चन्द्रः तस्य द्वैराज्यं द्वयोराज्ञोः कर्म्म तत्र सज्जं तत्परं पार्व्वणचन्द्रसदृशमित्यर्थः । तथा सर्व्वेष्वङ्गेषु उज्ज्वलस्य धवलस्य शर्व्वपर्व्वतस्य हरनिवास-भूतकैलासस्य सितश्रीः श्वेतकान्तिस्तद्विषये यो गर्व्वस्तस्य नि-र्व्वासि निराकारकं । कैलासादपि धवलतरं एवम्भूतं यत् यशः तत्कम्बुप्रतिबिम्बितं सामुद्रशङ्खप्रतिबिम्बं किमु। तथा शरदि पर्जन्यराजिर्मेघपङ्क्तिस्तस्याः श्रीर्धवलिमशोभा तस्याः पर्य्यायः किमु। शब्दस्य शब्दान्तरेणोच्चारः पर्य्यायः । तथा दुग्धसिन्धोः क्षीरोदस्य पयसां दुग्धानां सर्व्वैण प्रकारेणानुवादः पुनरभि-धानं किमु । चन्द्रादितुल्यमेतद्यश इति भावः । अन्योऽपि अधिष्ठितद्वैराज्यः प्रतिपक्षं निरस्यति ॥ ६५ ॥

निस्त्रिंशेति । अस्य नृपस्यायं दृश्यमानः करः कैरेवम्भूत इव न उन्नीतः तर्कितः अपि तु सर्व्वैरप्येवमेव तर्कितः। कीदृशः करः। निस्त्रिंशेन खड्गेन त्रुटिता चुटितायाः खण्डनं प्राप्तायाः अरिवारणघटायाः वैरिगजपरम्परायाः कुम्भानां गण्डस्थलानां अस्थिकूटा अस्थिसमूहास्तेषामवटस्थाने गर्त्तस्थस्थाने स्थायुकः स्थितिशीलो मौक्तिकोत्करो मुक्तासङ्घस्तस्य किरः विक्षेपकः ।

उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरङ्गक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीजबीजव्रजं ॥ ६६ ॥
अर्थिभ्रंशवहृभवत्फलभरव्याजेन कुब्जायितः
सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः।

तथा चत्वारि करिनररथतुरगलक्षणानि अङ्गानि येषामेवम्भूतानि सैन्यानि येषु ते समराः सङ्ग्रामास्तेषु त्वङ्गन्तश्चित्रं गच्छन्तस्तुरङ्गास्तेषां क्षुरैश्चरणाग्रनखतीक्ष्णाघातैः क्षुण्णासु विदारितासु कृष्टासु क्षितिषु रणक्षेत्रभूमिषु यशोलक्षणस्य क्षोणीजस्य तदुत्पादकं बीजव्रजं बीजसङ्घं क्षिपन्निव वपन्निव। यशोवृक्षस्य शुभत्वात्तत्कारणेन बीजेन शुभ्रेणैव भवितव्यं। अरिकरिकुम्भस्थमुक्ताफलानि बीजस्थाने जातानीत्यर्थः। अन्योऽपि पात्रस्थं बीजसङ्घं स्वकरेणाकृष्य हलकृष्टासु भूमिषु वपति। वैरिकरिणां हननादेतस्य बहु यशो जातमिति। तैक्ष्ण्यात्क्षुराः खुरा इति तुल्यः शब्दः। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्ग इति। डप्रकरणे सङ्ख्यायामात्पुरुषस्योपसङ्ख्यानं निस्त्रिंशाद्यर्थमिति डः। स्यायुक्तं। लमपतपदस्येत्युकञ् (पा॰ ३।२।१५४)। किरतीति किरः। इगुपधेति कः (पा॰ ३।१।१३५)॥ ६६ ॥

अर्थीति। स कल्पद्रुमः प्रसिद्धः केवलं कल्पितप्रदः। अस्मिन् राजनि अतिदानं अतिशयितं दानं भजति अकल्पितमपि ददति सति अर्थिभ्रंशाद्याचकैर्वर्जनात् पूर्वमल्पान्यपि व्ययाभावाद्बहुभवन्ति बहूनि जायमानानि फलानि तेषां भरव्याजेन

आस्तां निर्व्ययरत्नसम्पदुदयोदयः कथं याचक-
श्रेणीवर्जनदुर्य्यशोनिबिडितव्रीडस्तु रत्नाचलः ॥ ६७ ॥
त्यजामि किं विघ्नमिदं नृपस्तुता-
विनीङ्गितैः पृच्छति तां सखीजने।

भारगौरवमिषेण कुब्जायितः खर्व्ववदाचरितोऽतिनम्रः सन् कथमप्यास्तां महता क्लेशेन। अथ च लज्जागोपनप्रकारेणापि तिष्ठतु कालं वातिवाहयतु। नम्रत्वेन लज्जागोपनं युक्तमिति भावः। तु पुनः रत्नाचलः याचकश्रेण्या वर्जनात् परित्यागात् जातेन दुर्य्यशसाऽपकीर्त्त्या निबिडिता घनीकृता व्रीडा लज्जा यस्यैवम्भूतोऽपि याचकाभावान्निर्व्यययाऽव्ययया रत्नसम्पदा कृत्वा य उदयोऽनुस्यूता वृद्धिस्तेनोदयः उच्चशिखरोऽथ वा नम्र एव कथमास्तेऽपि तु लज्जितस्यानम्रत्वमयुक्तमेवेत्यर्थः। कल्पवृक्षस्य स्वर्गस्थितत्वाद्दुष्प्रापतया फलभरव्याजेन नम्रतया च लज्जा-परिहारः सम्भवः। रोहणाद्रेस्तु एकलोकनिवासाद्दुष्प्राप-त्वाभावेऽपि याचकैर्वर्जनाल्लज्जातिशयमतिनम्रत्वं युक्तं तत्तु तस्य नास्तीत्याश्चर्य्यं। कल्पवृक्षमेरुभ्यामप्ययमधिको दानशूर इति भावः। कुब्जायितः। लोहितादेराकृतिगणत्वादाचारे क्यष् (पा॰ ३।१।१३)॥ ६७॥

त्यजामीति। वधूर्भैमी सखीजने इङ्गितैर्भ्रूभङ्गादिचेष्टितैः कृत्वा तां भैमीमिति पृच्छति सति स्वाभिप्रायज्ञापनार्थं गिरा-माय वाचं वम् अवमत्यत् ...

स्मिताय वक्त्रं यदवक्रयद्वधू
स्तदेव वैमुख्यमलक्षि तन्नृपे ॥ ६८ ॥
दृशाय निर्दिश्य नरेश्वरान्तरं
मधुस्वरा वक्तुमधीश्वरा गिरां ।
अनूपयामास विदर्भजाश्रुती
निजास्यचन्द्रस्य सुधाभिरुक्तिभिः ॥ ६९ ॥

राज्ञि वैमुख्यं पराङ्मुखत्वं अलक्षि अलक्षितं । अन्यतो विलोकनादेवानादरोऽस्या इतीति सखीभिर्लोकितेन राज्ञा वा तर्कितमित्यर्थः । इति किं । हे भैमि अहं अयच्चामी नृपश्च इदं-नृपस्तस्य स्तुतो विघ्नं सृजामि किं । वैलक्ष्यमिति पाठे असावधानतया यस्मान्मुखमवक्रयत् तस्मादेव भूपगतमेव वैलक्ष्यं मालिन्यं लोकैर्लक्षितमित्यर्थः । स्मिताय । स्मितं कर्त्तुं क्रियार्थोपपदेति चतुर्थी (पा॰ २ । ३ । २४) ॥ ६८ ॥

दृशेति । अथ मधुरस्वरा गिरामधीश्वरा वक्तुं वर्णयितुं दृशा नेत्रव्यापारेण नरेश्वरान्तरं नृपान्तरं निर्दिश्य दर्शयित्वा विदर्भजाश्रुती भैम्याः कर्णौ निजास्यं स्वीयवदनमेव चन्द्रस्य सुधाभिरमृतरूपाभिरुक्तिभिः कृत्वा अनूपयामास परिपूर्णे चकार उवाचेत्यर्थः । अनुगता आपो यत्रानूपो देशः । ऋगादिना समासान्ते ऊदनोर्देश इत्यूकारः (पा॰ ६ । ३ । ९८) । अनूपे जलप्लुते चकार । तत् करोतीति णिच् । लक्षणया मधुरस्वराकर्णनतिमिते चकारेत्यर्थः । अपूपुरद्भीमभुवः श्रुती पुनरिति पाठे णौचङ्युपधाया इति किं वाच्यमित्युपधाह्रस्वः (पा॰ ७ । ४ । १) ॥ ६९ ॥

स कामरूपाधिप एष हा त्वया
न कामरूपाधिक ईक्ष्यतेऽपि यः।
त्वमस्य सा योग्यतमाऽस्ति वल्लभा
सुदुर्लभा यत्प्रतिमल्लभा परा ॥ ७० ॥
अकर्णधाराशुगसम्भृतां गतां
गतैररित्रेण विनास्य वैरिभिः।

स इति। एष कामरूपस्य देशविशेषस्याधिपः। अथ च मदनरूपस्यापि स्वामी तद्रूपधारणादित्यर्थः। स कः। यस्त्वया न ईक्ष्यतेऽपि न नाभिलष्यत इति तु किं वाच्यमित्यर्थः। हा कष्टमनुचितमेतत्। यतः कामाद्रूपेणाधिक अतिसुन्दरः। अथवा कामाद्रूपेणाधिको नेति काक्वा। यतोऽयं कामादधिकस्तस्मादस्य योग्यतमा सा त्वं वल्लभाऽसि नितरामुचिता प्रेयसी भवसि। सा का। परा उत्कृष्टा यस्यास्तव प्रतिमल्ला तुल्या भा कान्तिः सुतरां दुर्लभा यस्याः। मदृशी कान्तिः कस्याश्चिदपि न दृष्टपरी। अस्यापि सुन्दरत्वादित्यर्थः। अथ च पराऽन्या स्त्री यस्यास्तुल्यकान्तिर्दुर्लभा सातिसुन्दरी त्वमित्यर्थः। त्वमतिसुन्दरी अस्य सुतरामयोग्येत्यर्थ इति वा व्याख्यानान्तरं श्लिष्टत्वादुपेक्ष्यं। सुदुर्लभा। नसुदुर्भ्यां केवलाभ्यामिति नुम्निषेधः (पा० ७।१।६८) ॥ ७० ॥

अकर्णेति। अस्य वैरिभिः समरे निमज्य निपत्य यावान् सकलमार्गणिः सूर्यस्तन्मण्डलस्येत्यर्थः। भिदां भेदं विधाय हला- भवः संसार एव दुस्तरत्वादर्णवस्तीर्णः मोक्षप्राप्तेरपुनरावृत्तेः

विधाय यावत्तरणेर्भिदामहो
निमज्य तीर्णः समरे भवार्णवः ॥ ७१ ॥

रित्यर्थः। अहो आश्चर्यं शूरतरोऽयमित्यर्थः। किम्भूतैः। अरिभ्यस्त्रायत इत्यरित्रं कवचं तेन विनाऽथवारेरस्मात् सकाशाद्रक्षकेणान्येन शूरतरेण विना न विद्यन्ते कर्णाः कर्णाकारा लोहकण्टका यासां एवंविधा धारा येषामेवंभूताः। कर्णान् घरन्ति कर्णधाराः न कर्णधारा अकर्णधारा एवम्भूता वा आशुगा वाणाः अदुष्टाः शरास्तैः संस्तृतानि प्रोतानि अङ्गानि अवयवा येषां तेषां भावस्तत्ता तां गतैः प्राप्तैः प्रत्यवयवविद्धैरित्यर्थः। यावत् साकल्ये। अथ च कर्णधारो नाविकः आशुगो वायुस्ताभ्यां कृत्वा संस्तृतानि परिपुष्टानि अङ्गानि रज्जुस्तम्भादीनि तरणोपायभूतानि च येषां कर्णधारानुकूलवायुना वा संस्तृतान्यङ्गानि येषां एवम्भूता ये न भवन्ति तद्भावं गतैः। अरित्रेण जलक्षेपणकाष्ठेन विना तस्याप्यभावे यावत्तरणे सकलाया नौकाया भेदं विधाय सकलां नौकां स्फोटयित्वा निमज्य बुडित्वा अर्णवस्तीर्णः। हे भव शिव अहो अत्याश्चर्यं कर्णधाराद्यभावे नौकायाश्च भेदे बुडित्वा तरणं तत्रापि समुद्रस्येति अत्याश्चर्यं अघटमानघटने च आश्चर्यसूचकं शिवनामोच्चारणं क्रियते। कर्णधारस्तु नाविकः। नौकादण्डः क्षेपणी स्यादरित्रं। स्त्रियां नौस्तरणिस्तरिः। द्युमणिस्तरणिर्मित्र इत्यमरः ॥ ७१ ॥

अमुष्य भूलोकभुजो भुजोष्मभि-
स्तपर्त्तुरेव क्रियतेऽरिवेश्मनि ।
प्रपां न तत्रारिवधूस्तपस्विनी
ददातु नेत्रोत्पलवासिभिर्जलैः ॥ ७२ ॥
एतद्दृत्ताशिवातखवदश्वगखुर्द्दंशसार्द्रैन्धनैतद्-
दोरुद्दामप्रतापज्वलदनलमिलद्भूमधूमभ्रमाय ।

अमुष्येति । भूलोकभुजो भूपालस्यामुष्य भुजोष्मभिर्बाहुप्र-
तापैः अरिवेश्मनि अतिसन्तापकारित्वात्तपर्त्तुरेव ग्रीष्मर्त्तुरेव
यद्यस्मात् क्रियते तस्मात् तत्र ग्रीष्मर्त्तौ तपस्विनी दीनारिवधूः
नेत्राण्येवोत्पलानि तेषु वासिभिर्जलैः अश्रुभिः । अथ च नेत्र-
तुल्यकमलानां यो वासः परिमलः स विद्यते येषु तैर्जलैः इत्वा
प्रपां पानीयशालां न ददातु अपि तु ददात्येव । तपस्विनी
ग्रीष्मर्त्तौ सुगन्धिभिरुदकैः प्रपां करोति । अनेन पतिमार-
णात् शोकव्याप्ता सर्व्वाप्यरिनारी रुरोदैवेति भावः । प्रपा
पानीयशालिकेत्यमरः ॥ ७२ ॥

एतदिति । आजिस्थलीषु सङ्ग्रामभूमिषु एतत्रासीरस्य एत-
त्सेनामुखस्य पुरो गच्छन्तो वाजिव्रजास्तेषां खुरेभ्यश्चरणाग्रेभ्यो
जातैरुद्धूलिता रजोराजिः रेणुपङ्क्तिः एतस्य दिग्जैत्रयात्रा
दिग्जयकारिण्यो या यात्राः तैरिमसुखं गतास्तासु, असम-
मतुम्ल समरस्य भर सम्मर्द पश्यतः कस्य जनस्य एतेन राज्ञा
दर्पोद्धोऽभिघातेभ्यः स्मरदृष्टयर्क येषां एतेन दर्पोऽभिघातो येभ्य.

एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासीत्
एतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ॥ ७३ ॥
क्षीरोदन्वदपः प्रमथ्य मथितादेशेऽमरैर्निर्म्मिते
स्वाकल्पं व्रजतस्तदस्य यशसः क्षीरोदसिंहासनं।

अत एव स्ववद्यस्त्रो वाऽसुहृदंशा अरिवंशा अथ च तद्रूपा वेणवस्त एव साद्राणीन्धनानि दाह्यकाष्ठानि यस्यैवंभूत एतस्य दोष्णोर्वाक्कोरुद्दामप्रतापस्तीव्रप्रतापः स एव ज्वलन्देदीप्यमानोऽनलः तस्य मिलन् सम्भवन् भूमा बाहुल्यं यस्यैवंभूतो बह्वतरो धूमस्तस्य भ्रमाय साहृश्याद्धूमेऽपि रजसि धूम इति बुद्धये नासीदपि तु सर्व्वस्यापि। आर्द्रवेणुरूपेन्धनं दहतो वह्नेर्भूयान् धूमो भवति। सर्व्वेऽप्यरय एतत्प्रतापवह्निना दग्धाः। अश्वपतिश्चायमिति भावः। साद्रमित्यार्द्रपर्यायः। मिलद्भूमभूमेति पाठे मिलतो धूमस्य बाहुल्यं तद्भ्रान्तये ॥ ७३ ॥

क्षीरेति। केषां जगतां भुवनानां सम्बन्धिना जनेनास्य राज्ञो यशसोऽभिषेक एवोत्सवो नाजनि नाकारि अपितु स्वर्गादिस्थितेन सर्व्वेणापि लोकेनैतदीययशसोऽभिषेकः कृतः। विशेषेणाधिष्ठानमाह। किंभूतस्य यशसः। क्षीरोदन्वदपः क्षीरोदन्वान् क्षीरसमुद्रस्तस्यापो जलानि दुग्धरूपाणि प्रमथ्य मन्दराचलेन कृत्वा प्रकर्षेण विलोड्यामरैर्मथनक्रियायोगान्मथितमिति आदेशे मज्जायां निर्मिते कृतायां अथ च निर्जलं मन्थमथितं दधि मथितमित्युच्यते। ततश्च क्षीरस्यापि मथनक्रिया-

केषां नाजनि वा जनेन जगतामेतत्कवित्वामृत-
स्रोतःप्रोतपिपासुकर्णकलशीभाजाभिषेकोत्सवः ॥ ७४ ॥

योगादस्मैर्भवन्माथितरूपे आदेशे निर्मिते सति जले स्थित्य-सम्भवचीरोदन्वदुदके दुग्धरूपे अतिघने कृते सतीत्यर्थः । चीरोदरूपं सिंहासनं शुभ्रवस्तुमात्रापेक्षया तस्यातिशुभ्रत्वा-द्भद्रं यद्भद्रपीठं तत्खेनात्मनाथ च सुखेन आयासरहितं यथा तथा आक्रम्यमुपवेशनयोग्यं सृजतः कुर्व्वतः चीरोदपदमधि-तिष्ठत इत्यर्थः । किंभूतेन जनेन । एतद्रचितं कवित्वं एतत्स-म्बन्धिकविभिर्निर्म्मितं कीर्त्तिवर्णनरूपं कवित्वं तदेव स्वादुतर-त्वादमृतं तस्य स्रोतसि प्रवाहे प्रोतौ स्यूतौ सृतौ सादरमा-कर्णनेच्छू अथ च जलभरणेच्छू कर्णावेव कलशौ महान्तौ कलशौ भाजा भजता । लोके हि कस्मिंश्चिद्राजनि केनचिन्म-थिते तदीयं सिंहासनमधिष्ठितोऽन्यस्य केनचिद्वारिपूर्णेन कलशे-नाभिषेकः क्रियते । घनीरूपतया उपवेशनयोग्यतां सूचयितुं मथितादेशे कृते सतीत्युक्तं । जलोपरि उपवेशनासम्भवात् । ची-रोदादपि विमलतरं मद्दीयश्चैतद्यशो वैदेशिकैर्लोकत्रयसञ्चारि कृतमिति भावः । तक्रं ह्युदश्विन्मथितं पादाम्बर्धाम्बु निर्जल-मित्यमरः । चीरोदन्वदपः । उदन्वानुदधौ चेति (पा० ८ । २ । १३) साधुः । ऋक्पूरब्धित्यप्रत्ययः (पा० ५ । ४ । ७४) । स्वाकर्म्यं । पोरदुपधादिति यत् (पा० । ३ । १ । ९८) । अजनि । कर्मणि चिण् (पा० ३ । १ । ६६) ॥ ७४ ॥

समिति पतिनिपाताकर्णनद्रागदीर्ण-
प्रतिनृपतिमृगाचीलचवचःशिलासु।
लिखितलिपिरिवोरस्ताडनव्यस्तहस्त-
प्रखरनखरटङ्कैरस्य कीर्त्तिप्रशस्तिः ॥ ७५ ॥
विधाय ताम्बूलपुटीं कराङ्कगां
बभाण ताम्बूलकरङ्कवाहिनी।

समितीति। अस्य राज्ञः कीर्त्तिप्रशस्तिर्वर्णनपङ्क्तिः समिति सङ्ग्रामे पतीनां निपातो मरणं तस्याकर्णनेन द्राक् शीघ्रं अदीर्णानि प्रतिनृपतिमृगाचीणां लचस्य वचांसि तान्येव तत्-क्षणमेवाविदीर्णलाञ्छिलास्तासु शोकवशादुरस्ताडने व्यस्तयो-र्दृढनिवेशितयोर्हस्तयोः प्रखरा अतितीक्ष्णा नखरा नखा एव टङ्काः पाषाणदारणलोहविकारास्तैरचितलिपिरिव रचित-लेखनेवास्तीति शेषः। अन्यस्यापि कीर्त्तिप्रशस्तिः शिलासु टङ्किकाभिरुत्कीर्य्य लिख्यते। सर्व्वेऽप्यरयोऽनेन हतास्तासामयर्थ-शोकवशादुरस्ताडनं कुर्व्वन्ति अतिशूरत्वादस्य कीर्त्तिर्भवती-त्यर्थः। दृढशोकेऽप्यदीर्णताच्छिलात्वं। शोकातुरस्योरस्ताडनं जातिः। टङ्कः पाषाणदारण इत्यमरः। समिदाजौसमितयु द्धेति ॥ ७५ ॥

विधायेति। ताम्बूलस्य करङ्कः सुवर्णादिरचितहंसाद्या-कारं ताम्बूलधारणपात्रं पटीति लोके तस्य वाहिनी धारिणी काचित् सखी दमस्वसुर्भावं तदर्थनिषेधरूपं अवेत्य ज्ञात्वा

दमस्वसुर्भावमवेत्य भारतीं
नयाऽनया वक्त्रपरिश्रमं शमं॥ ७६ ॥
समुन्मुखीकृत्य वभार भारती
रतीशकल्पेऽन्यनृपे निजं भुजं।
ततस्त्रसद्बालमृगदृग्विलोचनां
शशंस संसज्जनरञ्जनीं जनीं॥ ७७ ॥

भारतीं इति बभाण। किं कृत्वा। ताम्बूलपुटीं पूगीफलचूर्णख-
दिरपर्णानि यत्रैकत्र क्रियन्ते। यां मध्यदेशभाषया गुलविडेति
व्यवहरन्ति। तां देव्यै दातुं कराङ्कगां स्वीयकरतलमध्यगतां
वा कृत्वा करङ्कं गृहीत्वेत्यर्थः। इति किं। हे देवि त्वं अनया
वीटिकया एतदीयबहुवर्णनजनितं वक्त्रस्य सकलं परिश्रम
शमं नय बहुवर्णनजनितं शोषं शान्तिं प्रापयेति। एतत्स्तुते-
र्विरमेत्यर्थः। अन्योऽपि शुष्कमुखो वीटिकया श्रमं शमं
नयति॥ ७६॥

समिति। भारती रतीशकल्पे कामतुल्येऽन्यनृपे निजं भुजं
बाहुं सम्यग् उन्मुखीकृत्य बभार भैम्यै तं दर्शयितुं तदभिमुखं
चकार। ततः अनन्तरं त्रसद्बालमृगदृग्विलोचनां भीतबालह-
रिणमेषां संसज्जनानां सभ्यानां रञ्जनीं अनुरागजनिकां जनीं
वरार्थिनीं तां भैमीं शशंस अभाणीत्। रतीशतुल्य इति च
पाठः। रञ्जनीं। ग्मगरमणाभावाञ्जलोपाभावः (पा॰ ६। ४।
२४। सू॰ ३ वार्त्तिके।) ॥ ७७॥

अयं गुणौघैरनुरज्यदुत्कलो
भवन्मुखालोकरसोत्कलोचनः ।
स्पृशन्तु रूपामृतवापि नन्वमुं
तवापि दृक्तारतरङ्गभङ्गयः ॥ ७८ ॥
अनेन सर्व्वार्थिकृतार्थताकृता
ऽऽहृतार्थिनौ कामगवीसुरद्रुमौ ।

अयमिति । हे भैमि गुणौघैः सौन्दर्य्यादिगुणसङ्घैः अनुरज्यन्तोऽनुरक्ता भवन्तः उत्कला लक्षणया तद्देशनिवासिनो लोका यत्र । अथ च गुणौघैरनुरज्यन्त उत्कृष्टाश्चतुःषष्टिःकला यत्र तैरुपलक्षितोऽयं नृपः । यस्मात् भवन्मुखालोके रसेनानुरागेणोत्कलोचन उत्कण्ठितनेत्रोऽस्तीति शेषः । तस्मान्नु हे रूपामृतवापि सौन्दर्य्यामृतदीर्घिके सुन्दरि तवापि दृशोस्तारा उज्ज्वला विशाला वा चञ्चला वा तरङ्गाः पुनर्व्यापाररूपाः कमलास्तेषां भङ्गयः प्रकारविशेषा अमुं स्पृशन्तु । अयं त्वां पश्यति त्वमप्येनं कटाक्षैः पश्य योग्यत्वादिति भावः । अनुरज्यदुत्कल इत्यनेन जनानुरञ्जनात् सम्पदाधिक्यं सूचितं । अन्यस्यामपि जलवाप्यां चञ्चलतरङ्गभङ्गयो भवन्ति । अनुरज्यदिति । शनो ङित्वान्नलोपः (पा॰ १।४।१४) ॥ ७८ ॥

अनेनेति । कामगवीसुरद्रुमौ कामधेनुकल्पवृक्षौ मिथः अन्योन्यं क्रमेण पयःसेचनपल्लवाशने दुग्धसेचनपल्लवभोजने प्रदाय प्रकर्षेण दत्वा दानस्य व्यसनं अतिशये सत्यवश्यकरणीय-

मिथःपयःसेचनपल्लवाशने
प्रदाय दानव्यसनं समाप्नुतः ॥ ७९ ॥
नृपः कराभ्यामुदतोलयन्निजे
नृपानयं यान् पततः पदद्वये।
तदीयचूडाकुरुविन्दरश्मिभिः
स्फुटेयमेतत्करपादरञ्जना ॥ ८० ॥
यत् कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना।

तथा प्रासस्थायत्वं समाप्नुतः समाप्तिं नयतः। कस्मादित्यत आह। किम्भूतौ। सर्व्वार्थिनां सर्व्वयाचकानां अभीष्टदानात् या कृतार्थता जन्मसाफल्यलक्षणं कृतार्थत्वं तां करोत्येवंभूतः कृत् तेनानेनातिदानात् समग्रत्याहृता आनीता अर्थिनो याचका ययोस्तौ। अर्थान्तराभावात् कामगव्या कल्पवृक्षस्य दुग्धसेकः कृतस्तेन च पल्लवा भक्षयितुं तस्मै दत्ता इत्यर्थः। दानशूरोऽयमिति भावः ॥ ७८ ॥

नृपेति। अयं नृपः निजे पदद्वये प्रणामवशात् पततः नमतः यान् नृपान् कराभ्यां कृपया शिरसि धृत्वा उदतोलयत् उत्थापयामास। तदीया राजकीया याश्चूडामुकुटास्तासां कुरुविन्दरश्मिभिःमाणिक्यशोणशोभाभिः कृतेयमेतस्य करपादयोः रञ्जना रक्तिमा स्फुटा दृश्यत इति शेषः ॥ ८० ॥

यदिति। भानुमान् सूर्य्यः कस्यामपि ककुभि दिशि स्थेमानं,

एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
धिक्तं वाडवमम्भसि द्विषि भिया येन प्रविष्टं पुनः ॥ ८१ ॥

स्थिरत्वं यत् नालम्बते अङ्गीकरोति किन्तु सर्व्वदा परिभ्रमत्येव। दावाग्निना वनवह्निना च घनं अतिगहनं काननं तमश्चर्णं एकं केवलं शरणं रचितारं प्राप्तेन तदेकाश्रयेन यज्जातं। एतस्य भुजतेजसा विशेषेण जितयोस्तयोः सूर्य्यदावानलयोस्तावन्निश्चितं एषा औचिती युक्तकारितरता। भीतस्य व्याकुलता वनाश्रयणस्य युक्तं इत्यर्थः। मानी हि जितः सन् लज्जया मुखमदर्शयन् पुनर्दर्शनभयेनैकस्मिन्देशे वासं त्यक्त्वा सर्व्वत्र परिभ्रमति सर्व्वथाऽन्यस्य प्रवेष्टुमशक्यं घनं गहनं वाविशति। ताभ्यां युक्तमेव कृतमित्यर्थः। तं वाडवं वडवानलं पुनर्धिक् येनास्य भिया द्विषि सहजशत्रौ अम्भसि समुद्रजले प्रविष्टं निमग्नं। मानी हि पराजितोऽपि वैरिणः शरणं नैति अयन्तु गत इति अभिमानित्वाभावान्निन्द्य एवेत्यर्थः। अथ च वाडवो ब्राह्मणः। ततश्च ब्राह्मणत्वाच्छत्रावपि भयेन प्रवेशो युक्तः। शत्रुणा च तस्य रक्षणं युक्तं इति च सूचितं। सूर्य्यादेरप्येतदीयं तेजोऽधिकतरमिति भावः। स्थेमानमिति। स्थिरशब्दाद्भावे पृथ्व्यादित्वादिमनिचि (पा॰ ५।१।१२२) प्रियस्थिरेति। स्थादेशः (पा॰ ६।४।१५७)। शरणं प्राप्तेन। द्वितीयाश्रितेति समासः (पा॰ २।१।२४)॥ ८१ ॥

अमुष्योर्वीभर्त्तुः प्रहमरचमूसिन्धुरभवै-
र्रवैमि प्रारब्धे वमथुभिरवश्यायसमये।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न तद्-
वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः॥ ८२॥

अमुष्येति। अमुष्योर्वीभर्त्तुरणसंरम्भात् प्रहमराः प्रहरणशीलाश्चमूसिन्धुराः सेनागजास्तेभ्यो भवैः समुत्पन्नैर्वमथुभिः करिकराग्रजातैर्मदजलविन्दुभिर्जलविन्दुभिर्वा अवश्यायसमये नीहारकाले हिमर्त्तौ प्रारब्धे निर्मिते सति प्रतिनृपभटा वीरा अपि रिपुनृपा अन्तस्तन्मध्ये स्वीयमनसि वा न कम्पन्तां अपि त्वसाद्भयेन युक्त एव कम्पस्तेषां। तथा तेषां रिपूणां वध्वो रमण्यस्तासां वक्त्राम्भोजं न म्लायतु अपि तु भाविनः प्राणेशवधस्य निश्चितत्वात् तासां मुखस्य म्लानिरुचितैव। तथा स प्रसिद्धो रणवासरस्तेषां वैरिणां तत्स्त्रीणां च कुत्सितो दिवसोऽशुभरूपो वासरो न भवत्वपि तु भवत्येव। वधनिश्चयाद्वैरिणां तत्स्त्रीणाञ्च शोकवशादित्यहमवैमि। हिमर्त्तौ शरीरकम्पः कमलम्लानिर्दुर्द्दिनञ्च भवति। प्रहरतरोऽयं गजपतिरिति भावः। सिन्धुरभरैरिति पाठे जगमत्तैः करैर्भिः वमथुभिः स्रलैति व्याख्येयं। वमथुः करिसीकरः। अवश्यायस्तु नीहार इत्यमरः। प्रहमरेति। सृघस्यद इति क्मरच् (पा० ३।२।१६०।) अवश्यायेति। श्याद्व्यधेति णः (पा० ३।१।१४१)। तेषां। पुमान् स्त्रियेत्येकशेषः (पा० १।२।६७।)॥ ८२॥

आत्मन्यस्य समुच्चितीकृतगुणस्याहेतरामौचिती
यद्गात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषां ।
भूयोऽहंक्रियते स्म येन च हृदा स्कन्धो न यश्चानमत्
तन्मर्म्माणि दलं दलं समिदलंकर्म्मीणवाणव्रजः ॥ ८३ ॥
दूरं गौरगुणैरहंकृतिमृतां जैत्राङ्ककारे चर-
त्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि ।

आत्मनीति। आत्मनि स्वीये स्वरूपे समुच्चितीकृतगुणस्य मेलितसौन्दर्य्यादिसर्व्वगुणस्यास्य राज्ञः अहेतराम अतिशयेनौचितीयं। यत एष भूजानिर्भूपतिर्द्विषां गात्रान्तराणां हृत्स्कन्धेतराणां वर्जनात् अवयवान्तरं परित्यज्येत्यर्थः। येन च हृदा भूयः पुनः पुनरतितरां अहंक्रियते स्म अहङ्कारिणा जातमित्यर्थः। यश्च स्कन्धः नानमत् नम्रो न भूतः तस्यैव स्कन्धस्य मर्म्माणि अतिमृदूनि जीवस्थानानि दलं दलं खण्डं खण्डं अजनयत् चकार नान्येषां। किंभूतः। समिति सङ्ग्रामे अलङ्कर्म्मणो अलङ्कर्म्मीणोऽरिमारणसमर्थः वाणव्रजो यस्य। अपराधी हि राज्ञा दण्ड्यः। तत्स्कन्धस्यैवापराधो नान्येषां तस्यैव दण्डं कृतवान्नान्येषामित्यतितरामस्यौचितीत्यर्थः। अयञ्च सगुणः सदर्पाननम्रांश्च मारयति शरणागतांस्तु रक्षतीति भावः। कर्म्मक्षमोऽलङ्कर्म्मीण इत्यमरः। अलङ्कर्म्मणे, पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्येति समासे (पा० २।२।१८ सू०७वा०) अलङ्कर्म्मशब्दात्स्वार्थे, अयस्यायितंगलङ्कर्म्मेति खः (पा० ५।४।७।)॥ ८३ ॥

दूरमिति। गौरगुणैः धवलवर्णैः कृत्वा दूरं भृशं अहंकृति-

धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते
पीयूषस्रवकैतवाद्दृतदरः शीतद्युतिः खिद्यति ॥ ८४ ॥
एतद्गन्धगजस्तृपाम्भसि मृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्द्धिभिः।

मतां अहङ्कारवतां वस्तूनां जैत्रश्च तदहङ्कारि च तस्मिन् जयाहङ्कारिणि एतद्वीर्यशसि एतस्य बाहुयशसि सकलेषु जगत्सु चरति प्रसरति सति अथ च स्वप्रतिमल्लगवेषणाय भुवनं परिभ्रमति सति बिभ्यत् भीतं कुमुदं निशि निद्रां स्वप्नमथ च सङ्कोचं न प्रयाति। तथा मल्लिकासुमनसां माल्यं माला अस्माद्भिया तव धम्मिल्ले केशपाशे ग्रन्थनविशेषे लीयते आत्मानं गोपायति। अथ वा अदृश्यं तिष्ठति। तथा शीतद्युतिश्चन्द्रो दृतदरः प्राप्तभयः सन् पीयूषस्रवकैतवादमृतस्रवणव्याजात् खिद्यति खेदं मुञ्चति। अथ च हिमकणान् मुञ्चति। एकयोद्धा अहङ्कार इति वा। कुमुदादिभ्योऽप्यधिकं धवलमेतदीयं यश इति भावः। वहिर्न धारयेन्माल्यमिति केशान्तर्गतमाल्यधारणाद्भैम्याः सदाचारत्वं सूचितं ॥ ८४ ॥

एतदिति। एतस्य गन्धगजः यः सप्तसु स्थानेषु स्रवति स गन्धगजः। स्वदानसम्भूतादिगन्धेन जितान्यकरी। विरोधिकरिगन्धमसहमान इति वा गन्धगजः। कराम्भोवमिव्याजात् शुण्डादण्डाग्रेण मुखधृतगण्डूषजलवमनमिषात् अम्बुधेः समुद्रस्याभ्रमुनाम्न्याः करिण्या बलभद्यैरावणस्य विरहं पूर्ववियोगजनितं

दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः करानोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥ ८५ ॥
अथैतदुर्व्वीपतिवर्णनाद्भुतं
न्यमीलदास्वादयितुं हृदीव सा।

शोकं निर्वापयति शमयति। किंभूतः। भृशं नितरां तृषा पिपासया सफेनत्वात्क्षीराब्धेः पुरः प्रसर्पणेन कण्ठान्तं ग्रीवां मर्य्यादीकृत्य मज्जन्ती जले क्रीडन्ती जलप्रवेशाद्दृश्यमाना तनुर्देहो यस्य एवम्भूतः। तथा स्वकीया दिक् प्राची तस्याः करी ऐरावणोऽन्ये वा तत्रत्याः करिणस्तेषां जयक्रीडा तयोपार्जितैर्यशोभिः सह स्पर्द्धिभिस्तद्दुज्ज्वलैः फेनैः जलावगाहनोद्धूतैर्निर्मग्नदेहोर्द्धदेशे पाण्डुरितः धवलीकृतः। तथा दन्तद्वन्द्वस्य दन्तद्वयस्य जलेऽनुबिम्बनं प्रतिबिम्बस्तेन कृत्वा चत्वारो दन्ता यस्य सः। जलमध्ये विद्यमानत्वाद्धवलत्वाच्चतुर्दन्तत्वाच्चैरावण एवायमिति भ्रान्त्या समुद्रः सुखी भवतीत्यर्थः। आसमुद्रं दिग्विजयीत्यर्थः ॥ ८५ ॥

अथेति। अथ सा भैमी न्यमीलत् अक्षिपक्ष्मसङ्कोचं चकार। किंभूता। अतिप्रीत्या मधुस्रजा वरणमधूकमालया नैषधस्य नाम जपति तच्छीलाऽत एव स्फुटीभवन् प्रत्यक्षायमाणः ध्यानेन चिन्तनातिशयेन पुरः स्फुरन् अपह्नुततयाऽवभासमानो नलो यस्याः सा। तत्रोत्प्रेक्षते। एतस्योर्व्वीपतेर्वर्णनया समुत्पन्नमद्भुतमाश्चर्यं हृदि विद्यमानं आस्वादयितुमिव। आश्चर्यस्य चेतसि वर्त्तमानत्वात्तदनुभवार्थं नेत्रे अप्यन्तः प्रविष्टे इवेत्यर्थः।

मधुस्रजा नैषधनामजापिनी
स्फुटीभवद्ध्यानपुरःस्फुरन्नला ॥ ८६ ॥
प्रशंसितुं संसदुपान्तरञ्जिनं
श्रिया जयन्तं जगतीश्वरं जिनं।
गिरः प्रतस्तार पुरावदेव ता
दिनान्तसन्ध्यासमयस्य देवता ॥ ८७ ॥
तथाधिकुर्य्या रुचिरे चिरेप्सिता
यथोत्सुकः सम्प्रति सम्प्रतीच्छति।

नले एवानुरक्ता सती नेत्रनिमीलनेनैव तं नृपं निरीचीच-कारेति भावः। अन्योऽपि जपमालयाभीष्टदेवतामन्त्रजपं कुर्व्वन् तां साचात्कर्त्तुं नेत्रे निमील्य ध्यानेन तां साचात्क-रोति ॥ ८६ ॥

प्रशंसितुमिति। दिनान्तसन्ध्यासमयस्य देवता सरस्वती पुरावदेव पूर्व्ववदेव ता अतिगम्भीरमधुरा गिरः प्रतस्तार उवाच। किं कर्त्तुं। संसदः सभाया उपान्तौ उभयपार्श्वौ रञ्ज-यत्येवं शीलं श्रिया शरीरशोभया छलाऽतिसुन्दरं जिनं बुद्धदेवं जयन्तं जगत्याः पृथिव्या ईश्वरं राजानं प्रशंसितुं वर्णयितुं। श्रिया संसदुपान्तरञ्जिनं जयन्तं जगति शौर्य्यादिना इन्द्रपुत्र-तुल्यं कीकटदेशप्रभुत्वाज्जिनं बौद्धं राजानमिति वा जयन्त-नामानं वा। जगदीश्वरमिति पाठे जिनविशेषणं ॥ ८७ ॥

तथेति। हे रुचिरे सुन्दरि त्वं तथा तेन प्रकारेणाधि-

अपाङ्गरङ्गस्थललास्यलम्पटाः
कटाक्षधारास्तव कीकटाधिपः ॥ ८८ ॥
इदंयशांसि द्विपतः सुधारुचः
किमङ्कमेतद्द्विपतः किमाननं ।

कुर्याः अधिकारं कुर्याः । तथा कथं । यथा येन प्रकारेण कीकटाधिपः मगधदेशस्वामी तत्कटाक्षेषु उत्सुकः सन् चिरेप्सिताः तव कटाक्षधारास्तिर्य्यगवलोकनपरम्पराः सम्प्रतीदानीं सम्प्रतीच्छति अङ्गीकरोति । किंभूता धाराः । अपाङ्गो नेत्रप्रान्तास्तल्लक्षणं रङ्गस्थलं नाट्यशाला तत्र लास्ये सविलाससमन्दगतौ लम्पटाः । चिरेप्सिता त्वमिति वा । चिरेत्यकारान्तमप्यव्ययं तेन समासः । एवमेवंशातीयेऽन्यत्रापि ज्ञातव्यं ॥ ८८ ॥

इदमिति । अखिलेषु लोकेषु धाविभिः प्रसरणशीलैः लोकत्रयमुज्ज्वलङ्कुर्व्वाणैरस्य यशोभिः विशेषेण भीषिता लोकत्रयान्निर्व्वासिता तामसी कृष्णपक्षरात्रिरेव मषी इदंयशांसि अस्य कीर्त्तीर्द्विपतः असहमानस्य सुधारुचश्चन्द्रस्याङ्कं कलङ्कमथच सन्निधिं धावति शीघ्रं गच्छति प्रविशति किं । किंवा एतद्द्विपत एतच्छत्रोराननं प्राप्नोतीति संशयः । एतद्यशोभिश्चन्द्रादृशत्रुसुतातिरिक्तस्य सकलस्यापि जगतः श्वेतीकरणात्तत्र निवस्तुमशक्ता सती मलिनं चन्द्रकलङ्कमेतच्छत्रुमुखञ्च प्रायेण गता । यो हि येन पराभूयते स तद्वैरिणमाश्रयतीत्यर्थः । अयमतिसर्वान् यशस्वीति भावः । अन्योऽपि भीषितः स्वगोत्रं याति ।

यशोभिरस्याखिललोकधाविभि-
र्विभीषिता धावति तामसी मषी ॥ ८९ ॥
इदं नृपप्रार्थिभिरुज्झितोऽर्थिभि-
र्मणिप्ररोहेण विवृध्य रोहणः ।
कियद्दिनैरम्बरमावरिष्यते
मुधा मुनिर्विन्ध्यमरुद्ध भूधरं ॥ ९० ॥

श्यामस्य च श्यामं वस्तु सगोत्रमिति । तामसी तमःसम्बन्धिनी रात्रिः मषी श्यामवस्तुमात्रगता श्यामिका च यथाक्रमं चन्द्राङ्कं शत्रुमुखं धावति किमिति वा। निरन्तरोद्योतकरणादेतत्कीर्त्या निष्काशितेव तामसी स्त्रीभावभीरुर्भर्त्तुश्चन्द्रस्योत्सङ्गं गता । अत एव रात्रिकालिमा चन्द्राङ्के दृश्यते । सर्व्वस्यापि श्वेतीकरणात् श्यामिकापि निर्व्वासिताऽन्यत्र स्थातुमशक्तत्येव रिपुमुखं गता। अत एव विवर्णीभूतेषु वैरिमुखेषु कालिमा दृश्यते । एतद्द्विषतः। द्विषःशत्रुर्व्वेति (पा॰ २ । ३ । ६८ सू॰ ६ वा॰) षष्ठीसमासः ॥ ८८ ॥

इदमिति। अतिवदान्यत्वादस्य नृपस्य प्रार्थनशीलैरर्थिभिर्याचकैरनेनैव समस्तकामानां पूरितत्वादुज्झितः परित्यक्तः अत एव स्वव्ययाभावान्मणिप्ररोहेण विवृध्य अङ्कुरोत्पत्त्या विशेषेण वृद्धिं प्राप्य रोहणो मेरुः कियद्भिः कतिपयैरल्पैरेव दिनैः अम्बरमावरिष्यते आच्छादयिष्यति यतस्तस्मान्मुनिरगस्तिर्विन्ध्यनामानं भूधरं मुधैवारुद्ध मदागमनपर्य्यन्तं त्वया न वर्द्धितव्यमिति नियमेन स्थैर्य वाग्यद्धमकरोत् । तद्वृद्ध्यभावेऽपि·

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभदशनस्पर्द्धीनि कैरक्षरैः ।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ॥ ८१ ॥

रोहणेनैव सूर्यगतेः प्रतिबन्धकस्य करिष्यमाणत्वादगस्त्यप्रयासस्य वैयर्थ्यमेव जातमित्यर्थः । अगस्त्येन विन्ध्यरोधस्तु पुराणप्रसिद्धः । अतिवदान्योऽयमिति भावः । आवरिष्यते । विकल्पत्वादिटो दीर्घत्वेति (पा॰ ७।२।३८)। अरुद्धेति । लङात्मनेपदं ॥ ८० ॥

भूशक्रस्येति । वयं विक्रमस्य भरेण बाहुल्येन क्रमात्पारिपाट्यात् उपार्जितानि एतस्य भूशक्रस्य पृथ्वीन्द्रस्य यशांसि कैरक्षरैर्वर्णैः स्तुमहे वर्णयामः । यशसां भूयस्त्वादर्णानां पञ्चाशत्त्वात् स्तोतुं न शक्नुमः । सामान्याकारेण कथञ्चिद्वर्ण्यन्त इत्यर्थः । किम्भूतानि । महेभाः पश्चिद्वायना गजा ऐरावतो वा तेषां दशनैः सह स्पर्द्धन्त एवंशीलानि तद्वद्गौराणि । स्वर्णगिरिर्मेरुरन्येषां राज्ञां लिम्पद्भिर्यशोलक्षणैः पारदैः कृतकमसत्यं रजतं कृतोऽपि प्रलेपनिर्मितपाण्डुद्युतितां नीतोऽपि सन् अस्य प्रतापरूपैर्दहनैरग्निभिः पुनः स्वर्णं निर्मितः कृतः । प्रतापस्य पीतत्वात्सुवर्णरूपतां प्रापितः । पारदलेपनेन सुवर्णं श्वेतीभवति वह्नितापेन चोड्डीने पारदे पुनः काञ्चनमेव भवतीत्यर्थः । एतत्प्रतापाग्रे परेषां यशांसि न प्रसरन्ति । यशस्वी प्रतापवांश्चान्यः कोऽपि नास्तीत्यर्थः ॥ ८१ ॥

यद्भर्त्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं
दिग्दाहैरिव भस्मभिर्म्मघवता स्पृष्टैः कृतोद्धूलना।
शम्भोर्म्मा वत सान्ध्यवेलनटनं भाजि व्रतं द्रागिति
क्षोणी नृत्यति मूर्त्तिरष्टवपुषोऽसृग्वृष्टिसन्ध्याधिया ॥ ९२॥

यदिति। अयं भुवः शक्रो भूमीन्द्रः यस्या भूमेर्भर्त्तुःपत्युः अभिषेणनं सेनयाऽभिगमनं कुरुते सा क्षोणी भूमिः इति मनसि कृत्वा लोहितलेनौत्पातिकी असृग्वृष्टिः रुधिरवृष्टिरूपा या सायंसन्ध्या तस्या धिया भ्रमबुद्धा द्राक् शीघ्रं नृत्यति गात्रविक्षेपं करोति कम्पत इत्यर्थः। वत खेदे। ध्रुवमुत्प्रेक्षे। किम्भूता सा। दाहादिन्धनज्वलनसम्भावात् दिग्दाहैरिव दिग्दाहाद्विशामौत्पातिकनिर्हेतुकलोहितदीप्तेः प्रभवैरिव मघवतेन्द्रेण स्पृष्टैर्माचितैः भस्मभिः कृत्वा कृतं धृतमुद्धूलनं अङ्गलेपो यया सा। इति किं। शम्भोः दिनरात्रिसन्धिरूपायां वेलायां काले भवं सान्ध्यवेलं सायंसन्ध्याकालसमुचितं नटनं नृत्यरूपं व्रतं नियमः माभाजि भग्नो माभूदिति स्वयं नृत्यतीत्यर्थः। यतः अष्टमूर्त्तेर्जलाद्यष्टमूर्त्तेः शम्भोरेका मूर्त्तिः पृथ्वी। शिवो हि सन्ध्यासमये नृत्यं करोति तन्मूर्त्तित्वात्तयापि नृत्यमारब्धमित्यर्थः। यमुद्दिश्य अयं प्रयाणं करोति तस्मिन्देशे दिग्दाहभस्मवृष्टिभूकम्परक्तवृष्टिमिषणास्तत्पराजयसूचका उत्पाता भवन्ति। अयमेव विजयत इत्यर्थः। क्ष्मार्केन्द्वात्मखभ्वग्निवायवः शिवमूर्त्तयः। यत्सेनयाभिगमनं राज्ञस्तदभिषेणमित्य-

प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समग्रत्विषां
कोशः शेषमगादगाधजगतीशिल्पेऽप्यनल्पायितः ।
निःशेषद्युतिमण्डलव्ययवशाद्दीपक्षभैरेष वा
शेषः केशमयः किमन्धतमसस्तोमैस्ततो निर्म्मितः॥ ८३॥

मरः। यज्ञर्त्तुः। भर्तृशब्दस्य पत्यर्थत्वाद्याजकादित्वात् समासः। (पा० २।२।९) सेनयाऽभिगमनमभिषेणनं। सत्यापपाशेति (पा० ३।१।२५) णिचि लुट्। उपसर्गात् सुनोतीति (पा० ८।३।६५) षत्वं। दिग्द्वादेरित्यत्र तस्येदमित्यण् (पा० ४।३।१२०)। सन्निवेलायां भवं सान्निवेलं। सन्निवेलेत्यण् (पा० ४।३।१६)। इन्द्रः शिवस्य भस्माहरेणेऽधिकारी अत एव दिशां दाहं कृत्वा भस्मार्पितवान् इति केचित् ॥ ८२ ॥

प्रागिति। प्राक् सर्गादौ अगाधजगतीशिल्पेऽपि असमर्था-द्त्रैलोक्यनिर्म्माणविषयेऽपि यत्त्विषां समस्तः सकलः कोशो भाण्डारागारसञ्चयः नाल्पायितः अल्पवन्नाचरितः किन्तु ता-वानेवाचयः स्थितः। आमुखेन्दु मुखचन्द्रमभिव्याप्य एतस्य वपुः सृजतः स्रष्टुः ब्रह्मणः सम्बन्धी स त्विषां समस्तः कोशः शेषं समाप्तिं अगात् प्राप चयितः। यतश्चरणप्रभृतिमुखपर्य्यन्तावय-वनिर्म्माणार्थमेव पूर्णो न तु केशनिर्म्माणार्थं। ततस्मात् कान्ति-चयाद्धेतोः केशमयः केशप्रचुरः केशरूपोऽस्य एव शेषो भागः निःशेषं द्युतिमण्डलं समस्ततेजोराशिस्तस्य व्ययवशाच्छायवशात् •भाभावस्तम इति न्यायात् दीपसभैः सुप्रापैः सुलभैरन्धतमस-

तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः ।

लोमभिर्गाढान्धकारसदृक्षैः कृता किंवा निर्मितः इत्युत्प्रेक्षा। सुन्दरतरोऽयं केशास्वातिनीला घनाश्चेति भावः। ईषल्लभैः। अकृत्स्नार्थे खल्। उपसर्गादेव खल्घञोर्नान्यत्रेति नियमान्नुमभावः (पा० ७।१।६७)। अन्धतमसः। अवसमन्धेभ्यस्तमसः इत्यच् (पा० ५।४।७९) ॥ ९३ ॥

तदिति। एष राजा तासां प्राच्यादीनां सर्व्वासां दिशां जैत्रा जयकारिणो यात्रास्तासु उद्धुरा उत्साहवन्तोऽतिबलिनस्तुरङ्गास्तेषां खुराग्रैरुद्धतैर्रजोभिः कृत्वा अन्धकारं सृजति। कथम्भूतमिव। निर्वाणः शान्तः अरिप्रतापानलस्तस्मादनन्तरजातमिव अन्धकारं सूर्यप्रकाशस्याच्छादितत्वात् तमः सृजति। अनले शान्ते भाभावरूपोऽन्धकारो भवति। एतस्य दिग्जययात्रायां प्रारब्धायां सर्व्वेषामपि वैरिणां प्रतापः शान्तो भवतीति भावः। तुरङ्गबाऊल्यञ्च। तथा एतस्य कीर्त्तिप्रतानैर्यशोविस्तारैरेव च विधुभिर्वऊभियन्द्रैः युधे युद्धार्थं आह्वयमानः स्पर्द्धापूर्व्वमाकारित एव राज्ञः भियेव भयेनेव भूगोलस्य भूमण्डलस्य छायामयेन मायारूपेण व्याजेन गणितविद्भिः ज्योतिषिकैर्गणितशास्त्रप्रामाण्येन उन्नेयस्तर्क्यः कायः शरीरं यस्यैवंभूतो ऽभूत्। एतत्कीर्त्तिमयूखचन्द्रान् दृष्ट्वा एकस्य जेतुमशक्यत्वाद्राऊणा स्वङ्गोपायितुं भूगोलच्छायरूपं मायामयशरीरं धृतमि-

भूगोलच्छायमायामयगणितविदुन्नेयकायो भियाभू-
देतत्कीर्त्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः ॥९४॥
आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
सम्मातुं शक्तिमन्ति प्रथिमभरवशादत्र नैतद्यशांसि।
तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन॥९५॥

त्यर्थः। ज्योतिःशास्त्रे च भूगोलच्छायैव राहुत्वेनोक्ता। अन्यो ऽपि शत्रोर्भीतः स्वङ्गोपायितुं रूपान्तरं धारयति। एतादृशो यशस्वी कोऽपि नास्तीति भावः। निर्वाणेति। निर्वाणोऽवात इति तस्य णत्वं (पा॰ ८।२।५०)। छायमायेति। विभाषामेनेति षष्ठत्वं (पा॰ २।४।२५)॥९४॥

आस्त इति। या इयं त्रिलोकी लोकत्रयी दामोदरीयां उदरदरीं श्रीविष्णोर्जठरकन्दरामवलम्ब्याश्रित्यास्ते अत्रास्यां दामोदरोदरस्थितायां त्रिलोक्यां प्रथिमभरवशात् महत्त्वाऽन्यादतिमस्मातुं सुखेन स्थातुं न शक्नुवन्ति अममयानि सन्ति तान्यतिप्रसिद्धानि द्विपदशनैः सनाभीनि सदृशानि अतिगौराणि एतस्य यशांसि तामेतां विष्णूदरदरीस्थितां तत्स्थितां त्रिलोकीं पूरयित्वावशिष्टानि तामुदरदरीं तत्स्थां त्रिलोकीं च परिपूर्णावशिष्टानि वा पाण्डुपद्मच्छद्मापन्नानि नाभीसमुत्पन्नधवलकमलव्याजमापन्नानि तदाकाराणि सन्ति मधुध्वंसिनो विष्णोर्नाभीरन्ध्रेण पथा मार्गेण निरगुरिव निर्जग्मुरिव सङ्कट-

अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कालिमा
कम्पोन्मीलदरालवल्लवलनस्तेषां भिये भूभुजां ।
सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः
पर्व्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥ ८६ ॥

वासयातनाभिया वहिर्निर्गतानीव श्रीविष्णोर्नाभौ धवलं कमलं अन्ययोत्प्रेचितं पाण्डुपद्मं न किन्त्वेद्यशांसि । अथवा करिदन्तधवलतुल्यान्यतिभूयांसि चास्य यशांसीति भावः । दामोदरीयां । वृद्धाच्छः (पा० ४ । २ । ११४) । प्रथिमा । पृथ्वादिभ्यादिमनिच् । (पा० ५ । १ । १२२) । नाभीपथेन । ऋगादिना समासान्तः (पा० ५ । ४ । ७४) ॥ ८५ ॥

अस्येति । अस्यासिरेव भुजगस्तेषां भूभुजां राज्ञां भिये भवतीति शेषः । किंभूतः । स्वकोश एव चर्म्ममयं पिधानं तदेव सुषिरं वल्मीकविवरं तस्मादाकृष्टः वहिष्कृतः सद्यो धृतश्च तथा स्फुरन् प्रकाशमानः उत्तमलोहजातिविशेषत्वात् कालिमा श्यामत्वं यस्य । सर्पोऽपि सद्यो धृतत्वात् स्फुरत्कालिमा । तथा कम्पेन तत्र हस्तान्दोलनेन कृत्वा उन्मीलन्त्यः प्रकटीभूता अराला वक्रा लीला येषु तादृशानि वलनानि गतिविशेषा यस्य । सर्पोऽपि वक्रगतिर्भवति । तेषां केषां । यैः सङ्ग्रामेषु निजाङ्गुलीमय्याः स्वीयाङ्गुलीरूपाया महासिद्धौषध्या वीरुधः स्पर्शमात्रेण विषघ्नाः वल्ल्याः पर्व्व ग्रन्थियाङ्गुष्ठाग्रपर्व्वग्रन्थिदयस्य आस्ये मुखे विनिवेश्य जाङ्गुलिकता विषवैद्यता गारुडिकता नालम्बिता

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव विभर्त्ति यश्च किरति क्रूरध्वनिं निष्ठुरः।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम्॥ ८७॥

नाम प्रसिद्धेः। सर्पोऽपि येन स्वमुखे सिद्धौषधीपर्व्वं न निक्षिप्यते तमेव यथा मारयति तथा एतदीयः खड्गोऽपि ये शस्त्राणि न त्यजन्ति दैन्याच्च मुखे अङ्गुलीपर्व्व न धारयन्ति तानेव हन्ति नान्यान् विनीतांश्शरणागतांश्च। विषवैद्यो जाङ्गुलिक इत्यमरः॥ ८६॥

य इति। अरिभटश्रेणीषु क्रूरतरवैरिसङ्घेषु विषये युधि यः पृष्ठं दर्शयति पराङ्मुखः पलायते अथ च यं प्रत्याकृष्यते तस्य स्वभावात् पृष्ठं दर्शयति। यः अस्मिन् स्वस्वामिन्येव नृपे वक्रतामनृजुत्वं स्वाश्रय एव कृतघ्नत्वं विभर्त्ति। अथ चान्यस्यैतादृग्बलाभावात् अस्मिन्नेव वक्रतां विभर्त्ति मान्येन न स्वीकर्त्तुं शक्यत इत्यर्थः। तथा यो निष्ठुरो निर्दयो दाक्षिण्यरहितः सन् क्रूरध्वनिं अनेन महाप्रियभाषणं किरति। अथ च परिणतादरेराजस्य क्रूरं वैरिणां भयावहं शब्दं किरति क्षिपति। दोषं दूषणं अथ च बाहुं भजतः तथाविधस्य तस्य चापस्य तथाविधस्यान्यस्य वा कस्यचिद्गुणं शुतशौर्य्यादिकं गृह्णन् वर्णयन्। अथ च मौर्व्वीग्राहिणां धनुर्द्धराणां सीमा पर्य्यन्तावधिः स्फुटं विख्यातः प्रसिद्ध एक एष राजा। एवंविधो धनुर्द्धरः सम्य-

अस्यारिप्रकरः शरश्च नृपतेः सङ्ख्ये पतन्तावुभौ
सीत्कारञ्च न सम्मुखौ रचयतः कम्पञ्च न प्रापतुः।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्त्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतं ॥ ९८ ॥

नास्य कोऽपि नास्तीत्यर्थः। धनुःपृष्ठदर्शनेनैतस्य पलायनाभावः सूचितः॥ ९७ ॥

अस्येति। अस्य नृपतेरुभौ सङ्ख्ये सङ्ग्रामे क्रमेण सम्मुखौ एतत्सम्मुखं वैरिसम्मुखञ्च पतन्तौ सन्तौ सीत्कारं दुःखाभिव्यञ्जकं दन्तमध्ये निर्गतं पक्षवातजनितञ्च ध्वनिविशेषं यत्र रचयतः कुरुतः यच्च मरणभीतिजनितं दुर्निर्गतत्वजनितञ्च कम्पं न प्रापतुः। उभौ कौ। अरिप्रकरः वैरिसङ्घः शरश्च एतौ द्वौ। तथा मुक्तयोः प्राप्तमोक्षधनुश्च्युतयोरुभयोर्यत्पुनर्निवृत्तिः जन्म प्रत्यागमनञ्च न जागर्त्ति भवति तत्सर्वं युक्तमुचितमेव। द्वयोरपि तुल्यधर्मत्वात्। तर्हि विलक्षणं किमित्याशङ्कायामाह। तत्र तयोर्द्वयोर्मध्ये एको वैरिसङ्घः मित्रं सुहृदमथ च सूर्यं भिनत्ति। अपरश्च शरः अमित्रं सूर्यव्यतिरिक्तमथ च वैरिणं भिनत्ति द्विधा करोतीत्यद्भुतं आश्चर्यं।तुल्यकर्मणोरतुल्यकार्यारम्भकत्वस्य विरुद्धत्वादित्यर्थः। चावन्योन्यसमुच्चये। दुःखभयराहित्येन रणे सम्मुखः पतति शत्रुसङ्घः। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ इति वचनात् सूर्यमण्डलं भित्त्वा मुक्तिं प्रापतुः। अदृढमुष्टितया मुक्तवाणः कम्पसीत्कारौ रचयति। तदकरणाच्च दृढमुष्टिताप्य सूचिता। दृढमुष्टित्वेन मुक्तो वैरिमध्ये न पुन-

धूलीभिर्दिवमन्धयन् वधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयन् जवजयैः श्रोतॄन् गुणैर्मूकयन्।
धर्माराधनसन्नियुक्तजगता राज्ञाऽमुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति यदा स्प्रष्टुं तुरङ्गोऽपि गां॥८९॥

रायाति वैरिणं हन्तीत्यर्थः। क्रूरतरोऽयं शत्रुमात्रं हतवानिति भावः। बाणपक्षे सम्यक् मुखं पुङ्खमयं वा यस्येति॥८८॥

धूलीभिरिति। धर्माराधने सम्यङ्नियुक्तं प्रेरितं जगद् येनैवंभूतेनामुना राज्ञा अधिष्ठित आरूढस्तुरङ्गोऽपि धूलीभिः खुररजोभिः दिवं स्वर्गलोकं अन्धयन् अन्धं कुर्व्वन् चक्षुः प्रविष्टाद्रजस एव निमीलितनयनं कुर्व्वन्नित्यर्थः। तथा खुराणां रवैः समुच्छलनशब्दैः कृत्वा आशा दिशः प्रान्तनिवासिनो जनान् वधिरयन् वधिरतया शब्दान्तरग्रहणाशक्तान् कुर्व्वन्। तथा संयति सङ्ग्रामे जवस्य वातवेगस्य जयैः वायोःसकाशादतिवेगतया वातं खञ्जयन् पङ्गुं कुर्व्वन्। तथा गुणैर्हेतुभिः श्रोतॄन् अश्वजयरूपलक्षणादिवर्णनकारिणो जनान् मूकयन् गुणाधिकत्वेन सामस्त्येन श्रोतुमसमर्थान्मूकानिव कुर्व्वन्। एवंभूतः सन्ननन्तरं सान्द्राणां निरन्तराणामुत्फालानां चतुर्भिश्चरणैरुत्पतनानां मिषात् एकेनापि चरणेन गां भुवमथच धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्त्तुं विगायति विशेषेण जुगुप्सते। धार्म्मिको राजा निर्पिष्टमाचरतः स्वाधीनान् पापिनो दण्डयति। अहं तु तदधिष्ठितः यदा गोस्पर्शनरूपं पापं कुर्व्वन् दण्ड्यः स्यामिति बुद्ध्या यदा

एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि।
अश्वैरस्वैरवेगैः कृतखुरखुरलीमंक्षुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धङ्करणरणधुरारेणुधारान्धकारात्॥ १००॥

न स्पृशति चेत्यर्थः। धार्मिको जवनास्वश्वायमेवेत्यर्थः। अभ्य-यन्नित्यादौ तत्करोतीति णिजन्ताच्छृट॥ ९९॥

एतेनेति। समरसमालोकिनो ये लोकास्तेषामास्पदे स्थान-भूतायामपि भुवि। अथवा समरसमालोकिलोकानां देवाना-मास्पदे गगने वियति। एतेन राज्ञा उत्कृत्तकण्ठाः छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटाः रिपुवीरास्त एव नटा नर्त्तकास्तैरार-ब्धानां नाट्याद्भुतानां नृत्ताश्चर्याणां द्रष्टा नाभूदेव कष्टमेतत् दुःखमेतत्। तत्र हेतुः। अस्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृता खुरली अभ्यासभूमिः पुरः पुरः न्यासो वा तया मंक्षु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवत् क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठन् उत्पतन् अनन्धमन्धं करोति अन्धङ्करण एवंभूतः रणधुरारेणुः रणप्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवा-हास्तज्जनितादन्धकारात्। रणविलोकनार्थमागतैरपि मानवै-र्देवैरपि अश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धनृत्यं नालोकी-त्यर्थः। मन्दस्वच्छन्दयोः स्वैरं इति मेदिनी। एतत्प्रोत्कृत्ता-ङ्गेति पाठः साधीयान्। द्रष्टा। तृच्। रणधुरा। ऋगादिना ऽप्। (पा॰ ५।४।७४)॥ १००॥

उन्मीलन्नीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुदितमरुत् स्फालवाचालवीचिः।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्ययपथिकदृशां दत्तरागस्तडागः॥१०१॥
वृद्धो वार्द्धिरसौ तरङ्गवलिभं बिभ्रद्वपुः पाण्डुरं
हंसालीपलितेन यष्टिकलितस्तावद्वयोवंद्धिमा।

उन्मीलदिति। एतेन राज्ञा एतादृशस्तडागः अखानि। किंभूतः। उन्मीलन्ती विकसन्ती लीला विलासो येषां तानि नीलोत्पलानि तेषां दलानि पत्राणि तेषां दलनं विकासनं तदुद्भवेनामोदेन परिमलेन मेदस्वी पुष्टः बहुलपरिमलः पूरः प्रवाहस्तस्य क्रोडे उत्सङ्गे क्रीडन्ती द्विजाली हंसादिपङ्क्तिस्तस्या गरुद्भ्यः पक्षेभ्य उदित उत्पन्नो मरुद्वायुः तस्य स्फालः सवेगगमनं सङ्घट्टो वा तेन वाचालाः शब्दायमानाः वीचयो यस्य। तथा शाखानिवहैः नवहरित्पर्णैर्नूतनश्यामपर्णैश्च पूर्णा द्रुमाल्यः वृक्षपङ्क्तयः ताभिर्व्यालीढः व्याप्तः उपान्तस्तीरप्रदेशस्तेन शान्ता व्यया ग्रीष्मातपपीडा यासां तासां पथिकदृशां ग्रीष्मातपपीडा येषां पथिकानां वा दृशः तासां दत्तः रागः सन्तोषो येन। अस्य तडागस्यातिरमणीयत्वं सुखजनकत्वं अस्य च धार्मिकत्वं सूचितं॥ १०१॥

वृद्ध इति। असौ अनेन निर्मितस्तडागः वृद्धो महान् वार्द्धिः समुद्रः। समुद्रापेक्षयापि महानित्यर्थः। अथवा असौ वारि

विभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्सङ्गतं
स्थाने स्नानविधायिधार्म्मिकशिरोनत्यापि नित्यादृतः ॥ १०२ ॥

धीयतेऽस्मिन् वार्द्धिर्वारिस्थानं तडाग एव वृद्धोऽतिप्रवयाः। किंभूतः। तरङ्गैः कृत्वा वलिभं वलियुक्तं। तरङ्गा एव वार्द्धकसङ्कुचितस्थूलशरीरावयवविशेषस्थाने जाता यस्येत्यर्थः। तादृशतरङ्गरूपाभिर्वलिभिर्भाति इति वा। हंसालीपलितेन हंसपङ्क्तिरूपेण जराजनितश्वैत्येन पाण्डुरं धवलं प्रवाहरूपं वपुः विभ्रत्। तथा यष्ट्या मध्यनिचितकीर्त्तिस्तम्भरूपया कलितो ज्ञातपरिमाणोऽलङ्कृत इत्यर्थः। अथ च स्खलच्छरीरधारणार्थं दण्डेन युक्तो धृतशरीर इत्यर्थः। तथा तावतामतिबहूनां वयसां पक्षिणां वंहिमा बाहुल्यं यत्र। अथ च तावतः शतसमीपवर्त्तिनो वयसो वार्द्धकस्य वंहिमा यस्य। तथा विकचयाऽतिप्रकाशमानया चन्द्रिकया योग्यं समुचितं स्फुरत् प्रकाशमानं सङ्गतं मैत्रं यस्य। ज्योत्स्नावन्निर्मलं। अथ च समुद्रत्वादेतज्जलं ज्योत्स्नासमुचितं कं जलं विभ्रत्। अथ च विगतकेशया चन्द्रिकया खालित्येन चान्दीति कान्यकुब्जभाषायां तया उचितं स्फुरन्मैत्रं कं शिरो विभ्रत्। यद्वा केशरहितेन खालित्येनोपलक्षितं। तथा योग्यं वार्द्धकोचितं स्फुरत् प्रकटं सङ्गतं मस्तगतं कम्पनं यस्य शिरसमात्। तथा स्नानविधायिभिर्धार्म्मिकैः शिरोनत्यापि यत् नित्यादृतः तत् स्थाने उचितं। धार्म्मिकैश्च स्नानादौ तीर्थं नमस्क्रियते वार्द्धैरपि। समुद्रस्य पर्व्वण्येव स्पर्शयोग्यत्वादेतस्य मर्य्यादे-

तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले
नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानां ।
तत्पाथोदेवतानां विशतु तव तनुच्छायमेवाधिकारे
तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः ॥१०३॥

त्याधिक्यं समुद्रात्। वलिभमिति मत्वर्थे तुन्दिवलीति भः। (पा० ५।२।१३८)। द्वितीयाव्याख्याने पचाद्यच् (पा० ३।१।१३४)। बंहिमेति। बहुलस्य भावः। पृथ्वादित्वादिमनिच् (पा० ५।१।१२२)। प्रियस्थिरेति बंहिरादेशः (पा० ६।४।१५७)। धार्मिकः। धर्मं चरतीति ठक् (पा० ४।४।४१)॥१०२॥

तस्मिन्निति। हे बाले तस्मिन् तडागे त्वं एतेन यूना सह विहर क्रीड। तथा तत्र तडागे पयःकेलिवेलासु जलक्रीडावसरेषु योग्यर्त्तौ वा तत्रैव नालस्य दृश्यत्वात्। प्रतियोग्याभिप्रायं बहुवचनं। नीलोत्पलानां तवाक्षिप्रतिफलनात् नेत्रप्रतिबिम्बात् सकशाङ्किदा भेदः नालेन कमलदण्डेनास्तु। अतिसादृश्यादिदं वा नीलोत्पलमिदं वेति संदेहे सनालं यत् तन्नीलोत्पलमनालस्तु त्वन्नेत्रमिति नालमेव निर्णायकं भवत्वित्यर्थः। तथा तस्य पाथो जलं तस्य देवतानां अधिकारे आधिपत्ये वा तव तनुच्छायं त्वदीयशरीरप्रतिबिम्बमेव विशतु। तज्जलदेवतास्थाने त्वच्छरीरप्रतिबिम्बमेव भवत्वित्यर्थः। तथा तस्य फुल्लानां विकसितानां अम्भोजानां राज्ये खण्डे अथ चाधिपत्ये भवदीयाननस्य त्वदीयमुखकमलस्य च जलक्रीडावशात् अभि-

एतत्कीर्त्तिविवर्त्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि ।
जज्ञे कीर्त्तिमयादहो भयभरैरस्मादकीर्त्तेः पुनः
सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिं ॥१०४॥

षेकोऽय च पट्टाभिषेकः भवतु । नीलोत्पलजलदेवताकुम्भकम-
लापेचया अमीनेत्रशरीराननमधिकमिति सूचितं । तनुकायं ।
विभाषासेनेति षण्ढत्वं (पा० २ । ४ । २५) ॥ १०३ ॥

एतदिति । जगतां स्थावरजङ्गमात्मकानां भुवनानां सम्ब-
न्धिभिः समग्रैरपि श्यामैः कृष्णैः कज्जलादिपदार्थैः गुणैर्वा
कथासु वार्त्तास्वेव विश्रान्तिः कलिता आश्रयोऽङ्गीकृतः । किम्भूतैः
श्यामैः । एतस्य कीर्त्तेर्यशसः विवर्त्तेन परिणामेन विशेषेण
वर्त्तनं स्थितिर्वा तेन धौताद्धवलीकृतान्निखिलात् सकलात्
कन्दरादिघटितात् त्रैलोक्यात् सकाशान्निर्वासितैर्निष्काषितैः ।
कीर्त्त्या लोकत्रयस्य श्वेतीकरणात् तत्र श्यामगुणानां साम्प्रतमदर्श-
नात् पूर्वं श्यामानि वस्तून्यभूवन्निति वार्त्तामात्रशेषाणि श्यामा-
नि जातानि सर्व्वथा न सन्तीत्यर्थः । तथा कीर्त्तिमयात् कीर्त्ति-
प्रचुरादस्माद्राज्ञः सकाशात् अकीर्त्तेः पुनर्भयभरैर्भीतिबाहुल्यै-
र्जज्ञे जातं अहो आश्चर्य्यं । कीर्त्तेरकीर्त्तेश्च विरोधात् कीर्त्ति-
रूपादस्मादकीर्त्तेः भयं युक्तं इत्यर्थः । एतत् कुतः । यद्यस्मान्मलिन-
च्छायाऽतिरूप्या साऽपकीर्त्तिः अस्य कथापथेऽपि स्थितिमाश्रयं न
बबन्ध नाकरोत् । एतत्कथाप्रारम्भे अकीर्त्तिलेशस्याप्यभावात्

अथावदद्भीमसुतेङ्गितात् सखी
जनैरकीर्त्तिर्यदि वास्य नेष्यते।
मयापि सा तत् खलु नेष्यते परं
सभाश्रवःपूरतमालवल्लितां ॥ १०५ ॥

कीर्त्तिरेव वर्ण्यत इत्यर्थः। यस्य यस्माद्बिभेति स तदीयकथा-प्रारम्भ एव मलिनो भूत्वाऽन्यत्रैव गच्छति। अविद्यमानमपि शशविषाणादि वचनगोचरो भवति अकीर्त्तिस्तु वचनगोचरोऽपि नाभूदित्याश्चर्य्यं। अविद्यमानाया अप्यकीर्त्तेर्भयोत्पादना-दतिचित्रं। जरतामिति पाठे वृद्धानां कथास्विति व्याख्येयं। जज्ञे। भावे लकारः॥ १०४ ॥

अथेति। अथ सखी भीमसुतायाः इङ्गितात् अननुराग-सूचकात् भ्रूवेष्टनादिचेष्टितात् सरस्वतीमवदत्। किं। हे वाणि जनैरस्य अकीर्त्तिर्यदि नेष्यते वा नाभिलष्यत एव तत् तर्हि मयापि साऽस्याकीर्त्तिः खलु निश्चितं नेष्यत इति यद्यपि तुल्यं तथापि परं कोऽपि परः कश्चिद्विशेषोऽस्ति। सभायाः सभालोकस्य अवःपूरतमालवल्लितां कर्णाभरणतमालवल्लित्वं नेष्यते प्रापयिष्यते। जनानामसम्मतां शशविषाणादिवदसतो-मप्यस्याकीर्त्तिमेव सर्व्वां सभां श्रावयिष्यामि इत्यर्थः। वाण्या-स्तद्वर्णननिवारणं चकारेति भावः। अकीर्त्तेर्नीलत्वात्तमालव-ल्लित्वं। इष्यते। इषेः कर्म्मणि लट्। नेष्यते। णीञः प्रधानकर्म्मणि लृट्॥ १०५ ॥

अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृताः सङ्ख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्त्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्म्मरमणीदुग्धोदधेरोधसि ॥ १०६ ॥

अकीर्त्तिमेव वर्णयति । अस्येति । हे वाणि मूकानां प्रकरेण समूहेन अस्य क्षोणिपतेरकीर्त्तयः किल प्रसिद्धं निश्चितं वा कूर्म्मरमणी कच्छपिका तस्या दुग्धादुत्पन्नस्योदधेः रोधसि तीरे गीयन्ते । किंभूताः । परार्द्धात् गणनावधेः सकाशात् परया ऽधिकया सङ्ख्यया लक्षीकृताः गणिताः परार्द्धादप्यधिकाः । तथा प्रज्ञाचक्षुर्भिर्जात्यन्धैः अवेक्ष्यमाणं दृश्यमानं तिमिरं तत्-प्रख्यास्तत्तुल्या अतिश्यामाः । किंभूतेन प्रकरेण । अष्टमं स्वरं निषादादिसप्तस्वरातिरिक्तं कलयताऽङ्गीकुर्व्वता । तथा वन्ध्यो-दरात् जातेन । एवमस्याकीर्त्तयः स्थिताः सभायां आविताः । परार्द्धाधिका सङ्ख्याऽन्धस्य दर्शनशक्तिः तिमिरस्य च चाक्षुष-रूपत्वं स्वरस्याष्टमत्वं वन्ध्योदराज्जन्म कच्छपिकाया दुग्धं एतानि यथा सर्व्वथा न सन्ति तथैतद्विशेषणयुक्ता अस्याकीर्त्तयोऽपि न सन्तीति पर्य्यवसानवृत्त्या वर्णनैव कृता । उपहासार्थलसङ्गतोक्तिः । आ मानस्येन कीर्त्तयः पूर्व्वोक्तविशेषणविशिष्टा अस्य समस्ताः कीर्त्तयो गीयन्ते किम पर्य्यवसानवृत्त्याऽस्य कीर्त्तयो न सन्त्येवेति निन्दैवास्य कृतेति वा । कच्छपी च दर्शनेनैवापत्यानि पालयति न दुग्धेनेति प्रसिद्धिः । प्रज्ञाचक्षुषो योगिनो ज्योतिर्विलोकन-

तद्वरैः सस्मितविस्मिताननां
निपीय तामीचणभङ्गिभिः सभां ।
इहास्य हास्यं किमभून्न वेति तं
विदर्भजा भूपमपि न्यभालयत् ॥ १०७ ॥
नलान्यवीक्षां विदधे दमस्वसुः
कनीनिकागः खलु नीलिमालयः ।

निष्ठास्तिमिरं न पश्यन्ति वा। तिमिरप्रख्याः तिमिरवत्प्रख्यायन्ते। मूलविभुजादित्वात् कः (पा० ३।२।५। वा० २१)॥ १०६ ॥

तद्वरैरिति। विदर्भजा इहास्यां सभायां एतदीयवचनविषये वाऽस्य वर्णितस्य नृपस्य हास्यं किमभूत् किंवा नाभूत् इति कारणात् स्वभावात्तमपि भूपं न्यभालयत् औदासीन्येन सम्मुखदृष्ट्या ददर्श न त्वनुरागादित्यर्थः। किं कृत्वा। अनुरागाभावेऽपि हास्यरसकृताभिरीक्षणभङ्गिभिः अवलोकनप्रकारविशेषैः तां सभां निपीय सादरमवलोक्य। किम्भूतां सभां। तस्याः सख्याः विध्युपक्रमैर्निषेधे पर्यवसितैः पूर्व्वोक्तैर्वरैः कृत्वा सस्मितानि सविस्मितानि साश्चर्य्याणि चाननानि यस्यास्तां। इह नृपेऽस्य हास्यं जातं न वेति वा। स्मितसहितां विगतस्मितत्वं विरुद्धं। विरोधाभासः॥ १०७॥

नलेति। पतिव्रताया भैम्या नलान्यावलोकनमनुचितमित्याशङ्कां परिहरन्नुत्तरसर्गे वर्णयिष्यमाणस्य नलस्य प्रस्तावनां करोति। दमस्वसुः कनीनिका नेत्रतारा नलादन्यस्य नृपस्य

चकार सेवां शुचिरक्ततोचितां
मिलन्नपाङ्गः सविधे तु नैषधे ॥ १०८ ॥
दृशा नलस्य श्रुतिचुम्बिनेषुणा
करेऽपि चक्राक्तलनम्रकार्मुकः।

वीचामवलोकनरूपामागः अपराधं विदधे चक्रे। किम्भूता। खलु यस्मान्मीलिम्नः कालिम्नः आलयः स्थानं। मलिनो हि निषिद्धमाचरति। अपाङ्गस्तु कटाक्षः पुनः सविधे द्वितीयपङ्क्तौ चिचतुरेभ्योऽनन्तरमुपविष्टे नैषधे सत्यनले मिलन् सम्बद्धः सन् शुचिरक्ततोचितां धवलरक्तलयोग्यां सेवां चकार। धवलरक्तत्वलक्षणसामुद्रकलक्षणयुक्तोऽपाङ्गस्तु नल एव संलग्नोऽभूदित्यर्थः। अथ च शुचेः पापभीरोः अनुरक्तस्य च स्वभावेन उचितां स्वामिभक्तोचितां इति वा। स्वामिभक्तो हि स्वामिनमेव सेवते न त्वन्यमित्यर्थः। कटाक्षेणान्यावलोकने दोषः। ऋजुदृष्ट्या त्वन्यविलोकने दोषो नेति न पातिव्रत्यक्षतिः कापि। नलमेव कटाक्षैर्विलोकयति स्मेति भावः। इन्द्रादिषु चतुर्षु अलीकनलेषु सत्स्वपि सत्यनलत्वेऽज्ञातेपि तत्रैव सत्यनले एवानुरागभाक्त्वाद् दृष्टवशात् कटाक्षनिरीक्षणं युक्तं ॥ १०८ ॥

इदानीं श्लोकचतुष्टयेन परस्परानुरागं वर्णयति। दृशेति। ततो भैमीकटाक्षविलोकनानन्तरं स्वयमनङ्गोऽङ्गरहितः परस्य नलस्यैव दृगादिभिरङ्गैरवयवैर्धन्विनां धनुर्द्धरत्वं अनुकृत्य आकर्णगामिना बाणकल्पेन चक्षुषा अमीं भैमीमार्दयदपीडयत्।

स्मरः पराङ्गैरनुकल्प्य धन्विनां
जनीमनङ्गः स्वयमार्दयत्ततः ॥ १०८ ॥
उत्कण्टका विलसदुज्ज्वलपत्त्रराजि-
रामोदभागनपरागतराऽतिगौरी।

किंभूतः स्मरः। करे नलस्यैव हस्ते रेखामयराज्यादिलक्षणरूप-चक्रछलेन नम्रं चक्राकारं कार्मुकं यस्य सः। भैम्या कटाक्षैर्नले वीक्षिते सति नलेन कटाक्षैर्वीक्षिता सा सती कामातुरा जातेति भावः। मुख्याङ्गाभावे चानुकल्पोऽप्यङ्गीक्रियते। आर्दयत्। अर्द हिंसायां ण्यन्ताल्लङ्। आर्दिददिति पाठे लुङ्॥ १०८॥

उत्कण्टकेति। सा भैमी रुद्रक्रुधः रुद्रकृतशापपरित्याग समुद्भवात्कोपाद्धेतोः तस्य रुद्रस्यारिः कामः तस्य बुद्ध्याऽयं काम एवेति बुद्ध्या नले विषये वासस्य स्वयम्वरेण स्थितेरर्थिता अभिलाषुकत्वं अधृत दधार। नले साभिलाषा जातेति भावः। स्वशत्रुसमाश्रयणञ्च युक्तमेव। केव। काञ्चनकेतकीव। किंभूता सा केतकी च। उत्कण्टका उदितरोमाञ्चा उर्द्धीभूतसूचीतुल्य शूकाया च। तथा विलसन्ती शोभमाना नीलपीतादिभिर्व-र्णैरुज्ज्वला प्रकाशमाना उज्ज्वलेन शृङ्गारेण वा प्रकाशमाना विलोकनादिशृङ्गारोपाया एवंभूता वा कस्तूर्यादिरचिता कपोलवक्षोजादौ पत्त्रराजिः पत्त्रवल्ली पत्त्रपङ्क्तिर्यस्याः। शोभमा-नोज्ज्वलवर्णपत्त्रपङ्क्तिश्च। तथा आमोदं विलेपजं सुरभिगन्धं हर्षं वा स्वाभाविकं परिमलञ्च भजतीति भाक्। तथा अपगतोऽनु-

रुद्रक्रुधस्तदरिकामधिया नले सा
वासार्थितामधृत काञ्चनकेतकीव ॥ ११० ॥
तन्नालीकनले चलेतरमनाः साम्राज्यनागाग्यभू-
दप्यग्रे चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान् ।

रागो यस्या एवंभूता न भवति अतितरां अनपरागतरा । नले अतितरामनुरागिणी । न विद्यते परागः पुष्परजो यस्यामेवंविधा न भवति नितरां अनपरागा अनपरागतरा अतितरां परागसहिता । तथाऽनितरां गौरवर्णा उभय्यपि । गौरीं पार्वतीं अतिक्रान्ता वा भैमी । सुवर्णकेतकी यथा रुद्रकोपस्य वासः वसतिः तस्यार्थितां अभिलाषुकत्वं दधार तस्य स्थानं बभूवेत्यर्थः । तथा भैम्यपि नलविषये नलवैरिकामबुद्धा नलशत्रुः काम एवेति नलसम्बन्धित्वेन मां पीडयतीति धिया रुद्रकोपस्यात्मनि यो वासस्तदर्थितां दधार । रुद्रकोपस्य स्थानं जाता नितरां सकोपा जातेत्यर्थः । कामसाम्यं नलस्योक्तं । नलेन कटाक्षवीक्षणे कृते सातितरां कामपीडिता जातेति भाव इति वा । गौरीमतिक्रान्तेति तत्पुरुषे । गोस्त्रियोरुपसर्जनस्येति (पा॰ १ । २ । ४८) । ह्रस्वत्वप्राप्तेः अतिगौरिरिति स्यात् । तथापि कृदिकारादक्तिन इति (कौ॰ प॰ ३३ । पं॰ ३ । पा॰ ४ । १ । ४५ । वा॰) । ह्रस्वान्तादपि पक्षे ङीपि अतिगौरीति सङ्गच्छते ॥ ११० ॥

तदिति । न अलीको नालीकः स चासौ नलश्च नालीकनलः सत्यनलः । स चासौ नालीकनलश्च तन्नालीकनलस्तस्मि-

आनन्दाम्बुनिधौ निमज्य नितरां दूरङ्गता तत्तला-
लङ्कारीभवनाञ्जनाय ददती पातालकन्याभ्रमं ॥ ११२ ॥

अदृष्टवशघटितदुर्घटदर्शने सत्यनले चलेतरत् निश्चलं मनो यस्याः सा। तत्रैवानुरक्ता सती सा भैमी अग्रे स्थितानपि चतुरश्चतुःसङ्ख्याकानलीकान् साम्यान् सत्यनलसाम्येन नलान् दृशा नयनव्यापारेण पातुं कटाक्षैर्विलोकयितुं मनागल्पमल्पमपि चतुरा कुशला नाभूत्। किम्भूता। आनन्दाम्बुनिधौ आनन्दरूपे समुद्रे निमज्य क्रीडित्वा नलावलोकनान्निश्चला भूत्वेति यावत्। नितरां दूरङ्गता हर्षस्य परमकाष्ठां प्राप्ता तेलङ्गता च। तथा तस्यानन्दसमुद्रस्य तलं तस्यालङ्कारीभवनाञ्जनाय पाताल-कन्याभ्रमं अतिसौन्दर्यादानन्दवशाच्च निर्निमेषतया समुद्रे निमज्य तलगमनेन च किमियं नागकन्येति भ्रमबुद्धिं ददती जनयन्ती। अलङ्कारीभवते इति पाठे तस्य नलस्य भूतलस्य उपवेशनेनालङ्कारभूतायेन्द्रादिलोकाय नललक्षणाय जनाय वा पातालतलस्यालङ्कारीभवते वासुक्यादिनागलोकाय वा पुरःस्थितान्नलाकारानपीन्द्रादीनन्यराजवत्तुच्छीव विलोकयति स्म। अदृष्टवशाच्च व्यवहितमपि सत्यनलं कटाक्षैर्विलोकयति स्मेति भावः। तन्नलेतिपाठे तेषामलीकनलत्वात्तदानीं स्वीयेन रूपेणालङ्कारभूताय जनाय सत्यनलायेत्यर्थः ॥ ११२ ॥

सर्व्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय
प्रापत्तद्दृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गां ।
आनन्दान्ध्येन वन्ध्यानकृत तदपराकूतपातान् स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥ ११२ ॥

सर्व्वस्वमिति ॥ स नृपतिर्नलोऽपि चेतसः सर्व्वस्वं प्राणवत्प्रियां तां भैमीं दृशे स्वनेत्राय प्रीतिदायं सन्तोषजनितं दानं प्रदाय प्रकर्षेण दत्त्वा कटाक्षेण अतिसादरं दृष्ट्वा अमरदुरापां इन्द्रादिभिर्दुर्लभां लोकोत्तरस्वरूपां अथच तेषां कटाक्षेणानवलोकनात्तैर्दुरापां अपाङ्गे नेत्रप्रान्ते उत्तरङ्गां चलत्कल्लोलां अतिचञ्चलां कटाक्षरूपां तद्दृष्टिं भैमीदृष्टिमेव इष्टातिथिं प्रियमभ्यागतं प्रापत् लेभे । भैम्या पूर्व्वं कटाक्षैर्विलोकितोऽनन्तरं तेन सा विलोकिता अनन्तरं पुनरपि तया स विलोकित इत्यर्थः। अनन्तरं च रत्याः पत्या कामेन पीयूषधारारूपमतिनिर्वापकत्वादमृतरूपं यद्वलनं भैमीकृतं वलितग्रीवमवलोकनं तेन कृत्वा विरचितेनाशुगेन भैमीकटाक्षरूपेण बाणेनाशु शीघ्रं लीढो विद्धः सः नलः तदपराः तस्या भैमीदृष्टेरपरेऽन्ये तृतीयादयो ये आकूतपाताः अनेकभावाभिव्यञ्जका व्यापारविशेषास्तान् आनन्दान्ध्येन हर्षाश्रुपरिपूर्णनेत्रतया यदान्ध्यं अदर्शनलेन वन्ध्यान् निष्फलान् अकृत । भैमीद्वितीयकटाक्षवीक्षणेनैवातिहृष्टो कामविवशः संस्तस्यास्तृतीयादिकटाक्षनिरीक्षणानि न ददर्शेति भावः। अन्योऽपि तुष्टः कस्मैचित् सर्व्वस्वं ददाति अतिप्रियस्यातिथेः प्राप्यानन्दबाष्पान्धो भवति ॥ ११२ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११३॥

श्रीहर्षमिति। पूर्व्वार्धार्थः पूर्व्ववत्। माता वागीश्वरी जननी च तस्याश्चरणावेवाम्भोजे तयोरलिरूपो भ्रमररूपः मौलिर्यस्य। यद्वा मातृचरणसम्बन्धिनी पूजार्थं चरणयोरुपढौकिता अम्भोजालिः कमलमाला तद्युक्तो मौलिर्यस्य। वागीश्वर्या जनन्या वा प्रसादरूपेण धृतनिर्माल्यकस्येत्यर्थः। द्वादशानां पूरणः सर्गः व्यगलत् समाप्तः। स्वभावत उज्ज्वल इत्यर्थः॥ ११३ ॥ इति श्रीवेदरकरोपनामक श्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे द्वादशः सर्गः॥ शुभमस्तु॥

उत्तरनैषधचरिते।

त्रयोदशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयतः।

कल्पद्रुमान् परिमला इव भृङ्गमाला-
मात्माश्रयां निखिलनन्दनशाखिवृन्दात्।
तां राजकादपगमय्य विमानधुर्य्या
निन्युर्नलाकृतिधरानथ पञ्च वीरान्॥ १॥

इदानीं इन्द्रादिपञ्चनलीभञ्जं त्रयोदशं सर्गमारभते। कल्पद्रुमेति। अथ विमानधुर्य्याः शिविकावाहिनः तां भैमीं राजकाद्राजसमूहात् अपगमय्य निवर्त्य नलाकृतिधरान् नलवेषधारिणः पञ्च वीरान्नलसहितानिन्द्रादीन्निन्युः प्रापयामासुः। शिविकावाहिनां तेषु पञ्चसु नलोऽस्ति वा न वेति अपरिज्ञानात् नलस्यापि नलरूपधारकत्वं घटते। यस्य यद्रूपं तद्धारित्वं तस्यापि युक्तमेवेति काव्यापेक्षयापि युज्यते। वीरपदेन शौर्य्यं नायकगुणः। के। कस्मात्। कां। कानिव। परिमला मनोहराः गन्धाः समस्ताः नन्दनशाखिनो देवोद्यानतरवः तेषां वृन्दात् आत्माश्रयां परिमलाश्रितां भृङ्गमालां भ्रमरपङ्क्तिं परावर्त्य अतिशयान् कल्पद्रुमानिव। कल्पद्रुमा नन्दनस्थितवृक्षापेक्षया अधिकाश्चयाऽन्यराजापेक्षया तेऽपीत्यर्थः। सर्वाभिलाषपूरकत्वसाम्यात्।

साक्षात्कृताखिलजगज्जनताचरित्रा
तत्राधिनायमधिकृत्य दिवस्तया सा
ऊचे यथा स च शचीपतिरभ्यधायि
प्राकाशि तस्य न च नैषधकायमाया ॥ २ ॥
ब्रूमः किमस्य वरवर्णिनि वीरसेनो-
द्भूतिं द्विषद्दनुविजित्वरपौरुषस्य ।

मन्दारादिष्वपि चतुर्षु कल्पद्रुमशब्दप्रयोगः । भैम्या अपात्मा-श्रयविमाने स्थितत्वात् । नयतिर्द्विकर्मा ॥ १ ॥

साक्षादिति । सा देवी तत्र तेषु मध्ये प्राधान्यान्निवेश-नक्रमानुरोधाच्च दिवोऽधिनायमिन्द्रमधिकृत्योद्दिश्य तथा तेन प्रकारेणोचे अकथयत् । यथा येन प्रकारेण स शचीपतिरिन्द्र-स्याभ्यधायि उक्तो भवति । तस्येन्द्रस्य नैषधकायस्य माया छद्म न च प्राकाशि प्रकटितं भवति । किंभूता । साक्षात्कृतं अखिलजगतां जनताचरित्रं जनसमूहवृत्तान्तो यया सा । यथा इन्द्रादीनां प्राकट्यं न विष्णोराज्ञया वर्णनं च मौनित्वे प्रतिभाचयो न तथाऽवोचदिति भावः । साक्षादिति विशेषणे नलरूपं कृत्वा आगतानामिन्द्रादीनां ज्ञानौचित्यं सूच्यते ॥ २ ॥

ब्रूम इति । हे वरवर्णिनि उत्तमे भैमि वयं अस्येन्द्रस्य वीराणां वा सेनायाः सैन्यस्य उद्भूतिं उत्कृष्टैश्वर्यं सामर्थ्यं वाङ्गत्वं वा किं ब्रूमो वर्णयामः । वर्णनाशक्यत्वादागगोचर इत्यर्थः । किम्भूतस्य । द्विषन्नमिचि यो दनुनामा दैत्यस्तस्य विजित्वरं जय-

सेनाचरीभवदिभाननदानवारि-
वासेन यस्य जनिताऽसुरभी रणश्रीः ॥ ३ ॥

नशीलं पौरुषं पराक्रमो यस्य। यस्य रणश्रीः सेनाचरीभवन्तौ सैनिकौ भवन्तौ यौ इभाननदानवारी गणेशनारायणौ तयोर्वा-सेनाधिष्ठानेन छला जनिता कृता असुरभीर्दैत्यभयं यया सा। असुरेभ्यो देवानां या भीस्तस्या ईरणं क्षेपणं तेन या श्रीः सा यस्य जनितेति वा। वागगोचरोऽस्य चरितमित्यर्थः॥ नलपक्षे तु अस्य वीरसेनाख्यनृपादुत्पत्तिं किं कथयामः अपि तु न। अकथनेऽपि लोकत्रये प्रसिद्धत्वात्। स्वगुणैरेवास्य ख्यातत्वाद्वा। अन्यो हि स्वयं न प्रसिद्धस्तस्य पित्रादिप्रसिद्ध्या वर्णनं क्रियते। अयं तु न तथेति भावः। किंभूतस्य। दयितां बलस्य सैन्यस्याद्भिकस्य सत्त्वस्य वा शिखरं पौरुषं पराक्रमो यस्य। यस्य रणश्रीः सेनाचरीभवन्तः सैनिका इभास्तेषां आननदानवारि मुखदानोदकं तस्य वासेन गन्धेन सुरभिर्जनिता। रलयोः सावर्ण्यात्सेनायामचलीभवतां पर्वतायमानानां इभानामिति वा। मत्तगजबाहुल्यमनेन सूच्यते। एवमिन्द्रनलयोरभेदबुद्धिर्यथा तथा भवति तथा द्र्योक्तं। रणशब्दो लक्षणया रणभूमौ वर्त्तते। इतः श्लोकादारभ्यात्याजीति यावत् प्रथममिन्द्रादिवर्णनं पश्चान्नलवर्णनं। अत्याजीत्यादौ च नलवर्णनं प्राधान्येन दिक्पालवर्णनं पश्चादिति ज्ञेयम्। श्लोकादिष प्रथमत इति श्लोकेन नलस्य प्राधान्यनिर्द्देशाद्दुरितोत्यादि-श्लोकया दिक्पालानामप्राधान्यनिर्द्देशात्। उच्चाश्वर्त्तवती

शुभ्रांशुहारगणहारिपयोधराङ्क-
चुम्बीन्द्रचापखचितद्युमणिप्रभाभिः।

शीते शीतस्पर्शा तपात्यये। भर्तृभक्ता च या नारी सोच्यते वरवर्णिनीति वृद्धाः। उत्तमा वरवर्णिनीत्यमरः। वरो वर्णो यस्या इति वा। "अतिशायने धर्मशीलवर्णान्ताच्चेति इनिः (पा० ५। २। १३२)॥" ३॥

शुभ्रेति। एष इन्द्रः समिति च यात्रासु विलासगतिषु च दण्डयात्रासु वा। अमरवाहिनीभिः सुरसेनाभिः अन्वास्यते अनुगम्यते। किं विधाभिः। शुभ्रांशुश्चन्द्रः हरसम्बन्धिनो हाराः एकादशरुद्रास्तेषाङ्गणः समूहः हरसम्बन्धिनो वा ये गणाः नन्दिप्रभृतयस्तान् सर्वानपि हरन्ति आत्मना सह नयन्ति तत्सहिता इति यावत्। एवंविधाः पयोधरा मेघाः। हरस्यापत्यं हारः स्कन्दो गणपतिर्मेघाश्चेति वा। तेषामङ्कचुम्बी स्वामिलामध्यवर्तीन्द्रः शुभ्रांशुहारगणान् हरत्यात्मना सह नयत्येवं शीलः पयोधराङ्कचुम्बी च एवंविधो वा य इन्द्रस्तस्य चापं तेन खचिता सम्बद्धा द्युमणिप्रभा सूर्यशोभा यासु ताभिः शुभ्रांश्वादिभिः शक्रधनुर्व्याप्तेन सूर्येण च प्रकर्षेण भान्ति ताभिर्वा। तथा बहुः प्रचुरो लाभो धनादिप्राप्तिर्येषु रणेषु अर्चिताभिः पूजिताभिः। दैत्यजयाद्बहुला आभा दीप्तिर्यासां ताश्च ता रणार्चिताश्चेति वा। मेघानामपि कामरूपत्वात् मैनिकत्वं युज्यते। चन्द्रादिभिर्विशिष्टेन्द्रचापेन च खे आकाशे चिता वृद्धिं प्रापिता सूर्यशोभा यास्विति वा। तैः कृत्वा वृद्धिं प्राप्ता वा चन्द्राद-

अन्वास्यते समिति चामरवाहिनीभि-
र्यात्रासु चैष बहुलाभरणार्चिताभिः ॥ ४ ॥

यस्तेजस्विनस्तत्तेजःसमस्तेन सूर्यतेजः प्रचुरं यत्र जातमित्यर्थः ॥ नलपक्षे एष नलः सभायां दण्डयात्रासु च चामरधारिणीभिः अन्वास्यते सेव्यते। किंभूताभिः। शुभ्राः सिताः अंशवो यस्य तेन हारगणेन मुक्ताहारसमूहेन कृत्वा हारी सुन्दरः पयोधराङ्कः स्तनमध्यस्तचुम्बिनी तत्सम्बद्धा इन्द्रचापसम्बद्धसूर्यप्रभेव प्रभा यासां ताभिः। चोऽप्यर्थः। यात्रास्वपीति योजना। हारमध्यगमणीनामनेकवर्णत्वादिन्द्रचापसम्बद्धसूर्यप्रभासाम्यं। तथा त एव बहुलानि प्रचुराणि आभरणानि तैरर्चिताभिरलङ्कृताभिः। प्राधान्याद्धाराणाङ्ग्रहणं। आभरणग्रहणं तद्व्यतिरिक्तालङ्काराणां अतो न पौनरुक्त्यम्। एतेन यथा सभायां निर्भयं आस्ते तथा सङ्ग्रामयात्रास्वपीति व्यज्यते। शुभ्र उद्दीप्तशुक्लयोः। द्युमणिस्तरणिर्मित्रः। समितियुद्धे सभयाश्च इत्यमरः। हरत्यद्वान्तस्येदमित्यण् (पा० ४। ३। १२०)। हारी। ताच्छील्ये णिनिः। अपत्ये वा अत इञ् (पा० ४। १। ९५)। यद्वा शुभ्रांशुहारगणेन हारिणः पयोधराः स्तनास्तेषामङ्कः पार्श्वप्रदेशः तच्चुम्बी इन्द्रचापो नवपदविशेषणेन सम्बद्धा दिव्यरत्नप्रभा यासां ताभिः। इन्द्रचापवदाकाशव्याप्ता दिव्यमणिप्रभा यासां ताभिरिति वा। चित्रमणिप्रभासम्वलिताः शक्रधनुःसदृशा भवन्तीति बहुभैराभरणैर्भूषिताभिरित्यर्थः। रुच दीप्तिर्मवरणयोः ॥ ४॥

क्षोणीभृतामतुलकर्कशविग्रहाणा-
मुद्दामदर्पहरिकुञ्जरकोटिभाजां।
पक्षच्छिदामयमुदग्रबलो विधाय
मग्नं विपज्जलनिधौ जगदुज्जहार ॥ ५ ॥

क्षोणीति। इति पद्यं कुत्रचित्पुस्तके दृष्टं। तस्यायमर्थः। अयं क्षोणीभृतां पर्वतानां पक्षच्छिदां विधाय कृत्वा विपज्जलनिधौ आपत्समुद्रे मग्नं पक्षसहितैः पर्वतैः खण्डीकरणाज्जगदुज्जहार उच्चकर्षेत्यर्थः। पर्वतपक्षच्छेदनादिपद्रहितं कृतवानिति भावः। किंभूतानां। अतुला अत्युच्चाः कर्कशास्त्र विग्रहा देहा येषां। तथा उद्दामदर्पाणां अत्युद्भटानां हरिकुञ्जराणां सिंहहस्तिनां कोटिं भजतां। एकस्मिन् प्रदेशेऽनेकसिंहानामन्यस्मिन्नत्युद्भटानामनेककुञ्जराणामित्यर्थः। किंभूतोऽयं। बलाद्दैत्यादुदयः उदग्रबलः। यद्वा उदयं पौरुषं यस्य सः॥ नलपक्षे अतुलानत्युच्चान् सलक्षणांश्च कर्कान् श्वेताश्वान् शृन्ति मारयन्ति एवंविधा विग्रहाः शरीराणि वैरं वा येषां। तथा उद्दामदर्पा हरयोऽश्वा गजाश्च तेषां कोटिं भजतां। वैरिनृपाणां पक्षच्छिदां सहायच्छेदं कुक्षिच्छेदं वा कृत्वा उदग्रं बलं पौरुषं सैन्यं वा यस्य। अयं नलो वैरिकृतापत्समुद्रे मग्नं जगदुज्जहार। वैरिणो हत्वा आपद्रहितमकरोदित्यर्थः ॥ ५ ॥

भूमीभृतः समिति जिष्णुमपव्ययायं
जानीहि न त्वमघवन्तममुं क्वचित्‌।

भूमीभृत इति। हे घटस्य प्रतिभटौ सदृशौ स्तनौ यस्या-स्तत्सम्बुद्धिः। हे भैमि त्वं समिति सङ्ग्रामे भूमीभृतः पर्व्वतान्‌ जिष्णुं जेतारं। तथा न विद्यते पर्वैर्वज्रस्य अपायो नाशो यस्य। तममुं अमघवन्तमनिन्द्रं न तु नैव जानीहि अपि त्विन्द्र एवायं। इन्द्रस्य सहस्रनेत्रत्वात्सायं तथेत्यत आह। त्वं एतदीयं शयं पाणिम-तिक्रान्तं प्रसृतादपि दीर्घं अत एवाद्भुतमाश्चर्य्यकारि कथञ्चिद्‌ गुप्तं नलरूपधारणाच्छादितं बहुनेत्रस्य भावो बाहुनेत्रं ना-लोकसे न पश्यसि गुप्तत्वान्न तु अविद्यमानत्वादित्यर्थः। शयावति-क्रान्तं हस्ततलयोर्नेत्राणि न सन्तीत्यर्थ इति वा। बहुनेत्र-समूहं बाहुनेत्रमसम्बन्धिनमेतदीयमतिशयमुत्कर्षं वाश्चर्य्यमिति वा। नलपक्षे त्वममुं अघवन्तं सपापं न जानीहि पुण्यश्लोकत्वात्‌। रणे राज्ञो जेतारं। तथापगतो विशिष्टोऽपायो यस्मात्तं। रणे अपगतो व्यपायः पलायनं यस्मात्‌ अपलायमानमित्यर्थः। एत-दीयं अतिशयमपरिमितहस्तपरिमाणमाश्चर्य्यरूपं प्रावरणवस्त्रा-दावेव हस्ते स्थितं नेत्रं चीनांशुकं गुप्तं यथा तथा द्रव्यान्तरवि-लोकनव्याजेन नालोकसे अपि त्वालोकयेत्यर्थः। बाहू च नेत्रे च बाहुनेत्रं। शयमतिक्रान्तं बाहू हस्तपरिमाणाधिकपरिमाणे नेत्रे च प्रसृतादप्यधिकेत्यर्थः। तद्गुप्तं यथा तथा नालोकसे अपि त्वालोकयेति वा। अतिशयं बाहुनेत्रं बाहू अतिशयितौ वदान्यौ शयौ ययोस्तावतिशयौ। नेत्रे च शयमतिक्रान्ते अतिशयौ च।

गुप्तं घटप्रतिभटस्तनि बाहुनेत्रं
नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ ६ ॥
लेखा नितम्बिनि बलादिसमृद्धराज्य-
प्राज्योपभोगपिशुना दधते सरागं।
एतस्य पाणिचरणं तदनेन पत्या
सार्द्धं शचीव हरिणा मुदमुद्वहस्व॥ ७॥

अतिशये चेति नपुंसकैकशेषेण वा व्याख्येयं। एतदीयं गुप्तमनेन पालितं। बहवश्च ते नेतारश्च बहूनां वा नेतारस्तेषां समूहः अतिशयितो हस्तो यस्य। लक्षणया वदान्यं उत्कृष्टमालोकय। शूरा वदान्या अध्यनेन पोषिता इत्यस्योत्कृष्टत्वं व्यज्यते। कुलिश-भिदुरम्यविरित्यमरः। नेत्रं पथि गुणे च स्वे इति विश्वः। जिष्णुः। ग्लाजिस्थश्च ग्स्नुरिति ताच्छील्ये ग्स्नुः।(पा० ३।२।१३८)।तद्योगे भूमीभृत इति न लोकेति (पा० २।३।६९)। षष्ठीनिषेधात् द्वितीया। बहुनेत्रशब्दात् भावसमूहमस्यन्से ष्यण् (पा० ४।२। ३७)। पक्षे प्राप्यङ्गत्वादेकवद्भावः (पा० २।३।२)॥ ६॥

लेखा इति। हे नितम्बिनि अतिपृथुनिविडनितम्बे भैमि बलादीनां बलवृत्रनमुचिप्रभृतीनां समृद्धं सम्पूर्णं राज्यं राज-भावः तस्य प्राज्यो बहुः उपभोगस्तस्य पिशुनास्तत्सूचनाः लेखा देवाः एतस्येन्द्रस्य पाणी च चरणौ च पाणिचरणं सरागं सानु-रागं यथा तथा दधते धारयन्ति। हस्तानादात्पाणिं नमस्कारार्थं च चरणाविल्यर्थः। तत्तस्मादनेन हरिणेन्द्रेण पत्या सार्द्धं शचीव

आकर्ण्य तुल्यमखिलां सुदती लगन्ती-
माखण्डलेऽपि च नलेऽपि च वाचमेताम्।
रूपं समानमुभयत्र विगाहमाना
श्रोत्रान्न निर्णयमवापदसौ न नेत्रात्॥ ८॥

मुदमुद्वहस्व धारस्व॥ नलपक्षे सरागमरुणं एतस्य पाणिचरणं कर्तृ सैन्यस्वाम्यमात्यादिभिः षड्विधेन वा बलेन समृद्धस्य राज्यस्य प्राज्यस्य उपभोगस्तस्य सूचिका सामुद्रिकोक्तलक्षणभूताः ध्वजादिरेखाः कर्मभूताः दधते धारयति। दध धारणे एकवचनान्तमस्मिन् पक्षे रूपं। तस्मादनेन पत्या नलेन सह हर्षं धारयस्व। केन केव। हरिणेन्द्रेण शचीव। लेखा अदितिनन्दनाः। पिशुनौ खलसूचकावित्यमरः। नितम्बशब्दादतिशयार्थादिनिः (पा० ५। २। १३२)। पाणिचरणं। प्राण्यङ्गत्वादेकवद्भावे षण्ढत्वं (पा० २। ४। १७)॥ ७॥

आकर्ण्येति। असौ सुदती भैमी एतां पूर्वोक्तां अखिलां वाचमाखण्डलेऽपि च नलेऽपि च तुल्यं लगन्तीं समानसम्बन्धामाकर्ण्य उभयत्र इन्द्रे नले च समानं रूपं ऐक्यरूपञ्च विगाहमाना जानती विशेषावलोकनादपि विशेषमनुपलभमाना यथाक्रमं श्रोत्राच्छ्रवणेन्द्रियात् नेत्राच्चक्षुरिन्द्रियाच्च निर्णयं नावापत् न प्राप। अनयेन्द्रः स्तुतः किंवा नलः। तयोः सरूपत्वादयमिन्द्रो नलो वेति नाज्ञासीदित्यर्थः। अपि चेति समुदायौ परस्परसमुच्चयवाचकौ। अवापत्। ऌदित्वादङ्॥ ८॥

शक्रः किमेष निषधाधिपतिः स वेति
दोलायमानमनसं परिभाव्य भैमीम्।
निर्दिश्य तत्र पवनस्य सखायमस्यां
भूयोऽसृजद्भगवती वचसां स्रजं सा ॥ ८ ॥
एष प्रतापनिधिरुद्गतिमान् सदायं
किं नाम नार्जितमनेन धनञ्जयेन।

शक्र इति। सा भगवती सरस्वती भूयः पुनरपि वचसः स्रजं वाङ्मालां असृजत्। किं कृत्वा। तत्र तेषु मध्ये अस्यां भैमीसमीपे पवनस्य सखायमग्निं निर्दिश्योद्दिश्य। पुनः किं कृत्वा भैमीं इति दोलायमानं दोलेव भवत् मनो यस्यास्तां परिभाव्य सञ्चिन्त्य। इति किं। एष किं शक्रः सत्यं दृष्टः निषधाधिपतिर्नलो वेति दोलेवाचरति। कर्तुः क्यङ् सलोपश्चेति (पा० ३। १।११)। क्यङि शानचि दोलायमानमिति। अस्यां सामीपिक आधारः ॥ ८ ॥

एष इति। हे भैमि एष प्रतापस्य निधिः प्रकृष्टोष्मस्पर्शस्थानं। तथाऽयं सदा उद्गतिमानूर्द्ध्वगमनयुक्तः ऊर्द्ध्वज्वलनोऽयमित्यर्थः। धनञ्जयेन वह्निनाऽनेन किं नाम का सञ्ज्ञा नार्ज्जितं न प्राप्तं। अग्निर्वैश्वानरो वह्निरित्यादिकं नाम निर्वचनयोगात् प्राप्तमित्यर्थः। सर्व्वेषामपि नाम्नां निर्वचनमस्त्येव। नाम सम्भावनायां अग्निनाऽनेन किं नाम वस्तु न प्राप्तं। तैजसानां परमाणूनां सर्व्वत्राविरलत्वेन विद्यमानत्वादिति वा। अनेन धनञ्ज-

क्षेम प्रभूतमधिगच्छ शुचेरमुष्मान्
नास्त्येव कस्य च न भास्वररूपसम्पत् ॥ १० ॥

यशब्देन कृत्वा सार्थकं नाम किं नार्ज्जितमिति वा। धनञ्जयत्वा-देतस्य त्वं शुचेरपित्तादमुष्मादग्नेः प्रभूतं बहु हेम स्वर्णमधिगच्छ प्राप्नुहि। धनमिच्छेद्धुताशनादित्युक्तेः। अग्नेरपत्यं प्रथमं सुवर्ण-मिति श्रुतेः। अस्मात् सुवर्णं प्रथममुत्पन्नं। अस्येवाग्नेरिव कस्य च न कस्यापि भास्वरा देदीप्यमाना रूपसम्पन्नास्ति तेजोमात्र-विवक्षया। तेजोव्यतिरिक्तस्य कस्य च न शुक्लं भास्वरं रूपं दृष्ट-मित्यर्थः॥ नलपक्षे एष नलः चात्रतेजःस्थानं। तथा सदोदयवान्। तथाऽनेन जयेन कृत्वा किं नाम धनं नार्जितं वैरिणो विजित्य धनमर्जितं। दायो दानं तेन सहितमिति वा। एतेन धनार्जनस्य स्वोपभोगः फलं न किन्तु दानमेव मुख्यं फलं वदान्यत्वं च सूचितं। सदा अयः शुभावहो विधिर्यस्मादिति वा। शुचेः स्वधर्मोपार्जितद्रव्यादमुष्मात्प्रचुरं सुवर्णं प्राप्नुहि। शुचेः शृङ्गा-ररूपादिति वा। अस्य नलस्येव भास्वरा कायकान्तिसमृद्धिः कस्याप्यन्यस्य नास्ति। भा दीप्तिः स्वरः कण्ठशब्दः रूपं सौन्दर्यं तेषां सम्पदस्येव कस्यापि नास्तीति वा। तेजस्वी मधुरस्वरः सुन्द-रश्चेत्युक्तं। वीतिहोत्रो धनञ्जयः। शुचिरप्पित्तमौर्वस्तु इत्यमरः। धनञ्जयः। सञ्ज्ञायां भृतवृजीत्यादिना खच् (पा॰ ३।२। ४६)। अरुर्द्विषदिति मुम् (पा॰ ६।३।६७)। भास्वरं। स्थेश-भासेति वरच् (पा॰ ३।२।१७५)॥१०॥

अत्यर्थचेतिपटुताकवलीभवत्तत्
तत्पार्थिवाधिकरणप्रभवस्य भूतिः ।
अप्यङ्गरागजननाय महेश्वरस्य
सञ्जायते रुचिरकर्णि तपस्विनोऽपि ॥ ११ ॥

अत्यर्थेति । हे रुचिरकर्णि शोभनश्रवणेन्द्रिये भैमि अस्याग्नेरत्यर्थोऽतिशयितहेतिपटुता ज्वालापाटवं तस्य कवलीभवन्ति ग्रासीभवन्ति तानि तानि पार्थिवानि पृथिवीकार्य्याणि दृणकाष्ठकरीषादीनि तान्येवाधिकरणं भस्मन एवाधारः ततः प्रभव उत्पत्तिर्यस्या एवंविधा भूतिर्भस्म तपस्विनोऽपि पाशुपतादिमतनिष्ठस्य महेश्वरस्य शिवस्याङ्गरागजननाय उद्धूलनेनाङ्गानां विशिष्टवर्णोत्पत्तये सञ्जायते सम्पद्यते । एतत्सम्बन्धि भस्मापि ईश्वरस्य तपस्विनोऽपि उपकर्त्री प्रभवति अन्यस्य भवतीति किं वक्तव्यमिति स्तुतिः । रुचिरकर्णेति श्लेषोक्तिचातुरीविषये सावधाना भवेति व्यज्यते । एतद्वरणे भस्मैव केवलं नान्यत्किञ्चिदिति विचार्य्य वृणीष्वेति व्यज्यते ॥ नलपक्षे अङ्ग रुचिरकर्णि अस्य नलस्य भूतिः सम्पत् महेश्वरस्य महाधनिकस्यापि त्यक्तसर्व्वसङ्गस्य मुनेरपि च अभिलाषसमुद्भूतये सम्पद्यते । ममेदृक्सम्पद्भूयादिति धनिको मुमुक्षयापि अस्य भूतये स्पृहयतीत्यर्थः । धनिकस्य तपस्विनोऽपि ईर्ष्याजननाय सम्पद्यत इति वा । किम्भूता सम्पत् । अतिशयेनास्त्रपटुतया सोपोपसंहारादिमन्त्रप्रयोगसामर्थ्येन ग्रासीभवन्तस्ते च ते पृथ्वीश्वराश्च तेषामधिको

एतन्मुखा विबुधसंसदसावशेषा-
माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि।

रणस्तस्मादुत्पन्ना। स प्रभव उत्पादको यस्या इति वा। चात्र- तेजसोपार्जितेत्यर्थः। रागोऽनुरक्ते मात्सर्ये। चेतिर्ज्वालायुधेऽपि च। पार्थिवेति। तस्येश्वर इत्यधिकारे (पा० ५।१।४२)। सर्व्वभूमीत्यण् (पा० ५।१।४१)। रुचिरकर्णीति। नासिको- दरोष्ठेति (पा० ४।१।५५)। ङीष्॥ ११॥

एतदिति। हे पिकमुखि असेषा सर्व्वाऽसौ विबुधसंसत् देवसभा एष एव मुखं यस्याः सा। अग्निमुखा वै देवा इति श्रुतेः। अस्याग्नेर्यमतोऽपि महेन्द्रतोऽपि माध्यस्थ्यं आसनापेक्षया दिगपे- क्षया च मध्ये विद्यमानत्वं अस्ति। त्वं महस्विनं तेजोयुक्तं महस्सु तेजस्सु विषये इनं स्वामिनं चैनं उपेहि प्राप्नुहि। येन सदारुणा काष्ठसहितेनामुना करश्रीः किरणशोभा उच्चैरुर्द्धा रक्ता वा- ध्रियते। पिकमुखीति सम्बुद्ध्या धन्यत्वं व्यज्यते। धन्या पिकमुखी कन्या धन्यो मातृमुखःसुत इति सामुद्रिकोक्तेः॥ नलपक्षे असौ जगति प्रसिद्धा पुरो दृश्यमाना च निखिला विद्वत्सभा एत- न्मुखा एतत्प्रधाना। यथा सर्व्वेष्वङ्गेषु मुखं प्रधानं तथा विद्- त्सभायामसौ। के विबुधा इति पृष्टे प्रथममसौ गण्यत इत्यर्थः। पुण्यश्लोकत्वात्। एष मुखो यस्यास्तादृशीति वा। अस्य यमतः सम- वर्त्तिनोऽपि इन्द्रादप्यधिकं माध्यस्थ्यं व्यज्यते। पक्षपातरहितत्वं शत्रुमित्रयोस्तुल्यदण्ड इत्यर्थः। तस्मैः सार्व्वविभक्तिकत्वाल्लोकपा- लांशत्वादिन्द्रयमयोरेतन्मध्यवर्त्तित्वं इति केचित्। तेजस्विनमेनं

एनं महस्विनमुपेहि सदारुणोच्चै-
र्येनामुना पितृमुखि ध्रियते करश्रीः॥ १२॥
नैवाल्पमेधसि पटोर्रुचिमत्त्वमस्य
मध्येसमिन्निवसतो रिपवस्तृणानि।

प्राप्नुहि। येनानेन महा सर्व्वदा हस्तशोभा अतिशयेनारुणा रक्ता धार्य्यते। स्विनं शोभनं पतिमेनं मह पूजय। तथा एनमुपेहि एतत्समीपं गच्छेति वा। महस्विनमुत्सववन्तं वा। विश्वप्रकाशे मकारान्तस्य महःशब्दस्य पाठात्। मुखं मुखे च वक्त्रे स्यादित्यजयपालः। पिता मुखं यस्या इति समासे मुखेनैव मुखस्य सादृश्यात् पितृमुखमिव मुखं यस्या इत्यत्र पर्य्यवस्यति ॥ १२॥

नैवेति। एधसि काष्ठे पटोर्ज्वल्यमानस्याग्नेः रुचिमत्त्वं दीप्तियुक्तत्वं अल्पं नैव किन्तु बह्वित्यर्थः। जाज्वल्यमानस्यास्य इन्धने दीप्तिमत्त्वं अल्पं नैव तत्सम्बन्धादधिकं दीप्तिमानयं भवतीत्यर्थ इति वा। तथा मध्ये समित् समिधां काष्ठानां मध्ये निवसतो विद्यमानस्य तृणानि रिपवः शत्रवः। रिपुनाशो यथा वेगेन क्रियते तथा समृद्धेनानेन तानि क्षणमात्रेण दह्यन्त इत्यर्थः। प्रादेशमात्राणां पलाशशम्यादिकाष्ठानां मध्य इति वा। इह लोके समिन्मध्ये वा उत्थानवान् ऊर्द्ध्वं ज्वलन् तरस्वी वेगवानयं विरोधिना केन उदर्केन पराभवितुं पुनः शक्यो भवति तेनैव शान्तिमेति शान्त्येनेत्यर्थः। जय्यो भवति अपि तु न। वेगेनोत्थितस्यास्य वा-

उत्थानवानिह पराभवितुं तरस्वी
शक्यः पुनर्भवति केन विरोधिनायं ॥ १७ ॥
साधारणीङ्गिरमुपर्बुधनैषधाभ्या-
मेतां निपीय न विशेषमवाप्नवत्याः।

रिणापि शान्तिः कर्त्तुमशक्येत्यर्थ इति वा॥ नलपक्षे पटोर्ग्रहण-धारणादिसमर्थस्याल्पमेधसि मन्दप्रज्ञे हृचिमत्त्वं प्रीतियुक्तत्वं नैव अयोग्यत्वात्तस्येति भाव इत्यर्थः। तथा समित्सध्ये सङ्ग्राममध्ये निवसतोऽस्य वैरिणस्तृणानि अकिञ्चित्करा इत्यर्थः। इह रणे भूलोके वा तरस्वी उत्थानवान् वेगवान् बलवान् वायं केन रिपुणा जेतुं शक्योऽपि तु न केनापि। कस्याप्यजय्योऽयमित्यर्थः। उत्थानमुदयः इदंसदृशोऽपि उदयी बलवांश्च नास्तीत्यर्थः। भवतीति सम्बोधनं वा। तरो बले च वेगे च। इत्यमेधः समिदित्य-मरः। अल्पमेधसि। नित्यमसिच्प्रजामेधयोरित्यच (पा॰ ५। ४। १२२)। नित्यग्रहणादन्यस्मादपि भवतीति वृत्तिकारोक्तेः प्रयोगानुसारेण असिच्। मध्ये समित्। पारे मध्ये षष्ठ्या वेति (पा॰ २। १। १८)। अव्ययीभावे निपातनादेत्वम्। ग्रय इति (पा॰ ५। ४। १११)। वैकल्पिकत्वाट्टजभावः। परा भवितुं। शकधृषेति (पा॰ ३। ४। ६५)। अक्रियार्थत्वेऽपि शकि-योगात्तुमुन्॥ १७ ॥

साधारणीमिति। उपर्बुधनैषधाभ्यां अग्निनलाभ्यां साधा-रणीं समानमेताङ्गिरं निपीयाकर्ण्य इदमीयमनयोः मनस्विनं

ऊचे नलोऽयमिति तम्प्रति चित्तमेकं
ब्रूते स्म चान्यदनलोऽयमितीदमीयं ॥१४॥

विशेषं तारतम्यं न अवाप्तवत्या ज्ञातवत्या भैम्याः पुरोवर्त्तिनं तं प्रति एकं चित्तं मनः अयं नल इत्यूचे अन्यदपरं चित्तं अयमनल इति ब्रूते स्म। नलव्यतिरिक्तोऽयं च वह्निरित्यकथयत्। युगपदालोचनस्मृतिप्रसङ्गान्मनसः प्रति शरीरमेकत्वस्य साधितत्वादेकस्मिन्नपि मनसि क्रियाभेदादवस्थान्तरप्राप्तेर्भेद इवोपचर्य्यते। एकमेव तं पुरोवर्त्तिनं अनल इति प्रत्यूचे। अकारप्रश्लेषेणानलोऽयमिति ब्रवीति स्म मनः। तथा अयमन्यान् वैरिणो यति अवखण्डयति अन्यद् स चासौ नलश्चेति च ब्रूते स्म। अत्र व्याख्याने प्रथमस्वचितक्रमभङ्गोऽपि न भवति। एकस्य द्वैरूप्यादिरोधाभासस्य। शोचिष्केश उषर्बुध इत्यमरः। उषसि बुध्यत इति उषर्बुधः। इगुपधेति कः (पा० ३।१।१३५) अहरादीनामिति रेफः (पा० ८।२।७० वा० १)। तुल्यार्थैरिति तृतीया। (पा० २।३।७२)। अन्यदेति पचे कः। समानं साधारणमस्य साधारण्यं अनेकं प्रत्यविशिष्टं सम्बन्धं। पृषोदरादिः। ततस्त्रियां पादार्घाभ्यां चेत्यत्र (पा० ५।४।२५)। आग्नीध्रसाधारणादञिति वार्त्तिकादञि ङीप् वा। प्रकरणाच्च साधारणभूमिरित्यादादिव अत्रपि घटते। इदमीयं त्यदादित्वात् वृद्धाच्छः (पा० ४।२।६) ॥१४॥

एतादृशीमथ विलोक्य सरस्वती तां
सन्देहचित्रभयचिन्तितचित्तवृत्तिम्।
देवस्य सूनुमरविन्दविकासिरश्मे-
रुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे॥१५॥
दण्डं बिभर्त्त्ययमहो जगतस्ततः स्यात्
कम्पाकुलस्य सकलस्य न पक्षपातः।

एतादृशीमिति। अथ सरस्वती अरविन्दविकासिनः कमलविकासकरा रश्मयः किरणा यस्य देवस्य रवेः दिक्पतिं दक्षिणदिशः पतिं सूनुं अन्येषां पुत्राणां दिक्पतित्वाभावाद्यमं उद्दिश्य उदीरयितुं वक्तुं प्रचक्रे आरेभे। किं कृत्वा। एतादृशीमुक्तसंशयास्पदीभूतां तथा नलनिश्चयाभावात् सन्देहः। तुल्यरूपदर्शनाद्देवयुक्तिचातुर्याद्वा चित्रं। नलनिश्चयाभावान्नलप्राप्तिविघ्नात्त्रासः तैः संशयाश्चर्यत्रासैः चिन्तिता नानाविधाकृता चित्तवृत्तिर्यस्याः सा। एवंविधां तां भैमीं विलोक्य। चित्तभित्तिमिति पाठे चित्तमेव भित्तिर्यस्याः। भित्तौ हि चित्रं युक्तमित्यर्थः। एपिव दृश्यत इत्यर्थः। एतादृशीत्यदादिषु दृश इति कञ् (पा० ३।२।६०)। आसर्वनाम्न इत्यात्वे (पा० ६।३।९१)। टिड्ढेति ङीपि (पा० ४।१।१५)। एतादृशीति सिद्धं॥ १५॥

दण्डमिति। अहो सम्बोधने अयं यमो दण्डं स्वायुधं बिभर्त्ति तस्मात्तस्मात्कारणात् पुराणादिदर्शनेन कम्पाकुलस्य पाप-

स्वर्वैद्ययोरपि मदव्ययदायिनीभि-
रेतस्य रुग्भिरमरः खलु कश्चिदस्ति ॥ १६ ॥

भीरोः सकलस्य जगतो भुवनस्य पङ्कपातो बुडनं न स्यात् भवेत्। पङ्के महारौरवादौ नरके वा एतद्भयात् पापं कोऽपि न करोतीत्यर्थः। अहो आश्चर्यं। अन्यो यष्टिं धारयति अन्यस्य च कम्पमानस्य कर्दमपातो न भवतीत्यसङ्गतिः। तथा चिकित्सा-सामर्थ्ययोः स्वर्वैद्ययोर्दस्रयोरपि मदव्ययदायिनीभिः गर्व्वचयं कुर्व्वाणाभिरेतस्य रुग्भिः प्राणिकर्म्मविपाकदर्शनेनानेन प्रेरि-ताभिः पीडाभिः न म्रियत इत्यमरः कश्चित् किमस्ति अपि तु न कोऽप्यस्ति। कर्म्मजरोगाणां ताभ्यामप्यचिकित्स्यत्वादित्यर्थः। स्वर्वैद्ययोरपि नाम रुजापनयनसामर्थ्यासम्भवसूचनार्थं॥ नलपक्षे अयं नलो दण्डं शासनं यतो बिभर्त्ति ततः शासनभयात्क-म्पाकुलस्य सकलस्यापि लोकस्य पङ्कपातो न भवेत् पूर्व्ववदे-तस्माद्भयात् अयं दण्डं चतुरङ्गसैन्यं बिभर्त्ति ततः शत्रुभयात् कम्पाकुलस्य लोकस्य पङ्कपातः दुःखपातो न भवेत् सैन्येनैव वैरिणां निहतत्वाल्लोकस्य दुःखनाश इति वा। सौन्दर्य्येण प्रसि-द्धयोर्नासत्ययोरपि गर्व्वचयकारिणीभिरस्य रुग्भिःकायकान्ति-भिरुपलक्षितोऽस्य देवोऽपि कश्चिदस्ति किमु अपि तु नास्ति। देवेषु मध्ये दस्रावेव सुन्दरतमौ तावप्यनेन जितौ यतः। ये तत्-त्समीपस्थाः रमणीयास्त एतद्रूपधारणादेव न तु स्वभावेने-त्यर्थः। पङ्कोऽस्त्री शादकर्द्दमौ। अस्त्री पङ्कं पुमान् पाप्मा। रुः

मित्रप्रियोपजननं प्रति हेतुरस्य
सञ्ज्ञा श्रुताऽसुहृदयं न जनस्य कस्य।
छायेदृगस्य च न कुत्रचिदध्यगामि
तप्तं यमेन नियमेन तपोऽमुनैव ॥ १७ ॥

प्रभारुग्रुचित्विड्भा इत्यमरः। स्त्रीरुग्रुजाद्युतिः शोभा इति मेदिनी। दायिनीभिरिति ताच्छील्ये णिनिः ॥ १६ ॥

मित्रेति। अस्य यमस्योपजननं उत्पत्तिम्प्रति सञ्ज्ञा नाम्नी मित्रप्रिया सूर्यपत्नी हेतुर्निमित्तं श्रुता आकर्णिता। छायानाम्नी तु कुत्रचित् कुत्रापि पुराणादौ ईदृगस्योत्पत्तिं प्रति हेतुर्नाध्यगामि नाश्रावि। किन्तु शनैश्चरस्यैवेत्यर्थः। यमो यमी श्राद्धदेवः सञ्ज्ञायास्तनयास्त्रय इति पुराणं। अयं यमः कस्य जनस्य असुहृत्प्राणहर्त्ता न अपि तु सर्व्वस्यापि प्राणहर्त्ता। अमुना यमेनैव नियमेन नक्तोपवासादिव्रतेन कृत्वा तपस्तप्तं धर्म्मः कृतः। अत एवास्य पुत्रत्वं धर्म्मराजत्वं चेत्यर्थः ॥ नलपक्षे अस्य नलस्य सञ्ज्ञा नाम श्रुता सती मित्रप्रियस्य सुहृदिष्टस्योपजननं प्रति उत्पादनं प्रति हेतुः। अस्य सञ्ज्ञा सुहृदिष्टजननं प्रति हेतुः। श्रुता ख्यातेत्यर्थ इति वा पुण्यश्लोकत्वात्। अयं कस्य सुहृन्मित्रं न अपि तु सम्यक्परिपालनादुपकारित्वादा सर्व्वस्यापि सुहृदेव। ईदृक् प्रत्यक्षे दृश्या अस्य छाया कायकान्तिः कुत्रापि नरसुरोरगेषु नाध्यगामि न दृष्टा। सुन्दरतरोऽयमित्यर्थः। छाया रीतिः लोकपालनमित्यर्थ इति वा। अत्रैव जगत्पालनं कोऽपि

किञ्च प्रभावनमिताखिलराजतेजा
देवः पिताऽम्बरमणी रमणीयमूर्त्तिः।

न करोतीत्यर्थः। अमुना नक्तेनैव यमेन ब्रह्मचर्यादिनियमेन नक्तादिभनेन च तपस्तप्तं त्वदर्थमिति शेषः। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः।तपश्चान्द्रायणादौ स्याद्धर्मे इत्यादि विश्वः। अध्यगामीति। इङो गाङादेशे कर्मणि चिण्। यमेनेति। पक्षे हेतौ तृतीया॥ १७॥

किञ्चेति। केवलं मञ्जास्य जननीत्येव न। किञ्चान्यच्च प्रभया दीप्त्याऽवनमितं तिरस्कृतं अखिलं राजश्चन्द्रस्य तेजो येन सः।तथा रमणीयमूर्त्तिः अम्बरमणिः सूर्य्यः देवोऽस्य पिता। अस्य यमस्य उत्क्रान्तिदा नामिका अथ च मरणदा शक्तिरायुधविशेषः कमनु लक्षीकृत्य न प्रतिभाति समर्था न भवति अपि तु सर्व्वमनु समर्थैव।परेष्वन्येषु जनेषु गदान् रोगान्नियोक्तुः प्रेरयितुरस्य कृष्णत्वं श्यामत्वञ्च परपीडाजननेनापयश इत्यर्थः। अस्य कृष्णत्वं लौहत्वं लोहवत्कठिनान्तःकरणत्वमित्यर्थं इति वा॥ नलपक्षे प्रभावेन पराक्रमेण नमितसकलभूपप्रतापः।अम्बरमणिः सूर्य्यः इः कामस्तद्वद्रमणीयमूर्त्तिः देवो राजा वीरसेनोऽस्य पिता। देवो विजिगीषुरिति वा। महाकुलीनत्वमस्य सूचितं। राज इन्द्रस्य वा प्रभाया वनेन भजनया समूहेन तेजःसहेन कृत्वा मितमल्पीकृतमखिलभूपतेजो येनेति वा। अम्बरमणीभिर्वस्त्ररत्नैः कृत्वा रमणीयमूर्त्तिरिति वा। मणीशब्द ईबन्तोऽपि अस्तीति सन्धानं।.रमणीनां स्त्रीणां रमणयोग्या मूर्त्तिर्यस्येति

उत्क्रान्तिदा न कमनु प्रतिभाति शक्तिः
कृष्णत्वमस्य च परेषु गदान् नियोक्तुः ॥ १८ ॥
एकः प्रभावमयमेति परेतराजौ
तज्जीवितेशधियमत्र निधेहि * मुग्धे।

वा। अस्य शक्तिरायुधविशेषः कं वैरिणमनु उत्क्रान्तिदा मरणदा न भवति। अस्य शक्तिः सामर्थ्यं कं यममनु उत्क्रान्तिदा मरणप्रदा न प्रतिभाति अपि तु सम्भाव्यत एव। यमादन्येषां भयं तस्याप्यस्माद्भयं शूरत्वातिशयो द्योत्यते इति वा। तथा शत्रुषु गदां शस्त्रविशेषं प्रयोक्तुरस्य कृष्णत्वं देवकीपुत्रत्वं। गदायुद्धप्रावीण्याच्छ्रीकृष्णसमानत्वमित्यर्थ इति वा। अस्य राज्ञः परा उत्कृष्टा इषुसम्बन्धिनो गदाः रोगाः दुःसहवाणजनिताः पीडा इति यावत्। तान् अर्थाद्वैरिषु प्रयोक्तुरस्य कृष्णत्वमर्ज्जुनत्वं च। वाणयुद्धप्रावीण्यादर्ज्जुनसमानोऽयमित्यर्थ इति वा। राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः। को ब्रह्मात्मनि लोकेषु शमने सर्वनाम्नि च। शक्तिर्वलप्रभावादौ शक्तिः प्रहरणान्तरे। इत्यादि विश्वः ॥ १८ ॥

एक इति। अयमेकः परेताः प्रेताः तेषां राजौ पङ्क्तौ विषये प्रभावं सामर्थ्यमेति। तत्तस्मादत्रास्मिन् जीवितेशधियं प्राणेशबुद्धिं विधेहि कुरु हे मुग्धे उभयोर्भेदमजानाने सङ्ग्रामगर्भाणानत्वात् दक्षपक्षोदरस्याश्विभ्रातुर्यमस्य यमस्य भूतेषु प्राणिषु

* निधत्स्वेति पाठान्तरं।

भूतेषु यस्य खलु भूरि यमस्य वश्य-
भावं समाश्रयति दक्षसचोदरस्य ॥ १८ ॥
गुम्फो गिरां शमननैषधयोः समानः
शङ्कामनेकनलदर्शनजातशङ्के ।

भूरि प्रचुरं भूतं वश्यभावमधीनत्वं समाश्रयति प्राप्नोति । प्राणिषु मध्ये प्रचुरं भूतं यस्य यमस्य वशि वशवर्त्ति सत् अभावं विनाशमेवाश्रयतीति वा । मुमुक्षवः कतिपये तदपेक्षया भूतानां प्राचुर्यं खलु निश्चये सर्व्वप्राणिनाश एतदधीन इति निश्चये-नायमन्तक इति किन्न जानासीत्यर्थः ॥ नलपक्षे पराश्च इतरे आत्मीयाश्च तेषामाजिः परान्दृष्टांस्तेजस्विनोऽपि इतरे यन्ति क्षोदीयसः कुर्व्वन्ति ये तेषामाजिरिति वा । परेरत्कृष्टा या इतरेषां वैरिणामाजिरिति वा । तस्यां अयं नलः एक एव प्रभावमेति । तथा भूतेषु पृथिव्यप्तेजोवाय्वाकाशेषु मध्ये इयमि-त्यभिनयेन सकला भूः सौन्दर्य्येण दस्रसचोदरस्य अश्विनुल्यस्य यस्यास्य वश्यत्वमाश्रयति । तस्मान्मुग्धे सुन्दरि अस्मिन् प्राणेश-बुद्धिं निधेहि । तथा समा सश्रीका त्वं यस्य एतद्वरणे प्रयत्नं कुरु । एवंविधः शूरः प्रभुशक्तियुक्तः सुन्दरश्च कोऽपि नास्ती-त्येनमेव वृणीष्वेति भावः । इतरशब्दात् पक्षे तत्करोतीति णिच् पचाद्यचि णिलोपः ॥ १८ ॥

गुम्फ इति । शमननैषधयोः यमनलयोर्विषये समानः तुल्यः पूर्व्वोक्तः गिरां गुम्फः देव्या वाणीसन्दर्भः विदर्भवसु-

चित्ते विदर्भवसुधाधिपतेः सुतायाः
यन्निर्म्ममे खलु तदेष पिपेष पिष्टम् ॥ २० ॥
तत्रापि तत्रभवती म्नसंशयालो-
रालोक्य सा विधिनिषेधनिवृत्तिमस्याः।
पाथःपतिम्प्रति धृताभिमुखाङ्गुलीक-
पाणिः क्रमोचितमुपाक्रमताभिधातुं ॥ २१ ॥

धाधिपतेः सुतायाः भैम्याश्चित्ते यच्छङ्कां संशयं निर्ममे तत् खलु निश्चितं एष पिष्टं पिपेष चूर्णमेव चूर्णितवान् इति दृष्टान्त इत्यर्थः। चूर्णचूर्णनं यथा वृथा तथेदमपीत्यर्थः। किम्भूते चित्ते। अनेकेषां नलानां दर्शनेन जातशङ्के उद्भूतसंशये। गुम्फः स्याद्गुम्फने गुच्छे इति विश्वः ॥ २० ॥

तत्रेति। तत्रभवती पूज्या सा सरस्वती क्रमोचितं क्रमप्राप्तं परिपाटीयोग्यं यथा तथा वाभिधातुं वक्तुमुपाक्रमत। किं कृत्वा। तत्र यमेऽपि भ्रममत्यर्थं संशयालोः सन्दिहानाया अस्या भैम्या विधिनिषेधाभ्यां सकाशान्निवृत्तिं प्रवृत्तिनिवृत्त्योरभावं आलोक्य। किंभूता। पाथसां पयसां पतिं प्रभुं वरुणं प्रति धृतः अवस्थापितः अभिमुखाङ्गुलीकः सम्मुखकरशाखः पाणिर्यया। तत्रभवच्छब्दः पूज्यार्थः। अङ्गुलीकेति। नद्यृतश्चेति कप् (पा० ५। ४।१५३)। उपाक्रमत। प्रोपाभ्यामिति तङ् (पा० १। ३। ३४)। अभिधातुं। अभियोगे शकधृषेति तुमुन् (पा० ३।४। ६५) ॥ २१ ॥

या सर्व्वतोमुखतया व्यवतिष्ठमाना
यादोरणैर्ज्जयति नैकविदारका या।

येति। एतस्य भूरितरवारिनिधयः समुद्रा यस्यां सा चमूर्ज्जयति सर्व्वोत्कर्षेण वर्त्तते। सा का। यस्याः परतो रोधः परं तीरं प्रतीतिविषयो दृग्गोचरो न। सेनायां समुद्राणामपि मिलितत्वात् परं पारं न दृश्यत इत्यर्थः। सा का। या सर्व्वतोमुखस्य जलस्य भावेन व्यवतिष्ठमाना व्यवस्थिता जलमयीत्यर्थः। या यादोरणैर्जलजन्तुशब्दैस्तत्सङ्ग्रामैर्वा उपलचिता। तथा या नैकविदारका ऽनेककूपका। नैकान् विदारयति नैकविदारः कस्योदकस्याय आगमनं यस्यां सा। स्ववेगेन सर्व्वनाशकरमुदकं यस्यामस्तीत्यर्थ इति वा। या नैकविदारं कं यस्यामेवंभूता वा। यस्याः परतो वैरिणो यस्माद्वा रोधः आवरणं न ज्ञानगोचरं। निम्नाभिमुखस्य पयसः कस्यापि निवारयितुमशक्यत्वात् इति वा। यस्याः परप्रदेशात् प्रतिसम्मुखं इतिनिर्गमनं तद्गोचरो नरो मनुष्यः अधोऽधस्तादेव प्रवाहवेगेनाध एव गच्छतीति भाव इति वा॥ नलपचे एतस्य भूरीणां तरवारीणां एकधारपतनखड्गानां निधिः स्थानं सा चमूर्विजयते। या सर्व्वस्मादपि लोकात् सर्व्वसेनाभ्यो वा मुखतया श्रेष्ठतया व्यवतिष्ठते। मुखशब्दो लचणया श्रेष्ठवाचकः। सर्व्वतः सर्व्वदिचु मुखं यस्यास्तद्भावेन व्यवतिष्ठत इति वा। अनेनानेकदिग्व्यापित्वात् सेनायाः प्राचुर्य्यं सूच्यते। या दोरणैर्बाहुयुद्धैर्भुजास्फालनशब्दैर्वोपलचिता।

एतस्य भूरितरवारिनिधिश्चमूः सा
यस्याः प्रतीतिविषयः परतो न रोधः ॥२२॥
नासीरसीमनि घनध्वनिरस्य भूयान्
कुम्भीरवान् समकरः सचदानवारिः।

दोरणैर्जयतीति वा। यादोरणैरमुष्य सङ्ग्रामैः सिंहनादैर्वा जयति सेनाजयेनास्य व्यपदेशो न किन्तु स्वयमेवासौ युद्धं कुरुते तेनोभयथा नलवर्णने तात्पर्यं। तथा नैके विदारका योद्धारो यस्यां सा। दोरणैः कृत्वा नैकविदारः कायो यस्याः सेति वा। यस्याः परस्माच्छत्रोः सकाशाद्रोधः आवरणं न ज्ञानगोचरः केनापि रोद्धुं न शक्यत इत्यर्थः। परस्मात् प्रतीतिविषयः सम्मुखमागच्छन्नरो मनुष्योऽधो हीन एवेति वा। पुष्करं सर्व्वतो मुखं। कूपकास्तु विदारकाः। कायो देहः। कुलं रोधस्तेत्यमरः। व्यवतिष्ठमानेति। समवप्रविभ्यस्थ इति तङ् (पा० १।३।२२)। अत्र ग्रन्थभूयस्त्वभयात् व्याकरणं न लिख्यते ॥ २२ ॥

नासीरेति। नदीनामिनः स्वामी समुद्रः नासीरसीमनि अग्रमयसेनामुखविभागे स्थितः सन् करणभावं साधकतमत्वं इतैः गतैः रत्नैर्मुक्तादिभिरत्यन्तमतिशयेनास्य वरुणस्य सुखमातनोति उत्पादयति। सुखजनने रत्नानि करणभूतानि। स्वामिनेऽस्मै रत्नानि दत्त्वा प्रीतिमुत्पादयतीत्यर्थः। करणे देहे भावं सत्त्वमितैः प्राप्तैः स्वदेहोत्पन्नैरित्यर्थ इति वा। अलङ्करणभूतत्वादवण्दिहमितैरिति वा। एवंविधैरत्नैरुपलक्षितो वा। अलङ्करणभावमलङ्करणत्वं गतैरत एव तैः सुखमातनोतीति वा।

उत्पद्मकाननसखः सुखमातनोति
रत्नैरलङ्करणभावमितैर्न दीनः ॥ २३ ॥
सस्यन्दनैः प्रवहणैः प्रतिकूलपातं
का वाहिनी न तनुते पुनरस्य नाम ।

किम्भूतो नदीनः। घनध्वनिः निविडशब्दः। तथा भूयान् प्रचुरतरः। दीर्घपरिमाणत्वात् सत्त्वसङ्कुलत्वाद्वा। तथा कुम्भीरा नक्रास्तद्वान्। मकरा मत्स्यविशेषास्तद्युक्तः। तथा सद्दानवारिः पुण्डरीकाद्ययुक्तः। उच्छब्द उद्गतार्थः। उद्गतानि विकसितानि पद्मानि येषु तानि काननानि तेषां सखा तद्युक्त इत्यर्थः। उत्कृष्टा पद्मा लक्ष्मीर्येषामेवंविधैः काननैर्युक्त इति वा। उत्कृष्टा पद्मा लक्ष्मीः स्वकन्या यस्मिन् स चासौ वनसखश्चेति वा। श्रीविष्णोस्तत्र विद्यमानत्वात्सश्रीयुक्तत्वं। नासीरसीमपदेन तीरं लक्ष्यते। तत्र निविडध्वनिरिति वा। तरङ्गस्य तीरे प्रतिघातात्॥ नलपक्षे भूयान् मङ्गतरः। कुम्भी गजः नासीरमुखे सेनामुखविभागे सुखमनायासेन रवान् शब्दान् विस्तारयति। किम्भूतः कुम्भी। घनवन्मेघवत् ध्वनिर्यस्य। तथा समः आनुपूर्व्यवृत्तः सलक्ष्मीको वा करः शुण्डादण्डो यस्य। तथा दानवारिणा मदजलेन सहितः। तथा उद्गतानि पद्मकानि कुम्भस्थले पद्मविन्दुजालकानि यस्मिन्नेवंविधं यदाननं मुखं तद्युक्तः। तथा अलङ्कारत्वं प्राप्तै रत्नैर्दीनो न किन्तु सम्भृतः॥ सेनामुखं तु नासीरं। नक्रस्तु कुम्भीरः। पद्मकं विन्दुजालकमित्यमरः ॥ २३ ॥

सेति। हे विलासवति भैमि नाम शिरस्यालने। अस्य

तस्या विलासवति कर्कशताश्रिता या
ब्रूमः कथं बहुतया सिकता वयन्ताः ॥ २४ ॥

वरुणस्य का नाम वाहिनी नदी सस्यन्दनैः सवेगैः निर्झरोदकसहितैर्वा प्रवहणैः प्रवाहैः कृत्वा कूलं तीरं प्रति अनु पातं गमनं न तनुते अपि तु सर्व्वापि करोति। वयं तस्यास्ताः सिकता वालुकाः बहुतया प्रचुरत्वेन कथं केन प्रकारेण ब्रूमः कथयामः। अतिबहुत्वेनैयत्तया वक्तुं न शक्यत इत्यर्थः। ताः काः। याः कर्कशतां काठिन्यं श्रिताः। कर्का जलजन्तुविशेषस्तच्छतैराश्रिता इति वा॥ नलपक्षे अस्य नलस्य का नाम वाहिनी सेना सस्यन्दनैः सरथैः सशक्टैर्वाहनैरश्वादिभिः कृत्वा प्रतिकूला वैरिणस्तान् प्रति पातं गमनं न करोति अपि तु चतुर्विधापि सेना करोत्येव। प्रतिकूलानां वैरिणां पातं हननमिति वा। का सेनाऽस्य नाम ख्यातिं प्रतिकूलांश्छत्रून् पातयित्वा शत्रुमात्रं हत्वा न तनुते। नास्य ख्यातिं करोतीत्यर्थ इति वा। सवेगैः क्रीडारथैः कृत्वा वैरिणं प्रति गमनं करोतीति वा। अनेन सेनाया निर्भयत्वं। युद्धेऽपि क्रीडारथारोहणात्। कर्काः श्वेताश्वास्तेषां शतैराश्रिताया-स्तस्याः बहुतया बाहुल्येन ता भूयस्त्वेन प्रसिद्धाः वालुकाः वयं किं ब्रूमः। ताभ्योऽपि सेना प्रचुरतरेत्यर्थः। तस्याः सकाशात् ता वालुका बहुतया किं ब्रूमः। वालुकाः कथमपि संख्यातुं शक्यन्ते सा तु न कथञ्चिदित्यर्थ इति वा। असिः प्रहरणमेषां ते आसिकास्तेषां भावः आसिकता याः श्वेताश्वशताधिरूढाः ता आसिकता असिप्रहरणाम् पुरुषाम् इति यावत्। ताम् बहुतया

शोणं पदप्रणयिनं गुणमस्य पश्य
किञ्चास्य सेवनपरैव सरस्वती सा ।

किं वर्णयामः। अतिवक्रत्वेन वक्तुं न शक्यन्त इत्यर्थः। वहन् तयन्ते गच्छन्ति वा रचन्ति वा ये ते वक्रतयास्ते च ते आमिकाश्च तेषां भावानिति वा। वह्वोऽवयवा येषां ते वक्रतया वक्रमहा एवंविधा आमिका यस्यां तस्या भावानिति वा । कर्कः शुक्लहयः। सांयात्रिकः पोतवणिक् इत्यमरः ॥ पोतः प्रवहणं स्मृतमिति हलायुधः। प्रवहणैः। कृत्यच इति णत्वं (पा० ८ । ४ । २८)। प्रतिकूलपातं ॥ पत्ते द्रव्यवीप्सायां । विशि पतीत्यादिना णमुल् (पा० ३ । ४ । ५६)। तृतीयाप्रभृतीनीति पाक्षिकः समासः (पा० २ । २ । २१)। आमिकाः। अमिः प्रहरणमेषां। प्रहरणमिति ठक् (पा० ४ । ४ । ५७)। अमिभिर्जयन्तीत्यामिकाः। तेन दीव्यतीति ठक् (पा० ४ । ४ । २) ॥ २४ ॥

शोणमिति। हे सुभगे सौभाग्यवति भैमि त्वं एनं भुवनस्य जलस्याधिनाथं वरुणं भजस्व वृणीष्व। जलपतित्वमेवाह। त्वं गुणप्रधानमेवकं शोणं नाम नदमस्य पदप्रणयिनं चरणानुरागिणं पश्य। किञ्चेत्यधिकोक्तौ। शोणोऽस्य चरणप्रणयीति किं वक्तव्यं सा प्रसिद्धा सरस्वती नदी अस्य सेवनपरैव चरणसंवाहनादिपरैव। पूर्वोक्तापरितोषे वाशब्दः। के कमलस्य जलस्य आशयाः आधाराः समुद्रादिपद्मान्ताः पद्माकरा वा तमिमं न भजन्ति सेवन्ते अपि तु शोणादयः सर्वेऽप्यस्यानुचरास्तस्य शोणाद्यनुचरन्ते

एनं भजस्व सुभग भुवनाधिनाथं
के वा भजन्ति तमिमं कमलाशया न ॥ २५ ॥
शङ्कालताततिमनेकनलावलम्बां
वाणी न वर्द्धयतु तावदभेदिकेयं।

का कथा। तस्मात् सलिलपतिरयमित्यर्थः। कमलाशया जलाभिलाषेण के वा लोका इमं न भजन्ति सेवन्ते स्तुवन्ति इत्यर्थ इति वा। शोणादीनां तत्तदभिमानिन्यो देवता लक्ष्यन्ते। अतस्तेषां सेवकत्वं युज्यते॥ नलपक्षे त्वं जगत्पतिमेनं नलं पतित्वेन स्वीकुरु। स्वीकारयोग्यत्वमेव द्रढयति। त्वं शोणं रक्तं गुणमस्य पदप्रणयिनं पश्य तमिमं कमलायाः सम्पदः आशया अभिलाषेण वा के लोका न सेवन्ते अपि तु धनाभिलाषेण सर्व्वेऽपि सेवन्त इत्यर्थः। वाऽप्यर्थे। कमलाशया लक्ष्मीनिधयो धनिका अपि लोकास्तमिमं न भजन्त्यपि तु भजन्त्येवेति वा। अत्र प्रथमद्वितीयतृतीयविशेषणैः क्रमेण सौन्दर्य्यकलाकौशलौदार्य्याणि द्योत्यन्ते। शोणो हिरण्यबाहुः स्यात्। शोणः कोकनदच्छविः। जीवनं भुवनं वनं। विष्टपं भुवनं जगत्। सलिलं कमलं जलं। कमला श्रीर्हरिप्रियेत्यमरः॥ आशया। अधिकरणे, शेतेरित्यच् (पा० ३।२।१५)॥२५॥

शङ्केति। इयं पूर्व्वोक्ता वाणी भीमोद्भवां प्रति सचीकृत्य भैम्या इति यावत्। अनेकनलावलम्बां नानानैषधविषयां शङ्कालताततिं संशयवल्लीपरम्परां न वर्द्धयतु तावत् न पूरयतु तावत् अपि तु पूरयत्येव। नवा वाद्धिर्यस्याः सा नवर्द्धिः नवर्द्धि

भीमोद्भवां प्रति नले च जलेश्वरे च
तुल्यं तथापि यदवर्द्धयदत्र चित्रं ॥ २६ ॥

करोतु नवर्द्धयतु। भैमीं प्रति सन्देहपरम्परां न्यूनसमृद्धिं अति-वक्रीकरोत्वित्यर्थ इति वा। तावच्छब्दोऽनुमतावधारणे वा। यतो अभेदिका विशेषप्रतिपादनमकुर्व्वती। समानधर्म्मदर्शनाद्धि संशय उपचीयते विशिष्टधर्म्मदर्शनाद् व्यावर्त्तेत इत्यर्थः। यद्यप्यत्र विषये चित्रं नास्ति तथापि नले जलेश्वरे च तुल्यमेककालं यत्संशयवशीपरम्परां अवर्द्धयत् पूरयति स्म अत्र विषये चित्र-माश्चर्य्यं। न हि विषयस्यैव सन्दिहानत्वमुपपद्यते। यतो लोके दूर-स्थिते पुरुषे पुरुषत्वं स्थाणुत्वं वाऽनुपलभ्योर्द्धत्वमात्रं स्थाणुसाध-र्म्यमुपलभ्य तटस्थः स्थाणुर्वा पुरुषो वेति सन्दिग्धे न तु पुरुष एवा-त्मानमूर्द्धमवलोक्याहं वा स्थाणुर्वेति। तस्मान्नलजलेश्वरविषयो भैम्याः संशयो युक्तः। विषयभूतयोरेव तत्संशये महदाश्चर्य्यमिति भावः। विरोधपरिहारस्तु तुल्यकालं यथाक्रमं नले शं सुखं जलेश्वरे च कालतातिं कालिमातिशयं पूरयति स्म। तथा हि यदि देव्येनं नल एवायमित्यकथयिष्यत् तदा मय्यनुरक्ता भैमी मामकश्मेणैनमेवावरिष्यत्। तत्तु देव्या न कृतं वरुणश्लेषेण वर्णि-तत्वादिति। नले सुखं जनयितव्ये यदि वाणी मां नल एवायमि-त्यकथयिष्यत्तदा नलबुद्ध्या भैमी मामेवावरिष्यत् तत्तु तया न कृतं मच्छ्रूपेण वर्णितत्वादिति विषादाद्वरुणे कालिमाऽतिशयितो जनितः। कालतातिरप्यनेकनलावलम्बिनी चतुर्णामप्यवरणात्

बालां विलोक्य विबुधैरपि मायिभिस्तै-
रच्छिन्नितामियमलीकनलोत्करस्थैः ।

अथ च मत्सन्देहाद्वरणं भजेन्नलसन्देहान्मां भजेदिति क्रमेण नलवरणयोः संशयपरम्परां पूरयति स्म। अनेकनलावलम्बनां भैम्याः संशयवल्लीपरम्परां न वर्द्धयतु न छिनत्तु वर्द्धकपूर्त्तिच्छिदोर्यतो विशेषमप्रतिपादयन्ती । या हि छेदासमर्था छुरिका साऽनेकच्छणविशेषनलालम्बनां लतातर्तिं न छिनत्तीति नाश्चर्य्यं। तथापि भैमीं प्रति नले च जलेश्वरे च संशयवल्लीपरम्परामेककालमेव यदच्छिनत्तच्चित्रम्।या हि न छिनत्तीति सा छिनत्तीति चित्रमिति भावः । मत्सन्देहादेनं भैमी भजेदिति नलभ्रान्तिः। नलसन्देहान्मां भजेदिति वरुणभ्रान्तिः।वरुणवाचिशब्दसद्भावात् । श्लेषवक्रोक्त्यादिज्ञानचतुरा भैमी वरुणं न वरिष्यतीति निश्चयेन नलभ्रमनाशः । नलेऽनुरक्ता भैमी मत्प्रतिपादकशब्दसद्भावान् मां न वरिष्यतीति निश्चयेन वरुणभ्रमनाश इति वा विशेषमप्रतिपादयन्ती वाणी सरस्वतीति।वा देव्या नामग्राहमर्थ वर्णितः । अतो मां वरिष्यति न वेति वरुणस्य सन्देहो गतः। इदानीमवशिष्टोऽहमेवमथ्येवंस्थेयमनुरक्तेति मां वरिष्यति न वेति नलसन्देहो गत इति भाव इति वा। इत्यादिव्याख्याविशेषो विचार्य्याङ्गीकरणीयः ॥ २६ ॥

बालामिति । इयं भगवती सरस्वती निषधाधिराजमुद्दिश्य तां बालां भैमीमाह स्म उवाच । किं कृत्वा। तां भैमीं अलीकन-

आह स्म तां भगवती निषधाधिराजं
निर्दिश्य राजपरिषत्परिवेषभाजम् ॥ २७ ॥
अत्याजिलब्धविजयप्रसरस्त्वया
किं विज्ञायते रुचिपदं न महीमहेन्द्रः ।

लोकतखैरसत्यनैषधीकृतात्मभिः मायिभिश्छलपरैरपि विबुधैर्देवैरछद्मितामप्रतारितां विलोक्य। किम्भूतं नलं। राज्ञां परिषत्सभा तस्याः परि समीपे वेषं शृङ्गारं भजति। परिशेषमिति पाठे परिशेष उपान्तः। बालामपि विबुधैरपि अपिरुभयत्र सम्बध्यते। बाला हि प्रतार्यते इयं बालापि न प्रतारिता तेष्वेकस्याप्यवरणात्। ये च विबुधाः ज्ञातारः ते मायिनः खलाः कथं मायिभिरपि बाला न प्रतारितेत्याश्चर्यं। राजपरिषदः परिवेषरूपणात् नलस्य चन्द्रत्वं ध्वनितं। परिषत्। सदिरप्रतेरिति षत्वम् (पा० ८।३।६६।) ॥२७॥

अत्याजीति। त्वया सङ्घा महेन्द्रो नलः किं न विज्ञायतेऽपि तु विशेषेणेन्द्रादिभ्यो भेदेन सत्यत्वेन जानीहीत्यर्थः। किम्भूतः। अतिशयेनाजौ सङ्ग्रामे अतिशयिते वा आजौ लब्धः प्राप्तो विजयस्यारिपराभवनस्य प्रसरो बाहुल्यं येन। तथा रुचेरनुरागस्य कान्तेर्वा पदं स्थानं। तथासौ अर्थिनमर्थिनं प्रतीति प्रत्यर्थि या दानवशता दानपरता दाने अर्थिनं प्रत्येव वा वशतया जितेन्द्रियतया वा आहिता कृता या चेष्टा याचकानुकूलव्यापारस्तेन परदारदर्शनादिनिवृत्तिव्यापारेण च जीर्णुतवाहन-

प्रत्यर्थिदानवशताहितचेष्टयासौ
जीमूतवाहनधियं न करोति कस्य ॥ २८ ॥

स्वार्थिहेतोः प्राणानपि तृणवद्ददता राजविशेषस्य धियं बुद्धिं दानातिशयेनार्थिपरतन्त्रतया च जितेन्द्रियतया च किमयं जीमूतवाहनधियं कस्य न करोति दानशूरत्वादिचयमस्य सूचितं। प्रत्यर्थिनो वैरिणो घ्नन्ति प्रत्यर्थिदा अनाः प्राणाः येषां ते अतिशूरास्ते वशा अधीना यस्य तस्य भावस्तत्ता तया हृता कृता या चेष्टा तया शत्रुवशीकरणव्यापारेणेन्द्रबुद्धिं कस्य न करोति अपि तु सर्व्वस्यापि करोति। इन्द्रो यथा शत्रून् करोति तथायमपीति वा ॥ इन्द्रपक्षे अयं महेन्द्रस्तया किन्न विज्ञायते अपि त्विन्द्रत्वेन निश्चयः।किम्भूतः। अतिशयितः आजिः सङ्ग्रामो यस्य। तथा लब्धो विजयेनार्ज्जुनेन कृता प्रसरो वंशविस्तारो येन ततः कर्मधारयः। प्रसव इति पाठे नलपक्षे जयलाभः। इन्द्रपक्षे लब्धो विजयोऽर्ज्जुनः। विजयत इति विजयो जयो जयन्तो वा प्रसवः पुत्रो येन। रुचिपदं तेजःस्थानं। तथा मघो उत्सववान्। तथायं प्रत्यर्थिदानवानां शतेषु अहिता प्रतिकूला चेष्टा ऽहितस्य शत्रोर्वा चेष्टा शत्रुत्वकृतस्तन्नाशकरो व्यापारस्तेनेन्द्रबुद्धिं कस्य न करोति। अथ चायं महेन्द्रस्तया किमित्यत्याजि केन हेतुना त्यक्तः। अयं न विज्ञायते विज्ञ इवाचरति विज्ञायते एवंभूतो न भवति अपि तु विद्वानेवेत्यर्थः। तथा रुचिपदं कान्तिस्थानं न। तथा मघो नेति। नञ्ग्रहणाया काकु

येनामुना वज्रविगाढसुरेश्वराध्व-
राज्याभिषेकविकसन्महसा बभूवे।

व्याख्येयं। एवंगुणविशिष्टस्य परित्यागे किञ्चिदपि कारणं न पश्याम इति भावः। महेन्द्रस्त्वया विज्ञाय किमित्यत्याजि उचितमेव कृतमित्यर्थः। किम्प्रश्ने सम्भावनायां वा। त्यागे कारणमाह। लक्ष्मी विना पक्षिणा गरुडेनामृतहरणसमये जयस्य प्रसरो विस्तारो यस्य गरुडेन पराजित इत्यर्थः। तथा अरुचिपदं अननुरागस्थानं। तथा न महो उत्सवरहितः सदा दैत्यभयात्। अरुचिस्थानं महेन्द्रस्त्वया किन्न विज्ञायते अपि तु ज्ञात एव। यतोऽत्याजि त्यक्त इति वा। अस्मिन् पक्षे न महीत्यत्र नञः आवृत्तिः। अतिशयितरणे लक्ष्मी विना जयप्रसरो यस्येति वा। विजयस्तु जये पार्थे इत्यमरः। विज्ञायते। उपमानादाचारे कर्त्तुः क्यङ् (पा० ३।१।१०।११)॥२८॥

येनेति। येनामुना नलेन बह्वतिशयेन विगाढः सेवितो सुरेश्वरस्याध्वा मार्गः त्रिलोकीप्रतिपालनलक्षणः येन। तथा राज्ये योऽभिषेको मङ्गलस्नानं तेन कृत्वा विकसन्महो यस्यैवं-विधेन बभूवे जातं। पूर्व्वेण कर्म्मधारयः। वज्रवारं सेवितो देवेन्द्रेण मार्गो लोकपालनप्रकारो यस्येति वा। पश्चात् कर्म्मधारयः। इन्द्रेण लोकपरिपालनमस्माच्छिक्षितमित्यर्थः। नु भैमि अत्र पद्यसु मध्ये स्वयम्वरे नामग्राहं नाम गृहीत्वा एवममुना पूर्व्वोक्तेन प्रकारेण मया उदीरितमुक्तं तं नलमनु लक्षीकृत्य तेन चावर्जनं

आवर्जनं तमनु तेन नु साधु नाम-
ग्राहं मया नलमुदीरितमेवमत्र ॥ २९ ॥
यच्चण्डिमा रणविधिव्यसनश्च तत्त्वं
बुध्वाशयाश्रितममुष्य च दक्षिणत्वं।

पतित्वेनाङ्गीकरणं साधु शुभं। सत्यं नलमेनं सर्व्वथा वृणीष्वेति भावः। वह्निपक्षे येनानेन वह्निनाऽनेकवारं अनुभूतो यः सुरेश्वराध्वरेषु देवेन्द्रयज्ञेषु आज्याभिषेको घृताप्लवस्तेन कृत्वा विकस्वरतेजसा जातं। बहुवारं विगाढं आवर्त्तितं इन्द्र आयाहीत्यादिना आहूतः सुरेश्वरो यत्र तादृशेषु यागेषु आज्याभिषेकस्तेन कृत्वा विकस्वरतेजसा जातमिति वा। ननु भैम्यत्र पञ्चसु मध्ये नाम गृहीत्वा एवं पूर्व्वोक्तप्रकारेण मयोक्तं तमनलमग्निम्प्रति ते तव वर्जनं साधु अपि तु न साधु आ इति खेदे आवर्जनं पतित्वेनाङ्गीकरणं साध्विति वा नु भैमि तमनु ते वर्जनं न साध्विति वा। पूर्व्वार्द्धेन सर्व्वदा परान्नभोजनेनैव परिपुष्टोऽयमिति त्यागः सूचितः। तथा ननु भैमी मया नाम गृहीत्वा कथितं नलान्यमथ च वह्निमनु ते वर्जनं साधु भद्रं। आ ईषं नु भैमि तमनु ते आवर्जनं सामर्थ्येन वर्जनं न साधु अपि तु साध्वेवेति वा। आ आवर्जनं सामस्त्येनाङ्गीकरणं तव न साधु किन्तु वर्जनमेव साध्विति वा। नामग्राहं। द्वितीयायामित्यनुवृत्तौ नाम्या दिशिग्रहोरिति णमुल् (पा॰ ३।४।५८)॥ २८॥

यदिति। चोऽवधारणे यस्य चण्डिमा क्रूरत्वं रणविधौ

सैषा नले सहजरागभरादमुष्मिन्
नात्मानमर्पयितुमर्हसि धर्म्मराजे ॥ ३० ॥

सङ्ग्रामविधाने व्यसनमेव वैरिणां विगतासुकरणमेवेत्यर्थः सर्व्वानपि वैरिणो मारयत्येवेति भावः। रणविधौ व्यसनमिव व्यसनं यस्याऽसौ क्रौर्य्ये यस्य रणकर्मणि व्यसनमिति वा। सैषा त्वं अमुष्य आशयमभिप्रायमाश्रितं मनसि स्थितं दक्षिणत्वं सरलत्वञ्च तत्सर्व्वं बुद्धा ज्ञात्वा पाणिमाश्रितं दानशूरत्वं वा ज्ञात्वा धर्म्मसहिते राजनि धर्म्मेण राजमाने वा अमुष्मिन्नले सहजरागभरात् अकृत्रिमानुरागबाहुल्यादात्मानमर्पयितुं योजयितुं नार्हसि अपि तु योग्या भवस्येवेति वा। सर्व्वथाऽयं वरणीय एव त्वयेति भावः। एतेन शूरत्वदातृत्वधार्म्मिकत्वान्यस्योक्तानि। यमपक्षे हे चण्डि कोपने यस्यामुष्य यमस्य मारणविधिर्व्यसनं प्राणिप्राणहरणशीलत्वं आशया दिशा च दक्षिणत्वमाश्रितं तत्त्वं निरुपाधिरूपं ज्ञात्वा सैषा त्वं अनले नलान्यस्मिन् नलसदृशे चास्मिन् धर्म्मराजे यमेऽकृत्रिमप्रेमरसबाहुल्यात् स्वं योजयितुं अर्हसि। सर्व्वप्राणा एतदधीनाः दक्षिणदिक्पतिश्चायं तस्मादादरणीय इति भावः। चण्डि नलान्यनामधेयश्रवणमात्रात् कोपने सर्व्वदा सर्व्वप्राणिप्राणहरणमेव व्यसनं दोषं अमुष्य दिशा दक्षिणत्वं छलेन सरलत्वमुदारत्वं चाश्रितं न त्वनेनेत्यर्थः। तत्सर्व्वं तात्त्विकं बुद्धा सैषा त्वं नलादन्यस्मिन्नात्मानं योजयितुं योग्या न भवसि अमुष्य मारणविधिर्व्यसनं तत्तत्त्वं सत्यं। दक्षिणत्वं

किन्ते तथा मतिरमुष्य यथाशयः स्यात्
त्वत्पाणिपीडनविनिर्म्मितयेऽनपाशः ।

तु दिगाश्रितं दक्षिणदिक्पतिलाद्दक्षिण इति दैवनिमित्तास्य समाख्या। तदेतद्बुद्धा सैषा त्वमात्मानमर्पयितुं नार्हसीति वा योजना। एवंविधो न वरणीय इति भावः। अन्यच्च कारणं। असहजरागभरात् सहजानुरागवाञ्छाभावाच्चेत्यर्थः। यत्रानुरागो नास्ति स न वरणीय एवेति भावः॥ ३०॥

किमिति। अमुष्य नलस्याशयो अभिप्रायस्तव पाणिपीडनस्य पाणिग्रहणस्य विनिर्म्मितये निष्पत्तये अनपाशः अपगता आशा यस्मादपाशः एवंविधो न भवतीत्यनपाशः तत्परो यथा स्यात् तथा किन्ते मतिः बुद्धिः। किंशब्दः सम्भावनायां। यथाऽयं त्वद्वरणाभिलाषसहितान्तःकरणो भवेत् तथा त्वं प्रायेण करिष्यसीति गम्यत इत्यर्थः। असौ नलो भुवनं जगत् चरिष्णून् चरणशीलान् कान् मानवान् मनुष्यान्नो अवति रक्षति अपि तु सर्व्वानप्ययमेव रक्षति। मानवान् अभिमानी नलः कान् न रक्षतीति वा। तस्मात् अमुत्र नले भवती रता नेति न युक्तं किन्त्वस्मिन् रता भवेत्यर्थः॥ असौ ना पुरुषश्रेष्ठः अतोऽमुत्र भवती रताऽनुरक्तेति किन्न युक्तं अपि तु युक्तमेवेति वा। भवतीति सम्बुद्धिर्वा॥ वरुणपक्षे अमुष्य वरुणस्य आशयः पाशिर्येन प्रकारेण त्वत्पाणिग्रहणनिष्पत्तयेऽनपाशो न विद्यते पाशो यस्मिन्नेवंविधः पाशरहितो यथा भवेत् तथा ते बुद्धिः किं। किं प्रश्ने। पाशं त्यक्त्वा

कान्मानवानवति नो भुवने चरिष्णून्
नासावमुत्र न रता भवतीति युक्तम् ॥ ३१ ॥
श्लोकादिह प्रथमतो हरिणा द्वितीया-
द्धूमध्वजेन शमनेन समं तृतीयात् ।
तुर्यान्नलस्य वरुणेन समानभावं
सा जानती पुनरवादि तया विमुग्धा ॥ ३२ ॥

त्वत्पाणिग्रहणं करिष्यतीत्यर्थः । त्वत्पाणिग्रहणनिष्पत्तये अस्य शयः करःस्यात् पाशो न । त्वत्पाणिग्रहणं शयेन करिष्यति पाशं त्यक्ष्यतीति भयं मायासीरित्यर्थ इति वा । असौ भुवनमुदकं तत्र-सञ्चरणशीलान् मनुष्यान् कान्नो ऽवति अपि तु जलप्रविष्टान् मज्जनादिप्रमादाद्वरुण एव रक्षति उदकसञ्चरणशीलान्मनु-ष्यान्नोऽवति अपि तु रक्षतीति वा । नोऽस्माकं भुवनं पृथ्वीलोकः तत्र सञ्चरणशीलान् मनुष्यान् कादुदकाद्धेतुभूताद्रक्षति सर्वेषां ह्युदकं जीवनमिति वा । अमुत्र भवती न रता नानुरक्तेति न युक्तम् । अमुत्र नरता मनुष्यत्वं न भवतीति युक्तं देवोऽयमित्यर्थ इति वा । अमुत्र नरता नलत्वं न भवतीति युक्तमिति वा । असौ ना च पुरुषो न भवति अतोऽमुत्र भवती रतेति युक्तमपि तु नेति वा । अमुत्र भवती न रता नानुरक्तेति न युक्तं अपि तु युक्तमेवेति वा ॥ ३१ ॥

श्लोकादिति । इह चतुर्षु अत्याजीत्यादिश्लोकेषु मध्ये अत्याजीति प्रथमतः श्लोकात् हरिणेन्द्रेण समं सह येनामुनेति

त्वं यार्थिनी किल नलेन शुभाय तस्याः
क्व स्यान्निजार्पणममुत्र चतुष्टये ते।
इन्द्रानलार्यमतनूजपयःपतीनां
प्राप्यैकरूपमिह संसदि दीप्यमाने॥ ३३॥

द्वितीयात् श्लोकात् धूमध्वजेनाग्निना सह यथाङ्गिमेति तृतीयात् श्लोकात् शमनेन यमेन सह किन्ते इति तुरीयात् श्लोकात् वरुणेन सह तस्य नलस्य समानभावं तुल्यरूपत्वं जानती अत एव विमुग्धा विशेषेण भ्रान्ता सा भैमी तया देव्या वक्ष्यमाणं पुनरवादि॥ ३२॥

त्वमिति। या त्वं किल नले विषये अर्थिनी साभिलाषा तस्यास्ते तव अमुत्र नले निजार्पणं स्वसमर्पणं शुभाय कल्याणाय तुष्ट्यै च सन्तोषाय च क्व न स्यात् कुतो न भवेदपि तु स्यादेव। किंविधे अमुत्र। इन्द्रस्य अनलस्य अर्यमतनूजो यमस्य पयःपतिर्वरुणस्य एतेषां ऐकरूप्यं दिक्पालांशत्वात् सरूपत्वं प्राप्य इहास्यां संसदि सभायां दीप्यमाने। न तस्मादयं वरणीय इत्यर्थः। या त्वं नलेन साभिलाषा तस्यास्तवामुत्र नले निजार्पणं शुभाय क्व कुतः स्यादपि तु न कुतोऽपि। किमित्यत आह। इन्द्राग्नियमवरुणानां चतुष्टये ऐकरूप्यं नलसारूप्यं प्राप्येह सभायां ज्वलति सति एतान् असमानकृत्वा अस्मलवरणं तच्छुभाय न भवेदेव। शापं दास्यन्तीत्यर्थः इति वा। या त्वं नले विषये नार्थिनी एवं वर्तमानमप्येनं सम्यं न इच्छेरपि यतस्तस्यास्ते असमारूपे

देवः पतिर्विदुषि नैष धराजगत्या
निर्णीयते न किमु न व्रियते भवत्या ।

प्राप्येह सभायां प्रकाशमाने इन्द्रादीनां चतुष्टये मध्ये क कस्मिन्निन्द्रेऽग्नौ यमे वरुणे वा निजार्पणं शुभाय स्यात् कथय । मया बहुशः प्रोच्यमानाऽपि यन्नलं न वृणुषे तद्यतेषु सुन्दरतमेषु चतुर्षु मध्ये कं वृणुषे इति कथय इत्यर्थ इति वा । अनेनाचेन्द्रादयो विद्यन्ते न वेति सन्देहो निरस्तः । परन्तु के ते कश्च नल इति विशेषो नोक्तः। अत्रेन्द्रादीनां चतुर्णां त्यागोऽपि प्रतीयते। या त्वं नलेऽर्थिनी तस्यास्ते नलस्वरूपतां प्राप्येह सभायां दीप्यमाने इन्द्रादिषु चतुष्टये निजार्पणं शुभाय क स्यादपि तु न कुतोऽपि । या ह्यन्यत्रानुरक्ता तस्या अन्यत्र निजार्पणे शुभं कथं भवेत्। अन्यच्च नलरूपधारणादेते प्रकाशन्ते न त्वेतेषां सहजसौन्दर्यमस्ति । अतोऽप्येते न वरणीया इति भावः ॥ १३ ॥

देव इति। हे विदुषि श्लेषोक्तिचातुरीपरिज्ञानचतुरे भैमि एष पुरोवर्त्ती देवः स्वर्गे क्रीडाकारी अमरश्च धराजगत्याः भूलोकस्य पतिः पालयिता न किन्तु अर्थात् स्वर्गलोकस्य पतिरिन्द्रः त्वया किमु किमिति न निर्णीयते इन्द्रत्वेन किमिति न निश्चीयतेऽपि तु निश्चेय इत्यर्थः। किमिति वा न व्रियतेऽपि तु वरणीयश्चेत्यर्थः। मया न निश्चित इति कुतोऽवसितं भवत्येति शङ्कायां सत्यां आह। यतो न म्रियत इति हेतुपन्यासः सरस्वत्या कृतः। अयमिन्द्र इति चेत् तव निश्चयः स्यात्तर्हि मनुष्यापे-

नायं नलः खलु तवातिमहा नलाभो
यद्येनमुज्झसि वरः कतरः परस्ते॥ ३४॥

धयाऽधिकलादयं हत एव स्यात्। तत्तु न कृतं अत इन्द्रत्वेन त्वया ऽयं न निश्चित इत्यर्थ इति वा। धराणां पर्व्वतानामजनमाजः क्षेपणं तत्र गतिरुपायभूतो वज्रस्तेन कृत्वाऽयं ना पुरुषः सामर्थ्यवान् वज्रायुधो देव इन्द्रः पतिर्भर्त्ता भर्तृत्वेन किन्न निश्चीयते निश्चितश्चेत् किं वा न व्रियत इति वा। धराजगत्या वज्रस्य पतिरेष देवः त्वया न निश्चीयते इति न अपि तु निश्चित एव ज्ञात एव किमु न व्रियत इति वा। उशब्दः सम्बोधने। धरान् पर्व्वतान् अजति क्षिपतीति धराज इन्द्रः स एव गतिः शरणं यस्याः प्राच्याः दिशः पतिर्देव इन्द्रो न निर्णीयत इति न परं किं न व्रियते इति वा। इन्द्रश्चेन्नल इव कथं दृश्यत इत्यत आह। अयं खलु निश्चयेन नलो न भवति तर्ह नलवदाभातीति नलाभः। अत्र हेतुमाह। यतोऽतिशयितं महस्तेजो यस्य मनुष्यापेक्षया बहुतेजा इत्यर्थः। अत एव वरणीयः। तथा चायं नलस्तृणविशेषस्तत्तुल्योऽसारभूतो न भवति किन्त्वतियत्नोऽतो वरणीय इत्यर्थः। अस्य वरणे निश्चितं अतिशयिता ये महा नन्दनवनक्रीडादय उत्सवाः अनन्तमानः प्राणस्तेषां लाभः प्राप्तिस्तव भविष्यतीति शेषः। इन्द्रवरणे नन्दनवनक्रीडा सुधापानेनामरत्वञ्च त्वया प्राप्यत इत्यर्थः। अतिमहत-चिरकालप्राणनस्य लाभो भविष्यतीति वा। एवंगुणविशिष्टमेनं

अस्य विष्णोर्वा इनं ज्येष्ठं भ्रातृत्वेन स्वामिनमिन्द्रश्चेत् त्यजसि तर्हि परोऽन्यः को वरः अपि तु न कोऽपि। मद्वचनविश्वासादेनमेव वृणीष्वेति भावः। अथच यद्येनं त्यक्ष्यसि तर्हि तव कतरो वरो ऽभीष्टो भवेन्न कोऽपि किन्तु परः प्रचुरेव भवेदित्यर्थः। अथ च यद्येनं त्यजसि तर्हि परोऽन्यः एतदनन्तरः केन वायुना तरति स्रवते प्रसरति केन जलेन तीर्यते शान्तिं प्राप्यते वा यः स कत- रोऽग्निर्वरो भवितेत्यर्थः। अत्रेन्द्रत्यागोऽपि सूचितः। तथाहि एष भूलोकस्य रक्षको देवो राजा नलो नेति निर्णीय निश्चित्य तेन नललाभावलक्षणेनैव कारणेन न म्रियते। किमिति प्रश्नः। युक्तमेवैतत् कृतमिति शेषः। धराज इन्द्र एव गतिर्जीवनोपायो यस्याः प्राच्याः पतिर्देवो न निश्चीयत इति न अपि तु निश्चित एव। न म्रियते किमिति वा इति संशयलेशस्यापि निरासार्थं देवी पुनस्तमाह। अयं लक्ष्मवान् लक्षितानुरञ्जकोऽनिम- हान्नितरां तेजस्वी नलो न भवत्येव यस्तथा निश्चितं तत्त- थ्यमेवेत्यर्थः। किन्तु नलवदाभासत इत्येव नलाकारधारणा- देवास्य भा न तु सहजेत्यर्थः। यद्वा यतोऽयं नलाख्यतृणविशे- षवन्निःसारो भाति तस्मान्नितरां तेजस्वी नलो न भवतीत्यर्थः। यदि चेनं त्यजसि तर्हि ते श्रेष्ठः के सुखे तरतीति कतरः सुख- समुद्ररूपो नलो वरो भवितेत्यर्थः। यद्वा नैषधराजो नल एव गतिर्जीवनोपायो यस्या एवंविधया देव इन्द्रो न निश्चीयते किं अपि तु निश्चित एव। यतः पतिर्न म्रियते नलानुरागिणी त्वमिन्द्रोऽयमिति ज्ञात्वैव पतित्वेन नाङ्गीकरोषीत्यर्थः। यस्माद्दै-

त्यैरतिक्रान्तं महो यस्य तस्मादसारभूतः। यदि चैनं त्यजसि तर्हि तवालाभो नापि तु लाभ एवेति वा। वह्निपक्षे धरतीति धरो वाहनं स चासावजश्च मेषः धर इव पर्व्वततुल्यो वा यो मेषस्तेन कृता या गतिस्तस्य वा या गतिः धरायां भूमावजेन कृता या गतिस्तयोपलक्षितः पाकादिकरणद्वारा त्रैलोक्यरक्षणात् पतिः देवो द्युतिमानमरश्च वह्निर्निश्चीयत इति नापि तु निश्चीयत एव। परमेवंगुणविशिष्टो ज्ञात्वापि न म्रियतेऽपि तच्छिलेन निश्चितो वरणीय एवेत्यर्थः। धरो वाहनमजो यस्य स धराजो वह्निः स एव गतिः शरणं यस्या आग्नेय्या दिशः पतिर्देवोऽग्निः किं न निर्णीयते निर्णीतश्चेत् किमु न म्रियत इति वा। अग्निश्चेत्तत्वेन किमिति भातीत्यत्राह। अयं निश्चितं नलो न किन्तु ततोऽप्यतितेजस्वी तव नलवदाभातीति वा। अयं तत्त्वस्मात्री नलो न भवति किन्त्वनल एवेत्यर्थ इति वा। एवंगुणविशिष्टमेनं यदि त्यजसि तर्ह्यग्नेः परोऽन्यः श्रेष्ठश्च ते को भर्त्ता भविताऽपि त्वेतत्सदृशोऽतितेजस्वी कोऽपि नास्तीत्यर्थः। अथ च तव कोऽभीष्टः अपि तु न कोऽपि किन्तु परः शत्रुरेवेत्यर्थः। अत्रापि त्यागः सूचितः। तथा हि एष नो मनुष्यो न किन्तु धराजगत्या आग्नेय्या दिशः पतिर्देवो वह्निरिति भवत्या निर्णीयते किं यतो न म्रियते त्वया सत्यमेव निश्चितमित्याह। अयं त्वचित्तानुरञ्जकोऽतितेजस्वी नलो न किन्तु तदाकारधारणाग्न्नागः। मद्वचेयं कान्तिर्न भवतीत्यर्थः। नले तृणविषये आभा यस्य तेजस्वित्वं तृणं सत्येव न तु दैत्यान् भतीत्यर्थं इति

वा। नैषधराजो गतिर्यस्यास्तया भवत्या एष दीप्यमानो देवो ऽग्निः किमु न निर्णीयते अपि तु निर्णीयत एव यतो न म्रियते। अयं तव पतिर्नलो न भवति किन्तु दैत्यैराक्रान्ततेजास्तृणविशेषनलतुल्य इति वा। यमपक्षे एष धरान् पर्वतान् शृङ्गाभ्यां खुरैर्वाऽजति क्षिपति धराजो महिषः तस्य गत्या तेन वा या गतिस्तयोपलक्षितो धर्मरूपत्वात् पतिः पालयिता देवः क्रीडापरोऽमरश्च यमो न निर्णीयते इति अपि तु निश्चित एव। परं किमु न म्रियते यम एव देवः धराजेन महिषेण कृत्वाऽर्थाद्यमस्य गतिर्यस्याः एवंभूता वा दक्षिणदिशः पतिर्न अपि तु भवत्येवेति किमु न निर्णीयते किं वा न म्रियते अपि तु यमत्वेन निर्णेयो वरणीयश्चेत्यर्थ इति वा। अतितेजस्व्ययं निश्चितनलो गहनो नापि तु धर्मरूपत्वाद्गहन एव। नलगहन इत्यस्य पक्षापक्षि रूपं। यदि चैनमुज्झसि तर्हि तव लाभो न किन्तु हानिरेव। यतस्त्वेतदन्यः श्रेष्ठश्च कतरो वरः अपि तु नास्त्येवेत्यर्थः। अयं नलो न किन्तु तवातिमहतां महानां प्राणानां लाभो यस्मात् सोऽतिमहानलाभः सर्वेषां प्राणा एतदधीना अतस्त्वया तस्मिन् वृते तव चिरकालं प्राणनं भविष्यतीत्यर्थः। यद्वा धर्मरूपत्वादतिशयितो महः पूजा यस्य स पापावनलाभश्च तेजस्वित्वादग्नितुल्य इत्यर्थः। यदि चैनं त्यजसि तर्हि तव वरः श्रेष्ठः परः शत्रुः कतरोऽपि तु एतस्मिन् परित्यक्तेऽयमेव महांश्शत्रुरित्यर्थ इति वा। अथ च के अन्ते तरति कानि जलानि तरन्त्यस्मिन्निति वा कतरो वरुणो

वरो भविता। अत्रापि त्यागः सूचितः। तथा हि। एष धराजगत्या दक्षिणदिशः पतिर्देवो यमो न अपि तु यम एवेति निश्चित्य तेन कारणेन न म्रियते किं धर्मराजबुद्धा देवो न निर्णीयत इति न किन्तु निर्णीयत एव। अतएव पतिर्न म्रियते किमिति वा। अथं दैत्यैराक्रान्ततेजा नलः पितृदेवो यमो नापि तु यम एव परं तव नलवद्भाति नलाकारधारणादित्यर्थ इति वा। यदि चैनं त्यजसि तर्हि श्रेष्ठः सुखसमुद्रो नलो वरो भविता। वरुणपक्षे एष धराजगत्या भूलोकस्य पतिर्न किन्त्वर्थात् पातालस्य। अत एव देवः कान्तिमान् अमरश्च वरुणः किं न निश्चीयते किं वा न म्रियते। अथं नलो न किन्तु अतिमहती नलवत् कान्तिर्यस्य सोऽतिमहांस्तव नलाभो भातीति शेषः। यदि चैनमुज्झसि तर्ह्येतदन्यः श्रेष्ठश्च तव को वरो भर्त्ता अपि त्वेतत्सदृशोऽन्यो नास्तीत्यर्थः। धरायां जायन्ते धराजानि स्थावरजङ्गमानि भूतानि तेषां गतिर्जीवनोपायो जलं तस्य पतिर्न अपि त्वपां पतिर्वरुणो देवः किं न निर्णीयते किंवा न म्रियते अपि तु निर्णेयो वरणीयश्चेत्यर्थः। अतिमहस्यातिपूज्यस्यानलस्याग्नेरभावः कान्त्यभावो यस्माद्धेतोः। वरुणो हि जलरूपत्वादग्निविरोधीत्यर्थ इति वा। यदि चैनं त्यजसि तदा तव वरः श्रेष्ठः कः परः शत्रुरपि त्वमेव शत्रुरित्यर्थ इति। धरतीति धरो धर्त्ता जगतः पोषकः स चासावजश्च तस्य धराजस्य श्रीविष्णोः गतिः प्रथममयनमाधारो जलं तस्य पतिर्नापि तु तत्पतिर्वरुणः किं न निर्णीयते। उदकं आपो नारा इत्यादिना

श्रीविष्णोराश्रयः। अथ च यदि त्वं एनं अः श्रीविष्णुः इनः स्वामी यस्य तं श्रीविष्णुभक्तं वरुणं त्यजसि तर्हि तव लाभो न किन्तु हानिरेव। तस्मात्तव कतरो वरुण एव परः श्रेष्ठो वर इति वा। अत्रापि त्यागः सूचितः। तथा हि। एष धराजगत्याः पूर्व्वोक्तप्रकारेण उदकस्य प्रतीच्या दिशो वा पतिर्वरुणो देवो नापि तु स एवेति निर्णीयते किमु अपि तु निश्चित एव। यतो न म्रियते नायं नल इत्यादि तुल्यं। यद्येनं त्यजसि तर्हि तवापि महतामनन्तानां प्राणानां लाभो जीवितासीत्यर्थः। यस्मात् ते सुख-समुद्ररूपः श्रेष्ठो नलो वरो भविता। नलप्राप्तावेव तव प्राणा नान्यथेति भावः। इत्यादिव्याख्या सुधिया योजनीयाः। ग्रन्थवि-स्तारभयान्न लिखिताः। नलपक्षे अयं नैषधराजस्य निषधदेशस-म्बन्धिनो राज्ञः निषधदेशोद्भवानां लोकानां यो राजा तस्य वा गत्या ज्ञानेन कृत्वा पतिः स्वामी देवः क्रीडादियुक्तो राजा वा ना मनुष्यो नलः किं न निश्चीयते किं वा न म्रियते ऽपि तु निषधाधिपो मर्त्त्य एवायं पञ्चमो नल एवायं इति निश्चे-तव्यो वरणीयश्चेत्यर्थः। खलु यस्मात्तवातिमहान् अलाभः विष्णु-लाभः। नाविष्णुः पृथिवीपतिरिति नलस्य विष्णुत्वादित्यर्थः। यदि चोत्कृष्टवराकाङ्क्षया एनं त्यजसि तर्हि को वरोऽस्मात् परोऽधि-कोऽपि तु नास्तीति नलमेव वृणीष्वेति भावः। नलस्याप्यवरणे ऽभर्त्तृकैव स्यास्यसीत्यर्थः। एष धराजगत्या भूलोकस्य पतिः स्वामी ना मनुष्यो नलो देवो राजा नापि तु नल एवेति किं न निश्चीयते किंवा न म्रियते अपि तु निश्चेयो वरणीयश्च। यस्मा-

नलवरणे तवातिमहतो जीवनस्य लाभो नलप्राप्त्यैव तव जीवनं भविष्यतीत्यर्थः। यदि चायं शुभावहं देवरूपमेनं त्यजसि तर्हि तव कः श्रेष्ठो वरोऽपि लभ्यो नास्तीत्यर्थ इति वा। नैषधराज एव गतिर्यस्यास्तया भवत्या मनुष्योऽयं नलो राजा पतिः किं न निश्चीयते किंवा न व्रियते अपि तु उभयमपि कर्त्तव्यं। यद्येनमुज्झसि तर्हि तव निश्चितमतिमहान् अलाभो महदभाग्यं। यस्मादेतादृशोऽन्यः कतरो वरो ऽपि तु नास्त्येवेत्यर्थ इति वा। एष देवो न इन्द्रादिरमरो न किन्तु भूलोकस्य पतिः मनुष्योऽतितेजस्वी नल इति किं न निश्चीयते किंवा न व्रियते। यदि च देवरूपमेनं त्यजसि तर्हि तव लाभो न किन्तु हानिरेव। धरायां जायन्ते धराजाः मनुष्यास्तेषां गत्या प्रकारेण अनिमेषनेत्रत्वादिलिङ्गेनैष देवो नेति किमु न निर्णीयते तथा पतिरिति किमिति न व्रियते निश्चितं मा मनुष्यो नलोऽयं। यदि चैनं त्यजसि तर्हि तव परोऽन्यो वरः श्रेष्ठः कतरो लाभः अपि त्वेतद्वरणात् परः कोऽपि श्रेष्ठः लाभो नास्तीत्यर्थः। एष धरायां भूलोके अतिसौन्दर्यादजः काम इति बुद्ध्या प्राणेशो मनुष्यो नलो न तु देवः कश्चिदिति किं न निर्णीयते किं वा न व्रियते निकटस्थानामेषां चतुर्णामेतदाकारधारणात् कृत्रिमं सौन्दर्यं तेषामस्य तु सहजमिति दर्शनमात्रेण तारतम्यं ज्ञात्वा एष नलो निश्चेयः वरणीयश्चेत्यर्थः। इत्यादिव्याख्या यथाबुद्धि ज्ञातव्या। नमः स्फोटगमे राज्ञि पितृदेवे कपीश्वरे इत्यादि विश्वः ॥ ३४ ॥

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां
वाचं नले तरलिताऽथ समां प्रमाय ।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं
लावण्यभूः कमपि भीमसुताऽऽप तापं ॥ ३५ ॥
प्राप्तुं प्रयच्छति न पक्षचतुष्टये तां
तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।

इन्द्रेति । अथ लावण्यभूः परमसौन्दर्य्योत्पत्तिस्थानं सा भीमसुता नले विषये तां पूर्व्वोक्तां देवः पतिरित्यादिवाचं चेन्द्राग्निदक्षिणदिगीश्वरपाशिभिः समां सह तुल्यां श्लेषेण तेषामपि वर्णयित्रीं प्रमाय निश्चित्य तरलिता सन्देहवशात् नलनिश्चयाभावाद् दोलायमानमनाः सती कमपि अनिर्वाच्यमतिदुःसहं तापं आप । का कमिव सिन्धुवेणिर्गङ्गा सागरसङ्गमा वाडववीतिहोत्रमिव । वडवानलमिव यथा प्राप्नोति नलनिश्चयाभावाद्वाडवानलमिव दुःसहं सन्तापं प्रापेति भावः । नले तरलिता सोत्कण्ठेति वा ॥ ३५ ॥

प्राप्तुमिति । सा भैमी निषधराजो नलस्य सम्बन्धिन्यां विविधायां मतौ बुद्धौ सत्यां नलविषये सन्देहे सतीति यावत् । पञ्चमी चासौ कोटिश्च पञ्चमकोटावेव पञ्चमकोटिमात्रे पञ्चमभागरूपे पञ्चमस्थानस्थमिति यावत् । एवम्भूते पक्षाणां मध्ये सत्यतरेऽतितरां सत्येऽपि नले विषये श्रद्धामास्तिक्यं न दधे सत्यत्वेऽपि नलोऽयमेवेति तस्या बुद्धिर्नोदभूदित्यर्थः । क सति तल्ला-

श्रद्धां दधे निषधराड्विमतौ मतानां
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥ ३६ ॥

भर्त्तरीति भैमीप्राप्त्यभिलाषिणि पञ्चचतुष्टये पञ्चानां समीपवर्त्तिनां सहायानां सदृशानामिन्द्रादीनां चतुष्टये तां श्रद्धां सत्यनलविषयं निश्चयं प्राप्तुं न प्रयच्छति सति भैमीप्राप्त्यभिलाषेणातिसुन्दररूपधारणात् कृत्रिमरत्नादिष्विव मायानलेषु सद्रूपातिशयदर्शनात्सत्यनलनिश्चयं प्रतिषेधति सति कः कश्चिदिव मतानां साङ्ख्यादिषड्दर्शनानां मध्ये एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनेत्यादिश्रुतिभिः सत्यतरे परमार्थतो वर्त्तमानेऽपि अद्वैतरूपे तत्त्वे स्वरूपे ब्रह्मैक्यबोधे वा विषये लोकोऽविद्यावान् युक्तायुक्तविचारशून्यो जनो यथा श्रद्धां न धत्ते। क्व सति पञ्चचतुष्टये अनेकात्मवादिसाङ्ख्यादिदर्शनचतुष्के तामद्वैतश्रद्धां प्राप्तुं न ददति सति नानात्मत्वसाधकयुक्तिसहस्रैरेकात्मनिषेधके सतीति यावत्। तस्य तत्पदवाच्यस्य साभसर्त्तृमिनीत्यद्वैततत्त्वस्य विशेषणं। साङ्ख्या हि प्रतिशरीरं पुरुषबहुत्वमङ्गीकुर्वन्ति। नैयायिकाश्च नानात्मानो व्यवस्थात इति वचनात् आत्मनो नानात्वमङ्गीकुर्वन्ति। आर्हताश्च देहप्रमाणात्मस्वाकारमङ्गीकुर्वन्ति। बौद्धाश्च स्वसिद्धान्तसिद्धानेकयुक्तिभिरनेकात्मनामेव चित्तसन्तानाख्यमङ्गीकुर्वन्ति। सत् असत्। सदसत्सदसदिति पक्षचतुष्टयं। सदादिनः साङ्ख्याः। असद्वादिनो बौद्धाः। सदसद्वादिनो नैयायिकाः। प्रपञ्चानिर्व्वचनीः

सत्ववादिनो वेदान्तिनः । न सत् बाधानुपपत्तेः । न हि सद्रजतं गगनादिकं वा बाध्यते । न चासत् प्रतिभासानुपपत्तेः । न हि अत्यन्तासत् शशशृङ्गं कदाचिदप्यवभासते । न च सदसदात्मकं उभयरूपं परस्परविरोधात् । न ह्यसत्सद्वा असङ्गवितुमर्हति । उभयरूपमपि न भवतीत्यपि वक्तुमयुक्तं इत्यादि ज्ञातव्यं । साङ्ख्या हि प्रतिशरीरं भिन्नान् शुद्धस्वभावान् सर्व्वव्यापकान् बहूनात्मन इच्छन्ति । नैयायिका अपि प्रतिशरीरं भिन्नान् सर्व्वव्यापकान् ज्ञानादिनवविशेषगुणवत आत्मन इच्छन्ति । आर्हतास्तु प्रति शरीरं भिन्नान् देहपरिमाणान् सङ्कोचविकाशशीलान् बहूनात्मनोऽङ्गीकुर्व्वन्ति । बौद्धा हि प्रति देहं भिन्नान् चणिकज्ञानसन्ततिरूपान् बहूनेवात्मन इच्छन्ति। भैमीप्राप्त्यभिलाषिणि सत्यतरे नले नलसम्बन्धिन्यां विमतौ सत्यामपि सा श्रद्धा न दधे अपि तु दधावेव । अनेकनलदर्शने सत्ये पञ्चमकोटिस्थे सत्ये नले अविज्ञातेऽपि वस्तौ बलात् प्रह्लादते मन इति न्यायेन अयमेव प्रायेण सत्यनलो भविष्यतीति तस्या मनसि बुद्धिरुदभूदित्यर्थः । मतानां विमतावपि सत्यतरे अद्वैततत्त्वे लोकत इति लोकः परीचको जनो यथा श्रद्धां धत्ते तथेति सम्बन्धः । प्राप्तुमिति पाठे निषधराट् नलः इन्द्रादिचतुष्टये भैमीप्रतारणार्थं स्वीयस्वरूपधारणात्तां स्वस्मै प्राप्तुं न यच्छति सति तस्माभ्रंशमिनि भैमीप्राप्त्यभिलाषिणि पञ्चमकोटिस्थे अर्थादात्मनि श्रद्धां निदयं न दधे भैमीं प्राप्तुं । एतस्मिंश्चतुष्टये प्रतिबन्धके सतीयं मया कथंकारं प्राप्यते अपि तु नेति तस्य

कारिष्यते परिभवः कलिना नलस्य
तां द्वापरस्तु सुतनूमदुनोत् पुरस्तात्।
भैमी नलोपयमनं पिशुनौ सचेते
न द्वापरः किल कलिश्च युगे जगत्यां ॥ ३७ ॥

बुद्धिरुदभूदित्यर्थः। मतानां विमतौ सत्यां सदसदादिपक्षच-
तुष्टये तां सम्यक् प्रतीतिं निषेधति सति अभेदसिद्धिर्यस्मिन्
पञ्चमकोटिमात्रे चतुष्कोटिविनिर्मुक्ते सत्यतरेऽप्यद्वैततत्त्वे यथा
लोकः श्रद्धां न धत्त इति व्याख्येयं। लोकः कौतुकदर्शी स-
भास्थो जन इयमेनं वरिष्यतीति निश्चयं अयं पञ्चमः सत्य-
नल इति वा निश्चयं न दधे। पञ्चमकोटिमात्रे पुंवत्कर्मधार-
येत्यादिना (पा० ६।३।४२) पुंवद्भावः ॥ ३६ ॥

कारिष्यत इति। उक्तिविशेषेण पुनरपि सन्देहजनितं सन्तापं
वर्णयति। कलिना चतुर्थयुगेन नलस्य परिभवः पराभवः कारि-
ष्यते करिष्यते। द्वापरस्तु अयं वा नलोऽयं वाऽनल इति सन्देह।
पुनरथ चशब्दच्छलेन तृतीयं युगं पुनस्तां सुतनुं सुन्दरीं पुर-
स्तात् कलेः पूर्वमेवादुनोत् अपिपीडत्। कलिर्वरणानन्तरं नल-
पराभवं करिष्यति। द्वापरस्तु भैम्या एनं नलं वरीतुमेव नादा-
दित्यर्थः। तयोर्विरोधित्वे कारणमाह। किल यस्मात् कारणात्
द्वापरः कलिश्च द्वावपि युगे जगत्यां भूलोके भैमीनलयोरुप-
यमनं विवाहं न सेहाते। जातं तयोर्विवाहं कलिर्यथा न सोढा
तथा भाविनं द्वापरोऽपि न सेहे। यतः पिशुनौ खलौ। निद्रिते

उत्कण्ठयन् पृथगिमां युगपन्नलेषु
प्रत्येकमेषु परिमोहयमाणबाणः।

नले विवाहो भवत्येव। सन्देहस्तु प्रतिबन्धकः। तस्मात्कलिवत् द्वापरस्यापि विरोधित्वात्तेन सा पीडितेति युक्तमेवेत्यर्थः। द्वापरे कलौ च भैमीनलयोरभावात् तयोर्विवाहं न सहेते तौ इत्यर्थः। नलनिश्चयाभावात् सा अतितमं सन्तापमापेति भावः। शब्दश्लेषवलेनेयमुक्तिः। द्वापरः संशये युगमिति विश्वः। कारिष्यते। स्यसिच् सीयुट् तासिष्वित्यादिना (पा० ६।४।६२) इट्। चिण्वद्भावाद्चोञ्णितीति (पा० ७।२।११५) वृद्धिः। परिभवः। परौ भुवोऽवज्ञान इति (पा० ३।३।५५) घञो विकल्पितत्वात् ऋदोरप् (पा० ३।३।५७) ॥ ३७ ॥

उत्कण्ठयन्निति। परिमोहयमाणा मोहजनका बाणा यस्यैवंभूतोऽत एव इमां भैमीं प्रत्येकमेषु इन्द्रादिनलपदेषु युगपदेकस्मिन्नेव काले पृथक् पार्थक्येनोत्कण्ठयन् सोत्कण्ठां कुर्वन् अय वा नलोऽयं वा नल इति बुद्ध्यैकैकस्मिन् विषये तुल्यकालं पृथक्प्रकारेणोत्कण्ठयन् पृथक्प्रयत्नसाध्यामन्यादृशीमन्यादृशीमुत्कण्ठां अस्या जनयन् इति यावत्। एवम्भूतः स पञ्चबाणः निशाः क्षीयाः शिलीमुखाः बाणास्तान् शीलयत्यभ्यस्यति। क्षीयबाणास्त्रितेति यावत्। एवम्भूता पञ्चसङ्ख्या तस्याः साफल्यं सम्प्रयोजनत्वं यद्यपि तर्हि तदा तस्मिन्नेवावसरे न त्यजेति वयं जानीमहे, उत्प्रेक्षामहे। एकस्मिन्नसे अनङ्गस्य पर्या-

जानीमहे निजशिलीमुखशीलिसङ्ख्या
साफल्यमाप स तदा यदि पञ्चबाणः ॥ ३८ ॥

येणैकेनैव बाणेन जनने शेषाणां चतुर्णां वैयर्थ्यमेव स्यात् किमयं नल इति नलत्वेनोपलक्षितेषु पञ्चस्वपि प्रत्येकं पञ्चभिरेव बाणैः पृथक्प्रयत्नेन युगपदनुरागजनने पञ्चानामपि बाणानां साफल्यं तदैव जातमित्यर्थः। पृथगित्यस्योत्कण्ठाविशेषणत्वात् प्रत्येकमित्यस्येन्द्रादिविशेषणत्वात् सम्बन्धभेदान्नार्थपौनरुक्त्यं। नलेषु युगपदिमां पृथगुत्कण्ठयन् तथा प्रत्येकमेषु नलेष्वेव युगपत्परिमोक्ष्यमाणा अर्थाद्भैम्यां विषयेऽनुरागजनका बाणा यस्य स मदनः यदि निजबाणसङ्ख्यासाफल्यमाप तर्हि तदैव नान्यदा। पञ्चस्वपि तस्या युगपत् पृथगनुरागजननात्। तस्यामपि पञ्चानामपि तेषां प्रत्येकं युगपदनुरागजननाच्च। स्वीयबाणसङ्ख्यायाः साफल्यमापेत्यर्थ इति वा। नलेषु तां पृथक् सोत्कण्ठां कुर्वंस्तथा एषु नलेष्विव प्रत्येकमुत्कण्ठां जनयन्नर्थाद्भैमीं प्रति। यतः परिमोक्ष्यमाणबाण इत्युभयत्रापि उत्कण्ठाजनने हेतुगर्भविशेषणं। सा भैमी पञ्चस्वपि नलबुद्ध्येव सानुरागाऽभूदिति भावः। तेऽपि तस्यामित्यपि च भावः। पञ्चस्वनुरागात् पातिव्रत्यभङ्गप्रसङ्ग इति न। पञ्चस्वपि परपुरुषतापरिहारेण नलबुद्ध्यैवानुरागात् परिहारः। उत्कण्ठयन्। इयमुत्कण्ठते कामस्तेनामुत्कण्ठयति। हेतुमण्णिचि शता। पक्षान्तरे त्वुत्कण्ठां कुर्व्वन्निति तत्करोतीति णिच् ॥ ३८ ॥

देवानियं निषधराजरुचस्त्यजन्ती
रूपादरज्यत नले न विदर्भसुभ्रूः ।
जन्मान्तराधिगतकर्म्मविपाकजन्मै-
र्वोन्मीलति क्व च न कस्य च नानुरागः ॥ ३९ ॥

देवानिति । इयं विदर्भसुभ्रूर्भैमी नले रूपात् सौन्दर्यान्ना-नुरज्यत नानुरक्ता नलेऽनुरक्ता परं रूपाद्धेतोरिति नेत्यर्थः । यतो निषधराजरुचो नलतुल्यकान्तीन् देवानिन्द्रादीन् त्यजन्ती। यदि नले रूपाद्धेतोररञ्ज्यत् तर्हि नलतुल्यरूपानिन्द्रादीन् नात्यक्ष्यत्। ते तावत् त्यक्ताः । तस्मान्नलानुरागे रूपं हेतुर्न भवतीत्यर्थः । तर्हि कथमनुरक्तेत्याशङ्क्याह । जन्मान्तरे अधि-गतं पूर्व्वकृतं कर्म्म तस्य यो विपाकः फलजननोन्मुखता तज्जन्मा तदुत्पन्न एव कस्य च न कस्यापि प्राणिनोऽनुरागः क्व च न कस्मिंश्चित् प्राणिनि उन्मीलति उत्पद्यते पूर्व्वकृतकर्म्मवशादेव कोऽपि कस्मिंश्चित् प्रीतिं बिभर्त्ति । तथा च पूर्व्वजन्मकृतसुकृत-विशेषादेवानपेक्षितान्यकारणविशेषो नलेऽनुरागस्तस्याः सम-भूदित्यर्थः । नलनिश्चयाभावेऽपि रूपसाम्ये सत्यपि च नल एवानुरक्ततया नलादिशिष्टरूपोऽप्यन्यस्तदीयानुरागविषयो ना-भूत् किन्तु नल एवेत्यर्थान्तरन्यासतात्पर्य्यं । अनुरागजनने उभयोरपि पूर्व्वकर्म्मविपाको हेतुर्ज्ञेयः । अरज्यत । रञ्जिकर-णाद्रज्यतेर्ण्णिलात् कर्त्रभिप्रायक्रियाफलविवक्षया तङ् ॥ ३९ ॥

क्व प्राप्यते स पतगः परिपृच्छ्यते यः
प्रत्येमि तस्य हि पुरेव नलं गिरेति।
सस्मार सस्मरमतिः प्रति नैषधीयं
तत्रामरालयमरालमरालकेशी॥ ४०॥

केति। सस्मरा कामतरला धीर्मतिर्यस्याः सा अरालकेशी कुटिलकेशी भैमी तत्र सभायां सन्देहावसरे वा इति मनसि विचार्य्य नैषधीयं नलसम्बन्धिनं नलदूत्यकारिणं अमरालयं मरालं स्वर्गनिवासिनं देवाश्रयं वा हंसं प्रति उद्दिश्य सस्मार। इति किं। स पतगः हंसः क्व कस्मिन् स्थाने प्राप्यते। स कः। यो हंसो मया परितः सामस्त्येन एषु मध्ये सत्यं नलं मह्यं कथयेति विश्वास्यतया पृच्छ्यते। स एव किमिति प्रष्टव्य इति चेत् आह। हि यस्मात्तस्य हंसस्य गिरा पुरेव सङ्घटनाकाल इव नलं प्रत्येमि निश्चिनोमि। अदृष्टमज्ञातमपि च नलं दूत्यावसरे यथा हंसवचनेनाहं ज्ञातवती तथाधुनापि नलनिश्चयाभावे परमाप्तस्य तस्य वचनान्नलं निश्चिनोमीति मदनपरवशत्वेनाऽधीरत्वान्नलनिश्चयार्थमाप्ततमं तं हंसं सस्मारेत्यर्थः। प्राप्यत इत्यादि। वर्त्तमानसामीप्ये वर्त्तमानवद्वा (पा॰ ३।३। १३१) इति लट्। निषधसम्बन्धि नैषधीयं नलवरणलक्षणं कार्य्यमुद्दिश्य हंसं सस्मारेति वा योजना। किञ्च नैषधीयमिति पाठे नलं किञ्च निश्चितं प्रत्येमीति योजना। प्रियदूतभूतमिति पाठो वा॥ ४०॥

एकैकमैक्षत मुहुर्महतादरेण
भेदं विवेद न च पञ्चसु कञ्चिदेषा।
शङ्काशतं वितरता हरता पुनस्त-
दुन्मादिनेव मनसेयमिदं तदाह॥ ४१॥
अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र
भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः।

एकैकमिति। एषा भैमी महता आदरेण प्रयत्नेन मुहुः एकैकं इन्द्रादीनैक्षत आलोकत। विशेषजिज्ञासया पुनः साभिप्रायं ददर्शेत्यर्थः। अथ च महता दरेण भयेन, पतिव्रतेयं पञ्चापि सादरं कथं पश्यतीति अविदितसादरावलोकनकारणेभ्यो जनेभ्यो ऽपवादभयेनेत्यर्थः। परं पञ्चसु मध्ये कञ्चिदल्पीयांसमपि भेदं विशेषं न च नैव विवेद। अनन्तरञ्च वक्ष्यमाणप्रकारेण शङ्काशतं सन्देहपरम्परां वितरता तन्वता वितीर्य च पुनस्तच्छङ्काशतं हरता वक्ष्यमाणप्रकारानेकयुक्तिभिर्नाशयता मनसा इयं भैमी इदं वक्ष्यमाणं बभाषे। चेतस्येवाविचारयदित्यर्थः। उत्प्रेक्ष्यते। उन्मादिनेव उन्मादवानपि भूयसा आदरेण भयेन वा प्रत्येकमीक्षते तारतम्यञ्च न जानातीति। शङ्काशतञ्च करोति पुनस्त्यजति ददाति च पुनरादत्ते चेत्येवमव्यवस्थितचित्तो भवति। तथेयमप्यव्यवस्थितचित्ताभूदिति भावः। वेद ज्ञाने पाठे भूतेऽर्थे। लट् स्मेति (पा॰ ३।२।११८) लट्॥ ४१॥

तमेव विचारमाह। अस्तीति॥ जनस्य द्विचन्द्रमतिः द्वौ

स्वच्छोपसर्पणमपि प्रतिमाभिमाने
भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥ ४२ ॥
किं वा तनोति मयि नैषध एव काय-
व्यूहं विधाय परिहासमसौ विलासी।

चन्द्राविति बुद्धिः प्रसिद्धाऽस्ति। परं तत्र भ्रान्तौ प्रमाणप्रमित्यैकत्वे एकस्मिन्नेव चन्द्रे विषये यो अनेकत्वप्रत्ययस्तस्मिन्विषये दृगन्तयोर्नेत्रप्रान्तयोर्यच्चिपिटीकरणं अचिपिटयोश्चिपिटयोः करणं अङ्गुल्ययेण निपीडनं तदादिर्यस्य काचकामलादिदोषस्य स दृगन्तचिपिटीकरणादिदोष आदिः प्रथमो हेतुरस्ति। चन्द्रद्वयभ्रान्तौ चिपिटादिः हेतुर्युक्तः। तथा प्रतिमाया आदर्शादौ दृश्यमानस्य मुखादिप्रतिबिम्बस्याभिमानेऽपि प्रतिबिम्बस्फुरणरूपे भ्रान्तिज्ञानेऽपि स्वच्छस्यादर्शादेरुप समीपे यत् समर्पणं प्रापणं दर्पणसन्निधानं तन्निमित्तं अस्तीति शेषः। दर्पणादिस्वच्छवस्तुसन्निधानादलीकमपि प्रतिबिम्बं भासत इत्यर्थः। मे मम पुनरमीषु दृश्यमानेषु भेदभ्रमे एकस्मिन्नले विषये यः पञ्चत्वसङ्ख्यादिविशिष्टो बोधस्तस्मिन् विषये निमित्तं कारणं नास्ति। द्विचन्द्रभ्रान्तौ कारणमस्तीति भ्रान्तिर्युक्ता। एकोऽपि नलः पञ्चधा भासत इति तु मदीया भ्रान्तिः कारणाभावान्न युक्ता। तस्मादन्य एवैते के च न भविष्यन्तीति स्वयमेव संशयञ्चकार परिजहार चेति भावः। अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोरिति निघण्टुः ॥ ४२ ॥

पक्षान्तरमाह। किं वेति॥ वा पक्षान्तरे। असौ प्रत्यक्षदृश्यः

विज्ञानवैभवम्हतः किमु तस्य विद्या
सा विद्यते न तुरगाशयवेदितेव ॥ ४३ ॥
एको नलः किमयमन्यतमः किमैलः
कामोऽपरः किमु किमु द्वयमाश्विनेयौ ।
किं रूपधेयभरसीमतया समेषु
तेष्वेव नेह नलमोहमहं वहे वा ॥ ४४ ॥

नैषध एव कायव्यूहं शरीरसमूहं विधाय निर्धार्य्यायमपि परिहासं प्रतारणाक्रीडां तनोति किं । यतो विलासी एकोऽप्यसौ नलः एवमपि क्रीडावशात् कायव्यूहं तनोति न लन्ये के च न सन्तीत्यर्थः । किन्नो तनोतीति पाठे काकुः । कायव्यूहरचनेऽस्य शक्तिः कथमित्यत आह । विशिष्टस्य ज्ञानस्य विशिष्टं ज्ञानं यैरेवंविधा ये कला ग्रन्थाः तेषां वा वैभवं बाहुल्यं तद्भृतस्तस्य नलस्य तुरगाशयवेदितेव अश्वहृदयज्ञातृतेव सा कायव्यूहविधानरूपा विद्यापि किमुत विद्यते अपि तु सापि विद्यत एवेति सम्भावना । विज्ञानवैभवभुव इति पाठे । भुवः स्थानभूतस्येत्यर्थः । परिहासः । उपसर्गस्य घञ्यमनुष्ये (पा० ६।३।१२२) सूत्रे बहुलग्रहणाद् दीर्घः ॥ ४३ ॥

एक इति । वा पक्षान्तरे । इह एषु पञ्चसु मध्ये अयमेको नलः किं । अन्यतमः द्वितीय ऐलः पुरूरवाः किं । अपरस्तृतीयः कामः किमु । शिष्टद्वयं आश्विनेयौ अश्विनीकुमारौ किमु । एव मुक्तेषु तेषु पञ्चसु एव अहं नलमोहं किं न वहे । अपि तु तेष्वेव

पूर्व्वं मया विरहनिःसहयापि दृष्टः
सोऽयं प्रियस्तत इतो निषधाधिराजः।
भूयः किमागतवती मम सा दृशेयं
पश्यामि यद्विलसितेन नलाननलीकान्॥ ४५॥
मुग्धां दधामि कथमित्यमथापशङ्कां
सङ्क्रन्दनादिकपटः स्फुटमीदृशोऽयं।

नलबुद्धिं धारयामि। न तु कायव्यूहरचनादेक एव नलः पञ्चधा जात इत्यर्थः। यतो रूपधेयभरस्य सौन्दर्य्यवाऽल्यस्य सीमतया पराकाष्ठालेन समेषु सदृशेषु साचाद्विमोहो युक्तः। अन्यतमः। स्वार्थे तमप्। सीमशब्दो नान्तः स्त्रीलिङ्गः॥ ४४॥

पूर्व्वमिति। विरहनिःसहया वियोगविह्वलया मया सो ऽयं निषधाधिराजः प्रियः प्राणेश इतस्ततः सर्व्वासु दिक्षु पूर्व्वमपि स्वयंवरसमयात् प्रागपि दृष्टः। य इदानीं दृश्यते स मोहवशात् सर्व्वत्र पूर्व्वमपि दृष्ट इत्यर्थः। प्रकृते किमित्यत आह। ममेयं भूयः पुनरपि सैव विरहोद्भूतोद्भ्रान्ततारूपा दशा आगतवती किं। यद्विलसितेन यस्याः सामर्थ्येनालीकानसत्यान्नलान् पश्यामि। अपि पूर्व्वं इत्यनेन भूय इत्यनेन वा योजनीयः॥४५॥

मुग्धेति। अथ पक्षान्तरे। अथवा मुग्धा मोहवशा सती अहं इत्थं अस्ति दिक्पन्द्रेत्याद्यनेकरूपां अपशङ्कां दुःशङ्कां कथं दधामि अपि त्वेतदयुक्तमित्यर्थः। यतः स्फुटं निश्चितं अयमीदृशः समयाऽज्ञानदपः सङ्क्रन्दनादीनामिन्द्रादीनां चतुर्णां कप-

देव्याऽनयैव रचिता हि तथा तथैषां
गाथा यथा दिगधिपानपि ताः स्पृशन्ति ॥ ४६ ॥
एतन्मदीयमतिवञ्चकपञ्चकस्थे
नाथे कथं नु मनुजस्य चकास्तु चिह्नं ।

दस्तेषां माययैवेत्यर्थः। हि यस्मादनया देव्यैव सरस्वत्यैवैषां पुरोवस्थितानां सम्बन्धिन्यो गाथाः ब्रूम इत्यादिवर्णनश्लोकास्तथा तथा तेन तेन प्रकारेण रचिताः यथा येन प्रकारेण ता गाथा दिगधिपानिन्द्रादीनपि स्पृशन्ति श्लिष्टशब्दशक्त्याऽभिधावृत्त्या वदन्ति न केवलमित्यपेरर्थः। तस्मादिन्द्रादिभिरेव मत्प्रतारणार्थं मायया नलरूपं धृतमित्येव बुद्धिर्युक्ता न तु संशयरूपेत्यर्थः। तथाशब्दस्य द्विरुपादानाद् यथाशब्दोऽपि द्विर्ज्ञातव्यः। कपटोऽस्त्री व्याजदम्भोपधय इत्यमरः ॥ ४६ ॥

एतदिति। एतस्मिन्मदीयाया मतेर्बुद्धेर्वञ्चके भ्रामके पञ्चके इन्द्रादिसमूहे तन्मध्यस्थिते नाथे मम प्राणेशे मनुजस्य मनुष्यस्य चिह्नं स्वेदनिमेषरजःस्पर्शम्लानकुसुमत्वादिलिङ्गं कथं नु कथमिव चकास्तु प्रकाशतां। अपि त्विन्द्रादिमायया नलस्यापि चिह्नस्य छादितत्वात्तन्न प्रकाशत इति युक्तमित्यर्थः। नलस्य स्वयमवञ्चकत्वेऽपि छर्विणो गच्छन्तीति न्यायात् चतुर्णामेव वञ्चकत्वेऽपि तत्सिद्धिः। परिहासवशाद्वा नलस्यापि वञ्चकत्वं युक्तम्। एतद्राजसु दृश्यमानं स्वेदादिचिह्नमिति भिन्नं पदं वा। इतस्वेदे अमी बहिर्मुखा देवाः। धृतं त्यक्तं रजो रेणुःस्पर्शो

सद्माणि तानि किममी न वहन्ति हन्त
बर्हिर्मुखा धुतरजस्तनुतामुखानि॥ ४७ ॥
याचे नलं किममरानथवा तदर्थं
नित्यार्चनादपि ममाफलिनैरलन्तैः।
कन्दर्पशोषणशिलीमुखपातपीत-
कारुण्यनीरनिधिगह्वरघोरचित्तैः॥ ४८॥

यया एवम्भूता तनुर्येषां तेषां भावो धुतरजस्तनुता रेणुसंसर्गरहिततनुता मुखे मालिन्यादि येषां तानि स्वेदराहित्याम्लानपुष्पत्वनिर्निमेषत्वादीनि देवत्वव्यञ्जकानि तानि प्रसिद्धानि चिह्नानि किमिति न वहन्ति धारयन्ति। मयि कृपया तावद्वोढुं युक्तानि परन्तु नोह्यन्ते कष्टमित्यर्थः। बर्हिर्मुखपदं कृपाराहित्यसूचकं। नलचिह्नानामस्फुटत्वेऽपि यदि देवचिह्नानि स्फुटान्यभविष्यंस्तर्हि पारिशेष्यान्नलनिश्चयोऽप्यभविष्यत्तान्यपि नस्फुटानीत्युभयथापि मया नलो निश्चेतुं न शक्यत इति भावः॥४७॥

याच इति। अहं, मह्यं यूयं नलं प्रयच्छतेति, अमरान् नलं याचे किं। अथवा पूर्व्वापरितोषे। तदर्थं नलप्राप्त्यर्थं तेषां नित्यार्चनादपि ममाऽफलिनैः प्रार्थितमददद्भिस्तैर्देवैरलं पूर्य्यतां एतावन्ति दिनानि। नित्यपूजनादपि ये नलं न प्रायच्छंस्तेऽधुना प्रार्थनमात्रेण कथं दास्यन्तीति वृथैव तत्प्रार्थनमित्यर्थः। किंविधैः। कन्दर्पस्य शोषणाख्यशिलीमुखो बाणस्तेन पातात् पतनात् पीतः शोषितः कारुण्यनीरनिधिः कृपासमुद्रो येषां तानि अत

ईशा दिशां नलभुवं प्रतिपद्य लेखा
वर्णश्रियं गुणवतामपि वः कथं वा।
मूर्खान्धकूपपतनादिव पुस्तकाना-
मस्तं गतं बत परोपकृतिव्रतित्वं ॥ ४९ ॥

एव गह्वराणि गभीरविलरूपाणि छेदाणि कठिनानि चित्तानि येषामेवम्भूतः। यस्मात् कृतेऽपि नित्यपूजने कामायत्ततया निष्फलादफलितैरित्यर्थः। याचिर्द्विकर्म्मा। न दत्तफलैरिति वा पाठः। फलशब्दादस्त्यर्थे फलबर्हाभ्यामिनच् (पा॰ ५।२।१२२। वा॰ ५।) ततो नञ्समासः॥ ४८॥

देवानुपालभते। ईशा इति। हे दिशामीशा दिक्पाला लेखा देवाः, नलो भूः स्थानं यस्यास्तां नलभुवं नलप्रभवां वा वर्णश्रियं रूपशोभां प्रतिपद्य प्राप्य गुणवतां सौन्दर्य्यादिगुणयुक्तानामपि वो युष्माकं परेषामुपकृतिरुपकार एव व्रतं तद्विद्यते येषां ते व्रतिनस्तेषां भावस्तत्त्वं कथं वा कुतो वा हेतोरस्तं गतं नष्टं स्वयमुपकारकत्वाभावेऽपि स्वाभिलषितायामपि मयि भवदर्थंदूत्यकारिणो नलस्याप्याकारे धृते सौन्दर्य्यादिगुणागमनात् परोपकारित्वमप्यागतं तन्मद्विषये कथं विनष्टमित्यर्थः। नलाकारधारणाद्देवतानां मत्सुतारेण क्रिमिति क्रियत इति भावः। केषामिव। मूर्खाः अश्रुतशास्त्राः पुरुषा एवाज्ञानवशादन्धास्त एव कूपा अतिगभीरा मूर्खरूपाः कूपास्तेषु पतनात् तदधीनत्वात्तृणविशेषलेखनीभूतनलप्रभवां रेखां वर्णश्रियं लिप्यक्षरशोभां प्राप्य

यस्येश्वरेण यदलेखि ललाटपट्टे
तत् स्यादयोग्यमपि योग्यमपास्य तस्य।
का वासनाऽस्तु विस्मयामिह यां हृदाऽचं
नार्कातपैर्जलजमेति हिमैस्तु दाहम्॥ ५०॥

शृङ्खलादिगुणयुक्तानां दोरकयुक्तानां वा पुस्तकानां यथा वाचकपाठकाद्युपकारकारित्वरूपमसङ्गच्छति मूर्खस्य मूर्खत्वादेदोपकाराभावादन्येषां चाप्समर्पणादित्यर्थः। कूपपतितानामपि पुस्तकानामनुपकारकत्वमेव प्रतिपद्य स्थितानामिति समानकर्तृकत्वं॥ ४८॥

यस्येति। ईश्वरेण यस्य प्राणिनः ललाटपट्टे यदयोग्यमनुचितमपि अलेखि लिखितं तदयोग्यमपि तस्य योग्यं समुचितमर्थं अपास्य प्रतिक्षिप्य स्याद्भवेत्। योग्यमर्थं परित्यज्य तत्परिहारेण स्वयमेव भवेदिति यावत्। अतो योग्यतया कार्यकरणाभावे सति इह नलानेकत्वमन्देहेन निश्चयार्थं यां वासनां युक्तिमहं हृदा बिभ्रयां धारयेयं सा का वासना युक्तिरस्तु भवतु अपि त्वेवंविधा युक्तिर्नास्ति। विवेनान्यथाकर्त्तुं विचारितेऽपि ललाटपट्टलिखितादन्यथा न भवतीत्यर्थः। योग्यमपास्यायोग्यमेव भवतीत्यत्र दृष्टान्तमाह। यतो जलजमम्भोजं अर्कातपैरुष्णैरपि सूर्यकिरणैर्दाहं नैति हिमैस्तु पुनर्दाहं गच्छति। उष्णस्पर्शो दाहकः शीतस्पर्शस्तु दाहशमक इति लोके दृष्टं। तदिदं विपरीतं जातमिति विरुद्धकार्योत्पत्तेर्विषमं नमस्य मम वा ललाटे यदीः

इत्थं यथेह मद्भाग्यमनेन मन्ये
कल्पद्रुमोऽपि स मया खलु याच्यमानः ।
सङ्कोचसंज्वरदलाङ्गुलिपल्लवाग्र-
पाणिर्भवन् भवति मां प्रति बद्धमुष्टिः ॥ ५१ ॥
देव्याः करे वरणमाल्यमथार्पये वा
यो वैरसेनिरिह तत्र निवेशयेति ।

ग्वरेणायोग्यमेव लिखितं तर्हि परस्परयोग्यं परस्परं विहाय तस्य मम चायोग्यमेव भविष्यतीति कं प्रकारं चित्ते धारयिष्या-म्यपि तु न कमपीति देवानां न कोऽप्यपराध इति भावः ॥५०॥

तर्हि कल्पद्रुमो याच्यतामित्यत आह । इत्यमिति । इह नलैकलेऽपि समये वा इत्यमनेन नलानेकलभवनप्रकारेण यथा यादृक् ममाभाग्यं नलानिश्चयात् यथा दैवाभावो दृश्यते अनेन हेतुना प्रकारेण वा सोऽतिवदान्यः कल्पद्रुमोऽपि खलु निश्चितं मया नलं याच्यमानः सन् मां प्रति बद्धमुष्टिरनिकार्प्पण्यकङ्कु-चत्करो भवतीत्यहं मन्ये। किम्भूतः। सङ्कोच एव संज्वरः सन्तापो येषां एवंविधानि दलानि किसलयान्येव अङ्गुलयो येषामेवं-भूताः पल्लवा एवाग्रपाणयः हस्ताग्राणि यस्यैवम्भूतः। अनेन एव-भूतो भवन्। अन्यस्यापि बद्धमुष्टेरङ्गुलयः सङ्कुचिता भवन्ति । कश्चितदानशीलोऽपि मद्भाग्यवशान्मां प्रत्यदातैव भवेदिति भावः । अदातृत्वनिश्चयात् भवन्तीति वर्त्तमानप्रत्ययः ॥ ५१ ॥

देव्या इति । अथवा इह स्वयम्बरे एतेषु पञ्चसु मध्ये वा यो

सैषा मया मखभुजां द्विषती कृता स्यात्
तस्मै तृणाय तु विहन्मि न बन्धुरत्नम् ॥ ५२ ॥
यः स्यादमीषु परमार्थनलः स माला-
मङ्गीकरोतु वरणाय ममेति चैताम्।
तं प्रापयामि यदि तत्र विहाय लज्जां
कुर्व्वे कथं जगति सृष्टवति द्वौ विडम्बः ॥ ५३ ॥

वैरिमेति: सत्यनलः तत्त्वं तावज्जानासि अतस्त्वचैतां मालां नि-वेश्य निक्षिपेत्युक्ता देव्याः सरस्वत्याः करे वरणमाल्यं वरणम-धूकमालां अर्पये ददामीति सम्भावना। स्वयमेवैतद्दूषयति। एवं क्रियमाणे सैषा देवी या मखभुजां देवानामिन्द्रादीनां द्विषती वैरिणी कृता स्यात्। तन्मायाप्रकटनादित्यर्थः। भवतु नाम सा तद्वैरिणी स्वकार्यसिद्धिस्तु साध्येत्यत आह। तु पुनः तृणाय तृणतुल्यायातिनिःसाराय तस्मै स्वरूपाय अकिञ्चित्कराल्प-कार्यसिद्धये बन्धुरत्नं सुहृन्मध्येऽतिश्रेष्ठां देवीं न विहन्मि। मम यत् किंवा भवतु परंतु देवद्वेषरूपं मित्रविघातं न करोमीत्यर्थः। अन्योऽपि तृणार्थं सुज्ञः रत्नं न विनाशयति। द्विषती। द्विषो-ऽमित्रे (पा० ३।२।१३१) इति शतरि, उगितश्चेति ङीप् (पा० ४। १।६)। मखभुजां। द्विषःशतुर्वेति (पा० २।३।६९) षष्ठी॥५२॥

य इति। अमीषु पञ्चसु भवत्सु मध्ये यः परमार्थनलः सत्य-नलः स्यात् स मम वरणाय मालामङ्गीकरोतु इत्येवंप्रकारेण इत्युक्त्वा चेमि वा मालां तत्र तेषु मध्ये सत्यनलं प्रापयामि तद्-

इतरनलतुलाभागेषु शेषः सुधाभिः
स्नपयति मम चेतो नैषधः कस्य हेतोः ।

नलेभ्यां विसृज्य कथं कुर्व्वे अपि लेवं कर्त्तुमयुक्तं । यतः जगति सर्व्वस्मिन् सभाजने शृण्वति सति ही कष्टं विडम्बः । लज्जात्यागादतिपरिहासो भविष्यतीति शेषः । सर्व्वेषां समक्षमेवंवचने लज्जात्यागात् सर्व्वेऽप्युपहसिष्यन्तीत्यर्थः। हीति खेदे। हि यस्मादर्थे इ खेदे इति वा। इति चेति समुदायप्रकारे । यदि चेति वा ॥ ५३ ॥

इतरेति। इतरैश्चतुर्भिर्नलैस्तुलां साम्यं भजत इति भाग एषु शेषः पञ्चसु मध्ये अन्यः पञ्चमो नैषधः मम चेतः कस्य हेतोः केन कारणेन सुधाभिरमृतैः स्नपयति आप्लुतमिव करोति। रूपसाम्ये सत्ययमेव एव मम मनसे यतो रोचते तस्मादयमेव सत्यनलो भविष्यतीत्याशयः । सत्यनलज्ञापकं निरुपाधिकपरमप्रेमसम्वाददृष्टान्तेनान्यथा कथयति । प्रथमेति । वाऽथ वा युक्तमेतत् प्रथमचरमयोरादिमान्त्ययोः शब्दयोर्वर्णैरक्षरैः सख्ये मैत्र्यां सत्यामपि चरमे शब्दान्त्ये शब्दे अनुप्रासभासांश्छेकानुप्रासवृत्त्यनुप्रासलाटानुप्रासाख्यशब्दालङ्कारकान्तीनां विलास उल्लासश्चमत्कारो विशेषेण शोभते। वर्णसाम्ये सत्यपि प्रथमस्थानायासगतत्वाद् द्वितीयस्य तु सदृशस्य पश्चाङ्कुरितप्रयत्नसाध्यत्वाच्चरमे यद्यप्यनुप्रासत्वं स्फुरति तथापि द्वितीयसाहित्ये प्रथमेऽपि यथानुप्रासत्वमस्ति तथा सुन्दरान्तरविच्छेदेन पश्चा-

प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये
विलसति चरमेऽनुप्रासभासां विलासः ॥ ५४ ॥
इति मनसि विकल्पानुद्यतः सन्त्यजन्ती
क्वचिदपि दमयन्ती निर्णयं नाससाद।
मुखमथ परितापास्कन्दितानन्दमस्या-
मिह रविरचितावस्कन्दमिन्दुं निनिन्द ॥ ५५ ॥

दवलोक्यमानतयैव पद्मस्येतसे रोचते तेन तत्र सत्यत्वं प्रयोजकं अतः सर्वेऽपि तुल्या एवेति भावः। अत्रायमेव श्लोको दृष्टान्तः। अत्र तयोरेव प्रथमचरमशब्दयोर्वर्णसाम्ये सत्यपि चरमे चरमशब्द एवानुप्रासातिशयो न प्रथमशब्दे। प्रथम इत्युक्ते नानुप्रासः। प्रथमचरमयोरित्युक्ते तु चरम एवानुप्रासातिशयो दृश्यते। न तथा प्रथम इत्यर्थ इति वा। यद्वा आद्यपादचतुर्थपादयोर्वर्णसाम्ये सत्यपि चरमे चतुर्थपादेऽनुप्रासभासां विलासो विलसति। उभयोरनुप्रासत्वे सत्यपि चतुर्थेऽनुप्रासभासां विलास इत्युक्तेस्तत्रैवानुप्रासत्वं न तु प्रथमे। सख्यतीति। सिन्त्ये च्छस्वः। कस्य हेतोः। षष्ठी हेतुप्रयोगे इति (पा० २।३।२६) षष्ठी ॥ ५४ ॥

इतीति। इति उक्तप्रकारेण मनसि उद्यतः उत्पद्यमानान् विकल्पान् अनेकशङ्कावलम्बनबोधान् दोषोद्भावनेन संत्यजन्ती क्वचिदपि पक्षे निर्णयं निश्चयं नाससाद। पक्षस्तु मध्ये कस्मिन्नपि पुंसि नलनिश्चयं न प्रापेति वा। अथ पक्षान्तरनिश्चयाभावात्

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं।
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं॥
स्वादूत्पादभृति त्रयोदशतयाऽऽदेश्यस्तदीये महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥५६॥

परितापेनास्कन्दितो अभिभूत आनन्दो यस्य। परितापेन कला ऽस्कन्दितोऽप्राप्त आनन्दो येनैवम्भूतं वाऽस्या मुखं कर्त्तृ मिहिरेण सूर्य्येण रचितः अवस्कन्दः पराभवो यस्यैवंविधं इन्दुं निनिन्द निष्प्रभदिनचन्द्रसदृशमभूदित्यर्थः। आस्कन्दनमास्कन्दः पराभवः परितापेन य आस्कन्दः स सञ्जातो यस्यैवंविधो आनन्दो यस्येति। तदस्येति (पा० ५।२।३६) तारकादित्वादितचा सिद्धिः॥५५॥

श्रीहर्षमिति। अर्द्धं पूर्व्ववत्॥ स्वादूत्पादभृति सहृदयहृदयाह्लाददायित्वात् स्वादुरसोत्पत्तिधारके ऽत्यन्तमधुरनवार्थसहिते त्रयोदशतया आदेश्योऽभिधेयः सर्गो स्वभावेनोज्ज्वलः व्यरमत् समाप्त इत्यर्थः। व्यरमत्। व्याङ्परिभ्यो रमः (पा० १।३।८३) इति परस्मैपदम्॥५६॥ इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे त्रयोदशः सर्गः॥१३॥

उत्तरनैषधचरिते।

चतुर्दशः सर्गः।

ॐ गणेशाय नमः।

अथाधिगन्तुं निषधेश्वरं सा
प्रसादनामाद्रियतामराणाम्।
यतः सुराणां सुरभिर्नृणान्तु
सा वेधसाऽसृज्यत कामधेनुः॥ १॥
अथाधिगन्तुं निषधेशमेषा
प्रसादनं दानवशात्रवाणाम्।
अचेष्टतासौ महतीष्टसिद्धि-
राराधनादेव हि देवतानाम्॥ २॥

अथेति। अथ विकल्पदूषणानन्तरं सा भैमी निषधेशानलमधिगन्तुं निश्चेतुं प्राप्तुञ्च षोडशोपचारैरमराणां प्रसादनं परितोषणमाद्रियतादरेण चकार। यतः वेधसा सुराणां कामधेनुरभिलाषप्रदः सुरभिर्गौरसृज्यत सृष्टा। नृणां तु पुनः कामप्रदः सा देवप्रसादना सृष्टा। तस्मान्नलनिश्चयार्थं प्राप्त्यर्थञ्च देवपरितोषणं चकारेति युक्तमित्यर्थः॥ १॥

अथेति क्षेपकः। अचेष्टत अकुरुत। महत एव माधवाः प्रसादिनाम् स्वार्थेऽण्॥ २॥

प्रदक्षिणप्रक्रमणालवाल-
विलेपधूपाचरणाम्बुसेकैः ।
इष्टञ्च मिष्टञ्च फलं सुवाना
देवा हि कल्पद्रुमकाननं नः ॥ ३ ॥
श्रद्धामयीभूय सुपर्वणस्तान्
ननाम नामग्रहणाग्रकं सा ।

पूर्व्वोक्तार्थसमर्थनार्थमर्थान्तरन्यासमाह । प्रदक्षिणेति । हि यस्माद् देवाः नोऽस्माकं मनुष्याणां कल्पद्रुमकाननं वहवः कल्पवृक्षा एवेति कवेरुक्तिः । किंभूता देवाः । प्रदक्षिणरूपं प्रक्रमणञ्च वलयाकारं परिभ्रमणं तदेवालवालं वृक्षमूले जलधारणार्थं वलयाकारः सेतुः स च विलेपश्चन्दनादिलेपश्च धूपो दशाङ्गादिः तेषामाचरणानि करणानि तान्येवाम्बुसेकाः प्रदक्षिणाद्याचरणञ्च उदकस्नपनानि च तैर्वा कृत्वा इष्टमभिलषितञ्च मिष्टञ्च स्वभावसुन्दरं सुस्वादु च फलं मनोरथरूपमाम्रादिकञ्च सुवाना उत्पादयन्तः । वृक्षा अपि आलवालवृक्षायुर्वेदोक्ततरुदोषनाशकनिविडिङ्गादिलेपदोहदधूपाम्बुसेकैरिष्टं मिष्टञ्च फलं सुवते । आवरणमिति पाठे अङ्गप्रत्यङ्गदेवतापूजा कण्टकादिवृतिश्चेति व्याख्येयं ॥ ३ ॥

पूजारम्भार्थं प्रथमं नमस्कारमाह । श्रद्धेति ॥ सा श्रद्धामयीभूय आस्तिक्यप्रचुरा भूत्वा तान्नमवेशधारिणः सुपर्वणो देवान् नामग्रहणाग्रकं इन्द्राय नम इत्यादिनामग्रहणपूर्व्वकं

सुरेषु हि श्रद्दधती नमस्या
सर्व्वार्थसिद्ध्यङ्गमिथःसमस्या ॥ ४ ॥
यत्तान् निजे सा हृदि भावनाया
बलेन साक्षादकृताखिलस्थान्।
अभूदभीष्टप्रतिभूस्तदस्या
वरं हि दृष्टा ददते परन्ते ॥ ५ ॥

ननाम ववन्दे। हि यस्मात् सुरेषु श्रद्धावती नमस्या नमस्कार एव सर्व्वार्थसिद्धेर्यान्यङ्गानि तेषां मिथःसमस्या परस्परपूरण-हेतुः। श्रद्धापूर्व्वं देवनमस्कार एव कारणसामग्रीसम्पादकः। तस्माद्देवं नमस्कृतवतीत्यर्थः। समस्या यथा पदानां परिपूरणं करोति तथा नमस्या वाञ्छापूरणं करोतीति भावः। श्रद्धा-मयी। प्रकृतवचने मयट्। अथकं। शेषाद्विभाषेति कः (पा० ५।४।१५४।) नमस्करणं नमस्या। नमो वरिव इति क्यच् (पा० ३।१।१८।) ॥ ४ ॥

देवपूजाङ्गं ध्यानं प्रथममाह। यदिति॥ साऽखिलस्थान् सर्व्वगतांस्तानिन्द्रादीन् भावनया ध्यानस्य बलेन सामर्थ्येन निजे हृदि यत्साक्षादकृत प्रत्यक्षीचकार। सर्व्वगतानपि ध्यानबलेनैकस्थानीय ददर्शेत्यर्थः। स साक्षात्कार एव तस्या भैम्या अभीष्टस्य नलप्राप्तिलक्षणस्य प्रतिभूः दाननिश्चयकर्त्ताऽभूत्। हि यस्माद्दृष्टास्ते देवाः परं श्रेष्ठं वरमभीष्टं परिणेतारञ्च ददते प्रयच्छन्ति। न हि देवदर्शनं निष्फलं भवतीत्यर्थः ॥ ५ ॥

हृत्पद्मसद्मन्यधिवास्य बुद्ध्या
दध्यावथैतान्नियमैकताना ।
सुपर्वणां हि स्फुटभावना या
सा पूर्व्वरूपं फलभावनायाः ॥ ६ ॥
सभाजनं तत्र ससर्ज तेषां
सभाजने पश्यति विस्मिते सा ।

पूजानन्तरं पुनरपि ध्यानमाह । हृदिति । अथ पूजानन्तरं नियमैकतानाऽनन्यवृत्तिस्तत्परा सती हृदेव पद्मं तद्रूपे सद्मनि गृहे एतानिन्द्रादीन् बुद्ध्याऽधिवास्याधिष्ठाप्य दध्यौ सर्व्वगतानामपि देवानां हृदये बुद्ध्या समारोपितं रूपं ध्यानेन साचादकृतेति यावत् । हि यस्मात् सुपर्वणां देवानां या स्फुटा भावना ध्यानबलेन प्रत्यचता सा फलभावनायाः कार्य्यसिद्धेः पूर्व्वरूपं प्रथमं स्वरूपं । कारणस्य कार्य्यापेचया नियतप्राग्भावित्वाद्देवानां प्रत्यचतायाः कार्य्यमात्रं प्रति कारणत्वात् कारणसामग्रीरूपां देवप्रत्यचतां ध्यानेनाकृतेत्यर्थः । पूजायाः पूर्व्वमनन्तरञ्च ध्यानस्य दृष्टत्वात् अचानित्यस्यास्य च श्लोकस्य न पौनरुक्त्यं । उपान्वध्याङ्वसः इत्यत्र (पा० १।४।४८) अण्यन्तस्य वसेर्ग्रहणात् स्वहस्तदत्ते मुनिमासने इति च ण्यन्तस्य वसेः प्रकृत्यन्तरत्वात् हृत्पद्मनीत्याधारस्य न कर्म्मत्वं ॥ ६ ॥

इदानीं देवपूजामाह । सभाजनमिति । सा तत्र स्वयम्वरस्थाने अकस्मादेव देवपूजारम्भाद् अत्यादरेण च पूजनाद्विस्मिते

आमुद्यते यत्सुमनोभिरेवं
फलस्य सिद्धौ सुमनोभिरेव ॥ ७ ॥
वैशद्यहृद्यैर्म्रदिमाभिरामै-
रामोदिभिस्तानथ जातिजातैः ।

साश्चर्ये सभाजने सभालोके पश्यति सति समनादृत्य वा तेषां देवानां सभाजनं प्रीत्याऽऽराधनं ससर्ज चक्रे। यद्यस्मात् फलस्याभीष्टस्य सिद्धौ दाने सुमनोभिः शोभनचित्तैरेवम्भूतैरेव सद्भिः सुमनोभिर्देवैः एवमत्यादरपूजनेन कृत्वा आमुद्यते हृष्टैर्भूयते तस्मादेवमपूजयदित्यर्थः । एवमेवैवंमत्येवेत्येवकारयोजना वा । पुष्पैरपि फलसिद्ध्यर्थमामुद्यते विकस्वरीभूयते। सभाजने। यस्य च भावेनेति (पा० २।३।३७) षष्ठी चानादर इति (पा० २।३।३८) वा सप्तमी ॥ ७ ॥

वैशद्येति। अथ सा नवीनैर्नवैः स्तवैः स्तुतिश्लोकरूपैः प्रसूनस्तवकैः पुष्पगुच्छैः स्तुतिश्लोकैः पुष्पगुच्छैश्च वा तानिन्द्रादीन् आनर्च। किं विधैः। वैशद्येन स्पष्टतया प्रसादगुणेन हृद्यैः सहृदयहृदयप्रियैः। अथ च शुभ्रत्वेन मनोज्ञैः। तथा म्रदिम्ना शिष्टटवर्गादिवर्णरहितश्रुतिमधुरवर्णरचनाजनितेन माधुर्येण। अथ च सौकुमार्येणाभिरामैरत एवामोदिभिर्हर्षजनकैः। अथ च सौगन्ध्यसहितैः। तथा जातैः षड्विंशत्यक्षरजनितदण्डकादिगुणादिजातिभिर्निष्पन्नैः। अथ च जातीकुसुमैः। तथा आर्याविशेषरूपया गीत्या चञ्चिता युक्ताः षट् पदाः षट्चरणाः येषा

आनर्च गीत्यन्वितषट्पदैः सा
स्तवप्रसूनस्तवकैर्नवीनैः ॥ ८ ॥
भक्त्या तयैव प्रससाद तस्या-
स्तुष्टं स्वयं देवचतुष्टयं तत्।
स्वेनानलस्य स्फुटतां यियासोः
फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ ९ ॥

यत्र। अथ च गुञ्जन्मधुकरैः। वैशद्यं शब्दार्थालङ्कारापशब्द-भावदोषराहित्यं तेन मनोज्ञैर्वा। जातिः छन्दसि सामान्ये मालत्याङ्गोत्रजन्मनोः। गीतिश्छन्दसि गाने चेति विश्वः। हृद्येति। हृदयस्य प्रिय (पा० ४।४।९५।) इति यत् हृदयस्य हृल्लेखेति (पा० ६।३।५०।) हृदादेशः अभिरम्यते यैस्तैरभिरामैः। अ-कर्त्तरि च कारके (पा० ३।३।१९।) इति चकारादसञ्ज्ञा-यामपि करणे घञ्। ज्यात्यादिलक्षणं छन्दोग्रन्थे ज्ञातव्यं। न वा कैरिति पाठे कैर्वा स्तवप्रसूनस्तवकैर्नानर्च अपि तु नानाप्र-कारैःस्तवप्रसूनस्तवकैश्चापूपुजदित्यर्थः ॥ ८ ॥

भक्त्येति। तस्याः पातिव्रत्यादिगुणैरादावेव भक्तिनिर-पेक्षं स्वयमात्मनैव तुष्टं तदिन्द्रादिदेवचतुष्टयं तस्यास्तयैवाल्पी-यस्यापि भक्त्या पुनः प्रससाद प्रसन्नमभूत्। अल्पीयस्यापि भक्त्या प्रसन्नतायां दृष्टान्तमाह। खलु यस्मात् स्वेनात्मनैव स्फुटतां प्राकट्यं यियासोर्यातुमिच्छतः सञ्चयङ्कसन्धुक्षणतया आसन्न-प्रज्वलनस्यानलस्य वह्नेः कियती सन्धुक्षणार्थं फूत्कृतेर्मुखपवनस्या-

प्रसादमासाद्य सुरैः कृतं सा
सस्मार सारस्वतसूक्तिसृष्टेः।
देवा हि नान्यद्वितरन्ति किन्तु
प्रसद्य ते साधुधियं ददन्ते॥ १०॥

पेक्षा स्यात् भवेत् अपि तन्वैव। तादृशोऽग्निर्द्विचैरेव फूत्कारैः सन्धुक्षितो दीप्यतेतरामित्यर्थः। तस्मात् स्वतः प्रसन्नस्यान्यथापि भक्त्या पुनः प्रसन्नत्वं युक्तमित्यर्थः। तस्याः स्विवादय ते पवित्रात् प्रागेव दृष्टा झटिति प्रसेदुरित्यपि पाठः स्पष्टार्थः॥ ८॥

प्रसादफलमाह। प्रसादमिति। सा भैमी सुरैः कृतं प्रसादमासाद्य सरस्वत्या इमाः सारस्वत्यस्ताश्च ताः सूक्तयश्च शोभनोक्तयः श्लेषवाक्यानि तासां सृष्टेर्निर्माणस्य रचनां इत्यर्थं सस्मार। श्लेषार्थे सन्देहं परित्यज्य गाथाक्रमेणेन्द्रादींश्चतुरोऽपि ज्ञात्वा पञ्चमो नल इत्यजानादित्यर्थः। देवीवचनस्मरणरूपः को नाम प्रसाद इत्यत आह॥ हि यस्मात् देवा अन्यत्किञ्चिन्न वितरन्ति ददति किन्तु ते देवाः प्रसन्ना भूत्वा साध्वीं कार्यसाधिकां धियं बुद्धिमेव ददन्ते। तदुक्तं महाभारते॥

"न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यन्तु रक्षितुमिच्छन्ति सुबुद्ध्या योजयन्ति तमिति।"

तस्मादयमेव प्रसादो युक्त इत्यर्थः। सृष्टेः। अधीगर्थेति (पा॰ २।३।५२।)कर्मणि षष्ठी। ददन्ते। दद दाने इत्यस्य रूपं॥ १०॥

शेषं नलं प्रत्यमरेण गाथा
या या समार्था खलु येन येन।

स्मरणमेव विशदयति। शेषमिति॥ शेषं पंचमं सत्यनलं प्रति लचीकृत्य ब्रूमः। किमित्यादिराकर्ण्येति यावत्। एष इत्यादिः साधारणीमिति यावत्। दण्डमित्यादिर्गुम्फमिति यावत्। या सर्वेत इत्यादिः शङ्केति यावत्। या या गाथा प्रसादात् पूर्वं येन येनेन्द्रादिदेवेन सह समार्था तुल्यार्था सरस्वत्योक्तेति शेषः। सा भैमी तां तां ब्रूम इत्यादिगाथां ततः प्रसादानन्तरं तदन्येन तस्मात्तस्मादिन्द्रादिरूपान्मुख्यादर्थादन्येन क्षेपशक्त्या प्रतिभासमानेन नलरूपेणार्थेन सह खलु निश्चितमलगन्तीमसम्बद्धार्थां विशेषं प्रति स्वस्वाकारधारणात् भिन्नमिन्द्रादिदेवं प्रतिसन्धे योजयामास। इयमेतस्य गाथेयमेतस्य गाथेति सम्बन्धं चकारेत्यर्थः। ब्रूम इत्यादौ साल्वां विलोक्येति यावत्। नलस्य सर्व्वत्रानुस्यूतत्वादिन्द्रादीनान्तु चतसृषु चतसृष्वेव स्वस्वगाथासु अनुस्यूतत्वात्तां तामिन्द्रादिगाथां तदन्येन वज्रादिना सहासलगन्तीं विशेषमजानात्। येन्द्रेण नलेन चाससमानार्था तामिन्द्रविषयामेव सस्मार॥ एवमितरदेवचितयेऽपि प्रत्येकगाथामेकविषयामेव सस्मार। एवं चतसृष्वपि गाथासु नलस्यानुवृत्तेरिन्द्रादीनाञ्च व्यावृत्तेरावापोद्वापाभ्यामेते देवा अयमेव नल इत्यज्ञासीदित्याशय इति वा। प्रतिश्लोकं गाथात्वेऽपि चतुर्भिश्चतुर्भिःश्लोकैरेकैकस्य प्रतिपादनादेक-

तां तां तदन्येन सहालगन्तीं
ततो विशेषं प्रतिसन्दधे सा ॥ ११ ॥
एकैकवृत्तेः प्रतिलोकपालं
पतिव्रतात्वं जगृहुर्दिशां याः।

गाथात्वसमारोपात्प्रत्येकपर्य्यवसानादेकवचनं। यद्वा पञ्चमं नलं प्रति या या, अत्याजि, येनामुना, यत्त्वगिडमा, किन्ते तथेत्यादिका, गाथा येन येनेन्द्रादिना सह सम्बद्धार्था तदन्येन वज्रादिना सहालगन्ती तां तां गाथामेव विशेषं भेदं जानाति स्म। एकैकस्या गाथाया एकैकदेवपर्य्यवसानाच्चतसृणामपि गाथानां नले पर्य्यवसानात्परिशेषप्रमाणादयं पञ्चम एव नल इति विशेषमज्ञासीदित्यर्थः। अस्मिन् पद्येऽमुमेवार्थमुक्तिविशेषेण प्रकटयितुमाह। एकैकेति। उत्तरश्लोकस्यावतारिका कर्त्तव्या॥११॥

एकैकेति। या गाथा एकैकवृत्तेः एकस्मिन्नेकस्मिन्निन्द्रे अग्नौ यमे वरुणे च वर्त्तमानत्वात् प्रतिलोकपालमेकैकमिन्द्रादिदिक्पालं प्रति दिशामैन्द्र्यादीनां पतिव्रतात्वं जगृहुरङ्गीचक्रुः। प्राच्यादीनामिन्द्रादिप्रतिनियतदेववृत्तितया यत् पातिव्रत्यं तत्पातिव्रत्यं तेनैवाकारेण या अत्याजीत्यादि गाथा अङ्गीचक्रुरित्यर्थः। ता गाथा मिलिताश्चतस्रोऽपि तदा प्रसादादसमाप्रमावैकस्य केवलस्य नलस्य वश्या नलैकप्रवणा नलैकाभिधायिनीरेव वेद ज्ञाऽज्ञासीत्। का इव आशा इव। मिलिता दिशो यथा नलस्य वशाः ऐन्द्र्यादीनां दिशामिन्द्रादिरेकैकप्रभुः

वेद स्म गाथा मिलितास्तदासा-
वाशा इवैकस्य नलस्य वश्याः ॥ १२ ॥
या पाशिनैवाशनिपाणिनैव
गाथा यमेनैव सहाग्निनैव।

सेऽपि सर्व्वासां दिशां चक्रवर्त्तिनलैकवश्यत्वं यथा तथा गाथानामपीत्यर्थः। आशा अर्थिनां मनोरथाः वदान्यतया नलस्य यथा वश्या इति वा। दासा इति वा पाठः। भ्रान्तिदशायामुभयार्थत्वं प्रमादानन्तरं तु नलैकार्थत्वं वेद स्मेति भावः। दिशां पातिव्रत्यं गाथाभिर्गृहीतमित्यर्थः ॥ १२ ॥

येति। किं त इत्यादिर्या गाथा पाशिनैव वरुणेनैव समा तुल्यार्था न त्वन्येनेन्द्रादिना। या चाऽत्याजीत्यादिरशनिपाणिनेन्द्रेणैव समा न त्वन्येन देवेन। या च यच्चपिङ्मेत्यादिर्यमेनैव समा न त्वन्येन। या च येनामुनेत्यादिरग्निनैव तुल्या न त्वन्येन। नलस्य सम्बन्धिनीं मिलितां समुदितां चतुष्टयरूपां तां गाथामेव तदा दैवप्रसादादनन्तरं सैषा भैमी नलस्य विशेषाय इन्द्रादिभ्यो भेदज्ञानाय मेने। इन्द्रादीनामेकैकस्यामेव गाथायां वर्त्तमानत्वात्। नलस्य तु सर्व्वत्रानुगतत्वादत्याजीत्यादिगाथाचतुष्टयप्रतिपाद्यो यः स एव नल इति तामेव गाथां मिलितां नलस्य भेदज्ञापिकामज्ञासीदिति भावः। या नलस्य गाथेति वा सम्बन्धः। या पाशिनेवेन्द्रेणैव यमेनैवाग्निनैव समा गाथा नलस्य सम्बन्धिनीं मिलितां तामेव अनलस्य नलव्यतिरिक्तस्ये-

तामेव मेने मिलितां नलस्य
सैषा विशेषाय तदाऽनलस्य ॥ १३ ॥
निश्चित्य शेषं तमसौ नरेशं
प्रमोदमेदस्वितरान्तराऽभूत्।

न्द्रादेर्भेदाय मेने। मिलितया तया कला नले निश्चिते सति नान्तरीयकत्वात्तदितरे देवा अपि तथैव निश्चिता इति भाव इति वा। मिलितां तामेव गाथां नलस्य विशेषाय तथा नलेतरस्येन्द्रादेर्भेदाय मेने इति वा व्याख्येयं। या पाशिनेत्यादेरेवकारात् परस्परसमुच्चयार्थानप्यर्थानङ्गीकृत्य या नलसम्बन्धिनी गाथा पाशिनापीन्द्रेणापि यमेनाप्यग्निनापि तुल्यार्थाऽभूत्तां देवः पतिरित्यादिमिलितां पश्चार्थां गाथां देवप्रसादादनन्तरं नलस्यैव विशेषाय मेने। प्रसन्नैर्देवैः स्त्रीयस्त्रीयाकारेषु हृतेषु पूर्वं पश्चार्थत्वेन प्रतिभातामपीदानीमेकस्य नलस्यैव प्रतिपादिकामज्ञासीदिति भावः। देवः पतिरितीयमेव गाथा विषय इति शेषं। अवधारणार्थेष्वप्येवकारेषु इयमेव गाथा विषय इति व्याख्येयं। अयं श्लोकः निश्चित्य शेषं, एकैकहत्तेरिति द्वाभ्यां श्लोकाभ्यां समानार्थः। अनलस्येति। प्रत्येकपर्यवसायित्वादेकवचनं ॥ १३ ॥

निश्चित्येति। असौ भैमी शेषमवशिष्टं तं पञ्चमं पूर्वोक्तप्रकारेण नरेशं नलं निश्चित्य प्रमोदेन प्रकृष्टहर्षेण मेदस्वितरं अत्यन्तमपरिपुष्टं मांसलमन्तरं मानसं यस्याः एवंविधाऽभूत्।

देव्या गिरां भावितभङ्गिराख्य-
च्चित्तेन चिन्तार्णवयादसेदम्॥ १४॥
सा भङ्गिरस्याः खलु वाचि काऽपि
यद्भारती मूर्त्तिमतीयमेव।
श्लिष्टं निगद्यादृतवासवादीन्
विशिष्य मे नैषधमप्यवादीत्॥ १५॥

नले निश्चिते सति नितरां हृष्टाऽभूदित्यर्थः। रलयोः सावर्ण्यात् नरस्यासावीशश्च तं इति वा। अनन्तरञ्च देव्याः सरस्वत्या गिरां वचनानां भाविता पर्य्यालोचिता भङ्गिः प्रकारो यया विज्ञानाशया गिरां देव्याः सरस्वत्या वा विज्ञातवचोरचना-विशेषा सती नलनिश्चयात् पूर्व्वं चिन्तार्णवयादसा चिन्तासमुद्र-जलजन्तुरूपेण, नलनिश्चये सत्यपि तत्प्राप्त्युपायचिन्तासमुद्र-जलचरेण वा चित्तेन मनसा इदं वक्ष्यमाणप्रकारं आख्यत् ऊचे। मनस्येवैवमचिन्तयदिति भावः। चित्रार्णवेति पाठे वि-चित्रदेवीवचनानुस्मरणजनिताश्चर्य्यसमुद्रजलचरेणेति आश्चर्य्ये-णेत्यर्थः॥ १४॥

किमाख्यदित्याह। सेति। खलु निश्चितं सा प्रसिद्धा मूर्त्ति-मती भारती सरस्वती देवी, इयमेवेयं मूर्त्तिमती सा भारत्ये-वेति भारतीत्वं विधेयं। यद्यस्मादस्या वाचि काऽपि लोकोत्तरा भङ्गिः रचनाऽस्ति तस्मादित्यर्थः। यस्मादियमेव मूर्त्तिमती भारती तस्मादस्या वचने निश्चितं सा कापि भङ्गिरस्तीति वा।

जग्रन्थ सेयं मदनुग्रहेण
वचःस्रजः स्पष्टयितुं चतस्रः।

तामेव भङ्गीमाह। यत् श्लिष्टमुभयसम्बद्धं वचो निगद्य स्पष्टमुक्का वासवादीनाहृतगौरवेणावर्णयत्। विशिष्य विशेषं कृत्वा तेभ्यो विशिष्य वा यदत्याजीत्यादिश्लोकचतुष्टयेन मे मम मर्त्यं वा नैषधमप्यवादीत्। सर्व्वलोकपालांशस्य नलस्यैव वर्णनं कृतमिति युक्तमिति भावः॥ १५॥

जग्रन्थेति। सेयं वाणी मयि मम वाऽनुग्रहेण कृपया स्पष्टयितुं नलं स्पष्टं ज्ञापयितुं चाश्वतस्रोऽत्याजीत्यादीर्वचःस्रजो वचनमाला जग्रन्थ ससर्ज। तासु मध्ये द्वे ते वचःस्रजौ नामग्राहं मया नलमुदीरितं श्रमुष्मिन्नले सहजरागभरादित्येवंरूपे मही महेन्द्रे नलमुदीरितमित्येवंरूपे वा नलं लक्षयितुं ज्ञापयितुं क्षमेते समर्थे भवतः। अहो आश्चर्य्यं। ममैवायमेतावन्तं कालं मदीयान्मोहः अबोधः। नले स्पष्टं कथितेऽपि एतावन्तं कालं मम निश्चयो नाभूदित्याश्चर्य्यमित्यर्थः। पूर्व्वोक्ता एव चतस्रो वचःस्रजः स्पष्टयितुं तदर्थं स्पष्टीकर्त्तुं ये द्वे ते वचःस्रजौ, त्वं यार्थिनी, देवः पतिरित्येवंरूपे सेयं देवी जग्रन्थ, ते द्वे वचःस्रजौ नलं लक्षयितुं क्षमे समर्थे। त्वं यार्थिनीत्यनेन प्रथमव्याख्याने स्फुटं नलस्यैव प्रतिपादनात् व्याख्यानान्तरेऽपि च देवान् परित्यज्य सम्यक् वा नल एव स्वीकरणीय इति यावदर्थे नलस्यैव प्रतिपादनाद्देवः पतिरित्यनेनापि लोकपालांशत्वाद्-

द्वे ते नलं लक्षयितुं क्षमेते
ममैव मोहोऽयमहो महीयान्॥ १६ ॥
श्लिष्यन्ति वाचो यदमूरमुष्याः
कवित्वशक्तेः खलु ते विलासाः।

कस्यापि नलस्यैव पञ्चरूपत्वमभवादिन्द्रादेश्चासम्भवान्नलादन्यस्तव कतरो वरोऽपि त्वन्यो नास्तीत्यपि नलस्यैव प्रतिपादनादित्यर्थ इति वा। अत्र पूर्वस्तच्छब्दो विशेष्य वचःस्रक्परामर्शार्थः। उत्तरस्तु तत्परामर्शकोऽपि विधेयसंस्पर्शी। यत्तदोश्च नित्यसम्बन्धात् यच्छब्दः सम्बध्यते। श्रन्थि ग्रन्थि दम्भि स्वञ्जीनामिति वक्तव्यमिति (पा० १।२।६। वा० १) नित्यमपितो लिटः कित्त्वविधानाज्जग्रन्थेति रूपं। संयोगात्परस्य लिटो वा कित्त्वमिति केचिदिति अपितो लिटः कित्त्वविधानाद्वा नलोपाभावः समर्थनीयः। युक्त्यन्तरेण वा समाधातव्यं॥ १६ ॥

श्लिष्यन्तीति। अमुष्या देव्या अमूः पूर्वोक्ता वाचः यदनेकार्थतया श्लिष्यन्ति श्लेषं भजन्ते खलु निश्चितं कवित्वशक्तेः काव्यनिर्माणसहजप्रतिभाया विलासाः विजृम्भणानि। कवित्वशक्तिं विना श्लेषवचोरचना निर्मातुमशक्येत्यर्थः। किल यस्माद्व्यतिभेदिनोऽपि परस्परापेक्षया नलापेक्षया वा विशेषेण सहस्रनेत्रत्वादिना अतितरां भिन्ना अप्यमी लोकपालाः भूपालस्य नलस्य लीला विलासान्समाविशन्ति अनुभवन्ति नलाकारं बिभ्रति। अय च नलवर्णकेषु श्लोकेषु मूर्त्तीभूय प्रविष्टा इव

भूपालखीलाः किल लोकपालाः
समाविशन्ति व्यतिभेदिनोऽपि ॥ १७ ॥
त्यागं महेन्द्रादिचतुष्टयस्य
किमभ्यनन्दत् क्रमश्चचितस्य ।
किं प्रेरयामास नले च तन्मां
का श्रुक्तिरस्या मम कः प्रमोहः ॥ १८ ॥

दृश्यन्त इत्यर्थः । अतः श्लेषवशान्मम भ्रमोऽभूदिति भावः ।
श्लेषवशान्नललीलाः सन्तो लोकपाला गाथाः समाविशन्तीति
वा । अन्योन्यं भिन्ना अपि लोकपाला नललीलाः सन्तोऽंशेन
नृपत्वं प्राप्ताः सन्तः किलैकीभवन्ति । अतो नलस्यैव लोकपालां-
शतया तत्र युक्तानि देवीवचांसि श्लेषं वदन्तीति कवित्वशक्ति-
विलासा एव ॥ १७ ॥

त्यागमिति । इयं देवी अत्याजि येनेत्यादिश्लोकचतुष्टयेन
त्वं यार्थिनी, देवः पतिरित्यादिना गाथाद्वयेनापि क्रमेण सू-
चितस्य प्रत्यायितस्येन्द्रादिनलचतुष्टयस्य पूर्व्वव्याख्यानप्रकारेण
परित्यागं किं कथमभ्यनन्दत् युक्तमेतदिति स्तौति स्मेत्यर्थः ।
नले मां पूर्व्वव्याख्यानप्रकारेण प्रेरयामास च । किं कथं प्रेर-
यामास एकेनैव वाक्येन द्वयमिति कथंचकाराश्चर्य्यमेतदित्यर्थः ।
किं शब्दावचाश्चर्य्ये । नले च नल एवेति । चकारोऽवधारणार्थो
वा । तत्तस्मात्कारणादस्या देव्याः का सूक्तिः शोभनवचन-
निर्माणचातुरी अपि तु लोकोत्तरा । मम मत्कृते मोहश्च कः,

परस्य दारान् खलु मन्यमानै-
रस्पृश्यमानाममरैर्धरित्रीम् ।
भक्त्येव भर्त्तुश्चरणौ दधानां
नलस्य तत्कालमपश्यदेषा ॥ १९ ॥

अपि तु सोऽपि लोकोत्तरः । अस्या इयमुक्तिः क्व मम मोहस्य केत्यर्थः । एवं देव्या इन्द्रादिचतुष्टयस्य स्वयं परित्यागेऽभ्यनुज्ञाते नलस्य च वरणेऽभ्यनुज्ञाते ममैवं मोहो न युक्त इत्यर्थः । पूर्वं मोहोऽभूदिदानीं तु निवृत्त इत्याशयः । इन्द्रादित्यागं किमर्थमभ्यनन्दत् नले च मां किमर्थं प्रेरयामास उभयमपि तावचकार । तदेतन्मदनुग्रहार्थमेवेति भाव इति वा । त्यागं । यजेः कुषिपस्नेः ७ । ३ । ५२ । इति कुत्वं ॥ १८ ॥

एवं विचारानन्तरं किमभूत्तचाह । परस्येति ॥ एषा भैमी तत्कालं देवप्रसादसमये एवम्भूतां धरित्रीं पृथ्वीं अपश्यत् । किम्भूतां । परस्य नलस्य दारान् मन्यमानैरिव परनारीबुद्ध्येवामरैरिन्द्रादिभिरस्पृश्यमानां । खलु इवार्थे । तथा भूपतिलाद्भर्त्तुर्नलस्य भक्त्येव सेवाबुद्ध्येव चरणौ दधानां धारयन्तीं । अन्यापि भक्त्या भर्त्तुश्चरणौ धारयति । देवत्वात् सहजो भूम्यस्पर्शो मनुष्यत्वात् सहजो भूमिस्पर्शोऽन्ययोरुपेक्षितः । देवमनुष्यचिह्ने दर्शिते । दारानिवेति वा पाठः ॥ १९ ॥

सुरेषु नापश्यदवैक्षताक्ष्णो-
र्निमेषमुर्वीभृति सम्मुखी सा।
इह त्वमागत्य नले मिलेति
सञ्ज्ञानदानादिव भाषमाणम्॥ २०॥
नाबुद्ध बाला विबुधेषु तेषु
चोदं चितेरैक्षत नैषधे तु।
पत्ये सृजन्त्याः परिरम्भमुर्व्याः
सम्भूतसम्भेदमसंशयं सा॥ २१॥

सुरेष्विति। सा भैमी सम्मुखी सती बुद्धिपूर्वं विलोकयन्ती सुरेषु अक्ष्णोर्निमेषं नेत्रपक्ष्मसङ्कोचं नापश्यत् नावैक्षत। उर्वीभृति नले तु अवैक्षत। देवानामनिमेषत्वान्मनुष्याणाञ्च सनिमेषत्वादित्यर्थः। तत्रोत्प्रेक्षते। किम्भूतं निमेषं। सञ्ज्ञानदानात् अकारणसूचकाक्षिपक्ष्मचेष्टाकरणात् इति भाषमाणमिव। इति किं। हे भैमि त्वमागत्य इह मया चिह्निते नले मिल संयुक्ता भवेति॥ २०॥

नेति। सा तेषु विबुधेषु देवेषु चितेः चोदं भूरेणुं सम्बन्धं नाबुद्ध न ददर्श। नैषधे तु ऐक्षत ददर्श। देवानां रजःसम्बन्धाभावात्। नराणां तत्सम्बन्धादित्यर्थः। तत्र असंशयमुत्प्रेक्षते। पत्ये नलाय परिरम्भमालिङ्गनं सृजन्त्या ददत्या उर्व्याः सकाशात्सम्भूतसम्भेदमिव सञ्जातसम्बन्धमिव आलिङ्गनवशात्पृथ्व्याः संसृष्टे लग्न इवेत्यर्थः। पत्ये। क्रियया यमभिप्रैति स सम्प्रदा-

स्वेदः स्वदेहस्य वियोगतापं
निर्व्वापयिष्यन्निव संसिसृक्षोः ।
हीराङ्कुरश्चारुणि हेमनीव
नले तयालोकि न दैवतेषु ॥ २२ ॥
सुरेषु मालाममलामपश्यन्-
नले तु बाला मलिनीभवन्तीम् ।

नमिति (पा० १।४।३२।वा० १) सम्प्रदानत्वं ॥ २१ ॥

स्वेद इति। तया नले स्वेद आलोकि न दैवतेषु देवेषु। किं करिष्यन्निव। संसिसृक्षोर्भैम्यालिङ्गनं कर्त्तुमिच्छोः स्वदेहस्य नलशरीरस्य वियोगतापं भैमीवियोगजनितं ज्वरं निर्व्वापयिष्यन्निव शमयिष्यन्निव। देवेषु स्वेदस्याभावान्नरेषु च तत्सद्भावादित्यर्थः। उदकं हि तापं शमयति। नलालिङ्गनोत्सुकस्य भैमीदेहस्य वा सात्त्विकस्वेदयुक्तो नलो यथा मान्न एवेति भैम्या विरहज्वरशान्तिः। उत्प्रेक्षते। चारुणि अत्युत्तमे हेमनि सुवर्णे खचितो हीराङ्कुर इव। अतिगौरदेहरोमकूपस्थस्वेदजलकणझलत्कारो हेमखचन्द्राङ्कुरत्वेनोत्प्रेक्षितः। देवता एव दैवतानि। प्रज्ञादित्वात्स्वार्थे (पा० ५।४।३८) अण्। क्वचित् स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति (पा० ५।३।६८) परिभाषया षण्ढत्वं ॥ २२ ॥

सुरेष्विति। बाला भैमी सुरेषु मालां अमलां निर्म्मलामम्लानां चापश्यत् नले तु मलिनीभवन्तीं पूर्व्वमम्लानां काल-

इमां किमासाद्य नलोऽद्य म्रदीं
श्रद्धास्यते मामिति चिन्तयेव ॥ २३ ॥
श्रियं भजन्तां कियदस्य देवा-
श्छाया नलस्यास्ति तथापि नैषाम्।

क्षेपणोष्मणा च म्लानां मलिनाञ्च जायमानां अपश्यत्। सुराणामम्लानकुसुमत्वादित्यर्थः। उत्प्रेक्षते। इति चिन्तयेव मलिनीभवन्तीं। इति किं। नलो ऽद्य स्वयम्वरदिने म्रदीं मत्सकाशादप्यतिम्रदङ्गीं इमां भैमीं आसाद्य प्राप्य मां मालां श्रद्धास्यते किं आदरेणाङ्गीकरिष्यति किं अपि तु नेति ॥ २३ ॥

श्रियमिति। देवा अस्य नलस्य श्रियं शोभां कियद्भजन्तां आश्रयन्तु अपि तु न किञ्चिदपि यस्मात् एषां देवानां नलस्य सम्बन्धिनी तथा तादृशी अतिप्रसिद्धा छायापि कान्तिलेशोऽपि नास्ति। येषां यदीयकान्तिलेशोऽपि नास्ति ते तदीयां शोभां कथमाश्रयन्तामपि तु न कथञ्चिदित्यर्थः ॥ अथ च एषां नलसम्बन्धिनी आदर्शादिस्थिता छाया प्रतिबिम्बमपि नास्ति। प्रतिबिम्बतुल्यास्ते न भवन्तीति यावत्। येषां यदीयप्रतिबिम्बेनापि न साम्यं ते तदीयबिम्बश्रियं कथं भजन्तामित्यर्थः॥ अथ चास्य श्रियं किञ्चिद्भजन्तां नटवत्तद्रूपधारणात् किञ्चिच्छोभन्तां। तथापि स्वाभाविकी नलस्य कान्तिरेषां नास्ति ॥ अथ चास्य सम्पदं सङ्क भजन्तां तथापि नलस्य कान्तिरेषां नास्ति।सम्पदा तुल्यत्वेऽपि कान्त्या तुल्यत्वं नास्तीत्यर्थः॥

इतीरयन्तीव तया निरैचि
सा नैषधे न त्रिदशेषु तेषु ॥ २४ ॥
चिह्नैरमीभिर्नलसंविदस्याः
संवादमाप प्रथमोपजाता ।
सा लक्षणव्यक्तिभिरेव देव-
प्रसादमासादितमप्यबोधि ॥ २५ ॥

अथ चास्य श्रियं कियद्दरू भजन्तां तथापि भूमौ तमःप्रकृतिः छाया देहव्यवहितरविप्रभोपलक्षितः श्यामाकारो नलस्यास्ति एषां तेजोरूपत्वेन नास्ति। तेजोराशित्वेन च नराणां विद्यत इत्यर्थः। तया भैम्या इति पूर्व्वोक्तप्रकारैरेरयन्तीव कथयन्तीव यथाहं वर्त्ते स एव नल इति प्रकाशयन्तीव सा छाया नैषधे निरैचि दृष्टा तेषु त्रिदशेषु न। छायापि स्वाभावभावाभ्यां देवत्वनरत्वव्यञ्जिका जातेत्यर्थः। कियदिति क्रियाविशेषणं ॥ २४ ॥

चिह्नैरिति। अस्या भैम्याः प्रथमोपजाता दूत्यकालोत्पन्ना इतरनलतुल्याभागिति पूर्व्वसर्गोक्ततर्कोत्पन्ना वा देवीश्लोकानुसन्धानोत्पन्ना वा अयमन्य एव नल इति संवित् बुद्धिरमीभिः पूर्व्वोक्तैर्भूस्पर्शादिभिश्चिह्नैः संवादं स एवायं नल इति अनुव्यवसायरूपं आप। पूर्व्वं मम नलोऽयमिति प्रत्ययो युक्त एव जात इति। एतैश्चिह्नैर्निश्चितवतीत्यर्थः। अनन्तरञ्च सा भैमी देवत्वनरत्वज्ञापकानां लक्षणानां निमेषत्वभूस्पर्शादिचिह्नानां व्यक्तिभिः प्रकटनैरेवासादितं प्राप्तं देवप्रसादमप्यबोधि। एता-

नले निधातुं वरणस्रजन्तां
स्मरः स्म रामां त्वरयत्यथैनां।
अपत्रपा तां निषिषेध तेन
द्वयानुरोधं तुलितं दधौ सा॥ २६॥
स्रजा समालिङ्गयितुं प्रियं सा
रसादधत्तैव वङ्कप्रयत्नम्।

वत्पर्य्यन्तं भूस्पर्शादिचिह्नानि न दृष्टानि इदानीन्तु दृश्यन्ते तस्मान्मम पूजया देवाः प्रसन्ना इत्यवजानादित्यर्थः॥ २५॥

नले इति। अथ स्मरः तां वरणस्रजं वरणमधूकमालां नले निधातुं निक्षेप्तुं एनां रामां भैमीं त्वरयति स्म शीघ्रं प्रेरयामास। अपत्रपा अन्यतो लज्जा च तां भैमीं निषिषेध निवारयामास। सर्व्वस्मिन् जने पश्यति सति कथमहमेनं वृणे इति लज्जावशात्तस्या बुद्धिरुदभूदित्यर्थः। तेन कारणेन सा भैमी द्वयानुरोधं स्मरलज्जयोराज्ञा प्रवृत्तिनिवृत्तिसन्देहं तुलितं समानमेव दधौ। भावसन्धिवशादुत्कण्ठापत्रपाभ्यां मालानिक्षेपानिक्षेपदोलायिताभूदित्यर्थः। अन्योऽपि तुल्याभ्यां द्वाभ्यां विरुद्धकार्य्यद्वयार्थं प्रेषितो द्वयोरनुरोधाद्दोदासीन्यमेवावलम्बते। तामिति पुनरुपादानं वाक्यान्तरत्वात् समर्थनीयं। निषिषेध। स्यादिष्वभ्यासेनेति (पा० ८।३।६) षत्वं॥ २६॥

स्रजेति। सा भैमी रसात् प्रीत्या स्रजा मधूकमालया प्रियं नलं समालिङ्गयितुं वङ्कप्रयत्नं भूयांसमुद्योगं अधत्तैव धृत-

सम्भ्रमत्रपाभ्यामभवत्तदीये
स्पन्दस्तु मन्दोऽपि न पाणिपद्मे ॥ २७॥
तस्या हृदि व्रीडमनोभवाभ्यां
दोलाविलासं समवाप्यमाने।
श्रितं धृतैणाङ्ककुलातपत्रे
शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ २८ ॥

रैव। तु पुनस्तदीये पाणिपद्मे सम्भ्रमत्रपाभ्यां हेतुभ्यां मन्दोऽप्यल्पोऽपि स्पन्दश्चलनं नाभवत् ॥ २७ ॥

तस्या इति। अधीश्वरी समर्था भूयसी अधीश्वरस्य कस्यचिद्राज्ञो वा श्रीर्लक्ष्मीस्तस्या भैम्या हृदि स्थितं वर्त्तमानं शृङ्गारं शृङ्गाररसं आलिङ्गत्। किम्भूते हृदि। व्रीडमनोभवाभ्यां दोलाविलासं आन्दोलजनितां क्रीडां समवाप्यमाने प्राप्यमाणे। कोटिद्वयमध्यात् प्रवृत्तिनिवृत्तिसन्देहं प्राप्ते इत्यर्थः। तथा एणाङ्कश्चन्द्रस्तस्य कुलं कुलोत्पन्नो नल इत्यर्थः। स एवातपत्रं धृतं एणांककुलातपत्रं येन तस्मिन्। शृङ्गाररस एव सम्राट् भैमीहृदयमेव सिंहासनं नल एव छत्रं लज्जाकामौ दोलाया उभयपार्श्वेत आन्दोलनार्थं स्थितौ चामरधारिणौ वा। तस्या भावसन्धिसम्वलितः शृङ्गारो राजवदुज्जृम्भत इति भावः। दोला दोलनेव भोगास्त्रयः प्रियमालिङ्गन्ति॥ अधीश्वरस्य नलस्य श्रीरिति वा। अथ पक्षे श्लोकाभ्यां दोलायमानां भैमीं दृष्ट्वा यानो नलः पूर्वं विप्रलम्भशृङ्गारं प्राप्तः ततः सापि

कर: सज्जा सज्जतरस्तदीय:
प्रियोन्मुख: सन् विरराम भूय:।
प्रियाननस्यार्द्धपथं ययौ च
प्रत्याययौ चातिचल: कटाक्ष:॥ २९॥

तस्या: प्रियं चित्तमुपेतुमेव
प्रभूवभूवाखि न तु प्रयातुम्।
सत्य: कृत: स्पष्टमभूत्तदानीं
तयाखिलज्जेति जनप्रवाद:॥ ३०॥

तं तादृशं दृष्ट्वा तदीयशोभाङ्गीकारात् स्वयमपि तादृशो बभूवेति भाव:। आन्दोलिकाछत्रचामरैरयं प्रभुरिति ज्ञायत इत्यर्थ:। श्रितमिति पाठे श्रदीति विषयसप्तमी॥ २८॥

कर इति। सज्जा सज्जतरो नितरां सक्त: कण्ठे निवेशु उद्यत: कृतमालस्तदीय: कर: प्रियोन्मुख: नलसम्मुखं गन्तुं सोऽधोग: सन् भूय: पुनर्लज्जावशाद् विरराम निवृत्त:। तदीयोऽतिचल: कटाक्षश्च प्रियाननस्यार्द्धपथं ययौ च प्रत्याययौ च। दिदृक्षारसादर्द्धमार्गं गतोऽपि लज्जावशान्मध्ये मार्गे समकटाक्षमसन्धाय पुन: प्रत्यावृत्त इति भाव:। अन्योऽप्यतिशो गतागते करोतीति॥ २९॥

तस्या इति। तस्याश्चित्तं प्रियं उपेतुमेव प्राप्तुमेव शक्ति ह पुन: सर्व्वं प्रयातुं प्राप्तुं न प्रभूवभूव समर्थं नाभूत्। स्पष्टमुक्तिरि-यं हि मैव लज्जेति जनप्रवादो लोकापवाद: तया तदानीं

कथं कथञ्चिन्निषधेश्वरस्य
ज्ञात्वास्यपद्मं दरवीचितश्रि।
वागदेवताया वदनेन्दुबिम्बं
त्रपावती साऽक्षत सामिदृष्टं ॥ ३१ ॥
न जानतीवेदमवोचदेनाम्
आकूतमस्यास्तदवेत्य देवी।

नलवरणसमये सत्यः कृतोऽभूत्। अन्यथा लज्जायाश्चित्तधर्मत्वे चित्तस्य नलप्राप्तिरयुक्ता नेत्रस्य च नलप्राप्तिर्युक्तेत्यर्थः। प्रीत्या चित्तं नल एव वर्त्तते परं लज्जावशात् कटाक्षेण विलोकयितुं नाशकदिति भावः। प्रभूवभूव। चौ चेति (पा० ७। ४। २६।) दीर्घः॥ ३०॥

कथमिति। सा भैमी त्रपावती निषधेश्वरस्यास्यपद्मं मुखकमलं कथं कथञ्चिन्महता कष्टेन लज्जाविगमसाहसेन दरवीचितश्रि ईषद्विलोकितशोभं कृत्वा वाग्देवताया वदनेन्दुबिम्बं लज्जया सामिदृष्टमर्द्धदृष्टमक्षत। किञ्चिद्दृष्टा पुनर्व्यावृत्तत्वादर्द्धदृष्टमकरोदित्यर्थः। त्रपावतीत्युभयत्र हेतुः। एतां मालां नलकण्ठे स्थापयेत्याशयेन देवीमुखमर्द्धवीचितं चकारेति भावः॥ ३१॥

न जानतीति। देवी अस्या भैम्यास्तत्पूर्वश्लोकसूचितं आकूतमाशयं अवेत्य ज्ञात्वापि न जानतीव एनां भैमीं प्रतीदमवोचत्। इदं किं। हे भैमि त्रपार्मिप्रतिमीरया लज्जाकमीलरूपजवमि-

भावस्तिरोभिंप्रतिसीरया ते
वितीर्यते लक्षयितुं न मेऽपि ॥ ३२ ॥
देव्याः श्रुतौ नेति नलार्द्धनाम्नि
गृहीत एव त्रपया निपीता ।
अथाङ्गुलीरङ्गुलिभिः स्पृशन्ती
दूरं शिरः सा नमयाञ्चकार ॥ ३३ ॥

कया ते तव भाव आशयः मेऽपि ममापि लक्षयितुं सरस्वत्या अथ च विश्वासस्य सखीभूताया अपि ज्ञातुं न वितीर्यते । त्वं लज्जावशादतिगूढं यत् सूचयसि तन्मयापि न ज्ञायते । ततः किञ्चिल्लज्जां त्यक्त्वा स्पष्टं कथयेति परिहासबुद्ध्या तामेव स्वाशयं बोधयितुमवोचदित्यर्थः । अन्यदपि जवनिकाच्छादितं न ज्ञायते । प्रदीयते लक्षयितुं न मेऽपीति पाठे मे मह्यं । प्रतिसीरा जवनिकेत्यमरः ॥ ३२ ॥

देव्या इति । देव्याः श्रुतौ कर्णे नेति नलस्यार्द्धे नाम्नि गृहीत एव भैम्या उच्चारित एव त्रपया निपीता व्याप्ता सा भैमी लेति द्वितीयमक्षरं उच्चारयितुमक्षमा सती अथानन्तरं सख्या अङ्गुलीः, देव्या वा अङ्गुलीः, स्वीयाङ्गुलीभिरेव स्पृशन्ती स्तनन्ती निविडं पीडयन्ती शिरो दूरमत्यर्थं नमयाञ्चकार । अभिलापप्रतिबन्धे दुःखितत्वाङ्गुलिमेलनं स्वभावोक्तिः ॥ ३३ ॥

करे विधृत्येश्वरया गिरां सा
पान्था पथीन्द्रस्य कृता विहस्य।
वामेति नामैव बभाज सार्थं
पुरन्ध्रिसाधारणसन्विभागम् ॥ ३४ ॥
विहस्य हस्तेन विकृष्य देवी
नेतुं प्रयाताऽभि महेन्द्रमेताम्।
भ्रमादियं दत्तमिवाहिदेहे
ततश्चमत्कृत्य करं चकर्ष ॥ ३५ ॥

कर इति। गिरामीश्वरया वाग्देव्या विहस्य अज्ञाननाटनाद्धास्यं कृत्वा सा करे विधृत्य इन्द्रस्य पथि पान्था पथिका कृता। इन्द्रं प्रति वरणार्थं नीता सा भैमी पुरन्ध्रीणामन्यस्त्रीणां साधारणः समानः सन्विभागः अंशो यस्य पुरन्ध्रिषु वा एवम्भूतं सर्व्वस्त्रीवाचकं वामेति नाम वक्रार्थत्वात् सार्थं नामैव बभाज भेजे। इन्द्रं प्रति देव्या नीयमाना सा वक्राभूदिति भावः। सार्थमेव नाम इति वा। पान्थेति पूर्व्ववत्। पाथेति पाठे, पथे गताविति धातोर्ज्वलादित्वाणी, पथि गन्त्री कृतेत्यर्थः। पुरन्ध्रीति पूर्व्ववत् ॥३४॥

तमेवार्थमुक्तिविशेषेण पुनराह। विहस्येति। वाग्यानन्तरं देवी विहस्य किञ्चिद्धसित्वा एतां भैमीं स्वहस्तेन विकृष्य महेन्द्रमभिलक्षीकृत्य नेतुं प्रयाता प्रस्थिता इन्द्रं प्रापयितुं निर्गता। तत इन्द्रादिगमनोद्योगानन्तरं इयं भैमी चमत्कृत्य किमियमिन्द्रवरणे मां प्रवर्त्तयतीति बुद्ध्या भीता करं स्वहस्तं चकर्ष।

भैमीं निरीक्ष्याभिमुखीं मघोनः
स्वाराज्यलक्ष्मीरधृताभ्यसूयाम्।
दृष्ट्वा ततस्तत्परिहारिणीं तां
व्रीडां विडौजःप्रवणाभ्यपादि ॥ ३६ ॥
त्वत्तः श्रुतं नेति नले मयातः
परं वदस्वेत्युदिताथ देव्या।

आचकर्ष किंभूतमिव करं। भ्रमाद्रज्जुभ्रान्तेः अहिदेहे सर्पशरीरे दत्तमिव स्थापितमिवेत्युत्प्रेक्षा। सर्पदेहे भ्रमाद्दत्तं हस्तं यथा कश्चित् कर्षति तथेत्युपमा वा। ततो देवीकरादिति वा ॥ ३५ ॥

भैमीमिति। स्वाराज्यलक्ष्मीः विडौजःप्रवणा इन्द्रेऽत्यन्तमनुरक्ता स्वर्गाधिपत्यश्रीः भैमीं मघोन इन्द्रस्याभिमुखीं निरीक्ष्य सपत्नीबुद्ध्या भैम्यामभ्यसूयामसहनत्वं अधृत दधार। ततः अनन्तरं तां भैमीं तत्परिहारिणीं इन्द्रत्यागिनीं दृष्ट्वा इन्द्रेऽनुरक्ता सती व्रीडां लज्जामभ्यपादि प्राप। इयमिन्द्रं नाभिलषति वृथैव मयेर्ष्या कृतेति सलज्जेत्यर्थः। इयं भैमी स्वीरसभूता सती निर्गुणतयैनं परिहरति तस्याहं प्रिया जातेति लज्जितेत्यर्थः। अभ्यपादि। कर्त्तरि चिण् ॥ ३६ ॥

त्वत्त इति। अथ देव्या इति उदिता परिहासवशादुक्ता भैमी इष्टा इवेव भाषितनैषधाऽभूत्। इति किं। हे भैमि मया त्वत्तः नलविषये नेति श्रुतं निषेधार्थो नकारः श्रुतः। अत कारणात्परं नलादन्यमभीष्टं वदस्व कथय। अथ च नलविषये

ह्रीमन्मथद्वैरथरङ्गभूमि-
र्भैमी दृशा भाषितनैषधाऽभूत् ॥ ३७ ॥
इस्तस्तु भैमीं द्विविधस्तु पाणौ
पाणिं प्रणीयाप्सरसां रसात् सा ।
आलिङ्ग्य नीत्वाऽकृत पान्थदुर्गां
भूपालदिक्पालकुलाध्वमध्यम् ॥ ३८ ॥

नल इति पदे नेति नलनाम्नोऽर्द्धं श्रुतं अतो नकारात् परमनन्तरमक्षरं कथयेति । किम्भूता । ह्रीमन्मथयोर्लज्जाकामयोर्द्वैरथस्य द्वाभ्यां प्रवृत्तस्य युद्धस्य रङ्गभूमिर्नृत्यस्थानं समबलह्रीकामवशीकृता । अस्मिन्नले मालां मया क्षेपयेति दृश्यैव नलं निर्द्दिष्टवती न लज्जा । न च साक्षाम्नकारमुच्चारयति स्मेत्यर्थः । उदिताऽथ पश्चादिति वा । वदस्व । भाषणेऽतिभायणे मान्त्वन उत्साहे वा तङ् । द्वैरथं । द्विरथसम्बन्धि इति सम्बन्धेऽण् ॥ ३७ ॥

इमस्त्विति । सा देवी भैमीं आलिङ्ग्यांकपालिकया धृत्वा भूपालस्य नलस्य दिक्पालकुलस्य च इन्द्रादिचतुष्टयस्य पुरःसरोऽध्वा मार्गस्तन्मध्यं नीत्वा प्रापय्य पान्थदुर्गां पथिकमिन्द्रादिपूजितशिलामयकल्पितमार्गदेवतां अकृत चकार इन्द्रादिपञ्चकमार्गमध्ये नीत्वा मुमोचेत्यर्थः । लज्जाभरनिश्चलत्वादतिसौन्दर्य्याच्च देवतात्वं । केषु सत्सु । रसादुभयाश्रयपरिज्ञानाद्भैम्याश्च देव्याश्रयापरिज्ञानात् प्रीतेर्वा अप्सरसां उर्वशीप्रभृतीनां पाणौ पाणिं प्रणीय निधाय तालिकादानपूर्वं द्विविधस्तु इन्द्रा-

आदेशितामप्यवलोक्य मन्दं
मन्दं नलस्यैव दिशा चलन्तीम्।
भूयः सुरानर्द्धपथादथासौ
तानेव तां नेतुमना नुनोद ॥ ३९ ॥
मुखाब्जमावर्त्तनलोलनालं
कृत्वालिझंकारवलन्मलच्यम्।

दिषु इत्यलुक्सप्तमी। उत्सवादौ मञ्चके दुर्गामारोप्य राजवीथिषु भ्राम्यते तथैनामपि चलदुर्गां चकारेत्यर्थ इति वा। दिविषत्। सत्सूद्विषद्रुहेत्यादिना (पा० ३।२।६१) क्विप्। हृद्युभ्यां चेति (पा० ६।३।९। वा० १) सप्तम्या अलुक्। हलदन्तादिति (पा० ६।३।९।) सुषामादित्वात् (पा० ८।३।९८) इति वा षत्वं। पान्थानां दुर्गा। पान्था चासौ दुर्गा चेति वा ॥ ३८॥

आदेशितामिति। अथ असौ देवी भूयः पुनरपि अर्द्धपथात् सकाशान्नलं विहाय तानेव सुरानिन्द्रादीन्नेतुमनाः प्रापयितुकामा सती तां भैमीं नुनोद इतश्चलेति प्रेरयति स्मेत्यर्थः। किं कृत्वा। इन्द्रादिसमुखमागच्छेत्यादेशितामादिष्टामपि तथा मन्दं मन्दं नलस्यैव दिशा नलसम्मुखमेव चलन्तीं गच्छन्तीं विलोक्य। आदेशः सञ्जातोऽस्याः। अदेशितामिति पाठे नलं प्रति गच्छेत्यप्रेरितामपीत्यर्थः ॥ ३९ ॥

मुखेति। भीमोद्भवा देव्यास्तामन्यपार्श्वं गुणैर्दामुषत्(?)। केव। विवोढुः परिणेतुः दूतो प्रथमसुरतारम्भनिर्भरां अङ्क-

भीमोद्भवा तां नुनुदेऽङ्कपालीं
देव्या नवोढेव हृढां विवोढुः ॥ ४० ॥
देवी कथञ्चित् खलु तामदेव-
ध्रीचीभवन्तीं स्मितसिक्तसृक्का।

पालीं नवोढा नववधूरिव। अङ्कपालीमोचनमात्रेण साम्यं वि-वक्षितं न तु लिङ्गं। किं कृत्वा। परिहासवशान्नलसम्मुखगमन-निषेधिकानां आलीनां सखीनां निवारणव्यञ्जको झंझं इति रवः शब्दस्तद्रूपैर्लक्ष्मैश्चिह्नैर्लक्ष्यं ज्ञेयं। तेषां वा लक्ष्यं विषयभूतं, यद्वार्थान्नलवरणनिषेधिकास्वालिषु कोपवशाङ्गित्या एव झंझ-ङ्कारास्तद्रूपैश्चिह्नैर्लक्ष्यं, अथवाऽलीनां भ्रमराणामिव यं झंझं-रवचिह्नैर्लक्ष्यं निपतद्भृङ्गभ्रमरं आवर्त्तने परावर्त्तने लोलं चञ्चलं कण्ठदण्ड एव नालं यस्य एवं मुखाब्जं कृत्वा। नवो-ढापि आलिङ्गनादि कुर्व्वित्युपदिशन्तीनां सखीनां तास्तु वा झंझंरवचिह्नलक्ष्यं मुखाब्जमावर्त्तयति। अब्जमपि लोलनालं भ्रमरझंझंरवलक्ष्यञ्च भवति। रवलचेति पाठे लचनं श्चा इत्यर्थः ॥ ४० ॥

देवीति। देवी तां भैमीमित्याद स्म। किंभूतां। कथञ्चिन्म-हताङ्कपालीमोचनादिप्रकारेण कष्टेन खलु निश्चितं अदेवद्ध्री-चीभवन्तीं न देवानञ्चति देवान् प्रत्यगच्छन्त्येवंविधा भवन्ती तां। किम्भूता। स्मितेन ईषद्धासेन सिक्तसृक्का स्निग्धप्रान्ता स्वा-भिप्रायापरिज्ञानात् किञ्चिल्लज्जावशा। इति किं। हे भग्ना-

आह स्म मां प्रत्यपि तेन्स्ट्रशं का
शङ्का शशाङ्कादधिकास्यबिम्बे ॥ ४१ ॥
एषामकृत्वा चरणप्रणाम-
मेषामनुज्ञामनवाप्य सम्यक्।

ङ्कात् अधिकं सुन्दरमाह्लादकं आस्यबिम्बं यस्या एवम्भूते, भैमी-सखीप्रायां मामपि प्रति, इयं प्रतार्य्य इन्द्रादिवरणार्थं मां नयतीति। तेन च का पुनः शङ्का अपि त्वेवं शङ्का न कार्य्या मा भैषीरिति। देवानञ्चति देवद्रीची। विष्वग्देवयोरिति (पा० ६।३।९२) टेरद्र्यादेशे, उगितात् (पा० ४।१।६) ङीपि, अच. (पा० ६।४।१३८) इत्यकारलोपे, चाविति (पा० ६।३।१३८) पूर्व्वस्याणो दीर्घः। पश्चान्नञ्समासः। अदेवद्रीचीभवन्तीमिति पाठः सभ्यः। अदेवद्रीचीं देवद्रीचीं भवन्तीं ततो नञ्समासः, च्विप्रत्ययः। शशाङ्कात्। यस्मादधिकमिति (पा० २।३।९) ज्ञापकत्वात् पञ्चमी ॥ ४१ ॥

चेन्न प्रतारयसि तर्हि पुनः इन्द्रादिसम्मुखं मां किमिति नयसीत्याशङ्कायामाह ॥ एषामिति ॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा तथा एषां सम्यग्यथा भवति तथाऽनुज्ञां मत्स्वरणानुमतिं अप्राप्य निजचिह्नप्रकटनमात्रानुमितप्रसादेन भ्रमप्रायामपि मात्राश्चिरःकम्पादिसूचितामनुज्ञामलब्ध्वा एवं वरे सावज्ञामादिन्द्रादिभिः सह विरोधे सति ध्येयं न मे भविनं मनं वरीतुं ईशा चेष्टाऽभिप्रायो वा मा कथमिवाचित्

सुपर्ववैरे नव वैरसेनिं
वरीतुमीहा कथमौचितीयम् ॥ ४२ ॥
इतीरिते विश्वसितां पुनस्ता-
मादाय पाणौ दिविषत्सु देवी।
कृत्वा प्रणम्रां वदति स्म सा तान्*
भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४३ ॥
युष्मान् वृणीते न वहून् सतीयं
शापावमानाच्च भवत्सु नैकम्।

अपि तु न कथञ्चित्। स्वावज्ञानादिरुद्धाः सन्तः शापन्दा-स्यन्तीति तान् प्रति नीयमे न तु वरणार्थमिति भावः। इय-मौचितीति वा। कतमौचितीत्यपि पाठः ॥ ४२ ॥

इतीति। सा देवी इति पूर्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय धृत्वा दिविषत्सु देवेषु विषये नमस्कार-वशात्प्रकर्षेण नम्रां कृत्वा तान् देवानिति वदति स्म। इति किं। भवद्भक्ता इयं भैमी अधुना नलवरणानुमतिरूपामनुकम्पाम-र्हति इति ॥ ४३ ॥

एतद्वरणार्थमागतानामस्माकं नलवरणानुमतिर्दीयता-मिति कथमुच्यत इत्याशङ्कां परिहरति ॥ युष्मानिति ॥ हे लोकपालाः इयं भैमी यस्मात्सती पतिव्रता एकभर्तृकैव तस्मा-

---

* आह स्म नम्रां प्रविधाय सा तान् इति सं० पुस्तक पाठः।

नलः समेतं नृपमंशमेतं
वरीतुमन्विष्यति लोकपालाः ॥ ४४ ॥
भैम्याः स्रजः सञ्जनया पथि प्राक्
स्वयम्वरं सञ्जनयांबभूव ।

इयन् युष्मान् न वृणीते पतित्वेन नाङ्गीकरोति। भवतु मध्ये शेषावमानाच्च एकं न वृणीते। तत्तस्मात् सर्व्वैकवरणपक्षयोर्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान् मिलितानंशानंशभूतान्वो युष्मानेवैनं नृपं, अष्टानां लोकपालानां वपुर्धारयते नृप इति वचनात् युष्मद्रूपमेवैनं नलं नृपं वरीतुं अन्विष्यति विचारयति। नले वृते पूर्व्वोक्तोभयदोषाभावात् नलमेव वरीतुं वाञ्छतीत्यर्थः। वो युष्माकं समेतानंशानेनं नृपमिति वा ॥ ४४ ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह॥ भैम्या इति। हे लोकपालाः, वेधाः मात्समेवनानन्तरं स्वमन्दिरागमनवेलायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे प्रष्ठप्रसादाधिगतेत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्ये दूत्यगतस्य सत्यनलस्य कण्ठे निक्षेपणया कृत्वा भैम्याः स्वयम्वरं प्राक् पूर्व्वमेव सञ्जनयाम्बभूवाकृत। तथा तत्रैव सर्गे तथं मियक्ष्याविद्यासुमप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः सम्भोगं वाध्वरतमपि व्यधत्त। अस्य सम्भोगमिति वा। इह स्वयम्बरस्य सम्भोगं फलं चालिङ्गनेन चकारेति वा। तस्मात् इ

सम्भोगमालिङ्गनयास्य वेधाः
शेषन्तु कं हन्तुमियद्यतध्वम् ॥ ४५ ॥
वर्णाश्रमाचारपथात् प्रजाभि-
स्त्वाभिः सहैवास्खलते नलाय।
प्रसेदुषो वेदशहत्तभङ्ग्या
दित्सैव कीर्त्तेर्भुवमानयद्वः ॥ ४६ ॥

पुनः शेषं अवशिष्टमंशं हन्तुं विनाशयितुं इयत् नलाकारधारणादिप्रकारेण यतध्वं प्रयत्नं कुरुत, अपि तु न कोऽप्यवशिष्टोंऽशः। तस्माद्वृथा प्रयासो न कार्य्यः किन्त्वाज्ञैव दातव्येत्यर्थः। वाह्यरतस्यैवाभ्यर्हितत्वात् तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य च संहृत्तत्वात् कं पुनः शेषं सम्भोगं हन्तुं इयद्यतध्वं इति वा। किमिति पाठे शेषा तु लोकस्थितिरिति कामशास्त्रोक्तन्यायेन शेषं लोकस्थितिरूपं सम्भोगं पुनर्हन्तुं इयत् किं यतध्वं इति व्याख्येयं। सङ्गनालिङ्गनेत्यत्राप्यन्तत्वाद्युच् ॥ ४५ ॥

इदानीं युक्त्यन्तरेण देवान् सान्त्वयति ॥ वर्णेति ॥ वा पूर्व्वापरितोषे। पूर्व्वमसम्भावितमेवोक्तं मया। किन्तु नलाय कीर्त्तेर्दित्सैव वो युष्मान् भुवमानयत् भैमीस्वयम्वरदर्शनव्याजेन नलाय कीर्त्तिं दातुमेवात्रागमनं युष्माकं न तु भैमीवरणार्थमित्यर्थः। किंभूताय। यतः स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनां आश्रमाणां ब्रह्मचर्य्यादीनां स्वस्वोक्तादाचारपथात् सकाशादस्खलते अच्युताय। किंभूतान् वः। इदृग्वृत्तभङ्ग्या प्रसेदुषः

इति श्रुते ऽस्या वचसैव हास्यात्
कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञे-
ष्वेतेषु तां साथ नलाय निन्ये ॥ ४७ ॥
मन्दाचनिस्पन्दतनोर्मनोभू-
दुःप्रेरमप्यानयति स्म तस्याः ।
मधूकमालामधुरं करं सा
कण्ठोपकण्ठं वसुधासुधांशोः ॥ ४८ ॥

स्वाचाराचरणादेव निष्कपटदूत्यकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीन् विहाय सौन्दर्यादिना गुणेन नल एव वृत इति कीर्त्तिः ॥ ४६ ॥

इतीति । इति पूर्वोक्ते देवीवचने श्रुते सति अस्या देव्या वचसैव जाताद्धास्यात् स्मिताद्धेतोः आस्यबिम्बं मुखचन्द्रं सलास्याधरं चञ्चलोष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतेनाशयप्रापकेणेङ्गितेन कृता कृताभ्यनुज्ञा नलवरणानुमतिर्यैस्तेषु सत्सु। अथानन्तरं सा देवी तां नलाय नलं प्रापयितुं नलार्थं वा निन्ये पुनर्नलसमुखीचकारेत्यर्थः ॥ ४७ ॥

मन्दाचेति । सा देवी मधूकमालया मधुरं सुन्दरं तस्याः करं वसुधासुधांशोर्भूचन्द्रस्य नलस्य कण्ठोपकण्ठं कण्ठसमीपं आनयति स्म प्रापयति स्म । किंभूतायाः । मन्दाचैव लज्जया निस्पन्दा निश्चला तनुर्यस्याः सकाशाया इत्यर्थः । किंभूतं करं ।

अथाभिलिख्येव समर्प्यमाणां
राजिं निजस्वीकरणाक्षराणाम्।
दूर्वाङ्कुराढ्यां नलकण्ठनाले
वधूर्मधूकस्रजमुत्ससर्ज ॥ ४९ ॥
तां दूर्वया श्यामलयातिवेलं
शृङ्गारभासन्निभया सशोभाम्।

मनोभुवा नलविषयकामेन दुःप्रेरमपि कामेनापि प्रेरयितुमशक्यं। निष्पन्देति पाठे पूर्ववत्यर्थं। दुःप्रेरमपि प्रेरयति स्मेति विरोधाभासः ॥ ४८ ॥

अथेति। अथ करस्य नलकण्ठसमीपनयनानन्तरं वधूर्भैमी दूर्वाङ्कुराढ्यां मधूकस्रजं नलकण्ठनाले उत्ससर्ज निचिक्षेप। उत्प्रेक्षते। अभिलिख्य समर्प्यमाणां दीयमानां निजात्मना नलस्य स्वीकरणं तत्सम्बन्धिनामक्षराणां मया त्वं निश्चितं वृतोऽसीति एवंरूपाणां वर्णानां राजिमिव। निश्चयज्ञानार्थं हि पत्रं दीयते तद्विवेत्यर्थः। मालासञ्जनानन्तरं वाङ्गीकरणे निश्चयो जातः। दूर्वाङ्कुराणां श्यामत्वादक्षरसाम्यं मधूकानि लिखिताक्षरसन्धिस्थानीयानि। कण्ठस्य नालत्वाम्मुखस्य कमलत्वं ॥ ४९ ॥

तामिति। भूमृन्नलः तां मालां कण्ठेन बिभरांबभूव। किम्भूतां। श्यामलया अत एव शृङ्गाररसस्य भया कान्त्या सन्निभया तुल्यया दूर्वयाऽतिवेलमतितरां सशोभनदीप्तिं। तथा

मालां प्रसूनायुधपाशभासं
कण्ठेन भूस्पृद्विभरांबभूव ॥ ५० ॥
दूर्वाग्रजाग्रत्पुलकावलिं तां
नलाङ्गसङ्गाङ्कुरमुल्लसन्तीम्।
मानेन मन्ये नमितानना सा
साम्व्यमालोकत पुष्पमालाम् ॥ ५१ ॥

प्रसूनायुधस्य कामस्य पाशभासं पाशसदृशीं। मालानिक्षेपानन्तरमेव कामपरवशत्वान्मालायाः कामपाशत्वं। श्यामो भवति शृङ्गार इति भरतवचनाच्छृङ्गारस्य श्यामत्वं। भूस्पृत्पार्थिवोऽपि। विभरांबभूव। भीह्रीति (पा० ३।१।३९) श्लमि, श्लुवेति (पा० ३।१।४०) भुवोऽनुप्रयोगः ॥ ५० ॥

दूर्वेति॥ मानेनेर्ष्याजनितकोपेन नमितानना सा भैमी साम्व्यं गुणवत्यामपि तस्यां दोषारोपसहितं यथा तथा सेर्ष्यमिति यावत् पुष्पमालामालोकत इत्यहं मन्ये शङ्के। किंभूतां। दूर्वायाण्येव दूर्वाङ्कुरा इव च जाग्रती स्फुरन्ती पुलकावलिर्यस्याः तां। तथा नलाङ्गसङ्गाङ्कुरमुल्लसन्तीं शोभमानां सदर्पाञ्च। लज्जानम्रमुखी सत्येव मालासहितं नलवक्षः कटाक्षैर्विलोकितवती। अन्यापि नायिका एवंविधां सपत्नीं मानेन नम्रमुखी सती सेर्ष्यमालोकते। स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये इत्यमरः ॥ ५१ ॥

कापि प्रमोदास्फुटनिर्जिहान-
वर्णैव या मङ्गलगीतिरासाम्।
सैवाननेभ्यः पुरसुन्दरीणा-
मुच्चैरुलूलुध्वनिरुच्चचार॥ ५२॥
सा निर्मले तस्य मधूकमाला
हृदि स्थिता च प्रतिबिम्बिता च।
कियत्यमग्ना कियती च मग्ना
पुष्पेषुबाणालिरिव व्यलोकि॥ ५३॥

कापीति। प्रमोदाद्धर्षवशात्कण्ठस्य गद्गदत्वादस्फुटा अप्रकटा निर्जिहाना निर्गच्छन्तो वर्णा अक्षराणि यस्या एवंविधैव या पुरसुन्दरीणां विलोकयितुमागतानां आननेभ्यः कापि लोकोत्तरा मङ्गलरूपा धवलादिगीतिरासीत् सैवोच्चैरुलूलुध्वनिरुच्चचार उदलसत्। विवाहाद्युत्सवे स्त्रीणां धवलादिमङ्गलगीतिविशेषा गौडदेशे उलुलुरित्युच्यन्ते। सोऽप्यव्यक्तव्यक्तवर्ण उच्चार्यते। स्वदेशरीतिः कविनोक्ता॥ ५२॥

सेति। तस्य नलस्य निर्मले हृदि स्थिता चान्तःप्रतिबिम्बिता च सा मधूकमाला कियती किञ्चिदमग्ना अब्रुडिता कियती च मग्ना ब्रुडिता, पुष्पेषुः कामस्तस्य बाणालिः शरपङ्क्तिरिव व्यलोकि वीक्षिता लोकैरिति शेषः। मधूकप्रतिबिम्बानां किञ्चिदन्तःप्रविष्टरूपत्वाच्छरसाम्यमुपरिस्थितानां चामग्नत्वाच्छरसाम्यं। मालास्पर्शान्नलोऽपि कामपरवशो जात इत्यर्थः॥ ५३॥

रोमाणि सर्व्वाण्यपि बालभावाद्
वरश्रियं वीक्षितुमुत्सुकानि।
तस्यास्तदा कण्टकिताङ्गयष्टे-
रुड्डीविकादानमिवान्वभूवन्॥ ५४॥
रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी-
रम्याधरा सा सुतरां विरेजे।
शरव्यदण्डैः श्रितमण्डनश्रीः
स्मारी शरोपासनवेदिकेव॥ ५५॥

रोमाणीति। तदा तस्मिन् समये कण्टकिता सञ्जातरोमाञ्चाऽङ्गयष्टिः शरीरं यस्यास्तस्या भैम्या वबयोरभेदात् बालभावात् केशत्वादस्य च शिशुत्वाद्वरस्य नलस्य श्रियं शोभां वीक्षितुं उत्सुकानीव सर्व्वाण्यपि रोमाणि उदुच्चैर्यीवा यस्यां क्रियायां सा उड्डीविका क्रिया तस्या आदानमङ्गीकरणं अन्वभूवन्निव। सात्विको रोमाञ्चस्तस्यास्तस्या जात इत्यर्थः। बालाश्च वरश्रियं वीक्षितुं उत्कण्ठिताः खर्व्वत्वादुड्डीवा भवन्ति। कण्टकस्तारकादिः उड्डीविका सङ्गमोद्दिष्टा कप्॥ ५४॥

रोमेति। रोमाङ्कुरैर्दन्तुरित उन्नतः नतोन्नतोऽखिलाङ्गी यस्याः सा रोमाञ्चयुक्ता, तथा रम्याधरा बिम्बोष्ठी सा भैमी स्मारी कामसम्बन्धिनी शरोपासनवेदिकेव बाणाभ्यासस्थानमिव सुतरां विरेजे। किम्भूता वेदिका। शरव्यदण्डैः वेध्यस्तम्भैः श्रिता मण्डनश्रीः अलङ्कारशोभा यया सा। रोमाङ्कुरा श॰

3304

चेष्टा व्यनेशन्निखिलास्तदास्याः
स्मरेषुवातैरिव ता विधूताः ।
अभ्यर्थ्य नीताः कलिना मुहूर्त्तं
लाभाय तस्या बहु चेष्टितुं वा ॥ ५६ ॥

चदण्डस्थानीयाः । भैम्यपि श्रितमण्डनश्रीः । रोमाञ्चितां तां दृष्ट्वा सर्व्वेऽपि कामपरवशा जाता इति भावः । शराभ्यास उपासनमित्यमरः । दन्तुरङ्कृतं दन्तुरितं ॥ ५५ ॥

चेष्टा इति । तदा तस्मिन् कालेऽस्या निखिलास्ताश्चेष्टा व्यनेशन् विनष्टाः । उत्प्रेच्यते । स्मरेषुवातैः कामबाणपुङ्खवायुभिः विधूता इव भ्रमणवशात् भीता इव । वाशब्द उत्प्रेक्षान्तरसमुच्चये, इवार्थे वा । तस्या लाभाय भैम्याः प्राप्तये बहुभिः प्रकारैश्चेष्टितुं अभ्यर्थ्य भैमीमेव याचित्वा मुहूर्त्तं घटिकाद्वयं क्षणमात्रं वा कलिना युगेन नीता इव । भैम्याः कामुकेन कलिना स्वस्यास्यविलासितया भैमीमलभमानेन बहुविलाससम्पत्तये भैमीविलासा एव याचितकमण्डनार्थं नीता इवेति भावः । याचितमपि क्षणमात्रमेव नीयते । सात्त्विकस्तम्भेन कटाक्षादिव्यापाररहिता सा जातेति भावः । व्यनेशन्नित्यत्र पुषादित्वात् श्नेरङि (पा० ३ । १ । ५५ ।) नशिमन्योरलिट्येत्वं वक्तव्यं (पा० ६ । ४ । १२० । वा० २) इत्येत्वं । भाष्यकारस्य कैयटस्य पदमञ्जरीकारस्यापि मते छन्दस्येवैत्वं नशिमन्योर्न भाषायां । अनेशन्नस्यैव आभुरस्येति श्रुत्युदाहरणान्नगेरयेत्वं

3304

तन्व्यस्तमाल्यस्पृशि यन्नलस्य
स्वेदं करे पञ्चशरश्चकार।
भविष्यदुद्वाहमहोत्सवस्य
हस्तोदकं तज्जनयाम्बभूव॥ ५७॥
तूलेन तस्यास्तुलना मृदोस्तत्
कम्प्रास्तु सा मन्मथबाणवातैः।

छन्दस्येवेत्यवधीयते। वृत्तिकृता तु नशिमन्योर्भाषाविषयत्वम-ङ्गीकृत्य अमिपचोः छन्दोविषयत्वमङ्गीकृत्येत्थं समर्थितं। नशि-मन्योरलिट्येत्वं छन्दस्यमिपचोरपीत्यादि (पा० ६।४।१२०) (१) कारिका च॥ ५६॥

इदानीं नलस्य सात्त्विकत्वं वर्णयति॥ तदिति॥ पञ्चशरः कामः तया भैम्या निचिप्तं माल्यं मालां अनुरागवशात् पुनः पुनः स्पृशतीति स्पृक् तस्मिन्नलस्य करे सात्विकं स्वेदं घर्मजलं चकार। तद्भविष्यतः उद्वाहरूपस्य महोत्सवस्य सम्बन्धि नियतफल-लोत्पादने हेतुभूतं हस्तोदकं कन्यादानजलमेव जनयाम्बभूव। नलस्यापि सात्विकस्वेदः प्रवृत्त इति भावः। स्वेदजलं न भवति किन्तु हस्तोदकमिति॥ ५७॥

तूलेनेति। मृदोरतिसुकुमार्यास्तस्या भैम्यास्तूलेन कार्पा-सेन मृदुतया यस्मात्तुलना साम्यमस्तीति शेषः। तत्तस्माद्धा मन्मथबाणवातैः कामशरपुङ्खवायुभिः कम्प्रा सकम्पा ऽस्तु भवतु। कार्पासो हि लघुत्वाद्वातेन सकम्पो भवति। सा इ

चित्रीयितं तत्तु नलो यदुच्चै-
रभूत् स भूभृत्पृथुवेपथुस्तैः ॥ ५८ ॥
दृशोरपि न्यस्तमिवास्त राज्ञां
रागादृगम्बुप्रतिबिम्बि माल्यम्।

तत्तुल्या। अतस्तस्याः कामबाणवातैः सकम्पत्वं युक्तमेवेत्यर्थः। तत्तु पुनश्चित्रीयितं आश्चर्यं कृतं यदुच्चैर्भूभृन्महाराजो धीरोऽपि स नलस्तैः कामबाणवातैः कृत्वा पृथुर्भूयान् वेपथुः कम्पो यस्यैवंविधोऽभूत्, तत्तैः कामबाणैश्चित्रं कृतमाश्चर्यं कृतमित्यर्थः। तूलस्य तूलतुल्यस्य वा वातैः कम्पो युक्तः। अत्युच्चस्य पर्वतस्य तु वातैः कम्पोऽतितरामाश्चर्यकारीत्यर्थः। उभावपि तुल्यानुरागौ सात्त्विककम्पयुक्तौ जाताविति भावः। चित्रीयितं। नमोवरिवश्चित्रङः क्यजिति (पा० ३।१।१९) क्यजन्तात् क्तः। क्यचि चेति (पा० ७।४।३३) इत्वमकारस्य॥५८॥

दृशोरिति॥ दृशोरपि अश्रुनि क्रोधजनितेऽश्रुणि प्रतिबिम्बोऽस्यास्तीति एवंशीलं माल्यं सा मधूकमाला रागानलविषयात् क्रोधात् अथच तज्जनितान्नेत्रलौहित्याद्धेतोः सभासदां राज्ञां दृशोरपि न्यस्तमिव, येन केनचिद्बलान्निक्षिप्तमिवास्त अतिष्ठत। नेत्रलौहित्यदर्शनादेवं ज्ञातमभूदिति यावत्। तथा कश्चित् क्रुद्धः सन् कस्यचिन्नेत्रे बलादङ्गुल्यादिशल्यं निक्षिपति तदीयनेत्रस्य च लौहित्यं भवति अश्रु च निर्गच्छति। तथा क्रोधाद्दर्शनमात्रेण तन्माल्यमेव तेषां द्वयोरपि नेत्रयोर्निक्षिप्तं शल्यमिवा-

नृपस्य तत्पीतवतोरिवाक्ष्णोः
प्रालम्ब्यमालम्बत युक्तमन्तः ॥ ५९ ॥

भवत् । अत एव तयोर्लौहित्यमशु च जातमित्यर्थः । अर्थादयुक्तमेतत् । न केवलमन्तःकरणे शल्यं निचिप्तं किन्तु दृशोरपीत्यपिशब्दार्थः । अथ च रागात् नलप्रीत्या भैम्या माल्यं यथा नलकण्ठे न्यस्तं तथा रागात् क्रोधात् नलस्पर्द्धिनां सम्मुखं पश्यतां राज्ञां नेत्रयोरपि शल्यमिव चिप्तमभूत् । यतो दृगम्बुप्रतिबिम्बिं नलमसहमानाः सर्व्वेऽपि राजानो मालादर्शनमात्रेण क्रोधेर्ष्यावशाः सङ्कुचितनेत्राः पराङ्मुखाः सन्तस्तां न पश्यन्ति स्मेति भावः । नृपस्य नलस्य अक्ष्णोरन्तः मध्यः कर्त्तृभूतः प्रालम्ब्यं प्रालम्बं लम्बत्वं हर्षविस्फारितत्वं आलम्बत अङ्गीचकार एतद्युक्तं । हर्षवशाद्धि नेत्रयोर्विस्फारत्वं भवति । प्रालम्बमिति पाठे प्रालम्बनं प्रालम्बः स एवार्थः । उत्प्रेचते । किम्भूतयोरक्ष्णोः तत्पीतवतोरिव माल्यं सादरं विलोकमानयोरिव । हर्षजनितं विस्फारत्वं विलोकनजन्यत्वेन उत्प्रेचितं । यद्वा नलनेत्रमध्यस्तम्भमेव प्रालम्बमृजुलम्बिनं हारविशेषं अङ्गीचकार । सादरविलोकनान्नेत्रयोरन्तः प्रतिलम्बितायाः मालायाः ऋजुलम्बितं नेत्रयोर्विस्फारत्वमन्तरेण न घटत इति तदेवाचिपति । नलस्तु तां मालां विलोकयन् हर्षवशाद्विस्फारितनेत्रो जात इति भावः । तस्मात्सा रागाद्दृशोर्न्यस्तमिवास्त । नेत्रमध्ये निक्षिप्तं पच्छ्यादि तदिवाभूत् । युक्तमेतत् । क्रोधाद्धि दृश्यमानं वस्तु

स्तम्भस्तथालम्भितमां नलेन
भैमीकरस्पर्शमुदः प्रसादः।
कन्दर्पलक्षीकरणार्पितस्य
स्तम्भस्य दम्भं स चिरं यथाऽऽयत्॥ ६०॥

शल्यमिव भवति नेत्रयोश्च लौहित्यमश्रु च भवतीति युक्तमित्यर्थः। तन्माल्यं पीतवतोरिव नलनेत्रं वस्तु शल्यमिव भवति। नलनेत्रयोरन्तः रागात् प्रीतेर्ह्रद्दलं प्राप एतदपि युक्तं। प्रीतेर्हि हर्षो भवति इत्यपि युक्तमेवेत्यर्थ इति वा। प्रालम्बं गुणवचनादित्वात् (पा०५।१।१२४)ष्यञ्। प्रालम्बमिति पाठे प्रालम्बो हारभेदे स्यादिति विश्वः। राज्ञेति पाठे, आनन्दाश्रुणि प्रतिबिम्बितं माल्यं राज्ञा नलेनानुरागाद्दृशोरपि न्यस्तमिवास। न केवलं हृदि किन्तु नेत्रयोरपि धृतमित्यर्थः। अत एव तन्माल्यं पिबतोर्नलनेत्रयोर्मध्यः प्रलम्बलमालम्बतेति युक्तं। दीर्घाया मालाया अन्तर्द्धारणार्थं नेत्रमध्येऽपि दीर्घो जात इवेति भावः॥ ५८॥

स्तम्भ इति॥ मालानिक्षेपसमयजातभैमीकरस्पर्शेन जाता मुत् हर्षस्तस्य प्रसादरूपः स्तम्भः सात्त्विकभावः नलेन तथा ऽलम्भितमां अतितरां प्राप्तः। यथा स नलः कन्दर्पस्य लक्षीकरणाय लक्ष्यार्थं अर्पितस्यारोपितस्य स्तम्भस्य दम्भं व्याजं कामवेध्यस्तम्भसादृश्यं चिरमायत्। कामवेध्यस्तम्भवद्भैम्याः करस्पर्शजातसात्त्विकस्तम्भवशादितितरां निर्व्यापारो जात इति भावः। नितरां कामपीडा सूचिता॥ ६०॥

उत्सृज्य साम्राज्यमिवाथ भिक्षां
तारुण्यमुल्लङ्घ्य जरामिवारात् ।
तं चारुमाकारमुपेक्ष्य यान्तं
निजां तनूमाददिरे दिगिन्द्राः ॥ ६१ ॥
मायानलत्वं त्यजतो निलीनैः
पूर्वैरखर्वंपूर्विकया मघोनः ।

इदानीमिन्द्रादिभिः स्वं रूपं धृतमित्याह । उत्सृज्येति ॥ अथ नलवरणानन्तरं ते इन्द्रादयो दिगिन्द्रा दिक्पाला यान्तं गच्छन्तं चारुं सुन्दरं तं अलीकनलाकारं उपेक्ष्योन्मुच्य निजां सहस्रनेत्रत्वादिलक्षणां स्वीयां तनूं आरान्नलसमीप एवाददिरेऽङ्गीचक्रुः । कः कामिव । कश्चिद्राजा साम्राज्यमुत्सृज्य क्षीणपुण्यतया चक्रवर्त्तिपदं त्यक्त्वा भिक्षामिव । तथा कालवशाद्वृद्धत्तारुण्यमुल्लङ्घ्यातिक्रम्य कश्चिज्जरामिव । उपमाद्वयेनेन्द्राद्याकाराणां नलाकारादतिहीनत्वं सूचितं । साम्राज्यादिपरित्यागेन भिक्षाद्यङ्गीकारे यावद्दुःखं भवति तावन्नलाकारपरित्यागेन स्वाकाराङ्गीकारे तेषां जातमिति भावः । तत्र निजत्वमेव हेतुः । अन्योऽपि विद्वानसमीचीनमपि निजमङ्गीकरोति न तु समीचीनं परकीयं । यान्तुमिति पाठे स्वर्गमिति शेषः । आददिरे । आङो दोनास्येति (पा० १।३।२०) तङ् ॥ ६१ ॥

यथाक्रमं तेषामाकारस्वीकारमाह । मायेति । मायानलमलीकनलत्वं त्यजतो मघोनः निलीनैः पूर्वं निजात्मना गोपि

भीमोद्भवासात्त्विकभावशोभा-
द्दिदृक्षयेवाविरभावि नेत्रैः ॥ ६२ ॥
गोत्रानुकूलत्वभवे विवाहे
तत्प्रातिकूल्यादिव गोत्रशत्रुः।

तैः पूर्व्वैर्नेत्रैः नलाङ्गसङ्गजनिता भीमोद्भवायाः सात्त्विकभावशोभा रोमाञ्चादिलक्ष्मीर्माला दिदृक्षयेव दर्शनेच्छयेवाहं पूर्व्वमहं पूर्व्वमिति यथा भवति तथा, यदाहं पूर्व्वमहं पूर्व्वमिति यस्यां क्रियायां सर्व्वे ब्रुवते साहंपूर्व्विका स्पर्द्धौत्सुक्याभ्यां आविरभावि वेगेन प्रकटीभूतं। इन्द्रेण स्वनेत्रसहस्रं प्रकटितमिति भावः। अन्योऽपि दर्शनोत्सुकोऽहंपूर्व्विकया प्रकटो भवति। अहं पूर्व्वमहं पूर्व्वमित्यहंपूर्व्विका स्त्रतेत्यमरः। अहं पूर्व्विकया। स्वार्थेकः मत्वर्थीयष्ठक् च ॥ ६२ ॥

गोत्रेति॥ तया स इन्द्रमघः प्रवरः ददृशे दृष्टः। स कः। गोत्रशत्रुरिन्द्रः यं वरं श्रेष्ठं प्रवरमेतन्नामानं सखायं पुरस्कार पूजितवान् अथ चायमेरमकरोत्। किं कुर्वन्। गोत्रयोर्वसिष्ठकश्यपादिर्वशादिपुरुषयोरनुकूलत्वेनासमानत्वेन विवाह्यत्वेन वा भवे जायमाने अथच गोत्रयोर्जन्मकालीननाम्नोरानुकूल्येन तृतीयैकादशचतुर्थदशमादिज्योतिःशास्त्रोक्तभद्राग्निकूटसम्भवेन जायमाने विवाहे विषये विवाहार्थमिति यावत्। आयन् स्वर्गात् स्वयम्बरार्थं आयन् भुवमागच्छन्। एतावन्तं कालमदृष्टोऽभूत् इदानीन्तु प्रकटो जात इत्यर्थः। सखायमिन्द्र-

पुरस्कार प्रवरं वरं य-
मायन् सखायं ददृशे तया सः ॥ ६२ ॥
स्वकामसम्मोहमहान्धकार-
निर्वापमिच्छन्निव दीपिकाभिः ।

मायन् प्राप्नुवन् स प्रवरस्तया दृष्ट इति वा । प्रवरशब्दच्छलेन प्रवरपुरस्कार उत्प्रेक्ष्यते । तस्य गोत्रानुकूलविशिष्टस्य विवाहस्य प्रतिकूल्यादिरुद्धत्वादिव । यतोऽयं गोत्रशत्रुरिति ख्यातं । नल-भैमीगोत्रयोरनुकूलत्वेन जायमाने विवाहे स्वयमिन्द्रः प्राति-कूल्यं कृतवान् । ततश्च विशिष्टस्यापि प्रातिकूल्ये गोत्रयोरपि प्रातिकूल्यं जातं दैवलाञ्छनराहित्याच्च स्वगोत्रभैमीगोत्रयोर-प्यनुकूलत्वाभावात् प्रातिकूल्यं । ततश्च गोत्रयोः प्रातिकूल्येऽपि श्रेष्ठप्रवराङ्गीकरणेनापि यथा कथञ्चिद्विवाहो घटिष्यत इति बुद्ध्या प्रवरमार्येयं पुरस्कारेत्यर्थः । यद्वा गोत्रानुकूलत्वाभावे विवाहे तस्य प्रातिकूल्याद्धेतोः प्रवरं पुरस्कार समानप्रवर-त्वेनापि विवाहनिषेधादित्यर्थः । नाम्नोराशवरयोर्नाडिकूट-घटकयोर्गणनायां षडष्टकाद्यसद्राशिकूटादिव गोत्रशत्रु-त्वादिज्योतिःशास्त्राद्दूष्यं । प्रवरं दृष्टमिव ॥ ६२ ॥

स्वकामेति ॥ वायुसखोऽग्निः निजं वपुः उज्ज्वलरीभिर्दि-व्यरीभिः शिखाभिर्ज्वालाभिः कुरितं व्याप्तं विततं चकार । भैम्यभिप्रायं परित्यज्य पुनरपि व्याप्ताव्याप्तं शरीरमग्नेरेवा-त्येत्यर्थः । किं कुर्वन्निव । दीपिकाभिर्ज्वालाभिज्वलितमङ्गलादि

उद्गत्वरीभिश्छुरितं वितेने
निजं वपुर्वायुसखः शिखाभिः ॥ ६४ ॥
पत्यौ वृते भीमजया न वज्री-
वज्री स्वमज्ञाय निजुह्नुवे यः।
जनादपत्रप्य स चा सहाय-
स्तस्य प्रकाशोऽभवदप्रकाशः ॥ ६५ ॥
सदण्डमालक्तकनेत्रचण्डं
नमःकिरं कायमधत्त कालः।

स्तस्य कामेन सम्मोहोऽविवेकरूपस्तमस्तस्मिन् महान्धकारस्तस्य नि-
र्वापं शान्तिमिच्छन्निव। उत्पूर्व्वकगमेः, गत्वरश्चेति (पा० ३।२।
१६४) क्वरबन्तात्। टिड्ढाणञिति (पा० ४।१।१५) ङीप् ॥ ६४ ॥

पत्याविति ॥ यः प्रकाशः पूर्व्वं वज्रेरन्नोकनलत्वाङ्गीकारस-
मये स्वमात्मानं अज्ञाय शीघ्रं निजुह्नुवे गोपितवान् स तस्य
वज्रेः सहायः सखा प्रकाशो दीप्तिः सद्योऽज्ञा द्विवर्षेन हेतुनाऽप्र-
काशः अप्रकटोऽभवत्। प्रकटीभूतोऽपि सूर्य्यप्रभाच्छादितया
ऽप्रकटो जात इत्यर्थः। हा कष्टं। पत्यौ स्वस्वामिनि वज्रौ भीम-
जया न वृते सति जनाच्छोकादपत्रप्य लज्जितेव प्रकटो नाभूत्
इति लुप्तोत्प्रेक्षा। अन्योऽपि स्वस्वामिनोऽपकर्षे लज्जया नि-
लीयते। ज्वालाखङ्गीकृतास्वपि रात्रिवत् प्रकाशाभावादह्नि-
र्निष्प्रभ एवाभूदिति भावः ॥ ६५ ॥

सदण्डमिति॥ कालो यमः सदण्डं सोदयस्था सह वर्त्तमानं

तत्कालमन्तःकरणं नृपाणा-
मध्यासितुं कोप इवोपनम्रः ॥ ६६ ॥
दृग्गोचरोऽभूदथ चित्रगुप्तः
कायस्थ उच्चैर्गुण एतदीयः।

अलक्तकेनारक्तं वस्त्रमालक्तकं तद्वदारक्ते नेत्रे ताभ्यां चण्डम-तिभयङ्करं, तथा तमःकिरं अन्धकारमुद्गिरन्तं कालत्वात्। यद्वा स्वीयश्यामत्वातिशयेन तमसो विक्षेपकं एवंविधं कायं देह-मधत्त प्रकटितवानित्यर्थः। उत्प्रेक्षते। तत्कालं तस्मिन्नवसर-णानन्तरसमये नृपाणामन्तःकरणमध्यासितुमधिष्ठातुं उपनम्र आसन्नीभूतः कालः श्यामः कोप इव मूर्त्तः। कोप एव राज्ञां प्रकटो जात इति भावः। कुपितोऽप्येवंविधो भवति। आलक्तके तेन रक्तं रागादित्यण् (पा० ४।२।१) तमः किरं। इगुप-धेति (पा० ३।१।१३५) कः। अन्तःकरणं। अधिशीङिति (पा० १।४।४६) कर्मत्वं ॥ ६६ ॥

दृगिति॥ अथ एतदीयो यमसम्बन्धी उच्चैर्नितरामुन्नतो वा गुणः सेवकः। उच्चैर्गुणा यस्यैवंविधो वा। कायस्थो राजसेवकः। गणकजातिविशेषश्चित्रगुप्तनामा लेखको दृग्गोचरः प्रकटोऽभूत्। अथ च काये देहे तिष्ठति कायस्थः एतदीयो नितरां प्रति-द्वन्द्विरूपत्वेनाद्यर्धभूतेन नमाकारेण गुप्तश्छादित एवंभूतो दृष्ट श्यामवर्णः प्रकटोऽभूत्। एवं शब्दश्लेषसामान्येन दर्शितयोर्द्वयोः विशेषमाह। तदेको गणकः नामादिपदयोर्द्वयोरपि द्वा

ऊर्द्ध्वं तु पत्रस्य मपीद एको
मपेर्ददर्चोपरि पत्रमन्यः ॥ ६७ ॥
तस्यां मनोवन्धविमोचनस्य
कृतस्य तत्कालमिव प्रचेताः ।
पाशं दधानः करवद्धवासं
विभुर्बभावाप्यमवाप्य देहम् ॥ ६८ ॥

द्रव्यान्तरेण द्रवीभूतं कज्जलं ददात्येवंभूतः, प्राणिनां शुभाशुभकर्म्मगणनार्थं मष्या विलिखन्नित्यर्थः । अन्यः कृष्णगुणस्तु मपेरुपरि पत्रं जयपत्रं ददन्मपेः सकाशादहं काल इति पत्रालम्बनं कुर्व्वन् प्रकटोऽभूदित्यन्वयः अतिश्याम इत्यर्थः । चो ऽपरस्य समुच्चये त्वर्थे वा ॥ ६७ ॥

तस्यामिति ॥ तस्मिन् काले नलवरणानन्तरं विभुः स्वामी प्रचेता वरुणः आप्यं पार्थिवतेजसाद्यवयवोऽवष्टभ्य प्रचुरतरजलावयवनिर्म्मितमुपभोगयोग्यमप्मयं देहमवाप्य बभौ । किंभूतः । तस्यां भैमीविषये कृतस्य मनोवन्धविमोचनस्य अन्तःकरणवन्धोन्मोचनस्य पूर्व्वं भैमीविषये पाशेन वध्वा निश्चलीकृत्य यच्चित्तं मनस्तत्तया नले वृते सति प्रकृष्टचेतस्त्वात् पुनस्तत्क्षणमेवोन्मोचितं तत् तदीयमोचनस्यैव तत्सम्बन्धिनमिव करे बद्धवासं कृतवसतिं पाशं स्वायुधं दधानः । अन्यस्यापि तत्कालमेव कृतवत्सादिवन्धनविमोचनस्य हस्ते पाशो वन्धनरज्जुर्भवति । आप्यं पूर्व्ववत् ॥ ६८ ॥

सद्दितीयः स्त्रियमभ्युपेया-
देवं स दुर्बुध्य नयोपदेशम्।
अन्यां सभार्यः कथमृच्छतीति
जलाधिपोऽभूदसहाय एव ॥ ६९ ॥

सद्देति॥ स जलाधिपो वरुणोऽथ च जडस्वामी मूर्खतम इति विचार्य्य असहाय एवाभूत्। इति किं। सद्दितीयः सहायः स्त्रियमभ्युपेयात् किं पुनरन्यां। एवं रूपं नयोपदेशं नीतिमार्गं दुर्बुध्य दुष्टमिदमिति विचार्य्य,

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥

तथा।

कामिनी कामयेदेव निर्जने पितरं सुतं।
सद्वितीयोऽभ्युपेयात्तां मनःपरिणतामपि॥

इत्यादिवाक्यरूपं स्त्रीपुरुषयोरेकान्ते मदनविकारसम्भवादेकेन स्त्रियं प्रति न गन्तव्यं किन्तु ससहायेनैवेति प्रतिपादनपरं नीत्युपदेशं द्वितीयया सहधर्म्मिण्या सह वर्त्तमानः स्त्रियमुपेयादित्युपदेशपरं बुद्ध्वा सभार्य्योऽन्यां कथं ऋच्छति गच्छेदपि तु न कथञ्चित्। न ह्यन्यस्यामनुरक्तमन्यानुसरति न चान्यया तु हृतमन्या हृणोतीति नयस्य पूर्व्वमर्थं त्यक्त्वा द्वितीयमङ्गीकृत्यासहाय एवागत इत्यर्थः। अन्योऽपि जडो महोपदेशं विपरीतमेव बुध्यते। द्वितीया सहधर्म्मिणीत्यमरः। स्वार्थीयः। विकल्पत्वात् सत्ताभावः॥ ६८॥

देव्यापि दिव्याऽनु तनुः प्रकाशी-
कृता मुदश्चक्रभृतः सृजन्ती।
अनिङ्गितैस्तामवधार्य चिह्नै-
स्तद्वाचि बाला शिथिलाऽऽदराऽभूत् ॥ ७० ॥
विलोकके नायकमेलकेऽस्मिन्
रूपान्यता कौतुकदर्शिभिस्तैः।

इदानीं देव्यापि स्वाकारो धृत इत्याह॥ देव्येति॥ इन्द्रादीनां स्वाकारधारणानन्तरं देव्यापि सरस्वत्यापि चक्रभृतः श्रीविष्णोर्मुदो हर्षान् सृजन्ती प्रेयसितरा दिव्या तनुरतिसुन्दरी मूर्त्तिः प्रकाशीकृता। देव्यापि स्वाकारो धृत इत्यर्थः। अनन्तरञ्च बाला भैमी अनिङ्गितैः प्रकटितैर्वीणाहंसादिभिश्चिह्नैस्तां सरस्वतीं अवधार्य्य ज्ञात्वा तद्वाचि श्लेषवक्रोक्त्यादिरूपायां तस्यां वाण्यां विषये शिथिलादरा परित्यक्ताश्चर्य्याऽभूत्। पूर्व्वं तु मानुषीयमीदृशं कथं वदतीति साश्चर्य्याभूत् सम्प्रति सरस्वती दृष्ट्वाऽस्या एवं उक्तौ किमाश्चर्य्यं अपि तु न किञ्चिदिति त्यक्ताश्चर्य्या जातेत्यर्थः ॥ ७० ॥

विलोकक इति॥ अस्मिन्नानादेशेभ्यः समागते नायकमेलके राजसङ्घे विलोकके विलोकयति सति रूपान्यतया नलाकारं परित्यज्य स्वस्वमेवाद्याकारधारणेन कौतुकं दर्शयितुं शीलमेषामेवंभूतैस्तैर्देवैःसहितैरिन्द्रादिभिः निर्जले जलदर्शनादिरूपामिन्द्रजालविद्यां विदन्ति जानन्ति तेषां इन्तिवधात् शैव-

बाधा वतेन्द्रादिभिरिन्द्रजाल-
विद्याविदां वृत्तिवधाद्व्यधायि ॥ ७१ ॥
विलोक्य तावाप्तदुरापकामौ
परस्परप्रेमरसाभिरामौ।
अथ प्रभुः प्रीतमना बभाषे
जाम्बूनदोर्वीधरसार्वभौमः ॥ ७२ ॥

नोपायस्य स्वयमङ्गीकरणेन नाशात् बाधा व्यधायि पीडा विहिता, वताश्चर्यं कष्टं वा। स्वयम्बरमध्ये इन्द्रजालं प्रकटयतामैन्द्रजालिकानां विलोककेऽस्मिन् राजसङ्घे तैर्वृत्तिवधात्तेषां बाधा व्यधायि पीडाविहिता। ऐन्द्रजालिकान् परित्यज्येन्द्रादीनामेव विलोकनादित्यर्थ इति तत्त्वार्थो वा। रूपान्तरं धारयमाणानिन्द्रादीन् दृष्ट्वा सर्वेऽपि साश्चर्या जाता इति भावः। तैः। सा च ते च। पुमान् स्त्रिया (पा० १।२।६७) इत्येकशेषः ॥ ७१ ॥

विलोक्येति॥ अथ जाम्बूनदस्य सुवर्णस्योर्वीधरो मेरुस्तस्य सार्वभौमश्चक्रवर्त्ती अत एव प्रभुः समर्थ इन्द्रः प्रीतमनाः सन्तौ भैमीनलौ एतादृशौ विलोक्य बभाषे। किम्भूतौ। आप्तः अन्योन्यमा[illegible]प्तरूपः दुरापः अन्योन्येन प्राप्तुमशक्यः कामोऽभिलाषो याभ्यां अत एव परस्परप्रेमरसेनाभिरामौ साभ्यन्वितसात्त्विकभावयुक्तौ। प्रभुर्जाम्बूनदेत्यादिना वरदानसामर्थ्यं सूचितम्। प्रीतमना इत्यनेन च स्वेच्छयैव वरं दातुमारब्धवांस्तु याचितः सन्निति प्रसादाभावं सूचयति। सार्वभौमः। तस्येदम्

वैदर्भि दत्तस्तव तावदेष
वरो दुरापः पृथिवीश एव।
दूत्यन्तु यत्त्वं कृतवानमायं
नल प्रसादस्त्वयि तन्ममायम्॥ ७३॥
प्रत्यक्षलक्ष्यामवलम्ब्य मूर्त्तिं
हुतानि यज्ञेषु तवोपभोक्ष्ये।

(पा० ५।१।४२) इत्यण्। अनुशतिकादीनाञ्च (पा० ७।३।२०) इत्युभयपदवृद्धिः॥ ७२॥

किमाह सोऽयत आह॥ वैदर्भीति॥ हे वैदर्भि मया तावत् प्रथमं एष पृथिवीश एव नल एव तव लक्षम्बन्धी वरः, अयं च देवप्रसादः अर्थात् तुभ्यं दत्तः। किम्भूतः। भूयोभिरपि तपोभिर्दुरापः। दत्तस्तावद्दत्त एवेति वा। इति भैमीमुक्त्वा नलमाह। हे नल त्वं तु भैमीविषयेऽस्मत्सम्बन्धि दूत्यं यद्यस्मादमायं व्याजरहितं मनःशुद्ध्या कृतवान् तत्तस्मात् त्वयि विषये ममापि वक्ष्यमाणः प्रसादो वरदानमित्यर्थः॥ ७३॥

प्रत्यक्षेति॥ हे नल अहं प्रत्यक्षेण लक्ष्यां नेत्रदृश्यां मूर्त्तिं तनुमवलम्ब्य धृत्वा यज्ञेषु तव हुतानि हवींषि पुरोडाशादीनि उपभोक्ष्ये। ईदृशेन वरेण मम को लाभ इत्यत आह। हि यस्मात् तद्विदांमो यजमानादयस्त मत्तं यज्ञमन्त्राभिग्राहाद्भुक्तमवेत्य मन्त्रादधिकोऽतिरिक्तो यो देवस्तस्य सद्भावे विषये संशेरते। मिमांसका मन्त्रातिरिक्ता कर्म्मसमवायिनो देवता

संशेरतेऽस्माभिरवेक्ष्य भुक्तं
मखं हि मन्त्राधिकदेवभावे ॥ ७४ ॥
भवानपि त्वद्दयितापि शेषे
सायुज्यमासादयतं शिवाभ्याम्।

नास्त्येवेति वेदान्तिभिः सह विप्रतिपद्यन्ते। तस्मात् तद्विप्रतिपत्तिनिरासद्वारा तुभ्यं कीर्त्तिं दातुं त्वदीययज्ञेषु ऊतं प्रत्यक्षेणैव शरीरेण भोक्ष्य इति भावः। अग्नौ प्रक्षिप्तस्य हविषो भस्मसाद्भावमात्रदर्शनान्मन्त्रप्रकाश्येन्द्रादीनां वाऽदर्शनात् किमयं यज्ञः सत्योऽसत्यो वेति सन्देहे प्रत्यक्षशरीरेण मखभोजने त्वयं सन्देहो गमिष्यति। कस्मिन् सति। मन्त्रादधिके देवेषु भावे विश्वासे सति। मन्त्रमयी देवतेत्येतत्पक्षया प्रत्यक्षायां देवतायामधिकस्य मनोविश्वासस्य युक्तत्वादित्यर्थः। संशयनिवृत्तिरेव महांस्तव लाभो भविष्यतीति भावः। उपभोक्ष्ये। भुजोऽनवने (पा० १।३।६६) इति तङ्। अस्माभिरिति बहुवचनं देवतान्तराभिप्रायं ॥ ७४ ॥

भवानिति॥ हे नल भवानपि त्वद्दयिता भैम्यपि युवां द्वे भूलोकभोगनिमित्तस्य कर्मणः शेषे अवसाने सति शिवाभ्यां ईश्वरपार्वतीभ्यां सायुज्यं सहैक्यं आसादयतं प्राप्नुतं। भवान् शिवेन भैमी च पार्वत्या संहैक्यं गच्छतमित्यर्थः। स्वकर्मं प्राप्तिरिदं स्वयमेव भविष्यति किं वरदानेनेत्यत आह। 'हि यस्मात् शिवस्य शरणं प्राप्य अहं कीदृक् शिवो देवो मनुष्यो वा स्वर्गी

प्रेत्यास्मि कीदृक् भवितेति चिन्ता
सन्तापमन्तस्तनुते हि जन्तोः ॥ ७५ ॥
तवोपवाराणसि नाम चिह्नं
वासाय पारेसि पुरं पुरास्ते।
निर्वातुमिच्छोरपि तन्न भैमी
सम्भोगसङ्कोचभियाधिकाशि ॥ ७६ ॥

नारकी वा भविष्यामीत्यादिचिन्ता जन्तोः प्राणिनः अन्तःकरणे सन्तापं महांतमाधिं जनयति। वरदानेन चिन्तानिवृत्तौ मनस्तापनाशः फलमित्यर्थः। शिवाभ्यां। पुमान् स्त्रिया (पा० १।२।६७) इत्येकशेषः। असीत्यहमर्थेऽव्ययं वा ॥ ७५ ॥

तवेति ॥ हे नल निर्वातुमिच्छोरपि मुमुक्षोरपि तव वासाय वसत्यर्थं उपवाराणसि काशीसमीपे पारेसि असिनद्याः परतीरे नामचिह्नं तन्नामांकितं तत्प्रसिद्धं पुरं नलपुरमिति यावत् पुरास्ति भविष्यति। इदानीमन्यत्र निवासेऽपि अतःपरं तत्पुरं राजधानी भविष्यति। मुमुक्षोरपि ते पुरं काशीमधिकृत्य न कृतमित्यर्थः। किमिति। न कृतमित्यत आह। भैम्या सह सम्भोगः सुरतादिसुखं तस्य सङ्कोचोऽल्पत्वं तस्माद्भिया भयेनाधिकाशि पञ्चक्रोशपरिमितायां काश्यां मुक्तिपुर्यां ब्रह्मचर्यादिनियमे भोगसङ्कोचभिया तत्पुरं न कृतं किन्तु तत्समीप इति भावः ॥ ७६ ॥

धूमावलिश्मश्रु ततः सुपर्वा
मुखं मखास्वादविदां तमूचे।
कामं मदीक्षामयकामधेनोः
पयायतामभ्युदयस्त्वदीयः ॥ ७७ ॥
या दाहपाकौपयिकी तनुर्मे
भूयात् त्वदिच्छावशवर्त्तिनी सा।
तया पराभूततनोरनङ्गात्
तस्याः प्रभुः सन्नधिकस्त्वमेधि ॥ ७८ ॥

धूमेति ॥ ततः धूमावलिरेव श्मश्रु यस्यैवंविधं मखास्वादविदां यज्ञरसाभिज्ञानां देवानां मुखं सुपर्वा देवोऽग्निः इति तं नलमूचे। इति किं। हे नल त्वदीयोऽभ्युदयस्त्वत्समृद्धिः कामं नितरां मदीक्षामयी विलोकनरूपा कामधेनुस्तस्याः पयायतां दुग्धमिवाचरतु तद्वदपरिमितो भवत्विति। मद्विलोकनमात्रेण तव समृद्धिरनन्तास्त्विति तस्मै वरं दत्तवानित्यर्थः। अन्यत्रापि मुखस्य भूषणं श्मश्रु च युक्तं। कामधेनोः पयो युक्तं। धूमावलिरूपेण श्मश्रुणा ततो व्याप्त इति वा। पयायतां। आचारे कर्त्तुः क्यङ् सलोपश्चेति (पा० ३।१।११) क्यङ् सलोपौ ॥ ७७ ॥

वरान्तरमाह ॥ येति ॥ हे नल स्फोटादिजनको दाहः तण्डुलादेः पाकः तयोरौपयिकी कारणभूता मे या तनुर्मूर्त्तिः सा त्वदिच्छाया वशे वर्त्तत इति वशवर्त्तिनी इत्येवं शीला भूयात् निर्वह्निकेऽपि देशे यत्र त्वमभिलषसि तत्र दाहपाकयोग्या मम

अस्तु त्वया साधितमन्नमीन-
रसादि पीयूषरसातिशायि।
यद्भूय विघ्नस्तव सूपकार-
क्रियासु कौतूहलशालि शीलम्॥ ७६॥

मूर्त्तिः प्रकटा भवत्वित्यर्थः। अत एव वशवर्त्तित्वात्तस्या मदीयमूर्त्तेः प्रभुः स्वामी सन् त्वं शिवनेत्रज्वालारूपया तया मदीयमूर्त्त्या पराभूततनोर्दग्धशरीरादनङ्गादधिक एधि भव। पूर्व्वमेव सुन्दरत्वेन कामादधिकः, इदानीन्तु मत्तन्वास्वद्वशवर्त्तित्वात्तद्वशीभूतया तया कामे पराभूते प्रकारान्तरेणाप्यधिकतरो भवेति भावः॥ ७८॥

वरान्तरमाह। अस्त्विति। हे नल त्वया साधितं राद्धमन्नं तण्डुलादि मीना मत्स्या रसाः प्रपानकादयः दुग्धादयो वा ते आदयो मुख्या यस्य एवम्भूतमन्यदपि पाकयोग्यं भक्ष्यं पीयूषरसातिशायि पीयूषरसममृतास्वादमप्यतिशेते एवं शीलं तस्मादपि नितरां स्वादु अस्तु भवतु। हे भूप राजन् यद्यस्मात् वयं तव शीलं सूपकाराणां क्रियासु कर्म्मसु विषये कौतूहलशालि तूहलेन शालते शोभते एवं शीलं विघ्नः आस्मः तस्मात् तुभ्यमीदृशो वरो दत्त इत्यर्थः। शीलमित्यत्र चित्तमित्यपि पाठः। विघ्नः। अस्मदो द्वयोश्चेति (पा० १।२।५६) बहुत्वं ॥ ७९॥

वैवस्वतोऽपि स्वत एव देव-
स्तुष्टस्तमाचष्ट नराधिराजम्।
वरप्रदानाय तवावदानै-
श्चिरं मदीया रसनोद्धुरेयम्॥ ८० ॥
सर्व्वाणि शस्त्राणि सहास्त्रचक्रै-
राविर्भवन्तु त्वयि शत्रुजैत्रे।
अवाप्यमस्मादधिकं न किञ्चि-
ज्जागर्त्ति वीरव्रतदीक्षितानाम्॥ ८१ ॥

वैवस्वतोऽपीति। वैवस्वतः सूर्य्यपुत्रो यमोऽपि देवः स्वत एव स्वयमेव तुष्टः सन् तं धराधिराजं नलं इत्याचष्ट अवोचत्। इति किं। हे नल तवावदानैर्दूत्यादिकर्म्मभिर्या गीयमानैरद्भावैर्वा निमित्तैरियं मदीया रसना जिह्वा वरप्रदानाय तुभ्यं वरं दातुं चिरमुद्धुरा उत्सुका, वरं दास्यामीति सोत्कण्ठा विद्यत इत्यहमपि वरं दास्यामीत्यर्थः ॥ ८० ॥

सर्व्वाणीति। हे नल सर्व्वाणि मन्त्रप्रयोज्यब्रह्मास्त्रादिरहितान्यभ्याससाध्यानि कुन्तखड्गादीनि शस्त्राणि अस्त्राणां मोघोपसंहारादीनां मन्त्रा देवतादीनां वा चक्रैः समूहैः सह त्वयि आविर्भवन्तु प्रकटीभवन्तु। मन्त्रशस्त्रादीनि त्वमेव जानीहीति भावः। यतः सर्व्वजैत्रे शत्रूणां जेतरि। किमित्येवं वरदानमित्याशङ्क्याह। सङ्ग्रामादपलायनलक्षणे वीराणां व्रते दीक्षितानां गृहीतनियमानां शूराणामस्मात् शस्त्रज्ञानादधिकमुत्कृष्टं कि-

कृच्छ्रङ्गतस्यापि दशाविपाकं
धर्म्मान्न चेतः स्खलतु त्वदीयं।
अमुष्वतः पुण्यमनन्यभक्तेः
स्वहस्तवास्तव्य इव त्रिवर्गः॥ ८२॥

श्चिदपि अवाप्यं न जागर्त्ति स्फुरति तस्मिन् किन्त्वेतदेव तेषां परमं प्राप्यं तस्मादयं वरो युक्त एवेत्यर्थः। दीव्यितानां, छन्यानां कर्त्तरि वेति (पा० २।३।७१) षष्ठी॥ ८१॥

कृच्छ्रमिति। हे नल कृच्छ्रमतिकष्टदशाविपाकमवस्थापरिवर्त्तं गतस्यापि प्राप्तस्य आपदि पतितस्यापि तव चेतः धर्म्मान्न स्खलतु न चलतु। किम्भूतं चेतः। त्वदीयं त्वदायत्तं। आपदि सर्व्वैरप्यधर्म्म एव क्रियते तव तु चित्तमापद्यपि धर्म्मपरमेव भूयादिति वरो मया दीयत इत्यर्थः। एतस्य वरस्य दाने हेतुमाह। यस्मात् पुण्यममुष्यतोऽनन्यभक्तेः पापानामकर्त्तुः केवलधर्म्मकर्म्मिनः पुरुषस्य धर्म्मार्थकामलक्षणस्त्रिवर्गः स्वहस्तवास्तव्य इव स्वहस्ते वसति एवम्भूत इव भवति। अनन्यभक्ते धर्म्मे तदायत्तावर्थकामावपि प्राप्येते। कृच्छ्रमित्यादिना भविष्यत्कलिप्रभावः सूचितः। सुमतात्त्वदिमित्यपि पाठः। अन्यस्य भक्तिर्भजनं तदभावोऽनन्यभक्तिर्धर्म्मातिरिक्तभजनाभावाद्धेतोरिति वा। वसतीति वास्तव्यः, वसेस्तव्यत्कर्त्तरि णिच्चेति (पा० ३।१। ९६। वा० १) तव्यत्। वर्गः सङ्घः॥ ८२॥

स्मिताञ्चितां वाचमवोचदेनं
प्रसन्नचेता नृपतिं प्रचेताः।
प्रदाय भैमीमधुना वरौ ते
ददामि तद्यौतककौतुकेन॥ ८३॥

यत्राभिलाषस्तव तत्र देशे
नन्वस्तु धन्वन्यपि तूर्णमम्भः।
अपो वहन्तीह हि लोकयात्रां
यथा न भूतानि तथा पराणि॥ ८४॥

स्मितेति। प्रसन्नचेताः सन्तुष्टः प्रचेता वरुणः एनं नृपतिं प्रति स्मिताञ्चितां हासविशदां वाचमवोचत्। हे नल अहं तु भैमीं प्रदायाधुना तस्या भैम्या यौतकं युतकयोर्वधूवरयोः सम्बन्धि पारिवर्हं वस्त्राभरणादि तस्य कौतुकेन ते तव द्वौ वरौ ददामि।

कन्यां प्रदाय यत्किञ्चिद्वरायात्र प्रदीयते।
वेदिकायां स्थितायैव तद्यौतकमिति स्मृतमिति।

युतं युग्मं युतमेव युतकं युतकसम्बन्धि देयं यौतकं। दयिजेति कान्यकुब्जभाषायां॥ ८३॥

यत्रेति। ननु हे नल यत्र धन्वनि निर्जले मरावपि देशे तव अम्भोऽभिलाषः तत्र देशे तदिच्छामात्रेण तूर्णं शीघ्रं अम्भः जलमस्तु भवतु। अम्भस्येव वरदाने हेतुमाह। हि यस्मात् इह लोके पञ्चसु भूतेषु वा मध्ये आपो जलानि भूतानि यथा लोकयात्रां लोकजीवनहेतुत्वं वहन्ति प्राप्नुवन्ति तथा पराणि

प्रसारितापः शुचिभानुनास्तु
मरुः समुद्रत्वमपि प्रपद्य।
भवन्मनस्कारलवोद्गमेन
क्रमेलकानां निलयः पुरेव ॥ ८५ ॥

भूतेजोवाय्वाकाशलक्षणानि भूतानि लोकजीवनहेतवो न भवन्ति। पानीयं प्राणिनां प्राणा विश्वमेतच्च तन्मयमिति। उदकस्येच्छानुसारित्वं परमः पुरुषार्थ इत्यर्थः। अम्भस्तु जीवनोपाय इति विश्वः ॥ ८४ ॥

प्रसारीति। हे नल मरुर्निर्जलो देशो भवतो मनस्कारोऽभिलाषस्तस्य लवो लेशस्तस्योद्गमेनोदयेन बहूदकत्वात् समुद्रत्वं प्रपद्य प्राप्यापि पुरेव निर्जलत्वदशायां यथासीत् तथैवास्तु भवतु। किंविधः। पूर्वं शुचिभानुना ग्रीष्मसम्बन्धिना सूर्येण प्रसारी विस्तृतस्तापः सन्तापो यस्य। इदानीमपि समुद्रत्वात् शुभ्रकिरणेन चन्द्रेण विस्तारिता आपो यस्य शुचेर्वाडवाग्नेः कस्येन ज्वालया विस्तारितः सन्तापो यस्येति वा। चन्द्रोदये समुद्रवृद्धिः समुद्रे वाडवाग्निर्युक्तः। तथा पूर्वं क्रमेलकानामुष्ट्राणां निलयः स्थानभूतः। वाळुल्येन तेषां तदुद्भवत्वात्। इदानीं भवन्मनस्कारलवोद्गमे सति नक्राणां यादोविशेषाणां ये महान्तस्तेषां निलयः क्रमेलदो मरुर्भवन्मनस्कारलवोद्गमे सति समुद्रत्वं प्रपद्यापि पुरेव शुचिभानुना प्रसारितापो नास्त्वपि तु भवत्वेवेति वा। प्रसारिता आपो यस्येति। ऋक्पूरब्धूः पथमानक्ष इति

अम्लानिरामोदभरस्य दिव्यः
पुष्पेषु भूयाद्भवदङ्गसङ्गात्।
दृष्टं प्रसूनोपमया मयान्यन्-
न धर्म्मशर्म्मोभयकर्म्मठं यत्॥ ८६॥
वाग्देवतापि स्मितपूर्व्वमुर्वी-
सुपर्वराजं रभसाद्बभाषे।

(पा० ५।४।७४) अप्रत्ययः। मनस ऐकाग्र्यकरणं मनस्कारः चित्तस्यैकाग्र्येण चिन्तनमिच्छाविशेषः। चित्ताभोगो मनस्कार इत्यमरः। अतः कृकमीत्यादिना (पा ८।३।४६) सत्वं॥ ८५॥

वरान्तरमाह। अम्लानिरिति। हे नल भवदङ्गसङ्गाद्धेतोः पुष्पेषु अम्लानिरसङ्कुचद्दलावयवत्वं आमोदभरस्य दिव्यः स्वर्गीयः परिमलातिशयस्य भूयात्। यद्यस्मात् प्रसूनोपमया पुष्पसादृश्येन पुष्पसदृशमित्यर्थः। धर्म्मस्य पुण्यस्य शर्म्मणः सुखस्य उभयस्य पुण्यसुखलक्षणस्य द्वयस्य कर्म्मठं करणे समर्थं अन्यत् पुत्रादिकं वस्तु मया न दृष्टं किन्तु पुष्पमेव देवादिपूजनेन धर्मं शिरसि धारणेन परिमलेन वा सुखञ्च करोति। कर्म्मठः। कर्म्मणि घटते कर्म्मणि घटोऽठच् (पा० ५।२।३५)॥ ८६॥

वागिति। वाग्देवता सरस्वत्यपि स्मितपूर्व्वं प्रथमतः हसितं स्मितं कृत्वेत्यर्थः। उर्व्वीसुपर्वराजं भूमीन्द्रं रभसादुदात्तमिति बभाषे। हे नल तव प्रेयसी भैमी। तद्दासस्याशिषितं यदिदं वचं चापरमयाः सन् सन्तः सकाशाल्लिखितं

त्वत्प्रेयसीसम्भ्रमदमाचरन्त्या
मत्तो न किञ्चिद् ग्रहणोचितं ते ॥ ८७ ॥
अर्थो विनैवार्थनयोपसीदन्-
नाल्पोऽपि धीरैरवधीरणीयः ।
मान्येन मन्ये विधिना वितीर्णः
स प्रीतिदायो बहु मन्तुमर्हः ॥ ८८ ॥

तव ग्रहणोचितं ग्रहीतुं योग्यं किं नापि तु मत्सकाशादपि किञ्चिद्ग्रहीतुमुचितमेव त्वत्प्रियामित्रभूतया मया यद्दीयते तदप्यङ्गीकुर्व्विति । रभसो हर्षवेगयोरिति विश्वः । सम्मर्दः । प्रमोदामोदसम्मदा इत्यमरः ॥ ८७ ॥

गर्वपरिहारपूर्वं स्ववरस्य ग्रहणयोग्यत्वमेव समर्थयते । अर्थ इति । त्वदा मत्समीपमागन्तव्यं इति या अर्थना तया विनैव उपसीदत्समीपमागच्छन् स्वयमेव चाभवन् अल्पोऽप्यर्थः अर्थ्यते अर्थः फलं स धीरैर्मनीषिभिर्नावधीरणीयः नावज्ञेयः किन्त्वङ्गीकरणीय एव । यस्मात् मान्येन मानमर्हता पूज्येन विधिना ब्रह्मणा दैवेन चावितीर्णो दत्तः । याञ्चामन्तरेण लब्धत्वात्स प्रीतिदायः । प्रीत्या दानं प्रीतिदायः अल्पोऽपि बहु मन्तुं गौरवेणाङ्गीकर्त्तुं अर्हः उचित इत्यहं मन्ये । तस्मात्त्वयापि मया योऽल्पोऽप्यर्थो दीयते स ग्रहीतव्य एवेति भावः । धीरैरल्पोऽप्यर्थो नावज्ञायते किन्तु पुनर्महानित्यपेरर्थः । महतोऽपि वरस्याल्पलोकोर्गर्वपरिहारः । प्रीत्या दायः प्रीतिदायः । कर्तृकरणे कृतेति (पा० २।१।३२) समासः । दीयते दायः, कर्मणि घञ् ॥ ८८ ॥

अवामा वामार्द्धे सकलमुभयाकारघटनाद्-
द्विधा भूतं रूपं भगवदभिधेयं भवति यत्।

तमेव वरमाह। अवामेति। शश्वज्जपो यस्य तत्सम्बोधनं तादृश, भो नरपते नल मे मन्त्रं गोप्यं मदीयरहस्यभूतं सेन्दुमं इन्दोर्मा चन्द्रकान्तिस्तया सहितं ईशभागे चन्द्रकान्त्या युतं चन्द्रकलोपेतं पार्व्वतीभागे च भूषणीभूतार्द्धचन्द्रयुतं उक्तरीत्या निश्चित आकारः स्वरूपं यस्य। यद्वा ईक्षामात्रेण साकारं, विचारे क्रियमाणे अविद्यमानाकारं, तथा स्मरहरमयं कामतत्त्वरूपं क्रमेण भुक्तिमुक्तिदायि एवम्भूतं तद्रूपं अन्तःकरणे सते साधवेऽर्थात् तुभ्यं। यद्वा हे नरपते सते साधवे ते तुभ्यं अस्मत्यर्थं सिध्यतु समाधिदशायां साक्षाद्भवत्वित्यर्थः। मे तद्रूपमिति वा। मे मम प्रसादादिति शेष इति वा। स्त्रीणां कामप्रधानत्वात् स्मरपदेन स्त्रीभागो लक्ष्यते। तथा च पूर्व्वोक्तगुणविशिष्टं स्मरहरमयं शक्तिशिवरूपं तन्मे रूपं तवान्तः सिद्ध्यत्विति वा। पूर्व्वोक्तं हरमयं मे रूपममलं अन्तः स्मर चिन्तय। तद्रूपं सते ते तुभ्यं सिध्यत्विति वा। तद्रूपममलमन्तः स्मर, तथा अयमस्तुहि, तच ते सिद्ध्यत्विति वा। शश्वज्जपनं जपो यस्य तादृश हे नल सेन्दु अकामं कर्पूरगौरं हरं अयं शुभावहविधिभूतं तद्वर्णविशिष्टं रूपं स्मर। रूपते भाष्यमाणाय स्तुवते सते साधवे तुभ्यं सिध्यतु वा। रूपते ते स हरः सिद्ध्यतु साक्षात्कारं साधकं भवत्विति वा। स्तुवते ते तद्रूपं हरो वा स मे शोभमानाभीष्ट सिद्ध्यतु। यद्वा स्मरहरं शिवं शिवभूतं शश्वज्जप सदा सर्व

तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते सिध्यतु सते ॥ ८९ ॥

सोऽयं स्मरहरस्ते सिद्धातु साचाद्भवलिति वा। अन्तर्मध्ये मन्त्राः शैवाः शाक्ताश्च यस्य तादृशमिति वा। तत्किं। यद्रूपं शब्दरूपत्वाद् भगवती भगवांश्च भगवन्तौ पार्व्वतीपरमेश्वरौ अभिधेयं वाच्यं यस्य। यद्वा भगवच्छब्दवाच्यं अर्द्धनारीश्वरं भवति। कथं। यतः द्विधा स्त्रीपुंसरूपौ द्वौ भागौ रूपं भूतं प्राप्तं इति वा। एतत् कुत इत्यत आह। यतोऽर्द्धं दक्षिणभागे अवामा न स्त्री किन्तु पुरुष इत्यर्थः। अर्द्धं वामभागे वामा स्त्री चेति सामर्थ्यादर्द्धशब्दावृत्त्या योज्यं। एवं द्विधाभूतमित्यर्थः। अवामं दक्षिणञ्च आ समस्त्येन वाममवाममदक्षिणञ्च अवामा वामे च ते अर्द्धे च समौ भागौ भूतं प्राप्तं सत् यद्विधा भवतीति वा। परमुभयोराकारयोर्घटनात् सकलं सम्पूर्णैकरूपमित्यर्थः। यद्रूपमर्द्धं वामभागे अवामा अप्रतिकूला प्रसादावदातकान्तमुखी वामा स्त्री भवति पार्व्वतीरूपं भवतीत्यर्थः। तद्धरमयं रूपमित्युक्तेःसामर्थ्याद्दक्षिणार्द्धं महेशः पुरुषरूपं भवति इत्युक्तं भवति। एतेन शक्त्युद्रेकः सूच्यते। कीदृशं हरं स्मरहरं वा सेन्दु तथा अमलं सेन्दुत्वेऽपि कलङ्करहितं। यतः सकलकलासाचन्द्रयुतं। कलामात्रं हि निष्कलङ्कं भवतीत्यर्थं इति वा। कलाभिरणिमाद्यैश्वर्य्यैश्चतुःषष्टिकलाभिर्वोपेतमिति वा। यद्रूपमर्द्धं अवामौ वामा च सा शक्त्यात्मको विष्णुः अर्द्धं सा वा लक्ष्मीर्वा वार्थे यदाऽवतीति वा रक्षिका सा लक्ष्मीनारायणात्मकं

भवति। तदामनेत्रसेन्दुरूपतया सेन्दुम ध्याने चन्द्रकलोपेतत्वात् सेन्दुमीं लक्ष्मीभागे च भूषणीभूतार्द्धचन्द्रयोगात् सेन्दुमं शिवाद्भिन्नत्वाद्धरमयं सामर्थ्याद्दक्षिणभागे शिवरूपं एवंभूतं हरिहरात्मकं मे रूपं स्मर। पूर्व्ववदिति वा। अर्द्धपूर्व्वभागे अवा ओकारेण तथाऽमाऽनुस्वारेण मा पवर्गपञ्चमव्यञ्जनेन वा प्रणवपादेनेत्यर्थः। तथा उत्तरभागे अवा ओकारेण तथाऽमाऽनुस्वारेण मा पवर्गपञ्चमव्यञ्जनेन वा प्रणवपादेनेत्यर्थः। तथा उत्तरभागे अवा ओकारेण तथाऽमाऽनुस्वारेण व्यञ्जनमकारेण वा प्रणवेनोपलक्षितं प्रणवद्वयसम्पुटितमित्यर्थः। हरमयं हरेति नामरूपं मे मन्त्रं मया जप्यमानं रहस्यं स्मर चिन्तय जप। शिष्टं पूर्व्ववत्। हरस्य पक्षे तु तन्मे रूपं मन्त्रं अन्तर्मनसि स्मर प्रकृत्य जप। स च ते सिद्यातु। कीदृशं मन्त्रं हरमयं हर रेफरूपं तथा निराकारं अश्च अश्च तयोराकारः स्वरूपं स्वरूपे च का-कारौ निर्गतावाकारौ यस्मात्तं निराकारं हकाररेफयोरुच्चारणार्थं यदकारद्वयं तद्रहितं, ह्र, इति व्यञ्जनमात्रहकाररेफरूपमित्यर्थः। तथा सेन्दु ईश्च इन्दुश्च ताभ्यां सह वर्त्तमानं ईकारेणार्द्धचन्द्रेण युक्तं। तथा कला अनुस्वारस्तत्सहितं ह्रींकाररूपमित्यर्थः। सकलं चन्द्रकलोपेतं। सेन्दुमीकारबिन्दुयुतमिति वा। अमलं ग्राम्यादिदोषरहितं। तत् किं। यत् रूपमर्द्धं पूर्व्ववद्दक्षिणवामभागयोरवामा वामा च उपमर्धितं प्रकादयसम्पुटितं। तथा यत् पूर्व्वमुभयोरकारयोर्घटनात्समस्तद्विधाभूतं पृथगसमसंयुक्तं सन् भगवान् हरोऽभिधेयो वाच्यः।

यस्य तादृग्भवति। प्रत्येकमकारयोगाद्धरेति शिवनाम यद्भवतीत्यर्थः। यद्वा पूर्वं हर इति द्विधाभूतं। अनन्तरं अकारद्वयव्यतिरेकेण व्यञ्जनरूपतया संयोगात्मकत्वमेकीभूतमित्यर्थः। तथा भगवती भुवनेश्वरी अभिधेया यस्य तादृशमिति वा ॥

शिवान्यो वह्निसंयुक्तो ब्रह्मादितयमन्तरा।
तुरीयस्वरशीतांशुरेव तारासमन्वितः॥
एष चिन्तामणिर्नाम मन्त्रः सर्व्वार्थसाधकः।
जगन्मातुः सरस्वत्या रहस्यं परमं मतमित्यागमात्॥

प्रणवद्वयसम्पुटितभुवनेश्वरीरूपं चिन्तामण्याख्यं मे सरस्वत्याः स्वरूपभूतं मन्त्रं स्मर जप, स च मन्त्रस्ते सिध्यतु। शैवादिचिन्तामणिमन्त्रसम्भवात् मन्त्रस्येति विशेषणं। हश्च रश्च मश्च ईश्च तादृशं हकाररेफमकारेकारसमाहाररूपं। यद्यपीकारः पश्चान्निर्द्दिष्टस्तथापि मकारात् पूर्व्वमेव ज्ञेयः। तस्य पश्चान्निर्द्देशो मन्त्रगोपनार्थः। तथा सेन्दु सचन्द्रं निराकारं निर्गताकारचतुष्टयस्वरूपं तादृशं मे मन्त्रं स्मर। इतरत् पूर्व्ववदिति वा। अत्र पक्षे आकाररहितो मन्त्रः। कश्च लश्च कलौ ताभ्यां सहित मन्त्रोऽपि। निराकारं सेन्दुमिति सम्बध्यते। उभयाकारघटनादित्यादि पूर्व्ववत्। तथा च क्लीमिति कामराजबीजं सिध्यति। अस्मिन् श्लोके टीकान्तरकृतो बहूनां शैववैष्णवादिमन्त्राणामुद्धारो विज्ञेयः। अत्र ग्रन्थविस्तरभिया कष्टकल्पनयानया नचोक्तः॥ ८८॥

सर्व्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये कृतः सुकृतिना मन्मन्त्रचिन्तामणिः ॥९०॥

मन्त्रफलमाह। सर्व्वेति। अयं पूर्व्वश्लोकोपदिष्टः मन्मन्त्रात्मा चिन्तामणिश्च चिन्तामणिसञ्ज्ञको मन्मन्त्र इत्यर्थः सर्व्वकामदत्वान्मन्त्र एव चिन्तामणिः चिन्तामणितुल्यो मन्मन्त्र इत्यर्थः। स पुरश्चरणादिना क्षीणपापेन सुकृतिना येन साधकेन जपादिना हृदये चित्ते कृतः स साधकः सर्व्वाङ्गानि व्याप्नुवन्ति सर्व्वाङ्गीणानि तैः शृङ्गारादिरसैरेवातिस्वादुत्वादमृतस्तिमितया आर्द्रया काव्यादिरूपया वाचा हेतुभूतया वाचस्पतिर्वागीशो भवति। तथा स साधकः स्वर्गीयमृगीदृशां दिव्यानां मृगाक्षीणां रंभादीनामपि वशीकाराय मारायते कन्दर्पायते। तं दृष्ट्वा उर्व्वशीप्रभृतयो देवाङ्गनाः कामपरवशा भवन्तीत्यर्थः। किञ्च यः पुरुषः कृतपुरश्चरणोऽपि यस्मै फलाय स्पृहयति फलमभिलष्यति सोऽनेन सकृत्पठितमात्रेण मन्त्रेण हेतुना तत्प्राप्नोत्येव किं भूयसा कथनेन मन्त्रविशेषेण वा। नात्र सन्देहः। तस्मात्त्वयाऽयमेव मन्त्रो हृदये धार्य्य इति भावः। सर्व्वाङ्गीणेत्यत्र तत्सर्व्वादेरित्यादिना (पा० ५।२।७) ख.। वाचस्पतिः। षष्ठ्याः पतिपुत्रेत्यादिना (पा० ८।३।५३) सत्व। स्वर्गीयेति। नामधेयगाहछाच्छः (पा० ४।२।११४) मारादिवर्णुः कर्त्तुः क्यङ् सलोपश्चेति (पा० ३।१।११) क्यङ्। यमी। स्पृहेर

पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्त्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः।
सम्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकाननकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्याः॥८१

ष्ठितं (पा० १।४।३६) इति सम्प्रदानत्वं। भूयसे। बहोर्लोपो भू चबहोः (पा० ६।४।१५८) इति भूआदेशः॥८०॥

पुष्पैरिति। यः साधकः चारुणा सुन्दरेण हंसेन निर्यान्तीं गच्छन्तीमूह्यमानां हंसवाहनामित्यर्थः। मन्त्रमूर्त्तिं यन्त्रमध्यस्थितमन्त्रवर्णरूपेण परिणमदाकारां मन्त्रस्यान्तरशरीरां वा मां देवीं सुभगैरतिमनोहरैः सुकुमारैः सुगन्धिभिश्च पुष्पैः गन्धधूपादिभिः षोडशोपचारैरपि अभ्यर्च्य तथा मयि मतिं न्यस्य विषयान्तरादाकृष्य ध्यानबलेन स्थिरीकृत्य देवतान्तरपरिहारेण मय्येव विषये भक्तः सर्व्वात्मकतया मामेव सेवमानः सन् चेद्यदि जपति तत्तर्हि असौ जापको वत्सरान्ते संवत्सरावसाने प्राप्ते जाते सति यस्य कस्यापि स्त्रीबालमूकादेरपि शिरसि करं धत्ते स्थापयति सोऽपि स्त्रीबालादिरप्यकाण्डेऽसमयेऽकस्माद्वा रुचिरान् रसभावगुणालङ्कारयुतान् दोषरहितान् श्लोकान्रचयति। यस्तु सिद्धमन्त्रः सन् विविधान् श्लोकान्रचयति, किं वाच्यमित्यपेरर्थः। एतदस्याः कौतुकं दृश्यं, अनुभवेनायमस्याश्चमत्कारो द्रष्टव्य इत्यर्थः। एवं सम्पूज्य हंसवाहनादिध्यानपूर्व्वमेकाग्रेण मनसा चेज्जपति तर्हि वत्सरमात्रेण सिद्धमन्त्रः सन्नेवंविधं सामर्थ्यं लभत इति भावः॥८१॥

गुणानामास्थानीं नृपतिलक नारीतिविदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः।

गुणानामिति। हे नृपतिलक राजश्रेष्ठ नल अहं वैदर्भीं
भैमीमथ च वैदर्भीसञ्ज्ञां रीतिं अल्पपदसमाससमासं वा
रचनाविशेषं क्रमेण तव वृत्ते त्वत्सम्बन्धिनि चरित्रे विषये कवितुः
काव्यकरणे युक्तस्य श्रीहर्षादेस्त्व अधिकण्ठे अनवरतं सदा परीर-
म्भस्यालिङ्गनस्य चुम्बनादिविलासस्य यदाचरणं करणं तदेव
शरणं जीवनोपायो यस्या एवम्भूतां परीरम्भक्रीडया वा हेतु-
भूतया त्वच्चरणशरणमालिङ्गनप्रार्थनार्थं त्वच्चरणयोः पतन्ती
अथ च परीरम्भस्य श्लेषालङ्कारस्य क्रीडाया वक्रोक्त्यादिविला-
सस्य च सामस्त्येन चरणं ज्ञानं तदेव शरणं यस्यामेवंविधा-
मधिकं यथा तथातितरां रचयितुं कर्तुं भवित्री भविष्यामि।
किम्भूतां। गुणानां सौन्दर्यपातिव्रत्यादीनां, अथ च श्लेषप्रसा-
दादीनां आस्थानीं सभामण्डपां अवस्थितिभूतां। तथा नारीति
ख्यातिं विदितां। नारी चेत्तर्हि भैम्येव जातेति प्रसिद्धां। अथ
रीतिषु पाञ्चाल्यादिषु विदिता तथा नेत्यरीतिविदिता सर्वा-
विधापि नेति नारीति विदिता तादृशीं पाञ्चाल्यादिरीति-
मध्येऽतिप्रसिद्धामिति यावत्। तथा तवान्तर्हृदये रसेन स्नेह-
सौभाग्येन सम्पविषयानुरागेण त्वयि त्वदनुरागेण वा स्फी-
तामतिपूर्णां, अथ चान्तःश्लोकमध्ये रसैः शृङ्गारादिभिः परि-
पूर्णां एवम्भूतां भैमीं त्वत्कण्ठालिङ्गनपरां। त्वच्चरणशरणां सर्व-

भविच्री वैदर्भीमधिकमधिकण्ठं रचयितुं
परीरम्भक्रीडाचरणशरणामन्वहमहम्॥ ९२॥
भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितु-
र्मुखात् पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे।
ततः पुण्यश्लोकः चिति भुवनलोकस्य भविता
भवानाख्यातः सन् कलिकलुषहारी हरिरिव॥ ९३॥

कवशां प्रत्यहमहं करिष्यामीति भावः। एतदपि वरदानं। नरि-ति मम्मुह्यन्तं पृथक्कृत्य राजश्रेष्ठ नः पुरुषेति मर्मांश्च पाति प्रत्या-दि रीत्या विदितां पाञ्चाल्यादिरीतिषु च विदितामिति वा।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।

इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृता इति आलङ्कारिकाः। आम्यानों क्लीवमाम्यानमित्यमरः। आतिष्ठन्त्यस्यामधिकरणे ल्युट्। टिलात्ङीप्। नारीत्यत्र पक्षे प्रलोप (पा० ६।३।१११) इति दीर्घः। कवितुः। कव्ट वर्णने, कवङ् स्तुतावित्यस्य वा। अधिकण्ठ। सप्तम्यर्थे व्ययीभावः॥ ९२॥

*वरान्तरमाह। भवदिति। मदुपहितकण्ठस्य मयाधिष्ठित-*कण्ठस्य भवतो वृत्तस्य चरित्रस्य स्तोतुः कवितुः कवेर्मुखात् सकाशात्त्वयि विषये पुण्यैश्चारुभिरमलैश्च श्लोकैः पद्यैर्यशोभिश्च घनं निविडं यथा तथा जनानां मुदे हर्षाय उदेयं उदेतव्यं। ततोऽनन्तरं तस्माद्वा हेतोर्भवान् चितिभुवनलोकस्य भूविष्टप-

देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम् ।
किञ्चित्त्वया न हि पतिव्रतया दुरापं
भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥ ९४ ॥

जनस्य कलियुगसम्बन्धिकलुषहारी पातकहरणशील: सन् हरि: श्रीविष्णुरिव पुण्यश्लोक इति आख्यातो भविता भविष्यति। यद्वा पुण्यश्लोकः सन् क्षितिभुवनलोकस्य कलिकलुषहारी हरिरिव भविता। पुण्यौ चारू निर्मलौ श्लोकौ पद्ययशसी यस्येति विग्रहः। पुण्यश्लोको नलो राजेति पुण्यश्लोकत्वं। कर्कोटकस्येत्यनेन कलिनाशित्वमुक्तं। उदेयं। अचोयदिति (पा० ३।१।९७) यत् ॥ ९३ ॥

देवीति। देवी च ते च इन्द्रादयः भैमीं जगदुरित्युः। इति किं। हे भैमि त्वं जगतस्त्रैलोक्यस्योत्तमाङ्गं शिरस्तस्य रत्नाय भूषणमणिभूतायै अतिसौन्दर्य्ययुक्तायै ते तुभ्यं कं कामं वितराम ददाम अपि तु न कमपि। अस्मद्दानयोग्यं नास्तीत्यर्थः। हि यस्मात् यद्यपि पतिव्रतया त्वया किञ्चिदपि वस्तु दुरापं नास्ति किन्तु पातिव्रत्यात् सर्व्वमपि त्वया सुप्रापमेव तथापि यस्तव व्रतलोपं पातिव्रत्यभङ्गं इच्छुः अभिलषति त्वया सह रन्तुमिच्छेत् स भस्मैवास्तु। बत खेदे, अनुचितकर्मा स इत्यर्थः। कामं। अकर्त्तरि च कारके संज्ञायां (पा० ३।३।१९) इति कर्म्मणि घञ्। त्वया। तुल्यार्थयोगे षष्ठीनिषेधात् तृतीया। व्रतलोपं। न लोकाव्ययनिष्ठेत्यादिना (पा० २।३।६९) षष्ठीनिषेधात् द्वितीया ॥ ९४ ॥

कूटकायमपहाय नो वपु-
र्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता।
आशुमाकृतिमतो मनीषितां
विद्यया हृदि तवाप्युदीयताम्॥ ८५॥
इत्थं वितीर्य्य वरमम्बरमाश्रयत्सु
तेषु क्षणादुदलसद्विपुलः प्रणादः।

वरान्तरमाह। कूटेति। हे भैमि त्वं नोऽस्मान् वीक्ष्य यतो विस्मितासि अतो मनीषितामाकृतिं आकारं स्वेच्छाशरीरं मानुं तवापि हृदि मनसि विद्यया नाम्ना देहस्वीकारहेतुभूतया मन्त्रादिशक्त्या उदीयतां उत्पद्यतां। अस्माकं हृदि यथोदितं तथा तवापीत्यपिशब्दार्थः। अपिशब्दान्नलस्यापीति केचित्। किम्भूतान्नः। कूटकायं स्वेच्छामात्रेण धृतं मायानलशरीरं अपहाय त्यक्त्वा पुनर्दिव्यं निजं वपुर्बिभ्रतो धारयतः। अद्यापि प्रभुर्यदस्मद्दर्शनात् सेवकादिः साश्चर्य्या भवति तदस्तु तस्मै प्रयच्छति। उदीयतामिति। भावे लः॥ ८५॥

इत्थमिति। इत्थं पूर्वोक्तप्रकारेण नलाय भैम्यै च वरं वितीर्य्य दत्वा देवीमहितेषु तेष्विन्द्रादिषु अम्बरं आश्रयत्सु स्वर्गम्प्रति गन्तुं उद्यतेषु प्रारब्धगगनगमनोद्योगेषु सत्सु क्षणात् क्षणमात्रेण उत्तिष्ठतां स्वं स्वं शिबिरं प्रति गन्तुं उत्थितानां नृपाणां परिजनालपनैः सेवकभाषणैः जयजीवादिशब्दैः, राज्ञामेतत्रा यथायानयनार्थं परिजनान् प्रति भाषणैः कृत्वा, विपुलो दूर-

उत्तिष्ठतां परिजनालपनैर्नृपाणां
स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ ८६ ॥
न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्ते न समरसमारम्भसदृशं।

●

दिग्व्यापी प्रणादः उदलसत् उदित इत्यर्थः। कीदृशः। भैमी-
नलविवाहोत्सवहर्षादागच्छन्नाकनायकदर्पाद्वा स्वर्वासिवृन्दैर्दे-
वसङ्घैर्हतानां दुन्दुभीनां नादैः सान्द्रो निविडीभूतः। देवेषु
निर्गतेषु राजानोऽप्युत्थितास्तेषां तत्सेवकानाञ्च महान् कलहः
संजातः। देवैश्च दिव्यवाद्यान्याहतानीत्यर्थः। वरं। जात्यभि-
प्रायेणैकवचनं। सा च तेच तेषु। पुमान् स्त्रिया (पा॰१।२।
६७) त्येकशेषः। उत्तिष्ठतां। ऊर्द्धकर्मत्वात्तङ् न ॥ ८६ ॥

नेति। प्रतिकूला नृपतयः पुण्यश्लोके विद्वेषाद्भैमीप्राप्ति-
जनितविप्रिष्टमत्सरादपि हेलोरसुन्दरशीलतादिकं दोषं न
जगुर्जगदुः। यतो नले निरवकाशं अमनं। यतः गुणमये
सौन्दर्यसौशील्यादिगुणमङ्गले पुण्यश्लोके वा, वैरिणापि सहो
दोषः प्रकाश्यते नत्वमन्। सुहृदान्तु सन्नपि दोषो गोप्यते।
तथा च विद्वेषे सत्यपि गुणमयत्वात् दोषलेशसम्भावनाया अस-
म्भावाद्दोषं नोचुरित्यर्थः। तथा यस्माद्भैमीहरणार्थं समरसमा-
रम्भस्य सदृशं तद्योग्यमधिक्षेपपरुषभाषणादिकमपि च नोचुः।
यतः यमवरेण प्राप्तास्ते सत्यदिव्यास्ते वा, यतःस्वतः शूरे वरेच
च नितरां दुर्द्धर्षं। तस्मादसामर्थ्यात् किञ्चिन्नोचुरित्यर्थः। किञ्

जगुः पुण्यश्लोकं प्रति नृपतयः किन्तु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम्॥ ८७॥
भूभृद्भिर्लम्भितासौ करुणरसनदीमूर्त्तिमद्देवतात्वं
तातेनाभ्यर्थ्य योग्याः सपदि निजसखीर्दापयामास तेभ्यः।

गत्यन्तररहिताः सन्तो निजासामर्थ्यकृपास्पदवदनस्तवकैः स्वनिश्वासैः कवोष्णैर्निजमुखनामितैः कृत्वा भैमीहृदयं उदयन्ती निर्भरा बहुला दया यस्य एवम्भूतं अतिसकृपं विदधुः चक्रुः। अतिदीनांस्तान् दृष्ट्वा भैमी नितरां सकृपाऽभूदिति भावः। भैम्या हृदयभूतं प्राणरूपं नलं स्वनिश्वासैः सकृपं चक्रुरिति वा॥८७॥

भूभृद्भिरिति। भूभृद्भिः राजभिः करुणरसस्य शोकस्थायिभावस्य रसस्याथ च जलस्य नदी तस्या मूर्त्तिमत्या देवताया भावं लम्भिता प्रापिता जलदेवतास्थाने स्थापिता, तन्निश्वासैः करुणरसार्द्रीकृतचित्ता सती असौ भैमी सपदि समाश्वासाशेरेते नितरां दुःखितास्तस्मादतिसुन्दरीर्मत्सखीरेतेभ्यो देहीत्यस्वनियोजनेनार्थात्तातमेवाभ्यर्थ्य सम्प्रार्थ्य निजसखीः सहचरीस्तातेन पित्रा तेभ्यो राजभ्यो दापयामास। तेभ्यः सखीदाने भीमं प्रावर्त्तयदित्यर्थः। ते राजानोऽपि वैदर्भ्या अलाभात् कृतं गमने देहत्यागे विषये मनो यैः तेषां प्राणानां वाञ्छा सतीः सखीभिर्विजघ्नुः। भैमीसखीलाभात् प्रारब्धगमनात्प्राक् पुनर्न्यवर्त्तयन्नित्यर्थः। किंभूताभिः सखीभिः। यतः भैम्याः सकाशात् इन्द्रादिदेवेभ्यः वरप्राप्तयादृच्छिकशरीरनिर्माणादिरूपां विद्यां संगिरन्त्य

वैदर्भ्यास्तेऽप्यलाभात् कृतगमनमनःप्राणवाञ्छा विभुः
सख्याः संश्लिष्य विद्यां सततधृतवयस्यानुकाराभिराभिः॥८८॥
अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नले ऽथ स्वप्रतिष्ठासमाने।

सम्यगभ्यस्य सततं प्रत्यहं धृतो वयस्याया भैम्या अनुकारो याभिः तुल्यशरीरकलाकौशलाभिरित्यर्थः। ततश्च सर्वेऽपि भैमीप्रति बुद्ध्यैव स्वप्राणान् रक्षितवन्त इति भावः। आभिर्द्विकर्मा। सख्याः। आख्यातोपयोगे (पा०१।४।२९) इत्यपादानत्वं॥८८॥

अहहेति। अथ राजभ्यः सखीदानानन्तरं मघोना इन्द्रेण सह श्रीः सम्पत् प्रतिष्ठा माहात्म्यं ताभ्यां समाने, स्वं निजं निलयं स्थानं अभिलक्षीकृत्य प्रतिष्ठासमाने जिगमिषति नले नभसो गगनात्प्रकाशात्पारिजातादिदेववृक्षाणां पुष्पवृष्टिरप-तत्। अहहेति हर्षे। भैम्या नले वृते हृष्टैर्देवैर्नलस्योपरि पुष्पवृष्टिः कृतेत्यर्थः। उत्प्रेक्षते। बद्धा धृता मूर्त्तिर्यया सा मूर्त्तिबद्धा यद्वा मूर्त्या बद्धा युता साकारा, गलन्तः पतन्तोऽमरा भ्रमरा यस्यैवंविधं मध्येव वाष्पो यस्याः। अधःपतनजनितदुःखमुक्त-स्थूलाश्रुबिन्दवो यस्याः। एवम्भूतामरभर्त्तुः इन्द्रस्य कीर्त्तिरि-वा। पुष्पाणां शुभ्रत्वात् कीर्त्तित्वं। भैम्या पाटनादिन्द्रस्य की-र्त्तिर्गलितेति युक्तं। स्वर्गादधःपाति दुःखादश्रु च युक्तं। कीर्त्तौ दाश्रु मकरन्दत्वं भवति। मकरन्दो वाष्पस्थाने। मधुपानं भ्रमरः कज्जलस्थाने। समानशब्दस्य समाप्तानामर्थाभावात्

अपतदमरभर्त्तुर्मूर्त्तिवद्वेव कीर्त्ति-
र्गलदलिमधुवाष्पा पुष्पवृष्टिर्नभस्तः ॥ ९९ ॥
स्वस्थामरैर्नृपतिमंशममुं त्यजद्भि-
रंशच्छिदा कदनमेव तदाध्यगामि।
उत्का स्म पश्यति निवृत्य निवृत्य यान्ती
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥ १०० ॥

तुल्यार्थयोगाभावान्नघोनेति तृतीयार्थमनुप्रासार्थं च साचात् ग्रहशब्दः समयोजि। प्रतिष्ठाममान इति। समवप्रेति (पा० १।३।२२) तङो विधानात्, पूर्ववत् सन (पा० १।३।६२) इति तङ् ॥ ९९ ॥

स्वस्येति। तदा स्वर्गगमनसमये अमुं नृपतिं नलं त्यजद्भिरमरैः अंशस्य छिदा कर्त्तनेन यत्कदनं दुःखं तदेवाध्यगामि प्रापि। यतः स्वस्येन्द्रादेरंशं। लोकपालांशत्वाद्राज्ञः। स्वहस्तादिकर्त्तने यादृग् दुःखं भवति तादृशमेव तेषां नलपरित्यागे जातमिति भावः। यान्ती स्वर्गं प्रतिगच्छन्ती वाग्देवतापि भैमीं निवृत्य निवृत्य पुनः पुनः व्याघूर्ण्य वलितग्रीवं यथा तथा पश्यति स्म। किम्भूतां। निजविभ्रमाणां स्वीयवचनवागर्थादिविलासानां धाम स्थानभूतां। किम्भूता। उत्का, कियत्सहवासमात्र भूतगुणगणप्रेमभरतया सोत्कण्ठा परित्यक्तुमशक्तेत्यर्थः। अथवा निजमंशारस्वतं विलासकटद्दं यान्ती गच्छन्ती। छिदा षिद्भिदादिभ्योऽङ् (पा० ३।३।१०४) ॥ १०० ॥

सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधाधिपौ नृपशतानिष्टोक्तिनिर्मृष्टये।
स्वानि स्वानि धराधिपाश्च शिविराण्युद्दिश्य यान्तः क्रमा-
देको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलं॥ १०१॥

सानन्दमिति। स भीम एको भूमीपतीराजा तनुजाया भैम्या विवाहनं पाणिग्रहणं तल्लक्षणे महे महोत्सवे विषये माङ्गलिकतूर्य्यवादनादिकं मङ्गलं सानन्दं सहर्षं यथा तथा चकार। वैदर्भीनिषधेश्वरौ च द्वौ क्षणमात्रं तत्र स्थितावेव असूयका ये नृपसङ्घाः नृपाणां वा ये जनास्सेवकास्तेषां अनिष्टोक्तयः कर्णकठोराणि यानि दृषादोषारोपणवचनानि तासां नितरां मृष्टये परिमार्जनाय अशुभवचनानाकर्णनाय नृत्तगीतवाद्यकुले प्रेक्षणीयकादिदर्शनश्रवणादिरूपं मङ्गलं सृजतः स्म चक्राते। अमङ्गलं नाकर्णनीयमिति नृत्यगीताद्याकर्णनयाशेषामङ्गलपरिहारं चक्रतुः। बहवः सर्व्वे धराधिपाश्च राजानोऽपि स्वानि स्वानि शिविराणि सेनानिवेशानुद्दिश्य लक्षीकृत्य यान्तो गच्छन्तः सन्तः प्राप्तभैमीसदृशवनिताः पटहमिश्रणादिरूपं मङ्गलमातेनिरे चक्रुः। वाद्यानि वादयामासुरित्यर्थः। एतच्च सर्व्वं क्रमशः पूर्व्वं भीमश्चकारानन्तरं भैमीनलौ चक्राते ततो राजानश्चक्रुरिति क्रमः। किञ्चैको द्वौ बहव इति क्रमः। तथा चकार सृजतःस्म चक्रिर इति च क्रमः। सानन्दमिति सर्व्वत्र सम्बन्धः। शार्दूलविक्रीडितं वृत्तं।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरःसुतं
श्रीहीरःसुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥१०२॥

परस्परलाभाद्भैमीनलयोः। सुन्दरभैमीसखीलाभाद्राज्ञामिति च यथासङ्ख्यं। विवाहनं। ल्युडन्तात्रपुंसके भावे, ल्युट् चेति (पा० ३।३।११५) ल्युट्॥१०१॥

श्रीहर्षमिति। अर्द्धं पूर्व्ववत्॥ शरदिजा शरत्कालीना ज्योत्स्ना चन्द्रिका तद्वदमला निर्मला निर्दोषा प्रसन्ना ह्लादजनिका च शोभना उक्तिर्यस्य तस्य श्रीहर्षस्य कवेः कृतौ महाकाव्ये चतुर्द्दशानां पूरणः सर्गः समाप्तः॥ चतुर्द्दशानां पूरण इत्यर्थे। तस्य पूरणे डडिति (पा० ५।२।४८) डट्। शरदिजेति। सप्तम्यां जनेर्ड इति (पा० ३।२।९७) डप्रत्यये, प्रावृट् शरत्कालदिवां ज इति (पा० ६।३।१५) सप्तम्या अलुक्॥१०२॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे चतुर्द्दशः सर्गः॥

उत्तरनैषधचरिते।

पञ्चदशः सर्गः।

ॐ गणेशाय नमः।

श्रीर्जयति।

अथोपकार्य्यां निषधावनीपति-
र्निजामयासीद्वरणस्रजाञ्चितः।
वसूनि वर्षन् सुवहूनि वन्दिनां
विशिष्य भैमीगुणकीर्त्तनाकृतां॥ १॥

श्रीलक्ष्मीनृसिंहो जयति। अथ भैम्याः स्वयम्वरे वरणस्रग्मधूकमालया अञ्चितः पूजितः स निषधावनीपतिर्नलोऽदेवान् प्रसाद्य भैम्या नले वृते ताभ्यां वरान् दत्त्वा देवेषु प्रारब्धस्वर्गगमनेषु सत्सु अनन्तरं भीमेन स्वनिवासार्थं रचितां निजीयां सखेनैव वा कारितां पटमयगृह्यादिरूपामुपकार्यां निजामयासीत् ययौ। किं कुर्वन्। अन्येषां वन्दिनां साधारण्येन सूक्तानि वसूनि वर्षन् भैमीगुणानां कीर्त्तनसामान्येन कुर्वन्ति त्यक्तः तेषां तु वन्दिनां विशिष्य विशेषं लब्धा वर्षन् उत्कर्षेण तेभ्योऽधिकं प्रयच्छन्। वन्दिनां। सम्बन्धमात्रविवक्षया षष्ठी॥

तथा पथि त्यागमयं वितीर्णवान्
यथाऽतिभाराधिगमेन मागधैः।
तृणीकृतं रत्ननिकायमुच्चकै-
श्चिकाय लोकश्चिरमुञ्छमुत्सुकः ॥ २ ॥

धनदानस्य सुबहुलमेव वर्णयति। तथेति। अयं नलः पथि त्यागकीर्त्यर्थं साधारण्येन दीयमानं धनं तथा तेन प्रकारेण वितीर्णवान् दत्तवान् यथा येन प्रकारेण मागधैर्वन्दिजातिविशेषैः अतिभाराधिगमेन अतिशयितगुरुत्वप्राप्त्या बहुतरलब्धधनस्य वोढुमशक्यत्वात् परिपूर्णत्वाच्च निरपेक्षत्वात् तृणीकृतं तृणवत्यक्तं रत्ननिकायं रत्नसमूहं उच्चकैर्नितरामुत्सुकोऽहमहमिकया ग्रहीतुं प्रवृत्तो लोक उञ्छं भूपतितमणुकणगणं चिरं बहुकालं चिकाय उच्चित्याददे रत्ननिकायं उञ्छमिति रूपकं। उच्चकैर्बहुमूल्यं रत्ननिकायमिति वा। अनेनास्य दानप्ररत्वमुक्तम्। उञ्छो धान्यानां कणश आदानं। रत्नादाने त्वौपचारिकः प्रयोगः। न कर्मणि घञ्। वितेनिवानिति पाठे त्यागमिति भावे घञ्। दानं चकारेत्यर्थः। निकाय्येति पाठे निवासः। अधिकरणे ण्यत्। आय् धात्वादेः कत्वञ्च, पाय्यसान्नाय्यनिकाय्येत्यादिना (पा॰ ३।१।१२८) निपात्यते। चिनोतेर्णल्यायादेशे चिकायेति भाषायां, चञोरिति (पा॰ ७।३।५२) कुत्वम् ॥ २ ॥

अपास्य न स्यात् सदसि ह्रियान्वयात्
कुतोऽतिरूपः सुखभाजनं जनः ।
अमूदृशौ तत्कविविन्दवर्णनै-
रवाक्कृता राजकरञ्जिलोकवाक् ॥ ३ ॥

अपेति। असाविव दृश्यत इत्यमूदृशौतत्सदृशन्यापि, मैत्थर-न्तानि राजकानि नृपसङ्घास्तानि रञ्जयन्त्येवंशीलास्तदनुजीविनो लोकास्तेषां मृषा वाक् दोषारोपणरूपा, तस्य तयोर्वा भैमीनलयोः कवयः प्रबन्धकर्त्तारो वन्दिनश्च प्राकृतादिभाषावर्ण-चतुरास्तेषां वर्णनैः कर्तृभिरवाक्कृता तिरस्कृता। तेषां प्रचुरतरतारस्वरवर्णनतिरोहितत्वात् सा वाक्ताभ्यां नाकर्णितेत्यर्थः। वाम-वाक्कृता अशब्दरूपा कृता ध्वनिमात्रं श्रुतं, न त्वर्थयथार्थः शब्दः श्रुत इति वा। असौ कः। सदसि नानादेशमिलितजनसमाजे तत्समक्षं ह्रियान्वयात् सम्बन्धादस्य नलस्य लज्जा न स्यात् किंतु लज्जया भवितुं युक्तं न च तया जातमिति निर्लज्जोऽयमित्येका वाक्। तथाऽतिरूपः सुन्दरो जनः श्रीरामचन्द्रादिकवत् कुतः सुखभाजनं सुखस्थानं अपि तु रूपवान् दुःखमेवेति दृष्टत्वात्। सुरूपयोरनयोरपि दुःखस्य भवितव्यत्वात् वागवाक्कृतेति विरोधाभासः। सदसि ह्रियास्मपार्श्वे तौ लज्जा न स्यादन्यत्र तु स्यादेवेति। अयं निर्लज्जोऽतिसुरूपश्च। भ-दृशौ जनौ भैमीप्रीतिजनितसुखभाजनं कुतोऽपि न। इत्यादि वाक्यं मिथ्यां न भवति। अनौ रूपवन्तौ भवतोऽपि किं

अदोषतामेव सतां विवृण्वते
द्विषां मृषादोषकणाधिरोपणाः।

रम्यां नालभतेति स्वं स्वं प्रभुं प्रति सेवकवचनमिति वा। अतिसुरूपो भैमीलक्षणो जनः। अतः सुखभाजनमपि तु न एवंभूतानां राज्ञामप्राप्तेरिति वा। अमूदृशी। अदःशब्दे उपपदे दृशः, त्यदादिषु दृश (पा० ३।२।६०) इति कञि, दृग्दृशवतुषु श्रा सर्व्वनाम्न (पा० ६।३।८८) इत्याले, अदसोऽसेर्दादुरिति पा० ८।२।८०) उत्वे च, टिड्ढाणञिति (पा० ४।१।१५) ङीप्। अवाकृतेति पदद्वयं ॥ ३ ॥

राजकीयैर्जनैर्निन्दायां कृतायामपि तयोर्निर्दोषत्वमाह। अदोषतामिति। द्विषां मृषाऽविद्यमानस्य दोषकणस्य दोषलेशस्याधिरोपणा आरोपाः सतां अदोषतामेव निर्दोषत्वमेव विवृण्वते प्राकट्येन कथयन्ति। कथं। यतः सत्ये दूषणे सति विद्यमाने अलीकं असत्यमविद्यमानं आधातुं आरोपयितुं खलानां जातु कदाचित् उद्यमः प्रयत्नारम्भो न भवेत्। सति दोषे विद्यमानत्वादेव नारोपः। अयं तावदारोप्यते। अतश्चासति दोषे तदारोपणं निर्दोषतामेव वक्तीत्युभयथापि परदोषोद्घाटनमनुचितमित्यर्थः। सर्व्वथा तौ निर्दोषाविति भावः। सत्ये दूषणे सति खलानामलीकं दोषमाधातुं उद्यमः कदापि न भवेत् अपि तु सत्यदोषाभावेऽलीकमपि दोषं वदन्ति, ततश्च निर्दोषतामेवागतमिति वा। अथ च सत्ये परमब्रह्मस्वरूपे श्रीरघुनाथे अपये सति अमाधौ दूषणाख्ये राक्षसे अवद्यं अलीकं दुष्टम-

न जातु सत्ये सति दूषणे भवे-
दलीकमाधातुमवद्यमुद्यमः ॥ ४ ॥
विदर्भराजोऽपि समं तनूजया
प्रविश्य हृष्यन्नवरोधमात्मनः।
शशंस देवीमनुजातसंशया
प्रतीक्ष जामातरमुत्सुके नलं ॥ ५ ॥

प्रियं कर्त्तुं उद्यमः किं कदाचिन्न भवेत् अपि तु श्रीरामचन्द्रविषयेऽपि दूषणाख्येन राक्षसेनाप्रियं कर्त्तुं उद्यमः कृत एव। तथापि यथा स निर्दोषस्तथा तैर्निन्दायां कृतायामपि निर्दोषा वेव तावपीत्यर्थः। यद्वा वक्ता सीतायाः पातिव्रत्यपरीक्षणारपरीक्ष्यपरिग्रहादिदोषे असत्यपि परब्रह्मस्वरूपे श्रीरघुनाथे कदाचित्तमेवालीकं दोषमाधातुं प्रयत्नः किं न स्यादपि तु लोकः प्रयतत एव तथापि तत्त्वतः स निर्दोष एव तथा तावपीति भावः। वैरिभिः सत्यमप्युक्तमलीकं भवति। स्वपोषनु किमुतेति सूचितं। द्विषां। कर्त्तरि षष्ठी ॥ ४ ॥

विदर्भेति। विदर्भराजोऽपि उत्तमजामातृप्राप्त्या हृष्यन् सन् तनूजया समं सह आत्मनोऽवरोधमन्तःपुरं प्रविश्य भैमी नलं वरिष्यत्यन्यं वेति अनुजातः पुनः पुनर्जातः संशयो यस्यां तां देवीं भैमीमातरं शशंस इदमवोचत्। इति किं। हे उत्कर्षे जामातरि नले उत्कण्ठिते त्वं नलं जामातरं भैमीपतिं प्रतीक्ष जानीहि ॥ ५ ॥

तनुत्विषा यस्य तृणं स मन्मथः
कुलश्रिया यः पविताऽस्मदन्वयं।
जगत्त्रयीनायकमेलके वरं
सुता परं वेद विवेक्तुमीदृशं ॥ ६ ॥
सृजन्तु पाणिग्रहमङ्गलोचिता
मृगीदृशः स्त्रीसमयस्पृशः क्रियाः।

नामग्रहमात्रेण सूचितस्य नलस्य गुणगणं वर्णयति। तन्वि-ते। यस्य तनुत्विषा कायकान्त्या हेतुना स सौन्दर्येण प्रसिद्धो ।न्मथः तृणमिवाकिञ्चित्करः। तथा यः कुलश्रिया वंशपरि-ुद्ध्या कृत्वा कौलीन्यात् प्रसिद्धतराणामस्माकमन्वयं पविता ावनं कर्त्ता। अस्मत्तोऽपि महान् कुलीन इत्यर्थः। जगत्त्रय्यां ।ायकमेलके वरममूहे ईदृशमीदृग्गुणं नायकरत्नं वरं परि-ोतारं विवेक्तुं निर्णेतुं परं केवलं तव सुता वेद जानाति ान्योऽस्मदादिः। न विद्यते परः श्रेष्ठो यस्मादिति वरविशेषणं ा। पविता। लुट् ॥ ६ ॥

सृजन्त्विति। स भीमः इति आह स्म च मूते स्म निर्ययौ ान्तःपुरान्निरगाच्च।चकारो विवाहत्वरां द्योतयति।इति किं। मृगीदृशो हरिणेक्षणाः सुवासिन्यो भवत्यः पाणिग्रहो वि-हस्तद्रूपे मङ्गले उचिताः तथा स्त्रीणां समय आचारस्तं स्पृश-ा योषिदाचारप्राप्ता दुर्गादिकुलदेवतापूजा तैलयवारम्भा-क्रियाः सृजन्तु कुर्वन्तु। वयन्तु पुनः श्रुतीनां स्मृतीनां विधीन्

अथावदद्दूतमुखः स नैषधं
कुलञ्च बाला च ममानुकम्प्यताम् ।
स पल्लवत्वद्य मनोरथाङ्कुरं
चिरेण नस्त्वच्चरणोदकैरिति ॥ ९ ॥
तथोत्थितं भीमवचःप्रतिध्वनिं
निपीय दूतस्य स वक्त्रगह्वरात् ।

त, ओदितश्चेति (पा० ८।२।४५) निष्ठानत्वं । निस्तुषं ।
र्गतं तुषात् । तुषो दोषलेशः ॥ ८ ॥

अथेति । अथ लग्नांशके सन्निहिते दूता एव मुखं यस्य स
सः नैषधमित्यवदत् । इति किं । भवता मम कुलं बाला च
याऽनुकम्प्यतां अङ्गीक्रियतां । बालायामनुगृहीतायां सर्वो
। मम वंशोऽनुगृहीतःस्यादित्यर्थः । तथा चिरेण चिरन्तनेन
ऽस्माकं सर्व्वेषां स प्रसिद्धस्त्वत्सम्बन्धविषयो मनोरथरूपाङ्कुरः
।स्मिन् दिने त्वच्चरणोदकैः त्वदीयचरणक्षालनोदकैः पल्ल-
पल्लववदाचरतु पल्लवितो भवत्वित्यर्थः । पल्लवसहितो भव-
त्येकं पदं । कश्चन सन्देशहरं प्रेष्य तं सविनयमाकारयति
ते भावः । अन्यत्रापि चिरं सञ्चितोऽङ्कुरो जलैः पल्लवितो
ति । पल्लवतु । आचारे क्विप् ॥ ९ ॥

तथेति । स नलः दूतस्य वक्त्रादेव गह्वरात् तथा पूर्व्वोक्तप्र-
ेण यथा भीमेनोक्तं तथैवोदितं भीमवचसः प्रतिध्वनिं
ीय सादरमाकर्ण्य इति मुदम् तस्मै दूताय बहु प्रचुरं वस्त्रा-

श्रुतिस्मृतीनान्नु वयं विदध्महे
विधीनिति स्माह च निर्ययौ च सः ॥ ७॥
निरीय भूपेन निरीक्षिताननः
शशंस मौहूर्त्तिकसंसदंशकम्।
गुणैररीणैरुदयास्तनिस्तुषं
तदा स दातुं तनयां प्रचक्रमे ॥ ८॥

सूर्य्येण जुहोतीत्यादीन् मधुपर्कादिकान् स्मार्त्तान् वैदिकांश्च विदध्महे कुर्म्मह इति। एवमादिश्य तदानीमेव निर्गत इत्यर्थः। पाणिग्रहमङ्गलोचिता येऽविदाचारज्ञा वृद्धाः। सुवासिनीविशेषणं वा। समयस्पृशः। स्पृशोऽनुदके (पा० ३।२।५८) इति क्विन्। वयं। अस्मदो द्वयोश्चेति (पा० १।२।५९) बहुवचनं ॥ ७॥

निरीयेति। भूपेन भीमेन निरीयान्तःपुरान्निर्गत्य वैवाहिकं लग्नं शशंस। निरीक्षितानना मौहूर्त्तिकानां ज्योतिषिकानां संसभा अंशकं वैवाहिकं मुहूर्त्तं शशंस। स च भीमस्तदा तत्क्षणंशके नलाय भैमीं दातुं प्रचक्रमे मुहूर्त्तविलम्बानुरोधेन प्राथमिकान् श्रौतस्मार्त्तान् विधीन् अचीकरदित्यर्थः। किम्भूतमंशकं। अरीणैः सम्पूर्णैः मित्रगुणैरुपलक्षितं। तथा शुक्रगुर्वादुदयास्तमयप्रमुखदोषैर्निस्तुषं रहितं। यद्वाणां गुणदोषादिकं श्रोतिशास्त्रादवगम्यार्थं। निरीय। आगतौ। मौहूर्त्तिका मुहूर्त्तादरायनः। मुहूर्त्तं वेदेत्यर्थे क्रतूक्थादी (पा० ४।२।६०) त्यादिगणपाठादिकाट्ठक्। अंशमेवांशः, स्वार्थे कप्। अरीणैः। स्वादि

अथावदद्दूतमुखः स नैषधं
कुलञ्च बाला च ममानुकम्प्यताम्।
स पल्लवलव्य मनोरथाङ्कुरं
चिरेण नस्त्वच्चरणोदकैरिति ॥ ९ ॥
तयोत्थितं भीमवचःप्रतिध्वनिं
निपीय दूतस्य स वक्त्रगह्वरात्।

ात्, ओदितश्चेति (पा० ८।२।४५) निष्ठानत्वं। निस्तुषं।
र्गतं तुषात्। तुषो दोषलेशः ॥ ८ ॥

अथेति। अथ लग्नांशके सन्निहिते दूता एव मुखं यस्य स
ामः नैषधमित्यवदत्। इति किं। भवता मम कुलं बाला च
मयाऽनुकम्प्यतां अङ्गीक्रियतां। बालायामनुगृहीतायां सर्वो
पे मम वंशोऽनुगृहीतःस्यादित्यर्थः। तथा चिरेण चिरन्तनेन
ऽस्माकं सर्वेषां स प्रसिद्धस्त्वत्सम्बन्धविषयो मनोरथरूपाङ्कुरः
यास्मिन् दिने त्वच्चरणोदकैः त्वदीयचरणक्षालनोदकैः पल्ल-
[पल्लववदाचरतु पल्लवितो भवत्वित्यर्थः। पल्लवसहितो भव-
त्येकं पदं। कश्चन सन्देशहरं प्रेष्य तं सविनयमाकारयति
ति भावः। अन्यत्रापि चिरं सिञ्चितोऽङ्कुरो जलैः पल्लवितो
ति। पल्लवत्। आचारे क्विप् ॥ ९ ॥

तयेति। स नलः दूतस्य वक्त्रादेव गह्वरात् तया पूर्वोक्तप्र-
रेण यथा भीमेनोक्तं तथैवोदितं भीमवचसः प्रतिध्वनिं
ीय सादरमाकर्ण्य इति ब्रुवन् तस्मै दूताय सङ्क प्रचुरं वस्त्रा-

व्रजामि वन्दे चरणौ गुरोरिति
ब्रुवन् प्रदाय प्रजिघाय तं वचः ॥ १० ॥
निपीतदूतालपितस्ततो नलं
विदर्भभर्त्ताऽऽगमयाम्बभूव सः।
निशावसाने श्रुतताम्रचूडवाग्-
यथा रथाङ्गस्तपनं धृतादरः ॥ ११ ॥
क्वचित्तदा लेपनदानपण्डिता
कामप्यहङ्कारमगात्पुरस्त्रिता।

सत्कारादि प्रदाय तं दूतं प्रजिघाय प्राहिणोत्। इति किं। हे दूत अहं व्रजामि गत्वा च मदीयगुरोः श्वशुरस्य चरणौ वन्दे नमस्करोमीति। प्रतिशब्दलक्षणेण न राजादेशानुवादस्य न्यूनाधिकताशंका परिहृता। व्रजामि। वन्दे। वर्त्तमानसामीप्य इति (पा० ३।३।१३१) भविष्यति लट्॥ १०॥

निपीतेति। ततो दूतप्रत्यागमनानन्तरं निपीतं सादरं श्रुतं दूतालपनं दूतवचनं येन स विदर्भभर्त्ता भीमो धृतादरः सन् नलमागमयांबभूव प्रतीक्षितवान्। पुनरपि दूतैरानाययति स्मेति वा। यथा निशावसाने आद्ये मुहूर्त्ते श्रुता प्राभातिकी ताम्रचूडस्य कुक्कुटस्य वाक् येन स रथाङ्गश्चक्रवाको धृतादरः सन् तपनं सूर्य्यं प्रतीक्षते कदा वा उदेष्यतीति। कृकवाकुस्ताम्रचूड इत्यमरः॥ ११॥

क्वचिदिति। तदा नलागमनसमये क्वचित् स्थाने लेपनदाने

अलम्भि तुङ्गासनसन्निवेशना-
दपूपनिर्म्माणविदग्धयादरः ॥ १२ ॥
मुखानि* मुक्तामणितोरणैस्तदा
मरीचिभिः पान्थविलासमाश्रितैः ।

सुधालेपचित्रादिकर्म्मणि पण्डिता कुशला काचिद्रमणी पुरस्तात निर्माणार्थमेव सम्भाविता सती सम्प्रार्थनावशात् कमप्यद्भुतमनभिमानमगात् प्राप अनिर्व्वचनीयं गौरवं कृत्वा सुधालेपादि चकारेत्यर्थः । चतुष्कनिर्माणार्थं हरिद्राचूर्णमिश्रितं तण्डुलपिष्टं तस्य दाने आलेपकरणे कुशला । काचिद्विजने रमणीये वा प्रदेशे तस्यां मैत्र्यां अङ्गोद्वर्त्तने कुशलेति वा । तयोर्मौनलयोर्वा । तथा क्वचित् प्रदेशेऽपूपनिर्म्माणे मण्डकरचनायां विदग्धया चतुरया कयाचित्तुङ्गासने उच्चतुङ्गाख्यासने सन्निवेशनादुपवेशनाद्धेतोरादरो गौरवमलम्भि प्राप्तं । उच्चासनसन्निवेशादादरो वह्नितापभयाभावः प्राप्त इति वा । जातावेकवचनं । काश्चिच्चित्रादिकर्म्म काश्चिच्च अपूपादिनिर्म्माणं चक्रुरिति भावः ॥ १२ ॥

मुखानीति । तस्य पुरस्य तथा तत्सम्बन्धिनामखिलवेश्मनामपि मुखानि द्वारोपान्तरूपाण्याननानि मुक्तायुक्तानां मणीनां रत्नानां मुक्तानाञ्च मणीनाञ्च वा तोरणैस्तेभ्यः उद्गतैर्निर्गतैः अत एव पान्थविलासं उत्प्लाय दूरं प्रसर्पणशीलानां पान्थानां विलासमाश्रितैर्मरीचिभिः किरणैः कृत्वा वरागमनसमये प्रसो-

---

* मुक्तामयेति पाठोऽस्विदितसुकरः ।

पुरस्य तस्याखिलवेश्मनामपि
प्रमोदहासस्फुरितानि रेजिरे ॥ १३ ॥

पथामनीयन्त तथाधिवासना-
न्मधुव्रतानामपि दत्तविभ्रमाः ।
वितानतामातपनिर्भयास्तदा
पटच्छिदाकालिकपुष्पजाः स्रजः ॥ १४ ॥

दहासेन हर्षजहासेन स्फुरितानि मिश्रितानि च रेजिरे सर्वा-
ण्यपि पुरद्वाराणि गृहद्वाराणि वा मुक्तामणितोरणैरलङ्कृता-
नि। सर्वं पुरस्य सानन्दमभूदिति भावः। हास्यं मुखे भवति।
तस्य पुरस्य सम्बन्धिनां वेश्मनामिति व्याख्याने न केवलं पुरलो-
कानां मुखानि प्रमोदहासस्फुरितानि किन्तु गृहाणामपीत्य-
र्थः। तोरणात्तदेति पाठे तोरणात् पान्थविलाससमाश्रितै
उत्थाय द्वारसमर्पणशीलैरिति व्याख्येयं ॥ १३ ॥

पथामिति। पटच्छिदाभिर्वस्त्रच्छेदैर्निर्मितानि अकालिका-
न्यसमयजानि यस्मिन् काले यानि न भवन्ति तादृशानि पु-
ष्पाणि तेभ्यो जातास्तन्निर्मिताः स्रजो मालाः तदा वरागम-
नसमये पथां पुरमार्गाणां वितानतां उल्लोचतां अनीयन्त
प्रापिताः। किम्भूताः। यथा मालत्यादिपुष्पाणां वासस्तथाधि-
वासनात् सुगन्धिद्रव्यैः परिकर्मारोपणान्मधुव्रतानामपि दत्तो
विशिष्टो भ्रमो याभिः। सर्वदा मधून्येव ये पिबन्ति तेषामपि
पटच्छिदाच्छेदेनापि पुष्पाणीति तेषामपि दत्तभ्रमाः किम्

विभूषणैः कञ्चुकिता बभुः प्रजा
विचित्रचित्रैः स्नपितत्विषो गृहाः।
बभूव तस्मिन्मणिकुट्टिमैः पुरे
वपुः स्वमुर्व्याः परिवर्त्तितोपमं॥ १५ ॥

तान्येषामिति मधुव्रतपदेन सूचितम्। तथा वस्त्रमयत्वादातपनिर्भया उष्णलमात्ररहिताः। अस्त्री वितानमुल्लोच इत्यमरः। छिदाकालिकेति च पूर्व्ववत्॥ १४॥

विभूषणैरिति। तस्मिन् पुरे प्रजाः पौरा जानपदाश्च विभूषणैरलङ्कारैः कञ्चुकिताः नानारत्नकान्तिच्छादितसर्व्वावयवाः सन्तः बभुः शुशुभिरे। तथा वर्णमात्रकल्पितेषु निर्जीवेष्वपि रूपकेषु जीवत्वमापादनादिचमत्कारकरणाद्विचित्रैः आश्चर्य्यकारिभिः कुड्यलिखितनानावर्णरूपकैः स्नपितत्विषः उज्ज्वलीकृतदीप्तयो गृहा बभुः। एवं जङ्गमस्थावररूपान्यतया तथा मणिकुट्टिमैश्च मणिबद्धभूमिभिश्च कृत्वा उर्व्व्याः स्वं सहजं स्वन्मयवपुः केनापि ब्रह्मादिना परिवर्त्तिता उपमा यस्य तद्रूपान्तरं प्रापितमिव बभूव। पातालस्य रम्यत्वात् पातालमुपरि जातमिवेत्यर्थ इत्युत्प्रेक्षा। परिवर्त्तिता विनिमयिता उपमा उपमानं स्वर्गादि येन उपमानत्वेन प्रसिद्धस्य स्वर्गस्य उपमेयत्वं कृतं, स्वयञ्च तस्योपमानं जातमित्यर्थः इति वा। स्वरुच्या इति पाठे स्वर्गात् सकाशात् परिवर्त्तितोपममिव बभूवेत्यर्थः। मणिकुट्टिमैः उपलक्षिते पुरे वा। सर्व्वमपि तदा सालङ्कारं जातमिति भावः। कञ्चुकस्तारकादिः॥ १५॥

तदा निरस्वानतमां घनं घनं
ननाद तस्मिन्नितरान्ततं ततं।
अवापुरुच्चैः सुषिराणि राणिता-
ममानमानद्धमियत्तयाऽध्वनीत् ॥ १६ ॥
विपञ्चिराञ्चादि न वेणुभिर्न ते
प्रणीतगीतैर्न च तेऽपि झर्झरैः।

तदेति। तदा नलागमनसमये तस्मिन् घनं कांस्यतालादिकं घनं निविडं यथा निरस्वानतमां निरतिशयं शब्दं चकार तथा ततं वीणादिवाद्यं ततं विस्तृतं यथा तथा नितरां ननाद शब्दं चकार। तथा सुषिराणि सच्छिद्राणि वंशादिवाद्यानि उच्चै-र्नितरां राणितां शब्दत्वं अवापुः। तथा आनद्धं मुरजादिवाद्य-मियत्तयेदंपरिमाणत्वेनामानमपरिच्छेद्यं यथा तथा ऽध्वनीत्। घनं दृढावयवं बहुसङ्ख्यञ्चेति घनविशेषणं वा। तथा ततं तत्स्वरूपेण विस्तृतं बहुसंख्याकञ्चेति ततविशेषणं वा। तदा इयत्तयाऽमानं बहुसङ्ख्यमित्यानद्धविशेषणं वा। चतुर्विधमपि वाद्यं तत्र वादितमित्यर्थः। ततं वीणादिकं वाद्यमानद्धं मुरजा-दिकं। वंशादिकं तु सुषिरं कांस्यतालादिकं घनमित्यमरः॥ राणितां। अवश्यं रणतीति, आवश्यकाधमर्ण्ययोर्णिनिः (पा॰ ३। ३।१७०) इति णिनि राणीति तेषां भावस्तत्ता तां। अध्वनीत् अतो हलादेरिति (पा॰ ७।२।७) वृद्धिविकल्पः॥ १६॥

विपञ्चिरिति। वेणुभिर्वंशध्वनिभिर्विपञ्चिर्वीणाध्वनिर्ना-

न ते झडुकेन न सोऽपि ढक्कया
न मर्द्दलैः सापि न तेपि ढक्कया ॥ १७ ॥
विचित्रवादित्रनिनादमूर्च्छितः
सुदूरचारी जनतामुखारवः।
ममौ न कर्णेषु दिगन्तदन्तिनां
पयोधिपूरप्रतिनादमेदुरः ॥ १८ ॥

च्छादि। ते च वेणुध्वनयः प्रणीतं प्रारब्धं गीतं यैः द्रुतमध्यादिमूर्च्छनादिपूर्व्वमुच्चैर्गायद्भिर्गायकैर्गायकगीतैर्नाच्छादिषतेति सर्व्वत्र विपरिणामेन व्याख्येयम्। झर्झरैर्झर्झराख्यैः कांस्यमयैर्वाद्यविशेषैर्ध्वनिभिः कृता तेऽपि गायकध्वनयोऽपि न च नैवाच्छादिषत। झडुकेन लघीयसा कांस्यमयेन वाद्यविशेषेण ते झर्झरध्वनयो नाच्छादिताः। ढक्कया वादित्रविशेषेण सोऽपि झडुकध्वनिर्नाच्छादि। मर्द्दलैर्मृदङ्गध्वनिभिः सा ढक्काऽपि नाच्छादि। ढक्कया तेऽपि मर्द्दला अपि नाच्छादिताः। अनपेक्षितगौरवलाघवं वाद्यमात्रं तत्र मिलितं समश्रुतितालमाना अपि विपञ्च्यादिध्वनयः वादककौशलात् प्रत्यक्षं भेदेनोपलभ्या इति भावः। विपञ्च्यते स्वरोऽस्यां विपञ्चिः, औणादिक इप्रत्ययान्तः ॥ १७ ॥

विचित्रेति। विचित्राणि नानाविधानि वादित्राणि तेषां निनादैः मूर्च्छितः वर्द्धितः तथा सुतरां दूरचारी दूरसञ्चरणशीलः, जनता जनसङ्घातस्तस्यारवो मुखशब्दः, पयोधिपूरे समुद्र-

उदस्य कुम्भीरथ शातकुम्भजा-
श्चतुष्कचारुत्विषि वेदिकोदरे
यथाकुलाचारमथावनीन्द्रजां
पुरन्ध्रिवर्गः स्नपयाम्बभूव तां ॥ १९ ॥

प्रवाहे प्रतिनादेन प्रतिशब्देन पयोधिपूरस्य तटे प्रतिशब्देन वा मेदुरः परिपुष्टः सन् दिगन्तदन्तिनां दिक्प्रान्तवर्त्ति दिक्पालहस्तिनां कर्णेषु न ममौ तत्कर्णानपि परिपूर्य्य वहिर्निर्गत इत्यर्थः। नानाजातीयमिश्रणादेकीभूतो जनशब्दो दिगन्तपर्य्यन्तं समुल्ललासेति भावः। स दूरेति पाठे स महानित्यर्थः ॥ १८ ॥

उदस्येति। अथ सर्व्ववाद्यवादनानन्तरं पुरन्ध्रिवर्गः स्त्रीसमयज्ञकुलवृद्धसुवासिनीसमूहः चतुष्कसंज्ञेन नानावर्णकल्पितस्वस्तिकसर्व्वतोभद्रादिमण्डनेन चार्व्वी रमणीया त्विट् कान्तिर्यस्य एवम्भूते कूर्म्मपृष्ठचतुरस्रहस्तमात्रोच्छ्रितत्वादिशास्त्रकल्पिते वेदिकाया उदरे मध्ये शातकुम्भजाः सुवर्णघटिताः कुम्भीः उदस्योत्क्षिप्य यथाकुलाचारं स्त्रीणां भैम्याश्च कुलाचारानतिक्रमेणाथ मङ्गलं मङ्गलगीतिपूर्व्वं यथा तथा तामवनीन्द्रजां भैमीं स्नपयाम्बभूव। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेति वचनादेकोऽथशब्द आनन्तर्य्ये, द्वितीयस्तु मङ्गले इति ज्ञेयं। यद्वा विधाय मङ्गलाचरणन्दिगीमिति च पाठः। स्नपयाम्बभूव। मित्त्वादुपधाह्रस्वः ॥ १८ ॥

विजित्य दास्यादिव वारिहारिता-
मवापितास्तत्कुचयोर्द्वयेन ताः ।
शिखामवापुः सहकारशाखिन-
स्त्रपाभरग्लानिमिवाननैर्मुखैः ॥ २० ॥
असौ मुखर्जातजलाभिषेचना
क्रमाद्दुकूलेन सितांशुनोज्ज्वला ।
द्वयस्य वर्षाशरदोस्तदातनीं
सनाभितां साधु बबन्ध सन्ध्यया ॥ २१ ॥

विजित्येति । ताः कुम्भ्यः तस्या भैम्याः कुचयोर्द्वयेन गौरव-त्वकाठिन्यादिगुणातिशयेन विजित्य दास्यादिव वारिहारितां जलवाहित्वमवापिताः प्रापिताः सत्यः आननैर्मुखैः सहकार-शाखिन आम्रवृक्षस्य शिखां त्रपाभरेण जनितां ग्लानिं वैवर्ण्यं कालिमानमिव अवापुः वहन्ति स्म । पराजितोऽपि व्रीभरेण नम्रमुखो वारिवाहितां प्रापितः सन् ग्लानिं धत्ते । कलशी-मुखे माङ्गलिकाश्चूतपल्लवा निक्षिप्यन्ते इत्याचारः । अवापुः । वह- प्रापणे लिटि ॥ २० ॥

असाविति । मुखर्जातं जलाभिषेचनं यस्या असौ भैमी, क्रमात्सितांशुना सिततन्तुदुकूलेन क्षौमाम्बरेणोज्ज्वला भूषिता सती, वर्षाश्च शरदश्च तासां द्वयस्य सन्ध्यया सन्धिना तदातनीं तदाभवां तात्कालिकीं सनाभितां तुल्यतां साधु सम्यक् बबन्ध दधौ । वर्षाश्च कृतजलाभिषेका, शरच्च शीतांशुना चन्द्रेणो-

असौ प्रभिन्नाम्बुदर्दुदिनीकृता
निनिन्द चन्द्रद्युतिसुन्दरीं दिवं ।
शिरोरुहौघेन घनेन संवृता
तथा दुकूलेन सितांशुनोज्ज्वला ॥ २२ ॥

विरेजिरे तच्चिकुरोत्कराः किराः
क्षणं गलन्निर्मलवारिविप्रुषां ।
तमःसुहृच्चामरनिर्ज्जयार्ज्जिताः
सिता वमन्तः खलु कीर्त्तिमुक्तिकाः ॥ २३ ॥

ज्ज्वला द्वयोः सम्बन्धिन्युभयगुणोपेता, वस्त्रपरिधानात् पूर्वं प्रावृट्सदृशी अनन्तरं शरत्सदृशी जातेत्यर्थः ॥ २१ ॥

असाविति । असौ दिवं निनिन्द तत्तुल्या जातेत्यर्थः । किम्भूतां दिवं । आदौ वर्षासु प्रभिन्नैरतिघनैः घरङ्गिर्वा अम्बुदैः दुर्दिनीकृतां जलप्लावितां, अनन्तरं शरदारम्भे चन्द्रद्युतिसुन्दरीं । किंभूतासौ । क्वचिदर्पता शिरोरुहौघेन केशपाशरूपेण घनेन मेघेनोपलक्षिता । तथा दुकूलेनैव सितांशुना चन्द्रेणोज्ज्वला । जलाभिषेकस्थानेषु वर्षोदकचरणं चन्द्रिकास्थाने दुकूलमिति बोध्यं ॥ २२ ॥

विरेजिर इति । तस्याश्चिकुरोत्कराः केशसङ्घा विरेजिरे शोभन्ते स्म । किम्भूताः । गलतां निर्मलानां वारिविप्रुषामुदकबिन्दूनां घणं किरन्तीति किरा विक्षेपका उदबिन्दून् मुञ्चन्त इत्यर्थः । किंभूता इव । तमसः सुहृदोमि मदृशानि अतिश्यामानि चाम

मदीयसा स्नानजलस्य वाससा
प्रमार्ज्जनेनाधिकमुज्ज्वलीकृता ।
अदभ्रमभ्राजत साऽश्मघाणनात्
प्रकाशरोचिः प्रतिमेव हैमजा ॥ २४ ॥
तदा तदङ्गस्य बिभर्त्ति विभ्रमं
विलेपनामोदमुचः स्फुरद्रुचः ।

न्यपि तेषां निर्ज्जयेनार्ज्जिताः स्वीकृत्य सङ्गृहीताः सिताः शुभ्राः कीर्त्तिरूपा मुक्तिका वमन्तः खलु । इवार्थे खलुशब्दः । कृष्णचामरादप्यतिसुन्दरस्तत्केशपाश इति भावः । विमुषां । कर्म्मणि षष्ठी ॥ २३ ॥

मदीयसेति । सा भैमी अदभ्रमधिकं अभ्राजत अशोभत । किंभूता । मदीयसा स्नानजलस्य प्रमार्ज्जनेन प्रोञ्छनकारिणा वाससा मदीयसा वाससा कर्त्त्रा स्नानजलस्य प्रमार्जनेन करणेन पूर्व्वापेक्षया अधिकं यथा तथा उज्ज्वलीकृता । केव । अश्मघाण-नात् शिलोत्तेजनाद्धेतोः प्रकाशं पूर्व्वापेक्षयाऽतिदीप्ता रोचि-र्द्दीप्तिर्यस्याः सा हैमजा सौवर्णी देवादीनां प्रतिमेव । शिला घर्षणादीपितेति सुवर्णकारपरिभाषा । प्रमार्ज्जनेन । प्रथमपक्ष नंद्यादित्वात् कर्त्तरि ल्युः । द्वितीयपक्षे भावे ल्युट् । शाण तेजने । सौवादिकः । तस्माल्ल्युट् ॥ २४ ॥

तदेति । सुवर्णं दरमीषत् स्फुटद्विकसत्काञ्चनकेतकीदलं तस्मात् सौरभं सौगन्ध्यं यद्यभ्यस्यति शिक्षते तदा तर्हि तदङ्गस्य

दरस्फुटत्काञ्चनकेतकीदलात्
सुवर्णमभ्यस्यति सौरभं यदि ॥ २५ ॥
अवापितायाः शुचिवेदिकान्तरं
कलासु तस्याः सकलासु पण्डिताः।
क्षणेन सख्यश्चिरशिक्षणस्फुटं
प्रति प्रतीकं प्रतिकर्म्म निर्ममुः ॥ २६ ॥
विनापि भूषामवधिः श्रियामियं
व्यभूपि विज्ञाभिरदर्शि चाधिका।

भैमीशरीरस्य विभ्रमं विलासं विशिष्टां भ्रान्तिं वा विभर्त्ति। किंभूतस्य विलेपनस्य। यत्तकर्द्दमादेरङ्गरागेण आमोदं मुञ्चति तस्य। तथा स्फुरन्ती रुक् दीप्तिर्यस्य। स्वाभाविकगौरकान्तिनः अभ्यङ्गानन्तरमङ्गरागः कृत इति भावः। यदि तर्हीति सम्भाव्यादभ्यस्यति विभर्त्तीति न लिङ्, लिङर्थे लट्। क्रियातिपत्तिस्तु न विवक्षणीया ॥ २५ ॥

अवापितायाः इति। सकलासु गीतालङ्करणादिषु कलासु विद्यासु पण्डिताः कुशलाः सख्यः शुचिगोमयाद्यनुलिप्तं सर्व्वतो भद्रादिभूषितं वेदिकाया अन्तरं मध्यं शृङ्गारस्थानं अवापितायाः प्रापितायास्तस्याः भैम्याः प्रति प्रतीकं प्रत्यवयवं चिरशिक्षणादुत्कर्षाभ्यासात् स्फुटं निरतिशयं अत एव क्षणेन प्रतिकर्म्म अलंकरणं निर्ममुश्चक्रुः ॥ २६ ॥

विनेति। भूषां मण्डनं विनापि श्रियां कान्तीनामवधि-

न भूषयैषाऽतिचकास्ति किन्तु सा
ऽनयेति कस्यास्तु विचारचातुरी॥ ९७॥

परमशोभा इयं भैमी विज्ञाभिः अलङ्कारचतुराभिः सखीभिः अभूषि विशेषेणामण्डि। अधिका अनलङ्कृताङ्गकान्तितोऽधिककान्तिरदर्शि च। परंतु विचारचातुरी एकतरनिश्चयरूपे विचारे प्रावीण्यं कस्यास्तु न कस्यापि। इति किं एषा भूषया पूर्व्वापेक्षया अधिकं न चकास्ति किन्तु सा भूषैवानया भैम्या कृत्वाऽधिकं शोभते। भैम्या भूषणानाञ्च परस्परसम्पर्काच्छोभातिशयो यो दृश्यते तत्र भूषणैर्भैम्याः शोभातिशयो न जनितः किन्तु भैम्या भूषणानामिति विवेकः कस्यापि नाभूदित्यर्थः। पूर्व्वापेक्षयाधिकं वा शोभते केति भावः। भूषां विनापि श्रियामवधिरियं विज्ञाभिर्विशेषेण बहुना प्रयासेनाभूषि पूर्व्वापेक्षया इयमधिका किमिति तारतम्यज्ञानार्थं पुनः पुनः विलोकिता च। परमियं भूषया नाधिचकास्ति किन्तु सा भूषाऽनयेति तात्त्विकविचारचातुरी कस्यास्तु पुनः सख्या जातित्वर्यादपि तु न कस्याश्चित्। प्रयासेनालङ्कृत्य पुनः पुनर्विलोक्यापि विज्ञाभिरपि अनया मण्डनं मण्डितं मण्डनैर्वा इयं मण्डिते इति तारतम्यं न ज्ञातमेव। परं भूषणानां वैयर्थ्यं साधारण्यं वाधिकशोभाकारित्वं वेति किमपि न निश्चितं किन्तु भ्रान्ता एव जाता इत्यर्थ इति वा। तस्या निरतिशया कान्तिर्जातेति भावः। पूर्व्वोक्ता चातुरी कस्यास्तु कस्याश्चिदेव विदुष्या न

विधाय बन्धूकपयोजपूजने
कृतां विधोर्गन्धफलीवलिश्रियम्।
निनिन्द लब्धाधरलोचनार्चनं
मनःशिलाचित्रकमेत्य तन्मुखम् ॥ २८ ॥

तु सर्व्वस्या इति वा। अलङ्कृतं तद्वपुरेव मण्डनमिति विचारचातुरी कस्यचिन्मन्मथस्य महाप्राज्ञस्य कस्य ब्रह्मणो वाऽस्तु। मया श्रीहर्षेण ब्रह्मणा वा एवं निर्वक्तुं शक्यते नान्येनेत्यर्थ इति वा। कस्याः पुनर्न जाता अपि तु सर्व्वस्या अपीति वा ॥ २७ ॥

विधायेति। लब्धं प्राप्तं अधराभ्यां लोचनाभ्याञ्च कृत्वा अर्चनं पूजनं येन। ओष्ठनेत्रेण रमणीयमिति यावत्। एवंविधं तन्मुखं भैमीमुखं कर्त्तृ माङ्गलिकं मनःशिलाख्यगैरधातुविशेषनिर्मितं चित्रतिलकं एत्य प्राप्य बन्धूकेन पयोजाभ्यां नीलोत्पलाभ्याञ्च पूजने पूजाद्वयं कृत्वा, अनन्तरं कृतां विधोश्चन्द्रस्य गन्धफल्या चम्पककलिकया कृत्वा बलिः पूजा तज्जनितां श्रियं कान्तिं निनिन्द। यदि बन्धूकोत्पलैः चन्द्रस्य पूजां कृत्वा चम्पककलिकां चन्द्रस्य शिरसि न्यस्यति तदा तां चाङ्गमर्दं करोतीत्यभूतोपमेत्यर्थः। बन्धूकस्य अधरस्य नीलोत्पलनेत्रयोः चम्पककलिकाया मनःशिलातिलकस्य चन्द्रस्य वदनस्योपमानोपमेयभावः। चम्पको हेमपुष्पकः। एतस्य कलिका गन्धफलीत्यमरः ॥ २८ ॥

मह्नीमघोनां मदनान्धतातमी
तमःपटारम्भणतन्तुसन्ततिः।
अवन्धि तन्मूर्द्धजपाशमञ्जरी
कयापि धूपग्रहधूमकोमला ॥ २८ ॥
पुनः पुनः काचन कुर्वती कच-
च्छटाधिया धूपजधूमसंयमं।

श्लोकत्रयेण केशप्रसाधनं वर्णयति। मह्नीति। कयापि केशप्रसाधनचतुरया सख्या तस्या भैम्या मूर्द्धजपाशः केशपाशः तद्रूपा सौगन्ध्याद्दैर्घ्याच्च मञ्जरी प्रथमोद्भिन्नकलिकाङ्कुरदण्डः अवन्धि संयता। किंभूता मञ्जरी। मह्नीमघोनां भूमीन्द्राणां मदनेन कामविकारेण अन्धता विवेकशून्यता सैव तमो तामसी रात्रिस्तस्यास्तमोरूपस्य पटस्यावरकलादविवेकरूपस्यारम्भणे निर्म्माणे विषये तन्तुसन्ततिः सूत्रपरम्परा तानकरूपा। तथा धूपग्रहणसाधनस्य सच्छिद्रस्य धातुमयस्य करण्डकादेः सम्बन्धिना दह्यमानकर्पूरागरुचन्दनादिपरिमलबहुलेन धूमेन कोमलेपच्छुप्ता तद्दतिसुन्दरी नितरां श्यामा। राजानो रात्रौ नीलं पट्टवस्त्रादिकं परिधाय विचरन्तीति वा। तत्परायाः अपि तस्याः केशपाशं दृष्ट्वा राज्ञां कामोद्रेकाद्विवेकशून्यता भवतीति भावः ॥ २८ ॥

पुनः पुनरिति। काचन सखी तस्याः भैम्या मूर्द्धजः केशपाश स्तवकं सूक्ष्मघनप्रलम्बरुक्षलसाम्याच्चामरं चिराद्दहना

सखीस्मितैस्तर्कितनिजभ्रमा
बबन्ध तन्मूर्द्धजचामरं चिरात् ॥ ३० ॥
बलस्य कृष्टेव हलेन भाति या
कलिन्दकन्या घनभङ्गभङ्गुरा ।
तदार्पितैस्तां करुणस्य कुड्मलै-
र्जहास तस्याः कुटिला कचच्छटा ॥ ३१ ॥

कालेन बबन्ध । चिरकालहेतुमाह । किंभूता । कचच्छटाधिया भैमीकेशपाशभ्रान्त्या सादृश्यात् धूपजस्य धूमस्य मुहुर्मुहुः संयमनं बन्धनं कुर्वती । तथा तद्भ्रान्तिदर्शनोत्थैः स्मितैरन्योन्यमुखविलोकनपूर्वविलसदीषद्धास्यैः कृत्वा तर्कितः केशपाशभ्रमेण धूपजधूमसंयमनरूपो निजः स्वीयः भ्रमो यया ॥ ३० ॥

बलस्येति । कुटिला अतिवक्रा या तस्याः कचच्छटा कुन्तलश्रेणिः बलस्य बलभद्रस्य हलेनाकृष्टा सती घनैर्निविडैर्भङ्गैस्तरङ्गैर्भङ्गुरा उच्चावचा कलिन्दस्य पर्वतस्य कन्या यमुनेव भाति च । कचच्छटा तां यमुनां तदा तस्मिन् समये अर्पितैः निरन्तरन्यस्तैः करुणाख्यस्य वृक्षस्य कुड्मलैः कलिकाभिर्जहास । यमुना परायत्तपरकृतेन महीयसा भङ्गेन पराभवेन भग्ना पुनर्गलिता च । स्वयं तु स्वभावकुटिला पुनरपि कुसुमैरचिता चेति हासि- पुम इत्यर्थः । श्यामा अतिवक्रा पुष्पालङ्कृता च तस्याः कुन्तलश्रेणिर्भितरां शोभते स्मेति भावः । पूर्वं तत्तुल्या यमु-

धृतैतया हाटकपट्टिकालिके
बभूव केशाम्बुदविद्युदेव सा।
मुखेन्दुसम्बन्धवशात् सुधाजुषः
स्थिरत्वमूहे नियतं तदायुषः ॥ ३२॥
ललाटिकासीमनि चूर्णकुन्तला
बभुः स्फुटं भीमनरेन्द्रजन्मनः।

इदानीं तु अधिका जातेति भावः। जहामेवेति वा। यमुनाकर्षणं हरिवंशादौ ज्ञेयम् ॥ ३१ ॥

ललाटप्रसाधनं वर्णयति। धृतेति। एतया अलिके ललाटे या हाटकस्य सुवर्णस्य पट्टिका धृता सा केशाम्बुदानां कुन्तलरूपजलदानां तेषु वा विद्युदेव बभूव। क्षणप्रभायास्तस्याः कथं स्थिरत्वमित्यत आह। मुखेन्दुसम्बन्धवशाद्धेतोः सुधाजुषोऽमृतं सेवमानस्य तदायुषो विद्युदवस्थानस्य स्थिरत्वं नियतं निश्चितं अहमूहे तर्कयामि। अमृतपानादमृतत्वं तस्या जातमित्यर्थः। सुवर्णपट्टिकया ललाटमलङ्कृतमिति भावः। यदायुष इति वा पाठः। ऊहे। ऊह वितर्के ॥ ३२ ॥

कुन्तलान् वर्णयति ॥ ललाटिकेति। ललाटे रचिताया रेखाकाराया ललाटिकायाः पत्रपाश्याया अलङ्कारविशेषस्य सीमनि पर्यन्तप्रदेशे भीमनरेन्द्रजन्मनो भैम्याश्चूर्णकुन्तला वक्रकुण्डलीभूताः केशाः कज्जलरूपस्य धूमस्य वलयः श्रेण्यः स्फुटमिव बभुः। किंभूता वलयः। मनःशिलायाश्चित्रकं तिलकं

मनःशिलाचित्रकदीपसम्भवा
भ्रमीभृतः कज्जलधूमवल्लयः ॥ ३३ ॥
अपाङ्गमालिङ्ग्य तदीयमुच्चकै-
रदीपि रेखा जनिताञ्जनेन या।
अपाति सूत्रं तदिव द्वितीयया
वयःश्रिया वर्द्धयितुं विलोचने ॥ ३४ ॥

तद्रूपो यो दीपः तस्मात्सम्भवो यासान्ताः। तथा भ्रमीः मङ्गुष वक्रीभावान् बिभ्रति भृतः धारयन्त्यः। तत्सस्य मनःशिलाति-लकेनैव कामोद्दीपनात् तस्य दीपत्वं। धूपधूमसम्भवा कज्ज-लश्रेणिः किल भ्रमियुक्ता भवति। पत्रपाश्या ललाटिकेत्य-मरः। कर्णललाटात् कनलङ्कारे (पा० ४।३।६५) इति कन् ॥ ३३ ॥

श्लोकचतुष्टयेन कज्जलालङ्कारं वर्णयति। अपाङ्गमिति। अञ्जनेन जनिता या रेखा सा तदीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा उच्-चैर्नितरामदीपि शुशुभे। द्वितीयया तारुण्यरूपया वयःश्रिया कर्त्र्या विलोचने भैमीनेत्रे वर्द्धयितुं शैशवापेक्षया विशाले कर्तुं तदुपादीपनं सूत्रमिव अपाति। प्रायो हि सुन्दर्यो नेत्रप्रान्तनिर्गमया कपोलफलीपालीपर्यन्तगरेखया भुवर्णनि-मित्तमत्र किमपि लेपितुं वर्द्धयितुं वाभिलाषायत वर्द्ध-नस्य वाचारवक्रितपरिहाराय गणीघटिकादुपमितवर्त्मदि पार्श्व रेखापातनं कुर्वन्ति। यद्यपि नेत्रयोर्द्वित्वात्तिमदर्न

अनङ्गलीलाभिरपाङ्गधाविनः
कनीनिका नीलमणेः पुनः पुनः ।
तमिस्रवंशप्रभवेन रश्मिना
स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ ३५ ॥
असेविषातां सुषमां विदर्भजा-
दृशाववाप्याञ्जनरेखयान्वयं ।

शैशवापेक्षया तारुण्येन कटाक्षविक्षेपादिविलासवशाद्दैर्घ्यंप्रतीते दैर्घ्यकरणार्थं स्वक्षपाते युक्तः । नेत्रे कज्जलाञ्चिते इति भावः ॥ ३४ ॥

अनङ्गेति । अनङ्गलीलाभिः कटाक्षविक्षेपरूपैः कामविलासैः कृत्वा पुनः पुनरपाङ्गधाविनो नेत्रप्रान्तस्पर्शिनः कनीनिका नीलमणेर्नेत्रतारकारूपस्येन्द्रनीलरत्नस्य तमिस्रवंशप्रभवेनाथ च श्यामान्वयजेनातिकृष्णेन रश्मिना सकज्जलरेखारूपा सा स्वपद्धतिर्निजागमनसरणिः किमरञ्जि अञ्जनैर्न । सदा तन्मार्गगमनेन स्वसम्बन्धात्तारकानीलमणिकिरणैरेव नेत्रप्रान्तो नीलीकृतो न तु कज्जलैरिति उत्प्रेक्षा । कामोल्लिखितनिरतिशयकटाक्षश्रीतुल्याञ्जनशोभालङ्कारतां जगामेति भावः ॥ ३५ ॥

असेविषातामिति । विदर्भजादृशौ अञ्जनरेखया अन्वयं सम्बन्धमवाप्य स्मरेण बाणीकृतयोर्बाणत्वं प्रापितयोः पयोजयोः नीलोत्पलयोः सुषमां परमां शोभां असेविषातां अलभेतां । किम्भूतयोः । सव्यापसव्यबाणाकर्षणाद्धृजदयेऽधिकरणे ज्याकिण

भुजद्वयज्याकिणपद्धतिस्पृशोः
स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥
तदक्षितत्कालतुलागसा नखं
निखाय कृष्णस्य मृगस्य चक्षुषी ।
विधिर्यदुद्धर्त्तुमियेष तत्तयो-
रदूरवर्त्तितता स्म शंसति ॥ ३७ ॥

पद्धतिः ज्याघातजवैवर्ण्यरूपकिणमार्गः तां स्पृशत इति स्पृशी तयोः । नलमुद्दिश्याकर्णबाणाकर्षणात् कर्णान्तविश्रान्तयोर्नेत्रनीलोत्पलबाणयोर्भुजज्याकिणसम्भावना युक्ता । अपाङ्ग-रेखे किणतुल्ये नेत्रे च स्मरनीलोत्पलबाणतुल्ये इति भावः ॥ ३६ ॥

तदक्षीति । विधिर्ब्रह्मा तदक्ष्णोर्दमयन्त्या अधिकयोर्भैमीनेत्रयोः तत्काले तस्मिन् पाणिपद्मोचिताञ्जनप्रसाधनसमये तुला सा-म्यकरणं तद्रूपेणागसाऽपराधेन हेतुना नखं निखाय कृष्णसारहरिणस्य चक्षुषी उद्धर्त्तुं उन्मूलयितुं यत् इयेष अभि-लषाय तयोः कृष्णसारनेत्रयोः अदूरवर्त्ति समीपवर्त्ति यत् तत् तस्य भावस्तत्ता सा तत्परिणामकार्यं शंसति स्म । यतस्तत्र स्फुटमिति पाठे स्फुटं प्रकटगुप्तेश्चायां वा अदूरवर्त्ति च तत् पयोजे अदूरवर्त्तिपंक्ते तयोर्भाव इति वा । दृग्गतिसमीपे न-खनिखननाकारं चर्म भवति ॥ ३७ ॥

विलोचनाभ्यामतिमात्रपीडिते
ऽवतंसनीलाम्बुरुहद्वयीं खलु।
तयोः प्रतिद्वन्द्विधियाऽधिरोपया-
म्बभूवतुर्भीमसुताश्रुती ततः ॥ ३८ ॥
धृतं वतंसोत्पलयुग्ममेतया
व्यराजदस्यां पतिते दृशाविव।

श्लोकद्वयेनावतंसनीलोत्पले वर्णयति। विलोचनाभ्यामिति। खलु यतः भीमसुतायाः श्रुती कर्णौ विलोचनाभ्यां आकर्णपूर्णत्वादतिमात्रमतितरां पीडिते पराक्रान्ते ततस्तस्मादात्मपराभवकारिणोस्तयोर्नेत्रयोः प्रतिद्वन्द्विनी तुल्यबले इमे नीलोत्पले इति धिया बुद्ध्येव स्वशिरसि अवतंसरूपनीलाम्बुरुहद्वयी अधिरोपयाम्बभूवतुः आरोपितवन्तौ दधतुरित्यर्थः। लुप्तोत्प्रेक्षा। खलु वोत्प्रेक्षायां। अन्योऽप्यधिकेन पराभूतस्तस्मादात्मानं तद्विरोधिनं सन्निधापयति। नीलोत्पलकरणीयं कर्म नेत्राभ्यामेव कृतं न तु नीलोत्पलाभ्यामधिकं किञ्चित् कृतं, नीलोत्पले कर्णभूषणीकृते इति च भावः ॥ ३८ ॥

धृतमिति। एतया कर्णयोरुपरि धृतं वतंसोत्पलयुग्मं, भैमीतत्कर्णौ वा पश्यतः कस्यचिद्रसिकस्य विलासिनो दृशाविव व्यराजत्। किंभूतस्य। मनोभुवा कामेन अविवेकित्वमेवान्ध्यं उद्धृतनेत्रत्वं गमितस्य प्रापितस्य। किंभूते दृशौ। अस्यां भैम्यां पतिते निपत्ते। ततो रसिकत्वादेवापरावृत्य लगित्वा सम्बध्य स्थिते

मनोभुवान्ध्यङ्गमितस्य पश्यतः
स्थिते लगित्वा रसिकस्य कस्यचित् ॥ ३९ ॥
विदर्भपुत्रीश्रवणावतंसिका-
मणीमहःकिंशुककार्म्मुकोदरे ।
उदीतनेत्रोत्पलबाणसम्भृति-
र्नलं परं लक्ष्यमवैक्षत स्मरः ॥ ४० ॥

स्थिरतरे इत्युत्प्रेक्षा । कश्चिद्विलासी भैम्याः कर्णौ प्रथममेव दृष्टवान् ततस्तस्य नेत्रे कर्णयोरेव लग्ने स्थिते नेत्रोत्पलद्वयमित्यर्थः । नेत्रगमनादेवास्यान्ध्यं । अन्यदपि पतितं वस्तु कुत्रापि लगित्वा तिष्ठति ॥ ३९ ॥

रत्नावतंसं वर्णयति । विदर्भेति । स्मरः नलं परं केवलं श्रेष्ठं वा लक्ष्यमवैक्षत आगच्छन्तं प्रतीक्षितवानित्यर्थः । किंभूत । विदर्भपुत्रीश्रवणयोरुपरि अवतंसिकाया मण्यः भूषणभूता ह माणिक्यादिरत्नखचितसुवर्णकर्णिका तत्सम्बन्धीनि माणिक्यादिरत्नानि तासां महस्तेजस्तदेव किंशुककार्मुकं पलाशकुसुमधनुः तस्योदरे विषये उदीता समुत्पन्ना नेत्रयोरवतंसीभावयोग्य तद्रूपाणां चतुर्णां बाणानां सम्भृतिः सामग्री नेत्ररूपाभ्यां वा नीलोत्पलाभ्यां बाणसामग्री यस्य । एवंविधयापि समारोहितबाण इत्यर्थः । आकर्णकृष्टसकर्णकज्जलाश्चितनेत्रसौन्दर्यविशेषावगाहेन नलः कामपरो भविष्यतीति भावः । अवतंसिकापदैः श्रवणमध्यावयवस्तिमन्निधिसूचनार्थं श्रवणपदप्रयोगो युक्तः । स्मरणात् स्मरः ॥ ४० ॥

अनाचरत्तथ्यमृषाविचारणां
तदाननं कर्णलतायुगेन किं।
बबन्ध जित्वा मणिकुण्डले विधू
द्विचन्द्रबुद्ध्या कथितावद्वयका॥ ४१॥
अवादि भैमी परिधाप्य कुण्डले
वयस्ययाभ्यामभितः समन्वयः।

श्लोकद्वयेन कुण्डलप्रसाधनमाह। अनाचरदिति॥ सादृश्यात् स्फुरितया द्विचन्द्रबुद्ध्या द्वौचन्द्राविति भ्रान्तिज्ञानेनैतौ द्वौ चन्द्रौ तवोत्कर्षं न सहेते इति भैम्यास्तदाननस्य वा पुरस्तादद्वयकौ स्पर्द्धाकारिणौ कथितौ प्रतिपादितौ मणिकुण्डले रत्नखचिते सुवर्णताटङ्के एवंविधौ द्वौ चन्द्रौ जित्वा तदाननंकर्त्तृ, कर्णलतायुगेन कृत्वा बबन्ध किं। ननु द्विचन्द्रबुद्धेरेव स्वरूपेणासत्यत्वात् स्त्रीवाक्य तदुक्तेऽर्थे कथं तस्य प्रवृत्तिरित्याशङ्क्याह। किम्भूतं। तथ्यमृषा विचारणां अनया कथितं सत्यमसत्यं वेति विमर्शनमनाचरदकुर्व्वाणं। शोभासम्पन्मदेन मत्तत्वादित्यर्थः। किं किमिति बबन्ध न अपित्वनुचितमेतत्कृतं। यतः सत्यासत्यविचारणाभावादिति भाव इति वा। अन्योऽपि दुर्मदः सत्यासत्यविचारमकुर्व्वन् कस्यचिदद्वयकस्य वचनादनपराधिनमपि कञ्चित्पाशादिना बध्नाति। चन्द्राकारे मणिताटङ्के तया धृते इति भावः॥ ४१॥

अवादीति। कयाचिद्वयस्यया सख्या कुण्डले परिधाप्य

त्वदाननेन्दोः प्रियकामजन्मनि
श्रयत्ययं दौरधरीं धुरं ध्रुवं ॥ ४२॥
निवेशितं यावकरागदीप्तये
लगत्तदीयाधरसीम्नि सिक्थकं।

कर्णयोर्निक्षिप्य भैमी अवादि इत्युक्ता। इति किं। हे भैमि तवाननेन्दोः आभ्यां कुण्डलाभ्यां अभित उभयोः पार्श्वयोरयं समन्वयः समीचीनःसम्बन्धः। प्रियस्य नलस्य कामो रत्यभिलाषः तस्य जन्मन्युत्पत्तौ विषये दौरधरीं पूर्व्वोत्तरराशिस्थगुरुशुक्रयोर्मध्यराशिस्थचन्द्रस्य दुर्धराख्यस्य महायोगस्य सम्बन्धिनीं धुरं भारं ध्रुवं निश्चितं आश्रयतीति। ध्रुवमुत्प्रेक्षायां वा। दुर्धराख्ये महायोगे जातपुत्रादिर्यथा वृद्धिं प्राप्नोति तथा कुण्डलालङ्कृतमुखचन्द्रदर्शनमात्रेण नलस्य रमणाभिलाषो वृद्धिं प्राप्स्यतीति भावः। गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत्। तदा तु दुर्धरायोग इति ज्योतिर्विदांमतमिति शास्त्रादनुसन्धेयम् ॥ ४२॥

अधरप्रसाधनमाह। निवेशितमिति॥ तदीयोऽधरोष्ठ सीम्नि ऊर्द्ध्वदेशे यावकस्यालक्तकस्य रागो लोहितिमा तस्य दीप्तये प्रकाशनाय निवेशितं न्यस्तं यत्नेन लगत्सम्बद्धं सिक्थकं मधूच्छिष्टं, स्यात् जनकानि मधूनि क्षौद्ररसतया परिणम्य प्राधूर्व्वाभिप्रायात् सुधयाऽमृतस्य सधर्म्मिणि तुल्यायां तवैवाधरसीम्नि निवस्तु मित्यं स्यात् जातुकमुत्कण्ठितमिव तथाम। सुधर

रराज तत्रैव निवस्तुमुत्सुकं
मधूनि निर्धूय सुधासधर्म्मिणि ॥ ४३ ॥
स्वरेण वीणेत्यविशेषणं पुरा
ऽस्फुरत्तदीया खलु कण्ठकन्दली।
अवाप्य तन्त्रीरथ सप्त मुक्तिका-
सरानराजत् परिवादिनी स्फुटं ॥ ४४ ॥

सिक्थकस्य कदाचिदप्यमन्वासत्तलाभात्तां परित्यक्तुमशक्तमिव तत्रैव स्थितमित्यर्थः। प्रसाधिका अलक्तकस्य स्थित्यर्थं अधरे सिक्थकं निवेशयन्ति, अधरस्य मधुनोऽधिकत्वं सूचितं। अन्यदपि हीनमाश्रयं परित्यज्योत्तममाश्रयति। लुप्तोत्प्रेक्षा। सधर्म्मिणि धर्म्मादनिच् केवलात् (पा०५।४।१२४) इति धर्म्मशब्दादनिचि, समानस्य छन्दसीत्यच (पा०६।३।८४) छन्दसीति योगविभागात् समानस्य स आदेशः। समानधर्म्मा या सा सधर्म्मा तस्यां, मन इति (पा०४।१।११) न ङीप् ॥ ४३ ॥

कण्ठप्रसाधनमाह। स्वरेणेति। तदीया कण्ठ एव कन्दली अ-तिमीकुमार्य्यादिगुणत्वाद्दृढोद्गतप्रथमाङ्कुरदण्डोऽतिमधुरेण स्व-रेण कृत्वा पुरा पूर्व्वं अविशेषणं विशेषणरहितं यथा तथा सामान्येन वीणेयमित्येव खलु निश्चितं अस्फुरत् अभासत, न तु रुद्रवीणादिबहुवीणाभेदेषु विशिष्टतयेयमिदंसञ्ज्ञेत्यर्थः। प्रसाधनसमये सप्त मुक्तिकासरान् सूत्रप्रोतमौक्तिकहारान्-तर्व्वर्नीमध्यमाभिघातोत्पद्यमानध्वनिव्यञ्जितपञ्चमादिरागाः

उपास्यमानाविव शिक्षितुं ततो
मृदुत्वमप्रौढमृणालनालया ।
विरेजतुर्माङ्गलिकेन सङ्गतौ
भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥

पट्टसूत्रादिरचिताः सप्त तन्त्रीरवाप्य, विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरवचनात् स्फुटं प्रकटं परिवादिनीति विशिष्टसञ्ज्ञा सती अराजत् अशोभत । स्फुटमुत्प्रेक्षायां वा । वीणाभ्योऽपि मधुरतरस्वरा, कण्ठकन्दलीसप्तसरमुक्ताहारालङ्कृता चेति भावः ॥ ४४ ॥

भुजप्रसाधनमाह । उपेति ॥ माङ्गलिकेन मङ्गलं प्रयोजनमस्य मङ्गलार्थरचितेन कम्बुनः शङ्खस्य वलयेन कङ्कणेन सङ्गतौ युक्तौ सुदत्या भैम्या भुजौ विरेजतुः । उत्प्रेक्षते । अप्रौढा बाला या मृणालनाला तया बिसदण्डेन ततः भुजाभ्यां सकाशात् मृदुत्वं शिक्षितुं उपास्यमानाविव सेव्यमानाविव । मृणालादपि कोमलतरौ भुजावित्यर्थः । गौडदेशे विवाहकाले शङ्खवलयधारणमाचारः । बालेन चाभ्यासः सुकर इत्यप्रौढपदं । नालानालमथास्त्रियामित्यपि क्वचित्पाठात् महाकविप्रयोगाच्च नाला ष्टाबन्तोऽपि । ततः । आख्यातोपयोगे (पा॰ १।४।२८) इत्यपादानत्वम् । माङ्गलिकेन । प्रयोजनमिति (पा॰ ५।१।१०८) ठञ् ॥ ४५ ॥

पदद्वयेऽस्या नवयावरञ्जना
जनैस्तदानीमुदनीयतार्पिता।
चिराय पद्मौ परिरभ्य जाग्रती
निशीव विश्लिष्य नवा रविद्युतिः॥ ४६॥
कृतापराधः सुतनोरनन्तरं
विचिन्त्य कान्तेन समं समागमम्।

श्लोकद्वयेन पदप्रसाधनमाह। पदेति॥ तदानीं तस्मिन् [प्र]साधनसमये अस्याः पदद्वये अर्पिता रचिता नवा आर्द्रा [य]ावकरञ्जना अलक्तकरञ्जना जनैर्नवोदयसमये जाता अतिर[क्त]ा रविद्युतिरिव उदनीयत अतर्क्यत। किम्भूता रविद्युतिः। निशि [रा]त्रौ सूर्य्यस्यास्तसमयवशात् पद्माभ्यां सह विश्लिष्य दिने पुनः [प]द्मौ चिराय परिरभ्य जाग्रती तिष्ठन्ती। रविद्युतिर्यथा पद्मेषु [श्र]ियमधिकां करोति तथा यावकरञ्जना तत्पादयोरिति भैमी[च]रणौ पद्मतुल्याविति भावः। चिराय विश्लिष्येति वा। चिर[वि]युक्तावन्योन्यं प्राप्य गाढमालिङ्ग्य तिष्ठत इति उक्तिः॥ ४६॥

कृतेति॥ पूर्व्वं विरहावस्थायां बहुतरसन्तापकारित्वात् [स]ुतनोर्भैम्याः कृतोऽपराधो येन स कुसुमेषुः काम एव पावकः अनन्तरं तु अधुना कान्तेन नलेन समं सह भैम्याः समागमं [वि]चिन्त्य स्फुटं निश्चितं चरणौ सिषेवे अपराधमार्जनायेत्यर्थः। [क]ामस्याग्नित्वे हेतुमाह। यतः सोऽग्निः रागचिह्नः रागो लोहि[त]ेनैव चिह्नं यस्य रक्तिम्ना वह्निरयमिति ज्ञायते। अथवा अनु-

स्फुटं सिषेवे कुसुमेषुपावकः
स रागचिह्नश्चरणौ न यावकः ॥ ४७ ॥
स्वयं तदङ्गेषु गतेषु चारुतां
परस्परेणैव विभूषितेषु च।

राग एव चिह्नं यस्य। अनुराग एव हि काममनुभावयति। तस्मात् कामाग्निरेवायं न त्वयं यावकोऽलक्तकः स पावको नेति वा। अन्योऽपि प्रोषितभर्तृकायाः कस्याश्चित् कृतापराधः संस्त्रिया-गमनं विचिन्त्यापराधमार्जनाय तत्पादयोः पतति। सालक्त-तत्पददर्शनादेव नलस्य कामोद्रेको भवितेति भावः ॥ ४७ ॥

सहजशोभामाहात्म्यं वर्णयति। स्वयमिति ॥ स्वयं भूषणं विनैव परस्परानपेक्षञ्च तस्या भैम्या अङ्गेषु मुखाद्यवयवेषु प्रत्येकं स्वीयस्वीयसौष्ठववशात्तारुण्यमारोहवशाच्च चारुतां गतेषु सत्सु परस्परेणैवान्योन्येनैव च विशेषेण भूषितेषु सत्येकं सौन्दर्ये सत्यपि अन्योन्यसाहचर्य्यवशात् करानुगुणौ भुजौ भुजानुगुणौ करावित्येकस्याङ्गस्यापरेण तस्य च तेनैव सर्व्वाङ्गयोग्याङ्गका-ङ्क्षयोः सङ्घटनात् सुन्दरतरेषु सत्सु तानि मनःशिलातिलका-दीनि अलङ्करणानि किमूचिरे अपि तु स्वकरणप्रयोजनं न किञ्चिदूचुः। यद्यप्येषामलङ्करणानां तत्पूर्व्वाङ्गं प्रकारं हरं निर्म्माणं वृथैव बभूव दुःखवशाच्च किञ्चिदूचुः। किमप्यधिकं न चक्रुरित्यर्थः। आश्रितत्वादनिराकार्य्यत्वेन स्थितान्येवेति भावः। तस्मेषां करणं वृथैवाभूत्। अत एव करणमर्दं इह-

किमूचिरेऽलङ्करणानि तानि तत्
वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥
क्रमाधिकामुत्तरमुत्तरं श्रियं
पुपोष यां भूषणचुम्बनैरियं।
पुरः पुरस्तस्युपि रामणीयके
तया बबाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥

मन्वयनाम सान्वयं जातमिति भावः। अलं वृथाकरणं येषामिति च बहुव्रीहिणापि सान्वयं जातमित्यर्थः। पूर्व्वमलंशब्दस्य भूषणार्थत्वं पश्चादप्रयोजकत्वान्निषिद्धार्थत्वमिति चेत्यर्थः। किमूचिरे इति पाठे किमर्थं धृतानि न जाने इति शेष इति वा ॥ ४८ ॥

भूषणकान्त्युत्कर्षं वर्णयति। क्रमेति। इयं भैमी भूषणचुम्बनैर्भूषणसम्बन्धैः कृत्वा उत्तरमुत्तरं यथा तथाऽग्रे क्रमेण पूर्व्वपूर्व्वभूषणापेक्षया उत्तरोत्तरभूषणेनाधिकामतिशयितां यां श्रियं पुपोष तयालङ्कारशोभया रामणीयके सौन्दर्य्ये पुरः पुरस्तस्युषि स्थिरतरे सति अवधिः बुद्धेरियत्ता बुद्धेर्धोरणिः परम्परा बबाधे बाधिता। इतोऽन्यद्रामणीयकं नास्तीति यदि बुद्धिर्भवेत्तदा अवधिर्भवेत् पूर्व्वरामणीयकेयत्तावाधेन रामणीयकान्तरेण पुनर्न स्फुरति सति अवधिर्बाधित इत्यर्थः। तस्या भूषणे शोभा निरवधिरभूदिति भावः। धोरणिरिति देश्यशब्दः ॥ ४९ ॥

मणीसनाभौ मुकुरस्य मण्डले
बभौ निजास्यप्रतिबिम्बदर्शिनी।
विधोरदूरं स्वमुखं विधाय सा
निरूपयन्तीव विशेषमेतयोः ॥ ५० ॥
जितस्तयास्येन कलानिधिर्दधे
द्विचन्द्रधीसाक्षिकमायतां।

मणीति। मणीसनाभौ मौक्तिकादिरत्नतुल्येऽतिस्वच्छे मुकुरस्य मण्डले दर्पणतले पुनर्निजास्यस्य स्वमुखस्य दर्पणसङ्क्रान्तप्रतिबिम्बं पश्यत्येवंशीला दर्शिनी सा भैमी मुखं विधोः दर्पणरूपस्य प्रतिबिम्बरूपस्य वा चन्द्रस्य अदूरं निकटवर्त्ति विधाय कृत्वा एतयोर्मुखचन्द्रयोर्विशेषं तारतम्यं निरूपयन्तीव विचारयन्तीव बभौ। सन्निधौ हि विशेषः स्फुरति। बिम्बापेक्षया प्रतिबिम्बस्य न्यूनत्वात्तस्यैव चन्द्रत्वमिति विशेषो निरूपित इति भावः। भूषणानन्तरमादर्शविलोकनमिति स्त्रीजातिस्वभावः प्रतिबिम्बदर्शिनी। आभीक्ष्ण्ये णिनिः ॥ ५० ॥

जित इति। तया आस्येन जितः कलानिधिश्चन्द्रो नेत्रचिपिटीकरणादिनिमित्ता हस्तस्थितादर्शनिमित्ता वा द्वौ चन्द्राविति धीर्यस्य पुरुषस्य स एव साक्षी साक्षाद्द्रष्टा यस्याः सा माया यस्यैवम्भूतः कायो यस्य चन्द्रस्य तस्य भावस्तत्ता तां दधे बभार। एकत्वादहं भैमीमुखेन जित इति मायामयां कायतां चन्द्रेण धृत इत्यर्थः। अत्र च पूर्वोक्तप्रकारद्वयं

तथापि जिग्ये युगपत् सखीयुग-
प्रदर्शितादर्शवह्नभविष्णुना ॥ ५१ ॥
किमालियुग्मार्पितदर्पणद्वये
तदास्यमेकं बहु चान्यदम्बुजम्।

साक्षिणो द्वौ चन्द्राविति बुद्धिरेव प्रमाणं। कलानिधिपदेनानेक-
शिल्पकलान्मायिककायव्यूहनिर्माणकलामपि वेत्तीति सूचितं।
द्वाभ्यामेकजयस्य सुकरत्वात् करस्थितादर्शच्छलेनानेककायत्वं
यद्यप्यङ्गीकृतं तथापि युगपत् समकालं सखीयुगेन प्रकर्षेण दर्शि-
ताभ्यामादर्शाभ्यां कृत्वा तयोर्बाहुना अनेकेनापि वह्नभविष्णुना
वह्नभवनशीलेन सता तन्मुखेन चन्द्रो जिग्ये जित एव। हस्तस्थ-
दर्पणसहितसखीदर्पणद्वयं प्रतिफलितमुखप्रतिबिम्बैः सह बिम्ब-
भूतस्य मुखस्यानेकत्वान्मुखतुल्यदर्पणद्वयेन सह बिम्बभूतस्य मु-
खस्य स्वसदृशैरादर्शैः स्वप्रतिबिम्बैः सह वा अनेकत्वात् पञ्चसु
द्वयोर्विजयस्य सुकरत्वादित्यर्थः। पूर्वं शोभया जितोऽपि म-
च्छाधिक्येन मुखं जेतुमारब्धवांस्तथापि मुखस्याधिकतरसङ्ख्य-
त्वान्न शशाकेति भावः। वह्नभविष्णुनेति च्विः ॥ ५१ ॥

किमिति। आलियुग्मेनार्पिते दर्शिते दर्पणद्वये बहुषु प्रति-
बिम्बेषु मध्ये एकमेकं संख्यायोग्यमथ च मुख्यं तदास्यं भैमीमुखं
अन्यच्च हिमेषु शिशिरर्तुषु अथ च काम्येषु केदारादिहिमेषु
निर्वाप्य निवार्य्य निर्वाणं विनाशमथ च मोचं कृत्वा प्राप्येति
यावत्, निशासमाधिभिः रात्रिसम्बन्धिभिः सङ्कोचैरथ च पर-

हिमेषु निर्वाप्य निशासमाधिभि-
स्तदीयसालोक्यमितं व्यलोक्यत ॥ ५२ ॥
पलाशदामेति मिलच्छिलीमुखै-
र्वृता विभूषामणिरश्मिकार्मुकैः।
अलच्चि लच्यैर्धनुषामसौ तदा
रतीशसर्व्वस्वतयाभिरच्चिता ॥ ५३ ॥

सात्मदर्शनोपायैः कृत्वा तदीयं भैमीमुखसम्बन्धि सालोक्यं सादृश्यमथ च सालोक्यलचणां मुक्तिं इतं प्राप्तं वक्तु अनेकमम्बुजं किं लोकैर्व्यलोक्यत। किमुत्प्रेचायां। भैमीमुखप्रतिविम्बतो दीनत्वात् पद्मानि केदारादिहिमचूर्णनानि भूत्वा तन्मुखप्रतिविम्बस्य समीपे स्थितानि किमित्यर्थः। पद्मेभ्यो मुखमधिकमिति भावः। अम्बुजमिति जात्येकवचनं। निर्वापणं निर्वापस्तं करोतीत्यन्ताण्यपि निर्वाप्येति हिमैस्वात्मानं विनाश्येत्यर्थः। सालोक्यं। समानस्येति योगविभागात् स आदेशः ॥ ५२ ॥

पलाशेति। असौ भैमी पलाशानां किंशुकानां दाम माल्यमिति भ्रान्त्या मिलन्त आगच्छन्तः शिलीमुखा भ्रमरा यस्य वभूतेरय च किंशुकानां धनुराकारत्वात् मिलद्बाणैर्विभूषामणीनां विशिष्टालङ्कारसम्बन्धिमाणिक्यादिरत्नानां रश्मिरूपैः कार्मुकैरिन्द्रधनुर्भिर्वृता वेष्टिता सती तदा भूषणालङ्कारकाले रतीशस्य कामस्य सर्व्वस्वतया परमधनत्वेन हेतुना धनुर्धारिभिर्लच्यभेदैर्धनुर्भिः अपि नामश्लेषेण रचितेव लोकैरल-

विशेषतीर्थैरिव जह्नुनन्दिनी
गुणैरिवाजानिकरागभूमिता ।
जगाम भाग्यैरिव नीतिरुज्ज्वलै-
र्विभूषणैस्तत्सुषमा महार्घताम् ॥ ५४ ॥

तर्क्किता । कुन्ताः प्रविशन्तीतिवद्धनुषां धनुर्द्धराणामित्यर्थः । कान्तिसाम्यान्मित्रतया नलसर्व्वस्वभैमीं कामो रचतीत्यर्थः ॥५३॥

विशेषेति । तस्या भैम्याः सुषमा स्वाभाविकी परमा शोभा विशिष्टैर्भूषणैः कृत्वा महार्घतामतिश्रैष्ठ्यं जगाम । का कैरिव । जह्नुनन्दिनी स्वत एव श्रेष्ठापि गङ्गा विशेषतीर्थैः प्रयागादिभिरिव । तथा आजानिकरागभूमिता जननं जनः न जनोऽजनः अजनेन निर्वृत्तं । तेन निर्वृत्तं (पा० ५।१।७८) इति ठक् इकादेशः अनुशतिकादित्वादुभयपदवृद्धिः । आजानिकः सहजो रागस्तस्य भूमिः स्थानं पुत्रादिस्तस्य भावस्तत्ता सहजा स्नेहपात्रता गुणैः शीललावण्यादिभिरिव । तथा नीतिरुज्ज्वलैर्नीतिसाधितफलप्रतिबन्धनाशनात् प्रकाशैर्भाग्यैः पूर्व्वकृतशुभकर्मभिरिव । भागीरथी सर्व्वत्र श्रेष्ठैव परं प्रयागादौ माहात्म्यातिशयः । यत्रानुरागस्तत्र श्रैष्ठ्यं परंतु शीलादिना अनुरागस्य निरतिशयत्वं । तथा नीतिमार्गानुसरणं श्रेष्ठमेव परन्तूज्ज्वलैर्भाग्यैरनुगृहीतं श्रेष्ठतरं भवतीत्यर्थः । मण्डनैस्तस्या निरतिशया शोभाऽभूदिति भावः । उज्ज्वलैरिति उपमानोपमेयैः सम्बन्धनीयं । अशुभकर्मणोऽपि भाग्यस्याभिधायकत्वात्

नलात् स्ववैश्वस्त्यमनाप्नुमानता
नृपप्रिया भीममहोत्सवागताः ।
तदङ्घ्रिलाक्षामदधन्त मङ्गलं
शिरःसु सिन्दूरमिव प्रियायुषे ॥ ५५ ॥

तन्निष्ठत्वार्थं भाग्यविशेषणमेव वा । उपमानत्रयेण क्रमेण पावित्र्यं गुणवत्त्वं भाग्यवत्त्वञ्च सूचितं । विशिष्यन्ते इति विशेषाः पचाद्यच् ॥ ५४ ॥

नलादिति । नलात् सकाशात् स्वस्यात्मनो वैश्वस्त्यं वैधव्यमनाप्नुमानता भैमीचरणप्रणामप्रवणा भीमस्य कन्यास्वयंवररूपे महोत्सवे आकारिताः सत्य आगता नृपप्रिया अन्यराजमहिष्यः प्रियायुषे स्वप्राणेश्वरजीवनाय मङ्गलरूपसिन्दूरमिव स्वशिरःसु तस्या भैम्या अङ्घ्र्योश्चरणयोर्लाक्षां यावकमदधन्त अधारयन् । पत्युरायुर्विवृद्धये अन्याः स्त्रियः ता एव वा यथा शिरःसु सिन्दूरं धारयन्ति । तथा प्रणामप्रसन्नया भैम्या एतदीयाः प्राणेशा रक्षणीया इति प्रार्थिता सती मत्प्राणेशान् रक्षिष्यतीति बुद्ध्या स्वभर्तृचिरञ्जीवनाय भैमीचरणे प्रणामं कृतवत्य इति भावः । प्रणामादेव वा आर्द्रा लाक्षा यया । विश्वस्ताविधवे समे इत्यमरः । वैश्वस्त्यं । साधुत्वादिभ्यष्यञ् (पा॰ ५।१।१२४) । दध धारणे, लङ् ।

हरिद्रा कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा ।
कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम् ॥

अमोघभावेन सनाभितां गताः
प्रसन्नगीर्वाणवरात्तरस्रजाम् ।
ततः प्रणम्राधिजगाम सा ह्रिया
गुरुर्गुरुब्राह्मणपतिव्रताशिषः ॥ ५६ ॥
तथैव तत्कालमथानुजीविभिः
प्रसाधनासञ्जनशिल्पपारगैः ।

केशसंस्कारकबरीकरकर्णविभूषणं ।
भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता ॥
इति स्कान्दावचनम् ॥ ५५ ॥

अमोघेति । ततो मण्डनानन्तरं प्रणम्रा कृतगुर्वादिचरणप्रणामा सती ह्रिया गुरुः अधिकलज्जेत्यर्थः, सा भैमी गुर्वोः पूज्यतमयोः पित्रोस्तथा ब्राह्मणानां वाङ्मनःकायकर्मभिः पतिमव्यभिचरन्तीनां पतिव्रतानां वृद्धशोभनसुवासिनीनाञ्च अविधवा सुभगा अष्टपुत्रा भवेति आशिष अधिजगाम आलभत । किम्भूता आशिषः । अमोघभावेन सफलत्वेन प्रसन्नानां गीर्वाणानां देवानां पूर्व्वोक्ता वरास्तत्सम्बन्धिन्योऽत्तरस्रजो वर्णमालास्तासां सनाभितां बन्धुत्वं गताः प्राप्ताः, सत्यत्वेन तत्तुल्याः ॥ ५६ ॥

तथैवेति । तथैव भैम्या वेदिकोदरे यथा मङ्गलस्नानादि कृतं तेनैव प्रकारेण क्रमेण च तत्कालं तस्मिन्नेव कालेऽथ मङ्गलस्नानानन्तरं प्रसाधनासञ्जनं भूषणकरणं तत्सम्बन्धि शिल्पं

निजस्य पाणिग्रहणक्षणोचिता
कृता नलस्यापि विभोर्विभूषणा ॥ ५७ ॥
नृपस्य तत्राधिकृताः पुनः पुन-
र्विचार्य्य तान् बन्धमवापयन् कचान्।

विज्ञानं कौशलं तस्य पारगैः विशेषविशेषज्ञैः शृङ्गारादिभिः अनुजीविभिः सेवकैर्निजस्य विभोः स्वस्वामिनो नलस्यापि पाणिग्रहणक्षणोचिता विवाहकाले योग्या विवाहरूपोत्सवयोग्या वाविभूषणा कृता रचिता। निजस्येति स्वयंप्रवृत्तिः सूचिता। विभोरित्यविलम्बः सूचितः। अथयतिस्वरादिः तस्मादुप ॥ ५७ ॥

श्लोकद्वयेन केशप्रसाधनमाह। नृपस्येति। तत्र केशप्रसाधनेऽधिकृता नापितादयः पुनः पुनर्विचार्य्य धूपजधूमसंस्कारकङ्कतिकादिना प्रसाधनं कृत्वा, अथ च धूपजधूमस्यापि विद्यमानत्वात् पुनः पुनस्तद्भ्रान्तिवशादेते केशा एव न धूम इति विचार्य्य निश्चित्य, कानि पुष्पाणि कुत्र स्थापयामीति योग्यायोग्यभावं विचार्य्य वा, नृपस्य तान् कचान् धम्मिल्लादिरचनाविशेषरूपं बन्धं अवापयन् प्रापयामासुः। तान् कान्। यैः कचैः शा- दि गहनः पक्षान् त्यजति शकृत्यक् तस्य कलापिवर्हसंहृ- रचनस्य सम्बन्धी कलापमौलेरुपनिधिः कलापमौलावुप- निधिः सान्निध्यमात्रापि आच्छादितः, तद्रूपेणापि केशैर्न तिर- स्कृतः। कलापमौलेरूपो च उपनिधिः कविप्रायपदिङ्गः इति-

कलापलीलोपनिधिर्गरुत्यजः
स यैरपालापि कलापिसंसदः ॥ ५८ ॥
पतत्त्रिणां द्राघिमशालिना धनु-
र्गुणेन संयोगजुषां मनोभुवः।

निधिः स यैराच्छादि जित इवेत्यर्थ इति वा। नलकेशैर्विला-
सस्य गृहीतत्वात् निर्विलासतया निरर्थकं बर्हिभारं त्यजति
इति सूचनाद्गरुत्त्यज इति पदं साभिप्रायं। यैः केशैः पत्त्रत्या-
गिन्या मयूरसंहतेः कलापशोभानिक्षेपः अपालापि गृहीता
नास्तीत्यपलापितः। यः परस्य निक्षेपं गृहीत्वा न दत्त्वा परं प्रता-
रयति स राज्ञोऽधिकृतैः पुरुषैः पश्चाद्दण्डा शिक्षणीयो भवति।
मयूराः शरदि पक्षान्मुञ्चन्ति। पुमानुपनिधिर्न्यास इत्यमरः।
अवापयन्। आप्नोतेर्ण्यन्तात् लुङि द्वितीयस्यैकाचो द्वित्वं गत्यर्थ-
त्वादणौ कर्तुर्णौ कर्मत्वम्। अलम्भयन्निति वा पाठः ॥ ५८ ॥

पतत्त्रिणामिति। अर्जिता लब्धा मार्जनशोरभ्यङ्गजनिता स्नि-
ग्धशोभा येन। तथा द्राघिम्ना शालते एवंशीलेन तस्य नलस्य
कचेन केशपाशेन सह समेत्य सम्बन्धं प्राप्य कुड्मलैर्मल्लिकादि-
कोरकैः कर्तृभिः, द्राघिमशालिना तथा अर्जितमार्जनश्रिया
पुनः पुनः अङ्गुल्यादिना घर्षणाल्लब्धमार्जनसम्बन्धिस्निग्धशोभे-
नेव भ्रमरमालारूपेण धनुर्गुणेन संयोगजुषां सहितानां मनो-
भुवः कामस्य पतत्त्रिणां सौभाग्यं सादृश्यमालम्भि केशपाशस्य
भ्रमरमालारूपेण कामधनुर्गुणेन साम्यं। कोरकाणाञ्च पुष्प-

कचेन तस्याजितमार्जनश्रिया
समेत्य सौभाग्यमलम्भि कुड्मलैः ॥ ५८ ॥
अनर्घ्यरत्नौघमयेन मण्डितो
रराज राजा मुकुटेन मूर्द्धनि ।
वनीपकानां स हि कल्पभूरुह-
स्ततो विमुञ्चन्निव मञ्जुमञ्जरीं ॥ ६० ॥
नलस्य भाले मणिवीरपट्टिका-
निभेन लग्नः परिधिर्विधोर्बभौ ।

रूपैर्बाणैः नलस्य च कामेनेत्यर्थः । अतिविशालनीलतरकालिकालङ्कृतनलकेशपाशदर्शनमात्रेण भैमी कामवशा भवितेति भावः । कचेन । जात्येकवचनम् ॥ ५८ ॥

मूर्द्धप्रसाधनमाह । अनर्घ्येति ॥ अनर्घ्यरत्नौघमयेन अमूल्यदिव्यमाणिक्यादिरत्नघटितेन मुकुटेन मूर्द्धनि मण्डितो राजा स नलः हि यस्माद्वनीपकानां याचकानां अतिधनदानात् कल्पभूरुहः कल्पवृक्षस्ततो हेतोः मञ्जुमञ्जरीं कल्पवृक्षोचितां रत्नाङ्कुरपरम्परां विमुञ्चन्नुद्गिरन्निव रराज । वृक्षो हि बालपल्लवपुष्पफलयुक्तां मञ्जरीमुद्गिरति । कल्पवृक्षस्य मञ्जरी रत्नफलत्वाद्रत्नमयी । मञ्जरीस्थाने मुकुटरत्नकिरणा वा । मञ्जर्याकारा मुकुटमणिकिरणा ऊर्द्धं निर्गच्छन्तीत्यर्थः । कर्पूरमञ्जर्यादिवच्छब्दान्तरम् (?) ... स्वार्थे ददादिनाद्यः । मञ्जरीरिति च पाठः ॥ ६० ॥

भालप्रसाधनमाह । नलस्येति । रत्नखचिताया वीरपट्ट

तदा शशाङ्काधिकरूपतां गते
तदानने मातुमशक्नुवन्निव ॥ ६१ ॥
बभूव भैम्याः खलु मानसौकसं
जिघांसतो धैर्य्यभरं मनोभुवः ।

भिन्या वीरपुरुषधार्य्यया वीरपट्टिकानाम्ना वाऽऽख्यातयाः सुवर्णपट्टिकायाः श्रवणयुगपश्चाद्भागमात्रव्यापिन्या निभेन व्याजेन नलस्य भाले ललाटे लग्नः सन् विधोश्चन्द्रस्य परिवेषो बभौ । मुखचन्द्रेऽपि चेत् परिवेशः सम्पूर्णमण्डले किमिति न दृश्यत इत्यत आह । किं कुर्व्वन्निव । तदा प्रियासङ्गमकाले भूषणकाले च हर्षवशाद्भूषणवशाच्च शशाङ्काधिकरूपतां चन्द्रापेक्षयाधिकपरिमाणत्वं गते प्राप्ते तदानने मातुं तुल्यप्रमाणताञ्च प्राप्तुमशक्नुवन्निव । अल्पपरिमाणस्य यदलङ्करणं तदधिकपरिमाणस्यैकदेश एव तिष्ठति न तु सर्व्वं मण्डयितुं शक्नोति तस्मात् मुखैकदेशे भाल एव परिधिः स्थित इति युक्तमिति भावः । मणिकिरणानां मण्डलाकारत्वेन पट्टिकायाः परिवेशाकारत्वं युक्तम् । अशक्तिमुदवहन्निति च पाठः । ६१ ॥

श्लोकत्रयेण तिलकं वर्णयति । बभूवेति । मनोभुवो धनुःसमीपे सम्भृता सञ्चीकृता उपभ्रु भ्रुवोः समीपे तस्य नलस्य वर्त्तुलं चित्रं तिलकस्तद्रूपिणी गुलिकेव स्मरमयगोलक इव बभूव । किम्भूतस्य । भैम्या मानसौकसं मनसि वर्त्तमानं धैर्य्यभरं धैर्य्यवा-

उपभ्रतदर्त्तुलचित्ररूपिणी
धनुःसमीपे गुलिकेव सम्भृता ॥ ६२ ॥
अचुम्बि या चन्दनविन्दुमण्डली
नलीयवक्त्रेण सरोजतर्जिना ।

ऊर्ध्वमथ च धैर्यभरमेव मानससरोनिवासिनं हंसं यश्विलासविघाते धैर्यभरो यस्यैवंविधं वा हंसं जिघांसतो हन्तुमिच्छतः। भ्रुवोः कामधनुस्त्वं तिलकस्य च गुलिकात्वं। भ्रूसमीपस्थितवर्त्तुलतिलकदर्शनमात्रेण भैमी कामवशा भविष्यतीति भावः। अन्यो ऽपि हंसं हन्तुमिच्छन् क्षत्रियो धनुषि गुलिकां सन्धत्ते। राजय तिलको वृत्तो वर्त्तुलो नृपवैश्ययोरिति वचनात्। मानसौर्के स्योक्तिचार्यां खलु। चित्रं स्यादद्भुतालेख्यतिलकेष्विति विश्व। चित्रस्य तद्रूपश्चेति कर्मधारयादिर्निर्वा। चित्ररूपतेति वा पाठे तिलकस्वरूपतेत्यर्थः ॥ ६२ ॥

अचुम्बीति। वृत्तत्वादिना गुणेन सरोजतर्जिना कमलजैत्रेण तदधिकेनापि च कमलतर्जनवशादेव चन्द्ररूपेण नलीयेन व क्त्रेण या चन्दनविन्दुमण्डली मण्डलाकारश्चन्दनतिलकः चुम्बि विषता, तया चन्दनविन्दुमण्डल्या चन्द्रस्यैव सखी श्रियं श्रिया समलक्षोका का च न रोहिण्यादिमध्ये तारका शशाङ्कवर्तिनी मध्यवर्त्तिनीकृता। तथा चन्द्रमध्यवर्त्तिनी का च न सखीत्वे तारका स्यात् सखी सहचरी कृता सा तत्तुल्या जातेत्यर्थः वा। का च न कापि तारका सखी न कृता किन्तु या का च

श्रियं श्रिता का च न तारका सखी-
कृता शशाङ्कस्य तयाङ्कवर्त्तिनी ॥ ६३ ॥
न यावदग्निभ्रममेत्युदूढतां
नलस्य भैमीति हरेर्दुराशया ।
स बिन्दुरिन्दुः प्रहितः किमस्य सा
न वेति भाले पठितुं लिपीमिव ॥ ६४ ॥

न्द्राङ्कवर्त्तिनी भवेत् सा सर्व्वापि सखीव कृतेति वा । सरो-
तर्जिनश्चन्द्रस्य मध्यवर्त्तिनी रोहिण्यादिर्भवेत्तर्हि चन्दनकृ-
ततिलकसरोजतर्जी नलमुखचन्द्रस्तत्तुल्यो भवेन्न चैवमित्यर्थः ।
दा तन्मुखपद्मचन्द्राभ्यामधिकतमं जातमिति भावः । कास्व-
ेति पाठे अतिशयितां श्रियं श्रिता ॥ ६३ ॥

नेति । हरेरिन्द्रस्य इति एवंरूपया दुराशया अनुपपद्य-
ानासम्भावितचिन्तयास्य नलस्य भाले ललाटे सा भैमी कि-
स्ति न वेति सन्दिह्यमानरूपां लिपिं ब्रह्मलिपिं अक्षरपङ्क्तिं
न्देहनिरासाय स्पष्टं पठितुं वाचयितुं स चन्दनबिन्दुरेवेन्दु-
न्द्रः प्रहितः प्रेषित इव इत्युत्प्रेक्षा । इति किं । भैमी यावद-
भ्रमं अग्निप्रदक्षिणीकरणपर्य्यन्तं नलस्य उदूढतां परिणीततां
ार्य्यात्वं नैति गच्छतीति । यद्यपि स्वयम्वरो जातस्तथापि
ावत्सप्तपदी गमनं भैमी नलभार्य्या न भवतीतीन्द्रस्य दुराशया
बिन्दुश्चन्द्र एव प्रहितः किं । पतितं सप्तमे पदे इति स्मृति-
ामाण्याद् यावदग्निभ्रमणं भैमी नलभर्त्तां नैति । ब्रह्मलिपेर्नि-

कपोलपालीजनितानुबिम्बयोः
समागमात् कुण्डलमण्डलद्वयी।
नलस्य तत्कालमवाप चित्तभू-
रथस्फुरच्चक्रचतुष्कचारुतां ॥ ६५ ॥
श्रितास्य कण्ठं गुरुविप्रवन्दना-
दिनम्रमौलेश्चिबुकाग्रचुम्बिनी।

स्वयं चन्द्रद्वारा बुद्धा तत्प्राप्त्यर्थं वयं प्रयतामह इति दुराशया लिपिवाचनार्थं प्रेषितो ललाटे स्थितश्चन्द्र इव तिलको राज इति भावः। यावदभिभ्रममव्ययीभावः। लिपौ। इदिकारादितोकारः (पा० ४।२।४५। सि० कौ) ॥ ६४ ॥

कर्णभूषणं वर्णयति। कपोलेति। तत्कालं तस्मिन्नवसर-समये नलस्य कुण्डलमण्डलद्वयी कर्णभूषणीभूतमण्डलाकारकु-ण्डलद्वयी कपोलपाल्यां प्रशस्तातिस्वच्छनलकपोलयुग्मे आत्म-निजौ स्वीयौ अनुबिम्बौ प्रतिबिम्बौ तयोः समागमात् सम्बन्धा-द्धेतोश्चित्तभूरथे कामरथे स्फुरद्विलसत् चक्रचतुष्कं तस्य चारु-तां सौन्दर्यमवाप। रथश्चतुश्चक्रो भवति। पाली फलकं, चतुः परिमाणोपाधिके सङ्ख्यार्थे। सङ्ख्यायाः संज्ञा सङ्घेति (पा० ५। १।५८) कन्। तत्र प्राप्तिसङ्घे यद्यपि प्रत्ययस्तथाप्यौपचारि-कः प्रयोगः ॥ ६५ ॥

श्रितेति। अस्य कण्ठं श्रिता मुक्तावलिः मौक्तिकहार-श्चाण्डमेव चन्द्रमासम्पात् स्रवन्ती या सुधा तद्बिन्दुवत्

अवाप मुक्तावलिरास्यचन्द्रमः-
स्रवत्सुधातुन्दिलविन्दुवृन्दतां ॥ ६६ ॥
यतोऽजनि श्रीर्बलवान् बलं द्विपन्
बभूव यस्याजिषु वारणेन सः ।

विन्दुवृन्दं तस्य भावस्तत्ता तामवाप। किम्भूतस्य। गुरूणां पित्रादीनां विप्राणाञ्च वन्दनया विनम्रो मौलिर्यस्या अत एव किम्भूता हारावली चिवुकाग्रचुम्बिनी हृदयस्पर्शिनी । मुक्तानां स्थूलत्वं वर्त्तुलत्वं च सूचितं। पूर्णचन्द्रदर्शनवन्नलदर्शनाद् गुर्वादीनां प्रीतिर्जातेति भावः ॥ ६६ ॥

श्लोकत्रयेण भुजभूषणं वर्णयति। यदिति। स तद्भुजो नलभुजो मुद्राभिरङ्गुलीयकैः सहितः समुद्रस्तस्य भावं अथ च दण्ड्यदण्डनादिराजधर्म्मपरिपालनान्मुद्रा नियमस्तत्साहित्यं बभार भेजे। ऊर्मिका दधारेति भावः। स कः। यतः यस्माद्भुजाद्धेतोः श्री शोभा राज्यलक्ष्मीर्वा अजनि उत्पन्ना। तथा आजिषु यस्य भुजस्य वारणेन यत्कर्त्तृकेन शत्रुविमर्द्दनेन कृत्वा बलं शत्रुसैन्यं द्विपन् पराभावुकः सन् स नलो बलवानुत्साहयुक्तः शक्तियुक्तो वा बभूव। यत्कृतनिवारणेन बलवान् शत्रुसैन्यं पराभावुकोऽभूदेति वा। वाशब्दश्चार्थे। ततश्चाजिषु बलं द्विपन् स नलो यस्य यत्कर्त्तृकेण सङ्ग्रामेण बलवानभूदिति भावः। शत्रुसैन्यं द्विपन् स प्रसिद्धोऽतिबलोऽपि शत्रुः सङ्ग्रामेषु यस्य कर्म्मभूतस्य वारणे निराकरणे बलवान् न बभूवेति वा। आजिषु बलं द्विपन् स

अपूपुरत्तान् कमलार्थिनो घनान्
समुद्रभावं स बभार तद्भुजः ॥ ६७ ॥

प्रसिद्धः शत्रुर्यस्य सङ्ग्रामे विषये बलवान्नाभूदिति वा। वारणानामिनः स्वामी वारणेनस्यासौ स च अतिप्रसिद्ध ऐरावतः स वारणेनः सः यस्य नलभुजबलं द्विषन् बलेन सह स्पर्द्धमानः सङ्ग्रामेषु बलवानभूत्। हीनबलोऽप्युत्तमैतद्भुजबलस्पर्द्धया बलवत्त्वप्रतिष्ठां लेभे। वरं विरोधोऽपि समं महात्मभिरिति न्यायादिति भाव इति वा। सङ्ग्रामेषु बलं दैत्यं पराभावुक स इन्द्रोऽपि यस्याजिषु येन भुजेन सह सङ्ग्रामे बलवानभूत् इन्द्रादप्ययं बलीति भाव इति वा। वबयोरभेदाद्वलन वत्पलायनं तद्वा, सङ्ग्रामेषु यत्नातेन निवारणेन स बलारातिरपि बलवान् पलायनपरोऽभूत् न तु स्थातुं शक्त इति वा। यत्करस्तानतिप्रसिद्धान् घनान् बहून् कमलां लक्ष्मीमर्थयन्ते एवं शीलान् याचकान् अपूपुरत् परिपूर्णीचकार अतिवरान् इत्यर्थः। बहून् सुन्दरवधूकाङ्क्षिणो वरान् स. पपार, बहवो ब्राह्मणा येन विवाहिता इत्यर्थं इति वा। अथ च सागरे भेजे यस्मात्सागरात्मक्षीरजनि यदुत्पन्नेन वारणेनैरावतनाहे सबलारातिः आजिषु बलवानभूत्। यच्च इष्यर्थी जलाभिलाषिणो मेघान् पूरयति। रामनामाद्यङ्किता मुद्रिका मुद्रा यद्वता, पपार यस्याजिजि च पाठः। सलिलं कमलं जलं समरः। कमला श्रीवरस्त्रियोरिति विश्व.। समनं इव

कृतार्थयन्नर्थिजनाननारतं
बभूव तस्यामरभूरुहः करः ।
तदीयमूले निहितं द्वितीयवत्
ध्रुवं दधे कङ्कणमालवालताम् ॥ ९८ ॥
रराज दोर्मण्डनमण्डलीजुषोः
स वज्रमाणिक्यसितारुणत्विषोः ।

घञर्थे कविधानात्कः । अपूपुरदिति पूरयते र्लुङि रूपं, दीर्घो लघोरिति (पा० ७।४।९४) अभ्यासस्य दीर्घः । पपार, पृधातोः पूरणार्थाल्लिट्, इदं बाधित्वा परत्वाद् वृद्धिः ॥ ९७ ॥

कृतेति । तस्य करः अमरभूरुहः कल्पवृक्षो यतः बभूव । किं कुर्वन् अर्थिजनान् याचकलोकान् बहुधनदानादनारतं सदा कृतार्थयन् प्राप्तप्रयोजनान् कुर्वन् । तस्मात्मणिबन्धरूपे तदीयकरमूले निहितं स्थापितं द्वितीयवद्द्वितीयेन वैवाहिकेन सूत्रमयेन माङ्गलिकेन कङ्कणेन युक्तम् मौवर्णं कङ्कणमालवालतां दधे तदीयकरकल्पतरोः कङ्कणमालवालस्थाने जातमित्यर्थः । वृक्षमूले चालवालद्वयं भवति । मिलितमुद्रिकाद्वयवत् द्वयोर्मिलितयोर्घटनात् द्वितीयवदिति वा । ध्रुवमुत्प्रेक्षायाम् । विनिवेशितं तदेति पाठः साधुः ॥ ९८ ॥

रराजेति । स नलः रराज । किं कुर्वन्निव । दोर्मण्डनं बाहुभूषणं तस्य मण्डलौ श्रेणी जुषेते इति जुषौ तयोर्द्वन्द्वादिवर्तुलबाहुभूषणाश्रयोर्वज्रमाणिक्यानां क्रमेणसितारुणत्विषोः

मिषेण वर्षन् दशदिङ्मुखोन्मुखौ
यशःप्रतापाववनीजयार्जितौ ॥ ६९ ॥
घने समस्तापघनावलम्बिनां
विभूषणानां मणिमण्डले नलः ।
स्वरूपरेखामवलोक्य निष्फली-
चकार सेवाचणदर्पणार्पणम् ॥ ७० ॥

श्वेतरक्तदीप्तोर्मिषेणोर्ध्वाधोदिक्सहितप्राच्यादिदशदिग्मुखानामुन्मुखौ तत्र प्रसरन्तौ अवनीजयेनार्जितौ क्रमेण यशःप्रतापौ वर्षन् प्रसारयन्निव । हीरकमाणिक्यानां मण्डनाश्रितत्वात् तद्दीप्त्योरपि मण्डनाश्रितत्वं युक्तं । यशःप्रतापौ सितरक्तौ भावित्ति कविसङ्केतः । इवाध्याहारः ॥ ६९ ॥

घन इति । नलः समस्ता ये अपघनाः हस्तमस्तकाद्यङ्गानि तानवलम्बन्ते एवं शीलानि तत्र स्थितानि तेषां विभूषणानां घने सान्द्रे मणिमण्डले रत्नसङ्घे स्वरूपस्य स्वाकारस्य रेखां परमां शोभां स्वलावण्यपरमां मर्यादां वावलोक्य सेवार्थं चणाः प्रसिद्धाः सेवाचतुरा नापितादयस्तेषां दर्पणार्पणं प्रतिबिम्बदर्शनार्थं मुकुरार्पणं निष्फलीचकार । आदर्शकार्यस्य रत्नैरेव कृतत्वादिति भावः । मङ्गलमादर्श इति मुधा तैरर्पणमानीतं तेन च विलोकितं इति तेषां सेवाचातुर्यं । सेवाशब्दात् तेन वित्त (पा० ५।२।२६) इति चणप् ॥ ७० ॥

व्यलोकि लोकेन न केवलं चलन्-
मुदा तदीयाभरणार्पणद्युतिः ।
अदर्शि विस्फारितरत्नलोचनैः
परस्परेणैव विभूषणैरपि ॥ ७१ ॥
ततोऽनु वार्ष्णेयनियन्तृकं रथं
युधि क्षतारिक्षितिभृज्जयद्रथः ।

व्यलोकीति । चलन्ती व्याघुय्य व्याघुय्योत्पद्यमाना मुत् यस्य तेन निरन्तरहर्षेण लोकेन तदीयानां नलीयानां आभरणानां अर्पणद्युतिः संस्थानविशेषे स्थापनजनिता शोभा केवलं न व्यलोकि किन्तु विस्फारितानि प्रसारितकिरणानि रत्नान्येव लोचनानि येषामेवंविधैर्विस्फारितैरत्नलोचनैः कृत्वा वा अचेतनैर्विभूषणैरपि परस्परेणान्योन्यस्यादर्शीव विलोकितेव अन्योन्यशोभाविलोकनार्थं अचेतनैरपि तैर्नेत्राणि प्रसारितानीत्यर्थः । आभरणशोभा सर्व्वैर्विलोकिता मण्डनमात्रञ्च खचितरत्नमिति भावः ॥ ७१ ॥

तत इति । ततो भूषणधारणादनु पश्चात् स नलो नृपः वार्ष्णेयनामा नियन्ता सारथिर्यस्य, अथ च कृष्णः सारथिर्यस्य तं रथं किरीटवान् सहजकिरीटयोगात् किरीटिनामा पृथासूनुरर्जुन इवारूढवान् । किम्भूतो नलो अर्ज्जुनश्च । युधि क्षताःभङ्गं प्रापिताः अरिक्षितिभृतां वैरिनृपाणां जयन्तो जयदातारोऽपि रथा येन । क्षतवैरिनृपश्चासौ जयद्रिपुरथो यस्येति वा । क्षता

नृपः पृथात्मजरिवाधिरूढवान्
स जन्ययात्रामुदितः किरीटवान् ॥ ७२ ॥
विदर्भनाम्नस्त्रिदिवस्य वीक्षितुं
रसोदयादप्सरसस्तमुज्ज्वलं।
गृहाङ्गणादेत्य धृतप्रसाधना
व्यराजयन् राजपथानथाधिकं ॥ ७३ ॥

वैरिनृपाणां जयन्तो रथा लक्षणया अर्थादिन्नाद्दा महारथा-तिरथार्द्धरथप्रमुखा योधा येनेति वा। अर्जुनपक्षे युद्धे हतो ऽभिमन्युवधादरिः शत्रुभूतः क्षितिभृद्राजा जयद्रथो येन। हतोऽरीणां कौरवाणां सम्बन्धी राजा जयद्रथो येनेति वा। तथा जनी वधूर्मूढ़ती जन्यो वरस्तत्सम्बन्धिन्यां यात्रायां मुदितो हृष्टः। जन्या वरपक्षीयास्तैः सह यात्रया वा हृष्टः। अथ च युद्धसम्बन्धिन्यां विजययात्रायां हृष्टः। तथा मुकुटेन मण्डित। वरयात्रार्थं निर्गत इत्यर्थः। वार्ष्णेयः। वृष्णेरपत्यं, इतश्चानिञ (पा० ४।१।१२२) इति ठक्। नियन्तृकं। नद्यृतश्चेति (पा०५।४। १५३) कप् ॥७२॥

इदानीं वरसन्दर्शनार्थं पुरनारीसम्भ्रममाह। विदर्भेति। अथ रथारोहणानन्तरं विदर्भेति नाम त्रिदिवस्य कुण्डिनरूपस्य स्वर्गस्याप्सरसः सुन्दराङ्गनार्थं एव स्वर्वेश्या उज्ज्वलं प्रकाशमानं मूर्त्तं शृङ्गाररूपं वा तं नलं रसोदयदर्शनानुरागाभिवर्द्धितेौत्सुक्यात् वीक्षितुं विशेषेण द्रष्टुं धृतप्रसाधनाः सालङ्काराः सत्यः गृहा

अजानती कापि विलोकनोत्सुका
समीरधूतार्द्धमपि स्तनांशुकं।
कुचेन तस्मै चलतेऽकरोत् पुरः
पुराङ्गना मङ्गलकुम्भसम्भृतिं॥ ७४॥
सखीं नलं दर्शयमानयाङ्कतो
जवादुदस्तस्य करस्य कङ्कणे।

गृहादेत्यागत्य निसर्गरम्यान् राजपथान् अधिकं नितरां व्यराजयन् तद्योगान्तेऽप्यधिकं शुशुभिरे इत्यर्थः। तासामतिसौन्दर्य्यमुक्तम्। सर्व्वाऽपि तद्दर्शनार्थमागता इति भावः॥ ७३॥

अजानतीति। नलस्य दर्शनोत्सुका अत एव समीरेण धूतार्द्धं कम्पितार्द्धमपि स्तनांशुकं चोलकाख्यं कुचावरणवस्त्रं अजानती अनादृणती कापि पुराङ्गना चलते वरयात्रोन्मुखाय तस्मै नलाय पुरोऽग्रभागे कुचेन कृत्वा मङ्गलकुम्भस्य शुभसूचकशकुनरूपपूर्णकुम्भस्य सम्भृतिं सम्भारमुपदामकरोत्। समीरधूतेत्यनेनाचेतनस्याप्यनुरागोत्पादना कुचस्यातिसौन्दर्य्यमिति च व्यज्यते। वरस्य च पुरः पूर्णकलशदर्शनेन शुभाय भवति। तस्मै। क्रियया यमभिप्रैति स सम्प्रदानं॥ ७४॥

सखीमिति। सोऽयं नलः समागच्छतीत्येवं करेण सखीं नलं दर्शयमानया दर्शयन्त्या कयापि मद्दर्शनार्थमेवाङ्कत उत्सङ्गात् सकाशाज्जवाद्वेगादुदस्तस्य करस्य सुवर्णहीरकधारातीक्ष्णा-

विपज्य हारैस्त्रुटितैरतर्कितैः
कृतं कयापि त्वणलाजमोक्षणं ॥ ७५ ॥
लसन्नखादर्शमुखाम्बुजस्मित-
प्रसूनवाणीमधुपाणिपल्लवम्।
यियासतस्तस्य नृपस्य जज्ञिरे
प्रशस्तवस्तूनि तदेव यौवतं ॥ ७६ ॥

अग्रभागे कङ्कणाख्ये भूषणे विपज्य वेगाभिघातवशाल्लगित्वा त्रुटितैश्छिन्नैर्हारैर्नलविलोकनरसादतर्कितैरज्ञातविच्छेदाधःपतनैर्हारैस्तदीयमुक्ताफलैः कृत्वा त्वणमात्रं त्वणं उत्सवस्तस्मिन्निव वा लाजमोक्षणं कृतम्। अन्यरमणीनिरन्तरक्रियमाणलाजमोक्षणमध्ये मौक्तिकमोक्षणमपि तद्भ्रमकार्यभूदित्यर्थः। दर्शयमानदा। णिचश्चेति(पा०१।३।७४)कर्त्रभिप्राये क्रियाफले शानचि दृशेरित्यत्र अभिवादिदृशोरात्मने पदे चेति वक्तव्यात् (पा० १।४।५३।वा०) द्विकर्मकत्वात् सखीमिति कर्मत्वं। सखीरिति वा पाठः॥ ७५ ॥

लसदिति। तत् युवतीनां समूहो यौवतमेव वियासतः वरयात्रोन्मुखस्य तस्य नृपस्य प्रशस्तवस्तूनि शुभसूचकमाङ्गल्याणि जज्ञिरे। किंभूतं। नखा एवादर्शाः मुखान्येवाम्बुजानि स्मितान्येव प्रसूनानि पुष्पाणि वाण्य एव मधूनि पाणय एव पल्लवानि इतरेतरयोगद्वन्द्वः समाहारो वा लसन्तः स्फुरन्तो नखादर्शादयो यस्य तत्। एवंविधपुरनारीदर्शनाहि

करस्थताम्बूलजिघत्सुरेकिका
विलोकनैकाग्रविलोचनोत्पला ।
मुखे निचिक्षेप मुखद्विराजता-
रुषेव लीलाकमलं विलासिनी ॥ ७७ ॥

पाणिग्रहो नितरां मम शुभायैव भवितेति तस्य बुद्धिरुदभूदिति भावः । अतिसौन्दर्यं तासां सूचितं । दध्याज्यादर्शादिदर्शनं शुभावहमिति वसन्तराजग्रन्थे ज्ञातव्यम् । आरोप्यमाणस्य प्राधान्याज्जज्ञिरे इति बहुवचनम् ॥ ७६ ॥

करेति । एकिका कापि विलासिनी पुरनारी करस्थं ताम्बूलं जिघत्सुर्भक्षयितुमिच्छुः सती करस्थलीलाकमलं मुखे निचिक्षेप । यतो नलविलोकने विषये एकाग्रे तत्परे विलोचनोत्पले यस्याः सा । ताम्बूलभ्रान्त्या कमलं मुखे निक्षिप्तमित्यर्थः । कयेव मुखलक्षणे राजनि विद्यमाने कमलस्य द्वितीया राजता तया जातया रुट् क्रोधस्तयेव उत्तमेन सम्मुखेन सहैतत् स्पर्द्धत इति क्रोधादिव मुखे कमलं निक्षिप्तमित्यर्थः । नलसौन्दर्यातिशयदर्शनेन विमनस्कतोक्ता । जिघत्सुः । लुङ्सनोरित्यादिना (पा० २।४।३७) घस्रादेशे, घस्लृ अदन इत्येतस्माद्वा सनन्तादुः । न लोकेति (पा० २।३।६९) षष्ठीनिषेधात्ताम्बूलं जिघत्सुरिति द्वितीयेति योगविभागात् समासः ॥ ७७ ॥

कयापि वीक्षाविमनस्कलोचने
समाज एवोपपतेः समीयुषः ।
घनं सविघ्नं परिरम्भसाहसै-
स्तदा तदालोकनमन्वभूयत ॥ ७८ ॥
दिदृक्षुरन्या विनिमेषवीक्षणा
नृणामयोग्यां दधती तनुश्रियं ।

कयेति । कयापि स्वैरिण्या वीक्षया नलदर्शनेन विमनस्के त्यक्तविषयान्तरे लोचने यतस्तस्मिन् समाजे जनसङ्घे एव समीयुषः समागतस्योपपतेर्जारस्य परिरम्भे आलिङ्गनविषये साहसैर्निर्विचारिभिः निर्भयप्रवर्त्तनैः कृत्वा तदा नलविलोकनसमये तदालोकनं नलदर्शनं घनं नितरां सविघ्नं यथा तथान्वभूयत । जारकर्त्तृकैर्जारकर्मकैर्वा आलिङ्गनैर्व्यवधानतया नलः सम्यङ् नादर्शीत्यर्थः । तदा तदाचित् कदाचित्तत्तन्नलस्यालोकनं कृतं न तु निरन्तरमिति वा । देवयात्राविवाहयात्रादिके आरादीनां कामशास्त्रे समय उक्तः ॥ ७८ ॥

दिदृक्षुरिति । नलदिदृक्षुरत एव दर्शनानुरागवशेन विगतपक्ष्मसङ्कोचे वीक्षणे विशिष्टे नेत्रे यस्याः सा । तथा नृणां भूलोकवासिनामयोग्यां दिव्यां तनुश्रियं दधती अन्या कापि वारोर्वशीमात्रदेवाङ्गनाभावापि दर्शनौत्सुक्यात् पलायमानेव यदृच्छा शचीमभ्यगात् तावता केवलं तावन्मात्रेणैव नापरोऽभूत् अपरमोऽप्यनिमेषनेत्रा अमनुष्या देवैकभोग्या कायकान्ति

330H

पदाग्रमात्रेण यदस्पृशन्मही
न तावता केवलमप्सरोऽभवत् ॥ ७९ ॥
विभूषणस्रंसनशंसनार्पितै
करप्रहारैरपि धूननैरपि ।

विभाणा पदैकदेशेनापि भूमिं न स्पृशन्ति, इयं तु निर्निमेषदर्शनोत्सुकतयाङ्गुष्ठादिमात्रेण केवलं भूमिं स्पृशती तेनैव धर्मेण तत्तुल्या नाभूत् अन्यत् सर्व्वं सादृश्यमेवेत्यर्थः । अप्सरोऽभवदिति । अप्सर शब्दस्य बहुत्वेऽपि अन्यैत्यपेक्षयाऽभवदित्येकवचनमपि युक्तम् । आप सुमनसो वर्षा अप्सरस सिकता समा । एता स्त्रियां बहुले स्युरेकत्वेऽप्युत्तरक्रममिति वचनादेकवचनान्तादप्सर शब्दात् न च्वि । बहुजनपृष्ठवर्त्तिनो भित्त्यादिव्यवहिता वा पदाङ्गुष्ठमात्रेण भुवं स्पृशन्ती प्रोन्नमिताङ्गी पश्यन्तीति दिदृक्षूणां स्वभावः ॥ ७९ ॥

विभूषणेति । अपरा अन्तःकरणे शरीरमध्ये अमान्तः सम्मद शरीरमानाधिकमानं बहिर्व्वाप्यितं नलदर्शनजं प्रमोदं विभूषणानां स्रंसनस्य शंसने तव मण्डनं गलितं तव मण्डनं गलितमिति प्रत्येकं कथने विषयेऽपि तैर्दत्तै करप्रहारैरपि धूननैरपि तच्छरीरकम्पनैश्च छलात् प्रसभं बलात्कारेण स्वसखीषु पुरा सम्भापयतीव प्रावीविशदिव, विचित्तत्वेन शब्दसङ्घट्टनकरेण ताड्यते पतितविस्मृतभूषणादिसंवेदनाय कम्प्यते चेति । तथान्यदपि कुसूलमानमध्याद्धोधूमादि बहिरवस्थितं सत्

330H

अमान्तमन्तःप्रसभं पुराऽपरा
सखीषु सम्भापयतीव सम्मदं ॥ ८० ॥
वतंसनीलाम्बुरुहेण किं दृशा
विलोकमाने विमनीबभूवतुः ।
अपि श्रुती दर्शनसक्तचेतसां
न तेन ते शुश्रुवतुर्मृगीदृशाम् ॥ ८१ ॥

बलात्कारेण करताडनैः करकृतैर्धूननैश्चान्तर्माणत इति च लौकिकी रीतिः। नलदर्शनानुरागादतिविमनस्का जाता इति भावः। पुरा सम्भापयतीति। पुरि लुङ् चास्मे (पा० ३।२।१२२) इति भूते लट् ॥ ८० ॥

विभूषणभ्रंशशब्देन किमिति ज्ञापित इत्यत आह। वतंसेति। नलदर्शने सक्तं चेतो यासां मृगीदृशां श्रुती कर्णावपि वतंसनीलोत्पलेन कर्णभूषणनीलाम्बुरुहेणैव दृशा नेत्रेण कर्त्र्या विलोकमाने सत्यौ यस्माद्विमनीबभूवतुर्व्याकुले जाते तेन हेतुना ते श्रुती किं भूषणस्रंसनं न शुश्रुवतुः। चक्षुषी किं श्रवणानर्हत्वाच्च शृणुतां, कर्णौ तु श्रोतुं योग्यावेवेत्यदर्शनाः सुदृशो यथा नलविलोकनेन विमनस्का जातास्तथा त्कर्णावपि विमनस्कौ जाताविति वा अपेरर्थः। विमनीबभूवतुः। अरुर्मनश्चक्षु (पा० ५।४।५१) इति च्विः। सलोपः ॥ ८१ ॥

काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तावशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनां ।
साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं
ज्योतिष्टोमादियज्ञश्रुतफलजगतीसार्व्वभौमभ्रमेण ॥ ८२ ॥

काश्चिदिति । पश्यन्तीषु तासु मध्ये कान्ताः सुन्दर्यः काश्चित्पुरनार्य्यः भूषणानां ये मणयः तेषां भूषणभूतानां वा मणीनां रत्नानामोघैः समूहैः आचूड शिखामभिव्याप्य निचुलितमाच्छादितमिव तत्र वुडितमिव तं नलं चक्षूरूपाभ्यां प्रसृतिभ्यां अर्द्धसङ्कुचितकरकुड्मलाभ्यां चुलुकितं पीतं निर्माय कृत्वा प्रसृतिप्रमाणाभ्यामतिविशालाभ्यां चक्षुर्भ्यां सादरं दृष्टिं कृत्वा इति मौग्ध्यादज्ञैपुण्यादशङ्कन्त तर्कयामासुः । इति मौग्ध्यं किं । निमिषे पक्ष्मसङ्कोचेऽकृतमतिभिरनिमिषाभिः साहस्रीभिः सहस्रसङ्ख्याभिर्दृग्भिर्दृष्टिभिर्ज्योतिष्टोमराजसूयादियज्ञानां वेदाश्रुतं यत्फलं साध्यं तद्रूपा या जगती भुवन स्वर्गं तस्याः सार्व्वभौमश्चक्रवर्त्तीन्द्रस्तस्य भ्रमेणायं नल आलिङ्गितः स्पृष्टः किं । अचेतनैरपि रत्ननेत्रसहस्रैर्वैभववशादिन्द्रोऽयमिति भ्रान्त्या इन्द्रस्य सहस्रनेत्रत्वादनेनास्माभिः सम्बन्धं युक्तमिति बुद्ध्या समालिङ्गितः । किमिति उत्प्रेक्षा । एतदेव च मौग्ध्ये सौन्दर्य्ये रत्नबाहुल्यं चोक्तं । सहस्रशब्दो ह्यत्रेऽपरिमितवाची । सहस्रं परिमाणंयासान्ताः साहस्र्यः तदस्य परिमाणमित्यर्थे, शतमानविंशतिकसहस्रवसनादणित्यण् (पा०५।१।२७) ॥ ८२ ॥

भवन् सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमूर्वश्याः प्राणानपि विजयमानस्तनुरुचा।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्म्मीणश्रीरुदभवदलङ्कर्त्तुमधुना॥ ८३॥

भवन्निति। सूर्यनप्ता मनोः पुत्रः सुद्युम्नाख्यो नरपती राजा पार्व्वतीवनप्रवेशनिमित्तेन शिवशासनेन हेतुना इलाख्या स्त्री भवन् स्त्रीत्वं प्राप्तः सन् बुधाद्गर्भधारणेन यस्य जननी अभूत्। उर्वश्याः प्राणान् रूपातिशयात् स्वर्वेश्यायाः प्राणभूतं प्राणप्रियमतिसुन्दरं तं पुरूरवसमपि तनुरुचा कायकान्त्या विजयमानः पराभावुकोऽसौ नलः अधुनेदानीं हरेणारब्धः कृतः क्रोधस्तदेन्धनं दाह्यो मदनस्तस्य सिंहासनं दग्धत्वात्कामेन शून्यमलङ्कर्तुं योग्यतया भूषयितुं अलङ्कर्म्मीणा कर्मक्षमातिसमर्था स्वाभाविकी भूषणजनिता च श्रीः शोभा यस्यासौ एवम्भूत उदभवत् जात इति पुरस्त्रिय आलेपुरित्यन्तिमश्लोकेन सम्बन्धः। जीर्णः कामो दग्धः पुरूरवास्त्वनेनैव जितः तस्मात् शून्यं कामसिंहासनं भूषयितुमयं काम एवोत्पन्नः। अतिसुन्दरोऽयमिति भावः। कृतयुगादौ तु इलो नाम राजा मृगयाप्रसङ्गाद्धरनिवारितकुमारवनमेकाकी प्रविष्टः स्त्री बभूव। तामेकाकिनीं सुन्दरीं दृष्ट्वा चन्द्रपुत्रो बुधः कामातुरः सन् स्वाश्रमं नीत्वा तस्यां पुरूरवोनामानं पुत्रमजीजनदिति भविष्योत्तरपुराणे कथा। विजयमानः। विपराभ्यामिति (पा० १।३।१८) शानच्। कर्मक्षमोऽलङ्कर्म्मीण इत्यमरः॥ ८३॥

अर्थी सर्व्वसुपर्व्वणां पतिरसावेतस्य यूनः कृते
पर्य्यत्याजि विदर्भराजतनया युक्तं विशेषज्ञया।
अस्मिन्नाम तया वृते सुमनसः सन्तोऽपि यन्निर्ज्जरा
जाता दुर्मनसो न सोढुमुचितास्तेषां तु सानौचिती ॥८४॥
असोत्कण्ठितकण्ठलोठिवरणस्रक्साचिभिर्दिग्धवैः
स्वं वक्षः स्वयमस्फुटन्न किमदःशस्त्रादपि स्फोटितं।

अर्थीति। विशेषज्ञया गुणानामधिकतरत्वं विदूष्य विदर्भ-
राजपुत्र्या अर्थी मां वृणोष्वेत्यर्थयमानः सानुरागोऽप्यसौ सर्व्व-
सुपर्व्वणां सर्व्वदेवतानां पतिरिन्द्रोऽपि एतस्य प्रत्यक्षलक्ष्याति-
सौन्दर्यस्य यूनः पूर्णतारुण्यस्य नलस्य कृते निमित्तं पर्य्यत्याजि।
सानुरागत्वे प्रभुत्वेऽपि सौन्दर्य्यादिगुणानां न्यूनत्वात् परित्यक्त-
स्तद्युक्तमुचितमेव कृतमित्यर्थः। नाम प्राकाश्ये, तु पुन र्निर्जरा
इन्द्रादयश्चत्वारोऽपि देवाः शिष्टा नाम प्रसिद्धाः शोभनान्तःक-
रणा अपि सुमनसः प्रसिद्धाः सन्तोऽपि वा सुमनस इति सञ्ज्ञया
ख्याताः सन्तोऽपि तया भैम्या अस्मिन्नले वृते सति यद्दुर्मनसः
विषादमनसो जाताः सा तेषामनौचिती अनुचितकारिता,
सोढुं सन्तुं नोचिता न युक्ता। न हि साधुभिः कार्य्यवशादपि
स्वधर्मः परित्यज्यते, एतैस्तु परित्यक्तमादृशं न गण्यामह इत्यर्थः।
शिष्ययम् ॥ ८४ ॥

असोत्केति। अस्य नलस्य चिरकामं वरणमालाक्षेपार्थमुत्क-
ण्ठिते कण्ठे लोठिन्यावमनया एदयावसम्मिना वरणस्रजः

भवन् सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमूर्वश्याः प्राणानपि विजयमानस्तनुरुचा।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्म्मीणश्रीरुदभवदलङ्कर्त्तुमधुना॥ ८३॥

भवन्निति। सूर्यनप्ता मनोः पुत्रः सुद्युम्नाख्यो नरपती राजा पार्व्वतीवनप्रवेशनिमित्तेन शिवशापेन हेतुना इलाख्या स्त्री भवन् स्त्रीत्वं प्राप्तः सन् बुधाद्गर्भधारणेन यस्य जननी अभूत्। उर्वश्याः प्राणान् रूपातिशयात् स्वर्वेश्यायाः प्राणभूतं प्राणप्रियमतिसुन्दरं तं पुरूरवसमपि तनुरुचा कायकान्त्या विजयमानः पराभावुकोऽसौ नलः अधुनेदानीं हरेणारब्धः कृतः क्रोधरूपेन्धनं दाह्यो मदनस्तस्य सिंहासनं दग्धत्वात्कामेन शून्यमलङ्कर्त्तुं योग्यतया भूषयितुं अलङ्कर्मीणा कर्म्मक्षमातिसमर्था स्वाभाविकी भूषणजनिता च श्रीः शोभा यस्यासौ एवम्भूत उदभवत् जात इति पुरस्त्रिय आलेपुरित्यन्तिमश्लोकेन सम्बन्धः। जीर्णः कामो दग्धः पुरूरवास्त्वनेनैव जितः तस्मात् शून्यं कामसिंहासनं भूषयितुमयं काम एवोत्पन्नः। अतिसुन्दरोऽयमिति भावः। कृतयुगादौ तु इलो नाम राजा मृगयामङ्गादुरनिवारितमुमावनमेकाकी प्रविष्टः स्त्री बभूव। तामेकाकिनीं सुन्दरीं दृष्ट्वा चन्द्रपुत्रो बुधः कामातुरः सन् स्वाश्रमं नीत्वा तस्यां पुरूरवो नामानं पुत्रमजीजनदिति भविष्योत्तरपुराणे कथा। विजयमानः। विपराभ्यामिति (पा० १।३।१८) शानच्। कर्मक्षमोऽलंकर्मीण इत्यमरः॥ ८३॥

मा जानीत विदर्भजामविदुषीं कीर्त्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीं।
कः शच्या रचयाञ्चकार चरितं काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ ८६ ॥

मा जानीतेति। भोः सख्यो यूयं विदर्भजां मुदो हर्षात् सका-
रात् कीर्त्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत किन्तु
र्षापेक्षया कीर्त्तिः प्रशस्ततरेति भैमी वेत्त्यैवेति जानीत। य-
स्मात् सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं
भद्रं साधु नाचीकरत् न कारयामास। इन्द्रे वृते तत्पत्नीता-
च्छचीशब्दवाच्यत्वं भवेत् न त्वमो वृतस्तस्माद्वितीया शची ना-
भवदिति युक्तमेव अनया कृतमित्यर्थः। इन्द्रे वृतेऽपि कीर्त्तिर्भवि-
ष्यतीत्याशङ्क्य नेत्याह। शच्याश्चरितं कः कविः सर्गबन्धनादिरूप-
ेण वर्णनात्मकं काव्यं प्रबन्धं रचयाञ्चकार स शचीवर्णनकारी नो
स्माकमपेऽस्मभ्यं च कथ्यतां यद्यस्ति, अपि त्वनिरूपणान्नास्त्येव।
एतस्यास्तु भैम्याः पुनारसानां शृङ्गारादीनामेव रसानां जला-
नां धुनी नदी तस्याः पात्रे स्थानभूतेऽथ च रसनदीप्रवाहरूपे
लीलादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न
करिष्यतेऽपि तु तैरपि भारतादौ तद्वर्णनकाव्यं करिष्यते किं
पुनः श्रीहर्षादिकविभिरित्यर्थः। इन्द्रवरणेन यद्यपि स्वर्गसुख-
प्राप्तिस्तथापि तत्पत्नीत्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यव-
र्णतत्वादिन्द्रापेक्षयाधिककीर्त्तिर्नलस्य वरणे पुण्यश्लोकत्वात् सर्व्व-

व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं
भैम्या व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥ ८५ ॥

साचिभिः प्रत्यक्षदर्शिभिर्द्दिग्धवैश्चतुर्भिरिन्द्रादिभिर्दिक्पालैस्त्रपाभावात् स्वयमस्फुटद्विदीर्यमाणमपि स्वं वचः अमुष्य नलस्य शस्त्रादपि हेतोः किमिति न स्फोटितं विदारितं नलेन सार्द्धं भैम्यर्थं युद्धमपि कृत्वा किमिति न मृतं। शूराणां रणे मरणमपि यशसे भवति न तु लज्जापरित्याग इति भावः। छुरिकादिप्रक्षेपेण स्वयमेव वा किमिति न स्फोटितमिति वा। अन्यादृशस्तावत्तिष्ठन्तु हा सोपहासं कष्टं अद्य भैम्यां विषये व्यर्थमनोरथेन सता व्यावृत्य परावृत्य उपनीतेन शचीसमीपे प्रणामवशागमेण शतमखेन शतयज्ञकरणालब्धस्वर्गाधिपत्येन देवेन्द्रेणापि शचीन्द्राण्यपि च कथं प्रसाद्यानुनेतुं शक्या। यतः कोपवशादसूयावशाद्वा साचीकृतं वक्रीकृतमास्यमेवाम्बुजं यया। सक्रुधानवलोकनात् प्रसादनार्थमनेन कृतमपि प्रणामाञ्जल्यादिकं न द्रक्ष्यति ततः कथं प्रसाद्या। भैमी न लब्धा शची च रुष्टेत्यपयशोऽपि जातमितीन्द्रस्य महत् कष्टं जातमिति भावः। दिग्भटैः शूरैर्नृपैः स्वं वचः किमिति न स्फोटितं। नृपा मनुष्यास्तिष्ठन्तु देवेन्द्रस्यापीदृशी दशा जातेति वा। उपगतेति पाठे शचीसमीपे गतेनेत्यर्थः ॥ ८५ ॥

मा जानीत विदर्भजामविदुषीं कीर्त्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीं ।
कः शच्या रचयाञ्चकार चरितं काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपार्श्वे चरित्रे न कैः ॥ ८९ ॥

मा जानीतेति। भोः सख्यो यूयं विदर्भजां मुदो हर्षात् सका-
ात् कीर्त्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत किन्तु
र्षापेक्षया कीर्त्तिः प्रशस्यतरेति भैमी वेत्त्येवेति जानीत। य-
मात् सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं
भद्रं साधु नाचीकरत् न कारयामास। इन्द्रे वृते तत्पत्नीत्वा-
च्छचीशब्दवाच्यत्वं भवेत् न त्वसौ वृतस्तस्माद्द्वितीया शची ना-
भवदिति युक्तमेव अनया कृतमित्यर्थः। इन्द्रे वृतेऽपि कीर्त्तिर्भवि-
ष्यतीत्याशङ्क्य नेत्याह। शच्याश्चरितं कः कविः सर्गबन्धनादिरू-
पेण वर्णनात्मकं काव्यं प्रबन्धं रचयाञ्चकार स शचीवर्णनकारी नो
ऽस्माकमपेऽप्यभ्यं च कथ्यतां यद्यस्ति, अपि त्वनिरूपणान्नास्त्येव।
एतस्यास्तु भैम्याः पुनारसानां शृङ्गारादीनामेव रसानां जला-
नां धुनी नदी तस्याः पार्श्वे स्थानभूतेऽथ च रसनदीप्रवाहरूपे
नलादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न
करिष्यतेऽपि तु तैरपि भारतादौ तद्वर्णनकाव्ये करिष्यते किं
नः श्रीहर्षादिकविभिरित्यर्थः। इन्द्रवरणेन यद्यपि स्वर्गसुख-
प्राप्तिस्तथापि तत्पत्नीत्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यव-
र्णितत्वादिन्द्रापेक्षयाधिककीर्त्तिर्नलस्य वरणे पुण्यश्लोकत्वात् सर्वै-

वैदर्भीबहुजन्मनिर्म्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः।
गीर्व्वाणालयसार्व्वभौमसुकृतप्राग्भारदुःप्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषां ॥ ८७ ॥

रपि वर्णनीयत्वात्तत्प्रसङ्गात् स्वस्यापि वर्णनीयत्वान्महती कीर्त्ति-र्भविष्यति सा च स्वर्गसुखः सकाशाच्छ्रेयसीति विचार्य्येन्द्रपरि-त्यागद्वारा स्वर्गसुखमपि परित्यज्य भैम्या नलो वृत इति पुं-कारित्वादेतादृशी कापि विदुषी नास्तीति भावः। दिव इति पाठे स्वर्गसुखादित्यर्थः। करिष्यते स्वदन्तत्वादिट् ॥ ८६ ॥

वैदर्भीति। हे सख्यः अवन्यां वासः स्थितिर्यस्य स प्रसूना-युध इव कामरूपोऽयं नलनामा युवा तरुणो देहश्रिया काय-कान्त्या कृत्वा पश्यन्तीनामस्माकं नेत्राभ्यां स्वदते रोचते। किंभूतया। वैदर्भ्या बहुजन्मभिरनेकजन्मसु वा निर्म्मितस्य कृच्छ्रचा-न्द्रायणादिजन्यस्य तपसः सुकृतस्य शिल्पेन फलभूतया। अतिसु-न्दरममुं प्रीत्यास्मन्नेत्रे पश्यत इत्यर्थः। विशिष्टया देहश्रियोप-लक्षितो वा। अशरीरोऽपि भैमीपुण्यबाहुल्यवशात् सशरीरो जात इवेति भाव इति वा। सोऽयं नलः भीमजया सह योगमद्य इ-त्यसम्बन्धमनुभूय त्विषां कान्तिभराणामनन्यत्वात्मकमद्वै-द्वैतं सामस्त्यं भजतां आश्रयतु। उभयोरेकत्र मेलनाद्द्वे-कान्तीनामाश्रयः कान्तिस्वरूपो वा भवतु सान्य इत्यर्थः। किंभूतया। गीर्व्वाणालये स्वर्गलोके सार्व्वभौम इन्द्रस्तस्य सुकृतप्राग्-

स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभू-
दभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसम्पत्तये।
आसंसारपुरन्ध्रिपूरुषमिथःप्रेमार्पणक्रीडया-
प्येतज्जम्पतिगाढरागरचनात् प्राकर्षि चेतोभुवः॥८८॥

नार: पुण्यराशिस्तेनापि दुष्प्रापया प्रलभ्यया। शतमखजन्मेन पुण्येन स्वर्गचक्रवर्त्तित्वं येन लब्धं तेनापि दुष्प्रापत्वाद्भैम्याः सौभाग्यातिशयो नलस्य चन्द्रापेक्षया सौभाग्यातिशयः पुण्यातिशयश्च गीर्व्वाणालयेत्यादिना सूचितः। अन्योऽप्यष्टाङ्गयोगमनुभूय महापुण्यदुष्प्रापयापि भीमात् हराज्जातया ईश्वरप्रसादलभ्यया विद्ययाऽद्वैतं परमात्मस्वरूपं भजति। नेत्राभ्यां। रुच्यर्थाना-मिति (पा०१।४।३३) सम्प्रदानत्वं। प्राग्भारदुःप्रापया। तृती-येति योगविभागात् समासः॥ ८७॥

स्त्रीति। स्त्रीपुंसयोः सर्व्वयोः व्यतिषञ्जनं विशेषेणातितरां सम्मेलनं जनयतः कुर्व्वतः प्रजानां पत्युर्ब्रह्मणः पुनरसंयोजनमिथुनसर्गेऽभ्यासोऽनयोर्नलभैम्योर्दाम्पत्यसम्पत्तये जायापतिभावस्योत्कर्षाय परिपाकिमः परिपाकेन निर्वृत्तः स्मारस्येन परिपततया कोऽभूत्किं, सर्व्वस्त्रीपुंसयोजनाभ्यासः अत्युत्तमानुरूपतदुभयसङ्घट्टेन फलितःकिमित्यर्थः। तथा चेतोभुवः कामस्यापि आसंसारं संसारं मर्यादीकृत्य सर्गादिमारभ्य प्रलयपर्य्यन्तं पुरन्ध्रिपूरुषयोः स्त्रीपुंसयोर्मिथः प्रेमान्योन्यमनुरागमत्स्यार्पणमासञ्जनं तदेव सदा मनोविनोदनरूपा क्रीडा लीला तयापि

ताभिर्दृश्यत एष यान् पथि महाज्यैष्ठीमहे मज्महे
यद्भिः पुरुषोत्तमः परिचितः प्राप्तः स्वमञ्चत् ततः।

एतज्जम्पत्योरनयोर्नलभैमीरूपयोर्गाढश्लेषेणायनेन यस्य सि-
ध्योऽनुरागस्य रचनाज्जननाद्धेतोः प्राकर्षि प्रकृष्टकाष्ठापन्नया
जातं। अनुरागजननक्रीडाया प्रकर्षोऽत्रैव विश्रान्तः। उत्तर-
त्रापेवमनुरागस्याभावादित्यर्थः। एतादृशौ सरूपौ समाना-
नुरागौ चान्यौ स्त्रीपुंसौ कालत्रये न स्त इति भावः। व्यतिष-
ज्जनं। उपसर्गात् सुनोतीति (पा० ८।३।६५) षत्वं। परिपा-
किमः। भावप्रत्ययान्तात्, पृथ्वादिभ्य (पा०५।१।१२२) इति
इमनिच्। जम्पती। जायाया जभावः॥ ८८॥

ताभिरिति। महत्या अतिप्रसिद्धाया ज्येष्ठानक्षत्रयुक्ताया
ज्यैष्ठपूर्णिमायाः सम्बन्धिनि महे उत्सवे, महत्यतिप्रसिद्धे वा
ज्यैष्ठीमहे यद्भिर्याभिर्नेत्रैः प्राग् जन्मान्तरेऽयवास्यापेक्षया
प्रथमं मञ्चं पर्यङ्कं अञ्चत् प्राप्तः मञ्चस्थो मार्गं गच्छन् श्रीपु-
रुषोत्तमः परिचितो बहुवारं दृष्टः स्तस्ताभिरेव स्त्रीभिः पथि
वरयात्रायां यान् रथस्य आगच्छन्नेष नलो दृश्यते। एता-
दृक्पुण्यं याभिरस्मादृशाभिरर्जितं ताभिरेवायं द्रष्टुं शक्यो न
त्वन्याभिरित्यर्थः। अथ च याभिः पुरुषोत्तमो दृष्टस्ताभिरे
तत्तुल्योऽयमपीति शक्तुं शक्यते न त्वन्याभिरित्यर्थः। ताभिरे
याभिरसावं कटाक्षैर्दृश्यते याभिरेवं सुकृतं कृतं। अन्याभिस्तु पो-
त्रकेणापि वीक्षितुं न शक्यते किं पुनः सानुरागं कटाक्षैरिति।

सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य ढक्काचामरैः
सस्ने माघमघाभिघातियमुनागङ्गौघयोगे यया ॥ ८९ ॥

ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठीति कीर्त्तितेति ॥

पुरुषोत्तमतुल्योऽयं सम्भाव्ये जानीमहे इति भावः । वाक्यार्थः कर्म । उत्कलदेशे ज्येष्ठपूर्णिमायां इन्द्रनीलगिरिनिवासिनः श्रीपुरुषोत्तमस्य महोत्सवः क्रियते । तत्र च श्रीकृष्णबलभद्रप्रमुखप्रतिमाधिष्ठिता विरचितमञ्चभूमिका मञ्चाः पृथक् निर्गच्छन्तीति तस्य दर्शनं भूयसे श्रेयसे भवतीति पौराणिकाः । यदाहुः ।

दोलारूढं तु गोविन्दं मञ्चस्थं मधुसूदनं ।
रथस्थं केशवं दृष्ट्वा पुनर्जन्म न विद्यते इति ॥

यया । यया स्त्रिया अघाभिघातिनी पातकविनाशिनी यमुना गङ्गा च तयोरोघयोर्योगे सङ्गमे प्रयागाख्ये माघं सस्ने मकरस्थे रवौ माघे मासविच्छेदेन स्नानं कृतं मास्य नलस्य पतयालुभिरतिचञ्चलैः शितिसितैः कृष्णधवलैर्ढक्कामरैर्नैरेव-चामरैर्नैचव्यापारकृपैश्चामरैस्त्रीराट् स्त्रीराजैव स्यात् भवेत् इति सम्भाव्ये । राजा हि कृष्णधवलैश्चामरैर्वीज्यते । प्रयागे माघस्नानजन्यसुकृतात् स्त्री राजत्वं प्राप्नोति तत्र स्नानेन ।

सितासिते तु यैः स्नानं माघमासे युधिष्ठिर ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीति ।

वचनात् स्त्रीषु श्रेष्ठा सैव भवेदिति वचनादित्यर्थः। अथच कटाक्षैर्यां पश्यति सा सर्व्वाभ्योऽप्यधिका सा च भैम्येव नान्या। भैम्या च प्रयागे सकलमाघस्नानफलं लब्धं यतो भैमीसदृशी कापि कुत्रापि नास्तीति भावः। ज्यैष्ठीति। ज्येष्ठानक्षत्रयुक्ता पौर्णमासीति। नक्षत्रेण युक्तः कालः (पा० ४।२।३) इत्यणि वृद्धिः। तद्युक्तमासाभिधायित्वेऽपि मास्मिन् पौर्णमासीत्यादिना (पा० ४।२।२१) ज्यैष्ठी इत्येव भवति। ज्येष्ठीइत्येव पाठे वृद्ध्यभावश्चिन्त्यः। सञ्ज्ञापूर्व्वस्य विधेरनित्यत्वाद् वृद्ध्यभावः कथञ्चित् समर्थनीयः। स्त्रीराडिति सम्बन्धषष्ठ्या निर्धारणषष्ठ्या वा समासः। स्त्री इति पृथग्वा पदं। अत एव सा स्त्री इत्यर्थः। अकर्म्मकधातुभिर्योगे, देशः कालो भावो गन्तव्योऽध्वेत्यादि (पा० १।४।५१ सि० कौ० कारकवार्त्तिकेन माघस्य कालवाचित्वात् कर्म्मकत्वे धातोः सकर्म्मकत्वात् कर्म्मणि विहितेन तङा तस्याभिहितत्वान्माघः सस्न इति प्राप्ते माघमिति द्वितीया चिन्त्या। अत्रार्थे हरदत्तमिश्रैर्गतिबुद्ध्यादिसूत्रे (पा० १।४।५२) अकर्म्मकाणामिति कालभावाध्वदेशव्यतिरिक्तकर्म्मरहितानामित्यर्थो ग्राह्य इति सिद्धान्तितं। एवं कर्म्मणि च (पा० ३।४।६८) इत्यादावपि यथाकर्म्मकपदं तत्र सर्व्वत्र द्रष्टव्यं। तेनात्र माघस्य कर्म्मत्वेऽपि सस्ने इति भावे लिट् सिद्धो भवति। यद्वा माघं यस्यां क्रियायां यथा तथा स्नाता मम सर्व्वपापक्षयपूर्व्वकसर्व्वमनोरथसिद्धिर्भवत्विति माहस्य्योऽर्थः। कलुषं वृजिनैनोघमित्यमरः। यमुनागङ्गेति पूर्व्वनिपातोऽनियमः पूर्व्ववत् परिहरणीयः॥ ८८॥

वैदर्भीविपुलानुरागकलनात् सौभाग्यमस्याखिल-
क्षौणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः ।

वैदर्भीति । हे सख्यः तस्य नलस्य सम्बन्धीनि वृत्तान्यधीतानि यानि वृत्तानि पद्यानि तेषां क्रमैः नलविषये कविभिः कृतैः अस्मदादिभिश्च पठितैः काव्यैर्वृत्तैरतीतैः सकलद्वीपाधिपादिराजेन्द्रदेवेन्द्रादिदिक्पालपरित्यागरूपस्य चरित्रक्रमैः परिपाटीभिर्वा कृत्वा वैदर्भ्या भैम्या विपुलस्य नलविषयानुरागस्य कलनात् ज्ञानात् अखिलक्षोणीचक्रे शतक्रताविन्द्रेऽस्मिन्नले त्रैलोक्यसम्बन्धिसकलवरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजगदे स्पष्टं कथितं । निश्चितमस्माभिरिति यावत् । अतिसुन्दरीयमिन्द्रादीन् परित्यज्य यस्मादेनमवृत तस्मादयमेव सुभगतमो नान्य इति सर्व्वैर्निश्चितमित्यर्थः । भैमीकृतान्नलविषयविपुलानुरागस्याङ्गीकरणाद्धेतोस्तस्या एव वृत्तस्य भूतस्य चक्षुःप्रीत्यादिकामदशाः स्फुटं विरहव्यथानुरूपस्य वृत्तस्य चरित्रस्य क्रमेणोऽतिप्रसिद्धा ये वृत्ता वृत्तक्रमास्तैर्वा निगदितं । भैम्या अप्येतद्विषयमहानुरागजनितपूर्व्वविरहव्यथाभिरेवायं सकलसौभाग्यनिधानमिति सर्व्वेषां पुरस्तात् कथितमिति भाव इति मुख्योऽर्थः । वैदर्भ्या विपुलानुरागेण नलस्य वर्णनादिति वा । किञ्चान्यच्च अस्माकमयमास्ताकः स चासौ नरेन्द्रश्च भीमस्तस्माद् भवतीति भूर्भैमी तस्याः सुभगता सौभाग्यं तस्याः सम्भूतये उत्पत्तये सहायकृद्धथं वा देवस्य इन्द्रस्यावरणेन त्यागेन सापत्न्याभा-

किञ्चास्माकनरेन्द्रभूसुभगतासम्भूतये लग्नकं
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीःस्तुतिः ॥ ९० ॥
आसुत्राममपास्तनान्सखभुजां भैम्यैव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जास्रजा।

देन प्रसादितया सन्तोषितया शच्या विश्राणितं दत्तं सुभगा पुत्रवत्यविधवा भवेत्यादिकमाशीर्वचनं लग्नकं प्रतिभूरभूत्। शचीदत्ताशीःसहस्रवलाङ्गैस्यपि सुभगेति निश्चितमित्यर्थः। आशीःश्रुतिरिति पाठे आशिषां श्रवणं। अथवा आशिष एव सत्यत्वाच्छ्रुतिर्वेद इत्यर्थः। अयन्तु पाठः साधीयान्। अनयोरन्योन्यमनुरागोचितं सौभाग्यमपि भविष्यतीत्यनुमानम्। दत्तं णेरध्ययने वृत्तमिति (पा० ७।२।२६) सिद्धं। आस्माकेति सम्बन्धेऽणि, तस्मिन्नणि चेति (पा० ४।३।२) आस्माकादेशः। लग्नकशब्दो नपुंसकोऽपि। तस्या भैम्या वृत्तानां जातानां इत्तानां हंसप्रेषणादिचरितानां क्रमः परिपाट्यसौभिंजगदे इति वा ॥ ९० ॥

आसुत्राममिति। भैम्यैव आसुत्राममिन्द्रमभिव्याप्य मख भुजां देवानामपासनात्त्यागाद्धेतोः राजव्रजे विषये लज्जाद स्रजा परिमार्जनं युक्ता आर्जि कृता। यस्तात् तद्युक्तमित्यर्थः। यतः तस्मै इदं तदर्थं तस्य भावस्तादर्थ्यं तेन भैमीनिमित्तेन राज्ञामागमनं यन्निमित्तोऽनुरोधो दाक्षिण्यं तत्र परया। ये हि यदर्थमागच्छन्ति स तस्य दाक्षिण्यं कुर्य्यात् मन्वा मार्हि

आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
व्रीडोपापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

वतमेवेत्यर्थः। मदर्थमागतानामेषां मत्प्राप्तिर्नाभूत् लज्जा च
गतेत्ययुक्तमेतदिति राजसु समक्षपतिनेन्द्रादीनपि भैमी नावृ-
णोत्। ततश्च यथेन्द्रादयोऽपि त्यक्तास्तत्र मानुषाणामस्माकं का
कथेति तेषां लज्जामार्जनं भैम्येव युक्तं कृतमिति भावः। स नलो
ऽर्थः प्रयोजनं यस्य तस्य भावस्तादर्थ्यं तेन नलप्रयोजनत्वेन नल-
वरणार्थं यदागमनं तत्र यः पक्षपातस्तन्निष्ठया नलानुरक्तया
अत एव इन्द्रादीनां त्यागः कृत इति वा। तर्हि इन्द्रादीनां लज्जा
दोषोऽकीर्त्तिश्च कृतेति देवद्रोहादशुभाशङ्कां परिहरति। अन-
या भैम्या पत्ये नलायात्मानं त्रिदशप्रसादस्य फलतां वररूपत्वं
विधाय सुराणामिन्द्रादीनामपि व्रीडोपापयशसां कथायाः
कथामात्रस्यापि अनवसरः अवकाशाभावः सृष्टः कृतः। अस्मा-
न्नावृणोदिति सजातीयान् क्षत्रियस्य प्रति लज्जा अस्माकं प-
श्यतां नलसंवृणोदिति शेषः। नलं स्वीकृत्य देवानपमानितव-
तीत्यपयशः। देवैश्च प्रसन्नीभूय वरत्वेन नलाय भैमी दत्ता।
एतदर्थमेव ते पृथिव्यामागता न भैम्यभिलाषेणेति लोकप्र-
तीतेर्यथा देवानामपि लज्जादिमार्ज्जनं कृतमिति सर्व्वानुरा-
गादनयोः शुभपरम्परैव भविता नाशुभशङ्कालेशोऽपीति भावः।
पत्ये नयत्येति पाठः समीचीनः। आत्मानं त्रिदशप्रसादफलतां
नयत्या आपयन्त्येत्यर्थ.। आसुत्रामं। अत्राभिविधावाङ्। अव्य-

इत्यालेपुरनुप्रतीकनिलयालङ्कारसारश्रिया
ऽध्वंकुर्व्वत्तनुरामणीयकममूरालोक्य पौरस्त्रियः।
सानन्दं कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दनं
तस्याध्यास्य यतः शतक्रतुहरित्क्रीडाद्रिमिन्दोरिव॥८३॥

यीभावे, अनश्चेति (पा०५।४।१०८) टच्। मृजा। भिदादित्वादङ् (पा०३।३।१०४) ॥ ८१ ॥

इतीति। अमूः पौराणां स्त्रिय इति पूर्व्वोक्तप्रकारेण यथास्फूर्त्ति यथाभिप्रायमन्योन्यमालेपुः संवादं चक्रुः। किम्भूताः। कुरुविन्दवत् पद्मरागवत् सुन्दरौ रक्तौ करौ यस्य तस्य आनन्दनं वेगवत्त्वादिगुणयोगादानन्दकारिणं स्यन्दनं रथमध्यास्य यतो गच्छतस्तस्य नलस्य अनुप्रतीकं प्रत्यवयवं निलयं स्थानं येषां तेषामलङ्काराणां सारश्रिया श्रेष्ठशोभया छला करसौन्दर्यादरमधिकमिति हस्तसौन्दर्य्यं वदति, हस्तसौन्दर्य्यादहमधिकमिति करसौन्दर्य्यमित्येवं प्रत्येकमहं कुर्व्वदहङ्कारं कुर्व्वत् तनुरामणीयकं शरीरसौन्दर्य्यमालोक्य सानन्दा हर्षपराः। कमिव। पद्मरागवद्रक्तकिरणस्य नन्दनवनमभिव्याप्य सर्व्वादीशत्य पार्श्वे मन्दरसमीपे स्थितं। शतक्रतोरैन्द्रिरितदिक् प्राची दिक् तस्याः क्रीडाद्रिमुदयाचलमधिष्ठाय गच्छत उदितस्येन्दोरिव। तस्याभ्युदयकान्तिं विलोक्य यथा सानन्दा भवन्ति तथेत्यर्थः। इन्दोरपि पौर्णा हर्षः। सान्द्रमध्याम्। अधिशीङि (पा०१।४।४६) स्याधारस्य कर्म्मत्वं। यतः। इण् गतौ शतृ ॥ ८२ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
यातः पञ्चदशः कृशेतररसस्वादाविहायं महा-
काव्ये तस्य हि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः॥ १५॥

श्रीहर्षमिति। अर्द्धं पूर्ववत्। कृशेतरेणातिभूयसा रसेन स्वादावमृतरूपे नलीयचरिते पञ्चाधिकानां दशानां पूरणः पञ्चदशः। स्वादाविति भाषितपुंस्कं॥ ८३॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे पञ्चदशः सर्गः॥ १५॥

षोडशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयतः।

वृतः प्रतस्थे स रथैरथो रथी
गृहान् विदर्भाधिपतेर्धराधिपः।
पुरोधसङ्गौतममात्मवित्तमं
द्विधा पुरस्कृत्य गृहीतमङ्गलः॥ १॥
विभूषणांशुप्रतिबिम्बितैः स्फुटं
स्पृशावदातैः स्वनिवासिभिर्गुणैः।

वृत इति। अथो रथारोहणानन्तरं रथैः कुन्ताः प्रविशन्तीतिवद्रथिभिर्वृतस्तथा रथी प्रशस्तरथोपेतः स धराधिपो नलः विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ। किम्भूतः। आत्मवित्तमं ब्रह्मज्ञानिमध्ये श्रेष्ठं गौतमं गौतमसगोत्रं शतानन्दनामानं पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्याग्रे कृत्वा सम्मान्य च विवाहे कार्यभारं तस्मिन्नारोप्य वा गृहीतानि स्वीकृतानि दध्यक्षतपूर्णकलशादीनि मङ्गलानि येन। रथैः सह वर्तमानैः पुरुषैर्वा प्रतस्थे। समवप्रविभ्यः स्थः (पा० १।३।२२) इति तङ्॥ १॥

विभूषणेति। गृहेषणानां चामरधारिणीनां विधुनीहक

मृगेक्षणानां समुपासि चामरै-
विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥
परार्ध्यवेशाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।

धवलैः तथा विधूयमानैश्चाल्यमानैश्चामरैः स प्रभुर्नलः समुपासि वीज्यते स्म स्फुटमुत्प्रेचे । विभूषणानां रत्नखचितनिजमण्डनानामंशुषु किरणेषु प्रतिविम्बितैः, तथा स्वशावदातैरत्युज्ज्वलैः, स्वस्मिन्निवमन्येवंशीलैः, श्रुतशीलसौन्दर्यादिभिर्गुणैरिव प्रत्यचीभूतैर्नलगुणैरिव चामरैरुपासीत्यर्थः । चामराण्यपि विभूषणांशुप्रतिविम्बितानि । स्फुटं निश्चितं । ईदृशैश्चामरैरेव गुणैरिति वा ॥ २ ॥

परार्ध्येति । निषधावनीभुजि नले परार्ध्यानि श्रेष्ठानि वेशाभरणानि रूपालङ्कारा येषां तैः पुरःसरैः समं सह जिहाने चलति सति वृत्रशात्रव इन्द्रः सुनासीर इति पदस्याभिधेयतां वाच्यतं यदि दधार तर्हि रूढिमात्रं दधार न तु शोभनं नासीरं सेनामुखं यस्येति यौगिकतया । शुद्धवृत्त्या मुख्यया वृत्त्या नले एव दृश्यते न लिन्द्रे । त्रिविधाः शब्दाः केवलयौगिकाः केवलरूढाः योगरूढिकाश्च । तत्र पाचकादयो यौगिकाः । तैलपायिकादयो रौढिकाः । आतपत्रादयो यौगरौढिकाः । तदेवं तादृशायेमराभावादिन्द्रस्य सुनासीरपदवाच्यत्वं यद्यस्ति तर्हि रूढिमात्रात् व्युत्पत्त्या तु नल एवोचितमित्यर्थः ।

षोडशः सर्गः ।

श्रीलक्ष्मीनृसिंहौ जयतः ।

वृतः प्रतस्थे स रथैरथो रथी
गृहान् विदर्भाधिपतेर्धराधिपः ।
पुरोधसङ्गौतममात्मवित्तमं
द्विधा पुरस्कृत्य गृहीतमङ्गलः ॥ १ ॥
विभूषणांशुप्रतिबिम्बितैः स्फुटं
भृशावदातैः स्वनिवासिभिर्गुणैः ।

वृत इति । अथो रथारोहणानन्तरं रथैः वृतः प्रशस्तोऽतिवद्रथिभिर्वृतस्तथा रथी प्रशस्तरथोपेतः स धराधिपः नलः विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ । किम्भूतः । आत्मवित्तमं ब्रह्मज्ञानिमध्ये श्रेष्ठं गौतमं गौतमसगोत्रं एतन्नामानं वा पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्याग्रे कृत्वा इन्द्रं च विवाहे कार्यभारं तस्मिन्नारोप्य वा गृहीतानि स्वीकृतानि दध्यक्षतपूर्णकलशादीनि मङ्गलानि येन । रथैः सह वर्तमानैरुपैर्वा प्रतस्थे। समवप्रविभ्यः स्थः (पा० १।३।२२) इति तङ् ॥ १ ॥

विभूषणेति । भूषणानां चामरधारिणीनां विभूषणैरद

स्रगेक्षणानां समुपास्ति चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥
परार्ध्यवेशाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।

धवलैः तथा विधूयमानैश्चाल्यमानैश्चामरैः स प्रभुर्नलः समुपास्ति वीज्यते स्म स्फुटमुत्प्रेक्षे । विभूषणानां रत्नखचितनिजमण्डनानामंशुषु किरणेषु प्रतिबिम्बितैः, तथा स्वभावदातैरत्युज्ज्वलैः, स्वभिन्निवमन्ध्येवंशीलैः, श्रुतशीलसौन्दर्यादिभिर्गुणैरिव प्रत्यक्षीभूतैर्नलगुणैरिव चामरैरुपासीत्यर्थः । चामराण्यपि विभूषणांशुप्रतिबिम्बितानि । स्फुटं निश्चितं । ईदृशैश्चामरैरेव गुणैरिति वा ॥ २ ॥

परार्ध्येति । निषधावनीभुजि नले परार्ध्यानि श्रेष्ठानि वेशाभरणानि रूपालङ्कारा येषां तैः पुरःसरैः समं सह जिहाने चलति सति वृत्रघातव इन्द्रः सुनासीर इति पदस्याभिधेयतां वाच्यत्वं यदि दधार तर्हि रूढिमात्रं दधार न तु शोभनं नासीरं सेनामुखं यस्येति यौगिकतया । शुद्धवृत्त्या मुख्यया वृत्त्या नले एव दृश्यते न तस्मिन्निन्द्रे । त्रिविधाः शब्दाः केवलयौगिकाः केवलरूढाः योगरूढिकाश्च । तत्र पाचकादयो यौगिकाः । तैलपायिकादयो रौढिकाः । आतपत्रादयो योगरौढिकाः । तदेवं तादृशाग्रेसराभावादिन्द्रस्य सुनासीरपदवाच्यत्वं यद्यपि तर्हि रूढ्यैवास्तु व्युत्पत्त्या तु नल एवोचितमित्यर्थः ।

षोडशः सर्गः ।

श्रीलक्ष्मीनृसिंहौ जयतः ।

वृतः प्रतस्थे स रथैरथो रथी
गृहान् विदर्भाधिपतेर्धराधिपः ।
पुरोधसङ्गौतममात्मवित्तमं
द्विधा पुरस्कृत्य गृहीतमङ्गलः ॥ १ ॥
विभूषणांशुप्रतिबिम्बितैः स्फुटं
स्मृगावदातैः स्वनिवासिभिर्गुणैः ।

वृत इति । अथो रथारोहणानन्तरं रथैः कुन्ताः प्रविशन्तीतिवल्लक्षणया रथिभिर्वृतस्तथा रथी प्रशस्तरथोपेतः स धराधिपो नलः विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ । किम्भूतः । आत्मवित्तमं ब्रह्मज्ञानिमध्ये श्रेष्ठं गौतमं गौतमसगोत्रं एतन्नामानं वा पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्याग्रे कृत्वा सम्पूज्य च विवाहे कार्यभारं तस्मिन्नारोप्य वा गृहीतानि स्वीकृतानि दध्यक्षतपूर्णकलशादीनि मङ्गलानि येन । रथैः सह वर्त्तमानैः पुरुषैर्वा प्रतस्थे। समवप्रविभ्यः स्थः (पा॰ १।३।२२) इति तङ् ॥ १ ॥

विभूषणेति । मृगेक्षणानां चामरधारिणीनां विधुसमैश्चन्द्र-

मृगेक्षणानां समुपास्ति चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥
परार्ध्यवेशाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।

धवलैः तथा विधूयमानैश्चाल्यमानैश्चामरैः स प्रभुर्नलः समुपास्ति वीज्यते स्म स्फुटमुत्प्रेक्षे । विभूषणानां रत्नखचितनिजमण्डनानामंशुषु किरणेषु प्रतिबिम्बितैः, तथा भृशावदातैरत्युज्ज्वलैः, स्वस्मिन्निवसन्त्येवंशीलैः, श्रुतशीलसौन्दर्यादिभिर्गुणैरिव सत्यचोभृतैर्नलगुणैरिव चामरैरुपासीत्यर्थः । चामराण्यपि विभूषणांशुप्रतिबिम्बितानि । स्फुटं निश्चितं । ईदृशैश्चामरैरेव गुणैरिति वा ॥ २ ॥

परार्ध्येति । निषधावनीभुजि नले परार्ध्यानि श्रेष्ठानि वेशाभरणानि रूपालङ्कारा येषां तैः पुरःसरैः समं सह जिहाने चलति सति वृत्रशत्रुरिन्द्रः सुनासीर इति पदस्याभिधेयतां वाच्यत्वं यदि दधार तर्हि रूढिमात्रं दधार न तु शोभनं नासीरं सेनामुखं यस्येति यौगिकतया । शुद्धवृत्त्या मुख्यया वृत्त्या नले एव दृश्यते न लिङ्गे । त्रिविधाः शब्दाः केवलयौगिकाः केवलरूढाः योगरूढिकाश्च । तत्र पाचकादयो यौगिकाः । तैलपायिकादयो रौढिकाः । आतपत्रादयो यौगरौढिकाः । तदेवं तादृशशोभनसराभावादिन्द्रस्य सुनासीरपदवाच्यत्वं यद्यस्ति तर्हि रूढ्यैवास्तु व्युत्पत्त्या तु नल एवोचितमित्यर्थः ।

दधे सुनासीरपदाभिधेयतां
स रूढिमात्राद्यदि वृत्रशात्रवः ॥ ३ ॥
नलस्य नासीरसृजां महीभुजां
किरीटरत्नैः पुनरुक्तदीपया ।
अदीपि रात्रौ वरयात्रया तया
चमूरजोमिश्रतमिस्रसम्पदा ॥ ४ ॥
विदर्भराजः क्षितिपाननुक्षणं
प्रभुक्षणासन्नतरत्वसत्वरः ।

इन्द्रादप्यधिको नलः । तत्पुरःसरास्चेन्द्रपुरःसरदेवेभ्योऽप्यधिका इति भावः । परार्द्धे भवानि परार्द्ध्यानि परावराधमोत्तमपूर्वाच्चेति (पा० ४।३।५) यत् । शत्रुरेव शात्रवः प्रज्ञादित्वात् स्वार्थेऽण् । वृद्धःश्रवाः सुनासीर इत्यमरः ॥ ३ ॥

नलस्येति । तया भैमीवरस्य नलस्य यात्रया रात्रौ अदीपि शुशुभे । किम्भूतया । नलस्य नासीरसृजां सेनायामग्रेसरीभूतानां महीभुजां राज्ञां किरीटरत्नैः स्वेनैवान्धकारनिराकरणात् पुनरुक्ता व्यर्थीकृता दीपा यस्यां तया । तथा चमूरजोभिर्मिश्रा सङ्कुला तमिस्रसम्पत्तिभिरसङ्गो यया । महान्धकारेऽपि रत्नदीपप्रकाशैर्भूयिष्ठप्रकाशत्वाददीपीत्यर्थः । महान्धकारे एव हि वीप्यः शोभन्त इत्यर्थः । राज्ञां सेनामुखायवर्त्तित्वेन नलस्य चक्रवर्त्तित्वं सूचितं । अदीपि । भावे लः ॥ ४ ॥

विदर्भेति । विदर्भराजो यान् क्षितिपानेव दूतान् अनुक्षणं

दिदेश दूतान् पथि यान् यथोत्तरं
चमूसमुष्योपचिकाय तच्चयः ॥ ५ ॥
हरिद्विपद्वीपिभिरंशुकैर्नभो
नभस्वदाध्मापनपीनितैरभूत् ।

वारंवारं नलाकारणार्थं दिदेश प्राहिणोत् । तेषाञ्च यः पूर्व्व-मेकः प्रेषितस्तदनन्तरञ्चान्यः । एवमुत्तरोत्तरमनतिक्रम्य पथि अमुष्य नलस्य चमूमुपचिकाय भूयसीमकृत । किम्भूतः । शुभस्य क्षणस्य लग्नस्य समयस्यासन्नतरत्वेन नैकट्येन सत्वरो वेगवान् । भूयांसो नृपाः प्रेषिताः । दूता इत्यनेनादरातिशयः सूचितः ॥ ५ ॥

हरीति । तरस्वतां वेगवतां अश्वानां ध्वजिनी सेना, तर-स्वन्तो ऽश्वा यस्यां सा वा, तस्य ध्वजभूतैरंशुकैर्वस्त्रनिर्मितै-स्तथा नभस्वता वायुना कृतं यदाध्मापनं परिपूरणं तेन पीनितैः पुष्टीकृतैः सजीवसिंहादितुल्यैर्हरिभिः सिंहैर्द्विपैर्हस्तिभिर्द्वी-पिभिर्व्याघ्रैः कृत्वा तत्सेनाया उपरितनं नभश्चाकाशं वनं विपि-नतुल्यमभूत् अजनि । किम्भूतं वनं । विचित्राणि नानावर्णानि चीनदेशोत्पन्नानि सूक्ष्माणि ध्वजसम्बन्धीनि चाम्बराणि वस्त्रा-णि तान्येव वल्लयो लतास्ताभिर्वेल्लितं वेष्टितं । वने सिंहाद्यो वृक्षा लताश्च सन्ति । ध्वजपदेन वृक्षा अपि लक्ष्यन्ते । तर-स्विनो ऽश्वा यस्य नलस्य तरस्वदश्वा वा या ध्वजिनी प्रकृत-त्वात्तस्यैव सा ध्वजिनी नभसि नभस्वदाध्मापनपीनितैरंशुकै-

तरङ्गदश्वध्वजिनीध्वजैर्वनं
विचित्रचीनाम्बरवल्लिवेल्लितम्॥ ६ ॥
भुवाऽऽह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।
ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७॥

ध्वजैः पताकाभिः कृत्वा वनमभूत्। किम्भूता। ध्वजिनी हरिभिरश्वैर्हस्तिभिर्दीपिभिर्वा द्वीपान्तरवासिभिः सेनाचरीभूतैराजभिरुपलक्षिता। वनमपि सिंहादिभिरुपलक्षितं। विचित्रेति पूर्ववदिति वा। वनपक्षे वनो मृगविशेषः। ऊर्द्धं विसृतत्वादम्बरगामिन्यो वल्लयः॥ ६॥

भुवेति। ततः प्रस्थानानन्तरं स महीपतिर्नलस्तस्य भीमस्य प्रतीहारभूमिं भीमजन्मनो भैम्या दूतीमिव ददर्श। किम्भूतां। द्वारे निबद्धा गजानामालिः पङ्क्तिस्तस्याः कर्णानिलेन कृत्वा खेलति चलतीति खेला तया निजया स्वीयया पुष्पदलरचितया तोरणस्रजा तल्लक्षणया भुवा अनुरागातिशयोत्सुकतया आह्वयन्तीं शीघ्रमागच्छेति भ्रूसंज्ञया आकारयन्तीं। दूत्यपि चलन्त्या भुवाह्वयति। राजगृहद्वारदर्शनेनातिमलरोऽभूदिति भावः। स्त्री द्वार्द्वारं प्रतीहार इत्यमरः। पचाद्यच्। प्रतीहारः। उपसर्गस्य घञीति (पा० ६।३।१२२) दीर्घः॥ ७॥

श्लथैर्दलैस्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा।
प्रिया सखीवास्य मनस्थितिस्फुरत्-
सुखागतप्रश्नितहृर्यनिस्वना ॥ ८ ॥

श्लथैरिति। सा द्वारभूमिः रम्भयोः कदल्योर्द्वारमण्डनार्थं मङ्गलार्थञ्च रोपितस्तम्भयुगस्य छेदवशाद्वायुवशाद्वा श्लथैः शिथिलैर्दलैः पत्रैः कृत्वा लम्बमानचण्डातकसञ्ज्ञेन वस्त्रेण मण्डिता भूषितास्य नलस्य प्रियाया भैम्याः सखीव चकास्ति स्म। किम्भूता सा। अनुरागवशान्मनसि अन्तःकरणे या नलस्य स्थितिस्तया स्फुरन् सदा चित्तनिवासेनोल्लसन् यः सुखेनागतस्यागमनस्य सम्बन्धी प्रश्नः सुखेनागत इत्येवंरूपः प्रश्नः स कृतः प्रश्नितः सुखागतप्रश्नतां प्रापितस्तूर्यनिस्वनो यया सा। चिरप्रोषिते हि नायके समागच्छति सति प्रेयस्यां त्रपया तूष्णीं स्थितायां चण्डातकमण्डिता तत्सखी सुखागतप्रश्नं करोतीति स्थितिः। अत्र दलानि चण्डातकस्थाने। तूर्यनिस्वनाश्च सुखागतप्रश्नस्थाने। कदलीस्तम्भौ ऊरुस्थानीयौ। अर्द्धोरुकं वरस्त्रीणां यच्चण्डातकमंशुकमित्यमरः। नृपाय सुक्तं पुरः पश्चाच्च प्रलम्बि वर्त्तुलभागद्वयं। कदलीसदृशं वस्त्रं नर्त्तकीभिरन्तःपरिधीयमानं चण्डातकं। प्रश्नितेति। तत्करोतीति णिजन्तान्निष्ठा न तारकादिः ॥ ८ ॥

तरङ्गदश्वध्वजिनीध्वजैर्वनं
विचित्रचीनाम्बरवल्लिवेल्लितम् ॥ ६ ॥
भुवाऽऽह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।
ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥

ध्वजैः पताकाभिः कृत्वा वनमभूत्। किंभूता। ध्वजिनी हरिभिरश्वैर्हस्तिभिर्द्वीपिभिर्वा द्वीपान्तरवासिभिः सेनाचरीभूतैराजभिरुपलक्षिता। वनमपि सिंहादिभिरुपलक्षितं। विचित्रेति पूर्ववदिति वा। वनपक्षे चीनो मृगविशेषः। ऊर्द्धं विसृतत्वादम्बरगामिन्यो वल्लयः ॥ ६ ॥

भुवेति। ततः प्रस्थानानन्तरं स महीपतिर्नलस्तस्य भीमस्य प्रतीहारभूमिं भीमजन्मनो भैम्या दूतीमिव ददर्श। किंभूतां। द्वारे नियद्धा गजास्तेषामालिः पङ्क्तिस्तस्याः कर्णानिलेन कृत्वा खेलन्ति चलतीति खेला तया निजया स्वीयया पुष्पदलरचितया तोरणस्रजा तल्लक्षणया भुवा अनुरागातिशयोत्सुकतया आह्वयन्तीं शीघ्रमागच्छेति भ्रूसंज्ञया आकारयन्तीं। दूत्यपि चलनया भुवाह्वयति। राजगृहद्वारदर्शनेनागामिनलशोऽभूदिति भावः। स्त्री द्वार्द्वारं प्रतीहार इत्यमरः। पचाद्यच्। प्रतीहारः। उपसर्गस्य घञीति (पा० ६।३।१२२) दीर्घः ॥ ७ ॥

श्लथैर्दलैस्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा।
प्रिया सखीवास्य मनस्थितिस्फुरत्-
सुखागतप्रश्नितत्तूर्यनिस्वना ॥ ८ ॥

श्लथैरिति। सा द्वारभूमिः रम्भयोः कदल्योर्द्वारमण्ड-नार्थं शकुनार्थञ्च रोपितस्तम्भयुगस्य छेदवशाद्वायुवशाद्वा श्लथैः शिथिलैर्दलैः पत्रैः कृत्वा लम्बमानचण्डातकसञ्ज्ञेन वस्त्रेण मण्डिता भूषितास्य नलस्य प्रियाया भैम्याः सखीव चकास्ति स्म। किम्भूता सा। अनुरागवशान्मनसि अन्तःकरणे या नलस्य स्थितिस्तया स्फुरन् सदा चित्तनिवासेनोल्लसन् यः सुखेनागतस्यागमनस्य सम्बन्धी प्रश्नः सुखेनागत इत्येवंरूपः प्रश्नः स कृतः प्रश्नितः सुखागतप्रश्नतां प्रापितस्तूर्यनिस्वनो यया सा। चिरप्रोषिते हि नायके समागच्छति सति प्रेयस्यां त्रपया तूष्णीं स्थितायां चण्डातकमण्डिता तत्सखी सुखागतप्रश्नं करोतीति स्थितिः। अत्र दलानि चण्डातकस्थाने। तूर्यनिस्वनाश्च सुखागतप्रश्नस्थाने। कदलीस्तम्भौ तूरुस्थानीयौ। अर्द्धोरुकं वरस्त्रीणां यच्चण्डातकमंशुकमित्यमरः। नृपाय मुक्तं पुरः पश्चाच्च प्रलम्बि वर्त्तुलभागद्वयं। कदलीसदृशं वस्त्रं नर्त्तकीभिरन्तःपरिधीयमानं चण्डातकं। प्रश्नितेति। तत्करोतीति ण्यन्तान्निष्ठा न तारकादिः ॥ ८ ॥

विनेष्टभर्तृद्वयभीतिदान्तयोः
परस्परस्मादनवाप्तवैशसः।
अजायत द्वारि नरेन्द्रसेनयोः
समागमः स्फारमुखारवोद्गमः ॥ ९ ॥
निर्दिश्य बन्धूनिति इत्युदीरितं
दमेन गत्वार्द्धपथे कृतार्हणं।
विनीतमाद्वारत एव पद्गतां
गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ १० ॥

विनेत्वेति। नरेन्द्रौ भीमनलौ तयोः सेनयोः समागमो राजगृहद्वारि एवम्भूतोऽजायत जातः। किम्भूतयोः। विनेष्ट शासकं नलभीमलक्षणं भर्तृद्वयं तस्माद्भीतिस्तया दान्तयोः शान्तयोः। ताभ्यां नियमिततादृक्कलहादिसंरम्भयोः अत एव परस्परस्मादन्योन्यस्मादनवाप्तमलब्धं युद्धनिमित्तं वैशसं मारणं येन। सैन्यद्वयमेलने हि कलहो भवति परं सौहार्दान्नियमितत्वादनयोर्नाभूदित्यर्थः। तथा स्फारोऽतिमहान् मुखारवस्यास्फुटवर्णविशेषस्य मुखध्वनेरुद्गम उदयो यत्र ॥ ९ ॥

निर्दिशेति। विदर्भराड् भीमः मुदा उचितो जामातेति हर्षेण तमैक्षिष्ट नलमद्राक्षीत्। किम्भूतं। भीमेनैव सम्मुखं गत्वा बन्धून् सुहृदो भ्रातॄन् वा समातापितृसम्बन्धिनो निर्दिश्याज्ञाप्य सम्प्राप्य दमेन यथा आगम्यतामित्यादिप्रकारैरुदीरितमुक्तं। बन्धुमुखेन ज्ञापितमार्गं तथा दमाख्येन भैमीभ्रात्रा

अथायमुत्थाय विसार्य्य दोर्युगं
मुदा प्रतीयेष तमात्मजन्मनः ।
सुरस्रवन्त्या इव पात्रमागतं
धृताभितोवीचिगतिः सरित्पतिः ॥ ११ ॥
यथावदस्मै पुरुषोत्तमाय तां
स साधुलक्ष्मीं वङ्गवाहिनीश्वरः ।

ऽर्घ्यपथे कृताऽर्हणा ऽर्घ्यादिपूजा यस्मै । तथाऽनुद्भूतवेगत्वादिनीतं । अत एव दारत आद्वारसीमामेवावधीकृत्य रथादुत्तीर्य पद्भ्यां पादचारित्वं गतं प्राप्तं । दर्शनेनैव बन्धून् पुरः प्रसाद्य इत इत्युदीरितमिति वा । आद्वागतः पदद्वयं पद्भ्यां इति, पादस्य पदाऽऽज्यातिगोपहतेष्विति (पा० ६।३।५२) पादस्य पत् ॥ १० ॥

अथेति । अथ नलदर्शनानन्तरं अयं भीम उत्थाय प्रत्युत्थानं कृत्वा आत्मजन्मनो भैम्याः पात्रं योग्यं आगतं तं नलं दोर्युगं विसार्य्य प्रसार्य्य मुदा प्रतीयेष आलिलिङ्ग । कः कमिव । सरित्पतिः सुरस्रवन्त्या भागीरथ्या आगतं पात्रं प्रवाहमिव नौकादिकं वा । किम्भूतः । धृतेऽभितः पार्श्वद्वये वीचीगती तरङ्गपरम्परे येन । वीचिततिरित्यपि पाठः ॥ ११ ॥

यथावदिति । अथालिङ्गनानन्तरं नदीश्वरो राज्ञां पतिर्वङ्गवाहिन्या ईश्वरः स्वामी स भीमः सर्व्वविदे सर्व्वविद्याविज्ञाय शिवाय शुभश्रवणकीर्त्तनायात एव पुरुषोत्तमाय पुरुषश्रेष्ठायास्मै नलाय साधुलक्ष्मीं समीचीनकायकान्तिं अत एव शिवां

शिवामथ स्वस्य शिवाय नन्दिनीं
ददे पतिः सर्व्वविदे महीभृताम्॥ १२॥
अखिलदद्यन्मधुपर्कमर्पितं
स तद्व्यधात्तर्कमुदर्कदर्शिनां।

शुभरूपां तां भैमीं स्वस्य नन्दिनीं कन्यां यथावद्वेदोक्तविधिना ददे। मधुपर्कात् पूर्व्वं कन्यादानमित्याचारः। मधुपर्कादिविधिपूर्व्वं ददे। दातुमारब्धवानिति वा। अथ वक्रनदीश्वरः समुद्रः पुरुषोत्तमाय तां कन्यां लक्ष्मीं यथावदेतत् साधु, तथा पर्व्वतराजो हिमालयः सर्व्वज्ञाय श्रीमहादेवाय स्वपुत्रीं पार्व्वतीं ददे तदपि साधु। यदा मैनाकादिपर्व्वतानां पालयिता समुद्रः शिवरूपाय विष्णवे शुभरूपां लक्ष्मीं ददे तत्साधु। अथ वा वक्रनदीयुक्तो हिमालयः पुरुषोत्तमरूपाय श्रीहराय पार्व्वतीरूपां लक्ष्मीं लक्ष्मीरूपां पार्व्वतीमिति वा। नलाय पुरुषोत्तमायेव शिवायेव भैमीं लक्ष्मीमिव शिवामिव भीमः समुद्र इव हिमवानिवेत्युपमालङ्कारो व्यज्यते। साधुलक्ष्मीमित्यत्र समासान्तविधेरनित्यत्वात् कवभावः॥ १२॥

इदानीं विवाहविधिमाह अखिलददिति। स नलः अर्पितं भीमेन दत्तं मद्यमिश्रितं कांस्यपात्रस्थं दधिमधुघृतरूपं मधुपर्कं यदखिदत् आस्वादितवान् तदास्वादनं उदर्कदर्शिनां विपाकोत्तरफलपरिपाकभूताधरचुम्बनादिविचारिणां लोकानां इति तर्कं ऊहं व्यधात् चक्रे। इति किं। यद्यस्मादेव नलो भीम-

यदेष पास्यन्मधु भीमजाधरं
मिषेण पुण्याहविधिं तदा कृतं ॥ १३ ॥
वरस्य पाणिः परघातकौतुकी
वधूकरः पङ्कजकान्तितस्करः ।

जाधररूपं मधु पास्यन् पास्यति तस्मात् तदा मधुपर्कदानावसरे मधुपर्कास्वादनमिषेण पुण्याहविधिं शुभनचत्रादियुक्तपुण्यदिनकृत्यं मङ्गलपूर्व्वमुपक्रममकृत । अन्योऽपि शुभकार्य्यं करिष्यन् शुभविवाहदिनादौ तदीयमारम्भं करोति । तथा तेनापि भैम्यधरपाने मुहूर्त्तश्चक्र इति जनेन तर्कितमित्यर्थः । अधरस्यापि स्वादुत्वमुक्तम् । अषिस्वददिति । चौरादित्वात् स्वदेश्चङ् । ये तमपि षोपदेशं मन्यन्ते तैः षत्वाभावश्चिन्त्यः । अषिस्वददिति पाठाभावादर्थस्य दुर्योज्यत्वाच्च चौरादिक एव । पास्यन् । लृटः सदिति (पा० ३।३।१४) शता । पुण्यञ्च तदहश्चेति, राजाह इति(पा० ५।४।९१) टचि पुण्यसुदिनाभ्यामह्नःक्लीवतेति पुण्याहं तत्र विधिरिति विग्रहः ॥ १३ ॥

वरस्येति । वरस्य पाणिः परघातकौतुकी शत्रुमारणकुतूहली, वधूकरः पङ्कजकान्तितस्करः कमलश्रीचौरो यस्मात्तस्मात् कारणात् किमु सुराज्ञि राजन्वति तत्र तस्मिन्विदर्भमण्डले विदर्भराज्ये तौ वरवधूकरौ कर्कशैः कुशैः नितरां बद्धौ उभयहस्तयोः कुशबन्धनपूर्व्वकं पाणिग्रहणमभूत् । तत्र कुशबन्धने कारणोत्प्रेक्षा क्रियते । एको हिंस्रोऽपरश्चौर इति सापराधत्वात्

सुराज्ञि तौ तत्र विदर्भमण्डले
ततो निबद्धौ किमु कर्कशैः कुशैः ॥ १४ ॥
विदर्भजायाः करवारिजेन यन्-
नलस्य पाणेरुपरि स्थितं किल।
विशङ्क्य सूत्रं पुरुषायितस्य तद्
भविष्यतोऽस्मायि तदा तदालिभिः ॥ १५ ॥

किमु बद्धावित्यर्थः। अन्यत्रापि सैराज्ये अन्यघातकतस्करौ कठिनतरदोरकैर्बध्यते। पाणिग्रहणं जातमिति भावः। कुशैः पाणिबन्धनमान्ध्रदेशाचारः, यथाक्रमं करयोः शौर्यं मार्दवञ्च सूचितं। सुराज्ञि। राजाहःसखिभ्यष्टच् (पा०५।४।९१) इत्यस्य नियततत्पुरुषविषयत्वादत्र बहुब्रीहिविषयत्वाट्टचः प्राप्त्यभावः ॥ १४ ॥

विदर्भेति। विदर्भजायाः करवारिजेन यत् तदा पाणिग्रहणसमये नलस्य पाणेरुपरि स्थितं तदुपरिस्थानं किल निश्चितं विपरीतरतेर्भविष्यतः पुरुषायितस्य पुरुषवदाचरितस्य विपरीतरतस्य इति यावत् सूत्रं सूचनाकारि विशङ्क्य विशेषेण सम्भाव्य कौतुकविलोकनार्थं निकटस्थिताभिस्तदालिभिरस्मायि ईषद्धसितं। विपरीतरते हि स्त्रीपाणिरुपरि भवति विवाहे वधूकरो वरकरस्योपरि भवति। सूत्रञ्च सूचनाग्रन्थ इति विश्वः ॥ १५ ॥

सखा यदस्मै किल भीमसंज्ञया
स यक्षसख्याधिगतं ददौ भवः।
ददे तदेष श्वशुरः सुरोचितं
नलाय चिन्तामणिदाम कामदं॥ १६॥
वराटदुरापस्य वराय वस्तुन-
श्चितस्य दातुं प्रतिबिम्बकैतवात्।
बभौ तरामन्तरवस्थितं दधद्
यदर्थमभ्यर्थितदेयमर्थिने॥ १७॥

इदानीमित आरभ्य न तेन वाहेष्विति यावद्विवाहोचितं यौतुकं प्रतिपादयति। सखेति। भीमसंज्ञया भीम इति नाममात्रेण सखा स्वस्यापि भीमनामत्वात् किलोत्प्रेक्षायां स भवो महेश्वरः अस्मै भीमाय यक्षेण कुबेरेण सह यत्सख्यं मैत्री तेनाधिगतं प्राप्तं यच्चिन्तामणीनां दाम मालां ददौ, एष श्वशुरो भीमः तत्कामदं सकलाभिलषितदायि सुराणामुचितं चिन्तामणिदाम नलाय ददे। उत्प्रेक्षायामेव तात्पर्यं। सुतोचितमिति पाठे स्पष्टम्॥ १६॥

तदेव वर्णयति। वराटेरिति। यच्चिन्तामणिदाम बभौतरां। किम्भूतं। वराटेरपरिमितस्य तस्य तथा दुरापस्य दुर्लभस्य दिव्यस्य वराय जामात्रे दातुं चितस्य पुरः पुञ्जीकृतस्य रत्नहेमवसनादेर्वस्तुनः पदार्थसमूहस्य स्वस्मिन् प्रतिबिम्बस्य कैतवाद्व्याजात् अन्तरवस्थितं स्वस्य मध्ये स्थितमर्थिने याचकायाभ्यर्थितं प्रार्थितं

असिं भवान्याः क्षतकासरासुरं
वराय भीमः स्म ददाति भासुरम्।
ददे हि तस्मै धवनामधारिणे
स शम्भुसम्भोगनिमग्नयाऽनया ॥ १८ ॥

सत् तदानीमेव दातुमर्हं अर्थं वस्तुजातं दधत् धारयदिव। ददाविति पूर्वेण सम्बन्धः। यदा यद्यो यावद्याचिष्यते तदा तदस्तु तस्मै दातव्यमिति बुद्ध्यास्य नाम सार्थकीकर्तुं वस्तुजातं पुरःस्थापितमेवेत्यर्थः। वद्योरिति भाषितपुंस्कं ॥ १७ ॥

असिमिति। भीमः क्षतः कासराख्यो महिषाख्यो ऽसुरो येन तं भासुरं देदीप्यमानं भवान्या दुर्गाया असिं खड्गं वराय ददाति स्म। तस्याः खड्गस्तेन कथं प्राप्त इत्यत आह। हि यस्मात् स्फुटं वा शम्भुना सह सम्भोगस्तत्र निमग्नया सुरतरसासक्तया ऽनया दुर्गया वैरिदलनानन्तरं स्वस्याः प्रयोजनाभावात् सुरतासक्तत्वे खड्गधारणस्य रसभङ्गकत्वाच्च धवनामधारिणे भीम इति शिवनामधारकाय शम्भुसेवकाय तस्मै भीमाय ददे। शम्भौ सम्यगविच्छेदेन निरन्तरं भोगाय निमग्नया दक्षिणार्द्धेन प्रविष्टया वा तदस्तु तया प्रसादो दत्तः। लुलायो महिषो वाहद्विषत्कासरसैरभा इत्यमरः। भासुरं। भञ्जभासेति (पा॰ ३।२।१६१) घुरच् ॥ १८ ॥

अधारि यः प्राङ्महिषासुरद्विषा
कृपाणमस्मै तमदत्त कुकुदः ।
अदापि तस्या हि धवार्द्धसञ्जिना
स दक्षिणार्द्धेन पराङ्गदारणः ॥ १८ ॥
उवाह यः सान्द्रतराङ्गकाननः
स्वशौर्य्यसूर्य्योदयपर्व्वतव्रतम् ।

अधारीति। महिषासुरद्विषा दुर्गया प्राक् यः खड्गो ऽधारि, कुकुदः कन्यादाता भीमः तं कृपाणं खड्गं सत्कारपूर्व्वं सालङ्कारमस्मा अदत्त। कथं तेन लब्ध इत्याशङ्क्याह। हि यस्माद-र्धनारीश्वरत्वाद् धवस्य भर्त्तुः शिवस्य अर्द्धसञ्जिना अर्द्धप्रविष्टेन तस्याः पार्व्वत्या दक्षिणार्द्धेन दक्षिणशरीरभागेन पराङ्गदारणः स खड्गः अदायि त्यक्तः। मखड्गेन धववामार्द्धं विगता यदीयदक्षिणार्द्धेन तद्विदारिष्यते इति भिया त्यक्तः। अदायीति पाठे ऽनर्थो न। तस्या दक्षिणार्द्धेन तस्मै यस्माददायी-त्यर्थः। अयं पाठः साधीयान्। सत्कृत्यालङ्कृतां कन्यां यो ददाति स कुकुद इत्यमरः॥ १८ ॥

उवाहेति। यः स्वस्य भीमस्य खड्गस्यैव वा शौर्य्यं प्रतापरूपो यः सूर्य्यस्तस्योदयस्तत्सम्बन्धी पर्व्वत उदयाचलस्तस्य व्रतं नियमं सदा सूर्य्योदयकारित्वलक्षणं उवाहाधत्त। किम्भूतः। सान्द्रतराणि अन्यानि सूक्ष्माणि अङ्कानि अङ्गानि मुद्रामुद्गरपक्षीवसीरूपाणि तेषां अननं जीवनं यत्र दधार इति

सनिर्झरः शाणनधौतधारया
समूढसन्ध्यः क्षतशत्रुजासृजा ॥ २० ॥
यमेन जिह्वा प्रहितेव या निजा
तमात्मजां याचितुमर्थिना स्वयम्।

यावत्। सान्द्रतराणां वा पूर्वोक्तानामेवाङ्गानां काननं समूहो यत्र। उदयाचलपक्षे सान्द्रतराणि अङ्गेषु ऊर्ध्वाधोभागेषु वनानि यस्य। तथा शाणनेन लोहकारचक्रघर्षणेन धौतया उज्ज्वलीकरणेन दत्तपानीयधारया कृत्वा सनिर्झरः सप्रवाहः। धारैव निर्झरीभूतेत्यर्थः। उदयाचलोऽपि सनिर्झरो भवति। तथा क्षतेभ्यः खण्डितेभ्यः शत्रुभ्यो जातेनासृजा रक्तेन कृत्वा सम्यक् ऊढा धृता प्रातःसन्ध्या येन। प्रातःसन्ध्यास्थाने रक्तमेव येन धृतमित्यर्थः। सम्यग्धृता सन्ध्यात् सरूपः फलकसन्धिर्येन अतिदृढसन्धिरित्यर्थ इति वा। यद्वा क्षतशत्रुजासृजा समूढः प्राप्तः सन्धिर्यस्य त्सरुफलकसन्धिपर्यन्तं शत्रुशरीरे निमग्न इत्यर्थः। उदयाचलोऽप्यूढप्रातःसन्ध्य उदयाचलतुल्योऽभूदित्यर्थः। तमधत्तेति पूर्वेण सम्बन्धः। अङ्ककेतिपक्षे, अल्पे (पा० ५।३।८५) इति कः॥ २०॥

यमेनेति। स भीमः तामसिपुत्रिकां छुरिकामपि असौ ददे न केवलं खड्ग इत्यपरार्थः। न केवलं पुत्रीमपि तु छुरिकामपि। तां कां। स्वयमर्थिना शैन्द्यनुरागिणा यमेन तं भीमं भैमीं मह्यं देहीति आत्मजां याचितुं दूतीप्रेषणावसरे निजा स्वीया

स तां ददेऽस्मै परिवारशोभिनीं
करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥
यदङ्गभूमौ बभतुः स्वयोपिता-
मुरोजपत्त्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायिताव्रते
गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

असिता मेचिता या जिह्वेव । नियतं प्राणहारित्वाद्यमजिह्वा-तुल्या अतितीक्ष्णा शौर्येण तुष्टो यमो यां भीमाय दत्तवान् । किम्भूतां । परिवारशालिनीं चर्मकोशेन शोभमानां । अथ सखी-लक्षणपरिजनशोभिनीं । करग्रहार्हां हस्तग्रहणयोग्यां साधुमुष्टि-देशां । पूर्वं यद्यपि भैमी दत्ता तथापि परिवारसाहित्येने-दानीं दत्तेत्यर्थः । छुरिकां सखीञ्च यौतकत्वेन ददाविति भावः । छुरिका चासिपुत्रिकेत्यमरः । याचिर्द्विकर्मा ॥ २१ ॥

यदिति । यस्याः शस्त्र्या अङ्गभूमौ पट्टिकाया ऊर्द्धाधोदेशौ स्वयोपितां स्वस्य स्त्रीणां उरोजपत्त्रावलिः कस्तूरिकालिखित-स्तनपत्त्रवल्ली नेत्रकज्जलञ्च एते इव बभतुः शुशुभाते । किम्भूते । रणस्थले या स्थण्डिलशायिता व्रतवशाद्यो वेदिकायां शेते स स्थण्डिशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वी-कृतनियमविशेषेण भूपतिभिः शत्रुभिः दक्षिणीकृते व्रताङ्गदक्षि-णात्वेन शस्त्रे दत्ते । दीक्षायदेशिने हि स्त्रीणां रम्यमलङ्कारादि दक्षिणात्वेन दीयते छुरिकयैवं स्वकृतमारणद्वारा शत्रूणां रण-

पुरैव तस्मिन् समदेशि तत्सुता-
भिकेन यः सौहृदनाटिनाग्निना।
नलाय विश्राणयति स्म तं रथं
नृपः सुलंघ्याद्रिसमुद्रकापथं॥ २३॥

स्थलस्थण्डिलशायिताव्रतमुपदिष्टं तस्मात्तस्यैते दक्षिणालेन दत्ते पत्रावलीनेत्रकज्जले इव। लोहमुद्गरश्यामवर्णैः स्तनपत्रावलीनेत्रकज्जललेनोत्प्रेक्षितैः इयं कुक्षिका निश्चितपरविदारणा वैरिनार्यस्य वैधव्यात्त्यक्तकज्जलपत्रावल्य इति। स्थण्डिलशायीति। स्थण्डिलाच्छयितरि व्रते (पा॰ ४।२।१५) इत्यण्॥ २२॥

पुरेति। तस्य भीमस्य सुतायां अभिकेनानुरागिणा यथा भैमी दातव्येति बुद्ध्यार्थं न प्रेषितः किन्तु शत्रुभराक्रान्तभूभारनिराकरणद्वारा त्वमस्माकं सुहृदिति प्रेषित इति सौहार्दस्नेहं नाटयति, एवंशीलेनाग्निना पुरैव दूतीप्रेषणावसर एव यो रथः तस्मिन् भीमे समदेशि प्रेषितो दत्तः, नृपो नलाय तं रथं विश्राणयति स्म ददौ। किम्भूतं। सुलंघ्या अनायासेनातिक्रमणीया अद्रयः अत्युच्चपर्व्वताः समुद्राः कापथा विषमनिम्नगर्त्तादिरूपा मार्गाश्च यस्य। सर्व्वत्र सञ्चरणसमर्थं। कद्ध्वा कापथः समा इत्यमरः। कापथ इति। कापथ्यक्षयोरिति (पा॰ ६।३।१०४) कादेशः। ऋगादिना (पा॰ ५।४।७४) समासान्तोऽप्॥ २३॥

प्रहतवत्ता नलकूवरान्वय-
प्रकाशितास्यापि महारथस्य यत् ।

तमेव वर्णयति । प्रहतेति । अस्यापि भीमेन नलाय दत्तस्यापि महतो जवादिगुणयुक्तस्य रथस्य प्रकृष्टा सूतवत्ता सूतो विद्यते यस्य स सूतवान् तद्भावः सूतवत्ता सारथिमत्ता, प्रकृष्टस्वामी सूतस्य तदत्ता वा, यस्मान्नलस्य कूवरेण युगन्धरेण सहयोऽन्वयः सम्बन्धः, नलेन सह वा यः कूवरस्यान्वयः, तेन प्रकाशिता प्रकटीकृता शोभिता च, तत्तस्माद्धेतोरेतस्य रथस्य पुष्पकवत्कामगामि धनदविमानवत् प्रकृष्टता उत्कृष्टगुणयुक्तता पुष्पकात् सकाशादा जवादिगुणैरधिकत्वात् कुवेरस्य दृष्टान्त उदाहरणं तस्य बलेन तत्सामर्थ्येनानुमीयते अनुमानजन्यज्ञानस्य विषयीक्रियते। न केवलं कुवेरस्य महारथस्य किन्त्वस्यापीति समुच्चयेन व्याप्तिदर्शनपुरःसरं उपनयन्निगमे सूचयत्यपिशब्दः । कुवेरस्यापि महारथस्यायुतसंख्यायुधसंयुक्तपुष्पकविमानेन कृत्वा प्रकृष्टता प्रकृष्टवस्तुमत्ता प्रकृष्टेन कृता तेनोह्यमानता वा भवति। एवं कुवेरदृष्टान्तबलेनाग्रे एतस्य पुष्पकप्रकृष्टता भविष्यतीत्यनुमीयते । यतोऽस्यापि कुवेरस्य नलकूवराख्येनान्वयेन सन्तानेन पुत्रेण प्रकाशिता प्रकटिता शोभिता प्रसूतवत्ता जनयितृता इति साधर्म्यदृष्टान्तः । श्लेषबलेनानुमानन्त्वेवं। विमतो महारथः पुष्पकः प्रकृष्टो भवितुमर्हति नलकूवरान्वयप्रकाशितप्रसूतवत्त्वात्। यो यो नलकूवरान्वयप्रकाशितप्रसूतवत्तावान् स पुष्पकः प्रकृष्टः । तथा कुवेर इत्यनुमानवशादेतत् सर्व्वमुच्यत

कुवेरदृष्टान्तवलेन पुष्पक-
प्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥
महेन्द्रमुच्चैःश्रवसा प्रतार्य्य य-
न्निजेन पत्या हृतसिन्धुरन्वितम्।
स तद्ददेऽस्मै हयरत्नमर्पितं
पुरानुबद्धुं वरुणेन बन्धुताम् ॥ २५ ॥
जवादवारीकृतदूरदृक्पथ-
स्तथाक्षियुग्माय ददे मुदं नयः।

इति यथा कथञ्चित् श्लोको व्याख्येयः। किन्तु प्रकृष्टः सुतः पुत्र इति वा। पुष्पकस्य नलः सारथिर्नास्ति तेन तत्तुल्यता नास्ति। किन्तु तत्पतिना कुवेरेणेति, अस्य तु नलः सारथिरित्ययं रथो रमणीय इति भावः। कुवेरस्तु युगन्धर इत्यमरः ॥ २४ ॥

महेन्द्रमिति। सिन्धुः समुद्रो नाम्ना उच्चैःश्रवसा अथ चो-न्नतकर्णेन मलहरणेनाय च दीर्घकर्णेन दुर्लङ्घणेनाश्वेन महेन्द्रं प्रतार्य्य यद्धयरत्नं निजेन पत्या स्वस्वामिना वरुणेन अन्वितं युक्तमहृत वरुणायादत्तेत्यर्थः। स भीमस्तद्धयरत्नं अस्मै नलाय ददे। अनेन कथं तत्सम्बन्धमित्यत आह। किम्भूतं। वरुणेन बन्धुताम-मोकगेर्च्चो अनुबद्धुं वर्द्धयितुं पुरा दूतीप्रेषणावसरे ऽर्पितं भी-माय दत्तं। उच्चैःश्रवसोऽप्यधिकमश्वं तस्मै ददाविति भावः॥२५॥

जवादिति। योऽश्वो लोकानामक्षियुग्माय नेत्रयुग्माय दिदृक्षायाः स्वीयरूपदर्शनेच्छाया आदरस्याद्य दानतां दासत्वं

ददद्दिदृचादरदासतां यथा
तथैव तत्पांशुलकण्ठनालताम् ॥ २६ ॥

ददानः पारवश्यं कुर्व्वन् जवाद्धेतोः अवारीकृतः अर्व्वाक्तिरोकृतो दूरो बहुयोजनो दृक्पथो नेत्रपथो येन दूरं गतत्वान्नेत्रयोरविषयः सन् यथा नेत्रयुग्माय मुदं प्रीतिं न ददे, दर्शनाभावात्प्रीतिं नोत्पादितवानित्यर्थः, तथा पुनरागमनसमयेऽपि तथैव दिदृचादरदासतया तस्य नेत्रयुगस्य पांशुलं रेणुयुक्तं कण्ठनालं यस्य तस्य भावस्तत्ता तां लचणयोत्कण्ठितत्वं ददन्मुदं न ददे। तमश्वं दद इति पूर्व्वेण सम्बन्धः। यथातथाशब्दौ व्यत्यस्तौ योज्यौ। रूपादिविलोकनकौतुकिभिर्यावदस्यो द्रष्टुमारब्धस्तावद्वेगवशाद् दूरं गतत्वान्न दृष्टः। इदानीं यद्यपि न दृष्टस्तथापि व्याघुट्यागमनेऽवश्यं द्रच्याम इति बुद्धा व्यापारान्तरपरित्यागपुरःसरं तद्रूपादिविशेषदर्शनादरान्नेत्रे प्रसार्य्य तत्रैव यावत् स्थितास्तावत् पुनरागमनसमयेऽपि खुरपुटहतचोणीरेणुसम्बन्धान्न दृष्टः।तथा चोभयथापि दर्शनाभावादुत्कण्ठाया अपरिपूर्णत्वान्नेत्रयुगस्य हर्षो नाभूदित्यर्थः।अतिजवनोऽश्व इति भावः। जवादप्रतिषिद्धो दूरो दृक्पथो येनातिदूरं नेत्राभ्यामनुगतमार्ग इति यावदेवंभूतो योऽचियुगाय दर्शनहर्षं तथाऽनादृत्य यथा दिदृचादरदासतां ददानः संस्तथैव तस्य नेत्रयुगस्य द्रष्टुर्वा शुष्ककण्ठत्वं ददे। निरन्तरदर्शनाभावात्तादृशी प्रीतिर्न जाता, किन्तु पूर्व्वोक्तप्रकारेण नेत्रयोर्द्रष्टुर्वा भूरेणुसम्बन्धात् शुष्ककण्ठ-

युग्मम्

दिवस्पतेरादरदर्शिनादरा-
द्ढौकि यस्तम्प्रति विश्वकर्म्मणा ।

त्वमेव जातमित्यर्थः । द्रष्टव्यदर्शनाद्धि दृश्यमार्गस्य प्रतिषेधो भवति अत्र तु वेगातिशयाद्दर्शनाभावात् प्रतिषेधस्तस्येति वा । अथ च जलरहितः कृतो दूरो दृष्टिगोचरो यो मार्गः स पिपासोर्नेत्रयुगाय हर्षं ददाति किन्तु जलावलोकने पारवश्यं तथापि पिपासोः शुष्ककण्ठत्वं वेत्युक्तिरिति वा । दाक्षतामिति पाठे दिदृक्षादरस्य दानपात्रं ददावित्यर्थः । दाशृ दाने, दाशृगोघ्नौ सम्प्रदाने इति (पा० ३।४।७४) निपातनाद्दयतेऽस्मै इति दानपात्रं । पारावारे परार्वाचीतीरे पात्रमित्यमरः । पक्षे नास्ति वारि यस्मिन्नसाववारिः । पक्षे वारणं वारः ण्यन्तात् घञ् स नास्त्यस्यासौ । अववारशब्दादवारिशब्दाच्च च्विः ॥ १६ ॥

दिवस्पतेरिति । दिवस्पतेरिन्द्रस्य भैम्यनुरागवशाद्भीमं आदरदर्शिना विश्वकर्मणा यः तं भीमं प्रत्युद्दिश्य आदराद्ढौकि उपदारूपेण प्रेषितः स भीमस्तमेकं महापरिमाणं माणिक्यं तन्मयं तद्रूपं तन्निर्म्मितं वा महोन्नतमत्युच्चं पतत् ग्राहं पतत् गण्डूषजलताम्बूलोद्गारादि गृह्णातीति ग्रहः तं नलेन प्रयोजनेन ग्राहितवान् अङ्गीकारितवान् नलाय ददावित्यर्थः । प्रभोर्थस्यादरः तं तदनुजीविनः स्वस्वशिल्पेन सेवन्त इति लोकरीतिः । पतद्ग्राहः पतद्ग्रह इत्यमरः । दिवस्पतेः । तत्पुरुषे कृतीति (पा० ६।३।१४) षाष्ठमकात् षष्ठ्या अलुकि कस्कादि-

तमेकमाणिक्यमयं महोन्नतं
पतद्ग्रहं ग्राहितवान्नलेन सः ॥ २७ ॥
नलेन ताम्बूलविलासिनोज्झितै-
र्मुखस्य यः पूगकणैर्भृतो न वा।
इति व्यवेचि स्वमयूखमण्डला-
दुदञ्चदुच्चारुणचारुणश्चिरात् ॥ २८ ॥

त्वाद्विसर्जनीयस्य (पा० ८।३।४३) सः। षष्ठ्याः पतिपुत्रेति (पा० ८।३।५३) छन्दोविषयत्वात् लोके गत्यर्थसकर्मकत्वात् कर्मणि णिच्। पतत् गृह्णातीति पतद् ग्रहः। पचाद्यचि (पा० ३।१।१३४) पततो ग्रह इति (पा० ३।३।५८) अप् ॥ २७ ॥

नलेनेति। उदञ्चदुच्चारुणचारुण उदित्वरोन्नतसूर्यवद्वा सुन्दरादतिरक्तात् ऊर्द्ध्वप्रसरत्किरणोऽतिशयितो यः स्वीयो रूपगुणस्तेन चारोर्वा रक्ततरात् स्वमयूखस्य मण्डलात् सङ्घाद्धेतोः ताम्बूलविलासिना ताम्बूलरसमात्रग्राहिणा पूगनागवल्लीदलखण्डत्यागिना नलेन गृहीतरसत्वात् उज्झितैस्त्यक्तैर्माणिक्यशकलसदृशैरुद्गाररूपैः पूगकणैः क्रमुकाल्पशकलैः अयं भृतः पूरितो न वा पूरित इति यः पतद्ग्रहः चिराद्भूयसा कालेन सूक्ष्मेक्षिकया क्रमेण मुक्तसंशयैर्लोकैर्व्यवेचि निश्चितस्तं ग्राहितवानिति पूर्व्वेण सम्बन्धः। समीपं गत्वा सूक्ष्मेक्षिकयाऽयमिदानीं पूगकणैः भृत इति निश्चितः कदाचित् कदाचिच्च इदानीं न भृत इत्यपि निश्चित इत्यर्थः। भृताभृतत्वसन्देहे रक्तमयू-

मयेन भीमं भगवन्तमर्चता
नृपेऽपि पूजा प्रभुनाम्नि या कृता।
अदत्त भीमोऽपि स नैषधाय तां
हरिन्मणेर्भोजनभाजनं महत्॥ २९ ॥
छदे सदैव च्छविमस्य बिभ्रतां
न केकिनां सर्पविषं प्रसर्पति।

खमण्डलं हेतुः। माणिक्यमयत्वादतिरक्त इत्यर्थः। इदानीं ताम्बूलस्थानवर्त्तराङ्गाविन्युपचारे भूतवदित्युपचारः। यद्वा तस्यैवारक्तताञ्जनस्योद्गारत्यागभ्रमः। अमी पूगकणाः किंवा किरणसमूहा इति सन्देहस्थिरानिर्णीत इति वा॥ २८॥

मयेनेति। भगवन्तं षड्गुणैश्वर्य्यसम्पन्नं भीमं शिवमर्घादिभिरुपचारैरर्चता पूजयता शैवेन मयनाम्ना ऽसुरेण प्रभुनाम्नि शिवनामधारके नृपेऽपि भीमेऽपि या पूजा कृता उपदा अकारि स भीमोऽपि तां पूजां पूजारूपहरिन्मणेर्गारुडमणिसम्बन्धि विपापहारसमर्थं अतिविस्तृतं भोजनार्थं भाजनं नैषधायादत्त मयेन तस्मै दत्तं सोऽपि नलायादत्तेति। अपिशब्दः समुच्चयार्थः। अर्थपत्तिर्भावादिकः॥ २९ ॥

छद इति। अस्य भोजनपात्रस्य छविं नीलां द्युतिं सदैव छदेऽपि बिभ्रतां केकिनां मयूराणां सर्पविषं न प्रसर्पति तच्छरीरे नाक्रामतीत्यर्थः। स भगवान् शिवोऽस्य पात्रे एतदाधारणेन कालकूटच्छेदभोग्यम् तदिदं नीलकण्ठत्वं नाधात्स्यत्। अथ

न नीलकण्ठत्वमधास्यदत्र चेत्
स कालकूटं भगवानभोक्ष्यत् ॥ ३० ॥
विरोध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः।
अदत्त तस्मै स मदच्छलात् सदा
यमभ्रमातङ्गतयेव वर्षुकं ॥ ३१ ॥

पात्रे विषभक्षणे कृते सति तज्जीर्णतया नीलकण्ठत्वं न स्यादित्यर्थः। लिङ् निमित्ते लृङ् क्रियातिपत्तौ (पा०३।३।१३९) इति लृङ्। भुजोऽनवन इति (पा०१।३।६६) तङ् ॥ ३० ॥

विरोध्येति। स भीमस्तस्मै नलाय मदच्छलाद् दानजलव्याजात् सदा वर्षुकं वर्षणशीलं यं हस्तिनं अदत्त स दुर्वाससं विरोध्य रोषयित्वा तच्छापादिन्द्रसिन्धुर ऐरावतो दिवः सकाशादस्खलत् पतितः किं। भुवमागत ऐरावणः किमित्यर्थः। विरोधे हेतुः। अस्य दुर्वाससः स्रजं मालां त्यजन् भुवि क्षिपन्। अत्र पौराणिकी कथा। कदाचिदैरावतमारुह्य गच्छते इन्द्राय दुर्वाससा प्रसादेन मन्दारपुष्पमाला दत्ता सा चेन्द्रेण करीन्द्रकुम्भे स्थापिता स तां शुण्डादण्डेनाधश्चिक्षेप ततः कुपितेन मुनिना त्वमपि मालावदधः पतेति शप्तः तन्मूलेयमुत्प्रेक्षा। वर्षुकत्वे पुनरुत्प्रेक्षते। अभ्रमातङ्गतया ऐरावतत्वेनैव। ऐरावतो हि सदा मदजलं स्रवति अयमपि तावत् स्वर्गाद्भ्रष्टः स एवेति सदा दानजलं मुञ्चतीत्यर्थः। अभ्रवन्मातङ्गस्तत्तया वा श्यामत्वात् सजलघनतुल्य

मदान्मदग्रे भवताथवा भिया
परं दिगन्तादपि यात जीवत।
इति स्म यो दिक्करिणः स्वकर्णयो-
र्विनाद वर्णस्रजमागतैर्गतैः ॥ २२ ॥
बभार बीजं निजकीर्त्तये रदौ
द्विपामकीर्त्त्यै खलु दानविप्रुषः।

इत्यर्थः। अस्य भीमस्य सम्बन्धित्वेनास्खलत्किमिति वा। वर्षुकं लषपते (पा०३।२।१५४) त्युकञ् ॥ २१ ॥

मदादिति। यो गजः स्वकर्णयोरागतैर्गतैरागमनैर्गमनैश्च कृत्वा वर्णस्रजं वर्णमालां विनैव दिक्करिणो दिग्गजान् प्रति इत्याह स्मेव। इति किं। भो दिग्गजाः भवतां बलाभिमानश्चे-दस्ति तर्हि मदाद् युद्धं कर्त्तुं यूयं मदग्रे भवत मम पुरस्तात्ति-ष्ठत। अथवा चेन्मदो नास्ति तर्हि भिया दिगन्तस्था यूयं दिग-न्तादपि परं यात गच्छत। पलायितास्च सन्तः तत्रैव सुखेन जीवत स्वप्राणान् रक्षत। इयं लुप्तोत्प्रेक्षा ॥ २२ ॥

बभारेति। यो गजो निजकीर्त्तये रदौ दन्तौ बीजं कारणं ब-भार, द्विपामकीर्त्त्यै दानविप्रुषो दानोदबिन्दूनेव कारणं बभार। उत्प्रेक्षायां। दन्ताभ्यां परविदारणात् स्वस्य यशःसमुत्पत्तेस्त-योः कीर्त्तिकारणत्वम्। अथ च कीर्त्तिलक्षणस्य शुभ्रत्वात् कारणे-नापि तादृशेनैव भवितुं युक्तमिति। दन्तौ कीर्त्तिबीजभूतकन्दा-विव मदजलगन्धाघ्राणमात्रेण परगजानां भङ्गात् दानबिन्दूनां

अधःश्रमैः कुम्भकुचां शिरःश्रियं
मुदे मदस्वेदवतीमुपास्त यः ॥ ३३ ॥
न तेन वाहेषु विवाहदक्षिणी-
कृतेषु सङ्ख्यानुभवेऽभवत् क्षमः।
न शातकुम्भेषु न मत्तकुम्भिषु
प्रयत्नवान् कोऽपि न रत्नराशिषु ॥ ३४ ॥

तदकीर्त्तिलक्षणत्वं। कार्य्यस्य श्यामत्वात् कारणेनापि तादृशेनैव भवितुं युक्तमिति श्यामदानविन्दव एवाकीर्त्तेर्वीजमित्युत्प्रेक्षा। तथा मुहुर्मुहुर्गतागतैः अधःश्रमैः कर्णप्रयासैरेव व्यजनचालनैः कृत्वा कुम्भाविव कुचौ यस्यास्तां मदस्वेदवतीं दानरूपघर्मोदकयुक्तां शिरःश्रियं घर्मजलापहरणद्वारा तस्या एव मुदे हर्षाय उपास्त सिषेवे। एवम्भूतं शिरो दधानः प्रीतिमुदपादयदित्यर्थः। कामकेलिखिन्नाङ्कुम्भकुचां कामिनीं स्वेदमपनयन् कामी तालवृन्तचालनेन वीजयतीति मदस्य स्वेदरूपेण शिरःश्रियः स्त्रीत्वरूपणम्। अधनेत्यपि पाठः॥ ३३ ॥

नेति। तेन भीमेन नलाय विवाहे दक्षिणीकृतेषु कन्यादानदक्षिणात्वेन दत्तेषु वाहेषु रथादिषु तुरङ्गेषु वा सङ्ख्यानुभवे सङ्ख्याज्ञाने प्रयत्नवानपि कोऽपि कश्चिदपि न क्षमः इयन्तो वा दत्ता इत्येवं सङ्ख्यापरिच्छेदे समर्थो नाभवत्, तथा शातकुम्भेष्वनेकभूषणभूतघटिताघटितकाञ्चनेषु न, तथा मत्तकुम्भिषु गलन्मदमातङ्गेषु न, तथा रत्नराशिषु न क्षमोऽभवदिति। सर्वत्र विवाहद-

करग्रहे वाम्यमधत्त यस्तयोः
प्रसाद्य भैम्या नु च दक्षिणीकृतः।
कृतः पुरस्कृत्य ततो नलेन स
प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः ॥ ३५ ॥

क्षिणीकृतेष्विति च। बहुतरं यौतुकं दत्तवानीति भावः ॥ ३४ ॥

करेति। य आशुशुक्षणिरग्निस्तयोः करग्रहे विवाहे विषये वाम्यं वक्रत्वं अधत्त भेजे। भैम्यभिलाषान्नलाकारधारणादिद्वारा पूर्वं विरुद्धोऽभूदनु च पश्चान्नलवरणावसरे भैम्या स्तुतिध्यानादिना प्रसाद्य सन्तोष्य दक्षिणीकृतः आनुकूल्यं नीतः सोऽग्निः। ततः पाणिग्रहानन्तरं नलेन पुरस्कृत्योल्लेखनादिसंस्कारपूर्वमग्रे प्रतिष्ठाप्य तत्क्षणं तस्मिन्विवाहसमये प्रदक्षिणः प्रकर्षेणापसव्यः कृतः प्रदक्षिणभागेन वलयाकारेण वेष्टितः। अथ च यः पूर्वं यौतकदानकाले वामभागेऽभूत् पश्चाद्भैम्या फूत्कारादिना सन्धुक्ष्यानुकूलः कृतः। अथ च दक्षिणभागे कृतः सोऽर्चनादिभिः सम्पूज्य नलेन सुतरामनुकूलः कृतः। अथ च प्रकर्षेण दक्षिणभागे कृतः। अन्योऽपि महान् पूर्वं विरोध्यते स विवाहादौ प्रसाद्यानुकूलः क्रियते इत्युक्तिः। अत्र कश्चित् कश्चिद्विधिक्रमभङ्गो देशाचाराल्लाशाभेदात् कुलाचारविशेषाद्वाद्रष्टव्यः। न पुनः श्रीहर्षकवेरज्ञानलेशोऽपि। अत एव पूर्वं यथाविधीति साधुरुक्तम्। आशुशुक्षणिः। आशाशुमिच्छति आङ्गि शुषेः सन्नन्तान्दपि साधुः। निष्प्रयुक्तत्वाद्भाषायामपि साधुत्वं ज्ञेयम् ॥ ३५ ॥

स्थिरा त्वमश्मेव भवेति मन्त्रवा-
गनेशदाशास्य किमाशु तां ह्रिया।
शिला चलेत् प्रेरणया नृणामपि
स्थितेस्तु नाचालि विडौजसापि सा॥ ३६॥
प्रियांशुकग्रन्थिनिबद्धवाससं
तदा पुरोधा विदधे विदर्भजाम्।

स्थिरेति। हे भैमि इममश्मानमारोहेत्युच्चार्य्य त्वं अश्मेव स्थिरा भवेति नलेनोच्चारिता मन्त्ररूपा वाक् तां भैमीमाशास्य शिलावन्निश्चला भवेति तस्यै आशिषं दत्वा आशु अनेशत् अनाशत्। उच्चारिता वर्णा प्रध्वस्ता भवन्ति। तन्नोत्प्रेचते ह्रिया किं। किमिति तस्या लज्जेत्यत आह। शिला अल्पतेजसां नृणामपि प्रेरणया करचरणव्यापारमात्रेण चलेत् स्वस्थानादन्यत्र गच्छेत् सा तु भैमी पुनः अतिप्रभाविणा विडौजसा इन्द्रेणापि स्थितेः मनोव्यापारमात्रस्वीकृतनलपतित्वरूपाया मर्यादायाः सकाशान्नाचालि। पतिव्रताधीमा न त्याजितेति स्थिरतरत्वेनाधिकाया भैम्या अहं हीनेति स्वदोषं विचिन्त्य लज्जैव नष्टेत्यर्थः। वैधमश्मारोहणं तेन कारितमिति भावः। नश अदर्शने अस्माल्लुङि पुषादित्वादङि नशिमन्योरलिट्येत्वमिति (पा० ६। ४।१२०।वा०२) एत्वे रूपं॥ ३६॥

प्रियेति। तदा वह्निसन्निधिकाले पुरोधा गौतमो विदर्भजां प्रियस्य नलस्यांशुकेन सह ग्रन्थिना निबद्धं वासो यस्यास्तामेवं-

जगाद विच्छिद्य पटं प्रयास्यतो
नलाद्विश्वासमिवैष विश्ववित्॥ ३७॥
भ्रुवावलोकाय तदुन्मुखभ्रुवा
निर्दिश्य पत्याभिदधे विदर्भजा।

विधां विदधे चकार। उत्प्रेक्षते। पटं विच्छिद्य कर्त्तित्वाऽरण्ये भैमीं विहाय प्रयास्यतो गमिष्यतो नलात् सकाशादेष पुरोधा अविश्रामं विश्वासाभावं जगादेव। वस्त्रं छित्वा त्वां हित्वाऽयं गमिष्यतीत्येतस्य विश्वासो न कार्य इत्यस्य वस्त्रेण सह स्ववस्त्रस्य ग्रन्थिं दत्त्वैवानेन सह विचरणीयमित्युवाचेत्यर्थः। कथमेतज्ज्ञातमत आह। यतो विश्वं सर्व्वं वेत्तीति कालत्रयज्ञ इत्यर्थः। तस्माद्भविष्यदपि तेन ज्ञातमित्यर्थः। कलिना पराभूतो नलो द्यूतद्वारा हारितसर्व्वस्वः स्त्रीयैस्यको द्वापरेण कलिना पक्षिरूपेण तद्धारणार्थं विक्षिप्तस्य वस्त्रस्यापहाराद्वस्त्रान्तराभावाद्भैमीवस्त्रार्द्धधारी सन् निद्राणायास्तस्या वस्त्रार्द्धं विच्छिद्य तां महारण्ये तत्याजेति भारते कथा। वैधमुभयवस्त्रग्रन्थिबन्धनं तेन कृतमिति भावः। विदधदिति पाठे कुर्व्वन् सन्निति योजना॥ ३७॥

भ्रुवेति। तस्य भ्रुवस्य दर्शनार्थमुन्मुखो भूर्यस्य तेन पत्या समेन विदर्भजा निर्दिश्याज्ञाप्य भ्रुवस्यावलोकनार्थं अभिदधे उक्ता। तदुन्मुख्या भुवा कृत्वा संज्ञाप्येति वा। न तु स्थूलस्य भ्रुवस्य स्वयंदर्शनयोग्यत्वात् सा स्वयमेव तं पश्येत्। तेन किमिति

किमस्य न स्यादणिमाद्विसाद्विक-
स्तथापि तथ्यो महिमाऽऽगमोदित ॥ ३८ ॥
धवेन साद्दर्शि वधूररुन्धतीं
सतीमिमां पश्य गतामिवाणुताम् ।

दर्शनं कारितमित्यत आह । अस्य ध्रुवस्य अणिमा सूक्ष्मप्रमाणत्वं अचिमाचिको नेत्रगोचरः किं न स्यादपि तु स्यादेव यद्यपि तथापि स्वयदर्शनयोग्यत्वेऽपि आगमोदितो महिमा वेदोक्तं गौरवं सत्योऽस्त्विति शेषः । श्रुत्युक्तं हि प्रमाणमित्यर्थः । श्रुतिर्हि ततो वधू ध्रुवमीक्षयीतेति ध्रुवे दर्शिते ध्रुव पश्यामि प्रजां विन्द इति सा ब्रूयात् तस्मात् स्वयं द्रष्टुमशक्यत्वेऽपि नल एवादर्शयदिति युक्तमित्यर्थः । वैध ध्रुवदर्शनं कारितमिति भावः । एतत् सर्व्वं कविवचः । अथ च यद्यस्याणुत्वं सत्यं तथापि ज्योतिःशास्त्रोक्तं ध्रुवमण्डलस्य महापरिमाणत्वं सत्यमेव ॥ ३८ ॥

धवेनेति । सा वधूर्धवेन नलेन अणुतामतिसूक्ष्मत्वं गतामिमां सती पतिव्रतामरुन्धतीं त्वं पश्येत्युक्ता अदर्शि दर्शिता । तत्राणुत्वे उत्प्रेक्षते । वरणात् पूर्वमेव हृदि कृतस्य मनोरथमात्रेण हृदये कृतस्य भूपतेः कृते तृणीकृतस्वर्गपतेः तृणवल्लाघवेन त्यक्त इन्द्रो येनैवंभूतान्नलादिव लज्जयेति शेषः । अह हि परिणीता सतीन्द्र तृणप्रायमकरवं भैमी तु हृदि धारणमात्रेणेति । सत्त्वोऽपीयमेवाधिका सतीति भैम्याः सकाशात् लज्जयेव कृशामित्यर्थः । स्वतः कृशत्वमेव उत्प्रेक्षितं । भूपतेर्नलादिति

कृतस्य पूर्वं हृदि भूपतेः कृते
तृणीकृतस्वर्गपतेर्जनादिति ॥ ३९ ॥
प्रसूनता तत्करपल्लवस्थितै-
रुडुच्छविर्व्योम्नि विहारिभिः पथि ।
मुखेऽमराणामनले रदावले-
रभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥
तया प्रतिष्ठाङ्कितधूमपद्धति-
र्गता कपोले मृगनाभिशोभिताम् ।

शब्दद्वयसामान्यवाच्यपि नलभैमीलक्षणे विशेषे पर्यवस्यति। वैध-मरुन्धतीदर्शनं कारितमिति भावः। अदर्शि। ण्यन्ताच्चिण्। अ-भिवादिदृशोरिति (पा० १।४।५२ वा० १) अणौ कर्त्तुर्णौ कर्मत्वं। तस्य चाभिहितत्वाद् द्वितीयाभावः ॥ ३९ ॥

प्रसूनतेति। तस्याः भैम्याः करयोरेव पल्लवयोः स्थितैर्वर्त्त-मानैर्लाजैः प्रसूनता पुष्पत्वं अभाजि प्राप्ता। पल्लवेषु च पुष्पाणि युक्तानि तथा अनया भैम्या उज्झितैः करान्मुक्तैर्व्योम्नि विहर-णशीलैः सद्भिः पथि करापान्तरालरूपे मार्गे उडुच्छविर्नक्षत्र-शोभा भेजे। व्योम्नि नक्षत्राण्यपि युक्तानि। तथाऽमराणां मुखे ऽनले ऽनया क्षिप्तैः रदावलेः दन्तपंक्तेर्द्युतिः शोभा भेजे। मुखे दन्तपंक्तिर्युक्ता। वैधो लाजहोमस्तया कृत इति भावः ॥ ४० ॥

तयेति। तया भैम्या प्रतिष्ठा करकुड्मलाभ्यां स्वीकृता प्रा-ङ्कितधूमपद्धतिः हूयमानलाजादिद्रव्यसम्बन्धिनी धूमपरम्परा

ययौ दृशोरञ्जनतां श्रुतौ श्रिता
तमाललीलामलिकेऽलकायिता ॥ ४१ ॥
अपकृतः स्वेदभरः करे तयो-
स्तपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमश्रु सात्त्विकं
घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

कपोले मृगनाभिशोभितां कस्तूरीशोभां जाता प्राप्ता । तत ऊर्ध्वं गच्छन्ती दृशोश्चक्षुषोरञ्जनतां ययौ प्राप । ततोऽप्यूर्ध्वं गच्छन्ती श्रुतौ कर्णयोस्तमाललीलावतंसभूते तमालदलमादृश्ये श्रिता । ततोऽप्यूर्ध्वतरं गच्छन्ती अलिके ललाटे ऽलकायिता चूर्णकुन्तलवदाचरिता तत्तुल्या जातेत्यर्थः । कपोले कस्तूरी दृशोरञ्जनं श्रुतौ तमालं ललाटे चालका इति युक्तम् । वैधधूमग्रहणं छलमिति भावः । मृगनाभिशोभीति । कर्तर्युपमान इति (पा० ३।२।७८) णिनौ मृगनाभिशोभिनी तस्या भावस्तत्ता, त्वतलोरिति (पा० ६।३।३५ वा० २) पुंवत् ॥ ४१ ॥

अपकृत इति । तपाजुषोर्लज्जावतोस्तयोः करे वर्त्तमानः स्वेदभरः सात्त्विकघर्मजलसङ्घो दानजलैर्ब्राह्मणेभ्यो दक्षिणादानार्थं उत्सृष्टैः सङ्कल्पजलैः सह मुहुर्वारं वारं मिलन् सम्बन्धं प्राप्नुवन् सन् अपकृतः दानजलयोगात् सात्त्विकः स्वेदोऽयमिति लोकेन न ज्ञात इत्यर्थः । करे मुहुर्मिलन् पुनः पुनरुद्भवन् दानजलैरपकृत इति वा । तत्रापि कामविकारवशात् स्वेदं लोको

वसूनि भीमस्य वसूनि दक्षिणां
प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणं ।
जनेषु रोमाञ्चमितेषु मिश्रतां
ययुस्तयोः कण्टककोरकश्रियः ॥ ४३ ॥
बभूव न स्तम्भविजित्वरी तयोः
श्रुतिक्रियारम्भपरम्परात्वरा ।

ज्ञास्यतीति भिया वा । द्वयोरपि सम्बन्धि प्रसृतं गलितं सात्त्विकं कामविकारजमश्रु घनैः सान्द्रैर्धूमलहनैर्धूमाक्रमणैः छला समाधीयत परिहृतं ताभ्यामित्यर्थात् तैरेव कर्त्तृभिरपलपितं वा । परस्परस्पर्शात्तयोः स्वेदादयः सात्त्विकाः प्रवृत्ता इति भावः ॥ ४२ ॥

वसूनीति । वसूनि वसूनि दक्षिणां प्रयच्छतो दक्षिणात्वेन ददतो भीमस्य सत्त्वं दानशौण्डत्वमवेक्ष्य तत्क्षणं तस्मिन्नेव क्षणे आश्चर्यातिशयेन रोमाञ्चमितेषु प्राप्तेषु जनेषु मध्ये तयोर्भैमीनलयोरपि कण्टककोरकश्रियः कण्टककलिकाशोभा मिश्रिताम् ऐक्यं प्रापुः । सात्त्विकोऽपि रोमाञ्चो ऽन्यजनवदाश्चर्यादयं जात इत्युपलक्षित इति भावः ॥ ४३ ॥

बभूवेति । श्रुतिक्रियाया वेदविहितलाजाहोमाग्निपरिभ्रमणादिकाया आरम्भस्य परम्परा एकस्मादनन्तरमन्यस्यारम्भस्तस्मादनन्तरमन्यस्यैवमव्यवहितो य उत्तरोत्तरभावस्तद्विषयत्वरा वेगिता, तयोरवश्यापेक्षितायामपि कर्मवेगितायां सात्त्विकजनितस्तम्भत्वमसमासकस्य स्तम्भस्य विजित्वरी जयनशीला

न कम्पसम्पत्तिमलुम्पदग्रतः
स्थितोऽपि वह्निः समिधा समेधितः ॥ ४४ ॥
दमस्वसुः पाणिममुष्य गृह्णतः
पुरोधसा संविदधेतरां विधेः।
महर्षिणेवाङ्गिरसेन साङ्गता
पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥

न बभूव तत्रापललाप। स्तम्भवशात्तौ किमपि कर्म शीघ्रं कर्त्तुं समर्थौ नाभूतामिति भावः। तथा समिधा यज्ञकाष्ठेन समेधितः संवर्द्धितो वह्निरपि अग्रतः स्थितः सन् तयोः कम्पसम्पत्तिं सात्त्विककम्पवाहुल्यं नालुम्पत् न शमयति स्म। शीतजं हि कम्पमग्निः शमयति न तु सात्त्विकं तस्य तत्रासमर्थत्वादित्यर्थः। तयोरन्यः सात्त्विकापलापेऽपि स्तम्भकम्पौ लोकैर्ज्ञाताविति भावः। अवर्त्तितास्तम्भेति पाठे न स्तम्भविजितरीति नञ्समासः। अलुम्पत्। शे मुचादीनामिति (पा०७।१।५९) नुम् ॥ ४४ ॥

दमेति। दमस्वसुः पाणिं गृह्णतोऽमुष्य नलस्य सम्बन्धिनो वैवाहिकस्य श्रौतस्य विधेः साङ्गता ऽङ्गसाहित्यं पुरोधसा संविदधेतरां नितरां साकल्येन चक्रे। प्रधानमात्रं नलेन कृतं अङ्गानि तु पुरोधसा कृतानीति भावः। कस्य केनेव। पुलोमजामुद्वहतः शतक्रतोः सम्बन्धिनो विधेः साङ्गता आङ्गिरसेन महर्षिणा बृहस्पतिनेव ॥ ४५ ॥

स कौतुकागारमगात् पुरन्ध्रिभिः
सहस्ररन्ध्रीकृतमौचितं ततः ।
अधात् सहस्राक्षतनुत्वमित्त्वता-
मधिष्ठितं यत् खलु जिष्णुनामुना ॥ ४६ ॥
तथाशनाया निरशेपि नो ह्रिया
न सम्यगालोकि परस्परक्रिया ।

स इति । ततः वैवाहिकविधेरनन्तरं स नलः पुरन्ध्रिभिरन्तःपुरनारीभिरौचितं वधूवरचेष्टादिदर्शनार्थं सहस्ररन्ध्रीकृतं खण्डकाष्ठादिरचितं सच्छिद्रगवाक्षं वधूवरसंवेशार्थं रचितशृङ्गारवेदिकं कौतुकागारं वृद्धहलावहं दूर्वायवाङ्कुरादिनवमङ्गलद्रव्यसहितं गृहमगात् ययौ । यद्गृहं जिष्णुना जयशीलेनामुना नलेनाधिष्ठितं सत् विलोकितुं नेत्रसहस्रावकाशदायिरन्ध्रसहस्रधारिणा सहस्राक्षस्य कवचेन सह मित्रतां साम्यं अधात् बभार तदपि जिष्णुनेन्द्रेणाधिष्ठीयते खलु उत्प्रेक्षायां निश्चये वा ॥ ४६ ॥

तथेति । वर्गेण वध्वा चाशनाया बुभुक्षा ह्रिया लज्जया तथा पूर्ववत् नो निरशेपि निःशेषिता आहृत्य न भुक्तमित्यर्थः । तथा परस्परक्रियाऽन्योन्यं चेष्टादिव्यापारोऽपि ह्रियैव सम्यक् सम्मुखदर्शनेन नालोकि न विलोकिता किन्तु इङ्गितमात्रेणेत्यर्थः । तथा च दिनत्रयं यथाविधि भुक्तभोगं त्यक्तसुरतं सत् गरभेश्वायमिति यथा तथाऽगायि ग्रथितं । अहमिति सर्वत्र

विमुक्तसम्भोगमशायि सस्पृहं
वरेण वध्वा च यथाविधि त्र्यहम् ॥ ४७ ॥
कटाक्षणाज्जन्यजनैर्निजप्रजाः
क्वचित् परीहासमचीकरत्तराम्।

योऽज्यं। विध्यतिक्रमभयाद् दिनत्रयं ताभ्यां सह भुक्तं अन्योन्यं विलोकितं सहनिद्रितञ्च। परं लज्जयाऽनया च नादृप्ति भुक्तम् नाश्लेषाङ्गं दृष्टं न च चुम्बनालिङ्गनादिपूर्व्वं शयितमित्यर्थः। एकत्र शयनं त्रिरात्रं ब्रह्मचर्य्यं चेति विधिः। अशनाया। अशनायोदन्यधनाया (पा०७।४।३४) इति साधुः। त्र्यहं। समाहारे द्विगौ राजादिना (पा०५।४।९१) इति टच्, न सङ्ख्यादेः समाहार इति (पा०५।४।८८) अह्नादेशाभावः। रात्राह्नाहाः (पा० २।४।२९) इति पुंस्त्वं। अत्यन्तसंयोगे द्वितीया (पा०२।१।२९)। त्र्यहं विमुक्तसम्भोगमिति योजना ॥ ४७ ॥

कटाक्षेति। भोजकुलस्य सोमपूर्व्वजात्यत्रचियवंशस्याङ्कुरो बालो दमः क्वचिन्नीमद्दृक्पथागोचरे कस्मिंश्चिद्देशे जन्यजनैर्वरयाचिकैर्वरपक्षीयैः सह निजप्रजाः परिहासपात्रभूतपौरवारस्त्रीमुख्याः ताभिः प्रयोज्याभिरित्यर्थः, कटाक्षणान्नेत्रसञ्ज्ञया परिहासं श्लेषवक्रोक्त्यादिना अर्थान्तरोपदर्शनरूपं उपहासमचीकरत्तरां अतितरां कारयामास। तथा क्वचिच्च वरयात्रया निमित्तेनागतान्नलपक्षीयानन्यान् राजलोकान् धरापरोभिः दासीस्वैरिणीभिरश्लीप्रभृतिभिः पुरसुन्दरीभिर्वाराङ्गनाभिर-

धरासुरोभिर्वरयान्वयागता-
नभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥
स कश्चिदूचे रचयन्तु तेमनो-
पहारमत्राङ्ग रुचेर्यथोचितं ।

भोजयत् भोजनमकारयत् । परिवेशनार्थं काश्चित् सहभोजनार्थं काश्चिदादिष्टवानित्यर्थः । विवाहे कनीयसामेवोपहासकरणयोग्यत्वादङ्कुरपदप्रयोगो युक्तः । कटाचशब्दात् तत्करोतीति (पा० ३।१।२६ वा० १) ख्यन्तात् लुट् । निजप्रजाः । हृक्रोरिति (पा० १।४।५३) कर्मत्वं । आगतान् । भुजेः प्रत्यवसानार्थत्वात्, गतिबुद्धीति (पा० १।४।५२) कर्मत्वं । अभोजयत् । निगरणचलनार्थेभ्यश्चेति (पा० १।३।८७) परस्मैपदं ॥ ४८ ॥

तमेव प्रकारमाह । स इति । स दसः कश्चिन्नलपक्षीयं एवमूचे स्वजनमुखेनेति शेषः । अङ्ग हे वरयाचिक अत्र पात्रे आसु परिवेषिकासु मध्ये वा काश्चन स्त्रियः तव रुचेरभिलाषस्य यथोचितं उचितमनतिक्रमेण तेमनाख्यस्य व्यञ्जनस्य उपहारं आनयनं रचयन्तु कुर्वन्तु यावदभिलाषं तेमनमानयन्तु किमिति प्रश्नः काकुः । एता एवं कुर्वन्तु त्वं भुङ्क्ष्वेति भोजनोपदेशो वा । एवमुत्तरत्रापि । तथा पिपासतः तृपामीस्तव पानार्थं सर्वतोमुखं जलमपि अर्पयन्त्यो ददतु । तथा ओदनमपि कामं यथेच्छमर्पयन्त्यो ॥ परिहासस्तु अत्र आसु मध्ये विविक्ते स्थाने वा यदृच्छेः समजपमाद्यङ्गानां रुचेर्दर्शनाद्यभिलापस्योचितं

पिपासतः कास्य न सर्व्वतो मुखं
तवार्पयन्त्यामपि काममोदनं ॥ ४९ ॥
मुखेन तेऽत्रोपविशत्वसाविति
प्रयाच्य स्पष्टानुमतिं खलाहसत् ।

यथा भवति तथा तव मनसः अपहारं अपहरणं रचयन्तु स्तनादिदर्शनादिनान्तःकरणहरणं कुर्व्वन्तु इत्यर्थः । काय-कान्तेर्द्वैतोः सौन्दर्य्यातिशयान्मनोहरणं कुर्व्वन्त्वित्यर्थः । तथा पिपासतश्चुम्बनेच्छोस्तव सर्व्वतो नेत्रादिचुम्बनस्थाने दर्शनमा-त्रेण कामस्य हर्षकरं मुखमर्पयन्त्यां । बहूनां चुम्बनस्थानानामे-कत्र मुखे वर्त्तमानत्वान्मुखमेव तव ददत्वित्यर्थः । अथ च का-मस्य मोदनं हर्षकरं वराङ्गमपि चुम्बनार्थमर्पयन्त्यां । अथ च मुखं पिपासतस्तव सर्व्वदा वराङ्गमेव ददतु । स्यात्तेमनं तु निष्ठान-मित्यमरः । पूर्व्वव्याख्याने तवेत्युभयत्र योज्यं । मुखं सर्व्वत इति, उभसर्व्वतसोरिति द्वितीया (सि॰कौ॰३६।२।५॰) । तव ते इति च सम्बन्धसामान्ये षष्ठी ॥ ४८ ॥

मुखेनेति । काचित् खला वक्रोक्त्यादिभाषिणी हे वरया-त्रिक असौ मत्सखो पुरुषो वाऽत्र स्थाने ते तव मुखेनोपलक्षिता सम्मुखमिति यावत् त्वदुपायेन वा त्वदाज्ञयेति यावत् त्वया सह भोजनार्थं तव पुरस्ताद्वा भोजनार्थं उपविशतु इति प्रयाच्य सम्प्रा-र्थ्य मुखेनोपविशत्विति स्पष्टा दत्ताऽनुमतिरनुज्ञा येन तं वरया-त्रिकं पश्चादहसत् । हासे कारणमाह । हि यस्माद्येन साधनेन

वराङ्गभागः स्वमुखं मतोऽमुना
स हि स्फुटं येन किलोपविश्यते ॥ ५० ॥
युवामिमे मे स्तिमे इतीरिणो
गले तथोक्ता निजगुच्छमेकिका ।

किलोपविश्यते स हि वराङ्गभागो गुह्यदेशः अमुना जनेन स्व-स्यात्मनो मुखं स्फुटं निश्चितं अतो मुखेन करणेनोपविशत्वि-त्येवमर्थपरं तद्वचनमज्ञात्वा तेनानुज्ञायां दत्तायां कटिदेशा-धःप्रदेशेन किलोपविशत इत्येवं वदता अनेन स्वमुखं वराङ्गत्वेन मतं यस्मात्तस्माद्धास्यं युक्तमित्यर्थः। सर्व्वजनबोधपुरःसरं ज-ह्वामेति वा। अथ च ते मुखेनोपविशतु अपि तु पुरीषोत्सर्गार्थ-मुपविशत्विति प्रयाच्य तदीयं जुगुप्सितमर्थं गृहीत्वा दृष्टानुमतिं तमहसत्। मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपीति विश्वः॥५०॥

युवामिति। इमे पुरवर्त्तिन्यौ युवां मे मम स्तिमे उत्त-मस्त्रियौ भवादृशे स्त्रीरत्ने न दृष्टे इतीरिणो वदतः स्तुवतः, अथ च मत्सम्बन्धिन्यौ प्रियतमे भवेतां इति परिहासाद्वदतः कस्यचिज्जनस्य वरपक्षीयस्य गले यथा लयोच्यते तथेत्युक्त्वा तयोर्द्वयोर्मध्ये एकिका एकैव निजगुच्छं रज्जुस्थाने हारविशे-षमेव इत्युक्त्वा न्यधत्त। इतीति किं। हे जन्य त्वं अदः पूर्व्वोक्तं इमे मे इति शब्दं वदन् तु पुनः छगलः छागो न भासि अपि त्वेवंशब्दं कुर्व्वन् छाग एव स्फुरसि। अथ च तुच्छःछगलगह्यो नरः कण्ठो पशुर्मेषभूतो न भासि। अजस्य गले स्वर्गो तिष्ठ-

न भास्वदस्तु छगलो वदन्निति
न्यधत्त जन्यस्य ततः पराङ्कपत् ॥ ५१ ॥
नलाय वालव्यजनं विधुन्वती
दमस्य दास्या निम्टतं पदेऽर्पितात्।

तस्त्वन्तु तादृक्शब्दोऽपि स्तनशून्य इति कारणान्न शोभसे। अथ च रज्जुरहितकण्ठो न भासीति रज्जुस्थाने हारं धत्ते स्मेति। उभयतो लम्बमानो हार एव गलस्तनस्थाने भवत्वित्यर्थः। ततः अनन्तरं परा द्वितीया रज्जुवद्धारमेव धृत्वा अजमिव तमाक्रम्य कण्ठे बद्धा दूरं निनाय। अजो हि मेमे शब्दं करोति रज्ज्वा कण्ठे बद्धा आक्रम्यत इति परिहासः। अथ च रिक्तकण्ठो ग्रासरहितो न भासीति निजगुच्छं स्वहस्तस्थितपुष्पपल्लवस्तवकं गले मुखान्तः न्यधत्त नितरां बलाच्चिक्षेप, द्वितीया च दत्तपल्लवपुष्पग्रासं छागमिव चकर्षेति परिहासः। अथवैवमस्मान् स्तुतिं कुर्व्वन् तुच्छगलो हाररहितकण्ठो न भासीति वदन्ती गले हारं परितोषवशाच्चिक्षेपेति वा। यद्वा अस्माकमेका भवत्यो मे प्रियतमे इति वदंस्त्वं शून्यकण्ठो न भासि मयापि त्वं वरणीय इति मालास्थाने हारमेव चिक्षेप। परा च तत्रैव धृत्वा परिहासमिषेण भोगार्थं चकर्षेति भावः। मि मे मे इति परिहासपक्षे युवानिति विन्दुच्युतकेन एवं वदन् युवा तरुणः छाग इति वा योज्यं। अक्रम्यत् लुङ्॥ ५१॥

नलायेति। नलाय नलार्थं वालव्यजनं मयूरपिच्छतालवृन्तं

अहासि लोकैः सरटात् पटोज्झिनी
भयेन जङ्घायतिलङ्घिरंहसः ॥ ५२ ॥
पुरस्थलाङ्गूलमदात् खला वृसी-
मुपाविशत् तत्र ऋजुर्वरद्विजः ।

चामरं वा विधुन्वती कम्पयन्ती नलमेवापरा काचित् सुन्दरी दमस्य दास्या निभृतं गुप्तं यथा तथा पश्चादागत्य पदे चरणसमीपे अर्पितान्मुक्तात् सरटात् कृकलासात् भयेन पटमुत्थाप्येवंशीला त्यक्तवस्त्रा दिगम्बरी भूता सती लोकैरहासि हसिता जनहासे हेतुरभूदित्यर्थः। किम्भूतात् सरटात्। जङ्घाया आयतिर्दैर्घ्यं तल्लङ्घयत्येवंशीलं रंहो वेगो यस्य तस्मात्। अत एव भयहेतोः सरटस्योर्ध्वारोहणं जातिस्वभावः ॥ ५२ ॥

पुर इति। काचित् खला धूर्ता समागताय कस्मैचिद्द्विजाय पुरस्थं अग्रे स्थितं लाङ्गूलं पुच्छं यस्यां क्रियायां तद्यथा तथा कूर्माकारां वृसीं व्रतीणामासनं अदात् दत्तवती। वरः श्रेष्ठः वरस्य नलस्य वा द्विजः तत्र तस्यां पुरस्थलाङ्गूलतायामेव वृस्यामुपाविशदुपविष्टः। यतो ऋजुः तस्याः कौटिल्यमजानानः। सा च खला निजामतेः स्वीयाज्ञानस्य आसनं मया भ्रान्त्या अन्यथा स्थापितमिति वदा वदती स्वाज्ञानं नाटयन्तीत्यर्थः। तं पुनरुत्थाप्य पश्चात्कृतं पुच्छं यस्याः सा एवम्भूता याभ्रमा सा च वृसी तत्प्रदा तां प्रददाति प्रददती एवम्भूता सती अहसत्। उपविष्टस्योद्दयमूलान्तिके स्थितमासनपुच्छं शिश्नमिव

पुनस्तमुत्थाप्य निजामतेर्वदा
ऽहसच्च पश्चात्कृतपुच्छतत्प्रदा ॥ ५३ ॥
स्वयं कथाभिर्वरपक्षसुभ्रुवः
स्थिरीकृतायाः पदयुग्ममन्तरा ।
परेण पश्चान्निभृतं न्यधापयत्
ददर्श चादर्शतलं हसन् खलः ॥ ५४ ॥

भविष्यतीति बुद्ध्या मया पुरोलाङ्गूलमासनं चिप्तं । मदभिप्राय-मजानानोऽचतुरः पशुतुल्यः पशोश्च पश्चादेव पुच्छेन भवित-व्यमिति ज्ञापयितुं परिहासबुद्ध्यैव तां हसीं पश्चात्पुच्छं ददाना अहसदिति भावः । अन्यया मया उपहासानर्हस्योपहासाय प्रवृत्तमिति निजनिन्दां कुर्व्वन्तीति केचित् । आसनस्थापना-नभिज्ञाया निजायाः स्वसख्या अमतेर्वदेति वा । हर्षीणामा-सनं हसीत्यमरः ॥ ५३ ॥

स्वयमिति। कश्चित् खलः परिहासचतुरः स्वयं स्वेनैव कथा-भिर्हंसदीत्यादिवार्त्ताभिः स्थिरीकृतायाः कथाश्रवणप्रवणीकृता-या वरपक्षसुभ्रुवो नलपक्षीयायाः सुन्दर्या वरस्य पक्षे पार्श्वे स्थितायाः पादयुग्मं अन्तरा चरणद्वयमध्ये परेण स्वसखेन प्रयो-ज्येन निभृतं गुप्तं यथा तथा पश्चाद्भागेनादर्शतलं दर्पणं न्यधाप-यत् अस्थापयत्। हसन् प्रतिबिम्बितानुजघनकामसदनदर्पणं दद-र्श च। भगादिदर्शनादवहासः। पश्चादनन्तरं ददर्शेति वा। पद-युग्मं। अन्तरान्तरेण युक्तेति (पा०२।३।४) द्वितीया ॥ ५४ ॥

अथोपचारोद्धुरचारुलोचना
विलासनिर्वासितधैर्य्यसम्पदः।
स्मरस्य शिल्पं वरवर्गविक्रिया
विलोककं लोकमहासयन्मुहुः॥ ५५॥

अथेति। अथ कामरहितकेवलपरिहासानन्तरं वरवर्गाणां नलपक्षीयराजमहानां विक्रिया मनोविकारो याभ्यस्तथा यासां सन्दर्शनेन नलपक्षीयानां कामविकारो भवति ता वराङ्गना विलोककं द्रष्टारं लोकं मुहुरहासयन्। तद्रूपादिदर्शनसमुत्पन्नकामविकारं वरलोकं दृष्ट्वा लोकोऽहसदिति भावः। कीदृश्यः। उपचारेण कटाक्षक्षेपादिना स्वानुरागज्ञापिके प्रीतिविलोकने विषये उद्धुराण्युत्सुकानि चारूणतिविशालानि चतुराणि विलोचनानि यासां ताः। तथा विलासैः कटाक्षविक्षेपादिभिः कला निर्वासिता त्याजिता धीराणां विलासिनां धैर्य्यसम्पद् याभिस्ताः। तथा स्मरस्य शिल्पं कृतिरतिसुन्दरं। उपचारे परिवेषणादावुद्धुराश्च ताश्चारुनेत्राश्चेति वा। उपचारोद्धुरचारुलोचनानां विलासैः त्याजिता धैर्यसम्पदेन तस्य स्मरस्य शिल्पं विलसितं कर्त्त वरवर्गविकारदर्शिनं लोकं मुहुरहासयदिति वा। स्वाशयज्ञापनोत्सुकानि चारूणि नेत्राणि यासु। तथा विलासैः पूर्व्वाक्तैरेव त्याजिता धैर्यसम्पदाभिर्यासु वा। तथा कामजनिता वरवर्गस्य विक्रिया विकाराः कर्त्रीं विलोककं लोकं मुहुरहासयन्निति वा। रहासीं कामचेष्टापुरःसरं परिहासः प्रवृत्त इति भावः॥५५॥

तिरोवलद्दक्त्रसरोजनालया
स्मिते स्मितं यत् खलु यूनि बालया ।
तया तदीये हृदये निखाय तद्-
व्यधीयतासम्मुखलक्ष्यवेधिता ॥ ५६ ॥
कृतं यदन्यत्करणोचितत्यजा
दिदृक्षुचक्षुर्यदवारि बालया ।

तदेवाह तिर इति । कस्मिंश्चिद्यूनि तरुणे स्मिते सानुरागं हसिते सति कयाचिद्बालया तिरो वक्रं वलद्दक्त्रसरोजनालया चलतो मुखकमलस्य दण्डो ग्रीवा यया एवम्भूतया सत्या यत् स्मितं ईषद्धासि तया बालया तदीये हृदये हासितुर्वक्षसि तत् स्मितमेव निखाय खनित्वा आरोप्य असम्मुखस्य लक्ष्यस्य वेध्यस्य वेधिता वेधकता व्यधीयत कृता खलूत्प्रेक्षायां । पराङ्मुखलक्ष्य-वेधकत्वं धनुर्विद्यायां निपुणस्य भवति। यः पराङ्मुखः सन् लक्ष्यं विध्यति। पराङ्मुख्यापि तस्मिन्नात्मानुरागो निवेशित इत्यर्थः। स्मितं लज्जा चानुरागसूचिका । सया स्वानुरागद्योतनार्थं हास्ये कृते अनया हास्यपूर्वं लज्जितं चेत्तर्हि इयमप्यनुरक्तेति निश्चितवन्तं तत् स्मितमेव कामबाणीभूय अपीडयदिति भावः। बालत्वादेव वलितग्रीवत्वं। प्रौढा तु सम्मुखमेव हसति। स्मिते स्मितमिति कर्त्तरि भावे क्तः। वेधिता विधेस्ताद्धदिकात्ता-च्छील्ये णिनिः ॥ ५६ ॥

कृतमिति। करणस्य कर्त्तव्यस्य उचितं परिवेषणादि तत्य-

ह्रदस्तदीयस्य तदेव कामुके
जगाद वार्त्तामखिलां खलं खलु ॥ ५७ ॥
जलं ददत्याः कलितानतेर्मुखं
व्यवस्यता साहसिकेन चुम्बितुम् ।

जति तया बालया यदन्यदप्रस्तुतं व्यापारान्तरं कृतं । तथा पुनः पुनर्दिदृक्षुः दर्शनेच्छुः किञ्चिद्दृगन्तमात्रेण द्रष्टुं प्रवृत्तमपि चक्षुर्यदवारि अर्द्धपथात् परावर्त्तितं तदेवान्यत्करणं चक्षुर्वारणरूपं द्वयमेव कामुके विषये तदीयस्य ह्रदः बालासम्बन्धिनो मनसः अखिलां वार्त्तामाशयं जगाद । यतः खलं सूचकं खलूत्प्रेचितं निश्चितं वा । दुर्ज्जनो ह्यन्यदीयमनोगतमन्यस्मै निवेदयति। लज्जानुभववशादियमप्यनुरक्तेति सोऽज्ञासीदिति भावः । खले इति पाठे स्वाशयद्योतनपरेङ्गितज्ञानचतुरे इति कामुक विशेषणं ॥ ५७ ॥

जलमिति। कश्चित् पिपासुं जलं पाययमानायाः पादप्रक्षालनार्थं वा कस्मैचिज्जलं ददत्याः अत एव कलितानतेः नम्रीभूतायाः कस्याश्चित् सुन्दर्याः समीपवर्त्ति मुखं जनमध्ये चुम्बितुं व्यवस्यता इत्योद्यमेनात एव साहसिकेनाविचार्य्यकारिणा केनचित् कामुकेन पतद्वारिणि पदे मन्दपाणिना विलम्बार्थं विरलाङ्गुलिमङ्गुलज्जलपाणिना सता पादप्रक्षालनसलिलपाणिना वा सता अन्यस्यां चुम्बनसामग्र्यां सत्यां एकपङ्क्तिनिविष्टानामन्येषां तच विसरतां वा ईक्षणस्य दर्शनस्य ईक्षणानां नेत्राणां वा वञ्चनार्थं प्रतारणार्थमनीक्षणार्थं क्षणोऽवसरः प्रती-

पदे पतद्वारिणि मन्दपाणिना
प्रतीक्षितोऽन्ये क्षणवञ्चनक्षणः ॥ ५८ ॥
युवानमालोक्य विदग्धशीलया
स्वपाणिपाथोरुहनालनिर्म्मितः ।
श्लथोऽपि सख्यां परिधिः कलानिधौ
दधावहो तं प्रति गाढबन्धताम् ॥ ५९ ॥

क्षितो विलम्बेन गवेषितः । पानपक्षे पानक्षणे पदे चरणे विर-लाङ्गुलिभ्यः पतद्वारि यस्मिन्नेवम्भूते । पादप्रक्षालनपक्षे पत-द्वारिणि पदे मन्दपाणिनेति योज्यं । अन्यनिरीक्षणावसरं स-म्प्रतीक्ष्य तन्मुखं चुचुम्बेति भावः ॥ ५८ ॥

युवानमिति । विदग्धशीलया चतुरया कयाचित् सुन्दर्या युवानं कञ्चित्तरुणमालोक्य कलानां सकलविद्याचातुर्याणां निधौ स्थानभूतायां स्वाश्रयज्ञायां प्रियसख्यां अथ च सखीरूपे चन्द्रे स्वपाणिभ्यामेव पाथोरुहनालाभ्यां कमलाभ्यां निर्म्मितो रचितः कण्ठाश्लेषरूपः परिधिः श्लथोऽपि शिथिलसम्बन्धोऽपि तं नेत्रलक्ष्यं युवानं प्रति लक्षीकृत्य गाढबन्धतां दृढबन्धनत्वं दधौ बभार । अहो आश्चर्यं । कलानिधौ च परिवेषो युक्तः श्लथस्य गाढत्वविरोधात् । सख्यां चन्द्रे वा कृताश्लिष्टस्य परिधेश्चन्द्रबन्धनरूपत्वादाश्चर्य्यं । मदालिङ्गनेच्छुरियं स्वाशय-ज्ञापनाय सखीं आलिङ्गितवती मामेवालिलिङ्गेति तदाशयम-ज्ञासीदिति भावः ॥ ५९ ॥

नतभ्रुवः स्वच्छनखानुबिम्बन-
छलेन कोऽपि स्फुटकम्पकण्टकः।
पयो ददत्याश्चरणे स्मरं क्षतः
स्मरस्य वाणैः शरणे न्यविक्षत ॥ ६० ॥
मुखं यदस्थायि विभज्य सुभ्रुवा
ह्रियं यदालम्ब्य नतास्यमासितम्।

नतेति। स्मरस्य वाणैर्भृशं क्षतः नितरां पीडितोऽत एव स्फुटो जातः सात्त्विकः कम्पः कण्टको रोमाञ्चश्च यस्य स कोऽपि कामी स्वच्छनखेषु तदीयेषु अनुबिम्बनछलेन प्रतिबिम्बनछलेन प्रतिबिम्बव्याजेन पयो दुग्धं जलं वा परिवेषयन्त्याः पाययमानायाः कस्याश्चिन्नतभ्रुवः चरणे एव शरणे रक्षित्री न्यविक्षत प्राविशत्। कामपीडाशान्त्यर्थं चिरं चरणावलोकनव्याजेन प्रार्थनाप्रणतिमञ्जासमकार्षीदिति भावः। भीतः सकम्पो वाणैः सशल्यः सन् कश्चिच्छरणं विशति क्षत इवेति लुप्तोत्प्रेक्षा। चरणोऽस्त्रियामित्यमरोक्तेश्चरणे इति द्वितीया द्विवचनान्तं। चरणाविति च पाठः। शरणमिति पाठे चरणरूपद्वयं रक्षितारमिति व्याख्येयं। न्यविक्षत। नेर्विश इति (पा० १।३।१७) तङ् ॥ ६० ॥

मुखमिति। तयैवान्यया वा सुभ्रुवा मुखं विभज्य वक्रीकृत्य यदस्थायि स्थितमासि तथापि ह्रियं अवलम्ब्य लज्जामाश्रित्य नतास्यमानयमुखं यथा तथा यत् आसितं स्थितं मृदु मञ्जुलं गद्गदमस्फुटवर्णं यथा तथा च वाक्यार्थः। अवादि युवा तदेव

अवादि वा यन्मृदु गद्गदं युवा
तदेव जग्राह तदाप्तिलग्नकम् ॥ ६१ ॥
विलोक्य यूना व्यजनं विधुन्वती-
मवाप्तसत्त्वेन भृशं प्रसिष्विदे।
उदस्तकण्ठेन नृपोष्मनाटिना
विजित्य लज्जां ददृशे तदाननम् ॥ ६२ ॥
स तत्कुचस्पृक्कचेष्टिदोर्लता-
चलद्दलाभव्यजनानिलाकुलः।

चयं तस्या आप्तिसख्या लग्नकं प्राप्तिनिश्चायकमिति जग्राह ज्ञातवानित्यर्थः। स्मितायनुभाववशादियं मया लब्धैवेति निश्चिकायेति भावः। वा समुच्चये ॥ ६१ ॥

विलोक्येति। यूना व्यजनं विधुन्वतीं चालयन्तीं सुन्दरीं अकस्माद्विलोक्य तद्दर्शनादेवाप्तबलेन आप्तसात्त्विकभावेन सता भृशं प्रसिष्विदे सात्त्विकः स्वेदः प्राप्त इत्यर्थः। आनन्दोद्रिक्तो मनोविकारः सत्त्वं तमेव प्रस्वेदं निह्नोतुं नाशितुं नृपा अलीकं ऊष्माणं प्रस्वेदनिमित्तं सन्तापं नाटयत्येवंशीलेनाभिनयता स्वेदापाकरणव्याजेनोदस्तकण्ठेनोर्द्ध्वीकृतमुखेन सता लज्जां विजित्य तदाननं तस्या आननं ददृशे, स्वकामपीडाज्ञापनार्थं तया अपश्यदिति भावः। प्रसिष्विदे। षोपदेशलात् षत्वं। प्रसिस्विद इति पाठश्चिन्त्यः ॥ ६२ ॥

स इति। स पूर्वोक्तो युवा व्यजनं चालयन्त्यास्तस्याः पूर्वो-

अवाप नानानलनालशृङ्खला-
निबद्धनीडोद्भवविभ्रमं युवा ॥ ६३ ॥

तस्याः स्त्रियः कुचयोः स्पृष्टकाख्यमालिङ्गनं चेष्टते करोतीत्ये-वंशीला दोर्लता बाहुवल्ली तस्याः सम्बन्धि चलद्दलाभं चपल-पर्णतुल्यं व्यजनं तालवृन्तं तस्यानिलेन कम्पनसञ्जातवायुना आकुलो विवशीकृतः। स्तनस्पर्शिभुजचालितव्यजनविलोकनमात्र सञ्जातानुरागतरलः सन् नानानलानां अनेकशरकाण्डानां नालस्य सङ्घस्य नलनालानां नलदण्डानां वा या शृङ्खला नि-बन्धनहेतुलातैर्यां परस्परग्रथननिर्मितः पञ्जरस्तया नितरां बद्धःसङ्कुचितप्रचारीकृतः नीडोद्भवः पक्षी तस्य विभ्रमं पञ्जर-मध्य एव यद्दिगिष्टं भ्रमणं अथ च तस्य विलासं साम्यं अवा-प जनसम्मर्देऽप्यनुरागातिशयाद् व्यजनचालनचलद्भुजान्तर्वर्त्ति तत्कुचयोः परम्परयापि संस्पर्शे सांसर्गिकप्रीत्या साक्षादिव तत्कुचस्पृष्टकालिङ्गनमनुभवत् जनशङ्कया यथेष्ट चेष्टितुमशक्तः कामातुरः पञ्जरबद्धपक्षिनिर्विशेषमिवानुभवदिति भावः। लतायाश्च चलद्दलत्वं युक्तं। व्यजनचालनव्याजाच्चलतो भुज-स्यापि स्तनस्पर्शे स्पृष्टकालिङ्गनत्वं युक्तम्। नलजालेति पाठः समीचीनः। नलनालेति पाठे नानाविधाः कण्टकानां नल-सम्बन्धिन्यः कण्टबन्धनकारिण्यः शृङ्खला इत्यर्थः ॥ ६३ ॥

आवक्रटा कापि कटाक्षणस्य सा
तथैव भङ्गी वचनस्य काचन।
यया युवभ्यामनुनाथने मिथः
कृशोऽपि दूतस्य न शेषितः श्रमः॥ ६४॥
पपौ न कश्चित् क्षणमास्यमेलितं
जलस्य गण्डूषमुदीतसम्मदः।

आवेति। सा कापि वर्णयितुमशक्या भावोपसनचतुरा कटाक्षणस्य नेत्रप्रान्तवक्रवीक्षणस्यावक्रटा भङ्गिः परम्परा वा तथैव तदुचितैव सा काचन कापि वक्रोक्त्यादिरूपा वचनभङ्गी रचनापि अभूदिति शेषः। सा का। यया कटाक्षावक्रटया वचनभङ्ग्या च कर्त्र्या युवभ्यां मिथः परस्परं अनुनाथने अन्योन्यप्रार्थने विषये कृशोऽप्यल्पोऽपि दूतस्य श्रमः प्रयासो न शेषितोऽविफलीकृतः। यया कृत्वा युवभ्यां न शेषित इति वा। आत्मनैव चेष्टाविशेषरचनाद्वारा त्वं किमेष्यसि अहं वा गच्छामीत्यादिप्रश्ननिश्चयाद्दूतस्यानवसर इति भावः। यूनोर्वैदग्ध्यं सूचितं। युवतीच युवा चेत्यत्र, पुमान् स्त्रियेत्येकशेषः (पा०१।२।६७) कर्त्तरि तृतीया चतुर्थी वा। शेषितः। तत्करोतीति ण्यन्तान्निष्ठा॥ ६४॥

पपाविति। कश्चित्कोऽपि युवा आस्येन मुखेन मेलितं योजितं करपुटे पानार्थं धृतं जलस्य गण्डूषं पेयं जलं क्षणमात्रं न पपौ। यत उदीतसम्मदः उत्पन्नानुरागः। तथापि किमिति न पपावित्यत आह। तवाधरसम्पृक्ते करपुटधृते जले प्रतिविम्बितं

चुचुम्ब तत्र प्रतिबिम्बितं मुखं
पुरः स्फुरन्त्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥
हरिन्मणेर्भोजनभाजनेऽर्पिते
गताः प्रकोपं किल वारयात्रिकाः ।
स्फुटं न शाकैः प्रवितीर्णमस्ति व-
स्त्विपेदमेवं हरितेति बोधिताः ॥ ६६ ॥

पुरः स्फुरन्त्या विलसन्त्याः स्मरकार्मुकवद्भ्रुवौ यस्यास्तस्या मुखं चुचुम्ब। उद्दीतमन्मदः सन् वा चुम्बितवान्। जले पीते प्रतिबिम्बासम्भवात् पानार्थं गृहीते जले तस्या मुखप्रतिबिम्बे प्रतिबिम्बजनितमुखचुम्बनदर्शनकौतूहलवशात्तस्या यावदवस्थानं तावन्न पपौ। गतायां तु प्रतिबिम्बाभावात् पपाविति भावः। पुरः स्फुरन्त्या जलं ददत्या एव मुखमिति वा ॥ ६५ ॥

हरिदिति। हरिन्मणेर्भोजनार्थं भाजने पात्रेऽर्पिते पुरः स्थापिते सति पत्रावलीभ्रान्त्या शाकपूर्णत्वभ्रान्त्या वा किल स्फुटं प्रकोपं नितरां रोषं प्राप्ता वारयात्रिका वरपक्षीया राजानो भीमसम्बन्धिभिर्लोकैरिति बोधिताः। इति किं। इदं वो युष्मभ्यं प्रवितीर्णं पात्रं शाकैः पलाशादिहरितपलाशैर्वास्तुकादिशाकव्यञ्जनैरेव वा न स्फुटं तद्रचितं पूर्णं वा किन्त्वोदनादियुक्तमपि हरितनीलया त्विषा स्फुटं न पत्रावली नापि शाका इत्थेवं ज्ञापितास्तत्तुष्टा इत्यर्थः। वारयात्रिकाः। वरयात्रा प्रयोजनमेषां इत्यर्थं, प्रयोजनमिति (पा० ५।१।१०८) ठक् ॥ ६६ ॥

ध्रुवं विनीतः स्मितपूर्व्ववाग् युवा
किमप्यपृच्छन्न विलोकयन्मुखं।
स्थितां पुरस्फाटिककुट्टिमे वधूं
तदङ्घ्रियुग्मावनिमध्यबद्धदृक्॥ ६७॥
अमी लसद्वाष्पमखण्डिताखिलं
वियुक्तमन्योन्यममुक्तमार्द्दवं।
रसोत्तरं गौरमपीवरं रसा-
दभुञ्जतामोदनमोदनं जनाः॥ ६८॥

ध्रुवमिति। विनीतः ध्रुवमाचारवानिव स्मितपूर्व्ववाक् मुखं न विलोकयन् अपश्यन् युवा तस्या अङ्घ्रियुग्मस्यावनिमध्ये भूमिभागे बद्धदृग्योजितनेत्रःसन् पुरः स्फटिकनिबद्धभूमौ स्थितां वधूं किमप्यपृच्छत्। अये स्फटिककुट्टिमप्रतिविम्बिततद्वदनदर्शनार्थमेव गोष्ठीमिषेण तां स्थिरीचकारेति भावः। अधोदर्शनार्थमेव मुखं न विलोकितं। अयं श्लोकः क्वचित्॥ ६७॥

अमी इति। अमी जनाः रसात् स्वादुविशेषानुरागादोदनं अभुञ्जत। किम्भूतं। लसद्वाष्पं विद्यमानोष्माणं ईषत्कदुष्णं। तथा अखण्डितश्चासावखिलः सम्पूर्णश्च पाकेऽपि अविच्छिन्नं तण्डुलमिति यावत्। अभग्नमखिलं स्वरूपं यस्येति वा। तथा पाकसमये नवनीतक्षेपात् अन्योन्यं वियुक्तमसंलग्नमिथयकं। तथा अमुक्तं अत्यक्तं मार्द्दवं येन सुजातिशालिवीजत्वादतिकोमलं। तथा रसोत्तरं स्वादुबहुलं। तथा गौरं चन्द्रधवलं। तथा अपीवरं जोरकादिसुजातिशालिवीजत्वात् सूक्ष्मं दीर्घतण्डुलं अत एवा-

वयोवशस्तोकविकस्वरस्तनीं
निरस्तिरश्चुम्बति सुन्दरे दृशा ।
स्वयं किल स्रस्तमुरस्यमम्बरं
गुरुस्तनी ह्रीणतराऽपराऽऽददे ॥ ६९ ॥

मोदनं हर्षहेतुं। परिमलवाऊभ्यादा आमोदनं। अचतले गलद्दाम्यलं। मार्द्दवात्यागे अन्योन्यवियुक्तत्वं। अतःकारणान्माद्द्वैः परस्परविरोधाभासः॥ ६८॥

वय इति। सुन्दरे जन्यजने दृशा वयोवशेन निर्गच्छदागगच्छच्छैशवतारुण्यपारतन्त्र्येण स्तोकमीषद्विकस्वरौ उल्लसितमण्डलौ स्तनौ यस्यास्तां वयःसन्धौ वर्त्तमानां मुग्धां तिरस्तिरो वक्रं वक्रं यथा चुम्बति पश्यति सति सानुरागकटाक्षमात्रेणापि चुम्बनजन्यं सुखमनुभवति गुरुस्तनी तारुण्यभरपीवरदृढतरकुचाऽपरान्या स्त्री तदनुरागाद्ध्रीणतरा अतिसलज्जा सती यथास्थानस्थितमपि स्वयमात्मनैव स्रस्तं किल स्थानच्युतं जातमिवोरस्यमम्बरं हृदयावरणं बलादिगलितं कृत्वा पुनस्तदाच्छादनाय आददे अङ्गीचकार। मुग्धां प्रत्यनवरं हृदयावरणमम्लानं चकार। विदग्धस्त्रीरीतिरीदृशी। अथ च त्वमिमामल्पस्तनीं मुग्धां त्वत्सम्भोगासहनाक्षमां किं पश्यसि पक्कमालूरसमानस्तनीं त्वत्सम्भोगक्षमां मां पश्येति स्वाशयज्ञापनायादृष्टमपि पीनघनस्तनयुग्ममदर्शयदिति भावः। ह्रीणतरा। तसिलादिष्विति (पा॰ ६।३।३५) पुंवद्भावः॥ ६९॥

यदादिहेतुः सुरभिः समुद्भवे
भवेत्तदाज्यं सुरभि ध्रुवं ततः ।
वधूभिरेभ्यः प्रवितीर्य्य पायसं
तदोघकुल्यातटसैकतं कृतम् ॥ ७० ॥
यदप्यपीता वसुधालयैः सुधा
तदप्यदः स्वादु ततोऽनुमीयते ।

यदिति । सुरभिः कामधेनुर्गौर्वा । अथ च सौरभ्ययुक्तः पदार्थः समुद्भवे उत्पत्तिविषये यस्यादिहेतुः दुग्धादिद्वारा परम्परया मूलकारणं ततो ध्रुवं तस्मादिव सौरभ्यधर्म्मयुक्तकारणादिव यदाज्यं सुरभि भवेत् तस्मात् कारणगुणा हि कार्य्ये समवयन्तोऽतिसुरभीभवितुमर्हन्ति, तदाज्यमेभ्यो जनेभ्यो वधूभिः प्रवितीर्य्य परिवेष्य पायसं क्षीरपक्कतण्डुलमन्नं तदोघकुल्यानां घृतप्रवाहरूपाणां क्षुद्रिमाल्पसरितां तटयोः सैकतं कृतम्। पूर्व्वं पायसं परिवेष्य तस्योपरि धाराप्रवाहरूपे घृते क्षिप्ते द्विधा भूय घृतमभितः स्थितं पायसं शुभ्रत्वात् घृतकुल्यासैकतमिव शोभते स्मेति भावः । आत्मसौरभ्यधाऊल्यमुक्तम् । यदाज्यमित्येव पाठः ॥ ७० ॥

यदपीति । यदपि वसुधालयैर्मनुष्यैः सुधा अमृतं न पीता तदपि तथापि सुधास्वादाज्ञानेऽपि अदः आज्यं ततोऽमृतादपि सकाशात् स्वादु मिष्टमित्यनुमीयते । यस्मात् सुधान्धसः अमृतान्धा देवा अपि क्रतौ उषर्बुधेन अग्निना दग्धगन्धिनि विनाग्नि-

अपि क्लृप्तपर्वुधदग्धगन्धिने
स्पृहां यदस्मै दधते सुधान्धसः ॥ ७१ ॥
अबोधि नो ह्रीनिभृतं मदिङ्गितं
प्रतीत्य वा नादृतवत्यसाविति।

तमीरभाय यस्मै घृताय स्पृहां इच्छां दधते। यागे हि हुतं घृतं देवा भुञ्जते। यद्यमृतादधिकरसं नाभविष्यत्तस्मादमृताद्वा अपि देवा यागानलविकृतगन्धमप्येतत्सानुरागं कथमभ्यवहरिष्यन् अभ्यवहरन्ति तावत्तस्मादमृतादपि विकृतगन्धमपि घृतमधिकरसं। किमुत स्वष्टमीरभमिति भावः। मनुष्यैरपि सुधा यस्मान्न पीता सुधान्धसोऽपि विशिष्टायास्मै यस्मात् स्पृहयन्ति तस्मादपि च हेतोरदो घृतं सुधायाः स्वादुतरमनुमीयते। एकोऽल्परसत्वाद्बुद्धिपूर्वममृतं नास्वादयत्येव। अन्ये च नित्यं प्राप्तामृता अपि यस्माद्घृताय स्पृहयन्ति तस्माद्धेतुद्वयादमृतादप्यधिकमेतदनुमीयते इति वा। क्लृप्तपर्वुधेन दग्धस्यासौ गन्धश्च सोऽस्यास्तीति कर्मधारयादिनिः। स्पृहेरीप्सित (पा० १।४।३६) इति सम्प्रदानत्वम् ॥ ७१ ॥

अबोधीति। असौ बाला ह्रीनिभृतं बाललाम्ज्जावशाद्विगुप्तं इति च हेतोर्भावसूचकं मदिङ्गितं भ्रूविक्षेपादि मम चेष्टितं नो अबोधि अज्ञासीत् किंवा। अथवा प्रतीत्य ज्ञात्वा ननु रागाभावाद् भवती अज्ञातवतीत्येवंरूपां पुनः पुनर्जायमानां यूनो प्रियं चेष्टाबुद्धिं कियन्तं मार्गं गतापि बाला निरस्य परास्य

लुनाति यूनः स्म धियं कियद्गता
निवृत्य वालादरदर्शनेपुणा ॥ ७२ ॥
न राजिकाराड्डमभोजि तत्र कै-
र्मुखेन सीत्कारकृता दधद्दधि।
धुतोत्तमाङ्गैः कटुभावपाटवा-
दकाण्डकण्डूयितमूर्द्धतालुभिः ॥ ७३ ॥
वियोगिदाहाय कटूभवत्विप-
सुपारभानोरिव खण्डमाहृतम्।

आदरदर्शनं सादरकटाक्षविलोकनं तद्रूपेणेपुणा लुनाति स्म चिच्छेद। तदिङ्गितज्ञानपुरःसरं स्वानुरागं प्रकटीचकारेत्यर्थः। तादृग्विलोकनात् मदिङ्गितं ज्ञात्वा इयमप्यनुरक्तेति युवा निश्चिकायेति भावः। कियद्गता। द्वितीयाश्रितेति (पा० २।१।२४) समासः। कियद्यातयागतेति क्रियाविशेषणं वा ॥ ७२ ॥

नेति। युग्मं। तत्र भीमगेहे भोजनावसरे वा राजिकाभीराड्डं साधितं दधि दधत् दधिमिश्रितं व्यञ्जनं तैक्ष्ण्यातिशयात् सीत्कारकृता मुखेन कैर्जन्यजनैर्नाभोजि अपि तु सर्व्वैरपि भुक्तं। किम्भूतैः। कटुभावपाटवात् कटुत्वातिशयात् धुतोत्तमाङ्गैः कम्पितशिरोभिः। तथा भोजनकाले शिरःकण्डूयनस्य सार्त्तेयचनैर्निषिद्धत्वादकाण्डे अकाले कण्डूयिते मूर्द्धतालुनी यैः तैः। मुखस्यैव भोजनसाधनत्वे सिद्धेऽपि सीत्कारादिविशिष्टत्वद्योतनार्थं मुखेनेत्युक्तं। राजिकाराड्डभोजिनामियं जातिः ॥ ७३ ॥

वियोगीति। वियोगिनां स्त्रीपुंसां दाहाय पीडार्थं कटू-

सितं म्रदु प्रागथ दाहदायि तत्
खलः सुहृत्पूर्व्वमिवाहितस्ततः ॥ ७४ ॥
नवौ युवानौ निजभावगोपिना-
वभूमिषु प्राग्विहितभ्रमिक्रमम्।
दृशोर्विधत्तः स्म यदृच्छया किल
त्रिभागमन्योन्यमुखे पुनः पुनः ॥ ७५ ॥

भवन्त्विति। दीप्तयो यस्यामत्युद्दीप्तैस्तुपारभानोश्चन्द्रस्याहृतं खण्डमिव सितं श्वेतं तथा प्राक् प्रथमं म्रदु प्रथमस्पर्शसमये कोमलं अथ पश्चान्मुखप्रक्षेपानन्तरं तालुजिह्वादेस्तैक्ष्ण्यातिशयाद्दाहदायि दाहकारि आहृतं आनीतं तद्राजिकाराद्धमभोजीति पूर्व्वेणान्वयः। तुपारभानोः सकाशादाहृतमिति वा। क इव। खल इव। किम्भूतः। पूर्व्वं सुहृदापातरमणीयस्ततोऽनन्तरमहितो वैरी। राथी इति कान्यकुब्जभाषायां। सोहरया इति दाक्षिणात्यभाषया राजिकानां नाम ॥ ७४ ॥

नवाविति। वयःसन्धौ वर्त्तमानौ नवावप्रगल्भौ अत एव निजभावगोपिनौ स्वानुरागापह्नवपरौ कौचिद् युवानौ अभूमिषु लोकव्यवहारायोग्येषु स्वयोग्येषु वा अनुद्देशेषु वा वस्तुषु प्राक् पूर्व्वं विहितः कृतः भ्रमेर्निरर्थकभ्रमणस्य क्रमः परम्परा यत्र येन वा एवम्भूतं दृशोर्नेत्रयोस्त्रिभागं तृतीयांशरूपं कटाक्षं अन्योन्यमुखे पुनः पुनः विधत्तः स्म चक्रतुः यदृच्छया किल। अन्यविलोकनवत् स्वेच्छामात्रेण क्रमसमागमन्योन्यमुखविलोकनं

व्यधुस्तमां ते मृगमांससाधितं
रसादशित्वा मृदु तेमनं मनः ।
निशाधवोत्सङ्गकुरङ्गजैरदः
पलैः सपीयूषजलैः किमप्यपि ॥ ७६ ॥
परस्पराकूतजदूतकृत्ययो-
रनङ्गमाराद्धुमपि क्षणं प्रति ।

कुरुतः न त्वनुरागेणेति लोकप्रतीतिर्यथा स्यादेवं वस्त्वन्तरवि-लोकनव्याजेनान्योन्यमुखं कटाक्षैर्वीक्षांचक्राते इति भावः । त्रि-भागमिति पूर्ववत् समर्थनीयम् ॥ ७५ ॥

व्यधुरिति । ते जन्यजना मृगमांसैः साधितं राद्धं संस्कृतं मृदु तेमनाख्यं व्यञ्जनविशेषं रसात् प्रीत्याऽशित्वा भुक्त्वा इति मनो व्यधुस्तमां नितरां चक्रुः । इति किं । अदः तेमनं निशा-धवश्चन्द्रः तस्योत्सङ्गे वर्त्तमानः कुरङ्गो हरिणस्तस्माज्जातैः सपीयूषजलैः अमृतरूपैः जलैः सह वर्त्तमानैः पलैर्मांसैरपि किं अपाचि किं । रसातिशयान्मनसा एवं तर्कितवन्तस्ते इत्यर्थः । तेमनस्यातितरां स्वादुत्वमुक्तम् । अपि । आ पाके इत्यस्मात् कर्मणि चिणि घटादित्वान्मित्वाद्ध्रस्वः ॥ ७६ ॥

परस्परेति । परस्परस्याकूतात् चेष्टाविशेषादेव जातं दूत-कृत्यं सम्भोगसम्मतिर्ययोः कयोश्चिद्यूनोः स्त्रीपुंसयोरनङ्गमाराद्धुं सुरतं कर्त्तुं यः क्षणः समयस्तं प्रति उद्विग्न सदा क्रियमाण-नियमापेक्षया कियच्चिरायुषा कियच्चिरं किञ्चिदधिककाल-

निमेषणेनैव कियच्चिरायुषा
जनेषु यूनोरुदपादि निर्णयः ॥ ७७ ॥
अहर्निशा वेति रताय पृच्छति
क्रमोष्णशीतान्नकरार्पणाद्विटे ।
स्त्रिया विदग्धा किल तन्निषेधिनी
न्यधत्त सन्ध्यामधुरेऽधरेऽङ्गुलीम् ॥ ७८ ॥

मायुर्वर्त्तमानता यस्यैवंभूतेन कियच्चिरकालस्थायिना निमेषेणैवाक्षिपक्ष्मसङ्कोचेनैव कर्त्रा करणेन वा जनेषु मध्ये बहुजनेषु वर्त्तमानेषु सत्सु अपि निर्णयः निश्चय उदपादि हतः जातो वा। कदा सम्भोग इति इङ्गितेन पृष्टे सति नेत्रे निमील्य किञ्चित्कालं स्थित्वा जने निद्राणे सति आगन्तव्यमिति रात्रिः सङ्केतसमय इति निरणायीति भावः। उदपादि। चिण्तेपद इति (पा०३।१।६०) कर्त्तरि कर्म्मणि वा चिण् ॥ ७७ ॥

अहरिति। विटे कामुके रताय आवयोः सम्भोगं कर्त्तुं अहर्निशा वेति उष्णकरघर्म्मोपलक्षितं दिनं वा शीतांशुकरैर्योपलक्षिता रात्रिर्वा समय इति क्रमेणोष्णशीतयोरन्नयोरुपरि करार्पणादेव चेष्टितात् कामपि पृच्छति सति विदग्धा चतुरा तत्प्रश्नाशयज्ञा स्त्रियोपलक्षिता अनन्तरमिङ्गितेनैव तन्निषेधिनी तयोर्दिननिशयोर्निषेधं कुर्व्वाणा सन्ध्यावन्मधुरे रमणीयेऽधरे स्वीयोष्ठेऽङ्गुलीं न्यधत्तास्थापयत्। अनभिमतमर्थं निषेधन्तः स्थिता सतः किमेवं ज्ञातमित्याद्यभिधायाधरेऽङ्गुलीं स्थाप-

क्रमेण कूरं सुभ्रतोक्षणः पदं
सिताञ्च शीतां चतुरेण वीचिता।
दधौ विदग्धारुणितेऽधरेऽङ्गुली-
मनौचितीचिन्तनविस्मितं किल ॥ ७९ ॥
कियत् त्यजन्नोदनमानयन् कियत्
करस्य पप्रच्छ गतागतेन यां।

यन्तीति जातिः। किल प्रसिद्धं। लोकस्य चैवमेव प्रतीतिर्जाता। सा तु तन्निषेधव्याजेन दिने रात्रौ वा अनवसरः सन्ध्यैव रतसमय इत्यकथयदिति भावः। यद्वा दिने सूर्यालोकात् रात्रौ चन्द्रालोकात् द्वयमप्यनुचितं। किन्तु महान्धकारमलिना सन्ध्यैव रन्तुं योग्येति भावः॥ ७८॥

क्रमेणेति। अयं श्लोकः क्षेपकः। कूरं भक्तं सितां शर्करां। किमिदमनेनानुचितं क्रियत इत्यनौचितीचिन्तनेन विस्मितं किल विस्मितेव। अरुणिते यावकेनेत्यर्थः। भावः स एव॥ ७९॥

कियदिति। कृतसुरतकालनिर्णयः स एव युवा कियदन्वं ओदनं पुरःस्थितां वीक्ष्य त्यजन् पात्रे स्थापयन् कियदोदनं च सम्प्रति पुनरानयन् सन् करस्य भक्तपुरस्थागवशात् पुरोगमनेन सम्प्रति भक्तानयनवशादागमनेन च क्रमेण त्वां प्रत्यहं किमेष्यामि त्वं वा मां प्रति किमेष्यसीति यां पप्रच्छ सा आननं नम्रं व्यधत्त लज्जया किल। किलेत्यलीके। लोकप्रतीतौ अनया लज्जया मुखं नमीकृतं इति। तत्वतस्तु मुखनमीकरणेनाहमा-

अहं किमेष्यामि किमेष्यसीति सा
व्यधत्त नम्रं किल लज्जयाननं ॥ ८० ॥
यथामिषे जग्मुरनामिषभ्रमं
निरामिषे चामिषमोहमूहिरे।
तथा विदग्धैः परिकर्म्मनिर्म्मितं
विचित्रमेते परिहस्य भोजिताः ॥ ८१ ॥
नखेन कृत्वाधरसन्निभां निभाद्
युवा मृदुव्यञ्जनमांसफालिकां।

गमिष्यामीति सन्दर्शितवतीति भावः। तं वीच्य मुखं नम्रीकृत्य स्वचरणौ पश्यन्ती त्वमेवागत्य मच्चरणयोर्निपतेति वा भावः। भोजनसमये भोक्ता कियन्तं ओदनं विभज्य स्थापयति कियन्तं दध्यादिना सह भोक्तुं गृह्णातीति जातिः। कियन्तं त्यजन् बहु-त्वात् पुनर्ददानः कियन्तञ्च पुनः पात्रं प्रत्यानयन्निति वा ॥ ८० ॥

यथेति। वारयात्रिका यथा येन प्रकारेणामिषे मांसे अनामिषस्यामिषाद्यन्नस्य भ्रमं जग्मुः, यथा येन प्रकारेण निरा-मिषे मांसलेशवर्जितेऽपि तेमनादौ रूपस्वादादिभिः आमिष-मोहं मांसभ्रमं ऊहिरे तर्कितवन्तः तथा तेन प्रकारेण विद-ग्धैर्निंतरां कुशलैःसूपकारैः कर्तृभिः एते वारयात्रिकाः परि-कर्म्मभिः साधनद्रव्यैर्निर्म्मितं चित्रमन्नं परिहस्य पूर्व्वोक्तं भ्रम-निमित्तं परिहासं भोजिताः ॥ ८१ ॥

नखेनेति। कश्चिद् युवा मृद्वीं व्यञ्जनमांसस्य फालिकां खण्डं

ददंश दन्तैः प्रशशंस तद्रसं
विहस्य पश्यन् परिवेषिकाधरं ॥ ८२ ॥
अनेकसंयोजनया तथा कृते-
र्निकृत्य निष्पिष्य च तादृगर्जनात् ।
अमी कृताकालिकवस्तुविस्मयं
जना बहु व्यञ्जनमभ्यवाहरन् ॥ ८३ ॥

नखेन कृत्वा निभात् व्याजात् अधरसन्निभां श्रोष्ठाकारां द्विधा कृत्वा पूर्व्वमधरसदृशीमपि नखेन द्विधा कृत्वा, मध्ये नखेन रेखाकरणान्नितरां मध्यस्थितरेखाधरसदृशीं वा कृत्वा दन्तैर्ददंश परिवेषिकाधरं मांसव्यञ्जनदायिन्याः अधरं पश्यन् विहस्यैतादृशी स्वादुतरा मांसफालिका कदापि नोपभुक्तेत्यादिप्रकारैस्तस्याः फालिकायाः सुस्वादुतां प्रशशंसास्तावीच । स्वादुतरं त्वदीयाधरमेव दशामीति इमतस्मिन्मांसखण्डे तदधरतामारोपयन् स्वाशयं तामज्ञापयदिति भावः ॥ ८२ ॥

अनेकेति । अमी जना वारयात्रिका बहु मूलकन्दपुष्पपत्रफलादिरूपं शाकादिव्यञ्जनमभ्यवाहरन् बुभुजिरे । किं विधं । *अनेकेषां नानाविधमरीचादिद्रव्याणां संयोजनया सम्बन्धेन* तथा कृतेः वस्त्वन्तरस्येव गन्धरसादिकरणात् तादृग्रसादिनिर्म्माणात् तथया निकृत्य नितरां कर्त्तित्वा निष्पिष्य चूर्णीकृत्य त्वाकारमाम्यादिना तादृगर्जनात् वस्त्वन्तरसादृश्यस्य सम्पादनात् रूपान्तरेण गन्धादिकारणाद्धेतोः कृतः आकालिकेऽसम-

पिपासुरस्मीति विबोधिता मुखं
निरीक्ष्य बाला स्फुरितेन वारिणा ॥
पुनः करे कर्त्तुमना गलन्तिकां
हसात् सखीनां सहसा न्यवर्त्तत ॥ ८४ ॥

यत्प्रभवे वस्तुनि विस्मय आश्चर्य्यं येन इति क्रियाविशेषणं वा। तथा आकृतेः आकारादिति वा। फलादि कर्त्तिला राजिकादध्यादिसंयोगाद्रसान्तरोत्पत्तिस्तथा रूपान्तरापत्तिश्च। गोधूमादि पिष्टा शर्करासम्बन्धाद्रसान्तरोत्पत्तिरित्यादिवैदग्ध्याद् भोक्तॄणां विस्मयोऽधिवासनविशेषाच्चाकालिकभ्रमो युक्तः ॥ ८३ ॥

पिपासुरिति। वारिणा अमुना स्फुरितेन हृष्टेन विटेन मुखं निरीक्ष्याहं पिपासुः पातुमिच्छुरस्मि इति विबोधिता विज्ञापिता बालाऽबुद्धवक्रोक्त्याद्यभिप्रायविशेषा अप्रौढा पुनरपि करे गलन्तिकां पात्रं सुवर्णभाजनं कर्त्तुमनाः सती तदाशयज्ञानामतिचतुराणां सखीनां हसाद्धासाद्धेतोः सहसा झटिति सुप्तप्रबुद्ध इव जलपायनारम्भसम्भ्रमान्न्यवर्त्तत पराहृत्ता। सहसा सस्मिता सतीति वा। कर्मान्तरपरित्यागेन सामान्येन पिपासुरस्मीति वदन्नयमेतदीयाधरं पिपासुरस्मीत्येतदाशयमियं न जानातीति सखीभिः कृताद्धासादियमपि तदाशयं ज्ञात्वा गलन्तिकां पुनर्नीत्यापयदिति भावः। पूरणगुणेत्यादिना (पा०२।२।११) स्फुरितार्थयोगे षष्ठीसमासनिषेधादेव वारिणेति तृतीया ॥ ८४ ॥

युवा समादित्सुरमत्रगं घृतं
विलोक्य तत्रैणदृशोऽनुबिम्बनं।
चकार तन्नीविनिवेशितं करं
बभूव तच्च स्फुटकण्टकोत्करम्॥ ८५॥
प्रलेहजस्नेहकृतानुबिम्बनां
चुचुम्ब कोऽपि स्मितभोजनस्थलः।

युवेति। अमत्रगं पात्रस्थं घृतं समादित्सुर्ग्रहीतुकामः कश्चित् युवा तत्र घृते एणदृशः पुरस्थाया मृगाक्ष्याः परिवेषिकाया अनुबिम्बनं प्रतिबिम्बं विलोक्य करं स्वहस्तं तस्य बिम्बस्य नीविषु भङ्गीनिबद्धनाभिचुम्बितवस्त्रविच्छित्तिषु निवेशनशीलं चकार तत्रास्थापयदित्यर्थः। तच्च तस्याः प्रतिबिम्बं स्फुटाः कण्टकोत्करा यस्मिन् सरोमाञ्चमभूदित्यर्थः। स्वप्रतिबिम्बनीविग्रन्थिमोचनार्थं नाभिनीविमविधे स्पर्शकारिणस्तत्करस्य चेष्टां दृष्ट्वा तस्य स्वसम्भोगवासनां ज्ञात्वा तदानीमेतस्मिन्ननुरागाद्रोमाञ्चिताभूत् तादृश्याश्च प्रतिबिम्बितत्वात् प्रतिबिम्बमपि रोमाञ्चितमभूदिति भावः। द्वयोरप्यनुरागस्तुल्यो जात इति भावः॥ ८५॥

प्रलेहेति। कोऽपि विटः लिह्यत इति लेहः प्रकृष्टो लेहः प्रलेहः सरणादिद्रव्ययुक्तः आर्द्रकादिसंस्कृततक्रादिनिर्मितो द्रवद्रव्यविशेषः तस्माज्जाते स्नेहे तैलादौ कृतमनुबिम्बनं यया कृतं स्मितमनुबिम्बनं यस्या वा एवंविधां पुरस्थां सुन्दरीं, स्मितं

मुञ्जः परिस्पृश्य कराङ्गुलीमुखै-
स्ततोऽनुरक्तैः स्वमवापितैर्मुखं ॥ ८६ ॥
अराधि यन्मीनमृगाजपत्त्रिजैः
पलैर्मृदु स्वादु सुगन्धि तेमनम्।
अशाकि लोकैः कुत एव जेमितुं
न तत्तु सङ्घ्रातुमपि स्म शक्यते ॥ ८७ ॥

भोजनस्थलं येन एवंविधः सन् प्रतिबिम्बितां तामेव कराङ्गुली-मुखैः कराङ्गुल्यग्रैर्मुञ्जः परिस्पृश्य स्पृष्ट्वा चुचुम्ब। कीदृशैः। स्वमुखं समवापितैस्तया रक्तैः स्वभावात् उष्णस्य तस्य स्पर्शाद्वा ततोऽनु तस्मादनुरागात् किं। अङ्गुल्यग्रैः रक्तत्वादनुरागाच्चुम्बिता। किमुत्प्रेक्षा। रिक्तैरिति पाठे मुञ्जः परिस्पृश्य ततोऽनु तदनन्तरमेव रिक्तैः प्रलेहशून्यैरेव स्वमुखं प्रापितैः कराङ्गुलीमुखैश्चुचुम्बेत्यर्थः। प्रलेहेति। वटकादिनिक्षेपात् तैलादिबिन्दवस्सरन्ति तत्र जातं प्रतिमुखं प्रतिबिम्बमङ्गुल्या स्पृशति तत्र प्रलेहचलनात् प्रतिबिम्बभङ्गभयात् अङ्गुल्यग्रैर्लेहनछलात् परम्परया चुम्बितवानिति भावः। तां प्रति स्वानुरागमदर्शयदिति भावः ॥ ८६ ॥

अराधीति। मीनेभ्यः मत्स्येभ्यः चित्रकादिमृगेभ्यः अजेभ्यः छागेभ्यः पत्त्रिभिस्तित्तिरलावकादिभक्ष्यपक्षिभिश्च जातैः पलैर्मांसैर्मृदु स्वादु सुगन्धि पाकेन परिमलविशेषयुक्तञ्च यत्तेमनाख्य व्यञ्जनं सूपकारैरराधि साधितं तद्दाऊल्यास्तैः लोकैः सङ्घ्रा-

कृतार्थनश्चाटुभिरिङ्गितैः परा
परास्ति यः किञ्चनकुञ्चितभ्रुवा ।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः
पुनः प्रसन्नाननयाऽन्वकम्पि सः ॥ ८८ ॥
अकारि नीहारनिभं प्रभञ्जना-
द्धूपि यच्चागरुसारदारुभिः ।
निपीय भृङ्गारकसङ्गि तच्च तै-
रवर्णि वारि प्रतिवारमीदृशम् ॥ ८९ ॥

तुमपि न शक्यते स्म । जेमितुं तु पुनः कुत एव अशाकि, अपि तु भोक्तुं शक्यं नाभूदेव । जेमितुं । जिमु अदने ॥ ८७ ॥

कृतेति । किञ्चन किञ्चित्कुञ्चिते वक्रीकृत्योत्क्षिप्ते भ्रुवौ यया कयाचित्तदिङ्गितैरञ्जलिबन्धादिचेष्टितैः चाटुभिः प्रियवचनैश्च कृताऽर्थना सम्भोगप्रार्थना येन तथाविधो यो विटः पुरा पूर्वं परास्ति निरस्तः प्रसन्नाननया सरसदृष्टिव्यञ्जितप्रसादमुख्या तया भोजनलीलया ग्रासमिषेण मुखेऽङ्गुलीः प्रक्षिपन् अङ्गुली-संस्पर्शेन तां प्रतिदीनत्वं सूचयन् स पुनरन्वकम्पि अनुगृहीतः तद्दैन्यं दृष्ट्वा सम्भोगस्तयाऽनुमत इति भावः ॥ ८८ ॥

अकारीति । यद्वारि प्रभञ्जनात् व्यजनादिवायुसङ्गाद्धेतोः नीहारनिभं तुषारतुल्यमकारि यच्च अगरुसारस्य कृष्णागरो-र्दारुभिरधूपि धूपितम्भृङ्गारके सुवर्णपानपात्रे सङ्गः स्थितिर्यस्या-स्तीति तद्वारि । तत्र भोजनावसरे भीमगृहे वा निपीय नितरां

त्वया विधातर्यदकारि चामृतं
कृतञ्च यज्जीवनमम्बु साधु तत्।
वृथेदमारम्भि तु सर्व्वतोमुखं
तथोचितः कर्त्तुमिदंपिबस्तव ॥ ९० ॥

पीत्वा तैर्जलैः प्रतिवारं पुनः पुनरीदृशं वक्ष्यमाणप्रकारेणावर्णि अस्तावि। प्रतिवारं निपीयेति वा। अगरुरित्येव पाठः। भृङ्गारः कनकालुकेत्यमरः। अल्पत्वे कन् ॥ ८९ ॥

जलवर्णनमेवाह। त्वयेति। हे विधातः त्वया च अम्बु उदकं यदमृतमन्वर्थं अकारि यच्च जीवनमन्वर्थमकारि तद्द्वयमपि साधु उचितमेव कृतम्। अमृततुल्यरसत्वात्प्राणधारणहेतुत्वाच्चान्वर्थत्वाद्युक्तमेवैतत् तस्य मन्वर्थादेयमित्यर्थः। तु पुनरिदं सर्व्वतोमुखमन्वर्थं त्वयाऽऽरम्भि कृतं अन्वर्थत्वाभावान्निरर्थकमेतत् कृतं। यस्मादिदं जलं पिबति इद पिबोऽस्मदादिपुरुषस्तथा सर्व्वतः सर्व्वदिक्षु मुखानि यस्यैवविधस्तव कर्त्तुमुचितः अस्मदादेर्बहूनि मुखानि सर्व्वेष्ववयवेषु त्व चेदकरिष्यत् तर्हि अस्मदादिरिदमा त्वन्निं पातुमशक्ष्यत् न त्वेकेन मुखेनेति। नितरां शैत्यमाधुर्य्यादिगुणयुक्तमेतदिति भावः। तौ तुल्ययोगत्वद्योतकौ। पयःकीलालममृतं जीवनं भुवनं वनं। पुष्करं सर्व्वतो मुखमित्यमरः। इदंपिबः। "पाघ्राध्मादिना (पा० ३।१। १३७) शः ॥ ९० ॥

सरोजकोशाभिनयेन पाणिना
स्थितेऽपि कूरे मुहुरेव याचते।
सखि त्वमस्मै वितर त्वमित्युभे
मियो न वादाद्ददतुः किलौदनम् ॥ ८१ ॥
इयं कियच्चारुकुचेति पश्यते
पयःप्रदाया हृदयं समावृतम् ।

सरोजेति। उभे सख्यौ इति मिथो वादाद् द्वैमत्यात् किलौदनं न ददतुः किलेति व्याजे। इति किं। हे सखि त्वं पात्रमध्ये कूरे ओदने स्थितेऽपि सरोजकोशवदभिनयः आकारो यस्य स्तनवराङ्गप्रार्थनासूचकेन पाणिना कूरं याचतेऽस्मै कामुकाय कूरं वितर देहि। द्वितीया वदति त्वं वितरेति। विवदमाने कूरदापनव्याजेन तत्प्रार्थितस्तनवराङ्गदानेऽन्योन्यं प्रवर्त्तयन्त्योर्मध्ये ऽन्योन्यं लज्जावशादेकतरा रिरंसुरपि नाङ्गीचकारेति भावः। अनुवादादिति पाठे उक्तरूपादनुवादादुभे ऽपि स्वल्पमोदनं किन्न ददतुरित्यर्थः। ओदनदानव्याजेन तत्प्रार्थितदानमङ्गीचक्रुरिति भावः॥ ८१ ॥

इयमिति। पयःप्रदायाः समावृतं वस्त्राच्छन्नमपि हृदयं इति विचार्य पश्यते पृच्छते कामुकाय ध्रुवं निश्चितं मनोज्ञा अथ च परामृशतेव तस्याः करदयो मङ्गारम्भ इतेर्धारणस्य मिषेण यदस्मात्तदुत्तरं तदीयप्रश्नस्य प्रतिवचनं व्यतरत् ददौ। इति किं। इयं स्त्री कियन्तौ किम्प्रमाणौ चारू सुन्दरौ च

ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं
मिषेण भृङ्गारधृतेः करद्वयी ॥ ९२ ॥
अमीभिराकण्ठमभोजि तद्गृहे
तुषारधाराम्रदितेव शर्करा ।
इयं द्विपद्वष्कयणीपयःसुतं
सुधाह्रदात् पङ्कमिवोद्धृतं दधि ॥ ९३ ॥

कुचौ यस्या सेति। सुवर्णकलशीपरिमाणौ सुवर्णवर्णौ चैतस्याः कुचाविति तं प्रत्यसूचयदिति भावः। उभावपि मिथोऽनुरागादन्योन्यविलोकनपरावेव तस्थतुरिति भावः। अन्योन्यमभिप्रायज्ञः केनचिन्निषेण प्रश्नोत्तरं ददाति ॥ ९२ ॥

अमीभिरिति। अमीभिर्जन्यजनैस्तद्गृहे भीमगृहे आकण्ठं अतिबहु यथा शर्कराभोजि भुक्ता। तुषारधारया हिमोदकेन म्रदितेव मिश्रितेव। तथा इयं द्विपन्त्या अश्ववैरिण्या महिष्या बष्कयिण्याः चिरप्रसूतायाः पयो दुग्धं तस्मात् सुतं जातदुग्धपरिणामभूतं दध्यप्यभोजि। सुधाह्रदादमृतस्यागाधजलाशयादुद्धृतं पङ्कमिवेत्युत्प्रेक्षा। शर्कराऽतिमोता शुभ्रा च दध्यप्यमृतवत् स्वादु शुभ्रं घनं चेति भावः। तद्गृहे ऽमीभिर्विशिष्टं दध्यभोजि। तुषारधारया म्रदिता अल्पकरणत्वं मापिता शर्करेव सुधाह्रदादुद्धृतं पङ्कमिवेति दधिविषयमेवोत्प्रेक्षा द्वयं वा। दध्नः शैत्यं शौक्ल्यं स्वादुत्वं घनत्वं च सूचितं। एतेन पयः शृतमिति पाठे शर्करा अभोजि। शृतं पक्वं तप्तं महिषीपयश्चाभोजि दधि

तदन्तरन्तः सुषिरस्य विन्दुभिः
करम्बितं कल्पयता जगत्कृता।
इतस्ततः स्पष्टमचोरि मायिना
निरीक्ष्य तृष्णाचलजिह्नतां धृता ॥ ८४ ॥

चाभोजि इति सम्बन्धः। चिरप्रसूता वष्कयिणीत्यमरः। महिष्या दधि स्वादुतरं भवति। द्विपःप्रतुर्वेति वचनात् इयं द्विपन्तीति द्वितीयया द्वितीयाश्रितेति (पा०२।१।२४) योगविभागात् समासः। द्विपद्वष्कयिणी। पुंवत्कर्मेत्यादिना (पा०६।३।४२) पुंवद्भावः। शृतं। शृतं पाके (पा०६।१।२७) इति साधुः ॥ ८३ ॥

तदन्तरिति। तद्दधि निरीक्ष्य मातिशयात् तृष्णया ग्रास-वासनया चला चञ्चला अधरप्रान्तलेहिनी गलज्जला जिह्वा यस्य तस्य भावस्तत्ता तां धृता बिभ्रता, तथा अन्तरन्तर्मध्ये मध्ये सुषिरस्य छिद्रस्य विन्दुभिः राशेः शिर इतिवद्भेदो-पचाराच्छिद्ररूपैर्विन्दुभिः करम्बितं मिश्रितं व्याप्तं तद्दधि कल्पयता कुर्वता जगत्कृता इतस्ततः सर्वप्रदेशेभ्यस्तद्दधि स्पष्ट-मचोरि प्रकटमपहृतं, स्पष्टं सम्भावनायां अपहृतमिवेत्यर्थः। अपहरत्कथं न दृष्ट इत्यत आह। यतो मायिना। अदृ-श्यतयाऽपहृतमित्यर्थः। सफेनचौरस्य दध्याकारेण परिणामे दधनि छिद्राणि दृश्यन्ते। ब्रह्मणा अदृश्यतया दधनि वर्त्त-मानः सारो भोक्तुमिच्छया गृहीतः, अन्यथा छिद्राणि कथं दृश्यन्ते। अन्येन ग्रहीतुं न शक्यते इति तत्रोत्प्रेक्षा। येन

दृदासि मे तन्न रुचेर्यदास्पदं
न यत्र रागः सितयापि किं तया ।
इतीरिणे बिम्बफलं पलच्छला-
ददायि बिम्बाधरयारुचच्च तत् ॥ ९५ ॥

निर्मितं तस्य ब्रह्मणोऽपि जिह्वा चास्यास्यनिर्माणात् स्वादुतमं दधीति ध्वन्यते ॥ ९४ ॥

ददासीति । बिम्बफलतुल्यो ऽधरो यस्यास्तया सुन्दर्या पलव्याजात् मांसव्याजाद् बिम्बसञ्ज्ञफलं परिवेषितं मांसखण्ड-मेव बिम्बाकारं कृत्वा इतीरिणेऽधरचुम्बनवासनया भाषमा-णाय विटाय अदायि दत्तं । तत् बिम्बाकारं फलं तस्मा अरु-चच्च स्वदितमित्यर्थः । मदभिप्रायं ज्ञात्वा स्वीकारपुरःसरं पलरूपबिम्बव्याजान्निजाधरदानमेव प्रतिज्ञातमिति सन्तुष्टो ऽभूदिति भावः । इति किं । हे बिम्बोष्ठि यद्रुचेः प्रीतेरास्पदं यत्र वस्तुनि मम प्रीतिः तन्मे मह्यं त्वं न ददासि । यद्वा यद्रुचे-रास्पदं न भवति तन्मह्यं न ददासि । तथा मम यस्यां रागः प्रीतिर्नास्ति तया सितयापि शर्करयापि किं अपि तु न किञ्चित् प्रयोजनं । माधुर्य्यमर्य्यादयापि शर्करयापि प्रयोजनं नास्त्यभि-लाषाभावात् । अन्येन नास्तीति किं वाच्यमित्यपिना सूच्यते । अथ च यत्र लौहित्यं नास्ति तया श्वेतया प्रकरणाच्छर्करयापि किं । तस्मान्मे यत्रानुरागो रक्तिमकान्तिश्च तन्मह्यं देहीति । एवं तयेति पाठे तया पूर्य्यतां । पलच्छलादिति पाठे फलदान-

समं ययोरिङ्गितवान् वयस्ययो-
स्तयोर्विहायोपहृतप्रतीङ्गिता।
अकारि नाकूतमवारि सा यया
विदग्धयाऽरञ्जि तयैव भाववित्॥ ८६॥

प्रसङ्गव्याजात्। बिम्बाकारोऽधरो यस्या इति सप्तम्युपमानेत्यादिना (पा०२।२।२४।वा०५) नोत्तरपदलोपी समासः। अरुचत् पुषादित्वादङ् (पा०३।१।५५)। द्युद्भ्यो लुङीति (पा०१।३।९१) परस्मैपदम्॥ ८५॥

सममिति। यो ययोर्वयस्ययोः सख्योर्विषये स्वाभिप्रायज्ञापनार्थं समं युगपत् इङ्गितवान् भ्रूक्षेपादिचेष्टितवान् अभूत् स तयोर्मध्ये उपहृतं कृतं प्रतीङ्गितं तदभिलाषस्वीकारसूचकप्रतिचेष्टितं यया तामेकां विहाय स्थितः सन् तयैवारञ्जि द्वितीययैव प्रत्यनुरञ्जितः। तया कया। यया चतुरया विदग्धया आकूतं प्रतीङ्गितं नाकारि प्रतीङ्गितं कुर्वाणा सा सखी जनसमक्षमिङ्गितकरणमयुक्तमित्यवारि निषिद्धा। यतो भाववित् वैदग्ध्यस्य वेत्ता। द्वितीयया तदिङ्गितदर्शनात्तस्मिन्ननुरागाद्धलिता प्रतीङ्गितं नाकरोत् जनसमक्षमेतदनुचितमिति व्याजेन सखिप्रियं प्रतीयमिङ्गितं किमिति करोतीति मात्सर्येर्ष्यया च तां वारितवतीति तस्या वैदग्ध्यं। स च तदीयगुणभावज्ञानाद्भाववित् सहचरीसमक्षमिङ्गितं कुर्वाणा इयमपि चतुरा। द्वितीया इङ्गितं नाकरोत्ताश्च न्यवारयदिति इयमेव चतुरा

सखीं प्रति स्माह युवेङ्गितेक्षणी
क्रमेण तेऽयं क्षमते न दित्सुताम्।
विलोम तद्व्यञ्जनमर्प्यते त्वया
वरं किमस्मै न नितान्तमर्थिने॥ ९७॥

मय्यनुरक्ता चेति स चतुरो द्वितीयस्यामेवानुरक्तोऽभूदिति भावः। विहाय स्थितः सन् इति योजना। अन्यथा हानस्य पुरुषःकर्त्ता रञ्जनस्य स्त्रीतिभिन्नकर्तृत्वात्क्त्वा न स्यादिति। अरज्जि स्वान्ताधिप॥ ९६॥

सखीमिति। यून इङ्गितं चेष्टां ईक्षते एवंशीला काचित् स्वसखीं प्रत्याह स्म इत्यवोचत्। हे सखि यस्मादयं क्रमेण परिपाट्या ते दित्सुतां तत्कर्तृकां व्यञ्जनस्य दातुमिच्छुतां न क्षमते तस्मात्त्वया नितान्तमतिचञ्चलतयाऽर्थिने याचकायास्मै यूने वरं श्रेष्ठं अभीष्टं तत्तेमनादि व्यञ्जनं विलोम विपरीतं क्रमरहितं यथा तथा किं नार्प्यते न दीयते अपि तु सर्वव्यञ्जनायास्मै युगपत् दीयतामिति श्लेषोक्तिः। अथवा आलिङ्गनचुम्बनादि वात्स्यायनपरिपाट्या तव वराङ्गदानेच्छुतां न सहते तस्मादतितरलतयाऽर्थिने सम्भोगविलम्बनासहमानायास्मै वरं केवलं श्रेष्ठं वा न विद्यते वरं श्रेष्ठं यस्मात् [illegible] रहितं तद्गगनचलं व्यञ्जनं [illegible]मिति [illegible] र्प्यते अपि सर्वथैवेत्युपहासः। अतिशयोक्ति[illegible] व्यञ्जनविशेषो वा। व्यञ्जनं भाव[illegible]

समाप्तिलिप्स्येव भुजिक्रियाविधे-
र्दलोदरं वर्त्तुलयाऽऽलयीकृतम्।
अलङ्कृतं चीरवटैस्तदश्नतां
रराज पाकार्पितगैरिकश्रिया ॥ ९८ ॥

त्यमरः। नितरां नातमिति पक्षे अनुनासिकस्य क्वीति (पा० ६। ४।१५) दीर्घः ॥ ९७ ॥

समाप्तीति। चीरवटैर्दुग्धमध्यचिह्नैर्माषमाधितैर्वटकाख्यैः पक्वान्नविशेषैः सम्बन्धादलङ्कृतं तत्पूर्व्वोक्तं वटकव्यतिरिक्तव्यञ्जनं वर्त्तुलया वृत्ताकारया पाकेन तप्तस्नेहदारकाग्निसंयोगेनार्पितया निर्म्मितया गैरिकश्रिया शैलरक्तधातोरिव श्रिया वटकानामेव शोभया रराज। विशिष्टवटकसम्बन्धाद् व्यञ्जनान्तरं रेज इत्यर्थः। विशिष्टया श्रियोपलक्षितैः चीरवटैरलङ्कृतं सत् रेज इति वा। किमिव अश्नतां भुञ्जानानां तेषां भुजिक्रियाविधेः भोजनविधेः समाप्तेः। वटकदर्शनमात्रेणान्यत्र रुच्यभावाद् व्यञ्जनान्तरविरतेः सम्बन्धिन्या लिपा समाप्तिसूचिकया छकाररूपपुष्पिकारूपया आलयीकृतं आस्पदीकृतं दलोदरं श्रीनालादिपत्रमध्यमिवेत्युपमोत्प्रेक्षा वा। वर्त्तुलया वृत्तया समाप्तलिप्या श्रितं। पाकेन वासकेनार्पितया गैरिकश्रियालङ्कृतं दलोदरमिति वा योज्यं। पोतःपाकोऽर्भक इत्यमरः। ग्रन्थलेखनसमाप्तिपक्षे समाप्तिसूचकं छकारादिवर्त्तुलमक्षरं दाक्षिणात्यैः क्रियते गैरिकचिह्नितश्च क्रियते, एवं भोजनसमाप्तिसूचकं चीरवटकादि इति ॥ ९८ ॥

चुचुम्ब नोर्वीवलयेर्वशीं परं
पुरोऽधिपारि प्रतिबिम्बितां विटः।
पुनः पुनः पानकपानकैतवा-
च्चकार तच्चुम्बनचक्कृतान्यपि ॥ ९९ ॥
घनैरमीषां परिवेषकैर्जनै-
रवर्षि वर्षोपलगोलकावली।

चुचुम्बेति। कश्चिद्विटः पुरोऽग्रे अधिपारि पानकरसपूर्णे सुवर्णादिपानपात्रे प्रतिबिम्बितां उर्वीवलये उर्वशीमिवातिसुन्दरीं कांचित्परं केवलं चुचुम्बेति न किन्तु पुनः पानकस्य द्राक्षादिसाधितमधुररसप्रधानपेयद्रव्यरूपस्य यत्पानं तस्य कैतवात् प्रतिबिम्बितायाः तस्याः चुम्बनस्य सम्बन्धीनि चुक्कृतानि चुमिति पानकानुकरणशब्दस्तस्य करणान्युच्चारणानि तान्यपि चकार। चुम्बनादिना तस्यां स्वानुरागं प्रकटीचकारेति भावः। अमरोयर्वरी पारी पानपात्रकमुच्यत इति क्षीरस्वामी। सप्तम्यर्थेऽव्ययीभावः। चुक्कृतानि नपुंसके भावे क्तः ॥ ९९ ॥

घनैरिति। घनैर्बहुभिः परिवेषकैरनेकव्यञ्जनदायिभिर्जनैरथ च तैरेव घनैर्मेघैरमीषां भुञ्जानानां राज्ञां कृते वर्षोपलाः करकास्तत्तुल्यानामेलाकर्पूरशर्करालवङ्गतण्डुलपिष्टरचितानां गोलकानामतिरक्तानां लड्डुकाविशेषाणामथ च करकारूपाणां गोलकानामावलीपङ्क्तिरवर्षि वितीर्णा दृष्टा च। कीदृशैः। परिवेषणकर्मशालाललक्ष्मी या भुजास्तासां भूषणेषु

चलद्भुजा भूषणरत्नरोचिषा
धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ १०० ॥
कियद्बहु व्यञ्जनमेतदर्प्यते
ममेति तृप्तैर्वदतां पुनः पुनः ।

रत्नानि तेषां रोचिषा कान्त्या इत्वा धृतमिन्द्रचापं यैर्नाना-प्रकारकान्तिभिरित्यर्थः । अथ च तदेवेन्द्रचापो येषु । कीदृशी। श्रितं चान्द्रं कर्पूरसम्बन्धि सौरभं सौगन्ध्यं यया । अथ च चन्द्र एव चान्द्रः सूर एव सौरस्तयोर्भा श्रिता चान्द्रसौरभा यया । सा शीतत्वदीप्तत्वाभ्यां चन्द्रसूर्यसदृशीत्यर्थः । रात्रिदिनयोर्जा-यमानत्वाद्वा क्रमेण तत्कान्तिसदृशी। चन्द्रसम्बन्धिनश्चान्द्राश्चन्द्र-कान्ताः एवं सौराः सूर्यकान्तास्तेषां भा श्रिता यया वा । चन्द्र-सम्बन्धि मनोज्ञत्वं सादृश्यं श्रितं ययेति वा। विश्वप्रकाशे सुरभि-शब्दो मनोज्ञवाची ॥ १०० ॥

कियदिति । एतत्तेमनादिव्यञ्जनं मम कियत् किंपरिमाणं बहु अर्प्यतेऽपितु तृप्ता वयमिति नार्पणीयमिति तृप्तैर्नेतैः पुनः पुनर्वदतां तेषां अन्यानां कियत्सङ्ख्य बह्वेतद्व्यञ्जनमर्प्यते इत्ये-तद्बहुत्वसङ्ख्येयत्ता भवद्भिः पृच्छ्यते किमिति छलेनामूनि व्यञ्ज-नानि सङ्ख्यातुं गणयितुं असौ गोलकावली भूयसी बहुतरा कठिनी खटिकेव तैः परिवेषकैरढौकि अर्पिता । भवद्भिर्व्यञ्ज-नसङ्ख्या पृष्टा तद्गणनया कठिन्या एतानि गणयतेति कठिनी वार्पितेत्युत्प्रेक्षा । इति वदताममूनि सङ्ख्यातुमिव व्याजेनासौ

अमूनि सञ्ज्ञातुमसावढौकि तैः
छलेन तेषां कठिनीव भूयसी ॥ १०१ ॥
विदग्धबालेङ्गितगुप्तिचातुरी-
प्रवल्हिकोत्पाटनपाटवे हृदः ।

बहुतरा कठिन्यर्पितेति वा योज्यं। कठिन्या च सञ्ज्ञायते एतज्ज्ञापनममूनीति ममेति वदतामिति चैकवचनबहुवचनानि जातिविवक्षया विज्ञातव्यानि ॥ १०१ ॥

विदग्धेति। कश्चित्कामुको विदग्धायाश्चतुराया बालाया मुग्धाया इङ्गितगुप्तौ चेष्टितगोपनविषये चातुरी यत्कौशलं सैव दुर्ज्ञेयत्वात् प्रवल्हिका गुप्ताभिप्रायप्रबन्धविशेषः तस्या उत्पाटने भेदने ज्ञानविषये यत्पाटवं सामर्थ्यं प्रावीण्यं तत्र विषये तदौचितीं विदग्धबालेङ्गितानामानुगुण्यं स्पृशद्भिः गतैस्तदनुरूपैराकूतशतैर्बहुभिरिङ्गितैः कृत्वा निजस्य हृदः स्वीयाभिप्रायस्य टीकां विवरणं प्रबन्धं प्रकर्षेण कृतवान्। गुप्तान्यपि मदिङ्गितानि ज्ञातवानिति चतुरोऽयमनुरक्तश्चेति तदनुगुणैः स्वीयचेष्टितैस्तां स्वाशयं बोधितवानिति भावः। बालाया अपि विदग्धसखीशिक्षया वैदग्ध्यादिङ्गितकरणं सहजमौग्ध्यात् सलज्जतया तद्गोपनञ्च युक्तं। विदग्धः कश्चन युवा बाला च काचन तयोरिङ्गितगुप्तिर्वा। यद्वा विदग्धश्चेङ्गितं बालायाश्चार्थादिङ्गितस्यैव तयोर्विषये या चातुरी तत्प्रवल्हिकोत्पाटनपाटवे विषये तयोरौचितीं स्पृशद्भिः। अत्र द्वयोरपि भवतोराशयो मया ज्ञात

निजस्य टीकां प्रववन्ध कामुकः
स्पृशन्निराकूतमतैस्तदौचितीं ॥ १०२ ॥
घृतप्लुते भोजनभाजने पुरः-
स्फुरत्पुरन्ध्रिप्रतिबिम्बिताकृतेः ।
युवा निधायोरसि लड्डुकद्वयं
नखैर्विलिखाय ममर्द निर्दयं ॥ १०३ ॥
विलोकिते रागितरेण सस्मितं
ह्रियाऽथ वैमुख्यमिते सखीजने ।

इतीङ्गितैर्ज्ञापनद्वारा अतिचतुरोऽहमेव त्वया भजनीय इति बालां प्रति स्वाशयं ज्ञापितवानिति भावः । अन्योऽपि विदग्धो ऽतिगहनायाः प्रवल्हिकाया भेदने विषयेऽनेकैराशयैर्व्याख्यां करोति ॥ १०२ ॥

घृतेति । कश्चिद्युवा घृतप्लुते आज्यपूर्णे प्रस्रुतघृते वा भोजनभाजने पुरःस्फुरन्त्या विलसन्त्याः पुरन्ध्र्याः प्रतिबिम्बिता या आकृतिस्तस्या उरसि लड्डुकद्वयं मोदकयुग्मं निधाय नखैर्विलिख, अथ यथा निर्दयं ममर्द यदाऽऽवयोर्मयोगो भावी तदैवं तव कुचावुपचरिष्यामीति त्वत्कुचनखक्षतविमर्देच्छुरस्मीति वा स्वाशयं बोधितवानिति भावः । घृतेन प्लुतं घृतप्लुतं यस्मिन्निति वा। आहिताग्न्यादित्वात् परनिपातः (पा० २।२।३७) ॥ १०३ ॥

विलोकिते इति । रागितरेण केनचित् कामुकेन सखीरूपे जने सस्मितं विलोकिते सति अथ विलोकनानन्तरं ह्रिया

तदालिरानीय कुतोऽपि शार्करीं
करे ददौ तस्य विहस्य पुत्रिकां ॥ १०४ ॥
निरीक्ष्य रम्याः परिवेषिका ध्रुवं
न भक्तमेवैभिरवाप्ततृप्तिभिः।
अशक्नुवद्भिर्वकुभुक्तवत्तया
यदुज्झिता व्यञ्जनपुञ्जराजयः ॥ १०५ ॥

वैमुख्यं पराङ्मुखत्वं इते गते सति तस्य सखीजनस्यालिः सखी कुतोऽपि कस्मादपि स्थानात् शार्करीं शर्करया रचितां पुत्रिकां आनीय विहस्य वैमुख्यात् सन्दिहानस्य करे ददौ। अधरादि-चुम्बनायाङ्गेषु शर्करातुल्यरसामेनामहमेव दास्यामि स्वहस्त-स्थितामेनां जानीहीति सञ्ज्ञां चकारेति भावः। सखीसमूहे वैमुख्यमिते सति तासां सखीनां काचित् सखी तदन्तर्वर्त्तिन्यन्या वा शार्करीं पुत्रिकां ददौ। शर्करा पुत्रिका परिवेषणेन मि-षेणाहं त्वां भजामीति स्वदानसञ्ज्ञामकरोदिति भावः इति वा। शार्करीमिति ईकारप्रत्ययः। पुत्रिका। पुत्रात्कृत्रिम इति कन् ॥ १०४ ॥

निरीक्ष्येति। बकुभुक्तवत्तया अत्याहारेणाशक्नुवद्भिर्भोक्तुम-समर्थैरेभिर्वारयात्रिकैः यस्मात्व्यञ्जनपुञ्जानां राजयः परम्परा उज्झितास्यक्तास्तस्माद्रम्याः परिवेषिका निरीक्ष्य अवाप्ततृप्ति-भिः गतक्षुधैरेतैर्भुक्तमेव न इति ध्रुवमहं मन्ये। यावत् चित्तं तावत् सर्वैव दर्शनादिषु मुग्धता। एता निरीक्ष्यावाप्ततृप्तिभिरेतैः

पृथक् प्रकारेङ्गितशंसिताशयो
युवा ययोदासि तयापि तापितः।
ततो निराशः परिभावयन् परा-
मपेतयाऽतोषि सरोषयैव सः ॥ १०६ ॥

ध्रुवं निश्चितं नैव भुक्तमिति वा। यथा लोको मन्यत इति शेषः। तथा व्यञ्जनपुञ्जपरम्पराल्यक्ताः। यथैभिर्न भुक्तमिति लोको मन्यत इत्यर्थं इति वा ॥ १०५ ॥

पृथगिति। पृथक्प्रकारैर्नानाविधैरिङ्गितैश्चेष्टितैः कृत्वा शंसितः कथित आशय अभिप्रायो येन स युवा यया स्त्रिया उदासि उदासीनीकृतः। प्रतीङ्गितेन सम्भावितयोदासीनतया तयापि तापितः व्यथितः। उदासीनो हि दुःखं न जनयति, अनयापि तु तादृश्या अपि दुःखं जनितमिति विरोधार्थो ऽपिशब्दः। ततोऽनन्तरं तस्यां निराशः तस्याः सकाशान्निराशो निर्गताभिलाषः सन् परां तदन्यां परिभावयन्निङ्गितेनानुकूलयन् सानुरागं पश्यन् स युवा सरोषया तयैव पूर्वमुदासीनयैव परितोषितो न तु द्वितीययेत्यर्थः। सरोषो हि दुःखं जनयति न तु सुखं तयापि तादृश्यापि सुखं जनितमिति विरोधादाश्चर्यं। जनसमक्षमिङ्गितकरणमयुक्तमिति तयेङ्गितं पूर्वं न कृतं स तु तदाशयमजानानोऽनुरागेणेयं प्रतीङ्गितं नाकरोदिति बुद्ध्याऽन्यामपश्यत्, ततश्च सा सपत्नीबुद्ध्या सेर्ष्या जातेति मय्यनुरक्तैवेयं पूर्वं तु गाम्भीर्यादिङ्गितं नाकरोत् सानु-

पयःसिता मण्डकमण्डलाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्ज्वलकूरहारिणी ॥ १०७॥

रागैव च सरोषा भवतीति रोषादनुरागमनुमाय सन्तुष्ट इति भावः। उपेतयेति पाठे रोषात्तदुपसारेणार्थात् समीपमागतयेत्यर्थः ॥ १०६ ॥

पय इति। भुजिक्रिया भोजनक्रिया भोज्यभुजां भक्ष्यं भुञ्जानानां तेषां प्रिया तृप्तिजननी अथ च स्त्री बभूव। किम्भूता। पयो दुग्धमेव सितं हासो यस्याः। तथा कचिन्मृदुस्वच्छा कचिदत्यन्ताग्निसंयोगेन शोणबिन्दवो मण्डका अपूपा एव पट्टसूत्रादिरचितरूपमण्डनयुक्तानि अलङ्कारभूतानि वा अम्बराणि वस्त्राणि यस्याः। तथा अतिवृत्तमाषसाधितवटकरूपकुङ्कुमोद्वर्त्तनरक्तभावेनाह्लादक आननेन्दुर्मुखचन्द्रो यस्याः। तथा पृथुलड्डुकस्तनी स्थूलातिकठिनरूपौ मोदकरूपौ स्तनौ यस्याः सा। तथा उज्ज्वलकूरहारिणी विविक्तशुभ्रौदनरूपमौक्तिकमालावती। अथवोज्ज्वलकूरेण मनोहारिणी। यतो रुचेर्यासाभिलाषस्याथ च कान्तेरनुरागस्य च पदं स्थानं। प्रियापि पूर्वोक्तगुणसहिता रुचेः पदं भवति। यतः प्रियेति वा। भोज्यभुजां। भोज्यं भक्ष्य इति (पा॰ ७।३।६९) साधुः ॥ १०७ ॥

चिरं युवाकूतशतैः कृतार्थन-
स्थिरं सरोपेङ्गितया च निर्द्धुतः ।
सृजन् करचालनलीलयाञ्जलीन्-
न्यषेचि किञ्चिद्विधुताम्बुधारया ॥ १०८ ॥
न षड्विधः खिन्नजनस्य भोजने
तथा यथा यौवतविभ्रमोद्भवः ।

चिरमिति । कयाचिद्वेश्या कश्चिद्युवा किञ्चिद्विधुतया वक्रचालितयाम्बुधारया कृत्वा अषेचि सिक्तः । किम्भूतः । आकूतशतैरिङ्गितसहस्रैःकृतार्थनः कृतप्रार्थनः सन् चिरं सरोषं कोपव्यञ्जि इङ्गितं यस्यास्तस्या भावस्तत्ता तयैव वारम्वारं निर्द्धुतो निराकृतः सन्नपि तथा करचालनस्य लीलया व्याजेन प्रसादप्रार्थनासूचकानञ्जलीन् करयुगसम्पुटान् सृजन् रचयन्, अञ्जलीनिति वचनेन वारम्वारमञ्जलेः करणं सूचितं। वारिधाराकम्पनेन त्वत्प्रार्थना मयाङ्गीकृता करयुगयोजनाद्विरमेति सूचितं। इयं स्वीकारचेष्टा करचालनं भुजिक्रियासमाप्तिं द्योतयति ॥ १०८॥

नेति । षड्विधो मधुराम्ललवणतिक्तकटुकषायास्वादरूपषट्प्रकारो रसः खिन्नजनस्य रसिककामुकसङ्घस्य भोजने विषये तथा तोषं न अधत्त उदपादयत्। यथा यौवतं स्त्रीसङ्घस्तस्य विभ्रमो विलासस्तस्मादुद्भवो यस्य स रसो भृशं समुन्मिषन् वर्द्धमानः अपारशृङ्गारमयः निर्मर्य्यादानेकविधविभावानुभावव्यभिचारिसंयोगजन्यशृङ्गाररूपः सप्तमो रसस्तोषमधत्त । सप्तमत्वं

पयःसिता मण्डकमण्डलाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्ज्वलकूरहारिणी॥ १०७॥

रागैव च सरोषा भवतीति रोषादनुरागमनुमाय सन्तुष्ट इति भावः। उपेतयेति पाठे रोषात्तदुपसारेणार्थात् समीपमागतयेत्यर्थः॥ १०६॥

पय इति। भुजिक्रिया भोजनक्रिया भोज्यभुजां भक्ष्यं भुञ्जानानां तेषां प्रिया तृप्तिजननी अथ च स्त्री बभूव। किम्भूता। पयो दुग्धमेव सितं हासो यस्याः। तथा कचिन्मृदुस्वच्छा कचिदत्यन्ताग्निसंयोगेन शोणविन्दवो मण्डका अपूपा एव पट्टसूत्रादिरचितरूपमण्डनयुक्तानि अलङ्कारभूतानि वा अम्बराणि वस्त्राणि यस्याः। तथा अतिवृत्तमाषधाधितवटकरूपकुङ्कुमोद्वर्त्तनरक्तभावेनाह्लादक आननेन्दुर्मुखचन्द्रो यस्याः। तथा पृथुलड्डुकस्तनी स्थूलातिकठिनरूपौ मोदकरूपौ स्तनौ यस्याः सा। तथा उज्ज्वलकूरहारिणी विविक्तशुभ्रौदनरूपमौक्तिकमालावती। अथवोज्ज्वलकूरेण मनोहारिणी। यतो रुचेर्भोजनाभिलाषस्याथ च कान्तेरनुरागस्य च पदं स्थानं। प्रियापि पूर्वोक्तगुणसहिता रुचेः पदं भवति। यतः प्रियेति वा। भोज्यभुजां। भोज्यं भक्ष्ये इति (पा॰ ७।३।६९) साधुः॥ १०७॥

चिरं युवाकूतशतैः कृतार्थन-
श्चिरं सरोपेङ्गितया च निर्द्धुतः ।
सृजन् करच्चालनलीलयाञ्जलीन्-
न्यपेचि किञ्चिद्विधुताम्बुधारया ॥ १०८ ॥
न षड्विधः खिङ्गजनस्य भोजने
तथा यथा यौवतविभ्रमोद्भवः ।

चिरमिति । कयाचिद्वेश्या कश्चिद्युवा किञ्चिद्विधुतया वक्र-चालितयाम्बुधारया कृत्वा असेचि सिक्तः । किम्भूतः । आकूतश-तैरिङ्गितसहस्रैः कृतार्थनः कृतप्रार्थनः सन् चिरं सरोषं कोपव्य-ञ्जि इङ्गितं यस्यास्तया भावस्तत्ता तयैव वारम्वारं निर्द्धुतो नि-राकृतः सन्नपि तथा करचालनस्य लीलया व्याजेन प्रसादप्रार्थ-नासूचकानञ्जलीन् करयुगसम्पुटान् सृजन् रचयन्, अञ्जलीनि-ति वचनेन वारम्वारमञ्जलेः करणं सूचितं। वारिधाराकम्पनेन त्वत्प्रार्थना मयाङ्गीकृता करयुगयोजनाडिरमेति सूचितं। इयं स्वीकारचेष्टा करचालनं भुजिक्रियासमाप्तिं द्योतयति ॥१०८॥

नेति । षड्विधो मधुराम्ललवणतिक्तकटुकषायास्वादरूप-षट्प्रकारो रसः खिङ्गजनस्य रसिककामुकसङ्घस्य भोजने विषये तथा तोष न अधत्त उदपादयत्। यथा यौवतं स्त्रीसङ्घस्तस्य विभ्रमो विलासस्तस्मादुद्भवो यस्य स रसो स्वयं समुन्मिषन् वर्द्ध-मानः अपारशृङ्गारमयः निर्मर्यादानेकविधविभावानुभावव्य-भिचारिसंयोगजन्यशृङ्गाररूपः सप्तमो रसस्तोषमधत्त। सप्तमत्वं

अपारशृङ्गारमयः समुन्मिषन्
भृशं रसस्तोपमधत्त सप्तमः ॥ १०९ ॥
मुखे निधाय क्रमुकं नलानुगै-
रथौज्झि पर्णालिरवेक्ष्य वृश्चिकम्।
दमार्पितान्तर्मुखवासनिर्मितं
भयाविलैः स्वभ्रमहासिताखिलैः ॥ ११० ॥
अमीषु तथ्यानृतरत्नजातयो
विदर्भराट् चारुनितान्तचारुणोः।

मधुराद्यपेक्षया ज्ञेयं न लाघवमपेक्षया। षड्भ्यो रसेभ्योऽन्यस्याभावाद्भोजने सप्तमरसस्य सद्भावादाश्चर्यम् ॥ १०९ ॥

मुख इति। अथ हस्तप्रक्षालनानन्तरं नलानुगैस्तै राजभिः क्रमुकं पूगफलं मुखे निधाय वृश्चिकमवेक्ष्य दमेनार्पिता दत्ता पर्णालिर्नागवल्लीदलपंक्तिरौज्झि त्यक्ता। किम्भूतं वृश्चिकं। अन्तर्मुखवासेन कर्पूरकस्तूरीखदिरसारादिरूपेण मुखसौगन्ध्यकारिणा निर्मितं। किम्भूतैः। भयेन दंशनभिया आविलैर्व्याप्तैः। अत एव स्वभ्रमेणाहृश्चिके वृश्चिकबुद्ध्या हासिता हासं प्रापिता अखिला द्रष्टारो यैः। दमेनार्पितः पर्णमध्ये वर्त्तमानो योऽन्तर्मुखे वासस्तेन निर्मितामिति वा ॥ ११० ॥

अमीष्विति। विदर्भराड् राजा दमो वा क्रमेण चारु सुन्दरं नितान्तं चारु अतिसुन्दरम् तयोरिन्द्रैतयोस्तथ्यानृतयोः सत्यासत्ययोः रत्नजातयोर्मध्ये एकं तव प्रियं रत्नजातं त्वं स्वयमेव

स्वयं गृहाणैकमिहेत्युदीर्य्य तद्
द्वयं ददौ शेषजिघृक्षवे हसन् ॥ १११ ॥
इति द्विवारं शुचिमिष्टभोजिनां
दिनानि तेषां कतिचिन्मुदा ययुः ।
द्विरष्टसंवत्सरवारसुन्दरी-
परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ ११२ ॥

गृहाणेति । अमीषु वारयात्रिकेषु विषये उदीर्य्य कृत्रिमत्वादति-रमणीयकान्तिविशिष्टं अलीकरत्नजातं जिघृक्षवे ग्रहीतुमिच्छवे वारयात्रिकाय इमंस्तदज्ञानहेतोः किञ्चिद्धास्यं कुर्वन् तयोः सत्यासत्ययोरत्नजातयोर्द्वयं युग्मं तद्रूपं वा द्वयं ददौ । अमीषु मध्ये शेषजिघृक्षव इति वा । इह द्वयोर्मध्ये शेषजिघृक्षव इति वा । शेषजिघृक्षवे । द्वितीयेति (पा० २।१।२४) योगविभागात् समासः ॥ १११ ॥

इतीति । इति पूर्व्वोक्तप्रकारेण द्विःकृत्वो द्विवारं दिवारात्रौ च शुचि पवित्रं मिष्टं स्वादु च भोजिनां भुञ्जानानां तेषां वारयात्रिकाणां कतिचित् पञ्चषाणि दिनानि मुदा ययुः पञ्च-षट् दिनानीति सदर्थाः तत्रोषुरित्यर्थः । किम्भूतानां । निशि द्विर्द्वौ वारा अष्टौ द्विरष्टौ षोडश सम्वत्सरा यासां ता वारस्य सङ्घस्य सुन्दर्यो वेश्या दास्यादयस्तासां परीष्टिभिर्युम्नादि-सेवाभिः तुष्टिं सन्तोषं उपेयुषां प्राप्तवतां । द्विरष्टेति अमुचः कृत्वसुचो बाधकत्वाद् द्विरिति द्विमात्रेर्द्विःकृत्व इत्यत्रापवादवि-

उवास वैदर्भगृहेषु पञ्चषा
निशाः कृशाङ्गीं परिणीय तां नलः।
अथ प्रतस्थे निषधान् सहानया
रथेन वार्ष्णेयगृहीतरश्मिना ॥ ११३ ॥
परस्य न स्प्रष्टुमिमामधिक्रिया
प्रिया शिशुः प्रांशुरसाविति ब्रुवन्।

यये क्वचिदुत्सर्गस्यापि समावेश इति परिभाषया यथाकथञ्चित् परिहर्त्तव्यम् ॥ ११२ ॥

उवासेति। नलः कृशाङ्गीं तां परिणीय वैदर्भगृहेषु पञ्च षड्वा प्रमाणमासां ता निशा उवास पञ्चषाणि दिनानि तत्र स्थितवानित्यर्थः। अथ सप्तमे दिने अनया भैम्या सह रथेन निषधान् प्रतस्थे। किम्भूतेन। वार्ष्णेयनाम्ना सारथिना गृहीता रश्मयो यस्य। पञ्चषाः। सङ्ख्ययाव्ययेति (पा०२।२।२५) समासे बहुव्रीहौ सङ्ख्येय इत्यादिना (पा०५।४।७३) डचि टिलोपः। निशाः। अत्यन्तसंयोगे च (पा०२।१।२९) इति द्वितीया ॥ ११३ ॥

परस्येति। इति ब्रुवन् स नलो भैमीं स्वयमात्मनैव रथे अध्यरूरुहदध्यारोपयत्। इति किं। इमां पतिव्रतां भैमीं स्प्रष्टुं स्पर्शनेन्द्रियविषयीकर्त्तुं परस्य मदन्यस्य नाधिक्रिया अधिकारः। प्रिया भैमी शिशुरल्पप्रमाणा असौ रथश्च प्रांशुरुन्नतर इति स्वयमारोढुमसमर्थेति, तत्तस्माद्धेतोः जनैर्वितो लोकैर्वीक्षितः

रथे स भैमीं स्वयमध्यरूरुह-
न्न तन् किलाश्लिषदिमां जनेक्षितः ॥ ११४ ॥
इति स्मरः शीघ्रमितिश्चकार तं
वधूं च रोमाञ्चभरेण कर्कशौ।
स्खलिष्यति स्निग्धतनुः प्रियाद्वियं
म्रदीयसी पीडनभीरुदोर्युगात् ॥ ११५ ॥

रथे इमां भैमीं नाश्लिलिङ्ग किन्तेति व्याजे, तत्तत्तस्तु जनसमच-
मालिलिङ्गैव। किन्त्वेवं ब्रुवन् धार्ष्ट्यं परिजहारेति भावः। क-
र्मत्वस्याविवचितत्वाद्रथ इत्यधिकरणे सप्तमी। अध्यरूरुहत्।
णौ चङि (पा० ७।४।१) इत्युपधाह्रस्वत्वे, दीर्घो लघोः (पा० ७।
४।९४) इत्यभ्यासदीर्घः। अश्लिषत्। श्लिष आलिङ्गन इति धातुः
लुङ्। कर्मयोगे चः। अश्लिष्यदिति पाठे लुङ् ॥ ११४ ॥

इतीति। इति हेतोः शीघ्रमतिः त्वरितबुद्धिः शीघ्रमुचितो-
पायस्फुरणशील: तयोरन्योन्यविषयः स्मरः तं नलं वधूं भैमीञ्च
उभौ रोमाञ्चानां भरेण बाहुल्येन कर्कशत्वचौ चकार अन्यो-
न्यसंस्पर्शादुत्पन्नसालिकरोमाञ्चौ जाताविति भावः। इति किं।
म्रदीयसी स्निग्धा तनुर्नितरां कोमला सस्नेहाङ्गी च इयं भैमी,
अतः प्रियाङ्गलात् सकाशात् स्खलिष्यति निःसरिष्यति यतः
पीडने निविडधारणे भीरु दोर्युगं बाहुयुगं यस्य तस्माच्छि-
थिलधारिण इति। इतीव शीघ्रमतिः स्मरः ॥ ११५ ॥

तथा किमाजन्मनिजाङ्कवर्द्धितां
प्रहित्य पुत्रीं पितरौ विषेदतुः ।
विसृज्य तौ तं दुहितुः पतिं यथा
विनीततालक्षगुणीभवद्गुणं ॥ ११६ ॥

निजाद्नुव्रज्य स मण्डलावधे-
र्नलं निवृत्तौ चटुलापतां गतः ।
तडागकल्लोल इवानिलं तटा-
द्रुतानतिर्व्यावर्त्तत विराटराट् ॥ ११७ ॥

तथेति । तौ पितरौ तं दुहितुः पतिं जामातरं नलं वि-सृज्य समेत्य यथा विषेदतुः विषण्णौ तथा आजन्मप्रभृति निजा-ङ्कयोः स्वोयोत्सङ्गयोर्वर्द्धितां वृद्धिं प्रापितां पुत्रीं प्रहित्य प्रस्थाप्य विषेदतुः किं अपि तु नेति वैधर्म्योपमा । किम्भूतं । विनीततया सविनयत्वेन लक्षगुणीभवन्तः शौर्यादयो गुणा यस्य तं । सुता-वियोगादपि सगुणजामातृवियोगो नितरां तयोर्दुःसहो जात इत्यर्थः । प्रहित्य । हि गतौ, ल्यपि तुक् । विषेदतुः । सदेरेत्वा-भ्यासलोपौ । सदिरप्रतेरिति (पा० ८।३।६६) षत्वं ॥ ११६ ॥

निजादिति । स विराटराड् भीमो नलमनुव्रज्यानुगम्य नि-जाग्मण्डलावधेः सकाशान्निवृत्तौ परावृत्तिसमये चाटु प्रिय-वचनं लपति भाषत इति चटुलापस्तद्भावं गतः प्राप्तः प्रिय-भाषणः प्रत्याङ्गीकृता नतिर्नमस्कारो येन स एवम्भूतः सन् व्याव-र्त्तत निजराष्ट्रम् प्रति परावृत्तः । क इव तडागकल्लोल इव ।

पितात्मनः पुण्यमनापदः क्षमा
धनं मनस्तुष्टिरथाखिलं नलः।
अतः परं पुत्रि न कोऽपि तेऽक्षमि-
त्युदश्रुरेष व्यसृजन्निजौरसीं ॥ ११८ ॥
प्रियः प्रियैकाचरणाच्चिरेण तां
पितुः स्मरन्तीमचिकित्सदाधिषु।

यथा ऽनिलं वायुमनुसृज्य तटान्निवृत्ता चटुला आपो यस्य तद्भावं गतः सन् तीरात् सकाशात् तडागतरङ्गो व्यावर्त्तत इत्युपमा। चटुलाप इत्यत्र कर्म्मण्यण्। (पा०३।२।१) पक्षे ऋगादिना(पा०५।४।७४) समासान्तः। स तु तत्पुरुष एवेति कश्चित् तदुपेक्ष्यम् ॥ ११७ ॥

पितेति। इत्युक्त्वा उद्गतान्यश्रूणि यस्य स एष भीमो निजामौरसीं स्वीयक्षेत्रबीजाभ्यामुत्पादितां भैमीं व्यसृजत् प्राहिणोत्। इति किं। हे पुत्रि आत्मनस्तव पुण्यं धर्म्म एव पिता हितकारित्वादहितनिवारकत्वाच्च तथा तव क्षमाःसहनशक्तयः अनापदः न विद्यत आपदो याभ्यस्ता आपन्नाशिका इत्यर्थः, तव मनसस्तुष्टिः सन्तोषः अलुब्धत्वमेव धनं। अथानन्तरं अखिलमेव तवेष्टं नल एव, किं बहुना तदतिरिक्तसकलाभीष्टत्वात् सर्व्वं नल एवेति भावः। अतः परं अद्यतनदिनप्रभृति अहं भीमस्ते कोऽपि सम्बन्धी बान्धवो न भवामीति ॥ ११८ ॥

प्रिय इति। प्रीणाति हर्षं जनयति प्रियो नलः पितुः स्मरन्तीं

शशाम तन्मातृवियोगवाडवो
न तु प्रियप्रेममहाम्बुधावपि ॥ ११९ ॥
असौ महीभृद्बहुधा तु मण्डित-
स्तया निजोपत्यकयेव कामपि ।

तां भैमीं प्रियस्य मनीषितस्यैकस्य वस्तुन आचरणात् करणात् मनीषितस्य यदेकं मुख्यं केवलं वा करणं तस्माद्वा आधिषु पितृवियोगजमानसपीडासु सतु चिरेण बहुना कालेनाचिकित्सत् उपचचार । कस्यचिदिष्टस्य मेलनात् पितृवियोगदुःखं चिरेणात्याजयदित्यर्थः। चिरकालं पितुः स्मरन्तीमिति वा । स सर्व्वजनप्रसिद्धस्तस्या मातृवियोग एवासह्यतरत्वाद्वाडवो वडवानलः तु पुनः प्रियस्य नलस्य प्रेमा निरूपाधिकस्नेहस्तद्रूपे महाम्बुधौ सत्यपि तथा अप्रच्युतप्राच्यरूप एव तस्थिवान् तस्मिन्नतिप्रियं कुर्व्वत्यपि स शोकमपि न शशाम इत्यर्थः । पितृवियोगदुःखान्मातृवियोगस्य गौरवं सूचितं विशेषतश्च कन्यानां । अपिरौचित्ये । जलानलयोर्विरोधेऽपि वाडवस्याम्बुधावेव स्थितिर्युक्तेत्यर्थः । शशामेति न तु प्रियेत्यपि च स्पष्टार्थः । पितुः । अधीगर्थेत्यादिना (पा०२।३।५२) षष्ठी । अचिकित्सत् । कित निवासे रोगापनयने चेत्यस्माद् गुप्तिज्किद्भ्य इति (पा०३।१।५) स्वार्थे सन्। कितयोदात्तेत्सु पाठात्सन्नन्तादपि परस्मैपदमेव न त्वात्मनेपदमिति सिद्धान्तः ॥ ११८ ॥

असाविति । असौ महीभृन्नलः तु पुनर्बहुधा अनेकप्रकारं

भुवा कुरङ्गेक्षणदन्तिचारयो-
र्बभार शोभां कृतपादसेवया ॥ १२० ॥
तदेकतानस्य नृपस्य रक्षितुं
चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा
समग्रतद्वाञ्छितपूर्त्तिवृत्तिभिः ॥ १२१ ॥

मण्डितो नानारत्नादिभिरलङ्कृतस्तया भैम्या कामप्यतिशयितां शोभां बभार। किम्भूतया। कुरङ्गवद्धरिणवदीक्षणं विलोकनं दन्तिवद्धस्तिवच्चारो गतिस्तयोर्भुवा स्थानभूतया हरिणाक्ष्या गजगत्या च। तया कृता पादसेवा यया। कयाक इव। निजोपत्यकया पर्व्वतासन्नभूम्या महीभृत् पर्व्वत इव। वज्रैर्गैरिकादिधातुभिर्मण्डितः। किम्भूतयोपत्यकया। हरिणानामीक्षणस्य हस्तिनां भक्षणस्य गमनस्य वा स्थानभूतया। तया कृता प्रत्यन्तपर्व्वतानां सेवा श्रयणं यया। कृता प्रत्यन्तपर्व्वतैः सेवा यस्या इति वा॥ १२० ॥

तदिति। चिरोढया चिरकालं म्रियमाणया अथ चिरपरिणीतया श्रिया राज्यलक्ष्म्या तदेकतानस्य तदेकनिष्ठस्य भैमीतत्परस्य नृपस्यात्मनि विषये भावमनुरागं रक्षितुं स्थिरीकर्त्तुमिव सापत्न्यमेकभर्तृकस्त्रीदयान्योन्येर्ष्यां विहाय समग्राणां तस्या भैम्या वाञ्छितानां पदार्थानां पूर्त्तिः पूरणं तस्यां वृत्तिभिर्वर्त्तनैरुपायैः कृत्वा भीमजाऽरञ्जि प्रीणिता। सम्पद्वैभवेन दुर्लभा-

मसारमालावलितोरणां पुरीं
निजाद्वियोगादिव लम्बितालकाम्।
ददर्श पश्यामिव नैषधः पथा-
मथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः॥ १२२॥

न्यपि तद्वाञ्छितानि नलेन पूरितानि ततस्त्वं मा परितुष्टेति भावः। अन्यापि चिरपरिणीता विदुषी नवोढायामनुरक्तस्यात्मनि अनुरागरचणार्थं सापत्न्यं त्यक्त्वा आत्मनो ज्यैष्ठ्यं रचयन्ती सती नवोढाया हितकरणेन प्रीतिं जनयति॥ १२१॥

मसारेति। अथ वक्रमार्गलङ्घनानन्तरं नैषधः पुरीं प्रियामिव ददर्श। किम्भूतां। मसारमालावलिरिन्द्रनीलपरम्परा अत एवासद्दलादिरचितमालारूपाणि तोरणानि यस्याः। इन्द्रनीलमालावलियुक्तानि तोरणानि वहिर्द्वाराणि यस्यास्तां तथा। अत एव निजाद्वियोगाल्लम्बितालकामिव प्रसारितचूर्णकुन्तलामिव। तथा उन्नतैरत्युच्चैर्गृहैः कृत्वा आश्रिता अङ्गीकृता उद्ग्रीविकां ऊर्ध्वीकृतकण्ठतया विलोकनं यथा स्यादेवंपश्यामिव। विलोकिकामिव उच्चगृहत्वाद्दूरत एव दृष्टवानित्यर्थः। पथामिति पाठे मार्गाणां पश्यामिव। अन्यापि नायिका प्रोषिते नायके प्रसाधितालङ्कारा सती उद्ग्रीविकया प्रियागमनमार्गान् पश्यति। मसाराणां नीलत्वादसकलत्वं। पथामिति कर्तृकर्मणोरिति (पा॰ २।३।६५) कर्मणि षष्ठी॥ १२२॥

पुरीं निरीक्ष्यान्यमना मनागिति
प्रियाय भैम्या निभृतं विसर्जितः।
ययौ कटाक्षः सहसा निवर्त्तिना
तदीक्षणेनार्द्धपथे समागमम्॥ १२२॥
अथ नगरधृतैरमात्यरत्नैः
पथि समियाय स जाययाऽभिरामः।

पुरीमिति। अयं नलियो मनाक् ईषत् पुरीं निरीक्ष्य अन्यमना इच्चिन्त इतिहेतोः अस्मिन्नवसरेऽयं सम्यक् निरीक्षितुं शक्यत इति बुद्ध्या भैम्या प्रियाय प्रियं वीक्षितुं निभृतं गुप्तं यथा तथा विसर्जितः प्रेषितो निजकटाक्षः सकलां पुरीमनवलोक्यैव किञ्चिन्निरीक्ष्य भैम्यनुरागवाञ्छ्यात् सहसाऽसमय एव पुरीनिरीक्षणान्निवर्त्तिना शीघ्रं परावृत्तेन तदीक्षणेन नलकटाक्षेण सहार्द्धपथ एव समागमं सम्बन्धं ययौ। उभावपि परस्परानुरागेण क्षणमात्रमप्यवलोकनान्तरायं न सहेते स्मेति भावः। नितरामनुरागः सूचितः। पुरीनिरीक्षेति पाठे पुरीनिरीक्षणेऽयमन्यमनाः किमिति बोद्धुं प्रेषितः। रहस्यं ज्ञातुं दूतोऽपि गुप्तं प्रेष्यते। प्रियाय। क्रियार्थोपपदस्येति (पा० २।३ १४) चतुर्थी॥ १२२॥

अथेति। अथ पुरीसमीपप्राप्त्यनन्तरं जायया कलाभिरामः स नलो नगरे धृतैः स्थापितैरमात्यरत्नैः सह पथि समियाय मेलनं प्राप। किम्भूतैः। कुतूहले भैमीसहितनलदर्शनकौतुके

मधुरिव कुसुमश्रिया सनाथः
क्रममिलितैरलिभिः कुतूहलोत्कैः ॥ १२४ ॥
कियदपि कथयन् स्ववृत्तजातं
श्रवणकुतूहलचञ्चलेषु तेषु ।
कियदपि निजदेशवृत्तमेभ्यः
श्रवणपथं स नयन् पुरीं विवेश ॥ १२५ ॥
अथ पथि पथि लाजैरात्मनो वाङ्कवल्ली-
मुकुलकुलसकुल्यैः पूजयन्त्यो जयेति ।

विषये उत्कैः उत्कण्ठितैः। तेन वा उदूर्द्ध कं शिरो येषां ऊर्द्धीकृतशिरोभिः। कः कैरिव। कुसुमश्रिया चम्पकादिपुष्पशोभया सनाथो रमणीयो मधुर्वसन्तः क्रमेण वसन्तागमपरिपाट्या मिलितैर्मध्वास्वादकौतुकेनोत्कण्ठितैरलिभिरिव। यथा संयुज्यते तथेत्युपमा ॥ १२४ ॥

कियदिति। स नलः पुरीं विवेश। किं कुर्व्वन्। स्वयम्बरवृत्तान्तश्रवणकुतूहलचञ्चलेषु तेषु मन्त्रिप्रवरेषु कियत् स्वमसम्बद्धवृत्तजातं स्वदौत्येन्द्रादिमायाप्रभृतिरूपं प्रवृत्तं वृत्तान्तं सङ्क्षेपेण कथयन्। तथा कियदपि निजदेशवृत्तं स्वराष्ट्रजातमेभ्योऽमात्येभ्यः सकाशात् श्रवणपथं नयन्नाकर्णयन्। यामगतानिः। अमुचेति पाठे अदःपरस्मिन्नचापीति वचनादमुवेत्यनेन व्यवहितोऽपि स्वयम्बरःपरामृश्यते ॥ १२५ ॥

अथेति। अथ पुरप्रवेशानन्तरं नगरानां कुमार्य्योऽकृतविवाहाः

क्षितिपतिमुपनेमुस्तन्दधाना जनाना-
मम्टतजलम्टणालीसौकुमार्य्यं कुमार्य्यः ॥ १२६ ॥

अभिनवदमयन्तीकान्तिजालावलोक-
प्रवणपुरपुरन्ध्रीवक्तचन्द्रान्वयेन ।
निखिलनगरसौधाट्टावलीचन्द्रशालाः
क्षणमिव निजसञ्ज्ञां सान्वयामन्वभूवन् ॥ १२७ ॥

कन्यास्तं क्षितिपतिं उपनेमुः समीपमागत्य नमश्चक्रुः। किम्भूताः। पथि पथि प्रतिमार्गे आत्मनो बाहुवल्लीनां भुजरूपलतानां मुकुलकुलेन कलिकावृन्देन सकुल्यैस्तत्कुल्यैर्लाजैर्मङ्गलद्रव्यतया शकुनदर्शनेन जय सर्व्वोत्कर्षेण वर्त्तस्वेति शब्दपूर्व्वं पूजयन्त्यः। तथा अम्टतजलैर्जाताया म्टणाल्या विसस्येव सौकुमार्य्यं मार्द्दवं दधानाः। पुरप्रवेशे शकुनार्थं कुमार्य्य इत्युक्तं। सकुल्यैः। दिगादिभ्यो यत् (पा० ४।३।५४) ॥ १२६ ॥

अभीति। निखिलानां नगरसम्बन्धिनां सौधानां सुधाधवलितगृहाणामट्टावल्य उपरितनगृहविशेषपंक्तयस्तासामप्युपरि चन्द्रशालास्तृतीयशिरोगृहा अट्टावलीनां गवाक्षविवराणि वातायनाख्याः, अभिनवा नवोढा दमयन्ती तस्याः कान्तिजालस्यादृष्टपूर्व्वस्यावलोके प्रवणानामुत्सुकानां पुरस्त्रीणां वक्तचन्द्रस्यान्वयेन सम्बन्धेन कृत्वा क्षणमिव क्षणमात्रं यावत्तन्मुखसम्बन्धस्तावत्पर्य्यन्तं निजसञ्ज्ञां स्वीयं नाम मुखचन्द्रसम्बन्धितया सान्वयं चन्द्रयुक्ताः शाला गृहाणि चन्द्रशाला चन्द्राणां

निषधनृपमुखेन्दुश्रीसुधां सौधवातायनविवरगरश्मिश्रेणिनालोपनीताम्।
पपुरसमपिपासापांशुलत्वोत्परागान्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि॥ १२८॥

वा सम्बन्धिन्यः शाला इति योगसञ्ज्ञितामन्वभूवन्। शालयामिवेति वोत्प्रेक्षा। सर्व्वा अपि पुनर्नार्य्यो गवाक्षविवरैर्भैमीमपश्यन्। तानि च तन्मुखसम्बन्धेन यौगिकत्वेन कविनोत्प्रेक्षितानि॥ १२७॥

निषधेति। अखिलानां सकलानां पुरपुरन्ध्रीणां नेत्राण्येव नीलोत्पलानि निषधनृपस्य मुखेन्दुश्रीस्तल्लक्षणां सुधामसृतं पपुः सादरमालोकितवन्ति। किम्भूतां सुधां। सौधवातायनानां विवरेभ्यश्छिद्रेभ्यो गच्छन्त्योबहिर्निर्गच्छन्त्यो रश्मिश्रेण्यो नयनकिरणपंक्तयस्तद्रूपा ये नाला विमघुनत्वादल्पजलपानसाधनभूताः कमलनालदण्डास्तैरुपनीतां नेत्रसमीपं प्रापितां। किम्भूतानि नीलोत्पलानि। असमयाऽतुल्ययाऽतिभूयस्या पिपासया पानेच्छया पांशुलत्वं शुष्कत्वं सोत्कण्ठतरत्वञ्च तेनैव उत्प्राष्टा उद्गच्छन्तो वा परागाः कौसुमरजांसि येषु तानि। गवाक्षविवरैः हत्वा नलमुखशोभां सर्व्वा अपि सादरं ददृशुरित्यर्थः। कुमारीणां समीपगत्या पौरस्त्रीणाञ्च गवाक्षान्तर्गत्या कौतुकमात्रेण दृष्टेराजवेन कनीनिकानीलरश्मीनां नानारूपाणामुचितत्तरत्वमुक्तं। अन्योऽपि पिपासाशुष्कशुष्ककण्ठो दूरस्थं कूपाद्युदकं

अवनिपतिपथाट्टस्त्रैणपाणिप्रवाल-
स्खलितसुरभिलाजव्याजभाजः प्रतीच्छन्।
उपरि कुसुमवृष्टीरेष वैमानिकाना-
मभिनवकृतभैमीसौधभूमिं विवेश ॥ १२९ ॥
इति परिणयमित्थं यानमेकत्र याने
दूरचकितकटाक्षप्रेक्षितं चानयोस्तत्।

सच्छिद्रकमलनालादिना पिबति न लेकवारमेव बऊ पिबत्य-
न्तर्ह्रृदयपीडाभिया ॥ १२८॥

अवनीति। स नलोऽभिनवकृतस्य नूतननिर्म्मितस्य भैमीस-
म्बन्धिनः सौधस्य शान्तिहोमाद्यलङ्कृतां भूमिं उपरितनीं वा
भूमिं विवेश। किं कुर्व्वन्। कौतुकविलोकनार्थं गगने स्थितानां
वैमानिकानां देवानां कुसुमवृष्टीः उपरि शिरस्यादरेण प्रती-
च्छन् स्वीकुर्व्वन्। किम्भूता वृष्टीः। अवनिपतिपथे राजमार्गे
अट्टेषु विपणिस्वेष्वट्टालकेषु वर्त्तमानानां स्त्रैणानां स्त्रीवृन्दानां
पाणिप्रवालेभ्यः स्खलिताः सुरभयः पाकजपरिमलविशेषयुक्ता-
लाजास्तेषां व्याजं मिषं भजन्ति ताः। शकुनार्थं कीर्यमाणानां
लाजानां शुभत्वादूर्द्ध्वदेशात् सुमनाश्च पुष्पवृष्टिर्वं। ता अपि
पमवेभ्यो निर्गच्छन्ति। वैमानिकाः। चरत्यर्थे ठक्॥ १२९॥

इतीति। दिविषदां देवानामधीशा देवा इन्द्रादयश्चत्वारो
देवा नाकं स्वर्गं प्रतिगन्तुं प्रणिदधुरिव गन्तुमचिन्तयन्निव
ततस्तं विहाय गन्तुं वाञ्छां नास्थिवेतीवशब्दः सूचयति।

दिवि दिविषदधीशाः कौतुकेनावलोक्य
प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः ॥ १३० ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

किम्भूताः। अनयोर्भैमीनलयोः इति पूर्व्वोक्तप्रकारं परिणयं विवाहं कृत्यमुक्तरीत्या च एकत्र एकस्मिन् याने रथे यानं स्थित्वा गमनं तथा दरचकितं ईषत् सभयं सलज्जं यत्कटाक्षैरन्योन्यविलोकनं तच्चैतत्सर्व्वं दिवि आकाशे स्थित्वा कौतुकेनावलोक्यानन्देन परमहर्षेण सान्द्राः पूर्णाः। अथेति पाठे तयोर्गृहप्रवेशानन्तरमित्यर्थः। स्वयम्वरानन्तरमेव देवा विनिर्गता इति चतुर्द्दशे सर्गे यद्यप्युक्तं तथापि भूमेर्निर्गत्य नलपुरप्रवेशपर्य्यन्तं नलभैमीकौतुकविलोकनार्थं गगने स्थिता इति दिविपदेन सूचितम् इदानीं पुनः स्वर्गं प्रति निर्गता इत्युक्तेर्न कोऽपि विरोधः। किं वा अनन्तरसर्गसङ्गत्यै कलिनलद्वेषारम्भसाप्रस्तुततां परिहर्त्तुं नलः पुरं प्रविष्टो देवाश्च स्वर्गं जग्मुः। गच्छताञ्च तेषां मुख्ये मार्गे कलेरुत्तरप्रत्युत्तरदानादिना प्रसक्ता-

काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत् षोडशः ॥ १३१ ॥

तस्मादुत्पत्तिर्यस्यैवंविधे वा। नैषधेशेति पाठे नैषधस्याभावी-शस्येति व्याख्येयम्। काश्मीरैरिति पूजार्थे, मतिबुद्धीति (पा० ३। २।८८) इति क्तः, क्तस्य च वर्त्तमान इति (पा० २।३।६७) षष्ठीविधानात् तृतीया चिन्त्या। पूजितो यः सुरैरपीत्यादि-शिष्टप्रयोगदर्शनाद्वर्त्तमानार्थे विहितस्य क्तस्य योगे षष्ठी भवति चकारात् प्रयोजनानुरोधेनान्योऽपि सूत्रार्थो निर्वर्ण्यः। चतुर्थ्यर्थे बहुलं छन्दसीत्यतो बहुलग्रहणं वानुवर्त्त्य काश्मीरैः करणभूतै-र्महः पूजा सञ्जातास्येति महित इति। तारकादेराकृतिगण-त्वात् इतजान्तत्वाभावं वा समाश्रित्य क्तान्तत्वेऽपि कर्त्तृमानां महित इत्यादिभङ्गिप्रयोगे समासदर्शनात्, मतिबुद्धिपूजार्थेभ्य-श्चेति चकाराद्भूतेऽपि शिष्टप्रयोगानुसारेण क्तप्रत्ययमङ्गीकृत्य क्तस्य च वर्त्तमान इति षष्ठीप्राप्त्यभावात् कर्त्तरि तृतीयैवेति वा यथा कथञ्चित् समर्थनीयं। चतुर्द्दशतयीं। सङ्ख्यायाः अव-यव इति (पा० ५।२।४२) तयप्। टिड्ढाणञिति (पा० ४।१।१५) ङीप्। विद्यां विदद्भिः। न लोकेति षष्ठीनिषेधः। तद्भुवि। भाषितपुंस्कत्वं नुमभावः। षोडशः पूर्व्ववत्॥ १३१ ॥

इति श्रीवेदरकरोपनामश्रीनृसिंहपण्डितात्मजनारायण-कृते नैषधीयप्रकाशे षोडशः सर्गः॥ १६ ॥

सप्तदशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयतः।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमम्।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम्॥ १॥
भैमीमप्राप्य भुवस्तस्मै चिरं चित्ते धृतामपि।
विद्यामिव विनीताय न विषेदुः प्रदाय ते॥ २॥

अथेति॥ सर्गसङ्गतिरुक्तैव। अथ स्वर्गगमनचिन्तानान्तरं धरित्रीं प्रति धावनेन जनितं प्रयासं वृथैव वृथाप्रायं व्यर्थमिवारभ्य विधाय अगाधत्वेनानुपलचितहर्षविषादतया अथ च तटभूमिं प्रति निष्प्रयोजनमागमनेन ततः पुनर्यथागतं व्यावर्त्तनेन च सरस्वतः समुद्रस्य उल्लोलास्तरङ्गास्तद्लीला येषां तत्तुल्याः सुराः आगमनमनतिक्रम्य यथागतं स्वर्गं जग्मुः। भैमीमप्राप्यैव जग्मुरित्यर्थः। भैम्यलाभात् श्रमस्य वैयर्थ्यं। नलभैमीवरदानदारात्मगौरवरचणात् प्रायःशब्दः प्रायोजि न तु वृथैवेत्युक्तम्। वृथा वृथात्वं प्राप्यते प्राप्नोति वा वृथाप्रायम्। यथागतं अव्ययीभावः। यथागतं तथा जग्मुरि[illegible]॥ १॥

कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः।
स्फाटिकाद्रेस्तटानीव प्रतिबिम्बा विवस्वतः ॥ ३ ॥
जवाज्जातेन वातेन वलाकृष्टवलाहकैः।
श्वसनात् स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ॥ ४ ॥

भैमीं तस्मै भुवः पत्ये नलाय प्रदाय दत्त्वा न विषेदुः पश्चात्तापं न प्राप्ता इत्यर्थः। कस्मै कामिव। विनीताय शिष्याय चिरं चित्ते धृतां अभ्यस्तां विद्यामिव। दत्तापि विद्या चित्ताद्यथा नोपरमते तथा तस्मै दत्तापि सा सगुणतया तेषां चित्तान्नोपररामेति ॥ २ ॥

कान्तीति। भासुरास्तेजोरूपाः सुराः कान्तिमन्ति रत्नैर्दीप्राणि विमानानि यदृच्छया गामिनो रथान् भेजिरे आरुरुहुः। के कानिव। विवस्वतः सूर्यस्य भासुराः प्रतिबिम्बाः स्फाटिकाद्रेः कैलासस्य तटानीव। प्रतितटं प्रतिफलितत्वात् प्रतिबिम्बानां बहुत्वं। भासुराः। भञ्ज भासेति (पा० ३।२।१६१) घुरच् ॥ ३ ॥

जवादिति। जवात् निजवेगात् जातेन वातेन हत्वा बलात् आकृष्टाः सहचरीकृता मेघा यैः एषां देवानां रथैः श्वसनात् वायोः सकाशात् स्वस्यात्मनः शीघ्रगामित्वं द्रष्टृणामग्रे अकथीव कथितमिव। आकृष्टवलाहकस्य वायोः पश्चाद्गामित्वात् पुरःस्थितानां रथानां शीघ्रत्वमित्यर्थः। शीघ्रशब्दोऽत्र धर्मिवचनः। वेगजेन वातेन गमनेनेति वा। वाधातोर्भावे क्तः। श्वसनात्। पञ्चमीविभक्ते (पा० २।३।४२) इति पञ्चमी ॥ ४ ॥

क्रमाद् दवीयसां तेषां तदानीं समदृश्यत।
स्पष्टमष्टगुणैश्वर्य्यात् पर्य्यवस्यन्निवाणिमा ॥ ५ ॥
ततान विद्युता तेषां रथे पीतपताकताम्।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ॥ ६ ॥

क्रमादिति। क्रमाद्गमनाद् दवीयसां दूरतराणां तेषां तदानीं अणिमा॰अणुत्वं स्पष्टं प्रकटं समदृश्यत। किम्भूत इव। अष्टानां गुणानां अणिमादीनामैश्वर्य्यात् आधिपत्यात् पर्यवस्यन्निव पृथक्कृत इव। सर्व्वेभ्यो महिमादिभ्यो गुणेभ्यः पृथग्भूतत्वादिव स्पष्टं दृष्ट इत्यर्थः। स्थूलमपि वस्तु दूरत्वात् सूक्ष्मं दृश्यते। तेषामष्टौ गुणा वर्त्तन्ते तन्मध्ये अणिमैव तस्मिन् समये स्पष्टो दृष्टो नत्वन्य इत्यर्थः। तस्मिन् काले पर्य्यवस्यन् स्फुटीभवन्निति वा स्पष्टमुत्प्रेच्यते। तेषां रथानामिति वा। देवानामष्टगुणैश्वर्य्यात् तत्सम्बन्धाद्रथेष्वप्यणिमासमागम इति व्याख्येयम्। दवीयसां। अतितरां दूराणां ईयसुनि, स्थूलदूरेति (पा० ६।४।१५६) यणादिपरलोपे पूर्व्वस्य गुणः। अणिमा। पृथ्व्यादिः ॥ ५ ॥

ततानेति। क्वचित् कस्मिंश्चिदाकाशप्रदेशे लब्धकेतुशिखया

पुनः पुनर्मिलन्तीषु पथि पाथोदपंक्तिषु ।
नाकनाथरथालम्बि बभूवाभरणं धनुः ॥ ७ ॥
जले जलदजालानां वज्रिवज्रानुबिम्बनैः ।
जाने तत्कालजैस्तेषां जाताऽशनिसनाथता ॥ ८ ॥
स्फुटं सावर्णिवंश्यानां कुलछत्रं महीभुजां ।
चक्रे दण्डभृतश्चुम्बन् दण्डश्चण्डरुचिं क्वचित् ॥ ९ ॥

पुनरिति । इतस्ततो गमनवशात् पथि पुनः पुनर्मिलन्तीषु सम्बध्यमानासु पाथोदा मेघास्तेषां पङ्क्तिषु वर्त्तमानं धनुरिन्द्रधनुर्मार्गसम्बन्धवशात् नाकनाथरथमालम्बते एवंशीलं सम्बद्धं सदिन्द्ररथस्यैवाभरणं बभूव । इन्द्ररथे वर्त्तमानं धनुरागलन्तीषु मेघपङ्क्तिषु चणं भूषणमभूदिति वा । मेघा हि सेन्द्रचापाः शोभन्ते ॥ ७ ॥

जल इति । जलदजालानां जले तस्मिन् काले इन्द्रादिगमनसमये जातैर्वज्रिणो वज्रस्यानुबिम्बैः प्रतिबिम्बैः कृत्वा तेषां मेघजालानां अशनिना वज्रेण सनाथता सस्वामिकता जातेति जाने । तदारभ्यैव प्रायेण मेघानां सवज्रत्वमित्युत्प्रेक्षा ॥ ८ ॥

स्फुटमिति । दण्डभृतो यमस्य दण्डः क्वचिदाकाशप्रदेशे चण्डरुचिं सूर्यं चुम्बन् स्पृशन् सन् तं सूर्यमेव सावर्णिसंज्ञेर्वंशे जातानां महीभुजां राज्ञां कुलछत्रं कुलश्रेष्ठं अथ च कुलक्रमायातं राजचिह्नं छत्रं स्फुटमिव चक्रे । स्वयं छत्रस्याधो दण्ड-

नलभीमभुवोः प्रेम्णि विस्मिताया दधौ दिवः।
पाशिपाशः शिरःकम्पस्रस्तभूपश्रवःश्रियम्॥ १०॥
पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी।
अनेन प्रापि भैमीति भ्रमश्चक्रे नभःसदाम्॥ ११॥

सम्बन्धाच्छत्रमिवेत्युत्प्रेच्यते। सूर्य्यमण्डलं प्राप्त इति भावः। उदयेऽस्तमये च ॰मानो वर्णो यस्य स सवर्णः सूर्य्यस्तस्यापत्यं सावर्णिः। अत इञ् (पा॰४।१।९५) इतीञ्। वंशः। दिगादिलाघत्॥ ९॥

नलेति। पाशिपाशो वरुणपाशो नलभीमभुवोरनन्यतुल्ये प्रेम्णि विषये विस्मिताया दिवो विस्मयवशादेव शिरःकम्पेन स्रस्ता भूषा भूषणं यस्मादेवंविधस्य श्रवसः कर्णस्य श्रियं लक्ष्मीं दधौ। तस्यास्ताटङ्करचितः कर्ण इव शुशुभ इत्यर्थः। अनेन दिवो नायिकात्वं व्यज्यते॥ १०॥

पवनेति। पवनस्य चन्द्रसूर्य्याद्याधारेषु आवहादिषु सप्तसु स्कन्धेषु मध्ये ताराचक्राधारभूतं स्कन्धमारुह्य नृत्यन्तरा उद्गच्छन्तः कराः किरणा ज्वालारूपा यस्य स शिखी वह्निः अनेनाग्निना भैमी प्रापि इति नभःसदां देवानां भ्रमं चक्रे। भैमीप्राप्तिहर्षादयं नृत्यति किमिति सर्व्वेषां देवानां भ्रान्तिर्जातेत्यर्थः। अन्योऽपि नववधूलाभे कस्यचिन्मित्रस्य स्कन्धमारुह्य नृत्यत्करो भवति॥ ११॥

तत्कर्णौ भारती दूनौ विरहाङ्गीमजागिराम् ।
अध्वनि ध्वनिभिर्वीणैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥
अथायान्तमवैक्षन्त ते जनौघमसित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्त्तिमत् ॥ १३ ॥
अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाविनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥

तत्कर्णाविति । भारती वाणी भीमजागिरां भैमीवाणीनां विरहाद् दूनौ सन्तप्तौ तेषां देवानां कर्णौ अध्वनि मार्गेऽनुकल्पैः भैमीवाण्याः सकाशान्न्यूनैः वीणैः वीणासम्बन्धिभिर्ध्वनिभिः व्यनोदयत् सुखिनौ चकार । मुख्याभावे अनुकल्पोऽपि कार्यार्थमङ्गीक्रियते । स्तनादीनां द्वित्वनिष्ठा जातिः । प्रायेण त्वह्वात इति वचनात् कर्णाविति प्रतिनियतापेक्षं द्विवचनं ॥ १२ ॥

अथेति । अथ वाणीवीणाक्वणितश्रवणानन्तरं ते देवीदेवा असितत्विषं खड्गतुल्यकान्तिं आयान्तं सन्मुखमागच्छन्तं जनौघमवैक्षन्त अपश्यन् । उत्प्रेक्षते । तेषां देवानां प्रत्युद्गमनस्य प्रीत्या वाञ्छया मिलद्युज्यमानं मूर्त्तिमच्छरीरं व्योमाकाशमिव । यतः सशरीरस्य क्रियावत्त्वं युक्तम् । जनौघं मषीत्विषमित्यपि पाठः ॥ १३ ॥

अद्राक्षुरिति । ते सुरा अग्रेसरं पुरःसरमाजिहानमागच्छन्तं स्मरं अद्राक्षुः । उत्प्रेक्षते । तज्जनौघस्वामिना कलिना अक्षाणामिन्द्रियाणां अथ च द्यूतपाशकानां सम्बन्धिनोऽविन-

अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः ।
शम्भलीभुक्तसर्व्वस्वा जना यत्पारिपार्श्विकाः ॥ १५ ॥
बिभर्त्ति लोकजिद्भावं बुद्धस्य स्पर्द्धयेव यः ।
यस्येशतुलयेवाच कर्त्तृत्वमशरीरिणः ॥ १६ ॥

यस्य अविनीतत्वस्य शिक्षार्थं पुरस्कृतमिवाग्रेकृतमिव अथ च पूजितमिव । स्मरो चीन्द्रियवैकृतं कर्त्तुं जानाति इति इन्द्रियार्था अक्षशब्दच्छलेन द्यूतपाशकेषु विषये नलमविनयं शिक्षयितुं पाशकाज्ञानद्वारा नलं निग्रहीतुं कलिना पूजितः पुरः प्रेषितश्च । प्रायेणेत्युत्प्रेक्षा ॥ १४ ॥

अगम्येति । एवम्भूता जना यस्य कामस्य परितः पार्श्वयोश्च-रन्तीति पारिपार्श्विका वयस्या इत्यर्थः सेवका वा । किम्भूताः । गन्तुमशक्यानामनर्हाणाञ्च राजादीनां मात्रादीनाञ्च सम्भोगार्थं तृणमिवानायासत्याज्याः प्राणा येषां ते । अत एव पृष्ठस्थीकृते पश्चात्कृते परित्यक्ते भीह्रियौ यैस्ते वधभयं पापभयं लोकलज्जा चेत्येतत्सर्व्वं यैस्त्यज्यते तादृशा निर्भया निर्लज्जाश्चेत्यर्थः । तथाऽप्राप्याभेद्यस्त्रीभेदनकृतप्रतिज्ञाभिः शम्भलीभिः कुट्टिनीभिर्भुक्तं सर्व्वस्वं येषां ते । सन्तीति शेषः । पारिपार्श्विकाः पूर्व्ववत् ॥ १५ ॥

बिभर्त्तीति । यः स्मरो लोकान् जयतीति लोकजित् तस्य भावं सर्व्वजगद्विजयितां बिभर्त्ति । उत्प्रेक्षते । बुद्धस्य स्पर्द्धयेव । जिनो हि मारजित् इतिस्मरशत्रुस्पर्द्धयेव मारजिल्लोकजिज्जिन

ईश्वरस्य जगत्कास्नं सृष्टिमाकुलयन्निमाम् ।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरमनुस्मरन् ॥ १७ ॥

इत्यभिधानात् लोकजित्पदवाच्यत्वं बिभर्त्ति इत्यर्थः । तथा यस्याशरीरिणः शरीररहितस्य दग्धदेहत्वादनङ्गस्यात्र लोके कामिनीमनोविकारं प्रति मैथुनद्वारा सर्व्वजनान् प्रति वा कर्तृत्वं स्पष्टत्वं । अत्राप्युत्प्रेच्यते । विन्दकर्त्तुरीशस्य तुलयेव स्पर्द्धयेव । ईश्वरो हि स्मरहरत्वात् स्मरस्य शत्रुः तस्मात् स्पर्द्धयेव तस्याशरीरकर्तृत्वं स्वयमविनयेनाङ्गीकृतमित्यर्थः । यथाऽशरीरिण एवेश्वरस्य कर्तृत्वमिति न्यायविदः । तथाऽयमप्यनङ्ग एव सन् कार्य्यकारीत्यर्थः । जिनमहेशाभ्यां जितोऽपि लोकजित्वेनाशरीरकर्तृत्वेन च यः पुनस्ताभ्यां सम एवंविधोऽतिबलवानिति भावः ॥ १६ ॥

ईश्वरस्येति । अस्त्रीकृताः शस्त्रीकृताः स्त्रियो येन एवंविधो यः काम ईश्वरस्येमां सृष्टिं ईश्वरेण निर्मितं कृत्स्नं जगदाकुलयन्नन्यथावृत्ति चेतः स्ववशं कुर्व्वन् अथच पीडयन्नस्ति । उत्प्रेच्यते । तस्येश्वरस्य देहदाहजनितं वैरं स्मरंश्चिन्तयन्निव । देहदाहो मम अनेन कृतस्तस्मादेतेन रचितमेतदीयं जगत्पीडयिष्यामीति बुद्ध्या ईश्वरस्य किञ्चिदपकर्त्तुमसमर्थः तदीयं जगत् स्त्रीरूपेण शस्त्रेण पीडयंस्तेन सह स्पर्द्धत इत्यर्थः । प्रत्यनीकाग्रे आयुधान्निष्कृतोऽस्त्रो येनेति स्त्रिया अस्त्रीलकरणे विरोधाभासश्च । अथ वा या ईश्वरेणापि त्रिपुरवधे मोहिनी स्त्री शस्त्री-

चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम्।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम्॥ १८॥

कृता सूनेनापि स्त्री अस्त्रीकृता इत्येकविषयतया स्पर्द्धा। शक्तिरूपो हि श्रीविष्णुः त्रिपुरवधे भगवता शरतां नीत इत्यागमः। अनुसरन्निति लुप्तोत्प्रेक्षा। सृष्टिशब्दो नियतस्त्रीलिङ्गः। तत्परामर्शाच्चेमामिति निर्देशः। अस्त्रीकृतेत्यत्रानस्त्रमस्त्रं कृताऽस्त्रीकृतेति च्वौ (पा० ७।४।२६) इति ईकारः। पक्षेऽण्। न स्त्री अस्त्री अस्त्रीकृता स्त्रीयेनेति समासः। न पूतश्चेति (पा० ५।४। १५३) कप्॥ १७॥

कुलकम्। चक्र इति। स्मरः कामः पीतनलश्रियां आदरदृष्टनलशोभानां शक्रादिनेत्राणामिन्द्राग्न्यादिनेत्राणां दैवतवैद्याभ्यां नासत्याभ्यामपि न चिकित्स्यं प्रतिकर्त्तुं न शक्यं अरोचकं रुच्यभावं चक्रे। अधिकरूपस्य नलस्य दृष्टत्वात्तस्माद्धीनरूपे स्मरे दृष्टे तन्नेत्राणां प्रीतिर्न जाता। न केवलं स्मरं दृष्ट्वा न प्रीतास्ते किन्तु दस्रावपि। तयोरपि नलाद्धीनत्वादित्यर्थः। स्मरदस्रेभ्योऽपि नलोऽधिक इति ध्वन्यते। स्मरमनादृत्य पुरश्चलिता इति भावः। अथवा अरोचकं सर्व्वथा अन्नादिरुच्यभावो रोगविशेषः। स कर्म्मजत्वाद्देववैद्याभ्यामपि चिकित्सितुमशक्यः किं पुनर्नृवैद्यैरिति समासोक्तिः। भङ्ग्यन्तरेण नलरूपातिशयप्रकाशनतात्पर्य्यमुक्तं। उपमानतिरस्कारात् प्रतीपञ्च पीतनलश्रियामिति दृतीयादिभ्यिमि(पा० ७।१।७४) पुंवद्भावात् नपुंसकह्रस्वत्वाभावान्नुड्भावः।

यत्तत् क्षिपन्तमुत्कम्पमुत्थायुकमथारुणम्।
बुबुधुर्विबुधाः क्रोधमाक्रोशाक्रोशघोषणं॥ १९॥

अचिकित्स्यमिति। शक्यार्थे अचोयदिति (पा० ३।१।८७) यत्। दुश्चिकित्समिति पाठे कर्म्मणि खल्। दुर्नञर्थः। खलयोगान्न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्दैवाभ्यामिति तृतीयाद्विवचनं। अरोचकमिति। रोगाख्यायां ण्वुल्बहुलमिति (पा० ३।३।१०८) ण्वुल्॥ १८॥

यत्तदिति। अथ विबुधाः सुराः क्रोधं बुबुधुः ददृशुः। कीदृशं। यत्तत् क्षिपन्तं यद्यदग्रे पतति तत् क्षिपन्तमित्यर्थः। पुनः किंविधं। उद्गतः कम्पो यस्य तं उत्कम्पं। तथा उत्थायुकं उत्थानशीलं। तथा अरुणं रक्तं। तथा आक्रोशाक्रोशघोषणं आक्रोशः शापगालिप्रदानादिपुरःसराह्वानघोषो यस्य तं। क्रुद्धोऽप्येवंविधो भवति। स्मरदर्शनानन्तरं यत्किञ्चिल्लोष्टपाषाणादि परप्रहारार्थं मुञ्चन्तं नितरां सर्व्वाङ्गकम्पिनं जनैर्वार्य्यमाणमपि आवेशातिशयात् केशाकेशि योद्धुं पौनःपुन्येनोत्तिष्ठन्तं लोहितीभूतसर्व्वाङ्गं क्रोशं सर्व्वाङ्गीणतयाभिव्याप्य वा पर-

यमुपासन्त दन्तौष्ठक्षतासृक्शिष्यचक्षुषः।
भ्रुकुटीफणिनीनादनिभनिश्वासफूत्कृतः॥ २०॥
दुर्गं कामाशुगेनापि दुर्लङ्घ्यमवलम्ब्य यः।
दुर्वासोहृदयं लोकान् सेन्द्रानपि दिधक्षति॥ २१॥
वैराग्यं यः करोत्युच्चैरञ्जनं जनयन्नपि।
हते सर्वेन्द्रियाह्लादि प्रज्वलन्नपि यस्तमः॥ २२॥

यमिति। एवंविधा जना यं क्रोधं उपासन्त सिषेविरे। किंविधाः। दन्तैः क्षतं यदोष्ठक्षतं व्रणं तस्मिन् असृक् रुधिरं तस्य शिष्यभूते चक्षुषी येषां ते दन्तोष्ठक्षतासृक्शिष्यचक्षुषः। किम्भूतं क्रोधं। भ्रुवोराक्षेपः सङ्कोचो भ्रुकुटी सैव फणिनी तस्या नादः फूत्कारस्तत्तुल्यास्तन्निभा निश्वासा निर्गच्छन्नासावयनानां फूत्कारो येषामेवम्भूता जना यं सेवन्ते तं बुबुधिर इति पूर्व्वेण सम्बन्धः। क्रोधवशाद् दन्तैरोष्ठौ दश्येते नेत्रे रक्ते जायेते निश्वासफूत्काराश्च निर्गच्छन्ति। यस्य सेवका एवंविधा इत्यर्थः॥ २०॥

दुर्गमिति। यः क्रोधो मदनवाणेनापि लङ्घितुमशक्यमत एव दुर्गमं गिर्य्यादिविषमदुर्गरूपं एवम्भूतं रुद्ररूपस्य दुर्वाससो मुनेर्हृदयं मानसमाश्रित्य शक्रादिसहितान् सर्वानपि लोकान् शापाग्निना दग्धुमिच्छति। अन्योऽपि क्षुद्रो वाणेनाप्राप्यमतिविषमगिर्य्यादिदुर्गमाश्रित्य सर्व्वानपि पीडयति। रूपकं समासोक्तिश्च॥ २१॥

वैराग्यमिति। यः क्रोधोऽतितरां मुखादिष्वारक्त्यं कुर्व्वन्

पञ्चेषुविजयासक्तौ भवस्य क्रुध्यतो जयात्।
येनान्यविगृहीतारिजयकालनयः श्रितः॥ २३॥

यावत् स्वकार्य्यं करोति तावदुद्वेगमपि जनयति। तथा नितरां प्रदीप्तोऽतिवृद्धोऽभिभवंश्चक्षुरादीनि सर्व्वाणि वाह्याभ्यन्तरेन्द्रियाणि आच्छादयत्येवंशीलमज्ञानमपि उत्पादयति। प्रसिद्धं तम आलोकाभावाच्चक्षुरिन्द्रियमेवाच्छादयति रूपाग्रहणात्। ननु रसनादीनि तमस्यपि रसगन्धादीनां ग्रहणस्य सर्व्वसाक्षिकत्वात्, इदं तु क्रोधवशान्मनसोऽनवस्थानात् सहकारिसन्निधानाभावाच्चक्षुरादीनां रूपादिस्वविषयग्रहणासामर्थ्यजननात् सर्व्वेन्द्रियाच्छादि एवमाश्चर्य्यजनकं तमश्च यः सूत इत्यर्थः। अथ च यः पूर्व्वोक्तप्रकारेण वैराग्यफलभूतं जनयितुं रञ्जनं करोति प्रज्वलितश्च तमो यथा कथञ्चिद्धेतौ शत्रा व्याख्येयं। अथ वा अपिर्विरोधार्थः।यो लौहित्यं जनयति यश्च प्रीतिमुत्पादयति स एव अप्रीतिमिति कथं। यश्च प्रकर्षेण दीप्तस्तेजोरूपः सोऽन्धकारं रञ्जनश्च इदं कथं सूते।तथापि सर्व्वेन्द्रियाच्छादनमिति विरोधाभासः। वैराग्यशब्दस्य लौहित्याभावात् प्रीत्यभावार्थक्षेपात्तमःशब्दस्य वाधकार्थक्षेपात्। परिहारस्तूक्तप्रकारेण॥ २२॥

पञ्चेष्विति। पञ्चेषुविजयासक्तौ कामजयविषये अभिनिवेशे सति क्रुध्यतो भवस्य कुप्यतो महेश्वरस्य जयात् स्ववशीकरणाद्धेतोः येन क्रोधेन अन्यविगृहीतारिजयकालनयः परेण प्रारब्धविग्रहे शत्रौ स्वजयस्य समयस्तत्पराभवारम्भसमयः स इत्येवंरूपो

हस्तौ विस्तारयन्निभ्ये विभ्यदर्धपथस्थवाक्।
सूचयन्काकुमाकूतैर्लोभस्तत्र व्यलोकि तैः ॥ २४ ॥
दैन्यस्तैन्यमया नित्यमत्याहारामयाविनः।
भुञ्जानजनसाकूतपश्या यस्यानुजीविनः ॥ २५ ॥

नीत्युपदेशः श्रितोऽङ्गीकृतः। अन्यदा यो जेतुमशक्यः सोऽन्येन विगृहीतो यदा भवति तदा जयो भवतीति नीत्युपदेशोऽन्यदा जेतुमशक्यस्य भवः स्मरेण सह विग्रहसमये जितत्वात् जित इवेत्युत्प्रेक्षा। महेश्वरोऽपि येन स्ववशीकृतस्तस्य क्रोधस्य माहात्म्यमशक्यवर्णनमिति भावः। विगृहीतारिजये अयं सप्तमीसमासः। अरेर्जयकाल इति षष्ठीसमासो वा ॥ २३ ॥

पञ्चभिः कुलकं। हस्ताविति। इभ्ये धनिनि विषये हस्तौ द्वावपि पाणी लोभाद् विस्तारयन् प्रसारयन्। दास्यति न वेति हेतोः बिभ्यत् भयं प्राप्नुवन्। अत एव अर्धपथस्थवाक् हृदयान्निर्गत्य कण्ठमागत्य मुखादनिःसरन्ती वाणी यस्यैवम्भूतः। खण्डोक्तिं वदतीति यावत्। तथा आकूतैः काकुं सूचयन्, अङ्गुलीमुखनिक्षेपादिचेष्टितैर्देहि देहीत्यादि भयदैन्यादिविकृतां वाणीं ज्ञापयन्। एवम्भूतो मूर्त्तो लोभस्तत्र जनौघे तैर्दैवैर्व्यलोकि दृष्टः। स्खलज्जिह्वः स्तम्भदृशा इति पाठे रमास्वादार्थं चञ्चलजिह्वो भयात्स्तब्धापूर्णवाक् चेत्यर्थः। लुब्धस्येयं जातिः ॥ २४ ॥

दैन्येति। नित्यं दैन्यस्तैन्यमयाः सदा दीनत्वचौरत्वे प्रचुरे येषु तादृशा दैन्यचौर्यरूपा वा। तथा अत्याहारामयाविनः

धनिदानाम्बुवृष्टेर्यः पात्रपाणाववग्रहः।
स्वान् दासानिव हा निःस्वान्विक्रिणीतेऽर्थवत्सु यः ॥ २६ ॥

जाठरवह्नाननुरूपाहारगौरवादजीर्णरसत्वान्नित्यं दीर्घरोगिणः। तथा ऽयमेव सकलं भोक्ष्यते मह्यं भोक्तुं न ददाति समीचीनोऽयमोदनः कीदृग्घृतं दधि मह्यं किं वितीर्यमस्मै किमित्यादि दुष्टदृष्ट्याशयादिना भुञ्जानजनसाकूतपश्याः। अभ्यवहरतो लोकस्य साभिप्रायं विलोककाः एवम्भूता यस्य लोभस्य सेवकाः स व्यलोकीति पूर्व्वेण सम्बन्धः। इयमपि जातिः। आमयावीति आमयस्योपसङ्ख्यानं दीर्घश्च (पा०५।२।१२२। वा०१) ॥ २५ ॥

धनीति। पात्रपाणौ सम्प्रदानभूतब्राह्मणहस्ते विषये धनिदानाम्बुवृष्टेः समृद्धधनानां नराणां सङ्कल्पसम्बन्धिजलवर्षणस्य यो लोभः अवग्रहः प्रतिबन्धकः। वृष्टेश्चावग्रहः सम्भाव्यते। महाधनिकोऽपि यद्वशात् पात्रपाणौ जलं न वितरतीत्यर्थः। तथा निःस्वान् निर्द्धनान् स्वान् आत्मनः स्वीयान् पुत्रदारादीन् वा अर्थवत्सु धनिकेषु विषये विक्रीणीते निर्गतस्नेहाभिमानिनः। कश्चन विनिमय्य स्ववशवर्त्तिनो दासीपुत्रानिव वितरति। हा खेदे, निःस्वेन च धनलोभवशादात्मा स्वीया वा पुत्रादयो धनिकेषु विक्रीयन्ते। दासा यथा स्वेच्छया धनार्थं क्रीयन्ते तथेत्यर्थः। व्यलोकीति पूर्व्वेण सम्बन्धः ॥ २६ ॥

एकद्विकरणे हेतू महापातकपञ्चके।
न तृणं मन्यते कोपकामौ यः पञ्च कारयन्॥ २७॥
यः सर्व्वेन्द्रियसद्मापि जिह्वां वक्रवलम्बते।
तस्यामाचार्य्यकं याञ्चापटवे वटवेऽर्जितुं॥ २८॥

एकेति। तौ कोपकामौ महापातकपञ्चके ब्रह्मवधादिपञ्चमहापातकसङ्घमध्ये एकद्विकरणे एकस्य पातकस्य द्वयोश्च करणे क्रमेण हेतू कारणभूतौ यस्मादत एव तयोरल्पकार्य्यकारित्वाद् यो लोभः पञ्च कारयन् तृणतुल्यावपि तौ न मन्यते। यतः स्वयं पञ्चापि महापातकानि नरकादीनि कारयति कोपाच्च योऽपि ब्राह्मणो हन्यते तस्यैकं ब्रह्मवधं प्रति हेतुत्वं कामाद्गुरुतल्पगमनं स्त्रीकामाच्च तद्भर्त्तुर्ब्राह्मणस्य वधश्चेति महापातकद्वयं प्रति तस्य हेतुत्वं। धनादिलोभात्तु ब्रह्मवधः सुवर्णस्तेयश्च रसलोभात् सुरापानं कामलोभात् स्त्रीजातिप्रदर्शितधनलोभाद्वा गुरुतल्पगमनं। दृष्टसङ्गहलोभादेतैश्चतुर्भिरपि सह संसर्ग इत्येवं लोभस्य पञ्चापि महापातकानि प्रति हेतुत्वादधिकत्वात् कोपकामौ अकिञ्चित्करौ मन्यते। ताभ्यामप्यधिको लोभ इति भावः। एकद्विकरणे इत्यत्र सङ्ख्याया अल्पीयस्या (पा॰२।२।३४ वा॰७) इत्येकशब्दस्य पूर्व्वनिपातः। तृणे इति मन्यकर्म्मण्यनादर इत्यादिना (पा॰२।३।१७) चतुर्थी वैकल्पिकत्वात् पक्षे द्वितीया॥ २७॥

यः सर्व्व इति। यो लोभः सर्व्वेन्द्रियसद्मापि सर्व्वेन्द्रियाणि

पथ्यां तथ्यामगृह्णन्तमेवं बन्धुप्रबोधनाम्।
शून्यमाश्रित्य नोज्झन्तं मोहमैचन्त चन्त ते ॥ २९ ॥

षडिन्द्रियाणि सद्मानि यस्य एवंविधोऽपि घ्राणं गन्धलुब्धं चक्षू रूपलुब्धमित्यादिप्रकारेणेत्यर्थः, वक्र यथा जिह्वामवलम्बते न तथान्यानीन्द्रियाणि। किं कर्त्तुं। तस्यां जिह्वायां याञ्चापटवे याञ्चापटुर्ब्रह्मचारी शिष्यस्तस्मै वटवे याञ्चाशक्तिकुशलाय आचार्य्यकं गुरुत्वमर्जितुं। लुब्धस्यैषा रीतिः। अयमत्र तात्पर्य्यार्थः। यो लोभो दुर्वाचं प्रति विप्रियवाक्यरचनाय यत्सामर्थ्यं नैपुणं तद्विषये गुरुतां विधातुमिव तस्याः सकाशात् प्रियवचनमप्राभाषणाभ्यासं कर्त्तुमिव शिष्यभूतस्तामतितरां सेवत इत्यर्थः। लोभवशात् सर्व्वोऽपि याञ्चाप्रियवाक्यानि ब्रूते इति भावः। याञ्चावटवे पटवे इति पाठे पटवे दृढाय याञ्चावटवे इत्यर्थः। याञ्चाचाटुपटुविषये जिह्वायां स्वस्य गुरुतां विधातुमिवेत्युत्प्रेक्षा। आचार्य्यकमिति पूर्व्ववत् ॥ २८ ॥

पञ्चभिः कुलकम्। पथ्यामिति। पथ्यां हितां तथ्यां सत्यां मातापित्रादिना कृतां बन्धुप्रबोधनां एवं सत्कर्म कुरु असन्मा कार्षीरित्यादिरूपां प्रवर्त्तनां अगृह्णन्तमनङ्गीकुर्व्वाणं यतो ऽज्ञानपङ्कलं। तथा शून्यं अलीकं अप्रामाणिकमपि रञ्जितले-नानात्मभूतानि जडान्यपि देहेन्द्रियादीनि अनाद्यविद्यावि-लासवशादात्मत्वेन आश्रित्य प्रतिपद्य सहस्रशो विद्यमानमपि नोज्झन्तं न त्यजन्तमेवम्भूतं मोहं ते देवास्तत्र सभायां ऐचन्त

श्वः स्वप्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषम्।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः॥ ३०॥

इष्टत्यागः। हितस्य प्रियस्य चानङ्गीकरणात् अनिष्टप्रकृत्यापरित्यागाच। हन्तेत्याश्चर्ये खेदे वा। मूढस्येयं जातिः॥ २९॥

श्वः स्वइति। यदुपासिनः यस्य मोहस्य सेवका बालिशा मूर्खा अथवा स्वयमज्ञताभिमानात् परोपदेशानङ्गीकाराच्च शिशुभूता एवम्भूता जनाः कुटुम्बजम्बाले मग्नाः पुत्रकलत्रादिरूपकुटुम्बरूपे कर्दमे बुडिता अपि मृतोऽयं पुत्रः किं करोमि इदं कलत्रं किंवा करिष्यति अस्य चैत्रादेः किं भविष्यति इत्यादिप्रकारेण पुत्रादियोगक्षेममात्रपराः शिश्नोदरपरायणाः सन्तः श्वः परेद्यवि अतिसन्निहित इति यावत् जातस्य हि ध्रुवो मृत्युरित्यादिवचनप्रामाण्यादरात् अपि सन्निहिते प्राणगमने ज्ञाते सति सन्निपातादिना आतुरत्वेऽपि वा श्वः प्राणप्रयाणे निश्चिते सत्यपि संसारसमुद्रतारकं स्मरहरं न ध्यायन्ति किन्तूक्तप्रकारेण मरणसमयेऽपि कुटुम्बचिन्तामेव कुर्वन्तीत्यर्थः। इदमपि मूढलक्षणं। बाल्ये निमग्नोऽन्योऽपि किमपि न स्मरति। श्व श्व इति पाठे वीप्सायां द्विः श्वः। स्वप्राणेति पाठे स्वस्य प्राणानामित्यर्थः। द्विपमिति कर्मत्वविवक्षया द्वितीया। स्मरद्विष इति अधीगर्थेति (पा॰ २।३।५२) षष्ठी॥ ३०॥

पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम्।
अन्तर्ग्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम्॥ ३१॥
ब्रह्मचारिव्रतस्थायियतयो गृहिणं यथा।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः॥ ३२॥

पुंसामिति। यो मोहः, न लब्धं निर्वाणं विनाशो येन स ज्ञानरूपो दीपस्तन्मयस्तत्प्रचुर आत्मा मनो येषां ज्ञानिनां वसिष्ठादीनां उज्ज्वलमप्यन्तर्निर्मलमप्यन्तःकरणं संज्ञां व्यक्तं प्रकटं ग्लापयति मलधर्षितं करोति। मोहमोहिताः कामाधीनाः सन्तो ज्ञानिनोऽपि विश्वामित्रादयः स्वमनो मेनकादिदेवाङ्गनाप्रवणञ्चक्रुः। पूर्व्वमुज्ज्वलस्यापि मनसो मोहेन मालिन्यं कृतं। ज्ञानिनामपि चेतांसीत्यादिमार्कण्डेयवचः प्रमाणं। न लब्धः साक्षात्कृतो निर्वाणोपयोगी मोक्षोपयोगी ज्ञानदीपरूपः स्वप्रकाशज्ञानरूप आत्मा येस्तेषां अद्वैतज्ञानरहितानामिति वा। किमिव। कज्जलवत्। यथा मध्यस्थापितस्य दीपस्य कज्जलं सुधाधवलितानां घटादीनां मध्यं मलिनयति॥ ३१॥

ब्रह्मेति। ब्रह्मचारी व्रतस्थायी वानप्रस्थः यतिः सन्न्यासी एते त्रयोऽप्याश्रमिणो गृहिणं गृहस्थं यथा अशनाच्छादनार्थं उपजीवन्ति सेवन्ते,

यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थैरेव धार्य्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी॥

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः॥ ३३॥
कुरुसैन्यं हरेणेव प्रागलज्जत नार्ज्जुनः।
हतं येन जयन् कामस्तमोगुणजुषा जगत्॥ ३४॥

इति स्मार्त्तवचनात्, तं लघीकृत्य वा प्राणधारणं कुर्व्वन्ति, तथा क्रोधलोभमनोभवा यं मोहं सेवन्ते यं लघीकृत्य वा स्वरूपं लभन्ते। मूढ एव क्रुद्धो लुब्धः कामी च भवति॥ ३२॥

जाग्रतामिति। यो मोहो जाग्रतां सावधानानामपि निद्रा अविवेकरूपं निश्चेतन्यं। तथा यः पश्यतां चाक्षुषज्ञानवतामपि अन्धता चक्षुराच्छादनाद् द्रष्टव्यदर्शनाभावरूपसदसद्ग्रहणं संसारस्यानित्यदुःखरूपतां जानतामपि तदपरित्यागहेतुत्वा-दज्ञानरूप इत्यर्थः। तथा यः श्रुते वेदशास्त्राधिगमे सत्यपि मूढत्वेन ज्ञेयाज्ञानरूपं जाड्यं विधिनिषेधाद्यनिर्णयरूप इत्यर्थः। तथा यस्य प्रकाशे सौराग्नेयचाक्षुषाद्यालोके सत्यपि द्रष्टव्य-घटपटाच्छादनरूपतयान्धकाररूपः। प्रकटेऽप्यर्थे प्रतीतिप्रति-बन्धक इत्यर्थः॥ ३३॥

कुर्व्विति। तमोगुणजुषा अज्ञानरूपेण तमोगुणसेविना येन मोहेन हतं जगत् जयन् कामो नालज्जत। क इव। तमोगुणजुषा आश्रिततमोगुणेन हरेण संहारकेण रुद्रेण प्राक्काणतया प्राक् हतं यत् कुरुसैन्य पश्चादिनाशयन् अर्ज्जुन इव। मया हतमि-त्यभिमानेन लज्जां यथा नाप। अन्येन हतस्य पश्चात् खेन

चिह्निताः कतिचिद्देवैः प्राचः परिचयादमी ।
अन्ये न केचनाचूडमेनःकञ्चुकमेचकाः ॥३५॥
तत्रोद्गूर्ण इवार्णोधौ सैन्येऽभ्यर्णमुपेयुषि ।
कस्याप्याकर्णयामासुस्ते वर्णान् कर्णकर्कशान् ॥३६॥

हनने हि लज्जा युक्ता सा तु कामस्य न जातेत्यर्थः । मूढ एव कामपरवशो भवतीत्यर्थः । ईश्वरः प्राक् कुरुसैन्यं शूलेन हन्ति पश्चादर्जुनः शरेणेति द्रोणपर्व्वकथा ॥ ३४ ॥

कुलकं । चिह्निता इति । अमी कामादयः कतिचित् कतिपयैर्देवैरिन्द्रादिभिः प्राचः पूर्व्वजातात् परिचयात् पटुतरात् संसर्गात् चिह्निताः चिह्नैर्निश्चिताः ।देवानामपि कामाद्यायत्तत्वात् प्राचीनः परिचयः । अन्ये तदुपजीविनो बौद्धादयः केचन विशेषेण न ज्ञाताः । यत आचूडं शिखामभिव्याप्य मर्य्यादीकृत्य वा एनसा पापरूपेण कञ्चुकेन मेचकाः श्यामवर्णाः । यो हि नीलवस्त्रादिना आवृतदेहः स विशेषतो न लक्ष्यते श्यामत्वान्न बुद्ध इत्यर्थः ॥ ३५ ॥

तत्रेति । उद्गूर्णे त्यक्तमर्य्यादे अर्णोधौ समुद्र इवातिगम्भीरे तत्र तस्मिन् काले सैन्ये अभ्यर्णे उपेयुषि सामीप्यं गते सति ते देवाः कस्याप्यनुपलक्षिताकारस्य चार्वाकस्य कर्णकर्कशान् वर्णानाकर्णयामासुः । अभ्यर्णे । अभेश्चाविदूर्य इति (पा० ७।२।२५) नेट् । गूरी उद्यमे मर्यादाधारणे च । उद्यमत्यागिनीत्यर्थः ॥ ३६ ॥

ग्रावोन्मज्जनवद्यज्ञफलेऽपि श्रुतिसत्यता ।
का श्रद्धा तत्र धीवृद्धाः कामान्धा यत् खिलीकृतः ॥ ३७ ॥
केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना ।
यद्वेदमर्मभेदाय जगदे जगदस्थिरम् ॥ ३८ ॥

तानेव वर्णनाह । ग्रावेति । ग्रावोन्मज्जनवद्ग्रावाणः प्लवन्तीति प्रतिपादितपाषाणतरणवत् ज्योतिष्टोमादियज्ञानां साध्ये स्वर्गादौ फलेऽपि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिश्रुतीनां सत्यता यथार्थता ग्रावोन्मज्जनवाक्यस्य प्रत्यक्षबाधितत्वाद्यागानन्तरमेव स्वर्गादेरदृष्टत्वात् ज्योतिष्टोमादियागप्रतिपादिका श्रुतिरपि प्रत्यक्षबाधिता । तथा च यागश्रुतिरप्रमाणं प्रत्यक्षविरुद्धत्वात् ग्रावोन्मज्जनश्रुतिवदिति प्रयोगात् यागश्रुतेरपि स्वर्गादावसत्यतेति च व्याख्येयं। अत्र विरुद्धलक्षणया सत्यत्वेऽप्यसत्येत्यर्थः । एवमन्येषामपि वेदवाक्यानां श्रुतित्वाविशेषादप्रमाणत्वे हे धीवृद्धा बुद्धिमन्तो देवास्तत्र फले श्रुतौ वा युष्माकं का श्रद्धा कथमास्तिक्यं अपि त्वप्रामाणिकेऽर्थे श्रद्धा न कार्य्या । यत् येन कारणेन यद्भयादेदोक्तविध्यतिक्रमभिया कामान्धा यदृच्छाचारमार्गः खिलीकृतो सद्धस्तक्त इत्यर्थः । श्रुतिमात्रस्याप्रमाणत्वादमी यजमानास्त्रिंशा कतिचिद्दिनानि यद्भयपथं तदप्यप्रमाणिकत्वात् त्यजतेति भावः । धीवृद्धा इत्युपहासः । अतिमूर्खा भवन्त इत्यर्थः ॥ ३७ ॥

केनेति । केनाप्यज्ञातनाम्ना बोधिसत्त्वेनातिप्राज्ञेन जिनभ-

अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकं ।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका ॥ ३९ ॥

द्वारकेण वेदस्य मर्मभेदाय जातमुत्पन्नं । वेदमर्मभेदः कर्त्तुमारब्ध इति यावत् । कथमत आह । यद्यस्मात् सत्त्वेन हेतुना सत्त्वरूपेण लिङ्गेन, यत् सत् तत् क्षणिकं यथा पट इत्यादिरूपेण, जगदस्थिरं क्षणिकं जगदे । प्रत्ययादिसत्त्वलिङ्गेन विश्वस्य क्षणिकत्वसिद्धावुभयलोकानुगतं स्थिरमेककर्त्तारमधिकारिणमाश्रित्य वेदैर्विहितानां विधिनिषेधानां निराश्रयतया वेदस्याप्रामाण्यप्रतिपादनाद्वेदमर्मभेदः कृत इत्यर्थः । बौद्धसिद्धान्तस्तु ग्रन्थान्तराद्बोद्धव्यो विस्तरभयादत्र नोक्तः । अयं वक्ता पूर्वस्माद्भिन्नश्चार्वाक एव वा स्वमतं वेदाप्रामाण्यं बौद्धसंवादेन द्रढयति । केनेति । सत्त्वेन हेतुना यस्माज्जगदस्थिरं जगदे तस्मात् केनापि लोकोत्तरप्रज्ञेन तेनैव चार्वाकेण वेदमर्मभेदाय बौद्धेन जातं । तदीयमताङ्गीकरणात् तद्रूपेणैव जातमित्यर्थः । जगादेति पाठे यद्बोधिसत्त्वं जगदस्थिरं जगादेति व्याख्येयम् । क्षणिकत्वे सिद्धे येन पापं कृतं स नष्ट एवेति किमिति पापाद्भयमित्यादि प्रकरणाज्ज्ञेयम् ॥ ३८ ॥

अग्नीति । नित्यं काम्यञ्च सायम्प्रातर्होमरूपं अग्निहोत्राख्यं कर्म्म, त्रयी च तन्त्रमीमांसा वेदत्रयसम्बन्धि वा यत्तन्त्रं वेदविहितोऽन्योऽपि कर्म्मकलापः, तथा त्रयो दण्डा यत्र तत्पाशुपतमतं, तथा भस्मनः पुण्ड्रस्तिलको यत्रैवंविधं शैवादिमतमेतत्

शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः।
तदनन्तकुला दोषाददोषा जातिरस्ति का॥ ४०॥

सर्व्वं, प्रज्ञाया बुद्धेः पौरुषेण सामर्थ्येन तीक्ष्णया प्रज्ञया निःस्वानां हीनानां प्रज्ञया पौरुषेण च वा हीनानां, वचनेन चौर्येण च बलाद्वा ग्रहीतुमसमर्थानां पुरुषाणां जीविका जीवनोपायः। तद्वेषधारणधर्मेण द्रव्यमर्ज्जितुमेव न तु तात्त्विको धर्मः। परलोकसाधनमिव वेदप्रामाण्यवादिनां भवति इति जीवो बृहस्पतिर्जल्पति वदति। वाक्यार्थः कर्म्म। तदुक्तम् तेनैव।

अग्निहोत्रं त्रयो वेदास्त्रिदण्डभस्मपुण्ड्रकं।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः॥

भस्मगुण्ठनमिति वा वचने पाठः। तस्मादग्निहोत्राद्यप्रमाणमेवेति भावः। जीविकेति। धात्वर्थनिर्द्देशे ण्वुल्॥ ३८॥

इदानीं ब्राह्मणादिजातिधर्म्मानसहमानो जातिं दूषयति। शुद्धिरिति। विशुद्धमातापितृजत्वं हि ब्राह्मणादेर्लक्षणं। सा शुद्धिर्दुर्निरूपा। यद्यस्मात् पित्रोर्मातापित्रोर्यौ पितरौ मातामहपितामहौ मातामहीपितामह्यौ च तयोरेकशः प्रत्येकं वंशद्वयीशुद्धौ सत्यां, एवं तयोरपि पितामहादिमातृपितामहादिमातृपितामह्यादिमातामहमातुःपितामह्यादिमातामहीमातुःपितामह्यादिशुद्धौ सत्यां एवं ब्राह्मणे यावत् प्रत्येकं शुद्धौ सत्यां शुद्धिः परीक्षणीया। सत्तस्मादनन्तकुला एवमपरिमितवंशभेदात्। अत एव दोषा दुर्विज्ञेयाः। शुद्धस्त्रीपुंसयोः पारम्पर्यतया शुद्धेः सन्देहात्। इन्द्रादीनामहल्यादीनाञ्च

कामिनीवर्गसंसर्गैर्न कः सङ्क्रान्तपातकः ।
नाश्नाति स्नाति हा मोहात् कामक्षाममिदं जगत् ॥ ४१ ॥

पुराणग्रामाख्येन व्यभिचारदर्शनादशुद्धेर्निश्चयाच्च जातिसङ्कररूपाद्दोषात् का जातिरदोषास्ति अपि तु न कापि। यदाहुः।

अप्येकपङ्क्त्यां नाश्नीयात् सम्पन्नैः स्वजनैरपि ।
को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेदिति ॥

तथा। अनादाविह संसारे दुर्वारे मकरध्वजे ।
कुले च कामिनीमूले का जातिः परिकल्पितेति ॥

तस्मात् सङ्कीर्णयोनित्वात् सर्व्वा अपि जातयो दुष्टा एवेति जातिधर्म्मान् विहाय स्वेच्छाचारं कुरुतेति भावः। यद्वा तस्मादाब्राह्मणमनन्तानां कुलानामदोषाभावाद्व्यभिचारादिदोषरहिता जातिः कास्ति अपि तु न कापि। पूर्व्वपूर्व्वपित्रादिव्यभिचारादिदोषात् सर्व्वापि जातिर्दुष्टैवेति व्याख्याता। यद्वा तदेति च पाठः सम्यक्। तयोः पित्रोरनन्तकुलानां दोषाभावेन कृत्वाऽदोषा जातिरस्ति अपि तु महति कुले कस्य चिद्दोषसम्भवात् सर्व्वापि जातिर्दुष्टैवेति व्याख्या। यच्छब्दसामर्थ्यात्तच्छब्दाध्याहारः। एकशः। सङ्ख्यैकवचनादिति (पा॰ ५।४।४३) शस् ॥ ४० ॥

अन्यदप्याह। कामिनीति।

आहारो द्विगुणःस्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥

इति वचनात् पुरुषापेक्षया अष्टगुणकामानां कामिनीनां स्त्रीणां नानाजातीयानां वर्गः संघस्तस्य संसर्गैर्धानैः सम्बन्धैः कृत्वा

ईर्ष्यया रक्षतो नारीर्धिक् कुलस्थितिदाम्भिकान्।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः॥ ४२॥

कः पुरुषः सङ्क्रान्तं प्रविष्टं पातकं यत्र एवंविधो न अपि तु।

संवत्सरात्तु पतति पतितेन सहाचरन्।

इति शास्त्रात् कृतपातकस्त्रीसंसर्गात् सर्व्वोऽपि प्राणी सङ्क्रान्तपातक एव। तस्मात् काम्यत इति कामः फलं तेन चामं रहितं एकादश्युपवासादिव्रतं नियमो यस्य। मदनेन कृत्वा क्षीणं निष्फलं व्रतं यस्य वा तज्जगत् सर्व्वोऽपि लोकः मोक्षादिचाराभावाद् वृथेति यावत्, नाश्नाति न भुङ्क्ते एकादश्यादौ वृथैव च स्नाति तीर्थादौ हा कष्टम्। स्वयं शुचित्वेऽपि स्त्रीव्यभिचारादिदोषसंसर्गात् स्त्रीणां शुचित्वेऽपि दुष्टसंसर्गात् सर्व्वेषां पातकित्वादुपवासादि वृथैव करोति। केवलं प्रयास एव तस्य भवतीत्यर्थः। तस्मात् स्वेच्छाचार एव कार्य्य इति भावः। चार्वाकमते विधिनिषेधाभावान्नैष दोष इत्यर्थः। तेषां सदोषत्वाख्यातिरपि सर्व्वा सदोषैवेत्युक्तं भवति। अभिलाषेण कृत्वा नष्टं व्रतं यस्य। एकादश्यां भोजनाभिलाषे सत्यपि न भुङ्क्ते, अभिलाषे सत्येवामावास्यादौ स्त्रीनिवृत्तिः, स्नाति च तीर्थादौ, तत्सर्व्वं वृथैव। कामोपहतत्वाद् वहिः शोधयत्यन्तरशुद्धमित्यर्थः। क्षामः। क्षायो मः इति (पा० ८।२।५३) मः॥ ४१॥

ईर्ष्येति। ईर्ष्यया असहनत्वमात्रेण हेतुना नारीः रक्षतस्तासां परपुरुषदर्शनमपि कर्त्तुं अप्रयच्छतः कुलस्थितिर्ब्राह्मणादिजातेरसाङ्कर्य्येणावस्थानं तद्रूपेण दम्भेन चरन्ति ये तान्

परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना॥ ४३॥

पुरुषान् स्त्रीरक्षणमेव कुलस्थितिं मन्यमानान् धिक् ते निन्द्याः। निन्द्यत्वे दाम्भिकप्रयुक्तत्वमेव हेतुः। किम्भूतान्। स्त्रियः पुरुषाश्च विवेकशून्या यतोऽतःस्मरान्धत्वाविशेषे साधारणे सत्यपि तथा नारीवन्निर्बन्धेन नरमरक्षतः परदारसंसर्गादनिवारयतः। न हि जातिसङ्करो नारीणामेव व्यभिचारेण प्रयुक्तो यतस्ता एव रक्षणीयाः किन्तु पुरुषाणामपि व्यभिचारेण। यदि रक्षणीयं तर्हि द्वयमपि। न चैवं क्रियते। तस्मादन्यतरस्यैव रक्षणे जातिसङ्करस्यैव तावदस्थ्यात् कुलस्थित्यभावान्नारीमात्ररक्षणं तेषां दम्भ एवेत्यर्थः। तस्मादीर्ष्यां त्यक्त्वा नरस्य वेश्यादाविव स्त्रीणामपि नरान्तरे प्रवृत्तिप्रतिषेधं माकुरुध्वमिति भावः। ईर्ष्ययेत्यनेनेर्ष्यैवात्र हेतुर्न तु धर्म इति सूचितं। अथ च स्मरान्धत्वाविशेषेऽपि नारीरक्षतोऽनेकपतिभ्यः किन्त्वेकमेव तस्याः कुर्वतः। नरं तु स्त्रीवदरक्षतः। स्त्रिया यथा एक एव पतिस्तथा नरस्यैकैव स्त्रीति न किन्तु ते बह्वीः कुर्वन्ति तस्मादपि निन्द्यास्ते अत्रापि ईर्ष्यैव हेतुः॥ ४२॥

परेति। परदारेभ्यो या निवृत्तिः ताः सादरं न द्रष्टव्याः किं पुनः स्प्रष्टव्या इत्येतदर्थप्रतिपादकं शास्त्रं सोऽयं परवञ्चनरूपो दम्भः अहल्यया गौतमस्त्रिया सह केलिः कामक्रीडा तत्र लोलेन तत्परेण दम्भोलिपाणिनेन्द्रेण स्वयमात्मनैवानादृत

गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः ।
येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः ॥ ४४ ॥

उपेक्षितः। परदारागमनप्रायश्चित्तविभागोऽप्येतेन दूषितः। अन्यं प्रति तन्न कार्य्यमिति उपदिशन्ति स्वयं तु तदेव कुर्वन्तीत्युपहासोऽपि सूचितः। अहल्यासम्भोगलम्पट इन्द्र एव दाम्भिकोऽन्ये परदारपराङ्मुखाः सर्व्वेऽपि दाम्भिका एवेति भावः। वज्रहस्तत्वात् परदारमर्षणं कृतवान् तस्मादयं शास्त्रीयो निषेधो न भवति किन्त्वशक्तत्वाद्दम्भ एवेति ॥ ४३ ॥

अन्यस्त्वाह। गुर्व्विति। भो द्विजा यूयं गुरुतल्पगतौ पित्रादिभार्य्यासम्भोगे विषये पापकल्पनां,

ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ।
महापातकिनस्त्वेते तथा विश्वासघातिनः ॥

इत्यादिवचनानुरोधेन महापातकसम्भावनां त्यजत। यस्माद्येषां वो युष्माकं पत्युः स्वामिनो द्विजराजस्य चन्द्रस्य देवानां गुरोर्वेदादिपाठयितुर्बृहस्पतेर्दाराः तेषाङ्ग्रहे सम्भोगे अत्युच्चैरतितरां ग्रहोऽभिनिवेशः, श्रूयत इति शेषः। वेदादिपाठनात् बृहस्पतेर्देवगुरुत्वं। तस्मात् तद्भार्य्यागमने चन्द्रस्य दोषलेशोऽपि न, तत्सेवका यूयमपि गुरुतल्पगमनं कामं कुरुतेति भावः। यथोक्तं।

राज्ञि धर्म्मिणि धर्म्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्त्तन्ते यथा राजा तथा प्रजा इति ॥

अयमप्युपहासः। गुरुमन्दग्रहेनैवमुक्तं। गह इति पाठे उत्सवः।

पापात्तापा मुदः पुण्यात् परासोः स्युरिति श्रुतिः।
वैपरीत्यं द्रुतं साक्षात्तदाख्यात बलाबले ॥ ४५ ॥

अथ च तेजःसमूहो गुरुतल्पगमनेऽपि प्रत्यक्षमुदेत्येव न तु पतित इत्यर्थः। इन्द्रादिनिकटे वाल्मीकिप्रमुखा द्विजास्तिष्ठन्ति तेषां सम्बोधनं। बृहस्पतेर्भार्य्यायां गर्भमुत्पाद्य तत्सुतस्वीकारार्थं सोद्यमानिन्द्रादीन् प्रति चन्द्रेण महारणारम्भसंरम्भेण तेजः प्रकटितं। अनन्तरं ब्रह्मणा गुरुभार्य्यां त्याजितोऽपि स गर्भजपुत्रं गृहीतवानिति पौराणिकी कथा। तल्पस्तु शयनीये स्यात्तल्पं सम्बकलत्रयोरिति विश्वः ॥ ४४ ॥

पुण्यो वै पुण्येन कर्म्मणा पापः पापेनेत्यादिश्रुतिं दूषयति। पापादिति। परा गता असवो यस्य मृतस्येत्यर्थः तस्य प्राणिनः इह कृतान्निषिद्धाचरणजात् पापात्तापा दुःखानि पुण्यादिह कृतादिहिताचरणजाद्धर्म्मान्मुदः सुखानि स्युर्भवन्ति इति श्रुतिराह। साक्षात्प्रत्यक्षेण द्रुतं शीघ्रं वैपरीत्यं दृश्यत इति शेषः। प्रयागादौ प्रातर्माघस्नानं कुर्व्वतो भवदभिमतसुकृतकारिणः पुरुषस्य तदानीमेव दुःखं भवति। भवदनभिमतपरदारसङ्गमादिपापकारिणस्तदानीमेव सुखं भवतीति वैपरीत्यमनुभूयते। अथ चैवं श्रुतिः श्रवणमात्रं न तु तत्र किञ्चित्प्रमाणं। किञ्च मृतस्य किंवा भविष्यतीति को वेद जीवता तावद्वैपरीत्यमनुभूयते तत्तस्मात् श्रुतिप्रत्यक्षयोर्विषये यूयं बलाबले स्वयमेव आख्यात कथयत भवन्त एव विचारयन्त्वित्यर्थः। प्रमाणयोः

सन्देहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि ।
त्यजत श्रोत्रियाः सत्रं हिंसादूषणसंशयात् ॥ ४६ ॥

परस्परविरोधे सबलत्वेन दुर्बलत्वेन च व्यवस्था क्रियते। तत्र यथा प्रत्यक्षानुमानविरोधे प्रत्यक्षं बलीयः। तथा श्रुतिप्रत्यक्षविरोधे प्रत्यक्षमेव बलीय इति निश्चित्य पापात् सुखमनुभूयत इति पापं सर्व्वैः कार्य्यमिति भावः। प्रबलदुर्बलत्वव्यवस्थापकस्य न्यायस्याप्ययमुपहासः ॥ ४५ ॥

सन्दिग्धेऽपि परलोके त्याज्यमेवाशुभं बुधैरित्यादिप्रतिवाधाद्दूषयति। सन्देह इति। तत्र तत्र व्यभिचरितत्वाच्छ्रुतिप्रामाण्यानिश्चयात् पापं न कार्य्यं जन्मान्तरे निरयादिदुःखभयादित्येके वदन्ति, अन्ये च येन कृतं स तु दग्धोऽन्यदेहप्राप्तिस्तस्य स्यादित्यत्र का प्रत्याशेति वादिविप्रतिपत्तेरन्यदेहाप्तेः सन्देहे सत्यपि पाक्षिकोऽपि दोषः परिहर्त्तव्य इति न्यायेन यदि देहान्तरं स्यात् तर्हि पापफलं दुःखमनुभूयेतेति बुद्ध्या यदि वृजिनं पापं विवर्ज्यं सर्व्वथा न कार्य्यं तर्हि हे श्रोत्रियाश्छन्दोध्यायिनो वशिष्ठादयो यूयं सत्रं अनेककर्तृकं यागं त्यजत नैवं कुरुध्वं। कुतः। पशुहिंसायाः सम्बन्धिनो दोषस्य संशयात् सन्देहात्। मा हिंस्यात् सर्वा भूतानि, अहिंसा परमो धर्म इत्यादि श्रुतिस्मृतिवशाद्यागेऽपि हिंसा न कार्य्येत्येके। विधिवलादगर्हितपापोत्पत्तिः सा कार्य्यैवेत्यन्ये इति सन्देहे यागीयपशुहिंसा चेत् पापहेतुः स्यात्तदा नेष्टप्राप्तिः किन्त्वनिष्टमेव

यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः ।
रामाया जातकामायाः प्रशस्ता हस्तधारणा ॥ ४७ ॥
सुकृते वः कथं श्रद्धा सुरते च कथं न सा ।
तत्कर्म्म पुरुषः कुर्य्याद्येनान्ते सुखमेधते ॥ ४८ ॥

स्यादिति पाचिकोऽपि दोषः परिहरणीय इत्यनेनैव न्यायेन यागमपि त्यजत न चेदेवं पापमपि कुरुतेति भावः । संश्रयादिति पाठे सम्बन्धादित्यर्थः । कलुषं वृजिनेत्यमरः ॥ ४६ ॥

त्याज्यमेवाशुभं बुधैरित्यपि सव्यभिचारमाह । य इति । यस्त्रिवेदीविदां वेदत्रयवेदिनां वो युष्माकं वन्द्यो नमस्करणीयः स व्यासोऽपि इति भारतादौ जजल्पोक्तवान् । इति किं । जातकामायाः कामार्त्ताया रिरंसोः रामाया अज्ञातकुलशीलाया अपि रमणाय हस्तधारणा पाणिग्रहणं अङ्गीकरणञ्च प्रशस्ता युक्तैव । न केवलं वाल्मीकिः किन्तु व्यासोऽपीत्यपिशब्दार्थः । तद्वचनं भवद्भिः पूज्यत्वादङ्गीकर्त्तव्यमित्यपि सूच्यते ।

स्मरार्त्तां विह्वलां दीनां यो न कामयते स्त्रियम् ।
ब्रह्महा स तु विज्ञेयो व्यासो वचनमब्रवीत् ॥

इत्याद्यर्ज्जुनतीर्थयात्राविषये उर्व्वश्यादिप्रसङ्गे च भारतादौ रामायणे च शूर्पणखाद्युक्तौ प्रसिद्धं । ततश्च पापवर्ज्यकार्य्यमित्यप्युच्यते । उभयथापि दोष इति भावः । वेदविदामिति कृत्यानामिति (पा० २।३।७१) षष्ठी ॥ ४७ ॥

प्रकारान्तरेण पूर्व्वोक्तमेवाह । सुकृत इति । सुकृते चान्द्रा-

बलात् कुरुत पापानि सन्तु तान्यकृतानि वः ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥ ४९ ॥

यथार्द्दो वो युष्माकं कथं केन हेतुना श्रद्धा आस्तिकता अपि त्वनुचितमेतत्। सा च श्रद्धा सुरते कामिनीविषये न कथमिति। तथा तत्र भवितुं युक्तं। यस्मात् पुरुषस्तत्कर्म्म व्यापारं कुर्य्यात् येन कर्म्मणा कलाऽन्ते कर्म्मावसान एव सुखमेधते वर्द्धतेऽनुभूयते पुरुषेणेत्यर्थः। जन्मान्तरे व्रतादिजन्यं सुखं सन्दिग्धं सुरतजन्यञ्च सर्व्वस्य स्वानुभवसाधिकं। तस्माच्चान्द्रायणादि सुकृतं त्यक्त्वा सुरतमेवाङ्गीकर्त्तव्यमिति भावः। एतेन मार्स्नैरष्टभिरह्ना च पूर्व्वेण वयसायुषा। प्राज्ञस्तत्कर्म्म कुर्व्वीत येनान्ते सुखमेधत इत्यादि विडम्बितं। दुरिते चेति पाठे परदारगमनादावित्यर्थः। यतः परदारगमनानन्तरमेव सुखं दृश्यते ॥ ४८ ॥

बलादिति। भो द्विजा यूयं पापानि परस्त्रीगमनादीनि बलादनुमतावसत्यामपि कुरुत तानि पापानि वः सम्बन्धीनि कृतान्यप्यकृतानि सन्तु फलदायीनि मा भवन्त्वित्यर्थः। यतो मनुर्येन कृतान् सर्व्वानर्थान् व्यापारान् अकृतानेवाब्रवीत्। मनुवचनप्रामाण्यात् बलाद् पापं कुरुतेत्यर्थः। बलाद्दत्तां बलाद्भुक्तां बलाद्यामीकृतञ्च यदित्यन्यार्थमपि मनुवचनं छलेनार्थान्तरपरिकल्पनया प्रकृते निदर्शयन् प्रतिपक्षो विडम्बयति ॥ ४९ ॥

स्वागमार्थेऽपि मा स्मास्मिंस्तीर्थिका विचिकित्सवः।
तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ ॥५०॥
श्रुतिस्मृत्यर्थबोधेषु क्वैकमत्यं महाधियां।
व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी ॥५१॥

स्वागमेति। भोस्तीर्थिकाः सम्प्रदायागतविद्या यूयमस्मिन् पूर्व्वोक्तमनुवचनरूपस्वीयागमप्रतिपाद्येऽर्थेऽप्रमेये आत्मारामः स्यादिति वार्थे विषये विचिकित्सवः संशयालवो मा स्म भवथ। इदं कार्य्यं न वेति संशयः परित्याज्य इत्यर्थः। मनुना श्रुत्या वा इदं कथं प्रतिपादितमित्युभयचाप्यनादरपरा वा मा भवत। तर्हि किं कार्य्यमित्यत आह। यूयमानन्देन परदारगमनादि यं यं इच्छथ तं तं स्वच्छन्दं स्वेच्छया निःसंशयमादरेणाचरत। आत्मारामः स्यादिति श्रुतिप्रामाण्यात्, पूर्व्वोक्तस्मृतिप्रामाण्याच्च संशयं परित्यज्य आदरेण यदृच्छया सुखमुपभुङ्ध्वमिति भावः। असम्प्रदायागमे यद्यपि निन्दापरास्तथापि स्वागमे निन्दा न युक्तेत्यपि सूचितम्। मा निरनुबन्धकस्ततो न लुङ्। तीर्थेनागमेन चरति ठक्। सदुपाध्यायो वा तीर्थं तस्मादस्त्यर्थे ठन् ॥ ५० ॥

पूर्व्वोक्तश्रुतिस्मृतीनामर्थमज्ञात्वा त्वयैवमुक्तं व्याख्यानमप्रमाणमित्याशङ्क्याह। श्रुतीति। श्रुतिस्मृत्यर्थबोधेषु महाधियामप्यैकमत्यमविसम्वादः क्वास्ति अपि तु सर्व्वत्रापि विसम्वाद एव बुद्धिबलेन परस्परविजयात्। एवं सति व्याख्या पदार्थवाक्या-

यस्मिन्नस्मीति धीर्देहे तद्दाहे वः किमेनसा।
क्वापि किन्तत् फलं न स्यादात्मेति परसाक्षिके॥५२॥

र्थनिरूपणं बुद्धिवलं प्रज्ञाबलमपेक्षते एवम्भूता। यथा यस्य स्फुरति स तथा व्याख्याति। अत एवाद्वैतवादिनः श्रुतीरभेदपरत्वेन द्वैतवादिनस्तु भेदपरत्वेन व्याचक्षते। सा व्याख्या सुखोन्मुखी अनायाससाध्याऽक्लिष्टा अथ च सुखपर्य्यवसायिनी नोपेक्ष्या नानादरणीया सैवाङ्गीकार्य्येत्यर्थः। श्रुतिस्तूनामस्मद्‌व्याख्यात एवार्थोऽङ्गीकार्य्यः। स्वेच्छाचारमेव कुरुतेति भावः। ऐकमत्यमित्यत्र एका समाना अविसम्वादिनी मतिरित्यर्थः, चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् ॥ ५१ ॥

तन्मताङ्गीकारे निरयादिप्राप्तिः स्यादित्यत आह। यस्मिन्निति। यस्मिन् देहे अहमस्मि इति धीः गौरः कृश इत्याद्याकारः प्रत्ययः तस्य शरीरस्य दाहे सति वो युष्माकमेनसा पापेन किं अपि तु पापेन निरयपातादि किञ्चिदपि न कार्य्यते। अयमाशयः। देह एवात्मा देहातिरिक्तो वा। यद्याद्यः कल्पस्तर्हि येन देहेन पापं कृतं तस्य विनष्टत्वाद्देहात्मवादिनां वः पापेन किं कर्त्तुं शक्यते अपि तु न किञ्चिदित्यर्थः। अथ देहातिरिक्त एवात्मा देहे विनष्टेऽपि देहान्तरे देशान्तरे कालान्तरे च पुण्यपापफलानां भोक्तास्ति तथाप्येवं वक्तव्यं, स किं स्वसाक्षिकः परसाक्षिको वा। नाद्यः अहंप्रत्ययस्य देहविषयत्वेनैव सिद्धत्वादतिरिक्तात्मनकल्पनाभावकाशात्। तत्र तद्दाहे वः किमेन

सेत्येतदेव पुनरायातं। द्वितीयं दूषयति। परो वेदादिः साक्षी यस्य तस्मिन् देहान्तरे देशान्तरे कालान्तरे च फलभोक्तरि देहातिरिक्ते वेदप्रतिपादिते आत्मनि तस्य पापस्य निरयादि फलं चेत् स चेत् फलस्य भोक्ता तर्ह्यात्मनेति देहेतरात्मत्वाविशेषादिति यावत् तस्मात् काप्यात्मान्तरेऽपि तत् किं न स्यादपि तु भवितव्यमेव। तेन देहेन पातके कृते तदतिरिक्ते नात्मना चेत् फलं भोक्ष्यते तर्हि देवदत्तेन पापे कृतेऽप्यात्मत्वाविशेषाद्यज्ञदत्तेनापि तत्फलमुपभोक्तव्यमित्यप्यापद्यते। किञ्च पापफलदुःखानुभवालम्बनस्य विनाशे तत् पातकफलं देहव्यतिरिक्ते परप्रत्ययवेद्ये आत्मनि चेद्भवेत् तथापि न दोषः। दुःखं ह्युपभुज्यमानं प्रतिकूलं भवति। उपभोक्ता चाहङ्कारास्पदः। देहो विनष्ट आत्मा तु नोपभोक्तेति फलसम्बन्धेऽपि न दोषः। ततश्च पापकारिणो देहस्य विनष्टत्वान्मृत्योरेव चापवर्गत्वाच्च कश्चित् फलभोक्तेति स्वेच्छाचारमेव कुरुतेति भावः। यद्वा परस्यासौ साक्षी च परसाक्षी स एव परसाक्षिक आत्मेति आत्मलक्षणपरे देहातिरिक्ते साक्षिणि तटस्थे चेत् तत्फलं तर्हि क्वापि पाषाणादौ वा तत्फलं किं न स्यादपि तु स्यादेवान्यत्वाविशेषात्। तस्माद्देहातिरिक्त आत्मा नास्त्येव देहस्य नष्टः। कस्य पापफलं स्यादिति भावः। यद्वा क्वापि जन्मान्तरीयदेहान्तरे आत्मास्तीति पापफलं चेत् स्यात्तर्हि परो देवदत्ताद्यात्मा साक्षी यस्य तस्मिन्नात्मान्तराधिष्ठिते देवदत्तादिदेहेऽपि परस्य वा देवदत्तादिदेहस्य साक्षिणा-

मृतः स्मरति जन्मानि मृते कर्म्मफलोर्मयः।
अन्यभुक्तैर्मृते तृप्तिरित्यलं धूर्त्तवार्त्तया॥ ५३॥
जनेन जानतास्मीति कायं नायं त्वमित्यसौ।
त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्त्तया॥ ५४॥

त्वानि किं न स्यादपि त्वविशेषात् स्यादेवेति। अलमतिप्रसङ्गेन॥ ५२॥

पुनरपि देहातिरिक्तात्मवादिनमुपहसति। मृत इति। गतप्राणो नष्टशरीरत्वान्निरन्वयध्वस्तपूर्व्वानुभवसंस्कारोद्बोधोऽपि प्राणी पूर्व्वजन्मानि अनेकजन्मतत्कर्म्मजात्यादीनि पूर्व्वमहं ब्राह्मणोऽभूवमित्यादीनि स्मरति। मृते च कर्म्मणां सुकृतदुष्कृतरूपाणां फलानि सुखदुःखरूपाणि तेषामूर्म्मयः परम्परा भोगा वा भवन्ति। तदधिकरणा भवन्तीत्यर्थः। तथान्येषां ब्राह्मणानां भुक्तैर्भोजनैः कृत्वा मृते ध्वस्तदेहे प्रेते तृप्तिर्भवतीति धूर्त्तानां परवञ्चनमात्रेण स्वोपजीविनां वार्त्तयाऽप्रामाणिकेन वार्त्तामात्रेण अलं सा न कार्य्या इत्यर्थः। सर्व्वमप्येतद्व्यधिकरणत्वादनुपपन्नं। स्वभोजनादिलाभाय परं प्रतारयति। तस्माद्देह एव आत्मेति भावः। अन्यभुक्तैरित्यत्र अन्येषां ब्राह्मणानां भुक्तैरिति षष्ठीसमासः॥ ५३॥

देहातिरिक्तात्मप्रतिपादिकां श्रुतिमप्युपहसति। जनेनेति। अतिधूर्त्तया नितरां परवञ्चनपरया तत्त्वमसीति, स वा एष महानज आत्मेत्यादिश्रुत्या प्रयोजककर्त्र्या कोऽयमस्मीति अहं-

एकं सन्दिग्धयोस्तावत् भावि तत्रेष्टजन्मनि।
हेतुनाङ्गः समन्तादीनसाङ्गानन्यथा विटाः ॥ ५५॥

प्रत्ययविषयं जानता स्थूलोऽहं कृशोऽहं इत्याद्यहंप्रत्ययविषयो देह एव न तु तदतिरिक्तः कश्चिदिति देहमेवात्मानं जानता जनेन प्रयोज्येनायमस्मीति प्रत्ययविषयस्त्वं न भवसीति श्रमी देहस्त्यज्यते अहं प्रत्ययविषयत्वं नेति शेषः। लोके देहोऽहंप्रत्ययविषयमात्मनश्चाणवस्तु ग्राह्यते अङ्गीकार्य्यते। अहो आश्चर्यं कष्टं वा महदनुचितमेतदित्यर्थः। देहे आत्मभावं परित्यज्य तस्मिन्नात्मनि नित्यतां गृहीत्वा दीक्षातपआदिभिर्देहं कर्शयेत तदतिरिक्तात्मवेदनं कुर्व्विति श्रुत्या लोक उपदिश्यत इत्यर्थः। विप्रलम्भकवाक्यत्वेन श्रुतिमात्रमप्रमाणं वार्त्तामात्रेणालं सा न कार्य्येत्यर्थः। अन्योऽपि धूर्त्तः अन्येन रत्नादि त्याजयति काचादि ग्राहयति। कर्त्तृदयस्याप्यनभिहितत्वादुभयत्र तृतीया ॥ ५४ ॥

ननु पुत्रेष्ट्या पुत्रस्य प्रत्यक्षोपलम्भात् ज्योतिष्टोमादेरपि फलस्यानुमानात् श्रुतिमात्रस्य प्रामाण्यात् कथं श्रुतेर्धूर्त्तत्वं इत्याशङ्क्य दूषयति। एकमिति। भावनाभावनाभ्यां सन्दिग्धयोरर्थयोः पुत्रादिलाभालाभयोर्मध्ये एकमिष्टमनिष्टं वा तावन्निश्चितं भावि भविष्यति। तत्र तयोर्मध्ये तथा सति या इष्टस्य पुत्रादेर्जन्मनि लाभे सति विटा धूर्त्ताः परवञ्चनचतुराः स्वमन्त्रादीन् हेतून् कारणभूतानाङ्गः अस्माभिरुद्रजपादि त्वदर्थं कृतं तेन च त्वया पुत्रादि लब्धमिति वदन्तीत्यर्थः। अन्यथा

एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः।
कः श्रौतस्यात्मनो भीरो भरःस्याद् दुरितेन ते॥ ५६॥

पुत्राद्यलाभे सति तानेव मन्त्रानसाङ्गानङ्गविकलतया फलस्यासाधकान् प्राचीनपुत्रवियोगादिविपरीतफलकारिण्याहुः। सामग्रीमाकल्याभावाद्यथोक्तदक्षिणाभावात् फलं न जातं विपरीतञ्च जातमिति धूर्त्ताः परान् वञ्चयन्तीत्यर्थः। तस्माद्दृष्टफलपुत्रेष्ट्यादिदृष्टान्तेनादृष्टफलेष्वपि फलकल्पना निरवकाशेति श्रुतिरप्रमाणैवेति भावः॥ ५५॥

श्रुतिप्रामाण्यमभ्युपगमादेवाङ्गीकृत्याप्येकात्मवादिमतमनिष्टापत्त्या दूषयति। एकस्येति। विश्वेषां सर्व्वेषां परदारागमनादिजनितेन पापेन हेतुनाऽनन्तेऽक्षये तापे निरयादिदुःखे निमज्जतः अनन्तदुःखमनुभवतः सतः श्रौतस्य एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन, इत्यादिश्रुतिसिद्धैकस्याद्वितीयस्यात्मनो हे भीरो पापाद्भयशील ते तवैकस्य दुरितेन को भारो गौरवं स्यात् अपि तु पूर्णस्य शकटस्य शूर्प्पमेव न कश्चिद्भारो भवेत्। एकात्मवादिमते प्रामाणिकस्यैकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसम्बन्धस्तदा तत्फलानन्यान्निरयादिदुःखानुभवावसरे तवैकस्यैव पापेन कृत्वा पापाचयराशिस्थितस्य न कोऽपि भारः स्यात्। किन्तु तैर्यत् पुण्यं कृतं तत्त्वयैव कृतमिति पापे कृतेऽपि तव दोषो नेति यथेच्छं पापं कुर्व्वित्यर्थः। अपि चासीयत्वात् स्वपरव्यवहाराभावे परदारत्वपरस्वत्वाद्यभा-

किन्ते वृन्तहृतात् पुष्पात् तन्मात्रे हि फलत्यदः ।
न्यस्य तन्मूर्द्ध्नन्यस्य न्यास्यमेवात्मनो यदि ॥ ५७ ॥

वात् परदारागमनादौ पापलेशस्याप्यभावात् स्वेच्छाचारमेव कुर्व्वित्यर्थः । भीरो तात्पर्य्यपर्य्यालोचनया विना भयशीलेत्युपहासः । तस्मादेकात्मश्रुतिरुपासनपरा ज्ञेया न तु तात्त्विकीति भावः ॥ ५६ ॥

देवपूजादिबुद्धिं निराकरोति । किमिति । भो देवपूजक वृन्तात् प्रसवबन्धनात् सकाशात् हृतं अवचितं चम्पकादिकं पुष्पं तस्माद्धेतोस्ते तव किं प्रयोजनं प्रत्युत दोष एवेत्यर्थः । हि यस्माददः पुष्पं तन्मात्रे वृचाग्रवृन्त एव वर्त्तमानमेव फलति फलरूपेण परिणमते न तु तेन विना । पुष्पेऽवचिते फलोत्पत्तिप्रतिबन्ध एव भवति न लभ्यत् फलमित्यर्थः । अथ देवपूजादौ विनियोगात् साफल्यमिति चेत्तदप्यसत् । अश्मनः शालग्रामशिवलिङ्गादेः पाषाणस्यैव मूर्द्ध्नि न्यास्यं यदि चेत्तत्र न्यस्तं सफलीभविष्यति इत्याशयः, तर्हि अनन्यस्य शिलातोऽभिन्नस्य पाषाणस्य मूर्द्ध्नि तत् न्यस्य निधेहि । अनन्यस्यैवेति वा न्यास्यमेवेति वा । किञ्च भवन्मते भेदस्य प्रापञ्चिकत्वात् परमेश्वरस्य सर्व्वत्र सत्त्वाच्छालग्रामादेस्त्वच्छिरसश्चैक्याद्देवपूजापि पृथक् वृथेति स्वशिरस्येव पुष्पाणि चिपेत्युपहास इति भावः । न्यास्यं । ऋलन्तत्वात् ण्यत् ॥ ५७ ॥

तृणानीव घृणावादान् विधूनय वधूरनु ।
तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५८ ॥
कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम् ।
वेदोऽपि देवकीयाज्ञा तत्राज्ञा काधिकार्हणा ॥ ५९ ॥

वैराग्यजननार्थमन्यदप्याह। तृणानीति। हे पुरुष मुखं श्लेष्मागारं स्तनौ मांसग्रन्थी इत्यादीनि वधूरनु स्त्रीरुद्दिश्य घृणावादान् जुगुप्सावचनानि निःसारत्वेन तृणानीव विधूनय त्यज। यतस्तादृशस्य मांसादिमयस्यैव तवापि गर्हितस्यापि स्त्रियो तेन प्रकारेण निन्द्या इति चिरं का जनवञ्चना लोकप्रतारणा कार्येति भावः। स्त्रियो व्यभिचारिण्यः पापनिरता इति निन्दावाक्यानि तवापि व्यभिचारिणो न युक्ता इति वा ॥ ५८ ॥

कुरुध्वमिति। हे अज्ञा मूर्खा ब्राह्मणा यूयं,

अहल्याया जारः सुरपतिरभूदात्मतनयां ।

प्रजानाथोऽयासीत्,

इत्यादि स्मरणात् ब्रह्मविष्णुमहेशादिभिरप्यलङ्घितः काम एव देवस्तस्य स्त्रीपारवश्यलक्षणामाज्ञां कुरुध्वं। यस्माद्वेदोऽपि श्रुतिस्मृती ममैवाज्ञेति श्रीभगवद्वचनाद्देवकीया आज्ञा। अतस्तत्र वेदरूपायां देवाज्ञायां कामाज्ञातोऽधिकार्हणा पूजा मान्या काऽपि तु देवत्वाविशेषाद्देवाज्ञैव कार्या कामाज्ञापि माननीयैवेत्यर्थः। आज्ञाद्वयमपि समानं। तस्मात् कामदेवाज्ञामपि कुरुध्वं न त्वेकत्र पक्षपातः कार्य्य इति भावः। यद्वा

प्रलापमपि वेदस्य भागं मन्यध्वमेव चेत्।
केनाभाग्येन दुःखान्न विधीनपि तथेच्छथ ॥ ६० ॥

तत्र द्वयोराज्ञयोर्मध्ये अधिकमर्हणं यस्याः सा काज्ञा अपि तु पूर्ववदविशेषाद् द्वयमपि सममेवेत्यर्थः। द्वयोर्मध्येऽधिकार्हणा केति यूयमेव कथयतेति। ब्रह्मादिभिरप्यङ्गीकृतत्वाच्छिष्टपरिगृहीतलक्षणप्रामाण्यात् प्रत्यक्षलक्षणसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हणा योग्या। वेदो हि ब्रह्मादीनामेवाज्ञा ब्रह्मादयश्च कामदेवाज्ञाकारिणः। ततश्च यदीयाऽऽज्ञा भवद्भिरनुष्ठीयते तैरपि अनुष्ठीयते या सा भवतां सुतरामनुष्ठेयैवेति भाव इति वा। पक्षपातात् तारतम्याज्ञानाच्च मूर्खत्वं। वेदो हीति च पाठः। कामदेवाज्ञामेव कुरुध्वं यस्माद्वेदोऽपि देवाज्ञा। तत्र वेदेऽधिका का पूजा अपि तु कामदेवाज्ञैवानुष्ठेया। ब्रह्मादिभिरपि अनुष्ठितत्वादिति वा। का विगर्हणेति पाठे तत्र कामाज्ञायां का निन्दा कोऽनादर इत्यर्थः। देवकीया। गर्हादिषु जनपरयोः कुक्चेत्यत्र देवस्यचेति वक्तव्यत्वात् (पा० ४।२।१३८) कुक् छः ॥ ५९ ॥

श्लोकत्रयेण मीमांसकान् परिहसति। प्रलापमिति। महता प्रयासेन यस्य प्रामाण्यमुपपादितं तस्य वेदस्यैव कञ्चन भागमंशं सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं इत्याद्यर्थवादमन्त्रनामधेयात्मकं प्रलापमिवानर्थकवचोरूपं चेन्मन्यध्वं अङ्गीकुरुध्वं। आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिना पूर्वपक्षसूत्रेण प्रतिपादितस्यानर्थक्यस्य, विधिना त्वेकवाक्यत्वादित्यादिना सिद्धान्तसूत्रेण स्तुत्यर्थवादादेरुपयोगेऽभिहितेऽपि

श्रुतिं श्रद्दत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूय च स्वयं।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ॥ ६१ ॥

श्रुतिसार्थक्याभावादतिकृतत्वादर्थवादादि वेदभागमनर्थकवचनप्रायं चेन्मन्यध्वे तर्हि बहुधनव्ययायाससाध्यत्वाद्दुःखजनकान् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादीन् विधिभागानपि केन भाग्याभावेन तथा प्रलापरूपान् नेच्छथ नाङ्गीकुरुथ अपि तु तानपि प्रलापरूपानेव स्वीकुरुथेत्यर्थः। सर्वोऽपि वेदो विधिरूपः प्रलापरूपो वास्तु। न त्वर्द्धजरतीन्यायः समाश्रयितुं युक्त इति भावः। वेदत्वाविशेषेऽप्यभाग्यमेव वैषम्यहेतुरित्यर्थः। दुःखशब्दस्य नपुंसकत्वेऽपि दुःखं करोतीति ण्यन्तात् पचाद्यचि दुःखानिति ज्ञेयम् ॥ ६० ॥

प्रकारान्तरेण मीमांसकानुपहसति। श्रुतिमिति। हे मीमांसायां वेदविचारे मांसला परिपुष्टा प्रज्ञा बुद्धिर्येषां ते यूयं श्रुतिं वेदं प्रत्यक्षं श्रद्धत्थ आदरेण स्वीकुरुथ। अक्षरमात्रमपि सार्थकं मन्यध्वे। तथा विक्षिप्ता वादिभिर्निराकृता भ्रान्तचित्ताः पूर्वापरानुसन्धानविकलाः सन्तस्तामेव श्रुतिं यूपसम्बन्धिनं द्विपं दापिनीं दापयन्तीं स्वयमात्मनैवाङ्गीकृतप्रामाण्यामपि प्रक्षिप्तां केनचिद्दुष्टकेन क्षिप्तरूपां निक्षिप्तां ब्रूय। चकारः पूर्वापरविरोधद्योतनार्थः। पूर्वापरानुसन्धानविकलत्वादेदविचारचतुरा साध्वी भवतां बुद्धिरित्युपहासार्थं मीमांसेत्यादिसम्बोधनं। मांसलेत्यनेन च स्थूलदृष्टय आपातग्राहिणो यूयं

को हि वेदास्त्यमुष्मिन् वा लोक इत्याह या श्रुतिः।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथं॥ ६२॥

न तु कुशाग्रबुद्धय इति सूचितं। ऋत्विजो यज्ञमध्ये यजमानं यज्ञसमापनाग्रहशीलं समाप्त्युत्तरकालभावि स्वाच्छन्द्यं विदित्वा कार्य्यवर्त्तावेलायामेव स्वयं यूपे यूपे हस्तिनो बद्धा ऋत्विग्भ्यो दद्यादित्येवम्प्रतिपादकानि वेदवाक्यानि यजमानस्य श्रद्धाजननार्थं पठित्वा याचन्ते। प्रत्यक्षश्रुतिविहितदेहान्तरनिदर्शनव्यामोहितश्च स यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तैरेवैषा स्मृतिः प्रवर्त्तिता स्यादित्याशङ्क्य नेयं वेदमूलेति लोभपूर्व्वकमेभिरुक्तमिति वेदवाक्यानामर्थवादत्वमङ्गीकरोति। ततश्च कानिचिद्वेदवाक्यानि प्रधानानि कानिचिदप्रधानानीति अर्द्धजरतीयन्यायस्तद्वत्स्य एवेत्यर्थः। यूपहस्तिनो दानमाचरन्तीति स्मृतेर्मूलभूता श्रुतिरभिधीयते। कल्पितश्रुतिमूलत्वात् स्मृतिरेवाश्रुतित्वेनोच्यते। यूपवदत्युच्चद्विपान्नान् दापयतीति। वाजपेयादौ हि सप्तदशहस्तिनो रथा दासाश्च दक्षिणा इत्युपलक्षणमेतदित्यन्ये॥ ६१॥

को हीति। को हि तद्वेद यदमुष्मिन् लोकेऽस्मि वा नवेति दिक्षतोकाशान् करोतीत्यादि या श्रुतिरमुष्मिन् लोके परलोके विषये सुखादिकमस्ति वा नास्तीति वा हि निश्चितं को वेद अपि तु न कोऽपि आह ब्रवीति, तस्याः श्रुतेः प्रामाण्यात् अमुं लोकं परलोकं लोकः परीक्षकोऽस्मदादिः कथं वा कथ-

धर्म्माधर्म्मौ मनुर्ज्जल्पन्नशक्यार्जनवर्जनौ।
व्याजान्मण्डलदण्डार्थी श्रद्दधायि मुधा बुधैः॥ ६३॥

मिव मत्येतु विश्वासेन निश्चिनोतु ब्रूहि, अपि तु न कोऽपि। यदीयास्तित्वनास्तित्वयोः श्रुतेरेव सन्देहस्तत्प्रामाण्यात् पामरो भवादृश एव परलोकं मन्यते न तु प्रामाणिकः कश्चिदिति भावः॥ ६२॥

स्मृतिप्रामाण्यमपि दूषयति। धर्म्मेति। बहुधनव्ययायाससाध्यत्वाच्छीतभयात्तीर्थस्नानाद्यशक्यत्वात् अग्नौ चरणसन्तापनादिरूपतया तत्तदिन्द्रियवेगस्य परिहर्त्तुमशक्यत्वात् सुखानुभवमूलत्वाच्च क्रमेणाशक्यं अर्जनं वर्जनं च ययोस्तौ धर्म्माधर्म्मौ बुद्धिपूर्व्वं जल्पन् बहुधा प्रतिपादयन् मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्त्ता ब्रह्मपुत्रः स्वायम्भुवो व्याजाद्धर्म्माधर्म्मोपदेशकस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थद्रव्यमभिलाषुको यतस्तस्माद् बुधैः पण्डितमन्यैः मुधा वृथैव श्रद्दधायि आदृतः। अधर्म्माचरणं सुकरमित्यधर्म्ममेव सर्व्वः करोति। ततश्च येन केनाप्युपायेन अर्थग्रहणोपाय एव दण्डो मनुनाभिहितो न धर्म्म इत्यर्थः। अबुधैरिति वा। मनुवचनमूलत्वात्। स्मृतिमात्रस्याप्रामाण्यमुक्तम्॥ ६३॥

व्यासस्यैव गिरा तस्मिन् श्रद्धेत्यद्धा स्थ तान्त्रिकाः।
मत्स्यस्याप्युपदेश्यान् वः को मत्स्यानपि भाषताम्॥ ६४॥

पुराणप्रामाण्यं दूषयति। व्यासस्येति। दासदारिकाव्यभिचारजातस्य भ्रातृजायायां पुत्रोत्पादनशीलस्य व्यासस्यैव कविलक्षणया गिरा तस्मिन् धर्मे परलोके व्यास एव वा श्रद्धा भावना आस्तिक्यबुद्धिरित्येतत् तस्माद्धेतोरद्धा निश्चितं यूयं तान्त्रिका युक्तिज्ञा वाक्यविचारचतुराः स्थ भवथ। विरुद्धलक्षणया एवंविगीतेन व्यासेन प्रतिपादिते धर्मे परलोके तस्मिन् वा येषामास्तिक्यबुद्धिस्ते यूयं सुविज्ञतमा इति भावः। अथ च तान्त्रिकाः कुविन्दतुल्या मूर्खा इत्यर्थः। व्यासस्येत्येकवचनेनैवकारेण विगीतत्वं सूचितं। मूलापरिशुद्ध्या भारतादीनां पुराणानाञ्चोपहासः कृतः। मत्स्यपुराणं तु मत्स्यरूपधारिणा विष्णुना मनवे प्रोक्तमिति पृथगुपहसति। मत्स्यस्योपदेश्यान् वो युष्मान् मनुप्रभृतीन् को भाषतां युष्माभिः सह संवादं कः करोतु। यतो मत्स्यानपि को भाषतां। मत्स्या अपि संवादार्हा न भवन्ति तदुपजीविनस्तच्छिष्या भवन्तस्तु दूरे इति। को भाषतां युष्मान् मन्वादीन् मत्स्यान् को वदतु अपि तु न कोऽपि। यतो मत्स्योपदेश्यान् जलस्थलचारिभ्यो ये हीना मत्स्याशिष्यास्तन्निर्देशकारिणः ततश्चोपदेशकापेक्षयोपदेश्यस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः। एवं कूर्मपुराणादीनामुपहासः। अथ च मनुसम्बन्धित्वेन सर्व्वेऽपि मानवशब्दवाच्या यथा तथा मत्स्य-

पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम्॥ ६५॥
न भ्रातुः किल देव्यां स व्यासः कामात् स्मरास्फजत्।
दासीरतस्तदासीदस्मात्ना तचाप्यदेशि किम्॥ ६६॥

मत्स्यन्धिनां मात्स्यशब्दाभिधेयत्वं युक्तं न तु मत्स्यशब्दाभिधेयत्वमिति को मत्स्यानपि भाषतामिति शुकमुक्तमिति व्याख्येयं। मात्स्यिका इति तत्त्वमधीते वेद वेत्यर्थे वसन्तादेराकृतिगणत्वात् (पा० ४।२।६३) ठक्। मत्स्यस्येति। कन्यानामिति (पा० २।३। ७१) कर्त्तरि षष्ठी॥ ६४॥

पूर्व्वोक्तमेव व्यासस्याप्रमाणत्वं श्लोकद्वयेनाह। पण्डित इति। पण्डितो बुद्धिमानत एव कविरैतिहासिकस्यार्थस्य वर्णकः तथा पाण्डवानां युधिष्ठिरादीनां चाटुनि प्रियवचने पटुः एवम्भूतः स भवद्भिराप्तत्वेनाङ्गीकृतो व्यासस्तेषु दुर्योधनादीन् निन्दत्सु न निनिन्द किं? तथा तेषु श्रीकृष्णादीन् स्तुवत्सु सत्सु न स्तुतवान् किं? तेषु निन्दत्सु स्वयमपि निनिन्द तेषु स्तुवत्सु स्वयमपि तुष्टावेति। पूर्व्वविशेषणयुक्तस्यापि व्यासस्य पराधीनत्वात् तत्प्रणीतं भारताद्यप्रमाणमेवेति भावः। अन्योऽपि पण्डितः प्रभुचित्तानुगुणमेव व्यवहरति तद्वदयमपीत्यर्थः॥ ६५॥

नेति। स भवदीयो व्यासो भ्रातुर्विचित्रवीर्य्यस्य देव्यां महिष्यां कामात् मारपरवशत्वादनुरागात् स्मरास्फजत् व्यवहरति स्म? किलेति उपहासे श्रुतौ च। अस्मदृष्ट्या तावत्

देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ ।
गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माऽधरीकृतः ॥ ६७ ॥

कामादेव मद्भतः । पौराणिकास्तु देवरात् सुतोत्पत्तेर्धर्मत्वा-त्तस्याः सुतोत्पादनार्थं मात्राज्ञप्तस्त्वां मक्त इति वदन्ति । तस्मात्तथया तथास्त्विर्थः । तदा पुत्रोत्पादनोपलक्षिते काले दास्यां रत आसीदिति यत् प्रसिद्धं तत्र दासीरतेऽपि मात्रा सत्यवत्याऽऽदेशि आदिष्टः किं ? कथयतेति प्रश्नः । काकुरुपहा-सार्थः । अपि तु तत्र तावन्नादिष्टः । तस्माद्भयत्रापि स्मरप-रवशत्वादेव प्रवृत्तः । एवंविधस्यानाचत्तत्वात् तद्वचनमप्रमाण-मिति भावः । ससास्त्रजत् । दंशसञ्जेति (पा० ६।४।२५) नलोपः ॥ ६६ ॥

इदानीं देवद्विजगोभजनं दूषयति । देवैरिति । देवै-र्ब्रह्मादिभिः द्विजैर्याज्ञवल्क्यादिभिश्च कृता ग्रन्थाः पुराणानि स्वतयश्च त एव येषां भवादृशानां वैदिकानां तदादृतौ तेषां देवानां द्विजानाञ्चादृतौ आदरे विषये पन्थाः । देवा ब्राह्म-णाश्चावश्यं भजनीया इत्युपदेशपराः प्रमाणमिति यावत् । स्व-पूजार्थमेव तैर्ग्रन्था निर्मिताः । तद्वचनग्रन्थप्रामाण्यात् देवादी-नाद्रियन्ते एवम्भूता मूर्खा ये तैर्युष्माभिस्तद्ग्रन्थप्रामाण्यादेव गां पश्वरूपां सुरभिं नतैः सद्भिस्ततः पशोर्गोरपि सकाशात् आत्मा स्वरूपं व्यक्तं स्पष्टं नाधरीकृतः किं ? नम्रोऽय च हीनो न कृतः किं ? अपि तु कृत एव । नमस्कार्येयेच्छया नमस्कर्त्तुर्हीनत्वात् पशोरपि सकाशाद्भवन्तो मूर्खतमा इत्यर्थः । व्यक्तं मन्ये इति

साधु कामुकताऽमुक्ता शान्तस्वान्तैर्मखोन्मुखैः ।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः ॥ ६८ ॥

यावदिति वा । स्वार्थपरवचनस्याप्रामाण्यत्वाद्देवत्राह्मणसुरभिवन्दनं निर्मूलत्वात्त्याज्यमेवेति भावः । देवैर्द्विजैः कृता ये पन्थाः येषां वः पन्थाः प्रमाणं तैर्भवद्भिस्तस्य पथः तेषां देवादीनां वा पन्थादीनां वा आदरणनिमित्तं गां नतैः ततोऽप्यात्मेति पूर्ववत् ॥ ६७ ॥

इदानीं परलोकमङ्गीकृत्यापि यज्वनां ब्रह्मचर्यादि परिहसति । साध्विति । शान्तविषयभोगपराङ्मुखं स्वान्तं चित्तं येषां तैर्मखोन्मुखैर्दीक्षितदीक्षितैरपि यज्ञेषु मोत्साहं प्रवृत्तैर्याज्ञिकैः कामुकता सम्भोगलोभिता यदमुक्ता न त्यक्ता तत् साधु युक्तं । यद्वा साध्वी सुखकारिणी सा चासौ कामुकता सा न मुक्ता । शान्तस्वान्तैर्यज्वभि कामुकता साधु मुक्ता त्यक्ता । साध्विति काका विरुद्धलक्षणया, नैव मुक्ता किन्तु सम्भोगैकनिष्ठा एव ते इति व्याख्येयं । सर्व्वत्रापि हेतुगर्भविशेषणमाह । किम्भूतैः सारङ्गलोचनाभिः सुन्दरीभिः सारां श्रेष्ठां तां रमः सारः श्रेष्ठः पदार्थो यस्यां तादृशीं वा दिवं प्रेत्यापि मृत्वापि लिप्सुभिः रम्भादिकाम्ययैव यज्ञधनव्ययायासमसाध्यान् यज्ञानेव कुर्व्वन्ति । तैः कामुकता नैव त्यक्ता । अन्येषान्तु यावज्जीवमेव कामुकत्वं यज्वनां तु मरणानन्तरमपीति प्रेत्यापीत्यनेन सूचितं । तस्मादीक्षामखयोऽपि ब्रह्मचर्याङ्गीकरणेनात्मा न वञ्चनीय इति भावः, दिवं । न लोकेति (पा० २।३।६८) षष्ठी ॥ ६८ ॥

कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः ।
भस्मीभूतस्य भूतस्य पुनरागमनं भ्रमः ॥ ६९ ॥
उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतं ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ ७० ॥

एतदेवोपजीव्याह । क इति । हे प्राज्ञाः प्रकर्षेणाज्ञा भो मूर्खाः तस्माच्छमः शान्तिः कः अपि तु न कोऽपि । शमाङ्गीकरणेन परलोकसाधनेऽपि काम्यमानकमनीयकामिनीसम्भोगफलत्वाद्वृथैव शान्तिस्तस्मान्न कार्य्येत्यर्थः । तर्हि किं कार्य्यमित्यत आह । प्रियायास्तरुणरमणीयरमण्याः प्रीतौ प्रेम्णि तस्याः सुखोत्पादने विषये परिश्रमो भूयान् प्रयासः क्रियतां कर्त्तव्यः । शान्तिः का अपि तु न कापि । भो प्राज्ञा बुद्धिमन्तस्तारतम्यविचारचतुराः प्रियाप्रीतौ प्रयासः कार्य्यः । सद्यःसुखहेतुत्वादिति वा । परस्त्रीगमने लोकान्तरे निरयादि भविष्यतीत्याशङ्क्याह भस्मीभूतस्य मृतस्य देहस्य भूतस्य जातस्य देहिनो वा पुनरागमनं लोकान्तरे क्रिम्यादिदेहप्राप्तिरिति यद् भ्रमः, परलोकस्यैवाभावात्, तत्सद्भावेऽपि चदेहस्यैवात्मत्वात्तस्य च भस्मीभूतत्वात् केन नरकादि भुज्यते । तस्माद्यावज्जीवं यथेच्छं सुखं भोक्तव्यमिति भावः । प्रियाप्राप्ताविति च पाठः ॥ ६९ ॥

मोक्षाधिकाराभावात् ब्रह्मचर्य्यादिपरित्यागेन काम एव सेवनीय इति शब्दच्छलेन वृद्धसम्मत्या स्वीयं मतं द्रढयति । उभयीति । अपवर्गे तृतीयेति भणतः पाणिनेरपि मुनेः उभयी

विभ्रत्युपरि यानाय जना जनितमञ्जनाः।
विभ्रद्धायायतः पश्चाद्गत्वरोरभ्रविभ्रमं ॥ ७१ ॥

प्रकृतिः स्त्रीपुंमलचणा द्वयोर्व्यक्तिः कामलक्षणे पुरुषार्थे मैथुने धर्म्मे सज्जेत् आसक्ता भवेदिति मतमन्तःकरणाभिप्रायो लक्ष्यत इति शेषः। अयमाशयः। अपवर्गे तृतीयेति वदतः पाणिनेः मैथुनधर्म्मे अशक्तेन नपुंसकेन तीर्थयात्रा ब्रह्मचर्य्यादिद्वारा मोक्षे प्रयतितव्यं स्त्रीपुंमलक्षणा व्यक्तिर्मैथुने शक्तत्वात् कामभोगे अधिकारिणी न तु तीर्थयात्रादिद्वारा मोक्ष इति। तस्मात् कामाश्चैव कार्य्येत्यर्थः। न केवलमस्मदाचार्य्यस्यैव सम्मतं किन्तु भवदीयस्य पाणिनेरपीत्ययमेवार्थः। अथ चैवं वदतः पाणिनेरप्ययमाशयः। धर्म्मार्थलक्षणा द्वयी व्यक्तिः, अथ च पूर्व्वप्रयोज्यत्वात् प्रकृतिः कामे सम्बद्धा भवेत्। धर्म्मार्थकाममोक्षाः स्युरित्यादौ कामाव्यवहितपूर्व्वत्वेन तस्या उक्तत्वात्। तृतीया तु कामलक्षणा व्यक्तिरथ च पूर्व्वप्रयोज्यप्रकृतिरपवर्गे सम्बद्धुमर्हा। अपवर्गादव्यवहितपूर्व्वत्वेन तस्या उक्तत्वात्। तस्मादपवर्गे निमित्ते कामाख्या तृतीयैव व्यक्तिर्युक्ता इत्युक्तत्वात्। मोक्षं प्रति कामस्यैव हेतुत्वात् प्रीतिरेव सुतरां कार्य्येति भावः।अपवर्गः फलप्राप्तिरिमं सूत्रार्थं शब्दच्छलेन अन्यथोत्प्रेक्ष्य इन्दुमत्याः स्वीयमतसमर्थनार्थं दर्शिता। तृतीया प्रकृतिः षण्ड इत्यमरः। उभयोरित्ययशः स्यानियमाभावपूरणात् ङीप्। सज्जेत्। अर्हार्थे लिङ् ॥ ७० ॥

गङ्गास्नायिनो दूषयति। उपरियानाय स्वर्गं गन्तुं अथ

एनसानेन तिर्य्यक् स्थादित्यादि का विभीषिका ।
राजिलोऽपि हि राजेव स्वै सुखी सुखहेतुभि ॥ ७२ ॥

चोर्द्धदेश गन्तु जनितमज्जना कृतगङ्गास्नाना, अथ च कृताधोगमना जना अग्रतो युद्धाय पश्चाद्गलर पश्चाद्गमनशील. उरभ्रो मेषस्तस्य विभ्रम सादृश्य विभ्रति धारयन्ति। मज्जनादूर्द्धगमन विरुद्धमिति विपरीतार्थकारित्वान्मेषवन्मूर्खा एवेति गङ्गास्नानेन स्वर्गो भवति इति भ्रान्तिरेवेति भाव । विग्रहस्थेति पाठे उपरि यानाय कृतगङ्गास्नाना मार्गे गच्छतो मेषस्य भ्रान्ति सादृश्य धारयन्ति। शीतबाधया नीचग्रीवतया गमनात् शरीरस्याग्रत शिरोदेशे पश्चात् कटिदेशे च हस्तयोर्धारणात् कृतगङ्गास्नानाना गङ्गास्नानसमयेऽपि मेषतुल्यत्व। यथा जलमध्येऽघमर्षणे दक्षिणकरेण प्राणानायच्छत पृष्ठस्थितबाहुर्भवति, तदा नीचग्रीवतया उरभ्रसादृश्य पश्चात्स्थितहस्तस्य च पुच्छसादृश्यमिति मेषतुल्यास्ते जना । उच्चैर्जिगमीषोर्नीचैर्भावस्य विरुद्धस्य करणादुपहास इति व्याख्येय। यानाय विग्रहायेति। तुमर्थेति (पा०२।३।१५) चतुर्थी॥ ७१ ॥

परलोकसद्भावेऽपि देहान्तरप्राप्तावपि च न किञ्चिदनिष्टमित्याह । एनसेति।अनेन लोके क्रियमाणेन ब्रह्महत्याद्येनसा पातकेन तिर्य्यक् क्रिमिपक्ष्यादि स्याद्भवेद्इत्यादिरित्येवम्प्रकारा का विभीषिका भयोपदर्शन कि? अपि त्वनिष्टहेतुलाभावान्न किञ्चिदेतत्। हि यस्माद्राजिलोऽपि हीन सर्पविशेषो

हता येद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे।
तत्रापि तेन युध्यन्तो हता अपि तथैव ते ॥ ७३ ॥

जलव्यालोऽपि स्वैः स्वीयैः सुखहेतुभिर्भेकभक्षणजलाहारसजातीयतरुणीसम्भोगादिभिः सुखकारणैः राजेव सुखी। स्वजात्यनुगुणाहारविहारसम्भोगादीनि विचित्राण्येव सर्व्वेषां सुखसाधनानि। ततः स्वपापफलभूते तिर्यग्योनिले जातेऽपि सुखमद्भावान्न किञ्चिदनिष्टमित्यर्थः। समौ राजिलडुण्डुभावित्यमरः। विभीषिका धात्वर्थनिर्देशे ण्वुल्‌वक्तव्य इति (पा० ३।२।१३३) ण्वुलि, भियो हेतुभये षुगिति (पा० ७।३।४०) षुगागमे प्रत्ययस्थादित्। (पा० ७।३।४४) इतीत्वम् ॥ ७२ ॥

युद्धे हतानां स्वर्गप्राप्तिरित्यादि भारतवचनं दूषयति। हता इति। सङ्ग्रामे हताः सम्मुखं पतिता दिवि दिव्यन्ति क्रीडन्ति इति चेद्यदि तर्हि दैत्यारिणा विष्णुना रणे हताः हिरण्यकशिपुप्रभृतयो दैत्यास्तत्रापि स्वर्गेऽपि तेन सह युद्ध्यन्तो युद्धं कुर्व्वन्तु। यस्माद्धता मारिता अपि दैत्या भवदीयमते तथैव रणे सम्मुखपतनात् स्वर्गे जीवन्त एव। ततश्च यं यं वापि स्मरन् भावमित्यादिवचनप्रामाण्यान्मरणसमयेऽपि दैत्यैर्दैत्यारिणा सह विरोधस्य चित्ते धृतत्वात् स्वर्गप्राप्तावप्यसुरभावस्य तथैव वर्त्तमानत्वात् तत्रापि तेन सह योद्धव्यमेव। तत्रापि युध्यन्त एवेति कुत्रचित् पुराणादौ नाकर्ण्यते। तस्माद्रणे पतितानां मरणादधिकं किञ्चिदपि नास्ति। रणादपलायनात् स्वर्ग

स्वञ्च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलं।
इति स्वोच्छित्तिमुक्त्युक्तिर्वैदग्धी वेदवादिनाम्॥ ७४॥

इत्यादि चात्रधर्म्मप्रतिपादकं वाक्यजातमप्रमाणमेवेति भावः। हता अपीत्यत्र हतौ अपीति पदेन हतौ हिंसायां कृतायामपि मरणे प्राप्तेऽपि। अन्यत् पूर्व्ववत्। हतावपीति वा पाठः॥ ७३॥

इदानीं मायावेदान्तसिद्धान्तं दूषयति। स्वमिति। संसारे संसरणावसरे स्वं जीवात्मरूपः प्रपञ्चः, तथा अनाद्यविद्याविलासवासनाविश्रमानभेदं ब्रह्म चेति द्वयमप्यस्ति। तौ सम्प्राधान्यबोधनार्थौ। मुक्तौ तु मोक्षे सञ्जाते पुनराविद्यकजीवव्यवहारनिवृत्तेः केवलं स्वप्रपञ्चरहितं ब्रह्मैव वर्त्तते। घटोपाधिनिवृत्तेर्घटाकाशनिवृत्तावाकाशमात्रस्यावस्थानवत् संसारोपाधिनिवृत्तेः स्वनिवृत्तौ एकमेवाद्वितीयं ब्रह्मेति ब्रह्मात्मना सम्पत्तिर्भवतीत्यर्थः। तथापि प्रपञ्चस्य शुक्तिरजतवन्मिथ्यादृश्यत्वादित्येवं स्वस्योच्छित्तिरेव मुक्तिस्तस्या उक्तिर्वचनं तत्र वैदग्धी नानारूपोक्तिनिरूपणकौशलं वेदवादिनां वेदान्तमतानुसारिणां। आत्मार्थं सर्व्वं तस्योच्छेदः प्रतिपादित इति महत् कौशलमिति मायावेदान्तमतोपहासः। वेदवादिनामित्यनेन च्छान्दसास्ते किञ्चिदपि न जानन्तीति सूचितम्। अपि च संसारे द्वयं मुक्तौ त्वेकं, ततश्च द्वयं परित्यज्यात्मोच्छेदपुरःसरमेकं मूर्खादन्यः कोऽपि नेच्छते। तस्मान्मूर्खा एव त इति भावः। वेदवेदिनामिति च पाठः। वेदवेदितेति पाठे स्वोच्छित्तिमुक्त्युक्ती

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।
गौतमं तमवेत्यैव यथा वित्थ तथैव सः ॥ ७५ ॥

वैदग्धीरूपा वेदार्थज्ञातता । आत्मविनाशो मुक्तिर्वेदार्थपरिज्ञानं नामेत्युपहासः ॥ ७४ ॥

न्यायवैशेषिकसिद्धान्ताभिमतां मुक्तिं दूषयति । मुक्तय इति । यः सचेतसां चैतन्यवतां सुखदुःखाद्यनुभवाभावात् शिलात्वाय पाषाणावस्थारूपायै मुक्तये मुक्तिं प्रतिपादयितुं शास्त्रमूचे न्यायदर्शनं निर्ममे, तदत्यन्तविमोचोऽपवर्ग इत्यनेन सकलविशेषगुणोच्छेदनान् मुक्तिरिति मुक्तस्य शिलातुल्यत्वं प्रत्यपादयत्, यूयं तं स्वयमेवावेत्य विचार्य्यैव गौतमं एतन्नामानं मुनिं यथा वित्थ जानीथ स एव तथा नान्य इत्यर्थः । स गौतम इति यथा युष्माकं सम्मतस्तथा ममापीत्यर्थः । वैशेषिकास्तु तदीयमतानुसारिण इति भावः । अथवा नायं परं नाम्ना गौतमः किन्तु महष्टो गौर्गौतमः पशुरेव । सचेतसां शिलारूपमुक्तिप्रतिपादनादित्यर्थतोऽपि गौतम एवेति भावः । आत्यन्तिकी दुःखनिवृत्तिर्मोक्षः इति सुखमपि दुःखानुषङ्गित्वाद्धेयमिति वदता, सशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इति च तत्र प्रमाणमुदाहरतां वैशेषिकाणामपीयमेव युक्तिः सम्मतेति न्यायवैशेषिकसिद्धान्तोपहासोऽनेन कृत इति ॥ ७५ ॥

दारा हरिहरादीनां तन्मग्नमनसो भृशम्।
किं न मुक्ताः पुनः सन्ति कारागारे मनोभुवः॥ ७६॥
देवश्चेदस्ति सर्व्वज्ञः करुणाभागवन्ध्यवाक्।
तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः॥ ७७॥

हरिहरादिध्यानान्मुक्तिरिति वचनानि दूषयति। दारा इति। हरिहरादीनां लक्ष्म्यादयो दाराः स्त्रियो भृशं निरन्तरं तेष्वेव मग्नं ध्याननिश्चलं मनो यासां एवंविधा अपि किं कस्मा-द्धेतोर्मनोभुवः कारागारे सन्ति? सदैव कामपरवशास्तिष्ठन्ती-त्यर्थः। तस्मान्न पुनर्मुक्ता इति। एतेन

सकृदुच्चारितं येन शिव इत्यक्षरद्वयं।

तथा।

मय्यर्पितमनोबुद्धिर्यः स मामेति पाण्डव॥

इत्यादिवचनैर्देवादिध्यानमात्रं मोक्षकारणमिति प्रतिपा-दयतः शैवादिशास्त्रस्य मुक्त्यभावेन व्यभिचारित्वादप्रामाण्यम्॥ ७६॥

ईश्वरवादिनो नैयायिकादीन् दूषयति। देव इति। भूम्यादि सकर्तृकं कार्य्यत्वाद् घटादिवदित्यादिना विचित्रस्य कार्य्यजातस्यास्मदादिविलक्षणेन कर्त्ता भवितव्यमिति सर्व्वज्ञस्य परमकारुणिकस्य सत्यवचसः सर्व्वकर्त्तुः प्रभोरीश्वरस्य साधित-त्वात् सर्व्वज्ञः कालत्रयवस्तुविज्ञानवांस्तथा करुणाभाक् कृपा-वान् तथा अवन्ध्या सत्या वेदरूपा वाक् यस्य, नैयायिकादिमते ईश्वरप्रणीतत्वादाप्तवचनत्वादेदानां प्रामाण्यात् स्वतः प्रामाण्यस्य

भविनां भावयन् दुःखं स्वकर्म्मजमपीश्वरः ।
स्यादकारणवैरी नः कारणात्परेऽपरे ॥ ७८ ॥

दूषितत्वादित्यर्थः । अथ च सफला यथोक्तार्थसाधिका वाग् यस्य स सत्यवाक् । भवत्सिद्धान्तेन देवश्चेदस्ति तर्हि अर्थिनो भुक्तिमुक्त्याद्यभिलाषिणो नोऽस्मान्, भवन्तः प्राप्तमनोरथा भवन्त्विति वाग्व्ययमात्राद् वाग्विसर्गमात्ररूपेण व्ययेन किं कस्मान्न कृतार्थयति । तस्मान्नास्तीति भावः । अनेनाप्युपहासः सूचितः ॥ ७७ ॥

इदानीं कर्म्ममीमांसकमतावलम्बेनायोग्येोपालम्भनमाह । भविनामिति । भविनां संसारिणां स्वकर्म्मजं स्वकृतपापजातं पापफलभूतं दुःखं भावयन् कुर्व्वन्, स्वयं भवदपि भावयन् पुनः स्वयं प्रवर्त्तयन् ईश्वरो नोऽस्माकमकारणवैरी दायादत्वादिहेतुं विनैव शत्रुः स्यात् । अपरेऽन्ये परेऽन्ये पुनः कारणाद्दारचेौर्याद्यपहारबन्धुवधादेव वैरहेतोर्वैरकारिणो भवन्ति । भविनां स इति वा सम्बन्धः ।

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।

कर्म्मफलदात्रेश्वरेण चेत् कर्म्मानुगुणं फलं भवेत् तर्हि ईश्वरेण कर्त्तव्यं न किञ्चिदस्ति । तादृशात् कर्म्मण एव दुःखोत्पत्तेः । एवं सति स चेदनुभावयति तर्ह्यस्मदादीनां द्वेष एव तेन कृतः स्यात् । तस्मात्तस्य दयालुत्वादयो गुणा गताः । तस्मात् कर्म्मण एव प्राधान्यादीश्वरो नास्त्येवेति भावः । पञ्चमी भयेन (पा० २। १।३७) इत्यत्र पञ्चमीति योगविभागात् कारणादैरीति समासं कृत्वा पञ्चम्यलुक्समासः ॥ ७८ ॥

तर्काप्रतिष्टया साम्यादन्योन्यस्य व्यतिघ्नताम्।
नाप्रामाण्यं मतानां स्यात् केषां सत्प्रतिपक्षवत्॥ ७९॥

अन्यदप्याह। तर्केति। प्रमाणानुग्राहकयुक्तिमद्वस्तुरूपस्य तर्कस्याप्रतिष्ठा तया पर्य्यवसानेन कृत्वा यत् साम्यं तुल्यत्वं तस्मात् तुल्यत्वाद्धेतोः सुन्दोपसुन्दन्यायेन विनिमयेन अन्योऽन्यं परस्परं व्यतिघ्नतां दूषयतां केषां मतानां प्रमाणत्वेन सम्मतानामनुमानादीनां, अथ च सत्त्वासत्त्वैकात्म्यनानात्म्येश्वरत्वानीश्वरत्वादि प्रतिपादयतां दर्शनानामप्रामाण्यं न स्यादपि तु सर्व्वेषामपि तुल्यबलत्वेन परस्परविरोधादप्रमाणत्वमेव स्यात्। किञ्च सत्प्रतिपक्षो विरुद्धसाध्यसाधको हेतुर्यस्य तदनुमानं सत्प्रतिपक्षं तद्वत्। तस्येवाप्रामाण्यं स्यादिति सम्बन्धः। वैशेषिकादयो यथा कृतकत्वाद्घटवदनित्यं शब्दं वदन्ति। मीमांसका निरवयवत्वादात्मवन्नित्यं शब्दं वदन्ति। तत्रोत्तरेण पूर्व्वप्रदर्शिते दोषविशेषे पूर्व्वस्य यथाऽप्रामाण्यं तद्वदित्यर्थः। सत्प्रतिपक्षानुमाने यथा ऽप्रामाण्यं द्वयोरपीत्यर्थः, सप्तम्यर्थे वतिः, तर्क्यन्ते निश्चीयन्तेऽर्था यैस्ते तर्का अनुमानानि तेषामप्रतिष्ठया समबलद्वितीयसद्भावेनानिश्चितस्वरूपयेत्यर्थ इति च व्याख्येयं। गगनं नित्यममूर्त्तं द्रव्यत्वादात्मवत्। गगनमनित्यमस्मदादिबाह्येन्द्रियग्राह्यगुणाधारभूतत्वाद्घटवदिति इति सत्प्रतिपक्षानुमानयोरिवेत्यर्थः॥ ७९॥

अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः।
निर्द्धनास्ते धनायैव धातुवादोपदेशिनः॥ ८०॥
किं वित्तं दत्थ तुष्टेयमदातरि हरिप्रिया।
दत्त्वा सर्व्वं धनं मुग्धो बन्धनं लब्धवान् बलिः॥ ८१॥

अन्यच्चाह। अक्रोधमिति। क्रोधना अकारणरोषणा ये तपोधनास्तपःसर्व्वस्वाः दुर्व्वासःप्रभृतयो ये ते क्रोधो बह्वनर्थकारित्वात् सर्व्वथा त्याज्य इति अक्रोधं क्रोधाभावमन्यैः प्रयोज्यैः शिक्षयन्ति, अन्ये क्रोधाभावं शिक्षन्ते तान् क्रोधो न कार्य्य इति प्रयोजयन्ति उपदिशन्तीति यावत्। स्वयन्तु क्रुद्धा यत् किञ्चिदाचरन्ति अन्यांस्त्वेवमुपदिशन्तीत्युपहासः। तथा येऽतिनिर्धनास्ते धनायैव स्वस्य धनप्राप्त्यर्थमेव लोहादिधातूनां सम्बन्धिनं वादं स्पष्टं वचनं अन्योन्यरिपुमित्राभावज्ञानेन धातूनां संयोगात् स्वर्णरूप्यादि मया कर्त्तुं शक्यते मदुपदेशात् त्वमपि कुरु इत्येवं रूपं धातुवादं उपदिशन्तीत्येवंशीला भवन्ति। परन्तु स्वर्णं किञ्चित्तेन दातव्यं इत्येवं परप्रतारणबुद्धैव न तु तत्त्वतः। यतः स्वयं निर्धना इति हेतुः। तादृक्सामर्थ्यसद्भावे तेषामधनत्वं न युज्यते। ततश्च स्वयमतीर्थः स कथं परांस्तारयति। अनेन धातुवादिनामप्युपहासः। अन्यैः प्रयोज्यकर्त्तुरनभिहितत्वात् कर्त्तरि तृतीया। क्रोधनाः। क्रुधमण्डार्थेभ्यश्चेति (पा० ३।२। १५१) युच्॥ ८०॥

इदानीं दानधर्म्मं दूषयति। किमिति। भो जना यूयं वित्तं

दोग्धा द्रोग्धा च सर्व्वोऽयं धनिनश्चेतसा जनः।
विहाय लोभसंक्षोभमेकदा यद्युदासते ॥ ८२ ॥

स्वर्गादि यज्ञादौ दक्षिणाखेन पात्रेभ्यः किमिति दत्त अपि तु कस्मैचिदपि न देयं यस्मादियं हरिप्रिया विष्णोः प्रेयसी सम्पद्रूपा लक्ष्मीः अदातरि अकृतदानोपभोगे कृपणे तुष्टा प्रीतिं प्राप्नोति तत्रैव वसतीत्यर्थः। दाने बाधकमाह। यस्मान्मुग्धो मूर्खो दानव्यसनपरः तथोदर्कविचारशून्यः स्मृतिपुराणादौ श्रद्धावांश्च वलिः सर्व्वं धनं श्रीवामनाय दत्त्वा बन्धनं लब्धवान्, वाक्पाशेन बद्धः सन् पातालप्रवेशरूपं बन्धनं प्राप्तवान् इति पुराणकथा। दानं कर्त्तव्यमित्यत्र स्मृत्यादिकमेव प्रमाणं वलिप्रभृतीनां दानमशुभोदर्कं जातमित्यत्रापि तदेव प्रमाणं। तथा च कर्तृद्रव्यपात्रशुद्ध्यादियुक्तेऽपि दानविधौ सति विरुद्धफलदर्शनाददातरि च लक्ष्म्याः स्थैर्य्यदर्शनादन्वयव्यतिरेकाभ्यां दानधर्मः सर्व्वथा त्याज्य एवेत्युक्तमिति भावः। हरिप्रियेत्यनेन श्रीहरिणापि याचकत्वाङ्गीकारात् लक्ष्मीप्रीत्यर्थमदातृत्वमेवाङ्गीकृतमिति च सूचितं ॥ ८१ ॥

पात्राभावाद्दानं न कर्त्तव्यमित्याह। दोग्धेति। अयं प्रत्यक्षग्रहणयोग्यः सर्व्वोऽपि जनो धनिन आढ्यान् नरान् दोग्धा दोहनशीलः स्वामिभक्तदानादिविध्युपदेशादिना येन केनाप्युपायेन धनिकेभ्यो धनमाकर्षतीत्यर्थः। तथा द्रोग्धा मनसा तद्विषये द्रोहकरणशीलश्च, कथमेनं हन्यामेतस्य धनादि च कथं

दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुचिवञ्चना।
स्वाच्छन्द्यमृच्छतानन्दकन्दलीकन्दमेककम्॥ ८३॥

गृह्णीयामित्यादिप्रकारेण तद्विषये द्रोहमेव चिन्तयतीत्यर्थः। सर्व्वोऽप्येवमिति कथमुच्यत इत्यत आह। लोभसंक्षोभं द्रव्याद्यभिलापजनितं मनसो नितरां क्षोभं कर्म्मणपारवश्यलक्षणविकारं अभिलाषातिरेकं वा विसृज्य यद्युदासते उदासीना भवन्ति परस्वाकर्षणादेरुपरता भवन्ति तर्ह्येको द्वौ वा न तु तृतीयस्तादृशस्तन्पीयांसस्तस्माद्युक्तमेवोक्तमित्यर्थः। तस्मात् परप्रतारणप्रयोजनक एव दानार्थे धर्म्माद्युपदेश इति भावः। परप्रतारकत्वात् पात्रलाभावाद्दानं कस्मैचिदपि न कर्त्तव्यमित्यर्थः। विपश्चेति पाठे लोभातिरेकं बलान्निरुद्धेत्यर्थः। दोग्धा, द्रोग्धा ताच्छील्ये तृन्। तद्योगे च, न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्गुनिन इति द्वितीया। एको द्वौ वा एक द्वाः। सङ्ख्याव्यये-त्यादिना (पा० २।२।२५) समासे कृते बहुव्रीहौ, सङ्ख्येय इति (पा० ५।४।७३) डच्समासान्तः॥ ८२॥

इदानीं विधिनिषेधजालं दूषयन्नुपसंहरति। दैन्येति॥ अस्तैन्यं चौर्य्याभावो दैन्यस्य निर्द्धनत्वस्यायुष्यं वर्द्धकमित्यर्थः। चौर्यं यावन्न क्रियते तावद्दैन्यं नापयाति तस्मात्तत् कर्त्तव्यमेवेति भावः। तथा अभक्ष्यं लशुनगृञ्जनग्राम्यशूकरादि, तद्वर्जनमिति यावत्, कुक्षिवञ्चना, स्वोदरविप्रलम्भनमेव। स्वादूत्तममभक्ष्यमिति परित्यागे जठरवञ्चनैव भवति न तु स धर्म्मः। तस्मात् किं वञ्चना

इत्थमाकर्ण्य दुर्वर्णं शक्रः सक्रोधतां दधे।
अवोचदुच्चैः कस्कोऽयं धर्म्ममर्म्माणि हन्तति ॥ ८४ ॥
लोकत्रयीं त्रयीनेत्रां वज्रवीर्य्यस्फुरत्करे।
क इत्थं भाषते पाकशासने मयि शासति ॥ ८५ ॥

आनन्दस्य सकलसुखस्य कन्दली प्ररोहः कन्दं मूलभूतमेककं असहायं केवलं स्वाच्छन्द्यं स्वेच्छाचारित्वं स्वच्छत आश्रयत। श्रौतस्मार्त्तसकलविधिनिषेधान् परित्यज्य सर्व्वदुःखहेतुत्वात् स्वेच्छाचरमेव कुरुतेत्युपदेशानस्तत्वमाकर्णयतेति शेषः। स्वाच्छन्द्यं। तस्मै हितमिति (पा० ५।१।५) यत्। असैन्यं। सेनशब्दात्, सेनाद्यन्तलोपश्चेत्यत्र (पा० ५।१।१२५) सेनादिति योगविभागात् यति,अर्थाभावेऽव्ययीभावः। एवमभक्त्येत्यत्रापि। विन्दतेति वा। विद्लृ लाभे लोट् ॥ ८३ ॥

इत्थमिति। शक्रः, इत्थं पूर्व्वोक्तं दुर्व्वर्णं वेदादिदूषकस्यार्वाकस्य दुष्टवर्णवाक्यमाकर्ण्य सक्रोधतां दधे सकोपोऽभूदित्यर्थः। अनन्तरं उच्चैर्नितरां तारस्वरं इत्यवोचत्। इति किं। एतेषु मध्ये अनिश्चितरूपोऽयं कस्कः श्रुत्यादिमूलानि धर्म्मरहस्यभूतानि वेददूषणात् हन्तति छिनत्ति। कोऽयं कोऽयं एवं भाषत इति वक्तृविशेषनिश्चयाय कोपाभिव्यञ्जकसम्भ्रमोक्तौ कस्कशब्दः कस्कादित्वात् साधुः ॥ ८४ ॥

क्रोधमेव द्योतयन् वेदप्रामाण्यं प्रतिजानीते। लोकेति। पाकशासने पाकासुरमर्द्दिनि मयि त्रयीनेत्रां प्रसिद्धचतुर्दशी-

वर्णासङ्कीर्णतायां वा जात्यलोपेऽन्यथापि वा।
ब्रह्महादेः परीक्षास्तु भङ्गमङ्ग प्रमाणय ॥ ८६ ॥

गोचरार्थगोचरीकरणमसमर्थवेदत्रयकल्पनेत्यां वेदविहिताचरणवेदनिषिद्धवर्जनकारिणीं लोकत्रयीं धर्मस्थापनपूर्व्वं शासति परिपालयति सति क इत्यमेवं सकलधर्मदूषणप्रकारेण भाषते। किम्भूते। वज्रवीर्य्येण स्फुरन् प्रकाशमानः करो यस्य तस्मिन्। वज्रेत्यादिना वेदादिनिन्दकस्य कण्ठच्छेदसामर्थ्यं स्वस्य सूचितम्। मयीति करेण हृदयस्पर्शनपूर्व्वं क्रोधाहङ्कारगाविष्काराभिनयः। वज्रहस्तः पुरन्दर इत्यादिवाक्यप्रतिपाद्ये मयि प्रत्यक्षदृश्ये सति श्रुतिप्रामाण्यं को वान्यथा कर्त्तुं समर्थ इति। वज्रवीर्य्येत्यनेन विग्रहवत्त्वं सूचितं। यातोऽस्माज्जगवत्, अग्निहोत्रं त्रयीत्यादि वेदाप्रामाण्यप्रतिपादनं चार्वाकवाक्यं दूषितमिति ज्ञेयं। शासति मयि शासत्तं मामनादृत्येत्यनादरे सप्तमी वा ॥ ८५ ॥

श्लोकद्वयेन शुद्धिर्वंशद्वयीत्यादि यज्जातिदूषण कृतं तत्परिहरति। वर्णेति। अङ्ग रे चार्वाक ब्राह्मणादिवर्णानामसङ्कीर्णतायां सत्यां अन्योन्ययोनिसङ्कराभावे सति यो जात्यलोपो ब्राह्मणत्वादिजातेर्लोपाभावः सद्व्यवहारविषयत्वं तस्मिन् वा विषये ऽन्यथापि वर्णसङ्करान्जात्यभावे वा विषये परीक्षासु तुलादिज्ञापकेषु सत्याद्युक्तेषु जलादिदिव्येषु विषये ब्रह्महादेर्ब्राह्मणक्षत्रियादिवधकारिणोऽभियोज्यस्य भङ्गं पराजयं

ब्राह्मण्यादिप्रसिद्धाया गन्ता यन्नेक्षते जयम् ।
तद्विशुद्धिमशेषस्य वर्णवंशस्य शंसति ॥ ८७ ॥

प्रमाणय सन्दिग्धस्यार्थस्य कोऽप्यन्तरनिरासेन निश्चायकं कुरु । यदि ब्राह्मणत्वादिशुद्धिर्न स्यात्तर्हि ब्रह्मवधादौ कृतेऽपि ब्रह्महा नास्मीति प्रतिज्ञातवन्निश्चभूतो भङ्गो न स्यात् । भवति च तावत्तस्माद्भङ्गेनैव हन्यमानस्य तत्पित्रादिपरम्परायाश्च सङ्कीर्णत्वाद् ब्राह्मण्यादिजातेरखिलं कथितं । यत्र च सङ्कराज्जातिशुद्धिर्नास्ति तस्य वधादौ कृतेऽपि ब्रह्महत्यादिप्रतिज्ञातस्ततो भङ्गो नास्त्येवेति । वर्णसङ्करजातिलोपे व्यतिरेकमुखेन भङ्ग एव प्रमाणं धूम इव वह्न्यभावेऽपीत्यर्थः । अङ्गेति प्राकृत्यद्योति सम्बोधनं । मिथ्यातत्त्वपरीक्षायामभियोक्तुर्भङ्गेऽभियोज्यजातिशुद्धिः पातित्याभावश्च । अभियोज्यभङ्गे तु हन्यमानादेर्जातिशुद्धौ सत्यामपि अभियोज्यस्यैव सङ्कीर्णजातित्वं पातित्यञ्चेति निश्चयसिद्धेर्भङ्गमेव प्रमाणयेत्यर्थ इति व्याख्येयं । यथा मति व्याख्या ज्ञातव्या ॥ ८६ ॥

पूर्वोक्तमेव द्रढयति । ब्राह्मणेति । ब्राह्मणमादिर्यस्य क्षत्रियादिजातिविशेषस्य तेन प्रसिद्धायां यद्वा ब्राह्मणी आदिर्यस्याः क्षत्रियादिस्त्रियाः सा ब्राह्मण्यादिः सा चासौ प्रसिद्धा च तस्या इयमुत्तमा ब्राह्मणीत्यादिप्रकारेण रूढयाः स्त्रियः गन्ता कामुकस्तां संभुञ्जानो नरो दिव्ये जयं न ईक्षते पश्यतीति, यत्, न प्राप्नोतीत्यर्थः । तज्जातीयानीक्षणमेव कर्द्व अशे-

जलानलपरीक्षादौ संवादो वेदवेदिते।
गलहस्तितनास्तिक्यां धिक् धियं कुरुते न ते॥ ८८॥

यस्य वर्णवंशस्य ब्राह्मणादिवर्णसङ्घस्य मातापित्रादिपरम्परया विशुद्धिर्नितरां निर्दोषत्वं शंसति कथयति। ब्राह्मणोऽव्यभिचारी नरो ब्राह्मणोऽहं ब्राह्मणीं नागममिति प्रतिज्ञाय यदा दिव्यं करोति तदा स पराजयत एवेति तावत्प्रत्यक्षं। तथा च गम्याया गन्तुश्च पारदार्यादिदोषदूषितत्वेऽपि तन्मातापित्रादि परम्पराया ब्राह्मण्यादिविशुद्धिः तत्पराजयेनैव स्पष्टं कथिता। यदि जातेः शुद्धिर्नाभविष्यत् तर्ह्येवं प्रतिज्ञायां कृतायामपि तयोर्ब्राह्मणत्वाभावाद्भङ्गो नाभविष्यत्। स तु दृश्यत इति भङ्ग एवान्यथानुपपत्त्या जातिशुद्धौ प्रमाणमित्यर्थः। ब्राह्मण्यादिप्रसिद्धायां गन्ता ना पुरुषो यदजयं भङ्गमीक्षते तद्भङ्गेक्षणमिति वा व्याख्या। गन्तेति तृच्। अन्यथा। न लोकेति (पा॰ २।३।६९।) षष्ठ्यभावः स्यात्। प्रसिद्धायामिति पाठे विषयसप्तमी। अन्या व्याख्या क्लिष्टत्वादुपेक्ष्या॥ ८७॥

इदानीं संवादादपि वेदस्य प्रामाण्यमित्याह। जलेति। हे चार्वाक वेदेन वेदिते बोधिते वेदमूलजलानलयोस्ताभ्यां वा या परीक्षा शुद्धत्वनिर्णयः स आदिर्यस्य तुलादिव्यादेस्तादृशेऽर्थे संवादो यथोक्तदर्शनरूपः स ते तव धियं बुद्धिं गलहस्तितं बला-न्निर्वासितं नास्तिक्यं यस्यास्तां न कुरुते धिक्। वाक्यार्थः कर्म। अनुचितमेतदित्यर्थः। जलदिव्ये हि जलमग्नः पुरुष आकर्णपूर्ण-

पुरुषमुक्तशरप्रत्यानयनमपेक्षमाणे यद्यनानीते शरे उन्मज्जति तर्ह्येवाशुद्धः, आनीते तु शुद्ध इति वेदोक्तं जलदिव्यं, तच्च तथैव दृश्यत इति संवादः । वह्निदिव्ये तु तप्तलोहादौ दाहादाहाभ्यामशुद्धिशुद्धी इत्यप्युक्तं वेदेन । तत्रापि संवादः । तस्मिन् प्रामाण्यहेतौ संवादे सत्यपि नास्तिक्यं न जहातीत्याश्चर्यम् । मूर्खतरोऽसीति भावः । तव धिग्धियं निन्द्यां बुद्धिं निराकृतनास्तिक्यां न कुरुतेऽपि तु करोत्येव । दूषयतीत्यर्थः । तव धिक् निन्द्यां न करोति अपि तु धिक्करोत्येवेत्यर्थः । धियमिति वा । यतो निराकृतनास्तिक्यामित्युभयत्रापि हेतुगर्भसंवादेन नास्तिक्यापनयात् स्वरूपहानेर्धिक्कार एव कृत इत्यर्थः । जलानलपरीक्षादौ ते तत्रापि यतः संवादः सप्रतिपत्तिरस्ति तेन कारणेन सञ्जातगलहस्तमालिङ्गितकण्ठं नास्तिक्यं यस्यां तां स्वीकृतनास्तिक्यां बुद्धिं त्वं धिक्कुरु इत्यर्थ इति वा । अत्र गलहस्तशब्दः परीरम्भपरः । यतस्तत्रापि संवादोऽस्ति । तेन स्वीयां धिग्धियं नास्तिकवादाद् दुष्टां बुद्धिं दूरीमितनास्तिक्यां कुर्विति वा कुत्सिता रुतिः शब्दो यस्य तत्सम्बोधनं कुरुते कुरुद । तथा हे अविद्यमानमते अविनीत चार्वाक वैदिके जलानलपरीक्षादौ यस्मात् संवादोऽस्ति तस्मादाश्लिष्टनास्तिक्यां नास्तिकमतिं धिक् मा निन्देत्यर्थः । इति यत्तदोः सम्बन्धमाश्रित्य वा व्याख्येयम् । नास्ति मतिरस्येत्यर्थे, अस्ति नास्ति दिष्टं मति (पा० ४।४।६०) इति ठकि नास्तिकः । मतिः परलोकविषया । तद्भावो नास्तिक्यं । ब्राह्मणादित्वात् ष्यञ् ॥ ८८ ॥

सत्येव पतियोगादौ गर्भादेरध्रुवोदयात्।
आचिप्तं नास्तिकाः कर्म्म न किं मर्म्म भिनत्ति वः॥ ८९॥

इदानीं मते कर्म्मफलेऽमंय इत्यादीनि वाक्यानि दूषयति। सत्यीति। पतियोगः ऋतौ स्त्रिया भर्तृसम्बन्धः शुक्रशोणितसन्निपातलक्षणः, अयुग्मासु गमनं, निषिद्धतिथ्यादिवर्जनं एतदादिर्यस्तेतादृशे बीजक्षेपादौ कर्षणजलसेकादौ च वर्त्तमान एवं दृष्टकारणसामग्र्यां सर्व्वदा सत्यामपि गर्भादेरध्रुवोदयादनिश्चितादुद्भवात्। कस्मिंश्चित् काले ऽनुत्पत्तेर्हेतोराक्षिप्तमलौकिकस्य परलोकसाधनस्य भावेऽदृष्टकारणसामग्रीत एव सदा स्यात्। न चैवमस्ति। तस्माद्धर्म्माधर्म्मरूपमदृष्टं कारणान्तरमस्तीत्यर्थापत्तिप्रमाणकं कर्म्म शुभाशुभफलकमदृष्टं, भो नास्तिका अवैदिकत्वाद्द्रष्टुमनर्हा वो युष्माकं मर्म्म हृदयं किन्न भिनत्ति अपि तु विदारयत्येव। कुतो हेतोर्न भिनत्तीति वा। एतन्निदर्शनेन सचेतसो हृदयेन विदारितं युक्तं तन्न जातमित्याश्चर्य्यं। मूर्खतमा भवन्त इत्यर्थः। कर्म्म वो मर्म्म दर्शनरहस्यरूपं न, किं दूषयति किन्तु दूषयत्येवेति वा। सर्व्वोद्देशेन नास्तिका इति बहुवचनम्। एतस्याश्चिचतुरासु पत्नीषु सतीष्वपि पुत्रासम्भवे एवं वदन्ति अस्माभिरपत्यप्राप्तिहेतुकं कर्म्म प्राक् न कृतम्। अज्ञातसम्यक्प्रेतकृत्येनाप्यदर्शनेन केनचित् प्रेतेन प्रतिबन्धः कृतस्तस्मादपत्यं न भवतीत्यादि वा कथयन्ति। तस्माल्लोकप्रवादपारम्पर्य्यादर्थापत्तेरदृष्टं कारणान्तरमङ्गीकर-

याचतः स्वं गयाश्राद्धं भूतस्याविश्य कञ्चन।
नानादेशजनोपज्ञाः प्रत्येषि न कथाः कथम्॥ ९०॥

णीयम्। आदिशब्दाभ्यां कृषिवाणिज्यस्वामिसेवादिव्यवसाया-स्तत्फलावाप्तयश्च व्याख्याताः॥ ८९॥

स्तः स्मरति, अन्यदेहैर्मृते दृप्तिः, सन्देहेऽप्यन्यदेहाप्तेरित्या-देरुत्तरमाह। याचत इति। पापवशादप्राप्तसद्गतेः पिशाचत्वा-दियोनिप्राप्तस्य स्वसम्बन्धिनमुदासीनं वा यं कञ्चनाविश्य सूक्ष्म-रूपेण तच्छरीरमधिष्ठाय स्वसम्बन्धि गयाश्राद्धं निजदुर्गतिं परिजिहीर्षया गयायां श्राद्धंप्रयागे माघस्नानादिजन्यं पुण्यवि-शेषं याचतो मम सद्गतिप्राप्त्यर्थमिदं करणीयमिति प्रार्थय-मानस्य, एवं कृते मोचिष्यामीति वदतः प्रेतस्य, सम्बन्धिनीः नानादेशेभ्य आगता जनास्तेभ्य उपज्ञाः श्रुतास्तैर्या ज्ञाताः सत्यत्वेन सर्व्वेषां सम्मताः कथाः कथं न प्रत्येषि। तासु कथं न विश्वसिषि। अपि तु नानाविधप्रामाणिकजनसंवादसिद्धत्वात् पूर्व्वजन्मकथनात् पूर्व्वं मयार्ज्जितावत् सुवर्णादि निचितं तत् पश्य-तेति निध्यादिदर्शनसंवादाद् देशान्तरकालान्तरप्रवृत्तिकथ-नाद् गयाश्राद्धादौ कृते तस्य सद्गतेरनुमानाच्च ताः सर्व्वथा विश्वसितुं योग्या इत्यर्थः। एतेन तीर्थादिभावविशेषपरलोक-देहान्तरप्राप्तिधर्म्माधर्म्ममूलस्वर्गनरकादिप्राप्तीनां प्रामाण्यं स-मर्थितं। नानादेशजनेन उपज्ञानुभविता याभ्यान्ताः सर्व्वमा-चिका इत्यर्थः॥ ९०॥

नीतानां यमदूतेन नामभ्रान्तेरुपागतौ।
अश्रद्धत्से संवदन्तीं न परलोककथां कथम्॥ ८१॥
जज्वाल ज्वलनः क्रोधादाचख्यौ चाक्षिपन्नमुं।
किमात्थ रे किमात्थेदमस्मदग्रे निरर्गलम्॥ ८२॥

को हि तद् वेदेत्यादेरुत्तरमाह। नीतानामिति। प्राणापकर्षणार्थं यमेनैव प्रेषितेन यमदूतेन देवदत्तमानयेत्यादिष्टेन स्वनामतया भ्रान्तेर्हेतोः स्थूलशरीराल्लैङ्गिकं शरीरमाकृष्य यो देवेनानायितः सोऽयमानीत इति यमसामीप्यं नीतानां मरणीयादन्येषां जनानामुपागतौ मयामानायितो यः सोऽयं न भवति पुनरयं मर्त्यलोकं नेय इत्येतत्सदृशमन्यमानयेति यमचित्रगुप्ताभ्यामुक्ते सति प्रत्यावृत्तौ भौतिकशरीरमध्ये लैङ्गिकशरीरे पुनः प्रविष्टे सति तद्बान्धवैरेतावत् पर्य्यन्तं किं जातं त्वं कुत्र गतः किंवा तत्र दृष्टमित्यादि प्रश्ने कृते यमदूतैर्यमं प्रापितस्तेन च पुनरायुःशेषादत्र पातितोऽहम्। स्वर्गो नरकश्चैवंविध इतिप्रकाशकश्रुतिस्मृतिप्रमाणेषु यथा स्वर्गादिरूपं श्रुतं तादृशस्यैव तस्य कथनात् संवदन्तीं संवादं कुर्व्वन्तीं परलोकसम्बन्धिनीं अखिलकथां कथं कुतो हेतोस्त्वं न श्रद्धत्से परलोकाखिले प्रमाणरूपां न मन्यसे वद। न किञ्चिदविश्वासे कारणमस्ति। तस्मात् परलोकोऽस्त्येवेति भावः॥ ८१॥

जज्वालेति। अथ ज्वलनोऽग्निः क्रोधाज्जज्वाल, अमुं चार्वाकं चाक्षिपन् परुषभाषणैरधिक्षिपन्निति आचख्यौ, ऊचे च। इति

महापराक्रिणः श्रौतधर्मैकवलजीविनः ।
क्षणाभक्षणमूर्च्छाल स्मरन् विस्मयसेऽपि न ॥ ८३ ॥

किं । रे चार्वाक नीच त्वमस्माकं वैदिकानामग्रे निरर्गलं निर्भयं यथा तथा इदं पूर्वोक्तप्रकारं किमात्थ किं ब्रूषे इति । अतः परमेवं चेद्वक्ष्यसि तर्हि तव कण्ठोष्ठमेव कुण्ठयिष्यामीत्यर्थः । क्रोधाविष्टजातिरियं । क्रोधावेशद्योतनार्थमेव वीप्सायां पुनरुक्तिः ॥ ८२ ॥

इदानीं नाश्नाति स्नातीत्यादेरुत्तरमाह । महेति । हे क्षणं क्षणमात्रमभक्षणेनाभोजनेन मूर्च्छालातिविह्वल रे नास्तिक द्वादशादिबहुदिवसोपवाससाध्यमहापराकाख्यव्रतवतस्तान् ब्रह्मचारिणः श्रौतस्मार्त्तरूपेणैवैकेन बलेन जीविनः प्राणधारणशीलानेवम्भूतान् मनुष्यान् स्मरंश्चिन्तयन्नपि किं न विस्मयसे । एतावन्ति दिनान्येतेऽभोजनाः कथमासत इत्याश्चर्यं न प्राप्नोषीत्येतन्महच्चित्रम् । क्षणमात्रमप्यभोजनपीडायाः स्वेनैवानुभवे मासोपवासादिकारिणां जीवितधारणस्य प्रत्यक्षदर्शने च सत्यपि भवादृश एव मूर्खो न विस्मयत इत्यर्थः । तस्माच्चिरमभोजनेऽपि जीवितधारणसामर्थ्याद्धर्मोऽस्त्येवेति । एकादश्युपवासादिकं धर्मंमन्वयव्यतिरेकाभ्यां जानीहीति भावः । पराक्रिणः । शेषत्वाविवक्षायां द्वितीयाबहुवचनं । शेषत्वविवक्षया अधीगर्थेति (पा० २।३।५२) षष्ठ्येकवचनं वा । मूर्च्छाल । अस्त्यर्थे सिध्मादिषु क्षुद्रजन्तूपतापाभ्यां चेष्यत इति वचनादुपतापकारित्ववचनादुपकारकारित्वाल्लच् । विस्मयसे न किमिति च पाठः ॥ ८३ ॥

पुत्रेष्टिश्येनकारीरीमुखा दृष्टफला मखाः।
न वः किं धर्मसन्देहमंदेहजयभानवः॥ ८४॥

इदानीं यथान्मज्जनवत्, एकं सन्दिग्धयोस्तावदित्यादेरुत्तरयति। पुत्रेति। भो नास्तिकाः पुत्रप्राप्त्यर्थं विहितः पुत्रफलको यागः पुत्रेष्टिः, श्येनेनाभिचरन् यजेतेति वेदवाक्यविहितः श्येनसाधनकोऽभिचारफलको श्येनः, तथा कारीरीं निर्वपेत वृष्टिकाम इति वंशाङ्कुरसाधनको वृष्टिफलको यागः कारीरीत्युच्यते, एते यागा मुखमादिर्येषां ते, तथा दृष्टप्रत्यक्षानुभूयमानसुतसम्भूतिवैरिमारणजलवर्षादिरूपं फलं प्रयोजनं येषां ते मखा वो नास्तिकानां युष्माकं धर्मोऽस्ति वा नास्ति इति धर्मसम्बन्धी सन्देहो वेदवाक्यविहितादृष्टफलकयागादिरूपो धर्मस्तत्सम्बन्धी वा, अदृष्टफलकयागादिविधायकवेदवाक्यान्येव वा धर्महेतुत्वाद्धर्मास्तत्सम्बन्धी वा यः प्रामाण्याप्रामाण्यसन्देह एव मन्देहा सन्ध्यादये सूर्य्यग्रासार्थमुत्पद्यमाना षष्टिसहस्रसार्द्धत्रिकोटयो राक्षसाः तेषां जये विनाशे भानवः सूर्य्यरूपा विनाशका न किं भवन्ति। एवं दृष्ट्वापि धर्मों न मन्यसे चित्रमित्यर्थः। किं न अपि तु भवन्त्येवेति वा।

> तिस्रःकोट्योऽर्द्धकोटी च मंदेहा नाम राक्षसाः।
> उदयन्तं सहस्रांशुमभियुध्यन्ति ते सदा॥
> गायत्र्या चाभिमन्त्र्योर्द्धं जलाञ्जलिः सन्ध्ययोः क्षिपेत्।
> तेन शाम्यन्ति ते दैत्या वज्रभूतेन वारिणा॥

दण्डताण्डवनैः कुर्व्वन् स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्म्मीर्भिन्नमर्म्मेव धर्म्मराट् ॥ ९५ ॥
तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादहम् ।
अपष्टु पठनः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥

इत्यादिवाक्यप्रामाण्याद्गायत्र्याभिमन्त्रितजलप्रक्षेपेण तन्नाशपुरःसरमेव सूर्य्योदयात् सूर्य्य एव तान् विनाशयतीत्युच्यते । तथा च सूर्य्यो यथा तान्नाशयति तथा मखैरपि भवदीयमन्देहो विनाश्य एवेति प्रामाणिकमेव सर्व्वं जानीहि ॥ ९४ ॥

दण्डेति । अथाऽग्निवचनानन्तरं धर्म्मराड्यमः स्वायुधस्य दण्डस्य ताण्डवनैरितस्ततश्चालनैः नभः स्फुलिङ्गालिङ्गितमग्निकणाकीर्णं कुर्व्वन् रचयन् चार्वाकवाक्यशरैर्भिन्नमर्म्मेव विदारितजीवस्थान इवासहमानो गिरामूर्म्मीर्वाक्यपरम्परा निर्म्ममे ऊचे इत्यर्थः । ऊर्म्मिपदेन वाचामप्रतिहतप्रसरत्वं सूचितं । ऊर्म्मिर्वा स्त्रियामिति स्त्रीलिङ्गेऽपि ॥ ९५ ॥

तदेवाह । तिष्ठेति । भो नास्तिक तिष्ठ तिष्ठ क्षणमात्रं सहस्व धर्म्मदूषणाद्विरमेति वा । अयमहं अधिगोष्ठि गोष्ठ्यामिन्द्रादिसभायां अपष्टु प्रतिकूलं पाठ्यं पठनार्थं वचनं पठतो भाषमाणस्य शठस्य वाक्छलमात्रनिष्ठस्य नास्तिकाधमस्य ते तव कण्ठोष्ठं कण्ठनालमोष्ठौ च हठाद्बलात्कारेणेदानीमेव कुण्ठयामि वर्णोच्चारणाशक्तं करोमि दण्डेन चूर्णयामीत्यर्थः । सर्व्वाणि विशेषणानि दण्डताडने हेतवः । अथ चैवंविधस्य ते

वेदैस्तदपिभिस्तद्वत् स्थिरं मतशतैः कृतम्।
परं कस्ते परं वाचा लोकं लोकायत त्यजेत्॥ ९७॥
समज्ञानात्यभूयिष्ठपान्थवैमत्यमेत्य यम्।
लोके प्रयासि पन्थानं परलोके न तं कुतः॥ ९८॥

अधिगोष्ठि कथामधिकृत्य वाचो युक्तौ कण्ठोष्ठं कुण्ठयामि युक्त्या प्रतिहतत्वादकुसमसमर्थं करोमि। सर्व्वमपि भवच्छास्त्रं दूषयिष्यामीत्यर्थः। वाग्व्यापारं प्रति कण्ठोष्ठस्यैव दण्डो युक्तः। अयमपि क्रोधाद्धङ्काराविष्कारे। तिष्ठ तिष्ठेति क्रोधातिशयद्योतनार्थं पुनरुक्तिः। कण्ठोष्ठं प्राण्यंगत्वादेकवद्भावः। कुण्ठयामि, वर्त्तमानसामीप्ये भविष्यति लट्॥ ९६॥

इदानीं श्लोकत्रयेण परलोकं धर्म्मञ्च साधयन् को हि वेद, तर्काप्रतिष्ठयेत्येवमादेरुत्तरमाह। वेदैरिति। चतुर्भिः ऋग्वेदादिभिर्वेदैर्यथास्थिरीकृतं तद्वत्तस्य वेदस्य वैपश्चाया तद्युक्तैः तदंशोपजीविभिः वेदानुसारिभिर्मतानां शतैः स्मृतिपुराणादिभिः वादिप्रतिवादिभेदैर्मीमांसादिशास्त्रैश्च स्थिरं कृतं निश्चयेन व्यवस्थापितं परं श्रेष्ठं अन्यञ्च स्वर्गादिलक्षणं लोकं हे लोकायत नास्तिकाधम परं केवलं ते वाचा निर्युक्तिकेन वचनमात्रेण कोऽपि विद्वान् त्यजेत् अपि तु न। किन्तु सर्व्वैरपि तद्युक्तिभिः परलोकः स्वीकृत एवेत्यर्थः। तदस्तित्वे सन्देहापादिनो को हि वेदेत्यादिश्रुतिरन्यपरेति भावः॥ ९७॥

समेति। एकस्मिन्मार्गादावर्थे समज्ञाना तुल्यमतयोऽन्ये

स्वकन्यामन्यसात्कर्त्तुं विश्वानुमतिदृश्वनः ।
लोके परत्र लोकस्य कस्य न स्याद्दृढं मनः ॥ ९९ ॥

ऽल्पसङ्ख्या भूयिष्ठा बहुतरसङ्ख्याश्च पान्यास्तेषां वैमत्यं मार्गान्यत्वविरोधमेत्य प्राप्य ज्ञात्वा वा इह लोके यं पन्थानं त्वमेव प्रयासि परलोकेऽपि विषये त्वमेव तादृशमेव मार्गं कुतो हेतोर्न गच्छसीति प्रश्नः। अपि तु तमेतमेव गच्छेत्युपदेशो वा। यथा केनचिदासो दक्षिणो वा काशीमार्ग इति मार्गं पथिकेषु पृष्टेषु पञ्चषैर्वाममार्गे कथिते सति पञ्चाशद्भिर्दक्षिणमार्गे कथिते "द्वैधे बहूनां वचनं ग्राह्यं इत्यादि" न्यायात् कुशलेन पञ्चाशदुक्तमार्गेणैव गम्यते, एवं परलोकेऽप्यन्यविमतिं निरस्य बह्वनुगत एव मार्गः किमिति नाश्रियत इत्यर्थः। परलोकमार्गश्च लक्षणया धर्मस्तं कथं न मन्यसे, अपि तु तमेवाङ्गीकुरु। परलोकसत्तानिश्चयमपि गन्तव्यग्रामवत् कुर्विति भावः। तर्काप्रतिष्ठयेत्यस्याप्येतदुत्तरं ज्ञेयं ॥ ९८ ॥

बहुसम्मतिमेव दर्शयति। स्वकन्यामिति। स्वकन्यामात्मपुत्रीमन्यसात्कर्त्तुमन्यस्मै वराय अधीनां देयां कर्त्तुं विश्वेषां सर्व्वेषां श्रुतिस्मृतिपुराणादीनां लोकानां चानुमतिं सम्मतिं दृष्टवतोऽनुभवतः तथा कुर्व्वतश्च कस्य जनस्य परत्र लोके स्वर्गादौ मनो दृढं निःसन्देहं निश्चलं न स्यादपि तु सर्व्वस्यापि स्यादेव। न केवलमन्यस्यैव किन्तु चार्वाकस्य तवापीत्यर्थः। सर्व्वोऽपि परलोकबाधभिया स्वकन्यामन्यस्मै ददाति। यदि

कस्मिन्नपि मते सत्ये हताः सर्व्वमतत्यजः।
तद्दृष्ट्या व्यर्थतामात्रमनर्थस्तु न धर्म्मजः॥१००॥

परलोको नाभविष्यत्तर्हि स्वपुत्रीमन्यस्मै कथमदास्यत्। अयमाचारः सर्व्वेषां सम्मतः। स च त्वयाप्यन्यस्मै पुत्रीदानादङ्गीकृत एव। अन्यथा स्वपुत्र्याः स्वेनैव ग्रहणमापद्येत। तस्मादन्येषामनुमतिं गृहीत्वैव यथा कन्याऽन्यस्मै दीयते तथा बहुसम्मतिदर्शनात् परलोकमप्यङ्गीकुर्व्विति भावः। अन्यस्मात्। देयेत्राचेति (पा०५।४।५५) सातिः। विश्वेति पूर्व्ववत्॥ ९९॥

श्लोकद्वयेन श्रुतिस्तत्यर्थबोधेषु, तर्कोप्रतिष्ठेत्यादेरुत्तरमाह। कस्मिन्निति। धर्म्मपरलोकादिप्रतिपादनपराणां बहूनां मतानां मध्ये एकस्मिन्नेकस्मिन्नपि मते सत्ये सत्यत्वेनाङ्गीकृते सति सर्व्वमतत्यजः सर्व्वमतत्यागिनः परस्परविरोधात् सर्व्वमतासत्त्ववादिनो नास्तिका यूयं हता मारिताः। तत्रायं सन्धिः। मतानामसत्यत्ववादिभिः किञ्चिन्मतं सत्यमङ्गीक्रियते न वा, चेदङ्गीक्रियते तर्हि कस्यापि कन्यादानादिप्रतिपादकस्य स्वीयमतस्यैव वा सत्यत्वाङ्गीकारात् सर्व्वमप्रमाणमिति सर्व्वासत्यत्ववादिनो व्याघाताय सिद्धान्ताभ्यां दूषिता एवेति वैदिकसिद्धान्तो निर्द्दोष इत्यायातं। न वेत्यपि पक्षे नास्तिकमतस्याप्यसत्यत्वादसत्यभूतस्य दूषकत्वाभावान्निर्द्दोषो वैदिकः पक्षः सिद्ध पक्षेत्यपि नास्तिका दूषिताः। निर्द्दोषत्वेऽपि वैदिकपक्षाङ्गीकारे स्वपक्षोऽपि मैर्नाङ्गीकार्य्य इत्यादि ज्ञेयम्। एवञ्च तर्कस्य मतत्र

क्वापि सर्व्वैरवैमत्यात् पातित्यादन्यथा क्वचित् ।
स्थातव्यं श्रौत एव स्याद्धर्म्मे शेषेऽपि तत्कृते ॥ १०१ ॥

दृष्ट्या मत्यताज्ञानेनोभयवादिसिद्धतया पुत्रेष्ट्यादौ पुत्रजन्मादिफलसिद्धौ सत्यां यत्र क्वचित् फलव्यभिचारस्तत्र कर्म्मणो वैफल्याद् व्यर्थतामात्रं फलसाधनत्वराहित्यमात्रं तु पुनः अधर्म्मः प्राचीनपुत्रवियोगादिर्निरर्थकः । दुःखराशिः धर्म्मजो न, पुत्रेष्ट्यादिधर्म्मजन्यो न भवति, विपरीतं तु धर्म्मेण न जन्यते, किन्तु प्राचीनदुष्कर्म्मनिमित्तमेव । केवलं तु काकतालीयन्यायेन तस्य पुत्रेष्ट्याद्यनन्तरभावित्वं । न च तावतैव तत्कार्य्यत्वमिति व्याप्तेरित्यर्थं इत्यादि ज्ञातव्यम् । कस्मिन्नपि मातृगमनादिनिषेधे स्वकन्यादानादौ विषये च वैदिके सति सत्ये सति तस्मिन्नंशे सत्यत्वे ऽङ्गीकृते सति सर्व्वमतमसङ्गतमिति वदन्तो नास्तिका हताः । मातृगमननिषेधादेरंशस्य भवद्भिरपि परिपालनादित्यर्थः । तया च तद्दृष्ट्या कन्यादानमातृगमननिषेधादिरूपाणां सत्यानां विधिनिषेधांशानां दृष्टान्तेनान्यत्रांशे व्यर्थतामात्रं वचनमात्रेण व्यर्थमित्युच्यते न तु धर्म्मजो वास्तवोऽनर्थः प्रयोजनाभावः । तद्दृष्टान्तेन व्यर्थतामात्रमन्यत्राव्यर्थतैवेति चेत्यसमतिप्रसङ्गेन ॥ १०० ॥

उपसंहरति । क्वापीति । सर्व्वैरास्तिकैरपि क्वापि कस्मिन्नपि अहिंसाकन्यादानादौ श्रौते वेदोक्त एव धर्म्मे स्थातव्यं । कुतः । अवैमत्यात् सर्व्वसम्मितत्वात् शेषः श्रौतानां बौद्धानां माध्यमि-

कानामपि सम्प्रतिपत्तेः। अहिंसादेरौरथ्यनिषिद्धत्वादङ्गीकर्त्तव्या-चेत्यर्थः। ध्यातव्यमेवेति वा। तथा कचिद्वर्णाश्रमाधिकारविहिते अन्यथा करणे निषिद्धाचरणे च पातित्यदोषाद्विहिताकरण-निषिद्धाचरणप्रत्यवायभयादपि श्रौत एव धर्मः ध्यातव्यः। अन्यथा वैमत्येऽपि श्रौत एव कचित् कस्मिंश्चिद्धर्मे ध्यातव्यं। कुतः। पातित्यात्। यत्तु श्रौते धर्मे तेषां विप्रतिपत्तिस्तदनङ्गीकारेऽपि प्रत्यवायः स्यादित्यङ्गीकार्य्य एवेत्यर्थ इति वा। एवं शेषेऽपि नित्यनैमित्तिकाभ्यामतिरिक्ते काम्ये ज्योतिष्टोमादावपि ध्यातव्यं। कुतः। तत्कृते तस्य वेदस्य कृते कारणाद्वेदविहितत्वाविशेषादित्यर्थः। यदा तत्कृते वेदमूलत्वाच्छेषे स्मार्त्तेऽपि धर्मे ध्यातव्यं, सदाचारानुमितस्मृत्या श्रुतेरनुमानात्। स्मार्त्तधर्मा अपि वेदमूला इति तेऽप्यङ्गीकर्त्तव्या इत्यर्थः। एतेन यस्मिन्नास्तीति, जनेन जानतेति, एकस्य विश्वपापेनेति, स्वश्च मश्च चेत्यादेः सर्व्वस्याप्युत्तरं दत्तम्। धातुवादादि दिक्प्रामाणिकमेव। असिद्धिस्तु साधनवैगुण्यादिति सर्व्वमपि समर्थितमिति ज्ञेयम्। तत्कृतमिति पाठे हेतुगर्भविशेषणं। तस्मान्न मतानामप्रामाण्यं। श्रुतिस्मृत्योरैकमत्यमप्यविरुद्धमिति श्लोकद्वयतात्पर्यार्थः। अहिंसादयः स्मृत्युक्ताः सर्व्वसाधारणधर्मास्तेषु क्वापि श्रौतेऽपि धर्मो ध्यातव्यं। पातित्यादित्युभयत्रापि हेतुः। सर्व्वेषामनुमते विहिते चेन्न ध्यायेत तर्हि विहितस्याननुष्ठानादिति स्मृतेः पातित्यमित्यर्थः। तथा च विहितानां केषाञ्चिद्वर्णाश्रमिणामनुष्ठानान्निषिद्धानां केषाञ्चिद्वर्णाश्रमिणामपि वर्जनात् सर्व्वेषां विमते

बभाण वरुणः क्रोधादरुणः करुणोज्झितम् ।
किं न प्रचण्डात् पाषण्डपाश पाशाद्विभेषि नः ॥ १०२ ॥
मानवाशक्यनिर्माणा कूर्म्माद्यङ्कविला शिला ।
न श्रद्धापयते मुग्धास्तैर्थिकाध्वनि वः कथं ॥ १०३ ॥

निषिद्धे चेत् स्थीयते । तथा निन्दितस्य सेवनादिस्तौ पातित्यमित्यर्थः । तथा चैतद्दृष्टान्तेनान्येष्वपि विधिनिषेधांशेषु तत्त्वतः शौतत्वाविशेषादेव हेतोः स्यातव्यं । तेऽपि प्रामाणिकत्वे स्वीकार्या इति वा व्याख्या इत्यादि ज्ञातव्यम् ॥ १०१ ॥

बभाणेति। क्रोधादरुणो रक्तकायकान्तिः वरुणः करुणया उज्झितं वचो नितरां परुषं यथा बभाण । हे पाषण्डपाश नास्तिकाधम त्वं नोऽस्माकं प्रचण्डाद्दुःसहात् पाशान्न बिभेषि किं। कुत्सायां, याप्ये पाशविति (पा० ५।३।४७) पाशप्प्रत्ययः॥१०२॥

मानवेति । मानवैर्मनुष्यैरशक्यं निर्माणं यस्याः तथा कूर्म्मवराहनरसिंहाद्यैरङ्काश्चिह्नानि येषामेवंविधं विलम्बिवरं यस्याः सा च शिला गण्डकाख्या तीर्थविशेषसम्भवा शालग्रामशिला, सो मुग्धा मूर्खाः तीर्थिकाध्वनि सेश्वरमार्गे वैदिकाध्वनि वा वो युष्माकं कथं न श्रद्धापयते आस्तिक्यं न प्रापयति । चित्रमेतद्भवतां मूर्खतरत्वमित्यर्थः । मनुष्यैरशक्यरचनं सावयवत्वेन कार्य्यं शिलादिस्वनिर्म्माणशक्तमिच्छामात्रेण कर्त्तारं मनुष्यादिलक्षणमीश्वरमाक्षिपति । विमतं सकर्तृकं कार्य्यत्वाद्घटवत्। अनुमानात्पक्षधर्मतायसादिलक्षणे कर्त्तरीश्वरे सिद्धेऽपि कथमनाविश्वास

शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः कथम्।
श्रुतिवृत्तान्तसंवादैर्न वश्चमदचीकरत् ॥ १०४ ॥

इत्याशयः। एतेन देवश्चेदस्ति सर्व्वत्र इत्यादेरुत्तरं दत्तमिति ज्ञेयम् ॥ १०३ ॥

शतेति। भो नास्तिकाः शतक्रतुश्च श्रीविष्णोरूरुभ्यां अजायत इत्यूरुजो वैश्यः स आदिराद्यो वा येषां ते ब्राह्मणादिवर्णाश्च तेषामाख्या शतक्रतुमुखजबाहुज इत्यादीनि नामानि तेषां विशेषेण ख्यातिर्वार्त्ता श्रुतिवृत्तान्तसंवादैः वेदोक्तेतिहासैः करणैः वो युष्मान् कथं न चमदचीकरत् चमत्कारं नाकारयदपि तु आश्चर्यं भवतां तयोत्पाद्यं। चमदित्यव्ययमाश्चर्य्ये। शताश्वमेधक्रतुकारीन्द्रो भवति। इन्द्रस्यैव शतक्रतुत्वं वेदेनोक्तम्। लोकेनापीन्द्र एव शतक्रतुत्वेन व्यवह्रियते न तु वज्ञादिरिति। तथा च ब्राह्मणोऽस्य मुखमासीदित्यादिना श्रुत्या ब्राह्मणक्षत्रियादीनां मुखजत्वबाहुजत्वाद्युक्तं। लोकेनापि ब्राह्मक्षत्राद्य एव मुखजत्वबाहुजत्वादिभिर्व्यवह्रियते न तु विपर्य्ययेणेति वेदोक्तेन सह लोकस्यानुभूयमानत्वात्। संवादादपि वेदे यथोक्तं तथैव लोको व्यवहरत्याश्चर्य्यमेतत्। आश्चर्यं पूर्व्वं वेदप्रामाण्यं कथं न विश्वसिथेत्यपि तु विश्वसनीयं तचेत्याशयः। ऊरुजपदं वृत्तानुरोधात् प्रायोजि। तथापि सर्व्वेऽपि वर्णाः संगृहीताः। विख्यातिः प्रयोजिका संवादैः प्रयोज्यैर्वा युष्माकश्चमदाश्चर्यं कथं न कारयामासेति वा। शतक्रतुश्च ऊरुजांशो च तदादि सक्रिर्मेनयो-

तत्तज्जनकृतावेशान् गयाश्राद्धादि याचिनः।
भूताननुभवन्तोऽपि कथं श्रद्दध्व न श्रुतीः॥ १०५॥
नामभ्रमाद्यमं नीतानथ स्वतनुमागतान्।
संवादवादिनो जीवान् वीक्ष्य मा त्यजत श्रुतीः॥ १०६॥

त्यादि व्याख्या येषां यामाञ्च वज्रादीनां मेनकादीनाञ्च तेषां लोके प्रसिद्धैर्वेदवृत्तान्तसंवादैर्हेतुभिर्युष्माकं कमाश्चर्यं नाचीकरत्। लोकवेदप्रसिद्धानिन्द्रादीनुर्वश्यादप्सरसश्चैतान् सर्व्वान् प्रत्यक्षेणैव पश्यतेत्यर्थः। तथा च वेदस्तन्मूलं परलोकादि च प्रामाणिकमेवेदमिति भाव इति वा। प्रथमव्याख्याने व इति "हृक्रोर्" (पा०१।४।५३) त्यणौ कर्त्तुर्णौ कर्म्मत्वं, चमदिति च कर्मान्तरं। संवादैरिति करणे तृतीया। पक्षान्तरे तु तेनैव सूत्रेणाणौ कर्त्तुः कर्म्मत्वाभावादनभिहिते कर्त्तरि संवादैरिति तृतीया। व इति षष्ठी॥ १०४॥

तदिति। तेषु तेषु जनेषु कृतावेशान् कृतसञ्चारान्, तथा गयाश्राद्धादि याचिनो गयापिण्डदानादिपुण्यं याचतः, प्राप्तप्रेतभावान् भूतान् प्राणिनोऽनुभवन्तोऽपि पश्यन्तोऽपि यूयं श्रुतीः कथं न श्रद्धध्व सत्यत्वेन मन्यध्व इति पौनरुक्त्यं न शङ्कनीयं भिन्नवक्तृत्वादेवमुत्तरश्लोकेऽपि ज्ञेयम्॥ १०५॥

नामेति। नामभ्रमाद्यमदूतैर्यमं नीतान् प्रापितान् अथ मुक्तत्वात् प्रत्याहृत्य स्वतनुमागतान् प्राप्तान् संवादं चन्द्रः चयोग्यादि वेदसंवादं वदन्तीत्येवंशीलान् जीवान् वीक्ष्य श्रुतीः वेदान्

संरम्भैर्जम्भजैत्राद्यैः स्तभ्यमानाद्‌दलाद्‌दलन्।
मूर्ध्नि बद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान्॥ १०७॥
नापराधी पराधीनो जनोऽयं नाकनायकाः।
कालस्याहं कलेर्वन्दी तच्चाटुचटुलाननः॥ १०८॥

मा त्यजत, अप्रामाणिकान् मा ब्रूत। एवं वेदप्रामाण्योपसंहारात् स्मृत्यादेरपि वेदमूलत्वात् उक्तसर्व्वधर्म्माणां प्रामाण्यं व्यवस्थापितम्॥ १०६॥

संरम्भैरिति। अथ वेदवचनानन्तरं जम्भजैत्रः शक्र आदिर्यस्य, इन्द्रानलादीनां संरम्भैर्भ्रूभङ्गाद्याकारविकारैर्भीतेन कलिना पुरस्खलितुं स्तभ्यमानान्निषिध्यमानात्। इन्द्रादिसंरम्भान् दृष्ट्वा भयात् तत्सम्मुखं पदमपि चलितुमशक्तात्‌ दलात् कलिसैन्यात् वलन् पृथग्भवन् किञ्चिद्दूरार्द्धमवलम्ब्य द्वित्राणि पदानि सम्मुखमागच्छन् दीनत्वद्योतनपुरःसरं शक्रादिनमस्कारार्थं बद्धाञ्जलिः कश्चिदज्ञातनामा पापरूपत्वेनाज्ञातनामा चार्वाकः देवान् एवं वक्ष्यमाणप्रकारेण ऊचे॥ १०७॥

नेति। हे नाकनायका इन्द्रादयः अयं मल्लक्षणो जनोऽपराधी न यतः पराधीनः। तदेवाह। कलेः कलिनाम्नः कालस्याहं वन्दी स्तुतिपाठकः। अत एव तस्य चाटुनि प्रियवचने विषये चटुलं प्रियवादि वावदूकं वा आननं यस्यैवम्भूतः, अयञ्च कामस्य स्ततामरूपस्य वन्दिनो हि यत्नाश्रयन्ति तत्प्रियं वदन्ति न च दण्डार्हाः। तस्मादेतत्प्रियं वैदिकादिदूषणं मया

इति तस्मिन् वदत्येव देवाः स्यन्दनमन्दिरम् ।
कलिमाकलयाञ्चक्रुर्द्वापरञ्चापरं पुरः ॥ १०९ ॥
सन्ददर्शोन्नमद्ग्रीवः श्रीवत्त्वकृताद्भुतान् ।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥ ११० ॥

कृतं यदि न करोमि तर्ह्ययं दण्डयिष्यतीति परयुक्तत्वादपराधान्नाहं दण्ड्यः श्रीमद्भिरिति ॥ १०८ ॥

इतीति। देवास्तस्मिंश्चार्वाके इति पूर्व्वोक्तप्रकारेण वदति भाषमाणे सत्येव स्यन्दनमन्दिरं रथं कलिं अपरं द्वितीयं द्वापरञ्च पुरोऽग्रे आकलयाञ्चक्रुर्ददृशुः ॥ १०९ ॥

समिति। तैस्तैः प्रसिद्धैः ब्रह्महत्यादिभिर्मूर्त्तैः पापैस्तत्कारिभिः पुरुषैर्वा परीतः समन्ताद्व्याप्तः, तथा उन्नमन्ती दर्शनार्थमुच्चग्रीवा यस्यैवम्भूतः स कलिः श्रीवत्त्वेन कायकान्तिबाहुल्येन भूषणादिसम्पद्बाहुल्येन वा कृताद्भुतान् कृताश्चर्य्यान् अनाकीयान् स्वर्गरहितान् स्वर्गभवान् वा तान् इन्द्रादीन् सन्ददर्श। क इव नारकीव। यथा ब्रह्महत्यादिकारी आकण्ठनरकमग्न ऊर्द्ध्वग्रीवो नरकस्थः पुरुष इव। पापकारित्वादहमेवंरूपः पुण्यत्वाच्चैते दीप्तस्वरूपा इति ज्ञातवांश्च। नरकस्थोऽपि देवानां कायकान्तिदर्शनाज्जायमानसुखोऽनुष्ठितपापकृतपश्चात्तापः सुरानार्त्ततया पश्यतीत्युपमा। उन्नतग्रीव इत्यपि पाठः। नाकीयानिति हितार्थे तस्मै हितमिति (पा० ५।१।५) वृद्धत्वाद्वार्थे वृद्धाच्छ इति (पा० ४।२।११४) वा छः। नारकी। नरकशब्दाद् इनिः ॥ ११० ॥

गुर्व्या रीढावलीढः प्रागभून्नमितमस्तकः।
स त्रिशङ्कुरिवाक्रान्तस्तेजसैव बिडौजसः॥ १११॥
विमुखान् द्रष्टुमप्येनं जनङ्गम इव द्विजान्।
एष मत्तः सचेलन्तानुपेत्य समभाषत॥ ११२॥

गुर्व्विति। प्राग् दर्शनात् पूर्व्वमिन्द्रादयः केनापि एकदिकरणे, इत्यादिरूपया गुर्व्या महत्या रीढयाऽवलीढो व्याप्तस्तेषु कृतावज्ञोऽपि दर्शनानन्तरं बिडौजस इन्द्रस्य तेजसा आक्रान्तः पराभूतः तिरस्कृततेजस्कः सन् अवज्ञां त्यक्त्वा स कलिः अनमन्नपि बलात् स्वेनैव शक्रतेजसैव वा नमितो नम्रीकृतो मस्तको यस्यैवम्भूतोऽभूत्। इन्द्रादीन्नमस्कारेत्यर्थः। क इव। त्रिशङ्कुर्नाम सूर्य्यवंश्यो नृप इव। स हि स्वयाजने प्रार्थितेन पुरोधसा वशिष्ठेन निरस्तो गुरोर्वसिष्ठस्य अवज्ञया व्याप्तस्तस्मिन् कृतावज्ञ सन्नभिमानाद्विश्वामित्रेण सर्व्वकामिकं क्रतुं याजितस्तत्प्रभावात् सशरीर एव स्वर्गं गच्छन्निन्द्रेऽपि कृतावज्ञः संस्तत्तेजसा पराभूतः स्वर्गाद्भ्रंशितः। यथा पूर्व्वमिन्द्रे कृतावज्ञः संस्तत्तेजसा पराभूतः स्वर्गाद् भ्रंशित इत्येवं नमितमस्तकोऽभूदितीतिहासः। रीढावमाननावज्ञेत्यमरः॥ १११॥

विमुखानिति। मत्तः मगर्व्व एष कलिः सचेलं सविलासमुपेत्य समीपमागत्य तान् देवान् समभाषत। किम्भूतान्। एनं कलिं द्रष्टुमपि न केवलं भाषितुं स्प्रष्टुं वा किन्तु वीक्षितुमपि विमुखानभवांन् सावज्ञान्। कः कानिव। मत्तो निर्गतो मदि-

स्वस्ति वास्तोष्पते तुभ्यं शिखिन्नस्ति न खिन्नता ।
सखे काल सुखेनासि पाशहस्त मुदस्तव ॥ ११३ ॥
स्वयम्वरमहे भैमीवरणाय त्वरामहे ।
तदस्माननुमन्यध्वमध्वने तत्र धाविने ॥ ११४ ॥

रामन्तो वा जनङ्गमश्चण्डालो दिशानिव। किम्भूतान् एनं चण्डालं द्रष्टुमप्यनर्हान्। चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमा इत्यमरः। गमश्चेति (पा० ३।२।४७) खच्। खिलानुम् ॥ ११२ ॥

स्वस्तीति। हे वास्तोष्पते इन्द्र ते तुभ्य स्वस्ति क्षेममस्ति कच्चित्। तथा हे शिखिन्नग्ने ते तव खिन्नता चित्तक्लेशो नास्ति कच्चित्। हे सखे काल यम सुखेनासि किं। हे पाशहस्त वरुण तव मुदः सन्ति कच्चित्। इन्द्रस्य त्र्यधिपत्यादसामर्थ्यं वृथैव ज्वालाजटिलत्व कुत्सितरूपत्वमायुधधारणवैयर्थ्यञ्च सम्बुद्धिभिः सूचितं। उत्तमानां कुशलप्रश्नाशीः सह स्वास्यन्तेभ्योऽधिकत्वं सूचयति। इन्द्राय स्वस्तिप्रयोगः स्वामिभावं ब्राह्मण्यं वा कलेर्द्योतयति। वर्त्तमानेन यमे सखिशब्दप्रयोगः। अयमेव गर्व्वोऽवज्ञा चेति ज्ञेयं। स्वस्त्याशीःक्षेमपुण्यादावित्यमरः। वास्तोष्पतिरर्थैकमैधाच्छचेति निपातात् साधुः। तुभ्यमिति। नमः-स्वस्तीति (पा० २।३।१६) चतुर्थी। इतरच्च तव सम्बन्धनीयम् ॥ ११३ ॥

स्वयमिति। हे देवा वयं स्वयम्बररूपे महे उत्सवे भैमीवर-णाय यस्मात् त्वरामहे सवेगाः स्मः तत्तस्मात्तत्र धाविने स्वय-

तेऽवज्ञाय तमस्योच्चैरहङ्कारमकारणम्।
ऊचिरेऽति चिरेणैनं स्मित्वा दृष्टमुखा मिथः॥ ११५॥
पुनर्वच्यसि मामैवं कथमुद्दच्यसे नु सः।
सृष्टवान् परमेष्ठी यं नैष्ठिकब्रह्मचारिणम्॥ ११६॥

स्वर्स्थानं प्रति स्वर्जुगामिनेऽध्वनेऽस्मानतुमन्यध्वमाज्ञापयत। त्वरावशादन्या गोष्ठी न क्रियते। आज्ञैव दीयतामित्यर्थः। अध्वने। तादर्थ्ये चतुर्थी॥ ११४॥

त इति। ते देवाः पूर्वोक्तमकारणं निर्हेतुकं उच्चैरतिशयितं अस्य कलेरहङ्कारं दर्पमवज्ञाय मिथो ऽन्योन्यं दृष्टमुखाः सन्तः मूर्खः स्वयम्वरवार्त्तां किं करोतीति स्मित्वा हास्यं कृत्वाऽतिचिरेण पापीयसाऽनेन सह कथं वक्तव्यमिति बुद्ध्या भूयासं कालं विलम्ब्यैनं कलिं प्रत्यूचिरे वक्ष्यमाणं बभाषिरे॥ ११५॥

पुनरिति। हे कले त्वं स्वयम्वरार्थं गमिष्यामीति एकवारमज्ञानादुक्तं तदिदमतःपरं पुनर्मा मा एवं वक्ष्यसि मा मावोचः। यस्मात् परमेष्ठी यं त्वां आमरणं गुरुकुलनिवासिनं नैष्ठिकब्रह्मचर्य्यव्रतधारिणं सृष्टवान् (स तु पुनस्त्वं कथमुद्दच्यसे परिणेष्यसि कृतयुगादयो निष्कलत्रा एव सृष्टाः) तस्मात्तव स्वयम्वरवार्त्ताऽनुचिताऽवकीर्णित्वापातात्। तस्मादेवं पुनर्मा स्म वोच इत्यर्थः। पापरूपं प्रत्युपहासवचनमेतत्। मामन्दस्य निरनुबन्धकत्वादद्यमीति वचेर्ल्रृट्। मा मेति निषेधविषयार्थं वीप्सायां द्विरुक्तिः। परमे स्थाने तिष्ठति इति इनिः स च कित्।

द्रोहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम्।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम्॥११७॥
अतिवृत्तः सवृत्तान्तस्त्रिजगद्युवगर्व्वनुत्।
आगच्छतामपादानं स स्वयम्वर एव नः॥११८॥

अत आलोपः, अम्बाम्बेति (पा० ८।३।८७) सूत्रेण षत्वं। तत्रैव, परमे वर्हिरिति निपातनादेदन्तत्वं।

नैष्ठिको ब्रह्मचारी तु वसेदाचार्य्यसन्निधौ।

तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि च॥ इति स्मृतिः॥११६॥

द्रोहिणमिति। द्रुहिणो ब्रह्मा त्वां पुत्रं अवकीर्णिनं क्षतव्रतं आकर्ण्य निजाज्ञाभङ्गाद् द्रोहिणं गुरुद्रोहकारिणं वेत्तु। एवं त्वया कृते ब्रह्मैवं ज्ञास्यतीति यावत्। अथ वा तेन ज्ञातेऽपि तव किं भयमिति सोपहासमाह। त्वज्जनैस्त्वदुपजीविभिः कामक्रोधादिभिरपि धातुः सेतुर्ब्रह्मकृता धर्म्ममर्य्यादा लङ्घ्यः त्वया पुनः किन्न लङ्घ्यः। त्वदाज्ञया सेवका अपि ब्रह्माज्ञां लङ्घयन्ति त्वं लङ्घयसीति किमाश्चर्य्यमित्यर्थः। यद्वा त्वज्जनैरपि सेतुर्न लङ्घ्यस्त्वया न लङ्घ्य इति किं वाच्यं। तदाज्ञालङ्घनमनौचित्यान्न कार्य्यमित्यर्थ इति काकु। धाताऽजयोर्निर्द्रुहिण इत्यमरः। द्रुदक्षिभ्य इनन्, औणादिकः किन्॥११७॥

स्वयम्बरं प्रत्यागमने हेत्वन्तरमपि मूते। अतीति। एकं विना सर्व्वपरित्यागात्त्रिजगत्सु वर्त्तमानानां यूनां तरुणानां सौन्दर्य्यविषयं गर्व्वं नुदतीति नुत् नाशकः स वृत्तान्तो भैमीस्वय-

नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च।
भूमिपालं नलं भैमी वरं सावव्वरद्वरम्॥ ११९॥

स्वरोऽतिवृत्तो ऽतिक्रान्तः सञ्जात इत्यर्थः। भवद्भिः कथं ज्ञातमित्यत आह्हः। स स्वयम्वर एव। आगच्छतां नोऽस्माकमपादानं निश्चलोऽवधिभूतोऽर्थ इत्यर्थः। वयमपि तत्र गतास्तत एव आगच्छाम इति सर्व्वोऽपि वृत्तान्तोऽस्माभिर्ज्ञायत इति। अतोऽपि त्वया तत्र न गन्तव्यमिति भावः। विश्लेषे चञ्चलं स्थिरं वा यदुदासीनं तदपादानमिति वैयाकरणाः॥ ११८॥

कथं यूनां गर्व्वनोदः को वा तया कृत इत्याशङ्कायामाह्हः। नागेष्विति। नागेषु वासुकिप्रभृतिषु सानुरागेषु दिविषत्सु अस्मदादिषु कौतुकवशादेव पश्यत्सु तान् सर्व्वाननादृत्य सा भैमी नागाद्यपेक्षया वरं सर्व्वगुणाश्रयत्वाच्छ्रेष्ठं भूपालं सार्व्वभौमं नलं नृवरं वरं परिणेतारमववरत् वरयामास। सर्वानादरेण नलवरणात् सर्व्वेषां सौन्दर्य्यगर्व्वो गत इत्यर्थः। पश्यत्सु दिविषत्सु इत्यनेनास्माभिः कौतुकार्थं वरदानार्थमेव च गतं न तु तद्वरणार्थमिति च व्याख्यानान्तरेण सूचितमिति ज्ञेयम्। नागेष्वित्यादौ, षष्ठी चानादरे इति (पा० २।३।३८) सप्तमी। अववरत्। वर ईप्सायामिति चुरादावदन्तपाठात् स्वार्थणिजन्तादरयतेर्यालोपित्वात् सन्वद्भावादिलदीर्घत्वाभावः॥ ११९॥

भुजगेशानसद्वेषान् वानरानितरान् नरान् ।
अमरान् पामरान् भैमी नलं वेद गुणोज्ज्वलम् ॥ १२० ॥
इति श्रुत्वा स रोषान्धः परमश्चरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥ १२१ ॥

किमिति ते परित्यक्ता इत्याशङ्कायां कारणमाह । भुजगेशानिति। भैमी भुजगेशान् वासुकिप्रमुखान् फणागणजिह्वालालनादिवैरूप्यादसद्वेषानमनोहरान् वेद जानाति । तथा इतरान् नलादन्यान् नरान् मनुजाधीशान् चापल्यनिर्गुणताभ्यां वानरान् वेद। तथा अमरान् अचतुरत्वात् पामरान्नीचान् वेद। केवलं नलमेव गुणोज्ज्वलं श्रुतवीर्य्यौदार्य्यसौन्दर्य्यादिभिः प्रकाशमानं वेद । सर्व्वगुणाकरत्वान्नल एव तया वृतोऽन्ये तु परित्यक्ता इत्यर्थः । विवर्णः पामरो नीच इत्यमरः । वेदेति इदानीमपि तथैव प्रतीतेः सत्वाद्वर्त्तमानता । विभक्तिप्रतिरूपको निपातो वा । तथाऽज्ञासीदित्यर्थः ॥ १२० ॥

इतीति । चरममन्त्यं युगं स कलिः इतीन्द्रादिवचनं श्रुत्वा परमोऽत्युत्कृष्टो रोषान्धः, रोषान्धितरां निर्विचारतया पुरःस्थमपि वस्त्वजानन्, अत एव जगन्नाशसम्बन्धिनी निशा, यस्यां *निशि जगन्नाशो भवतीति यावत्, तत्सम्बन्धी प्रलयकाले सकल*भूतग्रामसंहारसमयस्थो रुद्रस्तद्वन्मुद्रा आकारो यस्य सः। क्रोधवशान्नितरामाविष्कृताकार इति यावत्। एवम्भूतः सन्तान् सुरानदो वक्ष्यमाणमुक्तवान् ॥ १२१ ॥

कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम्।
कलिस्तु चरतु ब्रह्म प्रैतु चातिप्रियाय वः ॥ १२२ ॥

पुनर्वक्ष्यसि मामेवमित्याद्युत्तरमाह। कयेति। हे देवा ब्रह्मा कयाऽप्यतिसुन्दर्या गायत्र्यादिपदवाच्ययाऽज्ञातनामजातिगोत्रया वाऽथ चामरत्वाद् यस्या नामकथनेऽप्यस्माकं लज्जा भवति तया सुतया सह सुखेन क्रीडतु। तथा यूयं स्वयमात्मना दिव्याः स्वर्गभवा रम्भादीः स्त्रीः अहल्यामुख्या वा रमणीर्दीव्यत स्वेच्छया ताभिः सह सुरतक्रीडां कुरुत। प्रजापतिः स्वां दुहितरमभ्यधावदिति श्रुत्वा ब्रह्मणः स्वाच्छन्द्याद्भवतां सुतरां स्वाच्छन्द्यमिति स्वयमित्यनेनोक्तम्। कलिस्तु पुनर्ब्रह्मचर्याख्यं व्रतं यावज्जीवं चरतु वाऽथवा जीवन् कलिरस्मानुपहसिष्यतीति अनेन न जीवितव्यमिति वो युष्माकमतिप्रियाय नितरां तुष्टये प्रैतु म्रियतां। स्वयं सर्व्वैः स्वेच्छाचारः क्रियते मया तु स्वेच्छाचारो न कर्त्तव्यो मर्त्तव्यमेवेति कीदृशोयं भवतां परप्रद्वेषरीतिरिति सोऽकरोदुपहासः। अथ च यूयं ब्रह्मादयः सर्व्वेऽपि स्वेच्छाचारिणः स्वाच्छन्द्यं कुरुत नाम कलिस्तु न तादृगिति ब्रह्मैव चरतु युष्माकमप्यतिप्रियाय भैमीलक्षणाय वस्तुने चियतां। भवद्वत्स्वेच्छाचारं न करोमि किन्तु भैमीप्राप्तये प्रयत्नश्च मम मरणञ्चेत् स्यात्तदप्यस्त्विति भावः। अत्राप्युपहास एव तात्पर्य्यं क्रीडा चेति। दिवः कर्म चेति (पा० १।४।४३) करणस्यापि कर्म्मत्वात् स्त्रीभिरित्यर्थे स्त्रीरिति द्वितीया॥१२२॥

चर्य्यैव कतमेयं व परस्मै धर्म्मदेशिनाम् ।
स्वयं तत कुर्व्वतां सर्व्वं श्रोतुं यद्विभित श्रुती ॥ १२३ ॥
तत्र स्वयम्वरेऽलम्भि भुव श्रीर्नैषधेन सा ।
जगतो ह्रीस्तु युष्माभिर्लाभस्तुल्याभ एव व ॥ १२४ ॥

उपहासमेव प्रकटयति । चर्य्येति । हे देवा परस्मै अन्यस्मै जनाय स्वसुतादिगमन न कार्य्यमिति धर्म्मदेशिना धर्म्ममुपदिशता स्वय तद्ब्रह्महत्यास्वसुतादिगमन सर्व्वं निषिद्ध कर्म्म कुर्व्वता वो युष्माकमिय कतमैव कैव चर्य्या आचाररीतिरपि तु न कापीत्याक्षेप । अचेतने अपि श्रुती कर्णौ यद्भवदीयमन्यादिगमन कर्म्म श्रोतु विभित त्रस्यत । स्वेच्छाचारिणां भवता परपीडायामेव तात्पर्य्यमिति भाव । चर्य्या । गदमदेति (पा० ३।१।१००) भावे यत् ॥ १२३ ॥

तत्रेति । तत्र स्वयम्वरे नैषधेन भुव श्री सौन्दर्य्याढ्यलक्ष्मी· सा भैमी अलम्भि प्राप्ता । युष्माभिस्तु पुनर्जगतो ह्रीस्त्रैलोक्ये यावती वर्त्तते सा लज्जा जगत सकाशाद्वा, भैम्याऽनादृतत्वात् या लज्जा सा लब्धेति वो नलस्य युष्माकञ्च लाभोऽपूर्व्ववस्तुप्राप्तिस्तुल्याभ एवाभासते । तुल्याभ एव । धकारहकारमात्र वैरूप्य, इतरत्तुल्यमेव। भवद्भिर्लज्जैव लब्धा न तु भैमीति रूपस्य दर्पो वृथैवेति भाव । अयञ्च यूयञ्च यूय तेषा व एकशेष. ॥ १२४ ॥

दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्त्रवक्रणा।
लज्जयैवासमर्थानां मुखमस्माकमीक्षितुम् ॥ १२५ ॥
स्थितं भवद्भिः पश्यद्भिः कथं भोस्तदसाम्प्रतम्।
निर्दग्धा दुर्विदग्धा किं सा दंशा न ज्वलत्क्रुधा ॥१२६॥

दूरादिति। आगच्छतो नोऽस्मान् दूराद् दूरत एव प्रेक्ष्य यौष्माकी इयं वक्त्रवक्रणा मुखकौटिल्यकरणं युक्तैव। किम्भूतानां। गुणीभूतस्य विग्रहान्तर्गतस्य युष्मच्छब्दस्य विशेषणं। यतो भैम्यहृतत्वात् सञ्जातलज्जयैव हेतुना ऽस्माकं मुखमीक्षितुमसमर्थानां। लज्जाशीलो ह्यन्यं दूरादेव दृष्ट्वा लज्जया मुखं न दर्शयति सलज्जा भवन्त इति युक्तमेवैतदिति भावः। अयमप्युपहासः। लज्जयैवेति पाठे उत्प्रेक्षा। प्रेक्ष्येति वक्रणापेक्षया समानकर्तृत्वं दूरादेव दृष्ट्वा। यौष्माकीति, तस्येदमिति (पा० ४।३। १२०) अणि, तस्मिन्नणि चेति (पा० ४।३।२) युष्माकादेशः। युष्माकमिति पाठः साधुः। एवमस्माकमित्यत्रापि द्रष्टव्यं। वक्रणेति नामधातोर्युच् ॥ १२५ ॥

स्थितमिति। भो देवाः तन्नलवरणं पश्यद्भिर्भवद्भिः कथं स्थितं औदासीन्येनेति शेषः। असाम्प्रतमनुचितमेतदित्यर्थः। दुर्विदग्धा भवदवज्ञानादचतुरा सा भैमी ज्वलन्ती देदीप्यमाना क्रुत् क्रोधो यस्याः तया दृशा सत्या किमर्थं न निर्दग्धा सुतरां न भस्मसात्कृता, अपि तु तादृगसामर्थ्यसद्भावे तस्यास्य सापराधत्वे दग्धुमुचितं, तदपि न कृतमित्येतदप्यनुचितमेवेत्यर्थः।

महावंशाननादृत्य महान्तमभिलाषुका।
स्वीचकार कथंकारमहो सा तरलं नलम्॥ १२७॥
भवादृशैर्दिशामीशैर्मृग्यमाणां मृगेक्षणाम्।
स्वीकुर्व्वाणः कथं सोढः कृतरीढस्तृणं नलः॥ १२८॥

युक्ते द्वे साम्प्रतं स्थाने इत्यमरः। भोरिति प्रत्येकं सम्बुद्धिः॥ १२६॥

महेति। कुलशीलादिना महान्तमुत्कृष्टं नलं अभिलाषुका सा भैमी कश्यपसुतत्वान्महावंशान् दिव्यवस्त्रादिभूषणान् युष्मान् परित्यज्य तरलं चञ्चलस्वभावं अनिश्चितबुद्धिं नलं कथंकारं कथमिव स्वीचकार अहो आश्चर्य्यं। महान्तं कामयमानाया देवपरित्यागेन मनुष्यवरणान्महच्चित्रमित्यर्थः। अथ च या महापरिमाणं वाञ्छति सा विशालान् दृढान् वेणून् परित्यज्य तरङ्गसम्पर्कमात्रेणापि चञ्चलं ह्रस्वञ्च नलाख्यं तृणमङ्गीकरोतीति चित्रमेव। अत एव सा किं न भवद्भिर्दग्धेति भावः। अभिलाषुका। लषपत० (पा०३।२।१५४) इत्युकञ्। महान्तं इति, नलोकेति (पा०२।३।६८)। षष्ठीनिषेधाद् द्वितीया। कथंकारं पूर्व्ववत्॥ १२७॥

इदानीं नलः कथं सोढ इत्याह। भवादृशैरिति। भो देवा दिशामीशैर्महासमृद्धिभिर्भवादृशैर्मृग्यमाणां काम्यमानां मृगेक्षणां भैमीं स्वीकुर्व्वाणः समुद्वहन् अत एव भवतु कृतरीढः कृतावज्ञः तृणतुल्योऽतिनिःसारः, अथ च नलशब्दवाच्यत्वात्

दारुणः कूटमाश्रित्य शिखी साक्षी भवन्नपि।
नावदत् किं तदुद्वाहे कूटसाक्षिक्रियामयम्॥ १२९॥
अहो महःसहायानां सम्भूता भवतामपि।
समैवास्मै कलङ्काय देवस्यैवास्तदद्युतेः॥ १३०॥

स्तुणभूतः स नलो भवद्भिः कथं केन प्रकारेण सोढः क्षान्तः। सा भवद्भिरभिलषिता तया तु भवन्तो नादृता इत्युपहासः। स्तृणेचर्णौ। न लोकेति (पा०२।३।६९) षष्ठीनिषेधाद्द्वितीया। सोढः। तीषसहेति (पा०७।२।४८) इड्विकल्पात्, यस्य विभाषेति (पा०७।२।१५) निष्ठायां नेट्॥ १२८॥

दारुण इति। अयं शिखी वह्निर्दारुणः कूटं काष्ठराशिं आश्रित्याग्निसाक्षिके विवाहे साक्षी भवन्नपि साक्षाद्द्रष्टा भवन्नपि तत्र प्रकाशमानोऽपि तयोर्भैमीनलयोस्तस्य तस्या वा उद्वाहे विवाहे विषये कूटसाक्षिणोऽलीकसाक्षिणः क्रियां सत्यापलापलक्षणां किन्नावदत्, अपि त्वेतदप्यनुचितं कृतं। कूटसाक्षी हि परकीयं वस्त्वन्यस्मै दापयति। तदनेन सायसस्त्र न स्थितमित्यग्निसाक्षिको विवाह एव न भवतीति भैमी नलेन नोढेति भैमी नलादन्यस्मै भवत्स्वेव मध्ये कस्मैचित् किमिति न दापितेत्यर्थः। अथ च दारुणः पापकारित्वादतिक्रूरः पुरुषः कपटमाश्रित्य व्यवहारे साक्षी भवन्नपि तत्र चित्ते धृतस्य कार्यस्योद्वाहे कूटसाक्षित्वं धत्ते अत्र तु नेत्याशयः॥ १२९॥

अहो इति। हे देवा महःसहायानां तेजस्विनां दिव्यमू-

सा वव्रे यं तमुत्सृज्य मह्यमीर्ष्याजुषः स्थ किम् ।
ब्रूतागःसद्म नस्तस्माच्छद्मनाद्याच्छिनद्मि ताम् ॥ १३१ ॥

र्त्तीनां भवतामपि क्षमैवास्मै कलङ्काय, इन्द्रादिषु सत्स्वपि भैमी नलं वृतवतीति अपयशसे, अथ च नलकृतानादररूपाय, अथ च लज्जावशादन्यवनवीक्षणाशक्तिमुखमालिन्यरूपाय कलङ्काय सम्भूता । अहो महदाश्चर्यं । गुणभूतापि क्षमा दोषाय जातेत्यर्थः । महःमहायस्य तेजस्विनो देवस्य दीप्यमानस्याद्भुतद्युतेश्चन्द्रस्येव । यथा चन्द्रस्य क्षमा भूमिः कलङ्काय जाता भवतामपीत्यपिशब्देन यच्च कलङ्कशङ्कापि नाप्नोति सूचितम् । भूश्चन्द्रे कलङ्क इति ज्योतिर्विदः । महःमहायानामपीति वा चन्द्रस्य यथा तथा भवतामपीति समुच्चयार्थो वा । क्षमां परित्यज्य भवद्भिरन्यतरस्य चेद् दण्डो नाकरिष्यत् तर्ह्ययशो नाभविष्यदिति भावः ॥ १३० ॥

सेति । हे देवाः सा भैमी यं वव्रे तं नलं उत्सृज्य यूयं स्थ मह्यं कलये किमिति ईर्ष्याजुषः अक्षान्तिपराः स्थ भवथ अपराधिनस्तस्यापकर्त्तुमशक्ताः सन्तोऽनपराधाय मह्यं किमिति ईर्ष्यायुक्ताः स्थेत्युपहासः । तस्माद्यूयं ब्रूत कथयत । अहं तस्मान्नलात् सकाशाच्छद्मना कपटेन कथमपि वञ्चयित्वा अद्यैव तामाच्छिनद्मि आहरामि । यत आगसो भवदनादररूपापराधस्य सद्माश्रयभूतस्तस्मात् । अविलम्बेनैव तामाहरामि गच्छेति मामनुमन्यध्वमित्यर्थः । अन्येनापराधे कृतेऽन्यस्मै क्रुध्यत इति युक्तमिति लोकनीत्युपहासः । ब्रूत नो युष्माकमस्माकञ्चा-

यतध्वं सहकर्त्तुं मां पाञ्चाली पाण्डवैरिव।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम्॥ १३२॥
अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम्।
चक्रे गिरा शराघातं भारती सारतीव्रया॥ १३३॥

गःमह्यं अनादरकरणात् अपराधिनीं तां नलादानयामीति वा। मह्यं। क्रुधद्रुहेति (पा०१।४।३७) चतुर्थी। आच्छिनद्मि। वर्त्तमानसामीप्ये लट्॥ १३१॥

यतध्वमिति। यूयं मां सहकर्त्तुं सहकारिणं कर्त्तुं यतध्वं यत्नं कुरुत। भैमीमानेतुमहं गच्छामि यूयं मम सहायार्थमागच्छतेत्यर्थः। तव साहाय्येऽस्माकं किं फलमित्यत आह। अस्माभिरिन्द्राग्नियमवरुणैर्मया सह पञ्चभिः सा भैम्यपि संविभज्य भोगकालं समानभागमेव कृत्वैवोपभुज्यतां। तथा च भवतामपि फलमस्तीति भावः।कैः केव।पञ्चभिः पाण्डवैः पाञ्चाली द्रौपदीव। पाञ्चालीदृष्टान्तेनैकस्याः पतिव्रताया बहुभिरुपभोगेन दृष्टचरा इत्यलौकिकत्वं परिहृतं। पाण्डवानामग्रभावित्वात् तदानीं दृष्टान्तत्वेन कलेर्योगित्वात् भविष्यदर्थज्ञानसामर्थ्यादचनं युक्तम्। जगत्प्रवाहानादितया पाण्डवपाञ्चालीदृष्टान्तानामतीतत्वात्तदुदाहरणीकृत्यैतदुक्तमिति।पाञ्चाली। जनपदवाचिनः क्षत्रियस्याभिधायिनः पञ्चालशब्दः, जनपदशब्दात्क्षत्रियादिति (पा०४।१।१६८) अपत्येऽञ्॥ १३२॥

अथेति। अथ पूर्वोक्तकलिवचनाकर्णनानन्तरं तामुक्त-

कीर्त्तिं भैमीं वरांश्चास्मै दातुमेवागमन्नमी ।
न लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी ॥ १३४ ॥

कारां मुखरस्यानुचितभाषणशीलस्य कलेर्मूर्खतां सोढुं चन्तुमपरिहढाऽसमर्था भारती सरस्वती अर्थगाम्भीर्य्यात् सारया श्रेष्ठया परुषत्वाच्च तीव्रया दुःसहया गिरा कलेः शराघातं वाणव्यथामिव चक्रे वाणवत् पीडाकरं परुषं वचनमूच इत्यर्थः । भारतीव्रयेति पाठे अर्थगाम्भीर्य्येण दुःसहया ॥ १३३ ॥

कीर्त्तिमिति । हे कले अमी देवा अस्मै नलाय भैमीं दातुमेव, तथा भैमीं कामयमानोऽपि इन्द्राद्यर्थं भैम्या एव दूत्यं कृतवानेवंविधोऽतिधीरः कोऽपि नास्तीति कीर्त्तिं यशः, तथा भैमीञ्च प्रत्यक्षलक्ष्मीं, तथोक्तप्रकारान् वरांश्चास्मै नलाय दातुमेवागमन् स्वयम्वरङ्कृतवन्तो न तु भैमीं वरीतुमिति त्वं नो वेत्सीत्यर्थः । देवा हि केनापि प्रकारेण परीक्ष्य परितुष्टाः सन्तो वरं ददते । कुतोऽहं न वेद्मीत्यत आह । यस्मादगम्भीरस्य तलस्पर्शस्य गाहिनी स्पर्शिनी गम्भीरार्थग्राहिणी न भवतीत्यर्थः, एवम्भूता मूढानां बुद्धिर्धीराणां महाशयानां वैदग्धीं चातुरीं न लीढे न वेत्तीत्यर्थः । त्वं तु मूर्खत्वादेतेषां अभिप्रायमज्ञात्वोपहसितवानिति भावः । अधीरेत्यकारप्रश्लेषेण सम्बोध्य, अगम्भीरगाहिनी ते धीर्वैदग्धीमर्थादेतेषां न लीढ इति वा । हे अधीर्बुद्धिरहित मन्दबुद्धे कले अगम्भीरगाहिनी ते धीरवैदग्धीमचातुर्य्यं नास्वादयत्यपि तु प्राप्नोत्येवेति काका वा

वाग्मिनीं जडजिह्वस्तां प्रतिवक्तुमशक्तिमान्।
लीलावहेलितां कृत्वा देवानेवावदत् कलिः ॥ १३५ ॥
प्रोञ्छि वाञ्छितमस्माभिरपि तां प्रति सम्प्रति।
तस्मिन्नले न लेशोऽपि कारुण्यस्यास्ति नः पुनः ॥ १३६ ॥
वृत्ते कर्म्मणि कुर्म्मः किं तदा नाभूम तत्र यत्।
कालोचितमिदानीं नः शृणुतालोचितं सुराः ॥ १३७ ॥

व्याख्येयं। लीढे। लिहेः स्वरितत्वात्तङ्। क्वचिल्लेढीति पाठः ॥ १३४ ॥

वाग्मिनीमिति। कलिः वाग्मिनीं वाचो युक्तिपरम्पराचतुरां तां देवीं प्रतिवक्तुं प्रत्युत्तरं दातुं अशक्तिमान् असमर्थो यतः प्रत्युत्तरास्फुरणे जडजिह्वः कुण्ठितवदनशक्तिः अत एव तां लीलया विलासव्याजेनावहेलितां कृत्वाऽप्रियं तां प्रति वक्तुमयुक्तमित्येवंप्रकारं परिहास्य देवानेवावदत् ॥ १३५ ॥

प्रोञ्छीति। हे देवाः सम्प्रति अस्माभिरपि तां भैमीं प्रति वाञ्छितं अभिलाषः प्रोञ्छि परिमार्जितः त्यक्तमित्यर्थः। नोऽस्माकं पुनः कारुण्यस्य लेशोऽपि तस्मिन्नले नास्ति नलमपकर्त्तुमद्यत्तामह इत्यर्थः। प्रोञ्छि। उञ्छेर्वर्जनार्थात् कर्मणि चिण् ॥ १३६ ॥

वृत्त इति। हे देवाः स्वयम्वरलक्षणे कर्मणि वृत्ते जाते सति किं कार्यं कुर्मोऽपि तु किञ्चिदिदानीं कर्त्तुं न शक्यं। यदा नाभूम तत्र तदाभवः परदारत्वाद्गतशोको न

प्रतिज्ञेयं नले विज्ञाः कलेर्विज्ञायतां मम।
तेन भैमीञ्च भूमिञ्च त्याजयामि जयामि तम्॥ १३८॥
नैषधेन विरोधं मे चण्डतामपिडतौजसः।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत्॥ १३९॥

कर्त्तव्य इति च। तस्मात्तां प्रति वाञ्छितं त्यक्तमित्यर्थः। यद् यस्मात्तदा स्वयम्वरसमये वयं तत्र नाभूम स्थिताः। तदानीं चेत्तत्र भविष्यामस्तर्हि तथैवाकरिष्यामस्तन्नाभूदित्यर्थः। हे देवा यूयं इदानीं पुनर्भैम्या नले हृते सत्यपि कालोचितं समयोचितं नोऽस्माकमालोचितं विचारं शृणुत आकर्णयत। नले क्षपालेशोऽपि नास्ति इति मयोक्तं तत्प्रकारमाकर्णयतेत्यर्थः। नः। अस्मदोर्द्वयोश्चेति (पा० १।२।५८) बहुत्वं। आलोचितं भावे क्तः॥ १२७॥

तदेवाह। प्रतिज्ञेति। हे विज्ञाः कलेर्ममेयं प्रतिज्ञा नले विषये विज्ञायतां भवद्भिरिति शेषः। इयमिति किं। अहं तेन नलेन प्रयोज्येन भैमीञ्च भूमिञ्च त्याजयामि यौगं मोचयामि अत एव तं जयामि इति प्रतिज्ञा मम चैत्तस्थेवं वर्त्तत इति भवद्भिर्ज्ञायत एव तथापि स्पष्टं मया कथ्यते, तदाकर्ण्यतामित्यर्थः। कलेर्ममेत्यहङ्कारः सूचितः। तेन। अनुक्ते कर्त्तरि तृतीया। त्याजयामि जयामीति वर्त्तमानसामीप्ये भविष्यति लट्॥ १२८॥

नैषधेनेति। चण्डतया भूभैमीपरित्याजनद्वाराऽतिपीडा-

द्वापरः साधुकारेण तद्विकारमदीदिपत्।
प्रणीय श्रवणे पाणिमवोचन्नमुचे रिपुः ॥ १४० ॥

कारिलान्निर्दयत्वेन मण्डितौजसोऽलङ्कृततेजसो मे मम नैषधेन सह विरोधं जगतीत्रयेऽपि लोका गायन्तु कीर्त्तयन्तु। कस्य किमिव। चण्डतामण्डितौजसो रवेः सूर्य्यस्य कैरवैः कुमुदैः सह वैरवत् विरोधमिव। हन्त खेदे। अयोग्येन हीनतेजसा नलेन सह विरोधारम्भात् त्रैलोक्ये यद्यप्यपयशो भविष्यति तथापि किं कुर्म इति रे वद। अपयशःसमुदयेऽपि सूर्य्येण कैरववैरवत् मयापि नलवैरं करिष्यत एवेति भावः। एतेन दर्पः सूचितः ॥ १३९ ॥

द्वापर इति। द्वापरस्तृतीययुगरूपः सहचरः तस्य कलेर्विकारं नलेन सह विरोधरूपं साधुकारेण साध्विति शब्दोच्चारणेन अदीदिपत्, साधूचितमेव त्वया विचारितमित्युद्दीपयामास, तस्य प्रोत्साहनं चकारेत्यर्थः। अथ नमुचेर्दैत्यस्य रिपुरिन्द्रो युष्माभिः साहाय्यं कर्त्तव्यमिति कलिनोक्तस्य वचस उत्तरत्वेनैतद्व्यापारमध्येऽस्माभिर्न स्थीयत इति लौकिकाभिनयव्यञ्जनवशाच्छ्रवणे पाणिं प्रणीय यत् त्वया विचारितं तदस्माभिः श्रोतुमप्यनर्हमिति वा पाणिभ्यां कर्णौ पिधाय कमिमवोचत्। अदीदिपत्। दीपेर्ण्यन्ताच्चिङि, भ्राजभासभाषदीप (पा० ७।४।३) इत्यादिनोपधाह्रस्वविकल्पः ॥ १४० ॥

विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे।
यद्दत्तेऽल्पमनल्पाय तद्दत्ते ह्रियमात्मने॥ १४१॥

विस्मेयेति। हे कले त्वं विस्मेयाश्चर्यहेतुर्मतिर्यस्यैवंविधोऽसि यस्मात्त्वमस्मासु वर्त्तमानं वैलक्ष्यं सलज्जत्वं साधु सम्यक्प्रकारेण ईक्षसे जानासि। पराशयवेदितया तव तीक्ष्णबुद्धित्वादयं विस्मिताः स्म इत्युपहासः। साधूचितं यद्वैलक्ष्यं तदस्मादीक्षस इति वा। कथं भवतु वैलक्ष्यमुचितमित्याशङ्क्य समर्थयति। पुरुषो ऽनल्पाय महते पुरुषायाल्पं अतितुच्छं वस्तु दत्ते इति यत् स पुरुषस्तदल्पवस्तुदानं कर्म आत्मने स्वस्मै ह्रियमेव दत्ते। महते यत् अल्पं दीयते तदल्पदानमेव कर्तृ दात्रे पुरुषाय लज्जामेव दत्ते। तेन तस्य लज्जैव भवतीत्यर्थ इति वा। तथा च महते नलाय अस्माभिरल्पमेव दत्तमिति विषादादस्मासु लज्जा युक्तैवेति भावः। अतितरां नलमाहात्म्यं सूचितं। एतेन दूरात्मः प्रेच्छेति तस्योत्तरं। यद्यदि तत्तद्दत्तेति वा योज्यं। यद्वा अनल्पाय न विद्यतेऽन्यो यस्मादिति हीनायेत्यर्थः। यदस्मादादिरन्यं कस्कोऽयं धर्ममर्माणि कृन्ततीत्याद्युपालम्भवचनं दत्ते करोति तत् स्वस्मै ह्रियमेव दत्ते। अधमस्य महीपालस्यायोग्यस्य तवाल्प एवोपालम्भः कृत इति विषादादस्माकं वैलक्ष्यं युक्तमेवेति व्याख्येयम्। अधमायाल्पमपि उपालम्भादि यद्दत्ते तत् स्वस्मै ह्रियं दत्ते। अधमेन सह सम्भाषणनिषेधात् तस्योपालम्भोऽपि न कार्यः स त्वस्माभिः कृतः। तथा च पापरूपेण भवता

फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति।
नलस्यास्मदुपज्ञा सा भक्तिर्भूतावकेशिनी॥ १४२॥

सह सम्भाषणमस्माभिरनुचितं कृतमिति विषादादस्मासु वैलक्ष्यं युक्तमेवेति वा। इयमपि वक्रोक्तिः॥ १४१॥

इदानीमात्मनलमहत्त्वप्रकटनपूर्वं वैलक्षण्यौचितीं समर्थयते। फलेति। यस्या नलभक्तेः शतांशोऽपि शततमो भागः फलस्य सीमां मर्यादीभूतां निरतिशयफलरूपं चतुर्वर्गं धर्मार्थकाममोक्षरूपं यच्छति नलाय दातुं शक्नोति सास्मदुपज्ञाऽस्मदाश्रयास्मदियया नलस्य भक्तिरवकेशिनी फलभूता जाता। यस्या भक्तेः शततमेनांशेन वशीकृतैरस्माभिः सन्तुष्य फलरूपत्वेन चतुर्वर्गोऽपि नलाय दातुं शक्यते तस्या निरतिशयायाः परिपूर्णायाश्चतुर्वर्गादधिकतमस्य फलस्याभावादस्माकं दातुमसामर्थ्यात् सा निष्फलैव जातेत्यर्थः। निरतिशयभक्तेर्युक्तत्वान्महते नलाय चतुर्वर्गोऽप्यल्पतरफलत्वाद्दातुमयुक्तः। तादृशाय भैमीलक्षणाल्पतमफलदाने कृतेऽस्माकं लज्जा युक्तैवेति भावः। यच्छततमांशवशीकृतैरस्माभिर्दत्तसामर्थ्यो नलोऽप्यन्यस्मै जनाय फलावधि चतुर्वर्गं दातुं शक्नोतीति यावत् सा भक्तिरपूर्णा निष्फला जातेति वा व्याख्येयम्। सोऽपीति पाठे चतुर्वर्गं ददतामस्माकं स नलोऽपि क्रियमाणकर्मफलमर्यादां सद्यार्पणं ददाति। तथाः पुनः प्रत्यर्पणात् अस्माकश सास्येव। किन्तु नलस्यास्मदियया निरतिशया कर्मामात्रस्यापि अस्मासु वार्पणात्

भव्यो न व्यवसायस्ते नले साधुमतौ कले।
लोकपालविशालोऽसौ निषधानां सुधाकरः॥ १४३॥
न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाम्हति।
निश्चिताखिलधर्मो च द्वापरस्योदयं वयम्॥ १४४॥

फलाभिसन्धानरहिता भक्तिर्वन्ध्या जाता। तादृशम् भक्ति-फलदानेऽस्माकमसामर्थ्यात् तथा च वैलक्षण्यं युक्तमेवेति व्याख्येयम्। यच्छर्ता। सम्बन्धे षष्ठी। शतश्चासावंशश्चेति विग्रह्य लक्षणया शततमोऽंश इति। उपघ्ना आश्रय इति साधुः॥ १४२॥

नलो वैरार्हो न भवतीत्याह। भव्य इति। हे कले रागद्वेषादिराहित्येन साध्वी निर्मला मतिर्यस्य तस्मिन्नले विषये ते व्यवसायो वैरकरणोद्यमो भव्यः शुभोदर्को न। किञ्च निषधदेशानामाह्लादकत्वात् सुधाकरश्चन्द्रोऽयं नलः, लोकपाला दिक्पालास्तदविशेषेण शालते शोभते स्वाभाविकेन शौर्यादिना तदंशत्वाद्वा लोकपालवन्महाशयः। अतस्तेन सह वैरं तव शुभोदर्कं न भवतीति न तत् कार्यमित्यर्थः। मते इति पाठे, असाध्वी मतिर्यस्येति अकारप्रश्लेषेण कलेर्विशेषणं। मतः कलेरिति पाठे असाधोर्द्वापरादेरनुमत इति व्यवसायविशेषणम्॥ १४३॥

एतदेव स्फुटयति। नेति। वयं तस्मिन् क्षमाम्हति राज्ञि नले कलेस्तुर्य्ययुगस्य तवावकाशं प्रवेशावसरं न पश्यामः सम्भावयामः। तथा भवन्निवचस्य द्वापरस्य च उदयं नलपराभवसामर्थ्यं न

फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनी॥ १४२॥

सद्य समापणमस्माभिरनुचितं कृतमिति विषादादस्मासु वैलक्ष्यं युक्तमेवेति वा। इयमपि वक्रोक्तिः॥ १४१॥

दानात्मत्वनलमहत्त्वप्रकटनपूर्वं वैलक्षण्यस्यौचित्यं समर्थयते। फलेति। यस्या नलभक्तेः शतांशोऽपि शततमो भागः फलस्य सीमां मर्यादीभूतां निरतिशयफलरूपं चतुर्वर्गं धर्मार्थकाममोक्षरूपं यच्छति नलाय दातुं शक्नोति साऽस्मदुपघ्नाऽस्मदाश्रयास्मद्विषया नलस्य भक्तिरवकेशिनी फलभूता जाता। यस्या भक्तेः शततमेनांशेन वशीकृतैरस्माभिः सन्तुष्य फलरूपत्वेन चतुर्वर्गोऽपि नलाय दातुं शक्यते तस्या निरतिशयायाः परिपूर्णायाश्चतुर्वर्गादधिकतमस्य फलस्याभावादस्माकं दातुमसामर्थ्यात् सा निष्फलैव जातेत्यर्थः। निरतिशयभक्तेर्युक्तत्वान्महते नलाय चतुर्वर्गोऽप्यल्पतरफलत्वाद्दातुमयुक्तः। तादृशाय भैमीस्वयणात्पतमफलदाने कृतेऽस्माकं लज्जा युक्तैवेति भावः। यच्छततमांशवशीकृतैरस्माभिर्दत्तसामर्थ्यो नलोऽप्यन्यस्मै जनाय फलावधि चतुर्वर्गं दातुं शक्नोतीति यावत् सा भक्तिरपूर्णा निष्फला जातेति वा व्याख्येयम्। सोऽपीति पाठे चतुर्वर्गं ददतामस्माकं स नलोऽपि क्रियमाणकर्मफलमर्यादां अस्मार्पणं ददाति। तथाः पुनः प्रत्यर्पणात् अगाकस्य साम्यमेव। किन्तु मम्बन्धात्मद्विषया निरतिशया कर्मणामस्यापि अस्मभ्यं सार्पणात्

भव्यो न व्यवसायस्ते नले साधुमतौ कले।
लोकपालविशालोऽसौ निषधानां सुधाकरः॥ १४३॥
न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति।
निचिताखिलधर्मे च द्वापरस्योदयं वयम्॥ १४४॥

फलाभिसन्धानरहिता भक्तिर्वन्ध्या जाता। तादृशम् भक्तिफलदानेऽस्माकमसामर्थ्यात् तथा च वैलक्षण्यं युक्तमेवेति व्याख्येयम्। यच्छतां। सम्बन्धे षष्ठी। शतशाखावंशस्येति विगृह्य लक्षणया शततमोंऽश इति। उपधा आश्रय इति साधुः॥१४२॥

नलो वैरार्हो न भवतीत्याह। भव्य इति। हे कले रागद्वेषादिराहित्येन साध्वी निर्मला मतिर्यस्य तस्मिन्नले विषये ते व्यवसायो वैरकरणोद्यमो भव्यः शुभोदर्को न। किञ्च निषधदेशानामाह्लादकत्वात् सुधाकरश्चन्द्रोऽयं नलः, लोकपाला दिक्पालास्तद्वद्विशेषेण शालते शोभते स्वाभाविकेन शौर्यादिना तदंशत्वाद्वा लोकपालवन्महाशयः। अतस्तेन सह वैरं तव शुभोदर्कं न भवतीति न तत् कार्य्यमित्यर्थः। मते इति पाठे, असाध्वी मतिर्यस्येति अकारप्रश्लेषेण कलेर्विशेषणं। मतः कलेरिति पाठे असाधोर्द्वापरादेरनुमत इति व्यवसायविशेषणम्॥ १४३॥

एतदेव स्फुटयति। नेति। वयं तस्मिन् क्षमाभृति राज्ञि नले कलेस्तुर्य्ययुगस्य तवावकाशं प्रवेशावसरं न पश्यामः सम्भावयामः। तथा सर्वनिचयस्य द्वापरस्य च उदयं नलपराभवसामर्थ्यं न

सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो।
कथं भवद्विधैर्बाध्या प्रमितिर्विभ्रमैरिव ॥ १४५ ॥

सम्भावयामः यतो नितरां चिता अर्जिता अखिला धर्मा येन श्रौतस्मार्त्तधर्मानुष्ठानरीतिरूभयत्र हेतुः। तस्य धर्ममयत्वाद्भयोः पापरूपत्वात्तत्रावकाशलेशोऽपि न सम्भाव्यत इत्यर्थः। यद्यपि देवा नलपराभवस्य भविष्यत्तां जानन्ति तथाप्युत्साहभङ्गद्वारा कलिनिषेध एव तात्पर्य्यात् अवकाशं न पश्याम इत्यूचुः। यद्वा पश्याम इति वर्त्तमानसामीप्ये भविष्यति लट्प्रयोगात् प्रस्तुतोऽवकाशो नास्ति विलम्बेन भविष्यतीति सूचितमिति ज्ञेयम्। अथ च यथासङ्ख्येन तितिक्षाशीले पुरुषे कलहावकाशो न निश्चितः सकलधर्मरक्षके च सन्देहस्योदयः प्रभवतीति युक्तम् ॥ १४४ ॥

भैम्यपि न वाध्येत्याह। सेति। पातिव्रत्यादिधर्मनिष्ठत्वाद्विनीततमा सा भैमी व्यर्था निर्हेतुको वैराचरणलक्षणोऽनर्थस्तत्र ग्रहोऽभिनिवेशो येषां तैर्भवद्विधैः कथमिव वाध्या पीडयितव्याऽनुचितमेतत्। अहो कष्टम्। सम्बुद्धिर्वा आश्चर्य्ये वा। कैः केव। विशिष्टैर्भ्रमैर्विपर्य्ययज्ञानैर्विनीतं सुतरामपास्तं तमोऽज्ञानं यथैवभूता भ्रान्तिज्ञानविरोधिनी प्रमितिः सम्यगनुभूतिश्चाक्यिकरजतादिधीरिव। कथं वाध्येत्यर्थः। किम्भूतैर्विभ्रमैः। व्यर्था मिथ्याभूतोऽनर्थश्च शुक्तिरजतादेर्ग्रहो ज्ञानं येषां तैः। अविनीततमा सा इति पदच्छेदः। साः कोपे, नितरामविनीतचपला कस्मै इति वा ॥ १४५ ॥

तन्नासत्ययगं तां वा त्रेता स्पर्द्धितुमर्हति ।
एकप्रकाशधर्म्माणं न कलिद्वापरौ युवाम् ॥ १४६ ॥

तत्रेति । उक्तिविशेषेण षड्भिः श्लोकैः पुनरपि तौ न बाध्यावित्याह । तमिति । न असत्यं नासत्यं किन्तु सत्यमेव युगं सत्ययुगं कृतयुगमिति यावत् । तत् तं नलं तां भैमीं वा स्पर्द्धितुं तुलयितुं अर्हति तथा त्रेतायुगमपि स्पर्द्धितुमर्हति न तु जेतुमित्यर्थः । यथा सङ्ख्येन वा योज्यं । यस्मादेको मुख्यः स चासौ प्रकाशधर्म्मा च तं तां च प्रकाशः प्रसिद्धो धर्म्मो यस्य यस्याश्च । पश्चादेकशब्देन कर्म्मधारयः, लोकत्रयस्त्रीपुंसमध्ये तावेव धर्म्मप्रधानौ यतः तस्मात् सत्ययुगस्यापि चतुश्चरणधर्म्मत्वादेकप्रकाशधर्म्मत्वात् सत्ययुगं स्पर्द्धितुमर्हति, त्रेतायास्तु त्रिचरणधर्म्मत्वेऽपि कलिद्वापरापेक्षया धर्म्मबाहुल्यात् कृतयुगसाधर्म्यात् एकप्रकाशधर्म्मत्वसम्भवात् सापि स्पर्द्धितुमर्हतीत्यर्थः । कलिद्वापरौ युवां युगे पुनः तौ स्पर्द्धितुं नार्हथ, इति विभक्तिविपरिणामः कार्य्यः । तयोर्द्धर्म्मैकप्रधानत्वात्, युवयोश्चाधर्म्मबाहुल्यात्, युवां तोलयितुमसमर्थौ किं पुनर्जेतुमित्यर्थः । आ मामस्त्येन सत्यं यत्र तदासत्यं तच्च तद्युगं चतुश्चरणधर्म्मयुक्तं कृतयुगं तत्र त्रेतायुगं तौ स्पर्द्धितुं नार्हतः अपि त्वर्हत एवेति काकुः । उक्तादेव हेतोः नासत्ययुगं कृतयुगं तौ स्पर्द्धितुमर्हति । तत्रैव तयोः सत्त्वाद् धर्म्मप्रधानाच्च । त्रेतायुगञ्च नार्हति । त्रयाणामप्यधर्म्मसंस्पर्शात् । तत्र तयोरसत्त्वाच्चेति वा । कलिद्वापरयोः

सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो।
कथं भवद्विधैर्बाध्या प्रमितिर्विभ्रमैरिव ॥ १४५ ॥

सम्भावयामः यतो नितरां चिता अर्जिता अखिला धर्म्मा ये श्रौतस्मार्त्तधर्म्मानुष्ठानरीतिरूभयच हेतुः। तस्य धर्म्मयलात भयोः पापरूपत्वात्तत्रावकाशलेशोऽपि न सम्भाव्यत इत्यर्थं यद्यपि देवा नलपराभवस्य भविष्यत्तां जानन्ति तथापुत्रा भङ्गद्वारा कलिनिषेध एव तात्पर्य्यात् अवकाशं न पश्य इत्यूचुः। यद्वा पश्याम इति वर्त्तमानसामीप्ये भविष्यति इ प्रयोगात् प्रस्तुतोऽवकाशो नास्ति विलम्बेन भविष्यतीति दर्शितमिति ज्ञेयम्। अथ च यथासङ्ख्येन तितिचाशीले पुरुषे द्वावकाशो न निश्चितः सकलधर्म्मरहस्ये च सन्देहस्योदयः भवतीति युग्मम् ॥ १४४ ॥

भैम्यपि न वाध्येत्याह। सेति। ५ ति दि विनीततमा सा भैमी व्यर्थां निर्हेतुको वै ... सत्र यहोऽभिनिवेशो येषां तैर्भवद्विधैः कथमिव बाध्या चितव्याऽनुचितमेतत्। अहो कष्टम्। सम्मुद्रिवां । कैः केव। विशिष्टैर्भ्रमैर्विपर्य्ययज्ञानैर्विनीतं सुतरामपाकृत ऽज्ञानं यथैवभूता भ्रान्तिर्ज्ञानविरोधिनी प्रमितिः सम्यग् निश्चाच्चिपरजतादिधीरिव। कथं बाध्येत्यर्थः।। व्यर्थां निष्फलोऽनर्थस्य ग्रहोऽभिनिवेशो येषां ज्ञानं येषां विनीततमा स्या इति पदच्छेदः। स्याः कोपे, ... प्रथम ... इति मा ॥ १४५ ॥

करिष्येऽवश्यमित्युक्त्वा करिष्यन्नपि दुष्यसि।
दृष्टादृष्टा हि नायत्ताः कार्य्यौघा चेतवस्तव॥ १४७॥

करिष्य इति। हे कलेऽवश्यं निश्चितं करिष्येऽर्थान्नलपराभवं इत्युक्तिः प्रतिज्ञावचो यस्यैवम्भूतस्त्वं करिष्यन्नपि कर्त्तुकामोऽपि दुष्यसि दुष्टो भवसि। अपकारस्य भविष्यत्त्वादिदानीं साचात्कायव्यापाराभावेऽपि मनस्यपकारकरणवासनाया कृतत्वाद् वचनेन चानुवादाद्विविधबाधकसद्भावाद् ब्रह्महत्याया अकरणेऽपि ब्रह्महत्यां करिष्याम्यादावित्यर्थः। कुर्व्वाणो दुष्टो भविष्यसीति किं वाच्यमित्यपिशब्दार्थः। अथ वा कर्त्ता दुष्यसेव प्रतिज्ञाभङ्गादिति किं वाच्यमिति। कार्य्यसाधिका दृष्टादृष्टसामग्री तावत्त्वया सम्पादयितुमशक्या किन्तु सा तस्य तस्य तत्तत्कर्म्मवशात् स्वयमेव सम्पद्यत इत्यर्थान्तरन्यासः। तथा चैवं त्वया चित्ते धृतेऽनूदिते चेद्विविधपातकमेव भवति न तु तं पराभवितुं शक्नोषीति। यद्यपि तं पराभवितुं शक्ष्यसे तथापि नलाय दृष्टादृष्टसामग्र्येव तत्र प्रयोजिका न तु त्वमिति।

पुरुषत्वात् नलेन सह त्रेतायाश्च स्त्रीत्वात् भैम्या सह स्पर्द्धासम्भावनायां पार्थक्येन निषेधो युक्त इति वा । कृतयुगं त्वं स्पर्द्धितुं नार्हति । युवामपि नार्हथः । सत्ययुगेऽधर्मलेशसम्भावनापि सम्भवेन्न तु नले । तथा त्रेतायामपि न तु भैम्यां । तथा चाद्ययुगद्वयं ताभ्यां स्पर्द्धितुमपि न शक्यं, युवां पुनर्न शक्ताविति किं वाच्यमित्यर्थ इति वा । अथ च द्वयोर्युगं नलं स्पर्द्धितुमर्हति । गार्हपत्याहवनीयदक्षिणाग्नित्रयरूपा त्रेता च भैमीं स्पर्द्धितुमर्हति । यत एकः केवलः प्रकाश उज्ज्वलः प्रसिद्धो वा, धर्मस्वभावः सौन्दर्य्यादिगुणो वा, ययोर्भैमीनलयोः प्रकाशशोभालक्षणो धर्मो ययोरिति वा । अग्नित्रयपक्षेऽप्येकः केवलः प्रकाशस्तेज एव धर्मस्वभावो यस्या इति सौन्दर्य्याद्दीप्तत्वात् पावित्र्याच्च द्वययुगमग्नित्रयञ्च ताभ्यां तुल्यं भवितुमर्हतीत्यर्थः । कलिद्वापरौ युवां पुनर्न । असुन्दरत्वात् पापप्रधानत्वाच्चेत्यर्थः । अथ चैको विरुद्धधर्मरहितः प्रकाशो निश्चितश्च धर्मो यत्र तच्च ताश्च कलहसन्देहौ स्पर्द्धितुं नार्हतः । विरुद्धधर्मत्वे हि कलहसम्भवो विशेषधर्माप्रकाशे च सन्देहसम्भवः । तत्र लोकधर्मत्वात् प्रकाशमानधर्मत्वाच्च कलहसन्देहौ न सम्भवत इति युक्तमिति भावः । त्रेताग्नित्रितये युगे, प्रकाशस्य प्रसिद्धे स्यात्, सन्देहद्वापरौ चायेत्यमरः । प्रकाशधर्मशब्दयोः पूर्वं बहुव्रीहौ, धर्मादनिच् केवलात् (पा० ५।४।१२४) इति समासान्तः, पश्चात् पूर्ववत् समासः ॥ १४६ ॥

करिष्येऽवश्यमित्युक्त्वा करिष्यन्नपि दुष्यसि ।
दृष्टादृष्टा हि नायत्ताः कार्य्यौघा चेतवस्तव ॥ १४७ ॥

करिष्य इति । हे कलेऽवश्यं निश्चितं करिष्येऽर्थान्नलपराभवं इत्युक्तिः प्रतिज्ञावचो यस्यैवम्भूतस्त्वं करिष्यन्नपि कर्त्तुकामोऽपि दुष्यसि दुष्टो भवसि । अपकारस्य भविष्यत्त्वादिदानीं साक्षात्कायव्यापाराभावेऽपि मनस्यपकारकरणवामनाया हृतत्वात् वचनेन चानुवादादिविधबाधकसङ्गावात् ब्रह्महत्याया अकरणेऽपि ब्रह्महत्यां करिष्याम्यादाविवेत्यर्थः । कुर्व्वाणो दुष्यो भविष्यसीति किं वाच्यमित्यपिशब्दार्थः । अथ वा कर्त्ता दुष्यस्येव प्रतिज्ञाभङ्गादिति किं वाच्यमिति । कार्य्यसाधिका दृष्टादृष्टसामग्री तावत्तया सम्पादयितुमशक्या किन्तु सा तस्य तस्य तत्तत्कर्म्मवशात् स्वयमेव सम्पद्यत इत्यर्थान्तरन्यासः । तथा चैवं त्वया चित्ते धृतेऽनूदिते चेद्विविधपातकमेव भवति न तु तं पराभवितुं शक्नोषीति । यद्यपि तं पराभवितुं शक्ष्यसे तथापि नलाय दृष्टादृष्टसामग्र्येव तत्र प्रयोजिका न तु त्वमिति । मयैवं करिष्ये मयैवं कृतमित्यादिरूपां प्रतिज्ञां प्रति स्वमात्रस्य कारणत्वाभावाद् दृष्टादृष्टकारणवैगुण्येन प्रतिज्ञाभङ्गस्यापि शङ्कितत्वादिन्द्रोऽपि कर्त्तुमशक्तस्त्वं तु को नाम वराक इति च भावः । यद्वा दृष्टादृष्टरूपा हेतवः । दृष्टसामग्री यथा कथञ्चित् यद्यपि सम्पादयितुं शक्यते तथाप्यदृष्टसामग्री त्वया न शक्यते । तथा च नस्मिन यदि परमो धर्म्मः कृतस्तर्हि स त्वया

द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः।
तत् पापसम्भवन्तापमाप्नुयादनयात्ततः॥ १४८॥
युगशेष तव द्वेषस्तस्मिन्नेष न साम्प्रतं।
भविता न चिरायैतद्वैरं हे वैरसेनिना॥ १४९॥

पराभवितुमशक्यः। अथाधर्म्मः कृतस्तर्ह्यधर्म्मवशादेव तस्य तादृशी दशा भविष्यति त्वया किं क्रियते इत्युभयथापि दोषात्, मयैवं क्रियते, करिष्यते, कृतमित्यादिविकल्पना न कार्य्येति भावः। इत्युक्त्वेति पाठे अवश्यं वश्यं वा करिष्ये इत्युक्त्वाऽकारप्रश्लेषेणाकरिष्यन्नपि दुष्यसि। वाङ्मात्रेणापि पापसिद्धेः किं पुनः करिष्यन्निति। अन्यत् पूर्व्ववत्। कार्य्यायाः। तस्येदमित्यर्थः। तस्मै हितमित्यर्थे इति वा॥ १४७॥

द्रोहमिति। यः पुरुषो मोहेनाज्ञानेनापि तस्मिन् पुण्यश्लोके ऽनपकारिणि द्रोहमपकारमाचरेत् स पुरुषस्तस्मात् अनयादन्यायाद्धेतोरचिरेण तस्मात्तादृशापकरणजातात् पापात् सम्भवो यस्य तं पापं दुःखं आप्नुयात्, बुद्धिपूर्व्वकारी लभत इति किं वाच्यमित्यर्थः। नलद्रोहस्तस्मात् त्वया सर्व्वथा त्याज्य इति भावः। अनेन शापोऽपि दत्त इति ज्ञेयम्। मोहेनेत्यत्रार्थादपिशब्दो योज्यः। मोहस्तेन स्वामिन् अज्ञानाश्रय मूर्खतर इति वा सम्बोधनं॥ १४८॥

युगेति। हे युगानां सत्यादीनां शेष कले तस्मिन्नले तवैष द्वेषो न साम्प्रतमयुक्तः। यस्माद्वैरसेनिना नलेन सह एतत्

तत्र यामीत्यसज्ज्ञानं राजसं सद्विहास्यताम्।
इति तत्र गतो मा गाः राजसंसदि हास्यताम्॥ १५०॥
गत्वान्तरा नलं भैमीं नाकस्मात्त्वं प्रवेक्ष्यसि।
पश्चाच्चक्रमसंयुक्तं पच्यमानं डकारवत्॥ १५१॥

मारब्धं वैरं ते तुभ्यं हिताय न भविता शुभोदर्कं न भविष्यति। युगेषु शेष इति निर्द्धारणे सप्तमीसमासः। साम्प्रतमव्ययम्। हितयोगे तुभ्यमिति चतुर्थी॥ १४८॥

तत्रेति। हे कले तत्र नलसमीपे पराभवार्थं यामि गच्छामीति एवम्भूतं राजसं ज्ञानं रजोगुणसहितं विचारासद्दं अत एवासद्शोभनं सद्वर्त्तमानं इहास्मिन् काले देशे वास्यतां त्यज्यतां इति, सद्भद्रमिति वा, इति विचार्य्येति यावत्। इति किं। तत्र राजसंसदि तस्यां नलसभायां गतः सन् हास्यतां परिहासास्पदत्वं मा गाः। एवं विचार्य्य तत्र गतः सर्व्वैरुपहास्य एव भविष्यसि। न तु नलं पराभवितुं शक्ष्यसीत्येवंविधो विचारः परित्याज्य एवेत्यर्थः। असत्सदिति विरोधाभासः। तत्र यामीति ज्ञानमसत् अयुक्तं यतो राजसं। तर्हि किं कर्त्तव्यं तत्राह। इहास्मिन्नेव देशे आस्यतां स्थीयतां इत एव परावर्त्तनीयमित्यर्थः। इति अस्मदीयं ज्ञानं सद्भद्रमितीतिशब्दमाहृत्य व्याख्येयम्। विपक्षे बाधकमाह उत्तरार्द्धेन। तत्र स्वयम्बरे गतो राजसभायां स्वयम्बरे वृत्ते किमर्थमागत इति हास्यतामेव गमिष्यसि॥१५०॥

गत्वेति। हे कले निषधदेशान् गत्वा साम्प्रतं नलं भैमीमन्तरा

नलभैम्योर्मध्ये अकस्माच्छीघं दुरितलक्षणकारणमन्तरेण वा त्वं न प्रवेच्यसि प्रवेशं कर्त्तुं न शक्ष्यसि। नलस्य पुण्यश्लोकत्वाद्भैम्याश्च पातिव्रत्यादिधर्म्मयुक्तत्वात् तौ पराभवितुं न शक्नोपीत्यर्थः। क इव। असंयुक्तं पूर्व्वं पृथक्‌जातप्रकृतिप्रत्ययविभागः पश्चात् पच्यमानं संहितया प्रयोगार्हमुच्चार्य्यमाणमिति यावत्, एवम्भूतं पणाञ्चक्रं षणामिति शब्दरूपस्य वर्णवृन्दमन्तरा मध्ये ङकारवत् ङकारो वर्णो यथाऽकस्मादिविधिमन्तरेण न प्रविश-तीति साधर्म्योपमा। षट्‌शब्दात् षष्ठीबहुवचने, षट्‌चतुर्भ्यश्चेति (पा०७।१।५५) नुटि तत्संहिते आमि, स्वादिष्वसर्व्वनामस्थान इति (पा०१।४।१७) पूर्व्वपदस्य पदत्वात्, झलां जशोऽन्त इति (पा०८।२।३९) जश्त्वेन टकारस्य डकारे, न पदान्तादिति (पा०८।४।४२) निषेधस्य, अनाम्नवतीति (पा०८।४।४२स्व०१ वा०) निषेधात् ष्टुना ष्टुरिति (पा०८।४।४१) ष्टुत्वेन नामो न-कारस्य णकारादेशे, यरोऽनुनासिक इति(पा०८।४।४५)डका-रस्यापि अनुनासिकस्य व्यवस्थितविकल्पत्वादनुनासिकस्याव नि-त्यत्वेन णकारे जाते सर्व्वथापि न स्वेन रूपेण षणामिति पद-मध्ये ङकारो यथा प्रवेशं लभते तथा तयोर्मध्ये त्वमपीत्याशयः। अन्यथा विकल्पत्वात् पक्षे षड्‌नामिति स्यात्, तन्माभूदित्यत्र व्य-वस्थितविभाषाऽङ्गीकरणीया। षणाञ्चेत्यत्र चकारः पृथक्‌कृत्य भैमीं चेति योज्यः। तथा च क्रमेण पर्य्यायेण संयुक्तं षणामिति कर्म्मभूतशब्दरूपं अन्तरा ङकारो यथा न प्रविशति, असंयुक्ताव-स्थायां यद्यपि स्वेन रूपेणावस्थानं वर्त्तते तथापि संयुक्तावस्थायां

अपरेऽपि दिशामीशा वाचमेनां शचीपतेः।
अन्वमन्यन्त किन्त्वेनां नादृत्त युगयोर्युगं ॥१५२॥
कलिं प्रति कलिं देवा देवान् प्रत्येकशः कलिः।
सोपहासं समैर्वर्णैरित्थं व्यरचयन्मिथः॥ १५३॥

नास्तीत्यर्थ इति वा। पणामित्यत्र प्रकृतिप्रत्ययदशायां अकस्मादागन्तुकादेशरूपतया टकारो यथा प्रविशति तथा त्वं प्रवेच्यसीति वैधर्म्योपमया व्याख्येयं। टकारवदिति पाठे, वावसाने (पा०८।४।५६) इत्यवसान एव चर्त्वविकल्पात् खरश्चाभावात् षट्खित्यादिवत् पणामित्यत्र खरवसानयोरभावात् टकारो यथा न प्रविशतीति साधर्म्योपमैव। क्षेपकोऽयम्। नलं भैमीं। अन्तरान्तरेणेति (पा०२।३।४) द्वितीया॥ १५१॥

अपर इति। अपरे दिशामीशा वह्न्यादयः शचीपतेरेनां पूर्व्वोक्तां वाचं अन्वमन्यन्त, इन्द्रो युक्तमाज्ञापयतीत्येवमभ्यनन्दन् किन्तु पुनर्मूर्खं युगयोः कलिद्वापरयोर्युगं एनामिन्द्रगिरं नादृत्त नाङ्गीचक्रे। दिगीशानामपि समातायां वाचि तयोरसम्मतेः किन्तुशब्देन मूर्खतरत्वमायद्वित्वं चोक्तं। एनां। अन्वादेशे एनादेशः। आदृत्त। अनाप्यविहरणत्वात्तङ्॥ १५२॥

कलिमिति। देवाः कलिं युगं प्रति लक्षीकृत्य कलिर्देवान् प्रत्येकशः एकैकमुद्दिश्य मिथोऽन्योन्यं समैर्वर्णैस्तुल्यैरक्षरैः श्लिष्टैः शब्दैः सोपहासं उपहासमवाप्यमद्दिनं कलिं कलहं वाग्युद्धं इत्थं वक्ष्यमाणप्रकारेण व्यरचयन् व्यरचयत कृतवन्तः कृतवांश्च-

तवाऽगमनमेवार्हं वैरसेनौ तया वृते।
उद्वेगेन विमानेन किमनेनापि धावता॥ १५४॥

त्यर्थः। व्यरचयन्। क्रोडादिकस्मादन्तलादृलोपित्वान्न सन्वद्भावः। व्यरचयदित्यपि पाठः॥ १५३॥

इन्द्रः कलिम्प्रत्याह। तवेति। हे कले तया वैरसेनौ वृते सति तवागमनं गमनाभावः अर्हं युक्तं। उद्वेगेन उत्कृष्टजवेन अत एव धावता शीघ्रगामिना अनेन प्रत्यक्षदृश्येन विमानेनाकाशगामिना रथेन किं? अपि तु न किञ्चित्प्रयोजनमस्ति, अन्यस्य वृतत्वादित्यर्थः। वैरसेनावुत्तरेण वा सम्बन्धनीयं। अनया नलेऽवृते एव तव स्वपुराद्गमनं युक्तम् नलवरणानन्तरमिदानीं सर्व्वथा गमनं न कार्य्यमित्यर्थ इति वा। एतावत्पर्यन्तं किं कृतं इदानीं किमर्थमागम्यत इत्युपहासः। एतदेव वाक्यं कलिरिन्द्रं प्रत्याह॥ हे शक्र भैम्या नले वृते सति तव यथागतमागमनमेवाहतकार्य्यत्वादिदानीं स्वर्गं प्रत्यगमनमेव युक्तं निर्लज्जत्वमङ्गीकृत्येन्द्राण्यादीनामग्रे कथं मुखं दर्शयिष्यसि अपि त्वनुचितमेतत्, सर्व्वथा स्वर्गं प्रति न गन्तव्यमेव युक्तं इत्यर्थ इति वा। विमानेमाऽहङ्काररहितेनापिधा तिरोधानं तद्युक्तेन नितराङ्गोपितेनानेन मुखदर्शनानुमितेनोद्वेगेन निर्वेदेन किं? अपि तु तद्गोपनं व्यर्थं धैर्य्यमवलम्ब्य निर्वेदो यद्यपि त्वया गोप्यते तथापि मया ज्ञात एव। अद्य च भैमीनम्राभ्यां वरदानार्थमेव मयागतमित्यादिव्याजेन निर्वेदगोपनं क्रियते, तथापि स निर्वेदो ज्ञात

पुरा यासि वरीतुं यामग्र एव तया वृते।
अन्यस्मिन् भवतो हास्यं वृत्तमेतत्त्रपाकरं॥ १५५॥

एव। अभिमानशून्यत्वान्न किञ्चिदनेन निर्वेदेन साधयितुं शक्यते। तत्तस्मात् सर्व्वथा दुःखं माकार्षीरित्युपहसितवानित्यर्थः। विमाने नान्यवरणादपमानेन हेतुना य उद्वेगस्तेन प्रकटेन किं? अपि तु न गोपयेति वा। विलुप्तमानानामिव स्वामिन् नितरामभिमानशून्य इन्द्र गोपितेन वानेन निर्वेदेन किमिति वा। उद्वेगेन किं? अनेन धावता विमानेनापि किमिति वा। अपिधा। आतश्चोपसर्गे (पा०३।३।१०६) इत्यङ् प्रत्ययः॥ १५४॥

वह्निः कलिमाह। पुरेति। हे कले त्वं यां वरीतुं इतोऽपि पुरा यासि गमिष्यसि तयाग्र एव त्वदागमनात् पूर्व्वमेव अन्यस्मिन् वृते एतदिदानीं गमनं त्रपाकरं भवतो हास्यं हास्यकारणं वृत्तं जातं। वर्त्तमानानामपि वृत्तप्रायत्वाद् वृत्तमित्युक्तं। सर्व्वो लोकस्त्वामुपहसिष्यतीत्यर्थः। एतत्तव वृत्तं गमनाचरणं हास्यहेतुभूतं त्रपाकारि च भविष्यतीति शेष इति वा। एतल्लोकैः क्रियमाणं हास्यं तव त्रपयाऽकं दुःखं राति ददाति एवंविधं वृत्तं जातं प्राप्तमेवेति वा। त्रपाद्युपहासः॥ इदानीं कलिरग्निमाह। हे वह्ने त्वं यां वरीतुं पुरा यासि अयासीस्तया तव समक्षमेव नामनादृत्यान्यस्मिन्नले वृते तवैव प्रत्यक्षदृश्यं वृत्तं वर्त्तमानास्यं सुखं त्रपां श्रा मामस्येन करोति नितरां

पत्यौ तया वृतेऽन्यस्मिन् यदर्थं गतवानसि।
भवतः कोपरोधस्तादृचमस्य वृथा रुषः ॥ १५६ ॥

लज्जावहं जातमिति शेषः। हा कष्टं। त्रपयाऽकं दुःखं रात्यादत्ते। लज्जास्पदं वृत्तं जातमिति वा। हे वक्रे पुरा ग्रसङ्गमनात् पूर्वं यां वरीतुमयासि त्वया प्रयत्नोऽकारि। स्वयम्वरं प्रति गतं नलरूपं धृतमिति यावत्। यद्वा स्वस्य गमनात् पूर्वं दूतीहस्तेनोपदाप्रदानादिद्वारा यां वरीतुं प्रयत्नोऽकारि तया तव समक्षमेव नले वृते, एतत् स्वर्गप्रत्यागमनलक्षणमाचरणं तव त्रपां न करोतीति त्रपाऽकरं लज्जां नावहति। हा कष्टं। एवं वृत्तेऽपि निर्लज्जः सन् स्वगृहं गच्छन् स्वां वनितां मुखं कथं दर्शयिता इति भाव इति। तया विनैव त्वत्स्वर्गमनाचरणं लज्जावहं सत् हास्यं हासयोग्यं। अपि तु सर्वैर्हास्यमेवेति काकुर्वा। मुखं लज्जाकरं वृत्तमाचरणमपि लज्जाकरमिति वा। यास्योति यावत्पुरेति (पा० ३।३।४) भविष्यति लट्। पचे, पुरि लुङ् चास्मे (पा० ३।२।१२२) इति भूते लट्। पचे यस्य प्रयत्ने भावे चिण् ॥ १५५ ॥

यमः कलिमाह। पत्याविति। हे कले त्वं यदर्थं यस्या निमित्तेन गतवान् गमनयुक्तोऽसि यां वरीतुमेव गच्छसि तया पूर्वमेवान्यस्मिन् पत्यौ वृते स्वभर्तृत्वेनाङ्गीकृते सति भवतः कोपस्य रोधो निवारणं स्याद्भवतु। यतोऽचमस्यासमर्थस्यात एव वृथा रुट् कोपो निष्फलत्वात्कोपो निवार्य्य इत्यर्थ इति वा॥ कलि-

यासि स्मरं जयन् कान्त्या योजनौघं महार्वता ।
स मूढस्त्वं वृतेऽन्यस्मिन् किन्न क्लिश्येऽत्र पामर ॥ १५७ ॥

रेतदेव यममाह । हे यम यां वरीतुं गतवानसि तया नले पत्यौ वृते भवतः सकाशादन्योऽधस्तादधरो हीनो न कोऽपि, अपि तु त्वमेव । त्वत्सकाशादन्योऽधो हीनः कः स्यादपि तु त्वमेव हीन इति वा । अपरोऽर्थात्त्वदन्यो भवत उत्पत्तितस्त्वं ह्युपचयं प्राप-यतीति भावः । निरर्थकजन्माऽतएवाधो हीनः कः स्यादपि तु त्वमेव हीन इति वा । सम्बुद्ध्यन्तं वानिरर्थकजन्मन्नित्यर्थः । अक्षमस्य भूस्पर्शरहितस्य देवस्य रुषो वृथा । अस्मादृशानामेव रोषाः सफला न तु भवादृशानामित्यर्थ इति वा । अक्षम असहन असमर्थ यम वृथा निष्कारणमस्मान् प्रति रुषः कोपान् त्य मा कुर्वित्यर्थं इति वा । यस्मै यदर्थे चतुर्थी तदर्थेति (पा० २।१।३६) समासः । गतवान् मतुप् । पक्षे भूते क्तवत् । भवतः । षष्ठी पञ्चमी च दिग्योगे । पक्षे प्रथमा । आतो धातोरिति (पा० ६।४।१४०) प्रतिषेधात्, अत्वसन्तस्य चाधातोः (पा० ६।४।१४) इति असन्तत्वेऽपि न दीर्घः । अधस्तादिति दिक्शब्दत्वात् अध-रशब्दाद्, अस्ताति चेति (पा० ५।३।४०) अस्तातिः, पूर्वाधरा *(पा० ५।३।३८) इत्यधरादेशश्च । स्येति षोऽन्तकर्मणि ॥१५६॥*

वरुणः कलिमाह । यासीति । हे कले कायकान्त्या स्मरं जयन् विरुद्धलक्षणयाऽतिकुरूपस्त्वं, महान्तोऽवर्त्तोऽश्वा यस्मिन् रथे, तेन कृत्वा योजनौघं चतुःक्रोशरूपयोजनसमूहमतिदूर-

मिदानीमपि यासि स त्वं मूढो मूर्खः। यस्माद्धे पामर नीच भैम्यान्यस्मिन्नले वृते सति अत्रास्मिन्नर्थे वर्त्तमानस्य ते तव ह्रीः किं न अपि तु भविष्यत्येव। भाविनीं वर्त्तमानां वा लज्जामवगणय्यापि गच्छसि तस्मान्मूर्ख ऐवेत्यर्थः। सेनापुरःसरमतिगौरं कामं कज्जलतुल्यया स्वकायकान्त्या पराभावुकः। तथा जनौघं स्वसेनामनूढमपि पराभावुकः। प्रसरन्त्या श्यामकायकान्त्या सर्व्वां सेनामग्रसरं स्मरञ्च श्यामीकुर्व्वन्निति कुरूप एवम्भूतो रथेन समूढः सम्यग्धृतो यस्त्वं, तथान्यस्मिन् वृते सत्यपि यासि, अर्थात् स्वयम्वरं तस्य तेऽत्रार्थे स्वयम्वरे वा ह्रीः किं न भवेदपि तु भवेदेवेति वा॥ एतदेव कलिवर्णनमाह। हे अमर देव वरुण कान्त्या दिव्यदेहदीप्त्या योजनौघं दूरदेशं रञ्जयन् दीप्तं कुर्व्वन् जनौघं स्वयम्वरदेशस्थं लोकं समूहं चारञ्जयन् द्रुत्याश्चर्यदिव्यरूपदर्शनान्नलाकारधारणाद्वा आत्मनि सानुरागं कुर्व्वन्नतिजवनहयवृतेन विमानेन महता श्यामवर्णादिनार्वता हयेन वा समूढः समारूढो यस्त्वं यासि स स्वयम्वरमयासीः तस्य तवान्यस्मिंस्तया नलमचं वृते ह्रीः किमिति न भवति? अपत्रप· निर्लज्जेति धिक्कारः। अहं तु तदा नागं त्वं तु गतोऽपि न वृत इत्यपमानात्त्रपा भवितुं युक्ता, परं सा न, जायत इति चित्रं। अत एव चात्रपस्त्वमित्यर्थः। अत्रप न स्त्रियम इत्यमर इत्यर्थः। अन्योऽप्येवमनादरे सति लज्जया म्रियते त्वं तु निर्लज्जो न म्रियस इति चित्रमित्यर्थ इति वा। अत्रपया लज्जाभावेनामरेत्येकं पदं वा। त्रपायां सत्यामप्यमरेति वा। अत्रपया

नलं प्रत्यनपेतार्त्तिं तार्त्तीयीकतुरीययोः ।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः ॥ १५८ ॥
द्वापरैकपरीवारः कलिर्मत्सरमूर्च्छितः ।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिलः किल ॥ १५९ ॥

लज्जाभावेनाम रोगं पीडामस्माद्दृशां रासि ददामि अत्रपा-मर । तव निर्लज्जत्वेन वयमतिदुःखिनो भवाम इत्यर्थ इति धा। एते चत्वारोऽपि श्लोका यथाक्रममिन्द्रादिदेववचनत्वेन ज्ञेयाः। कलिकलहस्तु सर्व्वत्रानुस्यूतः। तत्रापि पूर्व्वं देववचः पश्चात्कलिवचः । महार्थता । अर्व्वणस्त्वसाविति (पा० ६।४।१२७) त्वन्तादेशः। आन्महतः (पा० ६।३।४६) इत्याकारः। रासि स्मेति पचे, लट्स्मे (पा० ३।२।११८) इति भूते लट् ॥ १५७ ॥

नलमिति। देवा इन्द्रादयः तार्त्तीयीकतुरीययोस्तृतीय-चतुर्थयोर्युगयोर्द्वापरस्य कलेश्च युगलं नलं प्रत्युद्दिश्य अनपे-तार्त्ति अनपगतव्यथं सर्व्वथा नलः पीडनीय इति नलेऽनि-ष्टप्तापकारवाच्छं बुद्ध्वा दिवि धियं दधुः । युगद्वयमस्मद्वचनं न शृणोति अतः परं यत्किञ्चिद्भवतु किमस्माकमिति विचार्य्य स्वर्गं गन्तुमीषुरित्यर्थः। तार्त्तीयीकः पूर्व्ववत्। तीयादीकक् (पा० ४।१।८।वा० ३)। तुरीयः। चतुरश्छयतावाद्यचरलोप-श्चेति (पा० ५।२।५१।वा० १) यत् ॥ १५८ ॥

द्वापरेति। कामादिभिर्नो परावृत्य द्वापर एवैकसहायो यस्य तथा मत्सरेण नलशुभदेषेण मूर्च्छितो विनष्ट इवातिमत्सरेण

नलेष्टापूर्त्तसम्पूर्त्तेर्दूरदुर्गानमुं प्रति ।
निषेधन्निषधान् गन्तुं विघ्नः सञ्जघटे घनः ॥ १६० ॥
मण्डलं निषधेन्द्रस्य चन्द्रस्येवामलं कलिः ।
प्राप ग्लापयितुं पापः स्वर्भानुरिव सग्रहः ॥ १६१ ॥

प्रवृद्धो वा। तथा ग्रहिलो निवारणस्यानाकर्णनादाग्रहवत् कलिः अवश्यं नलं निग्रहीष्यामीत्येवंरूपां नलनिग्राहिणीं यात्रां जग्राह निषधान् प्रतस्थ इत्यर्थः । किल यस्माद्ग्रहिलस्तस्मात् प्रतस्थे उपहासे वा । एकः परीवारो यस्येति विगृह्य द्वापरेणैकपरीवार इति समासः। परीवारः। उपसर्गस्य घञीति (पा० ६।३।१२२) दीर्घत्वं। निग्राहिणीं। आवश्यके णिनिः ॥ १५९ ॥

नलेति। नलस्य इष्टापूर्त्तानां यागतडागादिधर्म्माणां सम्पूर्त्तेः सम्पूर्णत्वाद्धेतोः नितरां धर्म्मबाहुल्यात् पापरूपं प्रस्थितममुं प्रति अनु दूरं नितरां दुर्गान् दुर्गमाननेन प्रवेष्टुमशक्यत्वात् निषधान् गन्तुं गमनाय निषेधन् वारयन् घनो महान् निरन्तरश्च विघ्नो वक्ष्यमाणप्रकारेण सञ्जघटे सञ्जज्ञे। धर्म्मबाहुल्यं दृष्ट्वा सहसा तान् प्रवेष्टुं शङ्कित इत्यर्थः । अथ च घनो मेघो जलपूर्त्तेः दुर्गमदेशं गन्तुं विघ्नरूपो भवन्निषेधति । इष्टश्च पूर्त्तश्चेति द्वन्द्वे, अन्येषामपि दृश्यत इति (पा० ६।३।१३७) दीर्घः ॥ १६० ॥

मण्डलमिति। पापः कलिः पापग्रहमध्ये गणितत्वात् पापः स्वर्भानुरिवामल निष्पापं निषेधेन्द्रस्य मण्डलं राष्ट्रं अमलं परिपूर्ण-

कियतापि च कालेन कालः कलिरुपेयिवान्।
भैमीभर्त्तुरहंमानी राजधानीं महीभुजः॥ १६२॥
वेदानुद्धरतां तत्र मुखादाकर्णयन् पदं।
न प्रसारयितुं कालः कलिः पदमपारयत्॥ १६३॥

प्रकाशं चन्द्रस्य मण्डलं बिम्बमिव ग्रहः सम्यगाग्रहात् हठाद्ग्रहणायोगवशाच्च ग्लापयितुं विनाशयितुं शमितुञ्च प्राप॥१६१॥

कियतेति। कालो युगलक्षणः समयरूपोऽथ च पापरूपत्वाच्छ्यामवर्णोऽथच दारुणत्वात् कृतान्ततुल्यः तथाऽहंमानी नलपीडनेऽहङ्कारवान् कलिः कियतापि भूयसा कालेन भैमीभर्त्तुर्महीभुजो नलस्य राजधानीमुपेयिवान् प्राप्तवान्। पूर्वं देशं प्राविशदिदानीन्तु राजधानीमिति चार्थः। भूमिभैमीत्यागने कलेरभिनिवेशोऽभिप्रायो विशेषणद्वयेन सूच्यते। कियताऽल्पीयसेति वा। अहमिति मननमहंमानः सोऽस्यास्तीति सर्व्वकार्य्येष्वहमेवेति मन्यते तच्छील इति वा॥ १६२॥

इदानीं पुरप्रवेशविधानाह। वेदानिति। तत्र पुरे वेदान् ऋगादीनुद्धरतां गुणनिकां कुर्व्वतां श्रोत्रियाणां मुखात् पदं पदकारकल्पितसंहिताविभागरूपं पदमन्त्रं आकर्णयन् शृण्वन् कालः समयरूपोऽथ च पापरूपः कलिः पदमेकमपि चरणन्यासं प्रसारयितुं नापारयत् पापरूपत्वादित्यर्थः। एतेन नलपुरस्य धर्मापूर्णत्वमुक्तम्। वेदान्। शतृयोगे, नलोकेति (पा०।२।३।६८) षष्ठीनिषेधः॥ १६३॥

श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्णयतः क्रमं।
क्रमः सङ्कुचितस्तस्य पुरे दूरमवर्त्तत॥ १६४॥
तावद्गतिर्धृताटोपा पादयोस्तेन संहिता।
न वेदपाठिकण्ठेभ्यो यावदश्रावि संहिता॥ १६५॥

श्रुतीति। तत्र पुरे श्रुतिपाठका वेदाध्यापयितारस्तेषां वक्त्रेभ्यः सकाशात् क्रमं पूर्व्वपदपरित्यागेनोत्तरपदग्रहणादिकक्रमसंज्ञं ग्रन्थं आकर्णयतः शृण्वतोऽस्य कलेः क्रमश्चरणो गतिर्वा दूरं नितरां सङ्कुचितः क्रमाकर्णनाद्भयेन पापः पदमपि पुरःस्खलितुमशक्तस्ततो देशाद् दूरं निवृत्त इत्यर्थः॥ १६४॥

तावदिति। तेन कलिना वेदपाठिनां कण्ठेभ्यो मुखेभ्यः यावत्संहिता पदक्रमरूपावस्थाद्वयविलक्षणा ऋगादिरूपा नाश्रावि नाकर्णिता तावत्कालं तावद्देशपर्य्यन्तञ्च प्रतिबन्धराहित्याद्धृताटोपा धृतसंरम्भा सत्वरा पादयोर्गतिः संहिता संयोजिता। यावत्कालं यावति च देशे संहिता नाकर्णिता तावत्कालं तावद्देशपर्य्यन्तञ्च प्रतिबन्धराहित्याच्छीघ्रगतिरभूत्। यदा यस्मिंश्च देशे सा श्रुता तदैव तस्य गतिभङ्गोऽभूदित्यर्थः। यावत् संहिता अश्रावि तावत्पदयोः सत्वरा गतिर्योजिता नापि तु तावदेव योजिता। संहिताश्रवणपर्य्यन्तमेव सत्वरगतिः सोऽभूत् नानन्तरमित्यर्थः॥ १६५॥

तस्य होमाज्यगन्धेन नासा नाशमिवाऽगमत् ।
तथातत दृशौ नासौ क्रतुधूमकदर्थिते ॥ १६६ ॥
अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले ।
अङ्गणे गृहिणां तत्र खलेनानेन चस्खले ॥ १६७ ॥
पुटपाकमिव प्राप क्रतुभुग्धामहोमभिः ।
तत्प्रत्यङ्गमिवाकर्त्ति पूर्त्तोर्मिव्यजनानिलैः ॥ १६८ ॥

तस्येति। तस्य नासा अग्निहोत्रादिहोमाज्यं होमसम्बन्धितं तस्य गन्धेन परिमलेन हेतुना नाशमिव मरणवेदनामिवागमत् अन्वभूदित्युत्प्रेक्षा। इवशब्द एवकारार्थो वा। तथा तेनैव कारणेनासौ कलिः क्रतुधूमेन कदर्थिते पीडिते दृशौ नेत्रे ऽपि अतत न प्रसारितवान्। किञ्चिन्न ददर्शेत्यर्थः। आज्यगन्धक्रतुधूमसम्बन्धमात्रेण विव्यथ इत्यर्थः। अतत इति तनोतेर्लुङि पाचि, तनादिभ्यस्तथासोरिति (पा० २।४।७८) पाक्षिके सिज्लोपे तकारस्य ङित्वादनुदात्तोपदेशेवनतितनोति (पा० ६।४।३७) इत्यनुनासिकलोपः ॥ १६६ ॥

अतिथीनामिति। तत्र पुरे अनेन खलेन कलिना गृहिणामङ्गणे चस्खले। यस्मादतिथीनां पदाम्भोभिश्चरणक्षालनोदकैरिमं पापरूपं कलिं प्रत्युद्दिश्य अतिपिच्छिले अतितरां कर्दमयुक्ते। एवंविधमतिपवित्रमङ्गणं प्रवेष्टुं नाशकदित्यर्थः अन्योऽपि पिच्छिले देशे पतति ॥ १६७ ॥

पुटेति। असौ कलिः क्रतुभुजा यागसम्बन्धी वह्निस्तस्य

पितृणां तर्पणे वर्णैः कीर्णाद्वेश्मनि वेश्मनि।
कालादिव तिलात् कालाद् दूरमत्रसदत्र सः ॥१६९॥
स्नातृणां तिलकैर्मेने स्वमन्तर्दीर्णमेव सः।
कृपाणीभूय हृदयं प्रविष्टैरिव तस्य तैः॥ १७०॥

मद्योग्निभिः प्रकृष्टतापैः कृत्वा पुटाभ्यां पुटयोर्वा पाकं उभयपार्श्वयोर्यत्रादेशान्तरमग्निसंयोगमिव प्राप प्रतिगृहं यागबाहुल्यात् वामदक्षिणपार्श्वयोर्वह्नितापैर्नितरां पीडामन्वभूदित्यर्थः। तथा पूर्त्तानां धार्मिकनिर्म्मितवापीकूपतडागादीनां ऊर्म्मयस्तद्रूपाणि व्यजनानि तेषामनिलैर्वायुभिः तस्य प्रत्यङ्गं सर्व्वाङ्गं क्रकचैव छिन्नमिवाभूत् इत्युत्प्रेक्षा। प्रत्यवयवकर्त्तनेन च पीडातिशयाद् वाप्यादितरङ्गवायुस्पर्शमात्रेण नितरां व्यथितोऽभूदित्यर्थः। वह्निः शुष्मा कृष्णवर्त्मेत्यमरः॥ १६८॥

पितृणामिति। अत्र पुरे वेश्मनि वेश्मनि प्रतिगृहं ब्राह्मणादिचतुर्वर्णैः पितृणां तर्पणे जलसमर्पणे विषये कीर्णात् क्षिप्तात् पितृप्रियात् कालात् कृष्णवर्णात् तिलात् सकाशात् स कलिः कालादिव कृतान्तादिव दूरं नितरां अत्रसत् भयमाप। तर्पणैरिति पाठे तर्पयन्तीति तर्पणैरिति वर्णविशेषणं। तिलात्। इति जातावेकवचनं॥ १६९॥

स्नातृणामिति। स कलिः स्नातृणां स्नानं कुर्व्वतां वैदिकानां तैस्ताद्दृशैर्गोपीचन्दनादिरचितैर्ललाटस्थानादिस्थैर्द्वादशभिस्तिलकैः कृपाणीभूय खड्गतामङ्गीकृत्य तस्य कलेः हृदयं

पुमांसं मुमुदे तत्र विदन् मिथ्यावदावदं।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयं॥ १७१॥
यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसङ्कुलां।
जनैर्धर्म्मधनैः कीर्णां व्यालक्रोडीकृताञ्च तां॥ १७२॥

विदार्य्य तैः प्रविष्टैरिव स्वं स्वकीयं अन्तः शरीरमध्यं दीर्णमेव शकलीभूतमेव मेने। कृपाणैर्हि विदारणं भवतीति युक्तम्। खड्गाकारांस्तिलकान् दृष्ट्वा विव्यथ इत्यर्थः॥ १७०॥

पुमांसमिति। तत्र पुरे अयं पुमांसं मिथ्यावदावदं मृषाभाषिणं विदन् जानन् स्वमित्रलाभान्मुमुदे। अथ पश्चात्तदनन्तरं स्वस्त्रियं प्रत्युद्दिश्य तं तथालीकभाषिणं वीक्ष्य ज्ञात्वा मित्रनाशादिव दुःखवशात् म्लानवान् म्लानतां गतः। पत्नीं प्रति क्रीडायामसदिति दोषाभावाद्व्यथितोऽभूदित्यर्थः। न नर्मयुक्तं वचनं हिनस्ति स्त्रीपुंसयोरिति भारतादौ। विदन्। विदेः शतुर्वसुः (पा०७।१।३६) इत्यत्र विकल्पानुवृत्तेर्वसुभावः। एवं चतुर्द्दशतयीविद्याविद्भिरित्यत्रापि ज्ञेयम्। वदावदं। चरिचलीत्यादिना (पा०६।१।१२वा०८) द्वित्वमभ्यागस्यालञ्च। म्लानवान् क्तवतोस्तकारस्य संयोगादेरात इति (पा०८।२।४३) नः॥ १७१॥

यज्ञेति। सः यज्ञयूपैः खादिरोडुम्बरपशुबन्धस्तम्भैः घनां नितरां व्याप्तां तां पुरं शङ्कुभिस्तीक्ष्णाग्रकीलैः सङ्कुलां व्याप्तामिव जज्ञौ मेने। तथा धर्म्मधनैर्जनैः कीर्णां तां पुरं व्यालैः सर्पैः दुष्टश्वापदैर्वा दुष्टगजैर्वा क्रोडीकृतां सर्वत्र पूर्णां व्यालाः क्रोडे

स पार्श्वमशकद्गन्तुं न वराकः पराकिणां।
मासोपवासिनां छाया लङ्घने घनमस्खलत् ॥ १७३ ॥
आवाहितां द्विजैस्तत्र गायत्रीमर्कमण्डलात्।
स सन्निदधतीं पश्यन् दृष्टनष्टोऽभवद्भिया ॥ १७४ ॥

मध्ये यस्यास्तामेतादृशीं क्षतामिव मेने। कीलमयादिभिर्व्याप्तं स्थानं यथा प्रवेष्टुमशक्यं तथा सा पुरी तस्य प्रवेष्टुमशक्या जातेत्यर्थः। व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः। रेफान्तो पूःशब्दस्त्रीलिङ्गः। चः समुच्चयार्थ इवार्थो वा ॥१७२॥

स इति। वराकः कचिदपि स्थानालाभाद्दीनः स कलिः पराकिणां द्वादशरात्रोपवासरूपपराकाख्यकृच्छ्रविशेषव्रतचारिणां पार्श्वं गन्तुं नाशकत्। तथा मासोपवासिनां कायप्रतिच्छायाया अपि लङ्घनेऽतिक्रमणे तस्या अपि समीपे गन्तुं घनं निरन्तरं अस्खलत् भ्रमत्पदोऽभूत्। तच्छायामपि द्रष्टुं नाशकदित्यर्थः। वराकः। जल्पभिचेति (पा० ३।२।१५५) कन् ॥१७३॥

आवाहितामिति। तत्र पुरे स द्विजैस्त्रैवर्णिकैरागच्छ वरदेत्यादिमन्त्रैरावाहितामन्तरर्कमण्डलाद्भिया अतिशयसामर्थ्यात् सूर्यबिम्बान्निर्गत्य दिव्यरूपेण सन्निदधतीं तत्समीपमागच्छन्तीं प्रातःसन्ध्याधिदेवतां गायत्रीं पश्यन् गायत्र्याः सकाशाद्भयेन गायत्र्यैवादौ दृष्टः पश्चात्तदानीमेव नष्टोऽदृश्योऽभवत्। सन्ध्यावन्दनं कुर्वतो द्विजान् दृष्ट्वा गायत्री मां विनाशयिष्यतीति मतः स्थानात् पलाय्य गत इत्यर्थः। गायत्री सूर्य-

स गृहे गृहिणां पूर्णे वने वैखानसैर्वृते।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे ॥ १७५ ॥
क्वापि नापश्यदन्विष्यन् हिंसामात्मप्रियामसौ।
स्वमित्रं तत्र न प्रापदपि मूर्खमुखे कलिं ॥ १७६ ॥
हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः।
सा तु सौम्यवृषासक्ता खरं दूरान्निरास तं ॥ १७७ ॥

विस्मृष्टा इति ध्यानं। अर्कमण्डलादाहितामिति वा। दृष्टनष्टः। पूर्वकालैकेति (पा०२।१।४८) समासः ॥ १७४ ॥

स इति। स कलिर्गृहिणां गृहस्थैः पूर्णे गृहे तथा वैखानसैर्वानप्रस्थैर्वृते व्याप्ते वने तथा यतीनां परमहंसानां सन्न्यासिनामाधारे आश्रयभूते तैर्व्याप्ते अमरागारे देवालये स्थानं नानशे आश्रयं न प्राप। क्वापि कस्मिन्नपीति सर्व्वत्र योज्यं। गृहिभिर्गृहे पूर्णे सतीति सप्तमी वा सर्व्वत्र ॥ १७५ ॥

क्वापीति। असौ कलिः तत्र पुरे आत्मनः प्रियां दृष्टां निषिद्धां हिंसां अथ च स्त्रियं अन्विष्यन् न क्वापि कस्मिन्नपि देशे नापश्यत्, तथा कलहप्रियत्वान्नामसाम्याच्च स्वस्य मित्रं कलिं कलहं मूर्खाणामपि मुखे सम्भावितस्थले न प्रापत्। मूर्खा अपि तत्र न कलहायन्ते। हिंसाकलहयोरभावात्तत्र स्थितिं न लेभ इत्यर्थः। अन्योऽपि यत्र मित्रस्त्र्याद्यभावस्तत्र चणमपि न तिष्ठतीत्युक्तिः ॥ १७६ ॥

हिंसेति। मखे गोमेधाख्ये यज्ञे हिंसागवीं हिंसासम्बन्धिनीं

मौनेन व्रतनिष्ठानां स्वाक्रोशं मन्यते स्म सः।
वन्द्यवन्दारुभिर्जज्ञौ स्वशिरस्य पदाहतं॥ १७८॥

गवीं वीक्ष्य रिरंसुर्हृष्टचित्तः स कलिः निषिद्धगोहिंसा मत्प्रियेति धावति स्म। सा तु हन्यमाना गौः पुनः सौम्ये सोमदेवताकद्रव्यसाध्ये वृषे धर्मे आसक्ता तत्सम्बन्धिनी तत्साधिका सती अभिचारादिदुष्टकर्मराहित्यात् सौम्यो रमणीयः पारलौकिको धर्मस्तत्साधिका वा खरं पापरूपत्वाद्दुःसहं खलयोरभेदात् खलं वा पापरूपं दूरादेव निरास निराचकार। अधर्मसाधनं गोहिंसादि दृष्ट्वा प्रवृत्तः पश्चाद्धर्मसाधनमग्नीषोमीयवैदिकपशुहिंसादि दृष्ट्वा मत्प्रिया हिंसा न भवतीति दूरात् परावृत्त इत्यन्वयः।· मुखे इति पाठे हिंसाप्रतिपादिकां गां वाणीं यज्वनां मुखे वीक्ष्य श्रुत्वेति यावत्, रिरंसुरधावत्। सा तु वाणी सौम्यप्रतिपादिका सती तं अखरं अग्नीषोमीयं पशुमित्यादिवाक्याकर्णनमात्रेण दुःखवशान्निस्तेजस्कं दूरान्निरासेति वा। अथ च कामातुरः सुरतेच्छुः खरो गर्द्दभः गां वीक्ष्य यद्यपि धावति तथापि सा रमणीयवृषभानुरक्ता सती विजातीयत्वाद्गर्द्दभं दूरान्निराकरोति। मखे यज्ञप्रारम्भ इति वा। अथ च गौर्यथा सौम्यं वृषभमनुसरति क्रूरं वृषभं त्यजति। सुकृते वृषभं वृष इत्यमरः। हिंसागवीति गोरतद्धितेति (पा॰५।४।९२) टच्॥ १७७॥

मौनेनेति। स कलिः मौनव्रतनिष्ठानां वाग्यमव्रतिनां स-

ऋषीणां स वृसीः पाणौ पश्यन्नाचामतामपः।
मेने घनैरमी हन्तुं शम्भुं मामङ्गिरुद्यताः॥ १७९॥
मौञ्जीधृतो धृताषाढानाशशङ्के स वर्णिनः।
रज्ज्वामी बद्धुमायान्ति हन्तुं दण्डेन मां ततः॥१८०॥

न्ध्यादिजपमौनिनां वा मौनेन वाङ्नियमेन कृतां स्वस्यात्मन आक्रोशं गालीप्रदानमेव मन्यते स्म। तथा वन्द्येषु नमस्कारार्हेषु गुर्वादिषु वन्दारुभिः नमस्कुर्वद्भिर्नरैः स्वशिरश्च पदा हतं चरणताडितमिव जज्ञौ अज्ञासीत्। च इवार्थो वा। वन्दारुभिः। शृवन्द्योरारुरित्यारुः(पा०३।२।१७३)।वन्द्यानिति पाठे, तद्योगे,न लोकेति(पा०२।३।६९)षष्ठीनिषेधाद्द्वितीया॥१७८॥

ऋषीणामिति। स कलिः ऋषीणां पाणौ हस्ते वृसीः कुशासनानि पश्यन् अमी ऋषयः घनैर्लोहमुद्गरैर्मां हन्तुमुद्यता इति मेने। तथा आचामतां तेषामेव हस्ते आचमनार्थं गृहीता अपः पश्यन् अमी मामद्भिश्च त्वं भस्मसाद्भवेति शप्तुमिवेति प्रतीयमानोत्प्रेक्षा। सकुशानिति पाठे कुशानपश्च पश्यन्नित्यर्थः। अत्र दैर्घ्यात् कुशा एव घनतुल्याः। आचामतां। ष्ठिवुक्लमुचमामिति (पा०७।३।७५) दीर्घः॥ १७९॥

मौञ्जीति। स कलिः मौञ्जीधृतो मुञ्जतृणमेखलाधारिणः तथा धृत आषाढः पालाशदण्डो यैस्तान् वर्णिनो ब्रह्मचारिणः एवंभूतानाशशङ्के मेने, अमी पुरुषा रज्ज्वा मां बद्धुं ततो बन्धनानन्तरञ्च दण्डेन मां हन्तुमायान्तीति। मौञ्जीधृतो

दृष्ट्वा पुरः पुरोडाशमासीदुत्त्रासदुर्मनाः ।
मन्वानः फणिनीस्तत्र स मुमोचास्रु च स्रुचः ॥ १८१ ॥
मुमुदे मदिरादानं विन्दन्नेष द्विजन्मनः ।
दृष्ट्वा सौत्रामणीमिष्टिं तं कुर्वन्तमदूयत ॥ १८२ ॥

छत्राषाढा एते ब्रह्मचारिणो न भवन्ति किन्तु मां रज्ज्वा बद्ध्वा दण्डेन हन्तुमायान्तीत्याशशङ्क इति वा। छत्राषाढान्वेति पाठे एवम्भूतात् ब्रह्मचारिण इति नाशशङ्के किन्त्वित्युत्तरार्द्धं। पालाशो दण्ड आषाढः। वर्णिनो ब्रह्मचारिण इत्यमरः। मौञ्जो। विकारेऽञ्। वर्णास्त्येषां ब्रह्मचारिणामिति वर्णिनः ॥ १८० ॥

दृष्ट्वेति। स तत्र पुरोऽग्रेऽश्वशफमात्रं पुरोडाशं अष्टादशकपालादिसंस्कृतं पशुशरीरावयवं दृष्ट्वा उत्त्रासेनोत्कृष्टभयेन दुर्मना दुःखित आसीत्। तथा स्रुचः सर्पफणाकारपुरोभागा वैकङ्कतादिजुह्वः फणिनीः सर्पिणीर्मन्वानोऽस्रु मुमोच दंशनभिया रुरोदेत्यर्थः। पुरोडाशो ऽकारान्तः। पुरोडाशभुजामिष्टमिति माघः ॥ १८१ ॥

मुमुद इति। एष द्विजन्मनो ब्राह्मणस्य मदिरादानं मदिरास्वीकारं विन्दन् जानन् पश्यन् अय महापातकीति बुद्ध्या मुमुदे। अनन्तरं च सौत्रामणीमिष्टिं इन्द्रदेवताकं यागं कुर्वन्तं द्विजं दृष्ट्वाऽदूयत। सौत्रामण्यां सोमग्रहान् सुराग्रहांश्च गृह्णातीति श्रुतेर्मदिरादानस्य वैधत्वात्स्वाश्रयविनाशादिव विषय

अपश्यद्यावतो वेदविदो ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्राञ्जलयो हृदः ॥ १८३ ॥
स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्वैव यमस्येव बिभाय सः ॥ १८४ ॥

इत्यर्थः । सौत्रामणीति देवतार्थे सम्बन्धमात्रे वाऽणि अन्निति (पा० ६।४।१६७) प्रकृतिभावः ॥ १८२ ॥

अपश्यदिति । असौ वेदविदो यावतो यावत्संख्याकान् बहून् ब्रह्माञ्जलीन् ब्रह्मयज्ञसमये क्रियमाणान् हस्तस्वरकल्पनार्थं संयोजितान् करपुटान् वा सूर्योपस्थायिनां गायत्रीमन्त्रजपाञ्जलीन्,

ब्रतारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥

इति मनूक्तलक्षणान् करसंपुटानपश्यत् तावन्तस्तस्य कलेः हृदः सकाशादस्राञ्जलयोरक्तपूर्णा अञ्जलयः उदडीयन्त उत्पतिता निर्गताः । तद्दर्शनमात्रेण नितरां विदीर्णहृदयोऽभूदित्यर्थः । तदस्रेति वा पाठ उत्प्रेक्ष्यः ॥ १८३ ॥

स्नातकमिति । स विद्याव्रतस्नातकं उभयस्नातकञ्च स्वस्य घातकं विश्वासघातिनं जज्ञे मन्ये । तथा दान्तं तपःक्लेशसहं जितेन्द्रियं नरं कृतान्तवत् यममिव भयहेतुं जज्ञौ ज्ञातवान् । तथा वाचंयमस्य मौनिनो दृष्ट्वैव दर्शनमात्रेण मौनिकर्तृकत्वकर्मकमौनिकर्मदर्शनेनैव वा बिभाय । कस्येव यमस्येव । यम-

स पाषण्डजनान्वेषी प्राप्नुवन् वेदपण्डितान्।
जलार्थीवानलं प्राप्य पापस्तापादपासरत्॥ १८५॥
तत्र ब्रह्महणं पश्यन्नतिसन्तोषमानशे।
निवर्ण्य सर्व्वमेधस्य यज्वानं ज्वरति स्म सः॥ १८६॥

कर्तृकस्वकर्मकस्वकर्तृकथमकर्मकदर्शनेन वा। यमेन दृष्टेन यथा भयं तथा मौनिम इत्यर्थः। स्नातकस्नाप्लुतो व्रती। तपःक्लेशसहो दान्त इत्यमरः।

गुरवे तु वरं दत्त्वा स्नायाच्च तदनुज्ञया।
वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा॥

इति याज्ञवल्क्यः। स्नातीति स्नातकः, याजकादित्वात् साधुः, ण्वुलन्तः। घातकं। हन्तेर्ण्वुलि हनस्तः। जज्ञौ जज्ञे इति जानातेः कर्त्रभिप्राये क्रियाफलाविवक्षायां, शेषात् कर्त्तरीति (पा० १। ३।७८) परस्मैपदं। तद्विवक्षया अनुपसर्गाज्ज्ञः इति (पा० १।३। ७६) तङ्। इत्योति भयहेतुत्वाविवक्षायाञ्चापादानत्वं॥१८४॥

स इति। स पाषण्डजनान्वेषी स्वपचीयान् वेददूषकान् विचारयन् वेदेषु पण्डितान् श्रौतस्मार्त्तकर्मठान् प्राप्नुवन् पश्यन् तापादतिदुःखाद्धेतोः अपासरत् पलायितः। यतः पापरूपः। क इव अनलं प्राप्य जलार्थीव। तृषितो जलं विचिन्वन् अग्निं प्राप्योत्तापाद् दूरं पलायते॥ १८५॥

तत्रेति। स तत्र ब्रह्महणं नरं पश्यन् महापातकित्वादा-त्माश्रयत्वादतितरां सन्तोषमानशे प्राप। अनन्तरं सर्व्वमेधाख्यस्य

यतिहस्तस्थितैस्तस्य राम्भैरारम्भि तर्जना।
दुर्जनस्याजनि क्लिष्टिर्गृहिणां वेदयष्टिभिः॥ १८७॥
मण्डलत्यागमैच्छद्वीक्ष्य स्थण्डिलशायिनः।
पवित्रालोकनादेष पवित्रासमविन्दत॥ १८८॥

यज्ञस्य यज्वानं तं प्रोक्षणावदानादिसंस्कारादिकर्माणा निर्वर्त्य निर्द्धार्य्य ज्वरति स्म नितरां तप्तोऽभूत्। सर्व्वमेधे हि तत्तज्जातीयैकैकप्राणिहिंसाधिकाराद्ब्रह्मणे ब्राह्मणमालभेतेति श्रुत्या ब्रह्मवधस्य वैधत्वान्निराश्रयत्वात् सन्तप्त इत्यर्थः। ब्रह्महणं। ब्रह्मभ्रूणेति (पा० ३।२।८७) क्विप्। ज्वरतिर्म्मादिः॥ १८६॥

यतीति। यतीनां सन्यासिनां हस्तस्थितै राम्भैर्वैणवदण्डैस्तस्य कलेस्तर्जना भर्त्सना आरम्भि अकारि। तथा गृहिणां गृहस्थानां वेदैरेव यष्टिभिर्दण्डैर्वेदानां क्रमजटारूपाभिर्वा यष्टिभिस्तस्य दुर्ज्जनस्य क्लिष्टिः क्लेशोऽजनि। राम्भयष्टीर्दृष्ट्वा भीत इत्यर्थः। राम्भस्तु वैणव इत्यमरः। रम्भो वेणुस्तस्येदमिति (पा० ४।३। १२०) अण्। क्लिष्टिः। तितुत्रेति (पा० ७।२।६) इट्निषेधः॥ १८७॥

मण्डलेति। एष स्थण्डिलशायिनो वेदिकाशायिनो व्रतचारिणो नरान् वीक्ष्य मण्डलस्य तद्राष्ट्रस्य त्यागमैच्छत्। तथा पवित्राणां यज्ञाद्युपकरणादीनां ग्रन्थिविशेषनिबद्धानां पाणिस्थकुशानां आज्याद्युत्पवनसाधनानामन्तर्गर्भरहितसाग्रानखच्छिन्नदर्भाणामालोकनात् पवैर्वज्राद्यस्त्रास्त्रासमविन्दत प्राप। ततो

अपश्यज्जिनमन्विष्यन्नजिनं ब्रह्मचारिणं।
क्षपणार्थी सदीक्षस्य स चाक्षपणमैक्षत ॥ १८९ ॥
जपतामक्षमालासु वीजाकर्षणदर्शनात्।
स जीवाक्षष्टिकष्टानि विपरीतदृगन्वभूत् ॥ १९० ॥

मद्दङ्गयमापेत्यर्थः। अगर्भा माग्रा दर्भा पवित्रमिति कात्यायनः। स्थण्डिल एव शेते व्रतवशात् स स्थण्डिलशायी, व्रत इति (पा० ३।२।८०) णिनिः ॥ १८८ ॥

अपश्यदिति। स जिनं बौद्धविशेषं स्वमित्रमन्विष्यन् ब्रह्मचारिणं अजिनं कृष्णमृगचर्म्मोत्तरासङ्गमपश्यत्। क्षपणेन दिगम्बरेण देवाधेनोर्थोऽपि प्रयोजनार्थी तमपि गवेषयत् यज्ञदीक्षया सहितस्य यज्वनोऽक्षपणं दीक्षाङ्गधर्म्मपरित्यागाभावमैक्षत। यद्वा अक्षाभ्यां पाशकाभ्यां पणं क्रीडां पाशकसम्बन्धिजयपराजयदेयं राशीकृतं धनं ददर्श। राजसूये यजमानोऽक्षैर्दीव्यतीतिश्रुतेर्विहितत्वात् तद्द्यूतं युक्तं। वेधं सर्व्वं दुःखदं स्वस्यामित्रमेव ज्ञातवान् न तु मित्रमित्यर्थः। पणः। नित्यं पण इत्यप् (पा० ३।३।६६) ॥ १८९ ॥

जपतामिति। जपतां नराणां अक्षमालासु पद्माक्षरुद्राक्षादिमणिनिर्म्मितजपमालिकासु वर्त्तमानानां पद्माक्षादिवीजानां जपगणनार्थमाकर्षणं तस्य दर्शनाद्धेतोर्जीवानां प्राणानामाकृष्टिराकर्षणं तया जातानि कष्टानि दुःखानि अन्वभूत्। यस्मादिपरीतदृक् विरुद्धदर्शी। सर्व्वहितधर्म्मसहितत्वेन

त्रिसन्ध्यं तत्र विप्राणां स पश्यन्नघमर्षणम्।
वरमैच्छद् दृशोरेव निजयोरपकर्षणम्॥ १९१॥
अद्राक्षीत् तत्र कश्चिन्न कलिः परिचितं क्वचित्।
भैमीनलव्यलीकाणुप्रश्नकामः परिभ्रमन्॥ १९२॥

ज्ञानानन्तादृग्धर्मदर्शनमात्रेण मद्दुःखमन्वभूदित्यर्थः। अथ च विपरीतदर्शनशीलत्वादोजेत्यत्र व्यञ्जनमात्रव्यत्ययेन जवयोः सावर्ण्येन च जोवेति भवतीति जीवाक्षुष्टिकष्टानुभवनं युक्तं॥ १९०॥

त्रिसन्ध्यमिति। स तत्र त्रिसन्ध्यं प्रातर्मध्याह्नसायाह्नरूपं सन्ध्यात्रयमभिव्याप्य विप्राणां स्वतञ्चेत्यघमर्षणं ऋग्भिर्नासास्पर्शाभिमन्त्रितं चुलुकोदकं तत्प्रक्षेपणोदकं वा पश्यन् निजयोर्दृशोरपकर्षणं उन्मूलनमेव वरं श्रेष्ठमिति ऐच्छत्। मदीयनेत्रे यदि कोऽप्युदमूलयिष्यत् तर्ह्येतद्दुःखमूलं नाद्रक्ष्यतां। तस्मान्नेत्रोन्मूलनमेव वरमिति मेन इत्यर्थः। तदपि दृष्ट्वा दुःखितोऽभूदिति भावः। अघमर्षणदर्शनव्यथा नेत्रापकर्षणव्यथातुल्या। त्रिसन्ध्यं। अत्यन्तसंयोगे द्वितीया॥ १९१॥

अद्राक्षीदिति। भैमीनलयोर्व्यलीकस्यानृतस्याणु दोषलेशमपि प्रश्नकामः प्रष्टुं वाञ्छन् अत एव तत्र पुरे कथकस्वमित्रगवेषणार्थं परिभ्रमन् परितो विचरन् स कलिः क्वचिदपि स्थाने कञ्चिदपि स्वस्य परिचितं जिनक्षपणकादिमित्रं नाद्राक्षीत्। नलेन भैम्या वा तत्रत्येन जनेन वा कृतेषु क्वचिदपि केषुचि-

तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः।
स्वविद्विषां श्रियं तस्मिन् पश्यन्नुपतताप सः॥ १९३॥
कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान्।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकं॥ १९४॥

दपि महापातकेषु मध्ये किञ्चिदपि परिचितं पातकं नाद्राक्षीत्। त्वया भैमी नलोऽन्यत्र लोकैर्वा स्पृष्टः किमिति कलिः पृच्छति। तदेकमपि पापं नास्त्येवेति भाव इति वा॥ १९२॥

तप इति। पञ्चाग्निसाधनादि तपः, वेदपाठरूपः स्वाध्यायः, देवतोद्देशेन द्रव्यत्यागो यागो यज्ञः, एषां स्वस्य पापरूपत्वाद् विद्विषां वैरिणां तस्मिन् पुरे श्रियं समृद्धिं बाहुल्यं पश्यन् अकाण्डं निष्कारणमेव द्विष्टस्तापसो येन स कलिः उपतताप अतिदाहमापातिदुःखितोऽभूदित्यर्थः। अन्योऽपि स्ववैरिलक्ष्मीं पश्यन्नुपतप्यते। यज्ञापेक्षया स्वाध्यायस्य अभ्यर्हितत्वात् पूर्वनिपातः॥ १९३॥

कम्रमिति। स तत्र मुनेः उपनम्रायाः उपासकस्य समीपमागत्य स्थितायाः स्वजायाया विजातीयाया गम्याया अगम्याया वा विश्वस्याः स्त्रियः कम्रं कामुकं तं सम्भुञ्जानं कञ्चन नरं वीक्ष्यायं महापातकी ममाश्रयो भविष्यतीति बुद्ध्या तुष्टवान्। अथ पश्चाद्विचारणायां क्रियमाणायां तं कम्रं वामदेवेन मुनिना दृष्टं ब्रह्मसाम कयानश्चित्रमित्यादिवामदेव्यं नाम साम तस्य ब्रह्मविद्याया अभ्युपासकं विभाव्य मत्वा मम्लौ दुःखितोऽभूत्।

वैरिणी शुचिता तस्मै न प्रवेशं ददौ भुवि।
न वेदध्वनिरालम्बमम्बरे विततार च ॥ १८५ ॥
दर्शस्य दर्शनात् कष्टमग्निष्टोमस्य चानशे।
जुघूर्णे पौर्णमासेच्चौ सौमं सोऽमन्यतान्तकं ॥ १८६ ॥

वामदेव्योपासने सर्व्वाः स्त्रिय उपमोदन्तीति श्रुतिः। दृष्टं सामेत्यर्थे, वामदेवाड्ड्याविति (पा० ४।२।८) ड्यः ॥ १८४ ॥

वैरिणीति। शुचिता लोकानां वाह्याभ्यन्तरशुचिता मनःशुद्धिः गोमयाद्यनुलेपनजनिता च शुचिता भुवि प्रवेशं तस्मै न ददौ। यस्मादशुचेस्तस्य वैरिणी। नगरमध्ये सर्व्वेषां जनानां भूमेश्च शुचित्वात् स्थातुं नाशकदित्यर्थः। तथा वेदध्वनिरम्बरे शब्दाश्रये नगरसम्बन्ध्युपरितनाकाशदेशे आलम्बमाश्रयं न विततार। अम्बरस्य वेदध्वन्याश्रयत्वात् तत्रापि स्थातुं नाशकदित्यर्थः। चः समुच्चये। अन्योऽपि वैरिणे स्थानं न ददाति ॥ १८५ ॥

दर्शस्येति। दर्शस्यामावास्यायागस्य अग्निष्टोमयागस्य च दर्शनात् कष्टं महद्दुःखमानशे प्राप। तथा पौर्णमासं यागमीचते एवंशीलः सन् जुघूर्णे बभ्राम। तद्दर्शनेन मुमूर्च्छेत्यर्थः। सोमयागं तु अन्तकमेवामन्यत। तद्दर्शनान्मरणमेवान्वभूदित्यर्थः। अन्यत्रापि ज्वरादिपीडा पश्चान्मूर्च्छा अनन्तरं मरणं भवति ॥ १८६ ॥

तेनादृश्यन्त वीरघ्ना न तु वीरहणो जिनाः।
नापश्यन् सोऽभिनिर्मुक्तान् जीवन्मुक्तानवैचत॥१९७॥
स तुतोपाश्नतो विप्रान् दृष्ट्वा स्पृष्टपरस्परान्।
होमशेषीभवत्सोमभुजस्तान् वीच्य दूनवान्॥१९८॥

तेनेति। तेन कलिना वीरान् शूरान् घ्नन्तीति चत्रधर्मजीविनो धार्मिका अदृश्यन्त। वीरान् श्रेष्ठानाचारवतो घ्नन्तीति वीरहणो जिना न दृष्टाः।शूरा एव यैर्हन्यन्ते न तु सदाचाराः तादृशा महावीरा एव तत्र तेन दृष्टा इत्यर्थः। यद्वा वीरयते शूरो भवति तेजस्वी वह्निस्तं घ्नन्त्युपेचया नाशयन्तीति वीरहणो नष्टाग्नयस्ते पुनर्न दृष्टाः। सर्व्वोऽपि गृहस्थः साग्निक एव तत्रेत्यर्थः। तथा स अभिनिर्मुक्तान् येषु सुप्तेषु सूर्य्योऽस्तमेति तादृशान् सूर्य्यास्तमयसमये निद्रितान् अनाचारांस्तत्र नापश्यन्। किन्तु जीवन्तश्च ते मुक्ताश्च तान् विषयपरित्यागिनो ब्रह्मज्ञानिनोऽवैचत। वीरघ्ना वीरहननयोग्या दृष्टा न तु ये वीरान् हतवन्तस्ते दृष्टाः। वीरमारणमपि तत्र राष्ट्रे न क्रियते इत्यर्थ इति वा।

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च।
अंशुमानभिनिर्मुक्ताभ्युदितौ तु यथाक्रमं॥

इत्यमरः। वीरघ्नाः। मूलविभुजादित्वात् कः॥१९७॥

स इति। स विप्रान् स्पृष्टं परस्परं यैस्तानन्योन्यस्पर्शिनोऽश्नतो भुञ्जानान् दृष्ट्वा तुतोष। उच्छिष्टानां मिथः स्पर्शनिषेधात्तदतिक्रमकारिणः स्वाश्रयत्वेन सम्भाव्य हृष्ट इत्यर्थः।अनन्तरं होम-

श्रुत्वा जनं रजोदुष्टं तुष्टिं प्राप्नोत् झटित्यसौ।
तं पश्यन् पावनस्नानावस्थं दुस्थस्ततोऽभवत्॥ १९९ ॥
अधावत् क्वापि गां वीक्ष्य हन्यमानामयं मुदा।
अतिथिभ्यस्तु तां बद्धा मन्दं मन्दो न्यवर्त्तत॥ २०० ॥

शेषीभवत्सोमभुजः होमावशिष्टःसोमस्तं भुञ्जते सोमलताचूर्णं भुञ्जानास्तान् वीक्ष्य विचार्य्य दूनवान् व्यथितोऽभूत्। न सोमेनोच्छिष्टो भवतीति श्रुतेः। इक्षुदण्डे तिले सोमे नोच्छिष्टं मनुरब्रवीत् इति स्मृतेश्च। सोमभक्षणे ऽनुच्छिष्टत्वादन्योन्यस्पर्शेऽपि पापाभावाद् दुःखितोऽभूदित्यर्थः॥ १९८॥

श्रुत्वेति। असौ कश्चन जनं रजोदुष्टं धूलिनं श्रुत्वा निषिद्धस्त्रीरजःस्पर्शबुद्ध्या खरादिनिषिद्धरजःस्पर्शबुद्ध्या दृष्ट्वा वा स्वाश्रयाशया झटिति शीघ्रं तुष्टिं प्राप्नोत् प्राप्तः। ततोऽनन्तरं विचारावसरे पवनसम्बन्धि पवित्रञ्च यद्गोरजःस्नानं तत्र तेन वा ऽवस्था स्थितिर्यस्य तत्र वावतिष्ठते तं पश्यन् दुस्थो दूनोऽभवत्।

वारुणन्तु जलस्नानमापोहिष्ठेति मन्त्रतः।
वायव्यं गोरजस्नानमाग्नेयं भस्मनोदितम्॥
यत्तु सातपवर्षेण दिव्यं तदिति पञ्चधा।

इति मनुः॥ पावनस्नानस्य धर्म्मत्वात् दूनोऽभूदित्यर्थः। प्राप्नोत्। लङ्। प्राप्त इति वा पाठः॥ १९९॥

अधावदिति। अयं क्वापि यज्ञशालायां गृहे वा हन्यमानां गां वीक्ष्य स्वाश्रयाशया मुदा सन्तोषेणाधावत्। अनन्तरं तु

हृष्टवान् स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजं।
यजमानं निरूप्यैनं दूरं दीनमुखोऽद्रवत्॥ २०१॥
आनन्द निरीक्ष्यायं पुरे तत्रात्मघातिनं।
सर्व्वस्वारस्य यज्वानमेनं दृष्ट्वाऽथ विव्यथे॥ २०२॥

पुनस्तां गां अतिथिभ्योऽभ्यागमनार्थं हन्यमानां बुद्धा मन्दो मूर्खोऽसौ दुःखवशान्मन्दं शनैर्न्यवर्त्तत परावृत्तः। क्षणमपि तत्र स्थातुमशक्तः सन् मन्दः शीघ्रं परावृत्त इति वा। महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति स्मृतेः॥ २००॥

हृष्टवानिति। स द्विजं नित्यानि सन्ध्यास्नानादीनि, नैमित्तिकानि ग्रहणस्नानादीनि त्यजति तमकुर्व्वाणं दृष्ट्वा हृष्टवान् स्वाश्रयाशया जहर्ष। अनन्तरमेनं यजमानं यागे कृतदीक्षं निरूप्य निश्चित्य निराशत्वाद्दीनमुखःसन् अद्रवत् तस्मात् प्रदेशाद्दूरं पलायाञ्चक्रे। दीक्षितो न ददाति न जुहोतीत्यादिश्रुतेः। नित्यनैमित्तिककर्म्मत्यागस्य वैधत्वाद्दोषाभावात् ततोऽपि पलायित इत्यर्थः। नैमित्तिकः। आगतार्थे भवार्थे वा ठक्॥२०१॥

आनन्देति। अयं तत्र पुरे आत्मघातिनं कञ्चन निरीक्ष्याननन्द। सर्व्वत एवात्मानं गोपायेदिति विध्यतिक्रमात् पापकार्य्ययं ममाश्रयः स्यादिति बुद्धा जहर्षेत्यर्थः। अथ विचारणायां मत्यां एनमात्मघातिनं नाम्ना सर्व्वस्वारस्य यज्ञस्य यज्वानं यजमानं दृष्ट्वा ज्ञात्वा विव्यथे। आसन्नमरणो ह्यचिकित्स्यरोगार्तस्वाधिकारी। सोऽन्वेष्टो सर्व्वस्वाराख्ये यज्ञे आत्मानमेव पशु-

क्रतौ महाव्रते पश्यन् ब्रह्मचारीत्वरीरतं ।
जज्ञे यज्ञक्रियामज्ञः स भण्डाकाण्डताण्डवं ॥ २०३ ॥
यज्वभार्य्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गतां ।
दृष्ट्वाचष्ट स कर्त्तारं श्रुतेर्भण्डमपण्डितः ॥ २०४ ॥

मन्त्रैः संज्ञप्तं घातयित्वा यज्ञभागमर्पयतीति श्रुतिः । वैधत्वादात्मघाते दोषाभावात् व्यथित इत्यर्थः । आत्मघातिनं । ताच्छील्ये णिनिः ॥ २०२ ॥

क्रतावि‍ति । स महाव्रताख्ये क्रतौ ब्रह्मचारी इत्वरी च तयोरतं मैथुनं पश्यन् यज्ञक्रियां भण्डानामसभ्यभाषणादिव्यापारशीलानामकाण्डताण्डवमसमयोद्धतनृत्यमिव जज्ञे मेने । यतोऽज्ञो मूर्खः । भण्डा यथा बहुजनसमक्षं गुह्यादि प्रकाशयन्ति तथा द्विवैव बहुजनसमक्षमश्लीलव्यापारकरणात् यागकर्म्म भण्डव्यापारतुल्यमिति । यज्वानः सर्व्वेऽप्यसभ्या इति मेने इत्यर्थः । महाव्रते ब्रह्मचारिपुंश्चल्योः सम्प्रवाद इत्युपनिषत् । एति तच्छीलेत्वरी स्वैरिणी, इणनशेति (पा० ३।२।१६३) क्करपि तुकिच, टिड्ढाणञीति (पा० ४।१।१५) ङीप् ॥ २०३ ॥

यज्वेति । स यज्वनो यजमानस्य भार्य्याया अश्वमेधाख्यस्य यज्ञस्याश्वस्तस्य लिङ्गमालिङ्गत्येवंशीलं वराङ्गं गुह्यं यस्यास्तस्या भावस्तत्ता तां दृष्ट्वा श्रुतेर्वेदस्य कर्त्तारं भण्डमाचष्ट अकथयत् द्वापरस्याग्र इत्यर्थ. । उन्मत्तत्वादात्मानं प्रत्येव वा । यतोऽपण्डितः शास्त्रानुसारिपण्डितबुद्धिरहितः ।

अथ भीमजया जुष्टं व्यलोकत कलिर्नलं ।
दुष्टदृग्भिर्दुरालोकं प्रभयेव प्रभाप्रभुं ॥ २०५ ॥
तयोः सौहार्दसान्द्रत्वं पश्यन् शल्यमिवानशे ।
मर्मच्छेदमिवानर्च्छ स तन्नर्मोक्तिभिर्मिथः ॥ २०६ ॥

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

इति राजाज्ञावन्निर्विचारं वेदार्थोऽनुष्ठेयः । अश्वमेधप्रकरणे ऽश्वस्य शिश्नं महिष्या उपस्थे निधत्ते इत्यादि श्रुतेः कर्त्ता भण्ड इति श्रुतिकर्त्तुर्भण्डत्वाभिधानान्मूर्खः ॥ २०४ ॥

अथेति । अथैवं पुरपरिभ्रमवशादनन्तरं कलिर्भीमजया भैम्या जुष्टं प्रीत्या सेवितं नलं व्यलोकत । कमिव । प्रभया संज्ञादेव्या ऽथवाऽमत्यतेजोजुष्टं प्रभाप्रभुं सूर्य्यमिव । किम्भूतमुभयं । दुष्टा मत्सरादिदोषोपहता दृग्बुद्धिर्येषां तैः पापलोकैर्दुरालोकं । पुण्यश्लोकत्वात् पतिव्रतया तया च युक्तत्वात् कलिप्रभृतिभिः सुखेन द्रष्टुमशक्यं, काचकामलादिदोषदृग्भिर्दुर्दर्शञ्च । प्रकृष्टाभा कायकान्तिर्यस्या इति भैमीविशेषणञ्च प्रकृष्टया कायकान्त्या याथिभिर्दुरालोकं खलु, तद्योगे च न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद् दुष्टदृग्भिरिति तृतीया ॥ २०५ ॥

तयोरिति । स तयोर्भैमीनलयोः सौहार्दसान्द्रत्वं अन्योन्यानुरागोत्कर्षं पश्यन् शल्यमिव हृदि नाराचव्यथमिवानशे प्राप । तमुत्पदुःखोऽभूदित्यर्थः । तथा मिथोऽन्योन्यं तथा नर्मोक्तिभिः

अमर्षादात्मनो दोषात्तयोस्तेजस्विताग्गुणात् ।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत् कलिः ॥ २०७ ॥
अगच्छदाश्रयान्वेषी नलद्वेषी स निश्वसन् ।
अभिरामं गृहारामं तस्य रामसमश्रियः ॥ २०८ ॥

क्रीडाकल्लोले प्रीत्यालिङ्गनचुम्बनादिभिरनुभावैः कृत्वा मर्म-च्छेदमिव प्राणहरणशरीरावयवकर्त्तनमिव आनर्च्छ प्राप। सौहार्दसान्द्रत्वस्य कारणत्वादालिङ्गनादिनर्मणस्सैकार्थत्वान्न पौनरुक्त्याशङ्का । सौहार्दं । युवादित्वाद्भावे अणि, हृद्भग (पा० ७।३। १९) इत्युभयपदवृद्धिः ॥ २०६ ॥

अमर्षादिति । कलि अमर्षात् भैमीनलप्रीतिनर्मासहनशीलत्वरूपाद्रोषात्, तथा आत्मनो महापातकादिरूपाद्दोषाद्धार्मिकाश्रयणाशक्तेः, तथा तयोर्भैमीनलयोस्तेजस्विताग्गुणात् सौन्दर्यातिशयात् चात्रतेजसस्साधर्षणीयत्वरूपाद्गुणादित्येव हेतुत्रयात् तौ भैमीनलौ न परं मनसा किं दृशापि न पुनरङ्गेनापि स्प्रष्टुमनीशोऽसमर्थः किं पुनर्हस्तादिना । एवम्भूतौ यतोऽतस्तस्मान्नलावासात् प्रासादादपि सकाशात् कलिर्निर्गतः। एवंविधौ तौ दृष्ट्वा तत्रापि प्रवेष्टुमशक्तस्ततोऽपि प्रस्थित इत्यर्थः ।अन्योऽपि मलिनस्तेजस्विनं दृशा वीक्षितुमशक्तस्ततः पलायते ॥ २०७ ॥

अगच्छदिति । नलद्वेषी नलद्वेषपरः अत एव तत्पराभवार्थमाश्रयान्वेषी निवासं मृगयमाणः कुत्रचिदपि तदलाभाद्दुःखादमर्षेण च निश्वसन् स कलिः रामेण श्रीरामेण समा तुल्या श्रीः शोभा सम्पद् यस्य तस्य नलस्याभिरामं गृहादिस-

रचिखचवृतत्वेन बाधनं न तपोधनैः ।
मेने मानी मनाक् तत्र खानुकूलं कलिः किल ॥ २०९ ॥

ऋद्धिमत्त्वाद्रमणीयं गृहारामं प्रासादसमीपवर्त्ति क्रीडावनं अगच्छत् गतवान् । समीपे स्थितौ क्रियमाणायां नलद्रोपविचारः सुकर इति गृहारामं प्राप्तवानित्यर्थः । श्रीरामसाम्ये नलस्य पावित्र्यं सौन्दर्यं सम्पदाधिक्यं भाविराज्यपरित्यागश्चेति सूचितं । तदानीं रामस्य भावित्वे कव्यपेक्षया भूतलात् प्रवाहस्थानादितया वा भूतलादुपमा युक्तैवेति ज्ञेयं ॥ २०८ ॥

रचोति । कलिः तत्र पुरे रक्षिणां खचं मह्रस्तेन यद्वृतलं परिवेष्टितलं तेन हेतुना प्रवेष्टुमशक्यत्वात्तपोधनैः कृत्वा न बाधयतीति न बाधनमेवम्भूतं मेने विशेषणबलाद्विशेष्याक्षेपात् तमारामं खचितं मेन इत्यर्थः । यतो मानी अभिमानवान् । नलपराभवार्थं तत्रैव निवासवाञ्छामदधदित्यर्थः । किल प्रसिद्धौ । रचिखचवृतत्वेनैव बाधकं न पुनस्तपोधनैर्बाधकमतस्तत्र पुरे तमाराममेव मनाक् खचितं मेने इत्यर्थः । रचकबाधे सत्यपि अदृश्यतयापि स्वस्य प्रवेष्टुं शक्यत्वान्न तु तपोधन इति मनागित्युक्तं । एवं सङ्कटे किमिति न्यवासीदित्यत आह । यतो मानी । अभिमानवान् साधनीयेऽर्थे सङ्कटमपि मानिनः सहन्त इत्यर्थ इति वा । रचकवृतत्वेन मुनिकर्तृकं बाधनं मनागपि तत्रारामे नासीदिति तं खानुकूलं तामसानां तत्र प्रवेशाभावात् तापसनिमित्तस्वबाधारहितं अत एव मनागीषत् खानुकूलं स्वपक्षे हितमेवंविधं मेन इति वा ॥ २०९ ॥

दलपुष्पफलैर्देवद्विजपूजाभिसन्धिना।
स नलेनार्जितान् प्राप तत्र नाक्रमितुं द्रुमान्॥ २१०॥
अथ सर्व्वोद्भिदासत्तिपूरणाय स रोपितं।
विभीतकं ददर्शैकं कुटं धर्म्मेऽप्यकर्म्मठं॥ २११॥
स तं नैषधसौधस्य निकटं निष्कुटध्वजं।
बहु मेने निजं तस्मिन् कलिरालम्बनं वने॥ २१२॥

दलेति। स कलिः तत्रोद्याने वने दलैः पत्रैः पुष्पैः फलैश्च कृत्वा देवानां अतिथीनाञ्च पूजा तद्विषयेणाभिसन्धिनाऽऽशयेन कृत्वा देवद्विजपूजैवाभिसन्धिराशयो यस्यैवंविधेन वा, दलादिभिर्देवपूजां कर्त्तुकामेन नलेनार्जितानारोपितानाम्रादिद्रुमान् आक्रमितुं आरोढुमाश्रयितुञ्च न प्राप। तेषां धर्म्मोपयोगित्वात् स्वस्य च पापरूपत्वात् तानाश्रयितुं नाशकदित्यर्थः॥ २१०॥

अथेति। अथ स कलिः धर्म्मे धर्म्मकार्य्ये विषयेऽकर्म्मठमकर्म्मशूरमपि पित्रादीनां देवाद्यनुपयोगाद्धर्म्मकार्य्यानर्हमपि सर्व्वेषामुद्भिदां वृक्षाणामासक्तेः सान्निध्यस्य पूरणाय वृक्षलतागुल्मादिजातिमात्रास्तीति कीर्त्तिपूर्त्तिमात्राय तत्रोद्याने नलेन आरोपितमेकं सर्व्ववृक्षासक्तिपूरणस्यैकेनैव कृतत्वादेकसंख्यं विभीतकं कुटं वृक्षं ददर्श। अनोकहः कुटः शाल इत्यमरः। कर्म्मठः। कर्म्माणि घटत इति कर्म्माणि घटोऽठच्। (पा॰५।२।३५)। कर्म्मशूरस्तु कर्म्मठः। उद्भिदस्तरुगुल्माद्या इत्यमरः॥ २११॥

स इति। तस्मिन् वने नैषधसौधस्य निकटं समीपवर्त्तिनं

निष्पदस्य कलेस्तत्र स्थानदानाद्विभीतकः।
कलिद्रुमः परं नासीदासीत् कल्पद्रुमोऽपि सः॥ २१३॥
ददौ पदेन धर्मस्य स्थातुमेकेन यत् कलिः।
एकः सोऽपि तदा तस्य पदं मन्येऽमिलत्ततः॥ २१४॥

निष्कुटस्य गृहारामस्य ध्वजं लाञ्छनभूतं अथ चोच्चोच्चतरत्वात् ध्वजमिव तदग्रस्थित्या नलदर्शनवशात्तदीयदोषविचारोपाय-भूतं तं विभीतकं निजं स्वीयमालम्बनमाधारं बहु मेने। गृहा-रामास्तु निष्कुटा इत्यमरः॥ २१२॥

निष्पदस्येति। तत्र पुरे वने च निष्पदस्याश्रयरहितस्य कलेः स्थानदानात् स्वेनैव तदाधारभूतत्वात् स विभीतकः केवलं निवासभूतत्वात् कलिद्रुमः कलिसम्बन्धी द्रुमः परं केवलमा-सीदिति न किन्तु कलिं प्रत्यभिलाषपूरणात् कल्पद्रुमोऽप्यासीत्। अन्योऽपि निराश्रयस्याश्रयदानात् कल्पद्रुमत्वेन व्यपदिश्यते। भूतावासः कलिद्रुम इत्यमरः॥ २१३॥

पापिना कलिना विभीतकं स्थानं प्राप्तमित्यत्र हेतुमुत्प्रेक्षते ददाविति। यद् यस्माद्धेतोः कलिः प्रवाहानादितयाऽतीते कलियुगसमये धर्मस्यैकेन पदेन चतुर्थांशेन पदं स्थानं ददौ तत्तस्मात् तदा नलराज्यसमये कृतयुगे स विभीतकोऽपि एक एव तस्य कलेः पदं चरणोऽथ च स्थानममिलत् सञ्जात इत्यहं मन्ये। कृतं कर्म भुज्यते इति न्यायेन कालान्तरे यावत् दत्तं

उद्भिद्विरचितावासः कपोतादिव तत्र सः।
राज्ञः साग्नेर्द्विजात्तस्मात् सन्त्रासं प्राप दीक्षितात्॥ २१५॥

तावदेव तदानीं तेन लब्धमित्यहं मन्य इत्युत्प्रेक्षा। धर्मस्य सम्बन्धमात्रविवक्षया षष्ठी॥ २१४॥

उद्भिदिति। तत्रोद्याने उद्भिदि वृक्षे विभीतके विरचित आवासः स्थितिर्येन स कलिः साग्नेरग्निहोत्रवतो द्विजात् क्षत्रियात् तथा दीक्षितात् स्वीकृताग्निहोत्रादियागदीक्षादस्माद्राज्ञः अभिषेकादिगुणयुक्तात् नलात् सकाशात् सम्यक्त्रासं महाशापनिग्रहं प्राप। राज्ञो द्विजादित्येताभ्यां स्वाभाविकं निग्रहे सामर्थ्यं सूचितं। साग्नेर्दीक्षितादित्येताभ्याञ्च तपोजनितं शापे सामर्थ्यं सूचितं। एवंविधोऽयं समीपस्थितं मां निग्रहेण ज्ञास्यति शापं दास्यतीत्यन्तर्भयद्वयं प्रापेत्यर्थः। अग्निहोत्रिणो नलस्य सम्बन्धिनः कृतयज्ञदीक्षात् तस्मादतिप्रसिद्धाद् द्विजात् ब्राह्मणाद् गौतमाख्यात् पुरोधसः सकाशात् भयं प्राप। नलाग्निहोत्रादिपरिचर्य्यार्थं तत्र वर्त्तमानात् स्वयमग्निहोत्रादिदीक्षायुक्ताच्च गौतमात् पुरोधसः सकाशाद्भीत इत्यर्थ इति वा। कस्मादिव कपोतादिव। यथाऽग्निसहितादङ्गारभक्षिणः तथा दीक्षितात् कपोतनाम्नो द्विजात् पक्षिणः सकाशात् वृक्षे विरचितावासः काकादिः पक्षी पुरुषो वा वृक्षारूढो वृक्षाधःस्थायी वा भयं प्रापत् पूर्व्वं कदाचित्तथेत्युपमा। स यथा प्राप्नोति तथेत्यर्थः। अग्निः कपोतजठरमन्तःप्रविष्टोऽतएव तद्भक्षिता

विभीतकमधिष्ठाय तथाभूतेन तिष्ठता ।
तेन भीमभुवोऽभीकः स राजर्षिरधर्षि न ॥ २१६ ॥

पाषाणकणिकापि जीर्यत इत्यैतिह्यं । साग्नेरङ्गारभक्षिणः । कपोतविशेषो ह्यङ्गारान् भक्षयति । उल्किदा तृणकाष्ठादिना निर्म्मितगृहः पुरुषोऽग्न्युद्गारित्वात् स्वोपवेशनमात्रेण गृहदाहाद्यनिष्टसूचकात् गृहोपरि विलोकनात् कपोतो ह्युलूकपक्षिणः सकाशाद्यथा भयं प्राप्नोति तथाऽसावपि प्राप्तकपोतो हि गृहं प्रविष्टोऽनिष्टसूचकः। एवमद्भुतकर्म्मणोऽपि स्थूलोच्चवृक्षादिरोहिणो दूरात् कपोतात्तद्वृक्षवासी पक्षी नरो वा स्वस्यापि भक्षणशङ्कया शाखापतनशङ्कया वा यथा बिभेति तथेत्यर्थः । एवं यथामति व्याख्यातव्यं ॥ २१५ ॥

विभीतकमिति । विभीतकमधिष्ठायाश्रित्य तथाभूतेन तिष्ठता तस्य धर्म्मोपयोगाभावात् भयराहित्येन स्थितवता अथ च तादृशनलदर्शनात् पूर्व्वोक्तप्रकारेण बिभ्यता अत्यन्तास्थिरेण कलिना भीमभुवोऽभीकः भैम्याः कामुकः स राजा चासाविषि राजत्वेऽपि धर्म्मप्रधानत्वान्मुनितुल्यो नलो नाधर्षि न पराभूतः । अपराभवे राजर्षित्वमेव हेतुः । अथ च विभीतकतुल्यं तत्कमाश्रित्य तिष्ठता तथाऽतिमहता भूतेन भूतत्वं प्राप्तेन केनचित् प्रेतेन पिशाचेन भीमाया भयानकाया भूमेः रणभूमेरद्रिभूमेर्वा हेतोरभीको भयरहितो राजर्षिर्धार्म्मिको न पराभूयत इत्युचितं । भीमां भूमिमगनादृत्य निर्भय इत्यर्थः । अनादरे षष्ठी ॥ २१६ ॥

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः ।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान् बहून् ॥ २१७ ॥
यथासीत् कानने तत्र विनिद्रकलिका लता ।
तथा नलच्छलासक्तिविनिद्रकलिकालता ॥ २१८ ॥
दोषं नलस्य जिज्ञासुर्बभ्राम द्वापरः चितौ ।
नदोषः कोऽपि लोकस्य मुखेऽस्तीति दुराशया ॥ २१९ ॥

तमिति। कलिः तं विभीतकं आलम्बनमाश्रयमासाद्य प्राप्य वैदर्भीनिषधेशयोः कलुषं पापाचरणमन्विष्यन् गवेषयितुमित्यर्थः, बहून् वत्सरानवात्सीत् दोषसंस्पर्शनेन विना तयोः पराभवे ऽशक्तत्वाद्दोषपरीक्षार्थं बहुकालं तत्रैव स्थितवानित्यर्थः। अन्विष्यन्। क्षितौ शता। अवात्सीत्। वसेर्लुङि, सिचि, वद व्रजेति (पा० ७।२।३) वृद्धौ, सस्यार्द्धधातुक इति(कौ०।भा०।पत्र१२०।पंक्तिः ८।वा०) तत्वम्। वत्सरान्। अत्यन्तसंयोगे द्वितीया ॥२१७॥

यथेति। तत्र कानने तस्मिन्नुद्याने यथा येन प्रकारेण विनिद्रकलिका विकसितकोरका लता वल्ली आसीत् तथा तेन प्रकारेण नलस्य छले आसक्तिरभिनिवेशस्तद्दशादिगतनिद्रो जागरूकः सावधानः कलिलक्षणः कालः समयो यत्र तद्भावस्तत्ता सापि तत्र वने आसीत्। सदा विकसितकोरकवल्लीसम्बन्धस्योद्यानस्य यथाभूत् तथा सदा कलिसम्बन्धोऽप्यभूदित्येतावन्मात्रेण श्लेषमात्रेण चौपम्यं। नलच्छलनार्थं नलदोषान्वेषणार्थञ्च जागरूकः स कलिस्तत्रावात्सीदित्यर्थः ॥ २१८ ॥

एवं कलेरवस्थानं निरूप्य द्वापरस्यावस्थानमाह। दोषमिति।

अमुष्मिन्नारामे सततनिपतद्दोहदतया
प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
असौ बद्धालम्बः कलिरजनि कादम्बविहग-
च्छद च्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥ २२० ॥

लोकापवादरूपं अभिशस्तिरूपं वा नलस्य दोषं जिज्ञासुर्द्वापर इत्यघटमानया दुराशया चिरं बभ्राम । इति किं । लोकस्य मुखे जनवार्त्तायामदोषो दोषरहितः कोऽपि नरो नास्ति सर्व्वो जनो यं निर्दोषमाह तादृशः पुरुष एव नास्तीति नलस्यापि किञ्चिद्दोषं कोऽपि वदिष्यतीति । न दोष इति पाठे लोकोक्त्यल्पोऽपि दोषो नास्ति अपि तु प्रायेण भविष्यतीति दुराशयेति काका सम्भावनापरत्वेन व्याख्येयम् । दोषं । न लोकेति (पा० २।३।६९) षष्ठीनिषेधः ॥ २२९ ॥

अमुष्मिन्निति । असौ कलिः श्यामपक्षहंसजातीयाः कादम्बविहगाः कलहंसाख्यपक्षिविशेषाः तेषां छदाः पक्षाः तेषां छायायाः कान्तेरभ्यङ्गे उचितो योग्यो तैलाभ्यङ्गेनैव स्वसंस्पर्शमात्रेण स्नैग्ध्यातिशयकारिणी श्यामतरा रुचिः कान्तिर्यस्य तस्य भावस्तत्ता तया कृष्णवर्णतया वनचन्द्रे लाञ्छनमृगोऽजनि कलङ्कमृगोऽभूत् । किम्भूतः । सततं सदा निपतन् निक्षिप्यमाणो धूमादिर्दोहदो यत्र तस्य भावस्तता तया अनिशं सदा उन्निद्रैर्विकसितैः प्रसूनैर्मालत्यादिसितपुष्पैः कृत्वा उज्ज्वलत्वादानन्ददायित्वाच्चामृतांशोश्चन्द्रस्य प्रतिभटे प्रतिस्पर्द्धिनि चन्द्रतुल्येऽमु-

स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनं
विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन् किलासीत् कलेः।

स्मिन् पूर्व्वोक्ते आरामे नलोद्याने बद्धः कृत आलम्बो वासो येन सः। चन्द्रे हि कलङ्केन भवितव्यं तत्स्थाने कलिरेवाभूदिति। एतेन निर्दोषे नलोद्याने कलिरेव दूषकोऽभूदित्युक्तम्। तत्र न्यवात्सीदित्यर्थः। पुष्पफलानामाकालिकसमृद्धये वृक्षेषु वृक्षायुर्वेदोक्तो धूपादिदोहदः क्रियते, तथा चम्पके पिण्याकादिजलक्षेपः, वकुले सुन्दरीगण्डूषजलमदिरासेकः, रक्ताशोके च तरुणीचरणप्रताडनमित्यादिः॥ २२०॥

स्फार इति। स्फारे विशालतरे तादृशि उक्तप्रकारेण धर्म्मबहुले स्फारत्वेऽपि सर्व्वत्र धर्म्मपूर्णे वैरसेनिर्नलस्तस्य नगरे प्रजानां पुण्यैर्हेतुभिर्घनं भूयांसं विघ्नं लब्धवतः प्राप्तवतो निराश्रयस्य कलेस्तस्मिन् नलोद्याने चिरात् बहुकालं नलदोषगवेषणार्थं उपनतिरवस्थितिः किलाभूत्। किलेति पुराणादौ श्रूयत इत्यर्थः। प्रजानां पुण्यैः स्फारे व्याप्त इत्यर्थ इति वा हेतुगर्भविशेषणम्। एतस्मिन्नन्तरेऽवसरे पुनरन्योन्ययोग्यमेलनाद्नर्मनसि अमितानन्दः प्राप्तनिःसीमहर्षः स प्रसिद्धप्रभावः स्मरो भैमीनलौ आराद्धुं सेवितुं सुतरां पीडयितुं वा धनुः श्रुतिशिखा कर्णाङ्कदेशस्तां वन्दारुः स्पर्शिनी चूडा अग्रभागो यस्य एवंविधमाकर्णपूर्णं व्यधित चकार। भैमीनलौ नगरं प्राप्तौ सुरेषु स्वर्गतेषु कलौ च वनालम्बिनि सति इतरेतरानुरागा-

एतस्मिन् पुनरन्तरेऽन्तरमितानन्दः स भैमीनला-
वाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥ २२१ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
यातः सप्तदशः स्वसुः सुसदृशि छन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ २२२ ॥

समाप्तः सप्तदशः सर्गः।

तिशयेन चिरविरहातिसस्पृहौ स्मराराधनं चक्रतुरिति भावः। अनेनोत्तरसर्गे सम्भोगारम्भवर्णनात् सङ्गतिः सूचिता। कलिकर्तृकपराभवस्य भविष्यत्त्वान्नायकापकर्षस्यावर्णनीयत्वाच्च स नोक्तः ॥ २२१ ॥

श्रीहर्षमिति। पूर्वार्द्धः पूर्ववत्। एककर्तृकत्वात् स्वसुर्भगिन्याः छन्दस्य राजविशेषस्य प्रशस्तेर्वर्णनात् ग्रन्थस्य सुसदृशि तुल्ये तद्भुवि श्रीहर्षरचिते सप्तदशानां पूरणो निसर्गोज्ज्वलः स्वभावसुन्दरः सर्गः समाप्तः। छन्दप्रशस्तिरपि ग्रन्थो मया कृत इति सूचितं। सोदर्याश्च तुल्या भवन्ति। छन्दःप्रशस्तेरिति पाठे छन्दोग्रन्थक्रमस्वरूपनिरूपणापरस्य ग्रन्थस्येत्यर्थः। सप्तदश इति तस्य पूरण इति(पा॰ ५।२।४८) डट्। तद्भुवि। भाषितपुस्कम् ॥ २२२ ॥

इति वेदरकरोपनामकनरसिंहपण्डितात्मजनारायणविरचिते नैषधीयप्रकाशे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयत.।

सोऽयमित्थमथ भीमनन्दिनीं
दारसारमधिगम्य नैषधः।
तां तृतीयपुरुषार्थवारिधेः
पारलम्भनतरीमरीरमत्॥ १॥

सोऽयमिति। सर्गसङ्गतिरुक्तैव। सोऽयमुक्तसौन्दर्यादिगुणप्रभावो नलः, इत्थमुक्तप्रकारेण त्रैलोक्यनायकसमक्षं दारसारं स्त्रीरत्नभूतां तामिन्द्रादिभिरप्यभिलष्यमाणां भीमनन्दिनीमधिगम्य तृतीयपुरुषार्थवारिधेः कामरूपदुरवगाहजलधेः सम्बन्धिनीं पारलम्भनतरीं परतीरप्रापणनौकारूपां तां भैमीं अरीरमत् रमयामास। तादृश्या विना कामपुरुषार्थपारं कामशास्त्रोक्तनानारतपारं न प्राप्यत इत्यनेन सौन्दर्यानुरागातिशयः सूचितः। अन्यापि तरी वारिधेः पारं प्रापयति। तारणतरीमित्यपि पाठः। अरीरमत्। रमेर्ण्यन्ताल्लुङि चङि सन्वद्भावादित्वादिः॥ १॥

आत्मवित् सह तया दिवानिशं
भोगभागपि न पापमाप सः।
आहृता हि विषयैकतानता
ज्ञानधौतमनसं न लिम्पति ॥ २ ॥
न्यस्य मन्त्रिषु स राज्यमादरा-
दारराध मदनं प्रियासखः।

अनुरागातिशयादहोरात्रं तत्सम्भोगे दोषमाशङ्क्य परिहरति। आत्मविदिति ॥ स नलस्तया सह दिवानिशं भोगभाक् सन्नपि दिवामैथुननिषेधातिक्रमजनितं पापं नाप। यत आत्मवित् जीवब्रह्माभेदबुद्धिमान्। उक्तमर्थं युक्त्यन्तरेण द्रढयति। हि यस्मात् आहृता कृत्रिमा विषयैकतानता स्रक्चन्दनादिविषयपरता ज्ञानेन परमात्मज्ञानेन धौतं क्षालितं कामक्रोधादिमलितं मनो यस्य तं पुरुषं न लिम्पति पापसंस्पर्शिनं न करोति। स्वाभाविकी हि विषयपरता पापसञ्चयकारिणी, परमात्मज्ञानवतस्तु सा न भवति, किन्तु भोगात् पूर्वं कर्मक्षयार्थमेव सा विषयपरताङ्गीकार्या। आहार्या विषयपरता ब्रह्मज्ञानिनं पापिनं न करोतीति आत्मवित् स पापं नाप्नोतीति युक्तमेवोक्तमित्यर्थः। विषयपरताया आहार्यत्वे दोषाभावाद्दिवारात्रं तया सह चिक्रीडेत्यर्थः। दिवानिशं। अत्यन्तसंयोगे द्वितीया ॥ २ ॥

दिवानिशं सम्भोगे राज्यरक्षणं कथमित्यत आह। न्यस्येति ॥

नैकवर्णमणिकोटिकुट्टिमे
हेमभूमिभृति सौधभूधरे ॥ ३ ॥
वीरसेनसुतकण्ठभूषणी-
भूतदिव्यमणिपंक्तिशक्तिभिः ।
कामनोपनमदर्थतागुणाद्
यस्तृणीकृतसुपर्व्वपर्व्वतः ॥ ४ ॥

स नलो मन्त्रिषु राज्यं न्यस्य नैकवर्णमणिकोटिकुट्टिमे नानावर्णरत्नसमूहबद्धभूमिके तथा हेमभूमिभृति सुवर्णभूमिधारिणि सौधभूधरे प्रासादरूपेऽत्युच्चे पर्व्वते प्रियासखः सन् मदनमादरादासक्त्या आरराध सिषेवे। प्रियासख इत्यालम्बनविभावः। कामस्य धर्म्मविषयत्वञ्च सूचितं। अत एव तद्दर्शनं प्रस्तौति। नैकवर्णेत्यादिविशेषणसामर्थ्याद् भूधरो हेमाद्रिः सौधभुवं धरति नलप्रासादाकारेण परिणते ऽनेकवर्णमणिकुट्टिमे हेम्नः सुवर्णस्य भूमिभृति पर्व्वते हेमाद्रौ प्रासादसौन्दर्य्यमुच्चत्वञ्च सूचितं। इत आरभ्य तत्र सौधेति यावन्महाकुलकं ॥ ३ ॥

वीरसेनेति। यः सौधभूधरो वीरसेनसुतस्य कण्ठभूषणीभूता दिव्या मणयस्तेषां पङ्क्तिर्यैनकलब्धोत्तमचिन्तामणिमाला तस्याः शक्तिभिरलौकिकसामर्थ्यैः कृत्वा कामनयाभिलाषमात्रेणोपनमन्तः सन्निहितीभवन्तो नलेनान्येन वा लभ्यमाना दृष्टा अर्थाः पदार्था यत्र तद्भावस्तत्ता सैव गुणस्तस्माद्धेतोस्तृणीकृतः सुपर्व्वणो देवानां पर्व्वतो मेरुर्येन सः। सर्व्वार्थदायिचिन्तामणि-

धूपितं यदुदराम्बरं चिरं
मेचकैरगुरुसारदारुभिः।
जालजालसृतचन्द्रचन्दन-
क्षोदमेदुरसमीरशीतलं ॥ ५ ॥
क्वापि कामशरवृत्तवर्त्तयो
यं महासुरभितैलदीपिकाः।
तेनिरे वितिमिरं स्मरस्फुर-
त्तेजःप्रतापनिकराङ्कुरश्रियः ॥ ६ ॥

रत्नस्य मेरावश्च च विद्यमानत्वाच्चो मेरुतुल्य इत्युपमा। अत्र बहूनां चिन्तामणीनां सद्भावात्ततोऽप्याधिक्यं वा ॥ ४ ॥

धूपितमिति। मेचकैः श्यामलैरगुरुसञ्ज्ञकैः सारैः श्रेष्ठैर्दारुभिः काष्ठैश्चिरं यदुदराम्बरं यदीयो गर्भभागो धूपितं वासितं यदुदराम्बरं धूपार्थं दह्यमानैस्तैरर्पितपरिमलमित्यर्थः। तथा धूपजसन्तापत्याजनाय जालप्रकारेषु जालजालेषु सर्व्वेषु गवाक्षेषु जालानां वा जालेषु गवाक्षसङ्घेषु सृतः स्थापितः चन्द्रचन्दनक्षोदः कर्पूरचन्दनचूर्णकल्पितेन मेदुरः पुष्टस्तत्सर्ववशाच्छिशिरतरः परिमलबहुलश्च यः समीरो वायुस्तेन शीतलं शीततरं। सर्व्वेऽप्येते उद्दीपनविभावाः। जालजाले। प्रकारे द्विरुक्तिः, षष्ठीसमासो वा ॥ ५ ॥

क्वापीति। महासुरभिचम्पकादिद्रव्यसुगन्धि तैलं यासु एवंविधा दीपिका यं सौधभूधरं क्वापि भैमीनलालङ्कृतदेशे विति-

कुङ्कुमैणमदपङ्कलेपिताः
क्षालिताश्च हिमवालुकाम्बुभिः ।
रेजुरध्वततशैलजस्रजो
यस्य मुग्धमणिकुट्टिमा भुवः ॥ ७ ॥

मिरं विगतान्धकारं तेनिरे प्रकाशमानगर्भेश्चक्रुः। किम्भूताः।
कामशरवृत्ताः कामबाणवर्त्तुलाः कामशरेण कर्पूरेण धूपविशेषेण वा वृत्ता निष्पन्ना धूपकर्पूरगर्भा वर्त्तयस्तन्तुसद्धरचिता दीपाधारभूता देशा यासान्ताः। तथा स्मरस्य मैमीनलव्ययार्थं स्फुरन् दोःप्रतापनिकरस्तस्याङ्कुराणां प्रथमोद्भेदानामिव श्रीः-शोभा यासान्ताः। एतादृशनायिकादर्शनमात्रेण कामोत्पत्तेस्तुल्यरूपत्वाच्च दीपिकाः कामप्रतापाङ्कुरा इवेत्युपमोत्प्रेक्षा। राजनिकटस्था दीपाः कर्पूरादिवृत्तवर्त्तयः क्रियन्ते।

पूरसर्ज्ज्यभयालाचा नखाब्जाद्जटागदैः।
समैः समधुभिर्धूपो मतः कामशराभिध ॥

इति कामशरो धूपः ॥ ६ ॥

कुङ्कुमेति। यस्य मुग्धानि रमणीयानि मणिकुट्टिमानि यासु ता भुवो रेजुः। किम्भूताः। कुङ्कुमञ्च एणमदः कस्तूरी च तयोः पङ्केन कर्द्दमेन लेपिताः। तथा जलमध्ये निःक्षेपाद्द्रवीभूतहिमवालुकाम्बुभिः कर्पूरवासितोदकैः क्षालिताश्च। तथाऽध्वनि नलागमनमार्गे तता विस्तारिता मृदुसुगन्धयः शैलजा हिमवत्प्रसुद्भूतमालत्यादिस्रजो माला यासु ताः। अतिस्निग्धमार्गगन्धार्थं

नैषधाङ्गपरिमर्द्दमेदुरा-
मोदमार्द्दवमनोज्ञवर्णया।
यद्भुवः क्वचन सूनशय्यया
ऽभाजि भालतिलकप्रगल्भता॥ ८॥

पूर्वं कुङ्कुमकस्तूरीलेपः कृतोऽनन्तरञ्च तत्पङ्कस्पर्शभिया कर्पूर-जलैः क्षालनं कृतं तेनाधिकसौगन्ध्यं जातं। अनन्तरञ्च भैमी-नलचरणयोर्मृदुत्वान्मार्गे मणिबद्धभूकाठिन्यपरिहारार्थं मृदु-तरशैलजप्रक्षेप इति। पाठक्रमादर्थक्रमो बलीयानिति पूर्वं कर्पूरोदकैः क्षालिताः, पश्चाद्रोमर्यस्थानीयकुङ्कुमकस्तूरीपङ्केन कृताङ्गोद्वर्त्तनाः, अनन्तरञ्च धृतशैलेयमाला धृतसुन्दरमणि-खचितभूषणाः सत्यः शुभ्रभिर इति वा। यद्वेत्यपि पाठः। वालुकांशुभिरिति पाठे शुभ्रकर्पूरचूर्णैः क्षालिताङ्कुरिताः कृतरङ्गमालिका इत्यर्थः। अत्र शाब्दोऽपि क्रमो घटते। लेपि-ताः। एल्वालिङ्गा॥ ७॥

नैषधेति। क्वचन नलनिद्रास्थानदेशे सूनशय्यया पुष्परचि-तास्तरणेन यस्य सौधस्य सम्बन्धिन्या भुवो भूमेर्भालस्य ललाटस्य तिलकस्तस्य प्रगल्भता रमणीयता ऽभाजि धृता। पुष्प-शय्या भूमेर्ललाटतिलक इव रेजे इत्यर्थः। कीदृश्या। नैषधाङ्गस्य नलाङ्गस्य परिमर्द्देन संस्पर्शेन वरुणस्य वरदानसामर्थ्यान्मेदुरो नितरामधिकीभूत आमोदः सौरभ्यं मार्द्दवं मनोज्ञः सर्द्देवा-म्लानत्वात् सुन्दरो वर्णश्च यस्यास्तया। तिलकोऽपि कस्तूर्यादि-

क्वापि यन्निकटनिष्कुटस्फुट-
त्कोरकप्रकरसौरभोर्मिभिः ।
सान्द्रमाद्रियत भीमनन्दिनी-
नासिकापुटकुटीकुटुम्बिता ॥ ९ ॥

निर्मितत्वात् सुगन्धिः सुवर्णश्च भवति। अथ च यद्गृहसम्बन्धिनि क्वचन देशे नलाङ्गसम्बन्धेनामोदादियुक्ततया पुष्पशय्यातुल्यया ऽतिस्पृह्या भैम्या भालतिलकेन या प्रगल्भता प्रकाशमानतास्य अभाजि भजिता। सम्भोगवशात्तिलकस्य स्पष्टत्वादित्यर्थ इति वा। अभाजि। प्रचे, भञ्जेश्च चिणि (पा० ६।४।३३) इति नलोपः ॥ ८ ॥

क्वापीति। क्वापि कचित् प्रदेशे यस्य सौधस्य निकटे निष्कुटे गृहारामे स्फुटन्तो विकसन्तः कोरकप्रकरा मल्लिकादिकलिकासमूहास्तेषां सौरभोर्मिभिः सौगन्ध्यपरम्पराभिः, भीमनन्दिन्या नासिकापुटकुटी नासिकापुटरूपं अल्पगृहं तत्र कुटुम्बिता पुत्रकलत्रादिसहावस्थायिता सान्द्रं नितरामाद्रियताङ्गीकृता। अल्पगृहे बहुकुटुम्बो यथा सम्मर्देन वसति तथा भैमीनासिकायां तैरुषितमित्यर्थः। वनोपान्तेषु दत्तदृष्टिर्भैमी सकलपुष्पपरिमलं यत्र प्रत्यक्षमन्वभूदिति भावः। अथ च भैमीनासापुटकुट्या कुटुम्बितासादृश्यं धृतं। कुटुम्बिनो हि सजातीया भवन्ति। भैमीनासाश्वाससौरभतुल्यता यन्निकटवर्त्तिवनपुष्पसौरभैर्धृतेत्यर्थः ॥ ९ ॥

ऋद्धसर्व्वऋतुवृत्तवाटिका-
कीरकृत्तसहकारशीकरैः।
यज्जुषः स्वकुलमुख्यमाशुगो
घ्राणवातमुपदाभिरञ्चति ॥ १० ॥

ऋद्धेति। आशुगो वायुः, ऋद्धाः पुष्पफलपल्लवादिमत्त्वेन समृद्धिमन्तः सर्व्वऋतुवृत्ता वसन्तादिसकलर्त्तुसम्बन्धिन आसादयो वृत्ता यस्यां सा, ऋद्धाः सर्व्वे ऋतवः सर्व्वे वृत्ताश्च यस्यां वा, तस्यां वाटिकायां कीरैः शुकैश्चञ्चुपुटैः कृत्वा कृत्तानि खण्डितानि यानि सहकारपुष्पाणि फलानि वा तेषां शीकरैर्मकरन्दविन्दुभिर्निर्य्यासविन्दुभिर्वा उपदाभिरुद्भूपैरुपहारैः कृत्वा यज्जुषो यत्सौधसेविनो नलस्य भैम्या वा यस्य कस्यापि वा घ्राणवातं नासाश्वासरूपं प्राणाख्यं वायुं यज्जुषो यत्सम्बन्धी वा वायुरर्थान्नैमीनलयोरन्यस्य वा अञ्चति स्म अपूपुजत्। उपचारैरुपतिष्ठते स्मेति वा। यस्मात् कुलमुख्य पञ्चवायुमध्ये प्राणस्यादिभूतत्वात् कुलवृद्धत्वं। कुलवृद्धश्च तदीयैः पूज्यते। आसशीकरानानयन् वायुर्यत्सेविनं जनं सुखयति स्मेत्यर्थः। सहकारशीकरैरित्यनेन वायोः शैत्यसौगन्ध्ये, अञ्चतीत्यनेन च मान्द्यं सूचितं। सर्व्वऋत्वित्यत्र, ऋत्यकः (पा० ६।१।१२८) इति प्रकृतिभावः। सहकारेत्यत्र पुष्पे फले वा वाच्ये प्रत्ययस्य, पुष्पमूलेष्विति (पा० ४।१।१६६।वा० २) लुप्। फले लुगिति वा (पा० ४।३।१६३) तस्य लुक्। यज्जुष इति क्रियन्तात् षष्ठी। यचे इगुपधात् कः ॥ १० ॥

कुत्रचित् कनकनिर्म्मिताखिलः
क्वापि यो विमलरत्नजः किल ।
कुत्रचित् रचितचित्रशालिकः
क्वापि चास्थिरविधैन्द्रजालिकः ॥ ११ ॥*
चित्रतत्तदनुकार्य्यविभ्रमा-
धायिनैकविधरूपरूपकं ।

कुत्रेति । यः सौधः कुत्रचित् क्वचित् प्रदेशे कनकेन निर्म्मितमखिलमूर्द्धाधोभागादि यस्यैवंविधः क्वापि विमलैर्रत्नैर्जातो रचितः । तथा कुत्रचिद्रचिताश्चित्रशाला उपरितनोत्तमग्टहविशेषाः पुत्रिका वा यत्र। रचितेन चित्रेन शालते तच्छीलो वा। क्वापि चास्थिराभिर्विधाभिः प्रकाशान्धकारादिरूपैः प्रकारैः कृत्वा ऐन्द्रजालिक इव अनेकचमत्कारकारी। शालिकेति शालाशब्दात् स्वार्थे सञ्ज्ञायां वा कनि,प्रत्ययस्थादिति (पा॰ ७।३।४४) इत्वं। पक्षे ताच्छील्ये णिनन्तात् स्वार्थे कन्। ऐन्द्रजालिकः। शिल्पमिति (पा॰ ४।४।५५) ठक्। विधा विधौ प्रकारे चेत्यमरः ॥११॥

चित्रेति । यं सौधं वीक्ष्य आश्चर्य्यातिशयाद् बहुवारं शिरो धुवन् कम्पयन् शिल्पिराट् अतिचमत्कारिनानावस्तुनिर्म्माणनिपुणानां राट् राजा श्रेष्ठो विधिर्ब्रह्मा विश्वकर्म्मा वा जरया वृद्धत्वेन वातकी वातरोगी अकम्पि तर्कितो देवादिभिरिति शेषः। किम्भूतं। चित्रैरालेख्यैश्चित्राश्चाश्चर्य्यरूपाणि वा तेषां तेषां अनुकार्य्याणां अभिनयानां देवर्षिमनुष्यादीनां विभ्रमं

* क्वापि चास्थिर इवेन्द्रजालिक इति मूलपुस्तकपाठः ।

वीक्ष्य यं बत धुवन् शिरो जरा-
वातकी विधिरकम्पि शिल्पिराट् ॥ १२ ॥
भित्तिगर्भगृहगोपितैर्जनै-
र्यः कृताद्भुतकथादिकौतुकः ।
सूचयन्नजविशिष्टचेष्टया
ऽऽश्चर्यसञ्जिवङ्कशालभञ्जिकः ॥ १३ ॥

विलासं विशिष्टान्तद्भुतभ्रान्तिं वा, आधायीनि उत्पादयन्ति एवम्भूतानि शुक्लनीलपीतादिवर्णवशात् काष्ठपाषाणरूप्यस्वर्णादिघटितत्वादाऽनेकविधरूपाणि नानाप्रकारस्वरूपाणि रूपकाणि प्रतिमा यत्र। चित्रमाश्चर्यं तन्वन्ति विस्तारयन्तीति चित्रतन्ति तादृशानीति वा पूर्व्ववत्। अचेतनास्वलीकास्वपि प्रतिमासु चेतनत्वादिभ्रमोत्पादिनिर्माणनैपुण्याद्भुतभरकम्पितशिराः शिल्पिराडपि ब्रह्मा विश्वकर्मा किमयं जरया निर्मितोद्भूतवाताधिक्यप्रचलितग्रीव इत्युत्प्रेक्षित इत्यर्थः। रमणीयतमोऽयमिति भावः। वातकी वातरोगी स्यादित्यमरः। वातकी। मत्वर्थे वातातीसाराभ्यां कुक् च (पा०५।२।१२९)। इति इनिः कुक् ॥ १२ ॥

भित्तीति। यः सौधः भित्तिगर्भे ये गृहा भित्तिभिराच्छादितानि अदृश्यमानविवराणि गर्भागाराणि तेषु तैर्वा गोपितैरदृश्यत्वेन स्थापितैर्जनैः कृत्वा कृतं अद्भुतकथादिकौतुकं आश्चर्यजनकरमणीयगोष्ठीगीतनृत्तवाद्यादिसम्बन्धि कौतूहलम् येन सः। गर्भगृहस्थानामदृश्यमानत्वाद्भित्तय एव गोष्ठ्या-

तामसीष्वपि तमीषु भित्तिगै-
र्रत्नरश्मिभिरमन्दचन्द्रिकः ।
यस्तपेऽपि जलयन्त्रयातुका-
सारदूरधुततापतन्द्रिकः ॥१४॥

दि कुर्व्वन्ति चित्रमेतदिति। वह्निर्वर्त्तमानानां कौतूहलं यः करोतीत्यर्थः। तथा सूत्राणां तत्तत्प्रतिमादिसञ्चारिततन्तूनां यन्त्रान्नियमनादनुलक्षितस्थानरचनाविशेषात् सूत्ररूपाद्वा यन्त्राज्जातया विशिष्टया अद्भुतया चेष्टया अन्योन्यचुम्बनालिङ्गनतालवृन्ततालव्यजनादिचालनक्रियया हला आश्चर्य्यसञ्जिन्योऽतिचमत्कारकारिण्यो बह्व्यः शालभञ्जिकाः सुवर्णगजदन्तादिनिर्म्मिताः पुत्रिका यत्र सः। गोपितं। ष्यन्तान्निष्ठा ॥ १३ ॥

तामसीष्विति। यः सौधस्तामसीष्वपि तमीषु तमोबहुलकृष्णपक्षरात्रिषु भित्तिगैर्रत्नरश्मिभिः कुड्यखचितरत्नकिरणैः सुवर्णादिषु प्रतिफलितैर्मणिबद्धभूमिकिरणैर्वा अमन्दा भूयसी चन्द्रिका ज्योत्स्ना यत्र तमोलेशस्याप्यभावात्। तथा तपेऽपि उष्णबहुले ग्रीष्मर्त्तावपि जलधारासञ्चारिमण्डपस्तम्भादिरचितजलयन्त्रेभ्यो यातुकैर्निर्गमनशीलैरासारैर्धारासम्पातैर्दूरं नितरां धुता निराकृता तापजनिता तन्द्रिका मूर्च्छा निःसहता येन सः। शीतलत्वात् सुखकर इत्यर्थः। तामसी। मत्वर्थीयप्रकरणे, ज्योत्स्नादिभ्य उपसङ्ख्यानम् (पा०५।२।१०३।वा०१) इत्यण् ॥ तन्द्रिका। तन्द्रीशब्दात् स्वार्थे कनि, केण (पा०७।४।१३) इति ह्रस्वः ॥ १४ ॥

यत्र पुष्पशरशास्त्रकारिका
सारिकाध्युषितनागदन्तिका ।
भीमजानिषधसार्व्वभौमयोः
प्रत्यवैचत रते कृताकृते ॥ ९५ ॥
यत्र मत्तकलविङ्कमीलिता-
स्त्रीलकेलिपुनरुक्तिवक्तयोः ।

यत्रेति । यत्र सौधे, अध्युषिता अधिष्ठिता नागदन्तः शयनस्थाने गृहावयवभूतगजदन्तनिर्मितः पञ्जरो वा यया सा, तथा पुष्पशरस्य कामस्य वात्स्यायनादिप्रणीतं शास्त्रं तस्य कारिका अभ्यासवाहुल्यात् कामशास्त्रनिर्माणसमर्थशब्दं करोति एवम्भूता सारिका पक्षिणी, भीमजानिषधसार्व्वभौमयोर्भैमीनलयोर्रते विषये चुम्बनालिङ्गनादीनां प्रत्येकं कृताकृते विहिताविहिते कर्म्मभूते प्रत्यवैचतानुकारेणानुसन्दधे, अनुवदति स्म, अनुचकारेत्यर्थः । आलिङ्गनादीनां बहवो भेदाः कामशास्त्रे निरूपिताः । तत्र किञ्चिदालिङ्गनं कृतं किञ्चिन्न कृतमित्याद्यपश्यदित्यर्थः ।शास्त्रे श्लोकरूपा कारिका भवति । यज्ञादौ ब्रह्मादिः कृताकृतविवेचको भवति । नागदन्तिका । शेषाद्विभाषेति (पा० ५। ४।१५४) कपि, प्रत्ययस्थाद् (पा० ७।३।४४) इतीत्वं ॥ ९५ ॥

यत्रेति । यत्र सौधे, मत्तैः कलविङ्कैर्गृहचटकैः मीलितानां मुहुर्मुहुः क्रियमाणानां चुम्बनादिराहित्याज्ञानसमर्थं करणाच्च अश्लीलितानां ग्राम्याणां केलीनां सुरतक्रीडानां पुन-

क्वापि दृष्टिभिरवापि वापिको-
त्तंसहंसमिथुनस्मरोत्सवः ॥ १६ ॥
यत्र वैणरववैणवस्वनैः
कूजितैरुपवनोपिकालिनां ।
कङ्कणालिकलहैश्च नृत्यतां
कुञ्जितं सुरतकूजितं तयोः ॥ १७ ॥

रुक्तं वर्त्तते यत्र तैर्वा कृत्वा पुनरुक्तियुक्तं यथा तथा क्वापि कस्मिन् प्रदेशे वापिकाया उत्तंसभूतानि भूषणीभूतानि तत्र वर्त्तमानानि हंसमिथुनानि तेषां स्मरोत्सवः सुरतक्रीडा तया तयोर्भैमीनलयोर्दृष्टिभिस्तद्व्यापारैर्वा अवापि अलम्भि अदर्शीत्यर्थः । आदौ कलविङ्ककेलिं दृष्ट्वा अनन्तरञ्च हंसकेलिरिति पुनः सुरतदर्शनात् पुनरुक्तिः । रतान्ते श्रयीभूतगात्राणां कामिनां तिर्य्यगादिसम्भोगदर्शनं पुनः कामोद्दीपकं भवतीति कामशास्त्रात् तिर्य्यक्सम्भोगं पश्यति क्वेति भावः ॥ १६ ॥

यत्रेति । यत्र सौधे, सम्भोगं कुर्व्वतोस्तयोर्भैमीनलयोः सुरतकूजितं कण्ठमात्रव्याप्यक्रमधुरस्वररूपं वैणरवैर्वीणाशब्दैः, तथा वैणवस्वनैर्वेणुसम्बन्धिभिर्गीतैः, तथा उपवनोपिकालिनामारामवर्त्तिनां कोकिलषट्पदानां कूजितैः कूजितैः सम्भ्रान्ताभ्यां ताभ्यां नृत्यन्तो यत्र दृश्यन्ते तैश्च तौ न दृश्येते तादृशोद्देशे नृत्यतां स्त्रीपुरुषाणां कङ्कणादीनां केयूरनूपुरादिभूषणगणानां कलहैरन्योन्योपमर्द्दादितमिश्रितैश्च कुञ्जितं मन्दीकृतमाच्छा-

सीत्कृतान्यगृणुतां विशङ्कयो-
र्यत्प्रतिष्ठितरतिस्मरार्चयोः।
जालकैरपवरान्तरेऽपि तौ
त्याजितैः कपटकुड्यतां निशि ॥ १८ ॥

दितमित्यर्थः। नृत्यत्यश्च नृत्यन्तश्च, पुमान् स्त्रिया (पा० १। २।६७) इत्येकशेषः। कुञ्जितं। तत्करोतीति (पा० ३।१।२६। वा० १) ण्यन्तान्निष्ठा ॥ १७ ॥

सीत्कृतानीति। अपवरान्तरे गर्भगृहे रतिस्मरप्रतिमागृहापेक्षया अन्यस्मिन् वा गृहे स्थितावपि तौ भैमीनलौ दिवा गवाक्षेष्वपि भित्तिभ्रमादच्छिद्रगृहनिवासवशादन्यानाकर्णनबुद्ध्या विशङ्कयोः शङ्कारहितयोः ससम्भ्रमं कूजनादि कुर्वतोः यस्मिन् सौधे प्रतिष्ठितयोः पुरोधसोर्मन्त्रसामर्थ्याच्चैतन्यमवलम्ब्य प्रतिमायां कृताधिष्ठानयोर्रतिस्मरयोर्ये अर्चे सुवर्णादिरचितप्रतिमे तयोः सीत्कृतानि नखदन्तक्षतजपीडानुभावसूचकानि सीच्छब्दाभिधेयानि शब्दितानि निशि रात्रौ कपटकुड्यतां अलीकभित्तिभ्रमं त्याजितैर्जालकैर्गवाक्षैः कृत्वा अगृणुतां। दिने रजतादिभित्तीनां मणीनां वा भासा छादितानि जालानि भित्तितुल्यानि भवन्ति, रात्रौ रजतादिभित्तीनां तादृक्प्रकाशाभावात्ताभिरेव कपटकुड्यत्वं त्याजितानि तानि जालरूपेणैव प्रतीयन्ते। ततश्च प्रतिष्ठासामर्थ्यात् सचेतनौ सुरतलोलुपौ रतिस्मरावपि गवाक्षेषु दिवा जातभित्तिभ्रमौ उभा-

कृष्णसारमृगशृङ्गभङ्गुरा
स्वादुरुज्ज्वलरसैकसारणिः।
नानिशं त्रुटति यत्पुरः पुरा
किन्नरीविकटगीतिझङ्कृतिः॥१९॥

वपि कुड्यभ्रमेणाविचार्य्यैव विशङ्कौ यत्र सुरतं चक्रतुः जालमार्गेण शब्दमश्चाराच्च तत्कूजितानि तौ शुश्रुवतुरिति भावः। पुरोधसो मन्त्रप्रभावश्च सूचितः। तण्डुलचूर्णादिमण्डलिप्तं चित्रमयं वस्त्रं कपटकुड्यं। दिवोष्णप्रवेशभिया गवाक्षेषु चित्रपटा ध्रियन्ते रात्रौ च पवनागमनार्थमपनीयन्ते। तथा च दिनवद्रात्रावपि कुड्यबुद्ध्या विशङ्कं भणितानि चक्रतुरिति वा। अपवृणोत्याच्छादयतीत्यपवरो गृहगर्भः। पचाद्यच्। प्रतिकृतिरर्चा पुंसीत्याद्यमरः॥१८॥

कृष्णेति। कृष्णो वर्णः सारः श्रेष्ठो यस्य तस्य मृगस्य शृङ्गवद्भङ्गुरातिवक्रा वक्रभङ्गीयुक्ता, तथा स्वादुः श्रुतिमधुरा अत एवोज्ज्वलाः प्रकाशमानाः शृङ्गारादयो रसाः तेषां उज्ज्वलस्यैव वा रसस्यैकाऽद्वितीया मुख्या वा सारणिः कृत्रिमनदी शृङ्गाररसपरिपूर्णेत्यर्थः। एवम्भूता गाननिपुणानां किन्नरीणां विकटा षड्जादिसप्तस्वराणामारोहावरोहरीत्या विषमा गीतीनां तस्य झङ्कृतिर्ध्वनिविशेषो यस्य सौधस्य पुरोदेशे मुखेऽनिशं सर्व्वदा न त्रुटति पुरा कदाचिदपि विच्छिन्ना नाभूत्। सैन्याः प्रकाशाद् गानकलाशिक्षाहेतोरुच्चतरस्य तस्य सुन्दरे द्वारि

भित्तिचित्रलिखिताखिलक्रमा
यत्र तस्थुरितिहाससङ्कथाः।
पद्मसम्भवसुतारिरंसुता-
मन्दसाहसहसन्मनोभुवः॥ २०॥

आगत्य गन्धर्व्वकन्या अपि यत्र सर्व्वदा जगुरिति भावः। वक्रं च ज्ञानसङ्गावार्थैः सदा गायतीवेत्युत्प्रेक्षा सूच्यते। अथ च मृगशृङ्गवदक्रगामिनी तथा स्वादूदका तथा किन्नर्य इव किन्नर्यो भ्रमर्यः कमलयाऊत्यान्तासां श्रेष्ठा गुञ्जनझङ्कतिर्यस्या एवंविधा विकसत्कमलभ्रमरीमञ्जुगुञ्जनयुता निर्मलजला एका कुल्या यस्य सौधस्य पुरोभागे कदाचिद्ग्रीष्मर्त्तावपि नाचुटत्, बहुजलैव स्थितेत्यर्थः। एकविंशे सर्गे तुङ्गप्रासादवासादित्यनेन कुल्याया अपि वर्णयिष्यमाणत्वात् प्रकृते सौधवर्णनोपयोगिलादयमर्थः कविना विवक्षित इति प्रतीयते। विकटः सुन्दरे प्रोक्तो विशालविकरालयोरिति विश्वः। चुटति। भूते, पुरिलुङ्चास्म (पा० ३।२।१२२) इति लट्॥ १९॥

भित्तीति। यत्र सौधे पद्मसम्भवस्य ब्रह्मणः सुतायां सरस्वत्यां रिरंसुता सम्भोगाभिलाषस्तद्रूपममन्दं महत् साहसं अविचार्यकारित्वं तेन हसन् स्वसामर्थ्यदर्पेण सोल्लासो मनोभूर्यासु ताः। ब्रह्मणः सुतारिरंसुतायां भोगोत्पादने विषये तद्रूपं वा महत् साहसं कामस्यैव, तेन पौरुषदर्पेण सोल्लासस्य कामस्य सम्बन्धिन्यो वा इतिहाससंकथाः पुरावृत्ताख्यायिका भित्तिपु

पुष्पकाण्डजयडिण्डिमायितं
यत्र गौतमकलत्रकामिनः।
पारदारिकविलासवैभवं
देवभर्त्तुरुदटङ्कि भित्तिषु ॥ २१ ॥

चित्ररूपेण चित्रकारलिखितोऽखिलः क्रमः परिपाटी यासां एवम्भूताः सत्यस्तस्थुः। ब्रह्मपराभवादिकामप्रभावाश्चित्ररूपेण यद्भित्तिषु लिखिता वर्त्तन्ते सेत्यर्थः। ब्रह्मणः सुतारिरंसुता-दिकं मत्स्यपुराणादाववगन्तव्यं ॥ २० ॥

पुष्पेति। यत्र सौधे गौतमकलत्रमहल्यां कामयते कामी तस्य सम्भुक्तानस्य देवभर्त्तुरिन्द्रस्य पुष्पकाण्डस्य कामस्य लोक-त्रयजयो डिण्डिमायितं वाद्यविशेषवदाचरितं पारदारिकस्य परस्त्रीगामिनो विलासवैभवं सुवर्णादिरचितासु भित्तिषु उदटङ्कि टङ्कैरुत्कीर्य लिखितं। येनेन्द्रोऽपि पराभूतस्तादृ-शस्य महाप्रभावस्य स्मरस्य सेवा युवाभ्यामपि नियतं कार्य्येति सुवर्णटङ्करचितभित्तिषु कामोद्दीपनार्थं इन्द्रपारदारिकवि-लासा यत्र टङ्कैर्लिखिता इत्यर्थः। डिण्डिमायितं। उपमा-नात् कर्त्तुः क्यङन्तान्निष्ठा। परदारान् गच्छतीति पारदारि-कः। गच्छतौ परदारादिभ्यष्ठक् वक्तव्य (पा० ४।४।१।वा० ४) इति ठक्। उदटङ्कि। टकिबन्धे इत्यस्मात् कर्मणि चिण् ॥ २१ ॥

उच्चलत्कलरवालिकैतवा-
द्वैजयन्तविजयार्जिता जगत्।
यस्य कीर्त्तिरवदायति स्म सा
कार्त्तिकीतिथिनिशीथिनीसखा ॥ २२ ॥

उच्चलदिति। उच्चलसौन्दर्य्यादिना वैजयन्ताख्यस्येन्द्रप्रासादस्य विजयेन या अर्जिता लब्धा सा कार्त्तिकी कृत्तिकानक्षत्रयुक्ता तिथिः पूर्णिमा तस्याः निशीथिनी रात्रिस्तस्याः सखा तद्वदत्युज्ज्वला यस्य प्रासादस्य कीर्त्तिः कान्तिः, उच्चलतां उड्डीयमानानां कलरवाणां पारावतानामालिःपङ्क्तिस्तस्याः कैतवाद्व्याजाज्जगदवदायति स्म शोधयति स्मोज्ज्वलञ्चकारेत्यर्थः। एते कलरवा न भवन्ति किन्तु शरचन्द्रचन्द्रिकातुल्या कीर्त्तिरेवेतस्येत्यर्थः। पारावतः कलरवः; स्यात्प्रासादो वैजयन्त इत्यमरः। दायति। दैप् शोधन इति स्वादिरवपूर्व्वः सकर्मकः। लट् स्मे (पा० ३।२।११८) इति लट्। कार्त्तिकी। नक्षत्रेण युक्तः कालः (पा० ४।२।३) इत्यणि ङीप्। अत्र कृत्तिकायुक्तो दिवसः कार्त्तिक इति भाषितपुंस्कत्वसम्भवेऽपि तिथ्योर्द्वयोरित्यभिधानात् पुंलिङ्गेन तिथिशब्देन समासे स्त्रीलिङ्गस्य समानाधिकरणस्योत्तरपदस्याभावात्, पुंवत्कर्म्मधारय (पा० ६।३।४२) इति सूत्रेण न पुंवत्। ततश्च कार्त्तिकी चासौ तिथिश्चेति समासः ॥ २२ ॥

गौरभानुगुरुगेहिनीस्मरो-
द्वृत्तभावमिति वृत्तमाश्रिताः।
रेजिरे यदजिरेऽभिनीतिभि-
र्नाटिका भरतभारतीसुधाः॥ २३॥
शम्भुदारुवनसम्भुजिक्रिया-
माधवव्रजवधूविलासयोः।

गौरेति। गौरभानोश्चन्द्रस्य गुरुगेहिन्यां बृहस्पतिभार्य्यायां तारायां विषये स्मरजनितो य उद्वृत्तभावः, गुरुतल्पगामित्वा-दाचारत्यागित्वं चन्द्रतारयोर्विषये स्मरस्योद्वृत्तभावः कामज-नितमामर्थ्यातिशयः, तन्नचणं वा इतिवृत्तं पुरावृत्तमाश्रिताः प्रतिपादयन्त्यः, तथा भरतेन मुनिना प्रणीता भारती भर-ताख्ये नाट्यवेदशास्त्रे सुधा अमृतरूपो भरतोक्तनाट्यरी-त्याभिनीयमानाः सत्यः सुधाप्राया इति यावत्। एवम्भूता नाटिका दशरूपकान्तर्गतचतुरङ्कबन्धविशेषा यस्य सौधस्या-जिरेऽङ्गणे अभिनीतिभिः सात्त्विकाङ्गिकवाचिकाहार्य्यभेदभिन्नै-श्चतुर्विधैर्नटाभिनीयमानैरभिनयैः कृत्वा रेजिरे। तयोः स्मरो-द्वृत्तभावस्य मितिः सम्यक् परिच्छित्तिः सैव वृत्तं व्यापारोऽतीतं वा प्रमेयं यत्रैवंविधनाटकादिप्रबन्धमाश्रिता इति वा॥ २३॥

शम्भ्विति। यस्य सौधस्य हाटकविटङ्कं सुवर्णघटितकपोत-पालिका शम्भोर्दारुवने मन्दरकन्दरायां देवदारुवने सम्भुजि-क्रिया गौर्य्या सह दिव्यसहस्रवर्षपर्य्यन्तं या सुरतक्रीडा, माधवस्य

गुम्फितैरुशनसा सुभाषितै-
र्यस्य चाटकविटङ्कमङ्कितं ॥ २४ ॥
अह्नि भानुभुवि दासदारिकां
यच्चरः परिचरन्तमुज्जगौ ।

श्रीकृष्णस्य व्रजवधूभिर्गोपिकाभिः सह विलासो रासक्रीडादि-स्तयोर्विषये उशनसा शुक्राचार्य्येण गुम्फितैः श्लोकरूपेण रचितैः सुभाषितैरतिचमत्कारकारिनवीनार्थशब्दविशेषैः कर्तृभिर्वा ऽङ्कितं चिह्नितं । हरकृष्णकामविलासवर्णककाव्यरचितकाव्य-श्लोकाः कामोद्दीपनार्थं यदीयचाटकविटङ्के टङ्कैरुदङ्किता इत्यर्थः कपोतपालिकायां तु विटङ्कं पुंनपुंसकमित्यमरः । वि-शेषेण टङ्क्यते वर्द्धते इति विटङ्कं पक्षिविश्रामार्थं कुड्यादहि-र्निर्गतं दारु ॥ २४ ॥

अह्नीति । यस्मिन् सौधे चरतीति यच्चरः शुकः पक्षी शुक-पितामहं पराशरमुज्जगौ तारस्वरं गायति स्म । किम्भूतं । अह्नि दिने भानुभुवि सूर्य्यपुत्र्यां यमुनायां विषये दासदारिकां कैवर्त्तकुमारीं योजनगन्धां परिचरन्तं सम्भुञ्जानं, अत एव यथाक्रमं कालस्य रात्र्यादेरनिषिद्धस्य समयस्य देशस्य तीर्थदेव-स्थानादिव्यतिरिक्तस्यानिषिद्धस्य निजशयनादेर्विषयस्य परदा-रादिव्यतिरिक्तस्य स्वभार्य्यालक्षणस्यासहात् कालादीनसहमा-नात् अधैर्य्यजनकात् स्मरात् हेतोरुत्सुकं कामातिरेकं सोढुम-समर्थमित्यर्थः।पौराणिककथ्यमानभारतादिश्रवणमात्रेण प्राज्ञः

कालदेशविपर्यासदुम्मरा-
दुस्सुकं शुकपितामहं शुकः ॥ २५ ॥
नीतमेव करलभ्यपारता-
मप्रतीर्य्य मुनयस्तपोर्णवं।
अप्सरःकुचघटावलम्बनात्
स्थायिनः क्वचन यत्र चित्रगाः ॥ २६ ॥

शिवातिशयादतिमुखरो यद्विहारी कीरः, तादृशीं भारता-द्युक्तां कथामुच्चैरनूदितवानिति भावः। अश्लीत्यादिना कामा-तुरस्य कालाद्यमहत्वं समर्थितं। अन्योऽपि माधुर्य्येवम्भूतं स्वपि-तामहमपि निन्दति। कैवर्त्ते दाशधीवरावित्यमरः। यच्चरः। अधिकरणे चरेष्टः (पा० ३।२।१६) इति टः॥ २५॥

नीतमिति। यत्र सौधे मुनयः परमात्मज्ञानचतुरा ऋषयो क्वचन कस्मिन्नपि भित्तिभागे चित्रगाश्चित्रे लिखिता वर्त्तन्ते। किम्भूताः। करलभ्यं पारं परतीरं यस्य तद्भावस्तत्ता तां नीतमेव लक्षणया सन्निहितभाविफलत्वात् समाप्तिं प्रापित-प्रायमेव, अथ च सन्निहितपरतीरमपि तपोरूपदुस्तरमर्णवं समुद्रमप्रतीर्य्यापरिसमाप्यानुत्तीर्य्य वा तपोविघ्नार्थं इन्द्रेण प्रेषितानामप्सरसां रम्भादीनामत्युच्चकठिनकुचलक्षणानां घ-टानामवलम्बनाद्धारणादाधाराद्धेतोः स्थायिनः स्थातुं शक्ताः। कुचमर्दनादिसम्भोगकारिण इत्यर्थः। योऽपि प्रतीर्य्यमाणं समुद्रं नद्यादि वा तीरसन्निहितेऽपि श्रान्तिवशादुत्तरितुमशक्तः स

स्वामिना च वहता च तं मया
स स्मरः सुरतवर्जनोर्ज्जितः ।
योऽयमीदृगिति नृत्यते स्म यत्-
केकिना मुरजनिःस्वनैर्घनैः ॥ २७ ॥
यत्र वीक्ष्य नलभीमसम्भवे
मुह्यतोर्रतिरतीश्वयोरपि ।

जलमध्य एव घटादिकमवलम्बनमासाद्य चित्रलिखित इव निश्चलस्तिष्ठति । कुट इति पाठे कुटः कोटे घटे गेहे इति विश्वः ॥ २६ ॥

स्वामिनेति । यस्य सौधस्य सम्बन्धिना केकिना क्रीडामयूरेण इति हेतोर्घनैर्निविडैर्मुरजनिःस्वनैर्मृदङ्गध्वनिभिरथ च तैरेव मेघैर्नृत्यते स्म । इति किं । योऽयमीदृग्ब्रह्मादिवशीकारकारी स महाप्रभावः स्मरः स्वामिना कार्त्तिकेयेन प्रभुणा च तदीयपत्रलेन तं वहता पृष्ठेन धारयता मया मयूरेण च सुरतवर्जनोर्ज्जित इति । चान्योन्यसमुच्चये । कुमारस्य नैष्ठिकब्रह्मचारित्वान्मयूराणाञ्च वर्षर्त्तुमत्तानां नेत्रोपान्तरन्ध्रमार्गेण निर्गच्छतामश्रुमयशुक्रविन्दूनां मयूरीमुखग्रहणमात्रेण गर्भसम्भूतेर्लिङ्गभगसङ्घर्षणरूपरतिपरित्यागो जयहेतुः । मयूराश्च मेघशब्दभ्रान्त्या मृदङ्गशब्दैर्नृत्यन्ति ॥ २७ ॥

यत्रेति । यत्र सौधे सम्भोगपक्षे नलभीमसम्भवे नलभैम्यौ वीक्ष्य मुह्यतोः सुरताभिलाषिणोरथ च भ्रान्तिं प्राप्नुवतोस्तया

स्पर्द्धयेव जयतोर्ज्जयाय ते
कामकामरमणौ बभूवतुः ॥ २८ ॥

जयतोः सर्व्वोत्कर्षेण वर्त्तमानयोरथ च नलभैम्यौ स्ववशे कुर्व्वतोः रतिरतीशयोर्रतिकामयोः स्पर्द्धयेव ईर्ष्ययेव जयाय तौ पराभवितुं ते नलभैम्यौ कामकामरमणौ बभूवतुः स्मररती अभूतां। सम्भोगयुक्तौ स्त्रीपुंसौ दृष्ट्वाऽन्यावपि स्त्रीपुंसौ उद्दीप्तस्मरौ भवत इति तादृशौ भैमीनलौ दृष्ट्वा प्रतिष्ठावशात्तच कृतावासौ चेतनौ रतिकामौ सञ्जातसुरतेच्छौ जातौ। तथा सौन्दर्य्यातिशयाद्रतेर्नले काम इति कामस्य च भैम्यां रतिरिति सञ्जातभ्रमौ च जातौ। एवम्भूतावतिशयितान्योन्यरागजननाद्वशीकृतभैमीनलौ यत्र मूर्त्तौ रतिकामाविवाभूतामिति कामयोर्द्वन्द्वद्वयं जातमित्यर्थः। अयमेव तयोर्जयः। अथ च स्वसम्भोगदर्शनात्तयोरपि सम्भोगवाञ्छोत्पादनाज्जयः। तज्जयार्थं बुद्धिपूर्व्वव्यापाराभावात् स्पर्द्धयेवेत्युत्प्रेक्षा। स्पर्द्धाकारणन्तूक्तं। अथ च रतिकामसन्निधाने यथा स्त्रीपुंसयोः सम्भोगवाञ्छासमुदयस्तथा तयोरपि रतिकामसन्निधानमेव प्रेमरसातिशयादन्योन्यसन्निधानमात्रेणैव कामसमोहः प्रादुरासीदिति भावः। नलभैम्यौ दृष्ट्वा मोहं भजतोरत एव नलभैमीभ्यामावां जितावित्यपि ते जेतव्ये इति स्पर्द्धयेव जयतोरिति यथाश्रुत एव वा सम्बन्धः। अत्र सर्व्वत्राल्पाच्तरत्वात् प्रायः प्राप्तोऽपि पूर्व्वनिपातो रतेर्नले कामभ्रमोदयान्नलरतिकामपदानां प्राक्प्रयोगस्य, रतीशस्य च

तत्र सौधसुरभूधरे तयो-
राविरासुरथ कामकेलयः।
ये महाकविभिरप्यवीक्षिताः
पांशुलाभिरपि ये न शिक्षिताः ॥ २९ ॥
पौरुषं दधति योषिता नले
स्वामिनि श्रिततदीयभावया।

भैम्यां रतिप्रमोदयाप्तीमसमप्रवारतीशकामरमणीपदानां प-
श्चात् प्रयोगश्चौचितीं सूचयतीति ज्ञेयं। रतिरतीशयोर्विषये
स्पर्द्धयेति केचित्। ते। प्रथमाद्विवचनान्तं। कामकामरमणौ
बभूवतुरिति च्चिः ॥ २८ ॥ कुलकं ॥

तत्रेति। अथ तत्रोक्तगुणे सौधरूपे सुरभूधरे मेरौ तयोस्ते
कामकेलय आविरासुः स्पष्टं दिदीपिरे। ते के। ये कामके-
लयो महाकविभिर्व्यासकालिदासादिभिर्निगूढभावदर्शिभिरपि
अवीक्षिता न बुद्धिगोचरीकृताः। तेषामपि न स्फुरिता इति
यावत्। तथाऽनेकनरसम्भोगचतुराभिः पांशुलाभिः स्वैरि-
णीभिरपि ये न शिक्षिता अभ्यस्ताः नानाजातिशिक्षोपदेशा-
दपि न ज्ञाताः। एतेनालौकिकाः कामविलासा वर्णयिष्यन्त
इति सूचितं। द्रवकेलिपरीहासा इति केलिशब्दः पुंलिङ्गो
ऽपि ॥ २९ ॥

पौरुषमिति। एवम्भूतया भीमसुतया एवम्भूते नले विषये
कियत् किंपरिमाणं साध्वसं भयं न प्रापि अपि तु बहु भयं

यूनि शैशवमतीर्ष्यया कियत्
प्रापि भीमसुतया न साध्वसं ॥ ३० ॥

न प्राप्तं। अत्यन्तं प्रापीत्यर्थः। किम्भूते नले। पौरुषं दधति बलिनि। किम्भूतया। स्वयं तु योषिताऽबलया। तथा स्वामिनि आत्मनः प्रभौ राजनि च। स्वयं तु श्रितोऽङ्गीकृतस्तदीयस्वभावस्तदीयत्वं वा नलदासीभूतया। तथा यूनि तरुणे। स्वयं तु शैशवं बाल्यमतीर्ष्ययाऽनतिक्रान्तया वयःसन्धौ वर्त्तमानया। बलिनः स्वामिनो राज्ञस्तरुणाच्चाबलया दासीभूतया बालया भयं प्राप्यत इति युक्तमिति। अत्र प्रथमसम्भोगे किंवा भावीति ईदृशे नले ईदृश्या तया महद्भयं प्राप्नोति भावः। सर्व्वाण्यपि विशेषणानि हेतुगर्भाणि। अथ च श्रितो नलविषयो भावो रमणाभिलाषो ययैतादृश्यापि स्वामिनि भर्त्तरि नले महद्भयं प्रापि। यतः पूर्व्वोक्तगुणविशिष्टे पूर्व्वोक्तगुणविशिष्टया चेति। एवम्भूतेऽपि नले एवम्भूतयापि तया साध्वसं कियदल्पमेव प्राप्तं बहु साध्वसं वर्त्तत एव तथापि किञ्चित् साध्वसं परित्यक्तं। यस्माच्छ्रितो नलविषयो रमणाभिलाषो ययेति वा। अथ च श्रितः परिशीलितो ज्ञातो नलविषयो यया बालया मम कण्ठोपभोगे न करिष्यतीति विनिश्चितनलाभिप्राया भयं न प्रापेति भावः। श्रितोऽनुष्टितो नलाशयो यया नलभावानुकूलवर्त्तिन्या प्रथमसम्भोगे पौरुषमवलम्ब्य क्रीडाकौतुककारी भवति, कान्ता तनुर्त्तीर्णशैशवा किमत्र भावीति सभया किञ्ची-

दूत्यसङ्गतिगतं यदात्मना
प्रागशिश्रवदियं प्रियं गिरः।
तं विचिन्त्य विनयव्ययं ह्रिया
न स्म वेद करवाणि कीदृशम् ॥ २१ ॥

ष्यजानानाऽल्पं भयं विहाय प्रियभावानुकूल्यमाश्रयतीति। एतदनुभवसाक्षिकमिति भावः ॥ २० ॥

इदानीं लज्जानुभावपूर्व्वं कामशास्त्रानुरोधेन प्रथमसम्भोगक्रममाह। दूत्येति॥ इयं भैमी प्राक् विवाहात् पूर्व्वं दूत्येन देवदूतव्यापारेण सङ्गतिं गतं सम्बन्धं प्राप्तं साक्षादृष्टं प्रियं नलं आत्मना विरहप्रकाशिनीर्नवसमर्गोक्ता गिरो वाणीः अशिश्रवत् श्रावयामासेति यत् तं प्रियस्य स्ववचनश्रावणलक्षणं विनयस्य व्ययं नाशं धार्ष्ट्यं विचिन्त्य विशेषेण स्मृत्वा ह्रिया लज्जया कीदृशं किङ्करवाणीति न वेद स्म नाज्ञासीत्। तदानीं तन्मया मद्दनुचितं कृतं तत्प्रतिक्रिया कीदृशी प्रकृते चार्थे किं कार्य्यमिति विनयव्ययस्मरणाज्जातया ह्रिया किंकर्त्तव्यतामूढाभूदित्यर्थः। उत्तमत्वं सूचितं। उत्तमा हि पूर्व्वानुचितस्मरणाल्लज्जन्ते। अतीतस्मरणेनापि सलज्जाभूत् प्रारब्धसम्भोगानुभवदशायान्तु सलज्जत्वं कि वाच्यमिति भावः। अशिश्रवत्। शृणोतेर्णौ चङि द्विर्वचने उपधाह्रस्वत्वे सन्वल्लघुनीति (पा०७।४।९३) सन्वद्भावे स्रवति शृणोति (पा०७।४।८१) ईत्त्वाभावस्य वेत्वा। प्रियं। शृणोतेः शब्दकर्म्मत्वादणौ कर्त्तृत्वं ॥ २१ ॥

यत्तया सदसि नैषधः स्वयं
प्राग्वृतः सपदि वीतलज्जया।
तन्निजं मनसि कृत्य चापलं
सा शशाक न विलोकितुं नलं ॥ ३२ ॥
आसने मणिमरीचिमांसले
यां दिशं स परिरभ्य तस्थिवान्।
तामलङ्घयितवतीव मानिनी
न व्यलोकयदियं मनागपि ॥ ३३ ॥

यदिति। तया सदसि मिलितलोकत्रयजनसमक्षं वीतलज्जया निर्लज्जया सत्या सपदि स्वयं परवर्त्तनाद्यभावेऽप्यात्मनैव वरणमालया कृत्वा यत् प्राक् नैषधो वृत इति तत् नलवरणलक्षणं निजं चापलं धार्ष्ट्यं मनसि कृत्य विचार्य्य, तदानीं लज्जां त्यक्त्वा मया महद्धार्ष्ट्यमवलम्बितमेतदनुचितमिति स्मृत्वा सा लज्जातिशयवशात्तदानीं नलं विलोकितुमपि न शशाक अत्रायुक्तमलं खचितं। तच्चापलं मनसि कृत्य विशेषेणेता प्राप्ता यासौ लज्जा च तया कृत्वा नलं वीचितुं नाशकदिति वा। मनसि कृत्य पूर्ववत्॥ ३२ ॥

आसने इति। अनुरागातिशयादेकासने वर्त्तमानयोस्तयोर्मध्ये स नलः मणिमरीचिभिः खचितोत्तमरत्नप्रसारिकिरणैः मांसले व्याप्ते आसने सिंहासने स नलः यां दिशं परिरभ्य यं सिंहासनप्रदेशमाश्रित्य तस्थिवान्। इयं भैमी तां दिशं म-

ह्रीसरिन्निजनिमज्जनोचितं
मौलिदूरनमनं दधानया।
द्वारि चित्रयुवतिश्रिया तया
भर्तृहूतिशतमश्रुतीकृतं ॥ २४ ॥
वेश्म पत्युरविशन्न साध्वसाद्
वेशितापि शयनं न साभजत्।

नागपि न व्यलोकयत्। उत्प्रेक्षते। असूयितवतीव ईर्ष्यावतीव। दिशः खेलादियं मदङ्गालिङ्गितेति सपत्नीबुद्ध्या असूयां कृतवतीव तां नापश्यदित्यर्थः। यतो मानिनी। लज्जाभयाभ्यां नापश्यत् तत्रेयमुत्प्रेक्षा। असूयितवती। कण्ड्वादियगन्तात् क्तवतु उगित्वात् ङीप्॥ २३ ॥

ह्रीति। निरन्तरप्रवाहरूपत्वात् ह्रीरूपायां सरिति निजस्यात्मनो निमज्जनमुचितं योग्यं यस्यैवम्भूतं मौलेः शिरसो दूरं नितरां नमनमानाभेर्नम्रीभावं दधानया तया द्वारि गृहद्वारदेशे चित्रलिखितयुवतिवत् श्रीः शोभा यस्यास्तया लज्जाभयाभ्यामन्तः प्रवेष्टुमशक्तया अतिनिश्चलतया तत्रैव स्थितया भैम्या, भैम्यागच्छेति भर्तुर्नलस्य हूतीनामाह्वानानां शतं अश्रुतीकृतं श्रुतमप्यश्रुतीकृतं। श्रुतमपि लज्जाभयाभ्यामनुत्तरादगमनाद्वाऽश्रुतमिव कृतमित्यर्थः। नवोढाजातिरियं ॥ २४ ॥

वेश्मेति। सा किमपि भविष्यतीति साध्वसाद्भयात् पत्युर्वेश्म न प्रथमविशत्। अनन्तरं सख्या नलेन वा वेशितापि गृहमध्ये

भाजितापि सविधं न सास्वपत्
स्थापितापि न च सम्मुखाभवत् ॥ ३५ ॥
आत्मनापि हरदारसुन्दरी
यत् किमप्यभिललाप चेष्टितं ।
स्वामिना यदि तदर्थमर्थिता
मुद्रितस्तदनया तदुद्यमः ॥ ३६ ॥

प्रापितापि शयनं नाभजत्। ततोऽपि सख्या नलेन वा शयनं भाजितापि सा सविधं नलसमीपं यथातथा नास्वपत्, किन्तु दूरत एव निद्राति स्म। ततोऽपि सख्या नलेनैव वाह्वपाल्यादिना सविधं समीपं स्थापितापि न च सम्मुखाऽभवत् किन्तु शय्यापार्श्वपट्टिकावलम्बिनी पराङ्मुखैवाभूदित्यर्थः। प्रथमसम्भोगे मुग्धाया जातिरियं। साप्तमादिति सर्वत्र। अस्वपत्। अङ्गार्ग्येति (पा० ७।३।९८) अट्॥ सम्मुखास्वाङ्गाचोपसर्जनात् (पा० ४।१।५४) इति विकल्पान्न ङीप्॥ ३५॥

आत्मनेति। हरदारवत् गौरीवत् सुन्दरी। सा भैमी आत्मनापि स्वयमेव यत्किमपि यत् किञ्चिच्चेष्टितं तदवसरोचितं कटाक्षवीक्षणताम्बूलदानतालवृन्तचालनादि अभिललाप कर्त्तुमैच्छत् तदर्थं तस्मै प्रयोजनाय तदनुदानायेङ्गितज्ञेन स्वामिना नलेन ताम्बूलं देहीति यद्यर्थिता याचिता तत्तर्हि अनया भैम्या तस्य नलस्य उद्यमो याचनप्रयत्नो मुद्रितः ताम्बूलादीनामदानाद्व्यर्थीकृतः। तेन याचिता सती न ददाविति भावः।

केवलं न खलु भीमनन्दिनी
दूरमत्रपत नैषधं प्रति।
भीमजाहृदि जितः स्त्रिया ह्रिया
मन्मथोऽपि नियतं स लज्जितः ॥ ३७ ॥
ह्रीभराद्विमुखया तया भियं
सञ्जितामननुरागशंसिनि।

अपरिवार्यं। स्वामिनेत्यनेनावश्यं कर्त्तव्यतायां सत्यामपीति सूचितं। गौर्य्यपि प्रथमसम्भोगे हरेणार्थिता सत्येवमेवाकरोदिति ध्वनिः ॥ ३६ ॥

केवलमिति। भीमनन्दिनी केवलं नैषधं प्रति उद्दिश्य दूरं नितरां अत्रपत लज्जां प्रापेति न किन्तु भीमजाहृदि वर्त्तमानत्वाद्धिया लज्जारूपया स्त्रिया, जितः खलु जित इव सोऽतिप्रसिद्धपराक्रमः हृद्येव वर्त्तमानो मन्मथोऽपि नियतं बहुकालं लज्जितः। अथ च मनो मथ्नाति पीडयतीति मन्मथः पृषोदरादिः। एवंविधोऽपि जितो लज्जितः सङ्कुचितश्चेति चित्रं। ह्रीवशात्तलविषयोऽतिपीडाकरोऽपि कामो बहुकालं तामभिभवति स्मेति भावः। अन्योऽपि स्त्रिया जितो लज्जते ॥ ३७ ॥

ह्रीभरादिति। दूत्यकाले कन्तिं बुद्धं परीक्षितं तदाशयं भैम्यभिप्रायं सम्यक् दृढसंस्कारतया स्मरणपथारूढं स्मरन् विचारयन् स नलः ह्रीभराद्विमुखया तया विमुखत्वादेवाननुरागशंसिनि किमस्या मयि अनुरागो नास्तीति शङ्काशीले

स स्वचेतसि लुलोप संस्मरन्
दूत्यकालकलितं तदाशयं ॥ ३८ ॥
पार्श्वमागमि निजं सहालिभि-
स्तेन पूर्व्वमथ सा तयैकया।
क्वापि तामपि नियुज्य मायिना
स्वात्ममात्रसन्निधावशेपिता ॥ ३९ ॥

स्वचेतसि सञ्चितां जनितां अनुरागाभावसम्भावनीं भीतिं लुलोप निरस्यति स्म। दूत्यवसरमप्यनुरागातिशयादिन्द्रादीनपि परित्यज्य मदलाभे कृतमरणनिश्चयेयमिदानीमनुरागं न त्यच्यतीति निश्चित्य जातां शङ्कां तत्याज। मुग्धा लज्जाभरादेव विमुखीयं न त्वननुरागादिति निश्चिकायेत्यर्थः। तदाशयं। शेषत्वाविवक्षया षष्ठ्यभावः॥ ३८॥

पार्श्वमिति। तेन नलेन भयवशादेकाकिनो नलस्य सविधमनागच्छन्ती सा आलिभिः सखीभिर्भूयसीभिः सह निजं पार्श्वं आगमि प्रापिता। भवतीभिरपि कञ्चित् कालमनया सार्द्धमागन्तव्यमित्यादिष्टाभिस्ताभिस्तां स्वसन्निधिं प्रापितवानित्यर्थः। अथानन्तरं कियतापि कालेन किञ्चिद्विश्वासप्राप्त्यनन्तरं एकया एकाकिन्यैव तया सख्या सह सख्यन्तरपरिहारेण सन्निधिं प्रापिता। अथानन्तरं कियतापि कालेन तामपि सखीं क्वापि गन्धमाल्यताम्बूलाद्याहरणविषयेऽन्नीकं नियुज्य गन्धाद्यानयेति छलात् प्रेष्य, यतः मायिना कामशास्त्रोक्तकन्याविस्र-

सन्निधावपि निजे निवेशिता-
मालिभिः कुसुमशस्त्रशास्त्रवित्।
आनयद्व्यवधिमानिव प्रिया-
मङ्कपालिवलयेन सन्निधिं ॥ ४० ॥

क्षणकपटपटुना चतुरेण तेन स्वात्ममात्रो नल एव सचिवः सखा यस्याः स्वमन्त्रार्थेवैकाकिनीऽवशेषिता स्वसमीपे स्थापिता विजनोचितं स्वीयमिङ्गितमदर्शयत् तदीयं वाऽपश्यदिति भावः। कन्याविस्रम्भणप्रकारोऽयं। आगमि एयन्तात् कर्मणि चिण्। चिणमुलोः (पा०६।४।८२) इति दीर्घविकल्पात् पक्षे ह्रस्वः ॥ ३८ ॥

सन्निधावपीति। स नल आलिभिः स्वयमेव निजे सन्निधौ निवेशितामपि तेनैव प्रयोजकेन स्वसमीपे प्रयोज्याभिः सखीभिः स्थापितामपि प्रियामङ्कपालेर्भैमीपृष्ठभागस्य स्पर्शिनः स्वीयैकभुजालिङ्गनविशेषस्य वलयाकारेण वेष्टनेन कृत्वा सन्निधिमानयत्। यतः कुसुमशस्त्रः कामस्तस्य वात्स्यायनादिप्रणीतं शास्त्रं वेत्तीति वित्। उत्प्रेक्षते, व्यवधिमानिव, दूरस्थो यथा प्रियां सन्निधिमानयति। कामशास्त्रे।

आदौ रतं बाह्यमिदं प्रयोज्यं
तत्रापि चालिङ्गनमेव पूर्वमिति।
तथा सामीप्यगाश्लेषं नवोढां सन्निधापयेत्।
पिधामकदृशा गाढालिङ्गनाच्याजयेद्वयं ॥

प्रागचुम्बदलिके ह्रियानतां
तां क्रमाद्दरनतां कपोलयोः।
तेन विश्वसितमानसां झटि-
त्यानने स परिचुम्ब्य सिस्मिये ॥ ४१ ॥
लज्जया प्रथममेत्य रुद्धतः
साध्वसेन बलिनाथ तर्ज्जितः।

इत्यादि सन्निधिस्थापनव्याजेन गाढमालिङ्ग्य भयं त्याजितवानिति भावः ॥ ४० ॥

प्रागिति। स ह्रिया आनतामतिनम्रान्तां प्राक् अलिके ललाटपट्टेऽचुम्बत्। अतिनतत्वात्तदानीं कपोलादिचुम्बनस्याशक्यत्वादित्यर्थः। ततः किञ्चिन्नतचुम्बनभयत्वात् पूर्व्वापेक्षया दरनतामीषन्नम्रां किञ्चिदुन्नतमुखीं क्रमात् परिपाट्या तदानीमेवान्यदा वा कियतापि कालेन द्वयोरपि कपोलयोश्चुम्बनेन ललाटफलकचुम्बनेन ततोऽपि विश्वसितं मानसं यस्यास्तां ततोऽप्युन्नतमुखीमानने झटिति मुखवक्रणादिभयाच्छीघ्रं परिचुम्ब्य दुर्लभाधरचुम्बनलाभजनितानन्दवशात् सिस्मिये ईषद्वक्रमहसत्। स्फुटहासे पुनर्लज्जा स्यादिति भयादीषज्जहासेत्यर्थः। अथ च यदेतावत्पर्य्यन्तं त्वया वञ्चितं तदपीदानीं मया लब्धमिति हासः। ललाटादीनि कामशास्त्रोक्तानि चुम्बनस्थानानि। इयमपि विस्रम्भणरीतिः ॥ ४१ ॥

लज्जयेति। ललाटादिचुम्बनक्रमानुभावजातसुखविश्रेषोद्भ-

किञ्चिदुच्छ्वसित एव तद्धृदि
न्यम्वभूव पुनरर्भकः स्मरः ॥ ४२ ॥
वल्लभस्य भुजयोः स्मरोत्सवे
दित्सतोः प्रसभमङ्कपालिकाम्।

मितकामोदयायास्तस्या हृदि मानसे किञ्चिदुच्छ्वसित एव विकसित एवार्भको मुग्धत्वादप्रौढः स्मरः प्रथमं चुम्बनजनितया लज्जया एत्यागत्य ऊङ्कृतः ऊङ्कारेण निषिद्धः। अथ पश्चाद्बलिना प्रबलेन चुम्बनजन्मेन साध्वसेन मालिकभयेन तर्जितो भर्त्सितोऽस्मदीयमेमोहृदयलक्षणं स्थानं त्वया प्रविष्टं तिष्ठ तिष्ठेत्याक्षेपपूर्व्वं लज्जाभयाभ्यां भर्त्सित इत्यर्थः। एवम्भूतः सन् पुनस्तत्क्षणमेवान्तर्हितोऽभूत्। चुम्बनवशात् पुनः प्रबलाभ्यां लज्जाभयाभ्यामुदितमात्र एव स्मरो दुर्बलः कृत इत्यर्थः। एवकारो विलम्बद्योतनार्थः। अर्भकोऽपि किञ्चिच्चेष्टितुमुद्युक्तो मात्रा पूर्व्वमागत्य ऊङ्कृतः पश्चात् प्रभुणापि वाचा तर्ज्जितः सन् सङ्कुचितो भवति। ऊङ्कृत इव तर्जित इवेति च प्रतीयमानोत्प्रेक्षा॥ ४२ ॥

वल्लभस्येति। स्मरोत्सवे सुरतोत्सवारम्भेऽङ्कपालिकां कृतपृष्ठवेष्टनयाऽक्रमत्वयालिङ्गनं प्रसभं हठात् दित्सतोः कर्त्तुमिच्छतोर्वल्लभस्य नलस्य भुजयोर्मध्ये एकको भुजः बालया सुरताप्रौढया तया चिरमरोधि प्रतिबद्धः। कीदृश्या। तल्पस्य शय्याया यत्नेन स्वपृष्ठदृढपीडनेन निरन्तरालया निरवकाशया।

एकक्रश्चिरमरोधि वालया
तल्पयन्त्रणनिरन्तरालया ॥ ४३ ॥
हारचारिमविलोकने त्रपा-
कौतुकं किमपि नाटयन्नयं ।

आलिङ्गनार्थं पृष्ठदेशे नलभुजप्रवेशो यथा न भवति तथा दृढं शय्यामंलीनयेत्यर्थः । शय्यायन्त्रणेन निरवकाशत्वाद्भुजरोधनाच्चालिङ्गनविघ्नं समाचरदित्यर्थः । अवलत्वादेकदेव द्वयोर्भुजयोः प्रतिरोद्धुमशक्यत्वाद्द्वाभ्यामपि निजभुजाभ्यामेकैकस्य नलभुजस्य पर्यायेण रोधनादेक इत्युक्तेऽपि द्वावपि भुजौ निरुद्धाविति ज्ञेयं । एकक इति पर्यायाशयेनोक्तं । द्वाभ्यामेकस्यैव निरोधेऽपि द्वितीयेन स्पर्शमात्रं कर्त्तुं शक्यते न तु द्विभुजसाध्यमङ्कपाल्यालिङ्गनमित्येक इत्युक्तमिति वा । अन्योन्याभिमुख्येन सुप्तयोस्तयोरधस्तनवाहु शय्यामंलग्नत्वाच्छय्ययैव नियन्त्रितौ । आलिङ्गनोद्युक्तः शय्यामंलग्नो नलवाहुस्तल्पयन्त्रणनिरवकाशत्वात् पृष्ठदेशे प्रवेष्टुमशक्यत्वादवरुद्धः, उपरितनस्तु उपरितनेन भैमीवाहुना चिरप्रतिरुद्ध इत्याशयः ॥ ४३ ॥

हारेति । हारस्य एकावल्यादिमुक्ताहारस्य चारिमा सौन्दर्यं तस्य विलोकने विषयेऽतिवृत्तस्थूलमुक्तायुक्तोऽत्यद्भुतोऽयं त्वदीयो हारो दर्शय दर्शयेत्यादि किमपि लोकोत्तरं त्रपाकौतुकं नाटयन्नभिनयन्नयं धवो भर्त्ता नलः स्पर्शलोभवशादुपकुचं स्तनसमीप धावत्येवंशीलेन पाणिना अदसीयं भैम्याः सम्बन्धि कण्ठमूलं कण्ठाधोभागमस्पृशत् । सार्वभौमस्य

कण्ठमूलदसौयमस्पृशत्
पाणिनोपकुचधाविना धवः ॥ ४४ ॥
यत्त्वयास्मि सदसि स्रजार्चित-
स्तन्मयाऽपि भवदर्हणार्हति ।
इत्युदीर्य्य निजहारमर्पयन्-
स्पृशत् स तदुरोजकोरकौ ॥ ४५ ॥
नीविसीम्नि निहितं स निद्रया
सुभ्रुवो निशि निषिद्धसंविदः ।

तस्यापूर्व्वस्य वस्तुजातस्य दृष्टत्वात् कुचस्पर्श एव तात्पर्याच्च तात्त्विककौतुकाभावेऽपि साचात्कारस्पर्शमसहमानायास्तस्या हारसौन्दर्य्यदर्शने स्पृहाकौतुकनाटनेन कण्ठमूलस्पर्शव्याजेन कुचावेव पस्पर्शेति । मुग्धाविस्रम्भणजातिः ॥ ४४ ॥

पुनस्तनस्पर्शे उपायान्तरमाह । यदिति । स इत्युदीर्य्यास्या भैमीकण्ठे निजमुक्ताहारमर्पयन् सन् हारार्पणमिषेण तस्या उरोजाविव काठिन्यादिगुणत्वेन कोरकौ पस्पर्श । इति किं । हे भैमि सदसि सभामध्ये त्वया स्रजा मधूकमालया कृत्वा यद्यस्मादर्चितः सर्व्वेषां समचं पूजितोऽस्मि, तत्तस्मान्मयाऽपि सत्कर्तृका भवत्या अर्हणा पूजा अर्हति, उपकारस्य प्रत्युपकर्त्तव्यमिति न्यायायुक्तेति । अर्हणा कृतेत्यपि पाठः ॥ ४५ ॥

नीवीति । जाग्रदवस्थायां करं निराकरिष्यतीति बुद्धा निशि निद्रया निषिद्धा वारिता संवित् ज्ञानं यस्यास्तस्याः

कम्पितं शयमपासयन्निजं
दोलनैर्जनितबोधयाऽनया ॥ ४६ ॥
स प्रियोरुयुगकञ्चुकांशुके
न्यस्य दृष्टिमथ सिस्मिये नृपः।

सुभ्रुवो भैम्या नीविमोक्षे रसनाकलापमोचनार्थं वसनपट्टिका-परिसरे निहितं स्थापितमत एव नीवीसंसर्गमात्रेण कम्पितं सात्त्विककम्पयुक्तं शयं हस्तं स नलः दोलनैः समुद्भूतस्वगतसात्त्विककम्पनिमित्तहस्तचालनैर्जनितबोधया त्याजितनिद्रयाऽनया भैम्या करणभूतयाऽपास निराकृतवान्। कीदृशः। स्वयं शुभावहविधिः सम्भोगानन्दमिति यावत् तं यन् प्राप्नुवन्। अपासयन्निजमिति पाठे भैम्या प्रयोज्यया सः प्रयोजको नलो निजं करमपासयदमोचयदित्यर्थः। कम्पमानकरस्पर्शमात्रेण जातबोधया तया तदीयः करो निराकृत इत्यर्थः। अनयेति करणे तृतीया। पाठान्तरे तु प्रयोज्यकर्त्तरि ॥ ४६ ॥

स इति। स नृपः प्रियाया ऊरुयुगस्य कञ्चुकांशुके आवरणभूते वस्त्रे दृष्टिं न्यस्यानन्तरमेव सिस्मिये ईषदहसत्। सूक्ष्मवस्त्रावृतत्वात् सर्वं मया द्रष्टुं शक्यत एवेत्याशयेनेत्यर्थः। त्रपापूर्वकाम्नेऽभिहिते स्मितस्यानन्तर्य्यं सम्भेऽप्यवहितलद्योतनार्थमथशब्दः। नीवीस्थापितकरापसनानन्तरमिति वा। अथ तत्स्मितानन्तरं निरावृतिरिव वस्त्ररहितेव त्रपावृता सती सा तदूरुयुगस्यं वस्त्रस्य तस्यैवाधुनैरावरणाच्छादयामास।

आववार तदथापराञ्चलैः
सा निरावृतिरिव त्रपावृता ॥ ४७ ॥
बुद्धिमान् व्यधित तां क्रमादयं
किञ्चिदित्थमपनीतसाध्वसां ।
किञ्च तन्मनसि चित्तजन्मना
ह्रीरनामि धनुषा समं मनाक् ॥ ४८ ॥

वस्त्रस्यातिसूक्ष्मत्वाद्वृथासम्भावितनिजगोप्याङ्गदर्शना सती घनावयवत्वसम्पादनार्थं तदस्त्रं तदञ्चलैरेव प्रावृणोदिति भावः । कामिनोरियं जातिः । अञ्चलैरिति बहुत्वं पुनः पुनरावरणक्रियाभेदात् ॥ ४७ ॥

बुद्धिमानिति । बुद्धिमान् कामशास्त्रोक्तकन्याविस्रम्भणप्रकारचतुरोऽयं इत्थं पूर्वोक्तरीत्या क्रमात् परिपाट्या तामपनीतसाध्वसां त्याजितनवसम्भोगभयां व्यधिताकृत । किञ्चेत्यधिकोक्तौ । नयमेतावदेव किन्त्वेतस्या मनसि वर्त्तमाना ह्रीस्तत्रैव स्थितेन चित्तजन्मना कामेन स्वधनुषा समं सह मनागनामि शिथिलिता । कामेन धनुषि किञ्चिदारोप्यमाणे लज्जाऽप्यस्या जातेत्यर्थः । पूर्वं कामो भयलज्जाभ्यां त्याजितः, इदानीं तु भैमीभयं नलेन निराकृतं एका स्त्री ह्रीरवशिष्टा सा कामेन सुखेनाभिभूतेति भयलज्जयोः किञ्चिदपासनेन पूर्वं मन्दीभूतोऽपि कामस्तोकं पुनरुल्लासमिति भावः । अनामि । ज्वलह्वल (सि॰ २९५।५।५) इति वार्त्तिकान्मित्त्वस्य पाक्षिकत्वान्मित्त्वाभावे

सिस्मिये हसति तेन न स्म सा
प्रीणितापि परिहासभाषितैः।
स्वे हि दर्शयति ते परेण का
ऽनर्घ्यदन्तकुरुविन्दमालिके ॥ ४९ ॥

ह्रस्वाभावः मिलेऽपि चिण्मूलोरिति (पा० ६।४।८३) पाचिको दीर्घः ॥ ४८ ॥

सिस्मिये इति। तेन परिहासभाषितैः परिहासप्रधानैः सप्रेमवचनैः प्रीणिता जनितप्रीतिरपि सा तस्मिन् हसत्यपि विकसत्कपोलनयनं अलक्षितदन्तं सिस्मिये स्मितञ्चकार। दर्शितदन्तं प्रसरद्धासं तु न चकार। अन्या तु परिहासप्रीणिता हसति इयं तु नेति चित्रमित्यपिशब्दार्थः। हि यस्मात्ते प्रसिद्धेऽनर्घ्या निर्मूल्याः सुलक्षणा दन्तास्त एव ताम्बूलरागत्वात् कुरुविन्दानि माणिक्या तेषां मालिकेऽल्पे ह्रस्वे वा माले स्वे आत्मीये सर्व्वस्वरूपे का कुलीना स्त्री परेणान्येन हासेन येन केनचित् पुरुषेण च दर्शयति दर्शनवत्यौ करोति, अपि तु हास्यं स्त्रीणां दोषायेत्युत्तमस्त्रीत्वात् प्रकटितदशनं हास्यं न चकारेति युक्तं। न ह्यनर्घ्यं वस्तु अन्यस्मै प्रदर्श्यते। तेन सह न हसति स्मेति वा। स्मितहसितविहसितोपहासाट्टहासप्रकारैर्हास्यरसो भरतेन पञ्चविधो निरूपित इति स्मितहसितयोर्भेदः। अणौ यः कर्त्तेति कर्तृसञ्ज्ञानुवादेन कर्मत्वविधानात् सञ्ज्ञापूर्व्वकविधेरनित्यत्वात् परेणेत्यत्र दृशेर्बुद्ध्यर्थत्वाद्गतिबुद्धीति (पा० १।४।५२) प्राप्तकर्मत्वाभावः ॥ ४९ ॥

3304

वीक्ष्य भीमतनयास्तनद्वयं
मग्नहारमणिमुद्रयाङ्कितं।
सोढकान्तपरिरम्भगाढता
सा त्वमानि सुमुखी सखीजनैः॥ ५०॥

याचते स्म परिधापिकाः सखीः
सा स्वनीविनिविडक्रियां यदा।
अन्वमिन्वत तदा विहस्य ता
वृत्तमत्र पतिपाणिचापलं॥ ५१॥

वीक्ष्येति। सखीजनैस्तु सा सुमुखी सोढा कान्तस्य परिरम्भणानामालिङ्गनानां गाढता दृढपीडनं यया एवम्भूतामानि अनुमिता। किं कृत्वा। भीमतनयायास्तनद्वयं, स्तनद्वये मग्नानां हारमणीनां मुद्रया किञ्चिद्गम्भीररक्तीभूतस्थानश्रियाङ्कितं चिह्नितं वीक्ष्य। स्तनयोर्मग्नहारमणिस्थानदर्शनादन्यथानुपपत्त्या गाढालिङ्गनमनया सोढमिति सखीभिर्ज्ञातमित्यर्थः। सुमुखीत्यनेनालिङ्गनसञ्जातहर्षोऽपि सूचितः॥ ५०॥

याचत इति। सा यदा यस्मिन् समये परिधापयन्तीति परिधापिकाः सखीः स्वनीव्याः आत्मीयवस्त्रमेखलाबन्धस्य निविडक्रियां गाढबन्धनं याचते स्म प्रार्थितवती तदा ताः सख्यो ऽन्योन्यमुखविलोकनपूर्व्वं विहस्याच नीवीबन्धश्लथीकरणार्थं हस्तं जातं पत्युः पाणिचापलं बलाद्विमोचनव्यापारमन्वमिन्वतानुमितिविषयमकुः। अन्यथैवं प्रार्थना न युज्यते इति पूर्व्वहस्त

कुर्व्वती निचुलितं ह्रिया कियत्
सौहृदाद्विवृतसौरभं कियत्।
कुड्मलोन्मिषितफुल्लसेविनीं
पद्मिनीं जयति सा स्म पद्मिनी॥ ५२॥
नाविलोक्य नलमासितुं स्मरो
ह्रीर्न वीक्षितुमदान्मृगीदृशः।

निश्चितवत्य इत्यर्थः। धापिर्द्धिकर्म्मा। अन्वमिन्वत। मिनोतिरनुपूर्व्वी ज्ञानार्थः॥ ५१॥

कुर्व्वतीति। कामशास्त्रोक्तलक्षणा पद्मिनी सा भैमी पद्मिनीं कमलिनीं जयति स्म। किम्भूता। कियत् किञ्चिच्चुम्बनादि सम्भोगकर्म्म ह्रिया निचुलितं स्थगितमप्रकटं कुर्व्वती। कियदालिङ्गनादिकं सौहृदाच्चित्तसौख्याद् विवृतं प्रकटितं सौरभं कामशास्त्रोक्तकौशलं यत्र एवम्भूतं कुर्व्वाणा। किम्भूतां पद्मिनीं। कुड्मलोन्मिषितानि मुकुलान्येव प्रफुल्लानि स्तनानि पुष्पाणि सेवते भजत्येवंशीलां। अर्द्धविकसितपुष्पवतीं निचुलितकलिकास्थानीयां विवृतसौरभां विकसितपुष्पस्थानीयां। कियत्कलिकारूपकियद्विकसितकमला कमलिनीव साभूदित्यर्थः। विवृतं सौरभं मनोज्ञत्वं सौगन्ध्यं वा यस्येति वा॥ ५२॥

नेति। स्मरो मृगीदृशः सुभ्रुवो भैम्या नलमविलोक्यासितुं स्थातुं ह्रीश्च तमीक्षितुं नादात् यस्मात्तस्मात्तस्या दृशः कटाक्षविक्षेपरूपा नेत्रव्यापाराः क्रमेण पतिदिश्चा नलाधिष्ठितदेश-

तद्दृशः पतिदिशाचलन्नथ
व्रीडिताः समकुचन्मुहुः पथः ॥ ५३ ॥
नानया पतिरनायि नेत्रयो-
र्लक्ष्यतामपि परोक्षतामपि ।

मुद्दिश्य वलितग्रीवं वारंवारमचलन्। अथ पश्चात् अभिमुखं नलनेत्रसम्मेलने सत्यनन्तरं व्रीडिताः सत्यः नलमप्राप्य पथो मार्गादेव मुहुः पुनः पुनः समकुचन् परावृत्ताः कामप्रेरितत्वादीक्षितुमारेभे, लज्जया निषिद्धत्वाच्च तदीक्षणान्निवृत्तेति भावः। लज्जाकामयोः समबलत्वाद्भावसन्धिः। दृशां व्यापारापेक्षया बहुत्वं ॥ ५३ ॥

नेति। अनया पतिः प्रियो नेत्रयोर्लक्ष्यतां गोचरत्वमपि नानायि परोक्षतामगोचरत्वमपि न प्रापि। नन्वेकस्य वस्तुनः परोक्षता वा भवेदपरोक्षता वा भवेन्न तूभयता विरोधादित्याशङ्क्योपपादयति। खलु यस्माद्धेतोः यस्य हारमुकुररत्नस्तम्भादेर्वस्तुनो विलोकने सति स नलो वीक्ष्यते तत्र तत्र हारादिवस्तुनि विषये नयने ददानया प्रेरयन्त्या मुकुरादेर्विलोकने तत्र तत्र प्रतिबिम्बितो नलोऽनुपलक्षितदर्शनेन दृष्टो मामियं पश्यतीति तेनाज्ञातत्वात् उद्देश्यतया बिम्बरूपस्तु न दृष्ट इति विषयान्तरविलोकनव्याजेन प्रसङ्गात् सञ्जातदर्शनस्य नलस्योभयरूपताकारेण वैचित्र्यादेकस्यापि विरुद्धोभयरूपस्वरूपसम्भवे संस्कारद्विधाभ्यां सदोत्पादनाच्छास्त्रे सत्यभिज्ञा-

वीक्ष्यते स खलु यद्विलोकने
तत्र तत्र नयने ददानया ॥ ५४ ॥
वासरे विरहनिःसहा निशां
कान्तसङ्गसमयं समैहत ।
सा ह्रिया निशि पुनर्दिनागमं
वाञ्छति स्म पतिकेलिलज्जिता ॥ ५५ ॥

वल्लोके च खरतुरगोभयोद्भूतत्वादेसरवच्च युक्तेत्यर्थः । लज्जावशात् साक्षाद्यद्यपि नापश्यत्तथापि कामप्रेरितत्वाद्दर्पणादिद्वाराऽपश्यदिति भावः । वीक्ष्यते स्मेति पाठः सुयोजः । यद्यस्माद्विलोकने नलविलोकननिमित्तं तत्र तत्र वस्तुनि नेत्रे ददत्या स वीक्ष्यते स्मैव तस्माल्लच्यतां परोचताञ्च नानार्थेति वा ॥ ५४ ॥

वासर इति । सा यस्माद्वासरे दिने विरहनिःसहा सम्भोगविच्छेदं सोढुमशक्ता तस्मात् कान्तस्य सम्भोगसमयं सम्भोगमयरूपां निशां समैहत, रात्रिः कदा वा समेष्यतीति । निशि प्राप्तायां पत्युः केलिभिः नवनवकामक्रीडाभिर्लज्जितात एव ह्रिया हत्वा पुनर्दिनोदयं वाञ्छति स्म । प्रभातं कदा वा समेष्यतीति । हेतुहेतुमद्भावान्न पौनरुक्त्यं । सहजया ह्रिया युक्ता ततोऽपि पतिकेलिभिर्विशेषेण लज्जितेति वा न पौनरुक्त्यं ॥ ५५ ॥

तत् करोमि परमभ्युपैषि यन्-
मा ह्रियं भज भियं परित्यज।
आलिवर्ग इव तेऽहमित्यमूं
प्रत्यदाश्वसनमूचिवान्नलः ॥ ५६ ॥
येन तन्मदनवह्निना स्थितं
ह्रीमहौषधिनिरुद्धशक्तिना।
सिद्धिमद्भिरुदतेजि तैः पुनः
स प्रियप्रियवचोभिमन्त्रणैः ॥ ५७ ॥

तदिति। नलः अमूं भैमीं प्रत्यश्विरन्तरं इति आश्वसनं विश्वासहेतुं वचः ऊचिवान्। इति किं? हे भैमि बहुविधेष्वालिङ्गनचुम्बनादिषु मध्ये यत् त्वं अभ्युपैषि अनुमन्यसे तत्परं केवल अत्यर्थं वा करोमि नान्यत्, तस्माद्ध्रियं मा भज, पुनःसङ्गेन किं वा भावीति चित्ते धृतां भियं परित्यज, यतोऽहमपि आलिवर्ग इव सखीसमूहतुल्यः, तस्मात्तस्मिन् यथा विश्वसिषि तथा मय्यपि विश्वसिहि भयं मायासीरिति। इह त इति पाठे इह चुम्बनादौ विषयेऽहमेवालिवर्ग एव, सखीकर्तृके चुम्बनवादौ यथा कापि न भीतिस्तथाचापीत्यर्थः॥ ५६ ॥

येनेति। येन तस्या मदनरूपेण वह्निना, ह्रीरेव महौषधिर्दिव्यौषधिस्तया निरुद्धा शक्तिः सामर्थ्यं यस्य तेन, लज्जया विलीनेन स्थितं, स कामाग्निः पुनः सिद्धिमद्भिः प्रकृतार्थसाधनसमर्थैस्तैरुक्तरूपैः प्रियस्य प्रियवचांसि तद्रूपाण्यभिमन्त्रणानि

यद्विधूय दयितार्पितं करं
दोर्द्वयेन पिदधे कुचौ दृढं
पार्श्वगं प्रियमपास्य सा ह्रिया
तं हृदि स्थितमिवालिलिङ्ग तत्॥ ५८॥
अन्यदस्मि भवतीं न याचिता
वारमेकमधरं धयामि ते।

रहस्यमन्त्ररूपात्सैरुदतेजि प्रदीपि प्रकटीकृतसामर्थ्योऽकारीत्यर्थः। पूर्वोक्ताश्वासवचनैः पुनरुद्दीप्तकामा जातेति भावः। अन्योऽपि वह्निरौषधप्रतिबद्धशक्तिः सुचिह्नैरग्निप्रकाशकैर्मन्त्रैः पुनरुद्दीप्यते। उदतेजि। तिज निशाने। निशानमुद्दीप्तकरणं। अत्र चमार्थाभावान्न सन्॥ ५७॥

यदिति। सा दयितेन मर्दनार्थं कुचयोरुपर्यर्पितं करं कराभ्यां विधूय निराकृत्य स्वस्तिस्वरूपेण करद्वयेन दृढं कुचौ यत् पिदधे तत्तेन कुचपिधानप्रकारेण पार्श्वगं समीपे स्थितं प्रियं ह्रियापास्य हृदि स्थितं तमेवालिलिङ्गेवेत्युत्प्रेक्षा। स्त्रीणां गात्रस्पर्शे यन्निवारणं तदेव कामस्य परमायुधं। आलिङ्गनेन यथा कामः प्रदीप्तो भवति तथा कुचमर्दननिषेधपरेण कुचपिधानेनापि नलः प्रदीप्तकामो जात इति भावः। मुग्धाजातिरियं॥ ५८॥

अन्यदिति। इति एवम्प्रकारादुपांशुः सदाभीत्या प्रार्थनादैन्यवशात् काकुः ध्वनिविकारयुक्ता वाक् यस्य स नलो दीन-

इत्यसिखददुपाप्तकालुवा-
गुपमर्द्दे हठवृत्तिरेव तं ॥ ५८ ॥
पीततावकमुखासवोऽधुना
मृत्य एष निजकृत्यमर्चति ।

प्रार्थनवशात् किञ्चिदनुमतौ सत्यामुपमर्द्दे दन्तदशनोष्ठपीड-नगाढालिङ्गनादौ यो हठः तेन सहिता वृत्तिरधरपानादि-व्यापारो यस्य सोऽयमन्यदा करधूननादिसविघ्नाधरपानहठ-वृत्तिर्यस्य वा एवम्भूत एव सन् तमधरमसिखदत् अपात्। एव-मालिङ्गनाद्यपि। इति किं? हे भैमि अहं भवतीं त्वामन्यदपरं किमपि कुचमर्द्दनादि न याचितास्मि पार्थयिष्ये, किन्तर्हि अहं एकवारं तेऽधरं धयामि पिबामीति। अपाने दीनवचनं। पाने तु बलात्कारः। एकवाराधरपानानुमतेरुपमर्द्देन सा-ङ्गेन ताडिता हठवृत्तिरननुमतद्वितीयवाराधरपानव्यापारो यस्येति वा। एकवाराधरपानमात्रानुमतौ लब्धायामालिङ्ग-नाद्यपि द्वितीयाद्यधरपानमप्यकरोदपराधमार्जनं तदनन्तरं करिष्यामीति बुद्धेतिभावः। पूर्व्वमोष्ठपानमात्रमकरोदनन्तरं नखक्षताद्यपीति केचित्। अन्यदेति पाठे क्षणान्तरे पुनरधर-पानमपि न याचिष्य इत्यर्थः। सोऽयमर्द्देति पाठे सोऽयमर्द्दः किञ्चिन्मात्रो हठो यत्रैवंविधो व्यापारो यस्य। पूर्व्वपाठे स इति शेषं। याचिता तृच्। वारं। काले द्वितीया ॥ ५८ ॥

पीतेति। अयो नल इत्युक्तिव्याजेन तत्रोरो पाणिपल्लवं मृदु-

तत्करोमि भवदूरुमित्यसौ
तत्र संन्यधित पाणिपल्लवं ॥ ६० ॥
चुम्बनादिषु बभूव नाम किं
तद्भुया भयमिहापि मा कृथाः।
आलपन्निति तदीयमादिमं
स व्यधत्त रसनावलिव्ययं ॥ ६१ ॥

सुखस्पर्शतया पल्लवतुल्यं पाणिं सन्न्यधित स्पष्टं सन्निवेशितवान्। इति किं? हे भैमि एष भृत्यः मच्चरणो दासः पीतस्त्वत्कमुख-मेवासवो मद्यं येनाथ च पीतस्तदीयमुखस्य सुरागण्डूषो येनै-वम्भूतः सन्नधुना निजकृत्यं चरणसंवाहनादिरूपं भृत्यसम्बन्धि कार्य्यं कर्त्तुमर्हति उचितो भवति। तत्तस्माद्दूरारामपुष्पाव-चयादिना खिन्नं भवदूरुं त्वदीयमूरुं करोमि संवाहयामि। अथ सामर्थ्यादूर्ध्वं करोमीति। अनेकार्थत्वात् करोतिः संवाह-नार्थः। अन्योऽपि भृत्यो भुक्तमुखोच्छिष्टश्चरणसंवाहनं करोति ॥ ६० ॥

चुम्बनेति। इत्युदीर्य्य, सोऽयं नलः, स्मरोद्दामस्तदानीमति-तमचञ्चलदृशो भैम्या आदिमं कदाचिदप्यकृतपूर्व्वत्वात् प्रथमं रसनावलिव्ययं मेखलाकलापमोचनं निर्ममे चक्रे। ऊरुस्पर्शादौ वाम्यं भयञ्च भजन्त्या भैम्या एवंविलक्षणपूर्व्वकं वसनमोचकर्षेति भावः। इति किं? नामेत्यनुभूतविषयप्रश्नाभिनये, हे भैमि: चुम्बनाश्लिङ्गनादिषु किं नाम विरुद्धं बभूवापि तु न किञ्चित्,

अस्तिवाम्यभरमस्तिकौतुकं
सास्तिघर्म्मजलमस्तिवेपथु ।
अस्तिभीति रतमस्तिवाञ्छितं
प्रापदस्तिसुखमस्तिपीडनं ॥ ६२ ॥
क्रीस्त्वियमुचितैव यन्नव-
स्तावके मनसि मत्समागमः ।

तत्तस्मादिदानीमस्मिन् क्रियमाणे सुरतारम्भेऽपि भुजपीडने वा मेखलामोचने वा वृथा अकारणं भयं मा कृथाः ॥ ६१ ॥

अस्तीति । सा एवम्भूतं रतं प्रापत् । किम्भूतं । आरम्भसमये अस्ति वर्त्तमानो वाम्यभरो रतिप्रातिकूल्याचरणबाहुल्यं यत्र, आरम्भानन्तरञ्च अस्तिकौतुकं अननुभूतचरत्वादत्याश्चर्यं यत्र, ततोऽपि सात्त्विकोत्पत्तेः आन्तेस्वास्ति घर्म्मजलं यत्र, तथा अस्ति वेपथुर्यत्र, ततः सम्भोगे प्रारब्धे भये निवृत्तेऽपि किमन्ते भाषीत्यस्ति भीतिर्यत्र, तथा सुरतहेतुत्वादस्ति वाञ्छितमभिलाषो यत्र, तथा लिङ्गकमसमर्द्दादस्ति सुखं यत्र, समरसमुरतावमानसञ्जातसुखमिति यावत्, ततोऽप्यस्ति पीडनं सम्भोगावमाने सर्व्वाङ्गगाढालिङ्गनं यत्र, एवम्भूतं प्रथमसम्भोगमन्वभूदिति भावः । अस्तीति (सि०कौ०२८।१।७५०) विभक्तिप्रतिरूपमव्ययं । अस्ति चौरादयश्चेति समासः ॥ ६२ ॥

क्रीति, इति चेति दृगां । चतुरः कामकलाकुशलः स नलः सम्भुजिक्रियायाः सुरतस्यारम्भे विभ्रमैर्घनैर्निविडैर्लज्जितैर्म-

नत्तु निस्त्रपमजस्रसङ्गमाद्
व्रीडमावहति मामकं मनः ॥ ६३ ॥
इत्युपालभत सम्भुजिक्रिया-
रम्भविघ्नघनलज्जितैर्जिताम् ।
तां तथा स चतुरोऽथ सा यथा
चप्तुमेव तमनु त्रपामयात् ॥ ६४ ॥ युग्मम् ॥

ज्जानिर्मितैरङ्गसङ्कोचनादिभिर्जितां अतिलज्जितां तां इति पूर्वोक्तप्रकारेणोपालभत सोल्लुण्ठनमूचे । सा भैमी यथा येन प्रकारेणाथोपालम्भनानन्तरं तमनु लघीकृत्य चप्तुमेव लज्जितुमपि त्रपामयात् लज्जां प्राप । लज्जागुप्तिविषयेऽपि लज्जा यथा जायते तथेयमुपालब्धेत्यर्थः । मम लज्जावशादन्यथास्य चेतसि स्फुरितमिति भिया लज्जां विहाय विस्रम्भेण तेन सह चिक्रीडेति भावः ॥

इति किं । हे भैमि तवेयं वर्त्तमाना ह्रीर्लज्जा युक्ता उचितैव, यद्यस्मात् मत्समागमः तावके मनसि नवो नूतनो जातः, नवसम्भोगवशान्निस्त्रपं निर्लज्जमपि मामकं मनस्तु पुनः व्रीडं लज्जामावहति धारयति यत्तेयमनौचिती सामर्थ्यात्सिद्धेत्यर्थः, निर्लज्जस्य लज्जा विरोधादयुक्ता वा । सञ्जातसङ्गमस्यात्यर्थपरिचयाल्लज्जा न युक्तेत्यर्थः । यद्वा लज्जाया औचित्ये कारणान्तरमाह । तुरप्यर्थः । अजस्रसङ्गमादिस्त्रपं मामकमपि मनो लज्जितां त्वां दृष्ट्वा यस्माल्लज्जते किमु

बाहुवल्लिजघनस्तनाङ्घ्रिनद्-
बन्धगन्धरतसङ्गता नतीः ।
इच्छुरुत्सुकजने दिने स्थिते
वीक्षितेति समकेति तेन सा ॥ ६५ ॥

वक्तव्यं, प्रथमसम्भोगे ते मनो लज्जत इति ॥ ६२ ॥ ६४ ॥

बाह्विति। तेन वीक्षिता सा भैमी इति पूर्वोक्तप्रकारेण समकेति सङ्केतिता। इति किं। हे भैमि उत्सुकाः स्वस्वकार्य्यसाधनोत्साहवन्तो जना यत्र रात्रिवृत्ताकर्णनाद्यर्थमुत्सुकः सखीजनो यत्रैवंविधे वा दिने, स्थित इति भैमीसम्बोधनं वा, दिवसेऽपि ते सम्बन्धिनीः, बाहू च वक्षं च जघनं च स्तनौ च अङ्घ्री च तस्य बाह्वादेः कामशास्त्रप्रसिद्धा ये बन्धा नागपाशादीनि करणानि तेषां गन्धो लेशो विद्यते यत्र तादृशं रतं तेन सङ्गता मिलिताश्च ता नतयश्च नितरां नम्रत्वातिकोमलातिशयनिर्मितानवयवनम्रीभावान् सङ्गता इति पृथग् वा नतीरिच्छुरभिलाषुकोऽस्मीति रात्रिकृतबन्धरतप्रत्यभिज्ञानं यथा भवति तथा वीक्षमाणेनेङ्गितं कृत्वानुरागातिशयाद्दिनेऽपि स्वीयं तादृपताभिलाषं तां प्रति ज्ञापितवानिति भावः। यद्वा बाह्वादेस्ताः प्रसिद्धाः क्रमेण बन्धस्य गन्धस्य रतस्य सङ्गतस्य आनतिस्य ताः बाह्वोर्नागपाशादिबन्धो वक्षस्य गन्धः पद्मिनीत्वात् सौरभं जघनस्य रतं स्तनयोः संगतश्चेपश्चरणयोः पतनमानतिरित्यर्थः। त्वत्सम्बन्धिनीस्ताः स्वस्वव्यापारकरणमात्रगि-

प्रातरात्मशयनाद्विनिर्यतीं
सन्निरुध्य यदसाध्यमन्यदा।

रता दुश्चित्ता जना यन्नैवम्भूते दिनेऽपि दिदृक्षुरस्मीति विवक्षिता मानेन स्वाशयं ज्ञापिता। यद्वा त्वां पश्यामि तदैव ममैवं वाञ्छोदेति त्वद्दर्शनमेव मम सम्भोगसमय इति च ज्ञापितेति भावः। उत्सुकसखीजनेस्मिते इति पाठे रात्रिवृत्तमन्त्र-वाञ्छागोपनार्थं तस्माल्लज्जा माभूदिति अस्मिते स्मितरहिते व्रीडिते एवंविधे ज्ञातुमेवोत्सुके सखीजने सखीजनसन्निधौ पूर्वोक्तप्रकारेण सा तेन सङ्केतिता शब्दिता। यद्वा रात्रावाचरितं वा-ऽऽङ्गबन्धादि तदिदानीमिच्छुरस्मीति रात्रिवृत्तान्तज्ञापनार्थं सखीसन्निधावेवमुवाचेत्यर्थः, अत एव सा व्रीडिता। उत्सुके सखीजने स्मिते प्रारब्धहास्ये सति व्रीडितेति वा। हे भैमि ते वाङ्गादिबन्धादीन् दिने वीचिता द्रष्टा एवम्भूतोऽभिलाषुकोऽस्मि, रात्रौ यद्यपि कृतास्तथापि न दृष्टाः, तस्माद् दिने तद्दर्शने दिदृक्षुरस्मीत्येव सा तेन शब्दिता न परमहमेव किन्तु त्वत्सखीजनोऽपीत्युत्सुकपदेन सूचितमिति वा। व्याख्यानान्तरं ग्रन्थगौरवभयान्नोक्तं। नतीरित्यत्र चक्षुर्वीक्षितेत्येताभ्यां योगे, न लोकेति (पा०२।३।६९) निषष्ठीनिषेधः॥ ६५॥

प्रातरिति। भुवो जम्भजिद्भूमीन्द्रो नलः प्रातरात्मशयनादुत्थाय विनिर्यतीं शीघ्रं बहिर्निर्गन्तुकामां सन्निरुध्य चेलाञ्चलादौ सम्यक् धृत्वा क्षितिशचीं भूमीन्द्राणीं सुन्दरीं सौभाग्यवतीं च

तन्मुखार्पणमुखं सुखं भुवो-
जम्भजित्क्षितिशचीमचीकरत् ॥ ६६ ॥
नायकस्य शयनादहर्मुखे
निर्गता मुदमुदीक्ष्य सुभ्रुवां ।
आत्मना निजनवस्मरोत्सव-
स्मारिणीयमह्रणीयत स्वयं ॥ ६७ ॥

अन्यदा अन्यस्मिन् काले रात्रौ प्रागेव स्त्रीभयवशादसाध्यम-प्रायं तत्तस्या मुखार्पणं मुखमादिर्यस्य तत् सुखं सुरतं अचीक-रत्। रात्रिप्रान्तसमये त्वं मदुक्तं चेत् करिष्यसि तर्हि दुष्करम-प्रायं तुभ्यं दास्यामि नान्यथेति तां सन्निरुध्यालिङ्गनादि कृत-वान्। सा गन्तुकामापि चेदेतदुक्तं न करिष्यामि तर्ह्ययं गन्तुं न दास्यति सखीनां चायमत्रागमनसमय इति विचार्य चुम्ब-नादि दत्वा शीघ्रं निर्गतेति भावः। सुखमनायासेनाचीकरदिति क्रियाविशेषणं वा। प्रभातसमये पद्मिनी रन्तव्येति कामशास्त्रं। क्षितिशचीमिति। हृक्रोरिति (पा० १।४।५३) कर्मत्वं ॥ ६६ ॥

नायकस्येति ॥ अहर्मुखे प्रातर्नायकस्य शयनान्निर्गता इयं भैमी सुभ्रुवां प्रौढानां सुन्दरीणां सख्यादीनां स्वस्वप्राणेश-सुरतजनितां मुदमानन्दमुदीक्ष्य आत्मनैव निजः स्वीयो नवः स्मरोत्सवः सम्भोगस्तस्य स्मारिणी स्मारणशीला सती स्वयमेवा-ह्रणीयत लज्जिता। अनतिप्रौढोत्तमस्त्रीजातिः। शयनान्नि-र्गता सखीनां श्लथघटितकपोलपत्रवल्लीमार्जनादि दृष्ट्वा स्वम-

तां मिथोऽभिदधतीं सखीं प्रिय-
स्यात्मनश्च स निशाविचेष्टितं।
पार्श्वगः सुरवरात् पिधां दधद्
दृश्यतां श्रुतकथो हसन् गतः॥ ६८॥
चक्रदारविरहेक्षणक्षणे
बिभ्यती धवहसाय साभवत्।

म्भोगचिह्नेन स्वस्वरूपेण कृत्वा निजनवस्मरोत्सवं सखीः स्मरयन्त्येवंशीला वा सती स्वयं ललज्जे। निजधवेत्यपि पाठः। क्षणीत्कंड्वादिः॥ ६७॥

तामिति। स नलः तां भैमीं हसन् दृश्यतां गतः, स्वेच्छयैव पुनर्नयनगोचरत्वं प्राप्तः। किम्भूतां। प्रियस्य नलस्य आत्मनः स्वस्य च स्वसखीं प्रति मिथो रहसि निशाविचेष्टितं सम्भोगादिरात्रिवृत्तान्तमभिदधतीं कथयन्तीं। किम्भूतः। सुराणां वरात् पिधामदृश्यत्वं दधत्, अत एव पार्श्वगो निकटस्थः, अत एव श्रुता भैम्याभिधीयमाना रात्रिवृत्तान्तकथा येन। अदृश्येन मया अत्रैव स्थित्वा सर्वं श्रुतमिति प्रत्ययो भूत्वा हसन्न चाकथयदित्यर्थः। हसद्गत इति पाठे श्रुतकथो दृश्यतां गतस्तामहसदित्यर्थः। पिधेति, आतश्चोपसर्गे (पा० ३।३।१०६) इत्यङ्॥ ६८॥

चक्रेति। सा भैमी चक्राणां चक्रवाकाणां दारैः चक्रवाकीभिः सह विरहस्तस्येक्षणक्षणे दर्शनकाले सन्ध्यायां, ममापि प्रियेण सहैतद्वियोगो माभूदिति क्षणमात्रमपि वियोगाद्बिभ्यती धवस्य

क्वापि वस्तुनि यदत्यनागतं
चित्तमुद्यदनिमित्तवैकृतं ॥ ६९ ॥
चुम्बितुं न मुखमाचकर्ष यत्
पत्युरन्तरमृतं ववर्ष तत्।
सा नुनोद न भुजे यदर्पितं
तेन तस्य किमभून्न तर्पितं ॥ ७० ॥

नलस्य क्षमाय क्षामार्थमभवत्। सन्ध्यावन्दनमात्रजन्येनैव वियोगेन चक्रवियोगदर्शनमात्रेण च किमिति विभेषीत्येव सा प्रियेण क्षमितेत्यर्थः। तावतैव वियोगेन तद्वियोगदर्शनमात्रेण च किमिति भीतेत्याशङ्क्याह क्वापि कस्मिंश्चिद्वस्तुनि विषये उद्यदुत्पद्यमानमनिमित्तमकारणं वैकृतं हर्षशोकभयादि यस्मिन्नेवम्भूतं चित्तं कर्त्तृ अनागतभाविनमर्थं शुभमशुभं वा वदति, तस्मात् भाविवियोगसूचिका साधारणी तस्या भीतिर्युक्तेत्यर्थः। भावी विरहः सूचितः। इयं ज्ञातास्वादा नितरां मय्यनुरक्तेति सन्तोषवशात् स तेन क्षमितेति भावः। बिभ्यतीं स परिरभ्य मुग्धधीति पाठे भयमोचनार्थं गाढमालिङ्गैव तस्थावित्यर्थः। विकृतिरेव वैकृतं, प्रज्ञादित्वादण् ॥ ६९ ॥

चुम्बितुमिति। सा क्रमेण गतभीर्जितलज्जा च सती चुम्बितुं प्रियेण चुम्बितुमारब्धं मुखं यन्नाचकर्ष वक्रीचक्रे तच्चुम्ब्यमानमुखानाकर्षणं कर्तृ पत्युरन्तश्चेतसि अमृतं ववर्ष। तदीयं मनः सुधारसेनेव परितुष्टं चक्रे इत्यर्थः। तथा तेन स्तनादावर्पितं

नीतयोः स्तनपिधानतां तया
दातुमाप भुजयोः करं परं।
वीतवाङ्गनि ततो हृदंशुके
केवलेऽप्यथ स तत्कुचद्वये ॥ ७१ ॥
याचितां न ददतीं नखार्पणं
तां विधाय कथयान्यचेतसं।
वक्षसि न्यसितुमात्ततत्करः
स्वं विभिद्य मुमुदे स तन्नखैः ॥ ७२ ॥

भुजं यन्न नुनोद निराचकार तेन भुजस्वीकारेण प्रयोजकेन तस्य किमङ्गं तर्पितं नाभूत् अपि तु सर्व्वाङ्गं तेन प्रीणितमभूत् ॥ ७० ॥

नीतयोरिति। स नलः तया पाणिपीडनभिया स्तनपिधानतां कुचाच्छादनतां नीतयोः प्रापितयोस्तदीयभुजयोः परं केवलं करं दातुं पूर्व्वं आप शक्तोऽभूदित्यर्थः। ततोऽनन्तरं वीतवाङ्गनि अपनीतभैमीकरे हृदंशुके हृदयावरणवस्त्रे करं दातुमाप। अथ ततोऽपि पश्चात् केवले निरंशुके तत्कुचद्वये करं दातुमाप। मुग्धाजातिः। लज्जापचयकामापचयौ क्रमेणोक्तौ ॥ ७१ ॥

याचितामिति। त्वमपि नखोल्लेखं कुर्व्विति प्रेमभरेण याचनादपि नखक्षतं न ददतीं कयापि कथयान्यस्मिन् गोष्ठीरस एव चेतो यस्यास्तां विचिन्तां विधाय गोष्ठीसंवादमुखाभिन-

स प्रसह्य हृदयापवारणं
हर्त्तुमक्षमत सुभ्रुवो बहिः।
ह्रीमयं न तु तदीयमान्तरं
तद्विनेतुमभवत् प्रभुः प्रभुः॥ ७३॥
सा स्मरेण बलिनाप्यहापिता
ह्रीक्षमे श्लथमशोभतावला।
भाति चापि वसनं विना न तु
व्रीडधैर्य्यपरिवर्जने जनः॥ ७४॥

यद्व्याजेन स्ववक्षसि न्यसितुं स्थापयितुं आत्तः स्वहस्तेन गृहीतस्तस्याः करो येनैवम्भूतः सन् तस्याः स्वहस्तधृतहस्तनखैः स स्वशरीरं विभिद्योल्लिख्य मुमुदे॥ ७२॥

स इति। स प्रभुः स्वामी सुभ्रुवो भैम्या बहिर्हृदयापवारणं स्तनाच्छादि वसनं प्रसह्य हठाद्धर्त्तुमक्षमत, तु पुनः ह्रीमयं आन्तरं अन्तःस्थं भैमीसम्बन्धि तत्कामक्रीडानिवारकं कुलस्त्रीहृदयभूषणीभूतमपवारकमपनेतुं प्रभुः समर्थो नाभवत्। एवं विस्रम्भणक्रमेण यद्यपि लज्जां त्याजिता तथापि हृदयाच्छादिवस्त्रापाकरणपूर्व्वं कुचस्पर्शादिना पुनरपि लज्जितैवेति भावः॥ ७३॥

सेति। सा बलिना प्रभाववता अथ च प्रदीप्तेनापि स्मरेण ह्रीक्षमे लज्जाधैर्य्ये अहापिताऽत्याजिता सा अबला स्त्री अथ च क्षीणत्वाद् दुर्बला श्लथमशोभत, युक्तोऽयमर्थः। यतो जनो वसनं

आत्थ नेति रतयाचितेन चे-
न्मामतोऽनुमतवत्यसि स्फुटं।
इत्यमुं तदभिलापनोत्सुकं
धूनितेन शिरसा निरास सा॥ ७५॥
या शिरोविधुतिराह नेति ते
सा मया न किमियं समाकलि।

विनापि भाति च शोभत एव तु पुनः ब्रीडधैर्य्ययोः परिवर्जने परित्यागे नैव शोभते। तस्मादुक्तमर्थान्तरन्यासः। उद्दीप्तेऽपि कामे लज्जाधैर्य्यापरित्यागान्नितरां नलस्य स्पृहणीयत्वात् शुशुभ इति भावः॥ ७४॥

आत्थेति। सा इत्येवम्भङ्ग्या स्वनिषेधार्थमपि तस्या अभिलापने मञ्जुलवाणीश्रवणे उत्सुकं कौतुकिनममुं धूनितेन कम्पितेन शिरसा कृत्वा निरास निषिषेध। इति किं। हे भैमि त्वं मह्यं सुरतं देहि प्रसीदेति सुरतयाचितं मां यद्यस्मान्नेति न आत्थ अतो हेतोरप्रसिद्धमनुमतं भवतीति न्यायेन स्फुटं सुरतं कुर्विति मामनुमितवत्यसि अनुज्ञातवती त्वमसीति, इयं सुरतं नानुमन्यते परं मया सह न वदत्यपीत्येवं परिहासभाषणे क्रियमाणे निषेधार्थमपि किञ्चिदवदिष्यतीत्याशया नलेन तदाचनार्थमेवं यत्ने कृतेऽपि कुशला लज्जाधैर्य्यवशाच्छिरोधूननेनैव तं न्यषेधन्न तु साक्षादुत्तरमप्युवाचेति भावः॥ ७५॥

येति। हे भैमि ते या शिरोविधूतिः शिरःकम्पः नेत्याह

तन्निषेधसमसङ्ख्यताविधि-
र्व्यक्तमेव तव वक्ति वाञ्छितं ॥ ७६ ॥
नात्थ नात्थ शृणवानि तेन किं
तेन वाचमिति तां निगद्य सः।
सास्म दूत्यगतमाह तं यथा
तज्जगाद मृदुभिस्तदुक्तिभिः ॥ ७७ ॥

निषेधार्थं ब्रूते मया सेयं किं न समाकलि सम्यक् न ज्ञातापि तु सम्यग्ज्ञातैव। कथमित्याह। तयोः शिरोधूनिरूपयोर्निषेधयोर्या समसङ्ख्यता तुल्यसङ्ख्यता सा तववाञ्छितं सुरतरूपं विधिं व्यक्तमेव वक्ति वदति सुरतं तवेष्टमित्याद्येत्यर्थः। द्वयोरेव निषेधयोः सुन्दोपसुन्दन्यायेनान्योन्यघाताद्वौ नञौ प्रकृतार्थं गमयत इति न्यायेन च सुरतं त्वया विधेयमेवेति मां प्रति विधावेव तात्पर्यमिति मया त्वदाशयो ज्ञात इति भावः। इति पुनरपि भैमीवादनार्थं वक्रोक्तिः। विधिरिति पाठे तस्य मत्प्रार्थितस्य शिरोधूनतिद्वयरूपौ निषेधौ तयोः समसङ्ख्यैव विधिः। स तवाभिलाषं स्पष्टमेव वक्तीति व्याख्येयं॥ ७६ ॥

नेति। स नलस्तां इति पूर्वोक्तं निगद्योक्त्वा, सा दूत्यं गतं प्राप्तं दूत्येन हेतुना वा भैमीसविधं गतं तं नलं तदद्य विश्रंस्य शृण इत्यादि यथा आह स्म ब्रूते स्म, तदैव मृदुभिरतिमञ्जुलाभिस्तस्या भैम्या उक्तिभिस्तद्भाषणानुकारिणीभिर्जगाद तादृग्वाग्भिरवादीदित्यर्थः। इति किं। हे भैमि, त्वं मे वाचं न शृण-

नीविसीम्नि निविडं पुरारुणत्
पाणिनाथ शिथिलेन तत्करं।
सा क्रमेण न न नेति वादिनी
विघ्नमाचरदमुष्य केवलम् ॥ ७८ ॥
रूपवेषवसनाङ्गवासना-
भूषणादिषु पृथग्विदग्धतां।

वाणि तेन मदश्रवणेन हेतुना मया नाकर्णनीयमिति बुद्धा त्वं नात्थ न ब्रूषे न किं त्वद्वाक्यानि मया पूर्व्वमेवाकर्णितानि इदानीं तव भाषणं मया न श्रोतव्यमिति हृद्यैवेयं मुखमुद्रणेति त्वया वक्तव्यमित्यवददिति भावः। त्वं नात्थेति स्वरभङ्ग्या मामवादीरित्यर्थः। किमित्याक्षेपे वा ॥ ७७ ॥ युग्मम् ॥

नीवीति। सा पुरा प्रथमं सम्भोगारम्भे नीविसीम्नि वर्त्तमानं तस्य करं स्वपाणिना निविडमतिगाढं यथा तथा अरुणत्। अथानन्तरं क्रमेण भयभङ्गानन्तरं दिनान्तरे नितम्बजघनस्पर्शकारिणं नलकरं शिथिलेन पाणिना रुरोध। ततोऽपि लज्जाविजयानन्तरं निषेधमात्रार्थं न न नेति वादिनी सती अमुष्य नलकरस्य नलस्यैव वा केवलं विघ्नमाचरत्। न न नेत्युक्ते यदि न निवर्त्तेत मा निवर्त्ततु वदामि तावदेवमिति वचोमात्रेण विघ्नमाचरन्न तु कर्म्मणेति भावः। मुग्धाजातिः। भयलज्जात्यागः सूचितः ॥ ७८ ॥

रूपेति। सा रूपेषु देववरदानात् कायधारणनिर्म्मितेषु

सान्यदिव्ययुवतिभ्रमक्षमा
नित्यमेत्य तमगान्नवा नवा ॥ ७९ ॥
इङ्गितेन निजरागनीरधिं
संविभाव्य चटुभिर्गुणज्ञताम् ।

सौन्दर्यविषयेषु, वेषेषु महाराष्ट्रलाटगुर्जरादिस्त्रीधृतवस्त्रालङ्कारादिशृङ्गारभङ्गीषु, वसनेषु नीलपीतदुकूलादिषु वस्त्रेषु, अङ्गवासनासु चन्दनकस्तूरीकर्पूराद्यङ्गरागैरगरुचन्दनादिधूपैश्च कृतेषु देहामोदेषु, भूषणेषु सौवर्णेषु मुक्तामाणिक्यहीरकादिखचितेषु अलङ्कारादिषु विषये पृथक् प्रत्येकं प्रतिदिनं विदग्धतां चातुरीमेत्य प्राप्यातएव नवा नवा नूतना सती नित्यं तमगात् सम्भुजे इत्यर्थः । किम्भूता । अन्यस्या दिव्ययुवतेरम्भादिस्वर्गस्त्रिया भ्रमे इयमेव सेति भ्रान्तौ क्षमा योग्या समर्थेत्यर्थः । अन्यैवमन्यैवेयमिति तस्य चेतसि स्फुरितेत्यर्थः । वा इवार्थः । नित्यं नवेव सागादपि तु नवैव जगामेति काकुर्वा । अनवद्यं नूतनत्वादनुरागातिशयादन्यावरोधाङ्गनासम्भोगविमुखो नलो जात इति भावः । क्षमेति पाठे भैमीविशेषणं ॥ ७८ ॥

इङ्गितेति । साऽधिका सर्व्वगुणैरुत्कृष्टा चतुरा च तं अधिकमतितरां वशं आत्मन्यनुरागिणं व्यधत्त चकार । किञ्चिन्मौढाऽभूदित्यर्थः । किं कृत्वा ? इङ्गितेन सख्यादिषु भर्तृगुणवर्णनपूर्वं भाषणं तद्दोषापलापः पश्चादभिमुख्येन शयनं पूर्व्वमुत्थानमा-

भक्ततात्त्व परिचर्य्ययानिशं
साधिकाधिकवशं व्यधत्त तं ॥ ८० ॥
यत्क्रियां प्रति यदस्त्रजस्तया
स्वस्वरस्य लघुतां दधानया।
पत्युरन्वहमक्रीयत स्फुटं
तत् किलाक्रियत तस्य मानसं ॥ ८१ ॥*
स्वाङ्गमर्पयितुमेत्य वामतां
रोपितं प्रियमथानुनीय सा।
आनदीयदठसम्भुचुतां
नान्वमन्यत पनस्तमर्थिनं ॥ ८२ ॥

गमने तुष्टिः प्रवासे वैमनस्यं सदासमसुखदुःखतेत्याद्यनुराग-द्योतकेन चेष्टितेन निजं अगाधत्वादनुरागमेव नीरधिं नलं संविभाव्य सम्यग् ज्ञापयित्वा, तथा चटुभिः भवादृशोऽतिसुन्दरोऽतितेजस्वी वदान्यः सर्व्वकलाकुशलः कः ? अपि तु न कोऽपीत्यादिप्रियभाषणैर्गुणज्ञतां स्वीयगुणग्राहित्वं वैदग्ध्यं ज्ञापयित्वा, तथा अनिशं सर्व्वदा परिचर्य्यया चरणसंवाहनता-लवृन्तचालनादिरूपया सेवया निजां भक्ततां भक्तियुक्तताञ्च ज्ञापयित्वा। अनिशं, निशामभिव्याप्य सर्य्यादोक्तत्याहोरात्र-मित्यर्थ इति वा ॥ ८० ॥

स्वाङ्गमिति। सा सम्भोगार्थिने नलाय स्वाङ्गं स्तनादिकं

* एकाशीतिवमश्लोकस्य टीकादर्शपुस्तकदये नास्तीति न लिखिता। ८१।

आद्यसङ्गमसमादराण्यधाद्-
वल्लभाय ददती कथञ्चन।

निजमङ्गं समर्पयितुं दातुं किञ्चिदासक्तां प्रातिकूल्यमेत्य किञ्चि-दङ्गमदत्वा अथानन्तरं तेनैव व्यापारेण रोषितं उत्पादितरोषं औदासीन्यं प्राप्तं प्रियं नलं चुम्बनालिङ्गनचरणपतनादिना अनु-नीय प्रसाद्य, अनन्तरं इयं मां प्रसादयति चेत्तर्हि मदीप्सितं करिष्यतीति बुद्धा पुनरर्थिनं तदङ्गं याचमानं तं, तदीयां नलो-यां हठात् बलात्कारेण सम्भुभुक्षुतां सम्भोगेच्छुतां आ मर्या-दीकृत्य नान्वमन्यत तावन्नानुमेने। पूर्वं याञ्चापूर्वं सम्भोगे प्रवृत्तोऽनन्तरं तदीयवामत्वाद्रोषवशादौदासीन्यं गतः स्यन्तरं प्रति गमिष्यतीति बुद्धा तथानन्तरमनुनीतः सन् पुनरर्थयमा-नोऽपि यावद्बलात् सम्भोगं करोति तावन्नानुमतोऽनन्तरं त्वनु-मत इत्यर्थः। याञ्चानन्तरमेवानुमनने तादृशोऽनुरागो न वर्द्धते, तदीयमनुरागमात्मनि परां कोटिं प्रापयितुं हेतुरूपं सम्भोगमेवेच्छदिति भावः। अनुनयानन्तरं सम्भोगे कृतेऽपि अ-नुरागातिशयात् पुनः सुरताभिलाषिणं नानुमेन इति पुनः-शब्दार्थो वा। रोषितं। एन्तान्निष्ठा। आतदीयेति। मर्यादा-यामव्ययीभावो नपुंसकत्वाद्ध्रस्वत्वं॥ ८२॥

आद्येति। सा अङ्गकानि ह्रस्वानि सौकुमार्यातिशयादनु-कम्प्यानि निजान्यङ्गानि आद्यसङ्गमेन प्रथमसम्भोगेन समस्तस्य आदरः प्राप्तुपायामतिर्येषु, प्रथमसम्भोगे भयलज्जात्यागपूर्वं विश्रामार्थं यावान् प्रतारणाद्युपायः कृतस्तावानेव पाद्यात्येष्वपि

अङ्कानि घनमानवामता-
व्रीडलम्भितदुरापतानि सा ॥ ८३ ॥
पत्युरागिरिशमातरु क्रमात्
स्वस्य चागिरिजमालतं वपुः ।
तस्य चार्द्धमखिलं पतिव्रता
क्रीडति स्म तपसा विधाय सा ॥ ८४ ॥

सम्भोगेषु यत्प्राप्तये नलेनोपायः कृतस्तादृशीं नीतिं यावत् अधात् दधार । यतो वल्लभायातिप्रेयसे नलाय कथञ्चन भूयसा प्रयासेन तान्येव ददतो, इत्यत्रापि हेतुः । यतो घनैर्दृढैः मानवामताव्रीडैः मानः प्रीतिकलहोदासीनता वामता स्वाङ्गसमर्पणप्रातिकूल्यं व्रीडा लज्जा तैः घनेन मानेन या वामता तया लज्जया च लम्भिता प्रापिता दुरापता दुर्लभता येषां तानि । आदौ विवाहात् पूर्व्वं यः समागमस्तात्कालीनेनादरेण तुल्यादराणीति वा । मानादिना तदङ्गानां दुष्प्रापत्वादिच्छाविवृद्धेर्नलीयोऽनुरागः प्रत्यहं परां कोटिमध्यारोहदिति भावः । अङ्गकानि । ह्रस्वेनुपायामिति वा कन् । वामतायुक्ता व्रीडेति समासः ॥ ८३ ॥

पत्युरिति । सा पतिव्रता धर्म्मेण तपसा तपःफलेनेन्द्रादिवरदानेन वा पत्युर्नलस्य वपुः आगिरीशं हरमारभ्यातरु तरुपर्य्यन्तं तथा स्वस्य चागिरिजं पार्व्वतीमारभ्यालतं लतापर्य्यन्तं लतामारभ्य पार्व्वतीपर्य्यन्तं वा आरोहणक्रमेण प्रथमं

न स्थली न जलधिर्न काननं
नाद्रिभूर्न विषयो न विष्टपं।
क्रीडिता न सह यत्र तेन सा
सा विधैव न यया यया न वा ॥ ८५ ॥

प्रियस्य पश्चादात्मन इत्येवं रूपेण वा, गिरिशरूपे गिरिजारूपं तदमारभ्य गिरिजापर्य्यन्तं वा, तथा स्वस्य चात्मनः शरीरं गिरिशरूपे लतारूपमित्येवंरूपं क्रमेण विधाय तत्तद्रूपं विरचय्य तदावलम्बितशरीरान्तरस्य सम्बन्धि अखिलं यद्भावेषादिक्रीडादि चार्हं योग्यं तदपि विधाय क्रीडति स्म। यतः पतिव्रता। न हि पतिव्रतानां किञ्चिदसाध्यमस्ति। चोऽवधारणे। अखिलं भावावेषादि तस्यैवार्हं यथा तथा रेम इति वा ॥ ८४ ॥

नेति। सा तेन सह यत्र न क्रीडिता सम्भोगिं नाप्तत सा स्थली अकृत्तिमा भूरेव नास्ति। तथा न जलधिः कूपमारभ्य समुद्रपर्यन्तं स जलाशयो नास्ति। तथा काननं तत् दुर्गमं वनं नास्ति। साद्रिभूर्नास्ति। स विषयः कपटादिरूपो देशविशेष एव सुखहेतुः स्रक्चन्दनादिर्वा नास्ति। तद्विष्टपं भूर्भुवःस्वराद्येव नास्ति। यस्यां यस्मिन् वा तेन सह सा न विक्रीडेति प्रत्येकं योज्यं। वा समुच्चये। तथा सा विधैव पुरुषायितादिरूपः कामशास्त्रोक्तः प्रकार एव नास्ति यया यया येन येन प्रकारेण सा न क्रीडिता। जलान्तःसम्भोगनिषेधे पूर्व्वश्लोके नानारूपधार-

नम्रयांशुकविकर्षणि प्रिये
वक्त्रवातहतदीप्तदीपया।
भर्तृमौलिमणिदीपितास्तया
विस्मयेन ककुभो निभालिताः ॥ ८६ ॥
कान्तमूर्ध्नि दधती पिधित्सया
तन्मणेः श्रवणपूरमुत्पलं।
रन्तुमर्चनमिवाचरत् पुरः
सा स्ववल्लभतनोर्मनोभुवः ॥ ८७ ॥

णोक्तेर्मत्स्यादिष्वपिलान्निषेधो न, मनुष्याधिकारत्वाच्छास्त्रस्येति ज्ञेयम्। क्रीडिता। गत्यर्थाकर्मक (पा० ३।४।७२) इति कर्त्तरि निष्ठा ॥ ८५ ॥

नम्रयेति। प्रियेऽंशुकविकर्षिणि सति लज्जावशाद्गुप्तावयवानवलोकनार्थं नम्रया अतएव वक्त्रवातेन हतो निर्वापितो दीप्तः प्रकाशमानो दीपो यया तया भर्तृमौलौ मणयो मुकुटरत्नानि तैः दीपिताः प्रकाशिताः ककुभो दिशो विस्मयेन निर्वापितेऽपि दीपे कथमयं प्रकाश इति आश्चर्येण निभालिता विलोकिताः। रत्नप्रकाशाज्ञानाद्विस्मयो रत्नप्रेक्षातिशयाद्वा ॥ ८६ ॥

कान्तेति ॥ तस्य पूर्वोक्तस्य दिक्षु दीप्तस्य मुकुटमणेः पिधित्सया आच्छादितुमिच्छया श्रवणपूरं कर्णभूषणीकृतं नीलोत्पलं कान्तमूर्ध्नि दधती स्थापयन्ती सा रन्तुं स्ववल्लभ एव तनुः शरीरं

तं पिधाय मुदिताथ पार्श्वयो-
र्वीक्ष्य दीपमुभयत्र सा स्वयोः
चित्तमाप कुतुकाद्भुतत्रपा-
तङ्कसङ्कटनिवेशितस्मरम् ॥ ८८ ॥
एककस्य शमने परं पुन-
र्जाग्रतं शमितमप्यवेक्ष्य तं।

यस्य नलदेहव्याजं धारयतो मनोभुवः पुर आदौ सुरतारम्भे अर्चनमिवाचरत् चकार पुष्पपूजा शिरसि कर्त्तुमुचिता। रतारम्भे च स्मरः समुचिता देवतेति तत्पूजा युक्ता। प्रकाशाभावार्थं कर्णोत्पलेन मुकुटमणिं पिदधाविति भावः ॥ ८७ ॥

तमिति ॥ सा तं नलीयं मुकुटमणिं पिधाय कर्णोत्पलेनाच्छाद्य प्रकाशाभावान्मुदिता सती, अथ पश्चात् स्वयोर्निजयोरुभयत्र द्वयोर्वामदक्षिणयोः पार्श्वयोर्दीपं वीक्ष्यार्थाद्वौ दीपौ दृष्ट्वा स्वचित्तमघटमानघटनात् कुतुकं तद्दर्शनजातमाः किमेतदिति चमत्करणमद्भुतं आश्चर्यं लज्जा त्रपा आकस्मिकदीपदर्शनादातङ्को भयं गोप्यान्यपि मदीयाङ्गानि मिषेण दृष्टानीति शङ्कातिशयेवातङ्कस्तेषां सङ्कटे सम्मर्द्दे मध्ये निवेशितः स्मरो यत्र तत्। एवम्भूतं मायाविशेषणविधौ तात्पर्यं। दीपौ दृष्ट्वा कौतुकादिव्यथितार्भूदिति भावः ॥ ८८ ॥

एककस्येति ॥ द्वयोर्दीपयोर्मध्ये एककस्य दीपस्य मुखचेलाञ्चलादिना शमने निर्वाणे क्रियमाणे सति पूर्वशमितमपि

जातवह्निवरसंस्मृतिः शिरः
सा विधूय निमिमील केवलं ॥ ८९ ॥
पश्य भीरु न मयापि दृश्यसे
यन्निमीलितवती दृशावसि ।
इत्यनेन परिहस्य सा तमः
संविधाय समभोजि लज्जिता ॥ ९० ॥

द्वितीयं दीपं नलेच्छामात्रेण पुनरपि जाग्रतं प्रदीप्तमवेत्य जाता वह्निवरसंस्मृतिर्यस्याः सा स्मारणाभिनयवशाद्वा शिरो विधूय केवलं निमिमील निमीलितवती। लज्जाभिनयः कौतुकवशात् तदीयगोप्यावयवविलोकनार्थं तस्या निरुपायत्वार्थं पुनः पुनः शमितानपि दीपान् इच्छामात्रेणाजिज्वलदिति भावः । एकस्य शमने कृतेऽपरं दीपं जाग्रतं दृष्ट्वा शमितमपि पुनर्जाग्रतं दृष्ट्वेति वा व्याख्येयं। एककः पूर्ववत् ॥ ८९ ॥

पश्येति॥ अनेन इति परिहस्य सोपहासमुक्त्वा तदीयलज्जापाकरणार्थं दीपाभावेच्छामात्रेण तमः संविधायान्धकारं निर्माय सा समभोजि सम्भुक्ता ततो लज्जिता। इति किं। हे भीरु लज्जाभयकातरे यद्यस्मात्त्वं दृशौ निमीलितवत्यसि तस्मात्त्वं मयापि न दृश्यसे पश्य। नेत्रनिमीलनात्त्वया यथा स्वीयमङ्गं न निरीक्ष्यते तथा मयापि त्वदङ्गमित्यर्थः। अथ च त्वया नेत्रे निमीलिते मया तु त्वं न दृश्यसे चित्रमेतत् । यस्मान्मया न द्रष्टव्यमिति हेतोस्त्वया नेत्रे निमीलिते, तावतैव

चुम्ब्यसेऽयमयमङ्क्ष्यसे नखैः
श्लिष्यसेऽयमयमर्प्यसे हृदि।
नो पुनर्न करवाणि ते गिरं
हुं त्यज त्यज तवास्मि किङ्करा॥ ९१॥

मया न दृश्यसे ऽपि तु दृश्यस एव। अन्यो हि गोप्यमङ्गं वस्त्रादिनाच्छादयति त्वया तु नेत्रे एव निमीलिते। तथा च मया त्वदीयं गोप्यमपि अङ्गं कामं दृष्टमेवेति किं नेत्रनिमीलनेन पश्येति। अमुना नलेन लज्जिता सा तमः सम्यग्विधायानन्तरञ्चैवं परिहासपूर्व्वमुक्ता। भीरु। उडन्तत्वान्नदीत्वाद्ध्रस्वः, तत्सामर्थ्यान्न गुणः॥ ९०॥

चुम्ब्यस इति। इतीति युग्मं। हे प्रिये, मयायं त्वं चुम्ब्यसे ऽयं त्वं नखैरङ्क्ष्यसे चिह्न्यसेऽयं त्वं श्लिष्यसे आलिङ्ग्यसेऽयञ्च हृदि अर्प्यसे हृदयोपरि धार्य्यसे ते तव पुनरहं गिरं नो करवाणीति न अपि तु करोम्येव यत इत्यर्थः। हुमिति सुरतमम्मर्दासहत्वेन पूर्य्यतामित्यर्थः। त्यज त्यज इति पीडानटने, मुञ्च मुञ्च मामित्यर्थः। अहं तव किङ्कराऽस्मीति दैन्यनटने॥

इत्थंप्रकारेणाङ्गीकरते मिथ्यासुरते कातरा भीरुः सुरते विषये बलात्कारभीता सती आत्मानं यथाकथञ्चिन्मोचयितुमेवेत्थं वदति न तु हेलयेति। तथा यद्यपीयमप्रौढेति प्रियं विप्रलभ्य प्रतार्य्यैतादृशीं वृथाबुद्धिं तस्योत्पाद्य तथा प्रियमपि प्रतार्य्य मामियमद्यापि न मुञ्चति, बलात्कारभयात् चुम्बनादि

इत्यलीकरतकातरा प्रियं
विप्रलभ्य सुरते ह्रियं च सा।
चुम्बनादि वितनार मायिनी
किं विदग्धमनसामगोचरः ॥ ८२ ॥ युग्मम्॥
खेपितोद्गमितमात्रलुप्तया
दीपिकाचपलया तमोघने।

करोति न तु स्वेच्छयेति लज्जात्यागमप्यप्रकटीकृत्य चुम्बनादि पूर्वोक्तं सकलमपि सुरतसम्भारं प्रौढतयैव वितनार प्रियाय ददौ। यतो मायिनी मायावती। उक्तप्रकारेण कपटेनाच्छादितनिजकामोन्मादप्रौढिरिति यावत्। यस्माद्विदग्धं व्यवहारचतुरं मनो येषां मानवानां किं वस्तु अगोचरः विषयो न भवति अपि तु सर्वमपि साध्यमेव। चतुरा हि असाध्यमपि साधयन्ति। अलीकतरकातरेति पाठे अलिकतरं कातरेति समासः। त्यज२। वीप्सया द्विरुक्तिः। किंकरेति। दिवाविभा (पा० ३।२।२१) इति टप्राप्तावपि, किं यत्तदहुषु कृञोऽच्विधानम् (पा० ३।२।२१।वा० १।) इत्यच्, ततष्टाप् ॥ ८१ ॥ ८२ ॥

खेति। स तमसा घने तस्मिन् सौधेऽयच तमस्तुल्ये घने मेघे तमोरूपे मेघे खेपितेन खेच्छामात्रेणोद्गमितमात्रा प्रकाशिता चाभौ तदानीमेव लुप्ता शमिता च तया दीपिकयैव चपलया विद्युता दृष्टनष्टया निर्विशङ्कं रतं तस्माज्जन्म येषां तानि च तानि तस्या मुग्धाकूतानि वदनेङ्गितानि तेषां दर्शनानि तस्य-

निर्विशङ्करतजन्मतन्मुखा-
कूतदर्शनसुखान्यभुङ्क्त सः ॥ ८३ ॥
यद्भ्रुवौ कुटिलिते तया रते
मन्मथेन तदनामि कार्मुकं।
यत्तु ऊं ऊमिति सा तदा व्यधा-
त्तत् स्मरस्य शरमुक्तिऊङ्कृतं ॥ ८४ ॥
इच्छितोपदिशतीव नर्त्तितुं
तत्क्षणोदितमुदं मनोभुवं।

न्यानि सुखानि अभुङ्क्तान्वभूत्। अन्धकारवशान्निर्मोखेच्छाविरचितमुखाकूतदर्शनसुखानुभवार्थं वह्निवरदानवशात्तदानीमेव दीपिकां प्रकाशितवान्। तदानीमेव च लज्जावती स्यादिति भिया पुनस्तां शमितवानिति भावः। विद्युदप्येवम्भूता भवति। लुप्तेत्यन्तर्भाविणर्थो ज्ञेयः ॥ ८३ ॥

यदिति। तया रते भ्रुवौ कुटिलिते वक्रिते इति यत् तन्मन्मथेन कार्मुकमेवानामि। यत्तु पुनः सा तदा सुरतसमये सुरतमर्द्दनिःसहतावारणव्याजेन ऊं ऊमिति रतिकूजितशब्दं व्यधात् तत् स्मरस्य शरमुक्तिऊङ्कृतं वाणमोचनकालीनं ऊङ्कारमेवाकृत ऊङ्कार एवाभूत्। तस्या ऊङ्करणं कामस्य चापनमनमित्यर्थः। कामस्य वामत्वात् भ्रूवक्रादिना कामः पुनरुज्जृम्भित एवाभूदिति भावः ॥ ८४ ॥

इच्छितेति। चुम्बनरभसात्कान्तदन्तैः परिपीडिताधरां दष्टा-

कान्तदन्तपरिपीडिताधरा
पाणिधूननमियं वितन्वती ॥ ९५ ॥
सा शशाक परिरम्भदायिनी
गाहितुं बृहदुरः प्रियस्य न ।
चक्षमे स च न भङ्गुरभ्रुव-
स्तुङ्गपीनकुचदूरतां गतं ॥ ९६ ॥
बाहुवल्लिपरिरम्भमण्डली
या परस्परमपीडयत्तयोः ।

धरा अतएव पाणिधूननं वितन्वती इयं तत्क्षणे सुरतसमये उदितमुदं सञ्जातहर्षं मनोभुवं नर्त्तितुं उपदिशतीव तं शिक्षयन्तीव प्रियेणेक्षिता, यापि नृत्यं शिक्षयति सापि हस्ताभिनयवशात् करकम्पनं करोति । उपदिशती । आच्छीनद्योः (पा० ७।१।८०) इति पाक्षिकत्वान्नुमभावः ॥ ९५ ॥

सेति । परिरम्भदायिनी सा प्रियस्य बृहदुरो गाहितुं सामस्त्येन स्प्रष्टुं न शशाक, यतो बृहत् अतिविशालं, सा च कृशाङ्गीत्यर्थः । स च नलोऽपि भङ्गुरे भ्रुवौ यस्यास्तस्या वचः सर्व्वमपि स्प्रष्टुं न चक्षमे, यतस्तुङ्गाभ्यां पीनाभ्यां कुचाभ्यां दूरतां व्यवहिततां गतं प्राप्तं । कुचमात्रमेवालिङ्गितं नतु सर्व्वं वच इत्यर्थः । उभावपि सम्पूर्णालिङ्गनाप्राप्तेर्नितरां सस्पृहत्वादुज्जृम्भितकामौ जाताविति भावः ॥ ९६ ॥

बाह्विति । तयोर्बाहव एव दैर्घ्यकार्श्याभ्यां वल्लयः लतातुल्या

आस्त हेमनलिनीमृणालजः
पाश एव हृदयेशयस्य सः ॥ ९७ ॥
वल्लभेन परिरम्भपीडितौ
प्रेयसीहृदि कुचाववापतुः ।
केलतीमदनयोरुपाश्रये
तत्र वृत्तमिलितोपधानताम् ॥ ९८ ॥

तस्यां परिरम्भे आलिङ्गनविषये या मण्डली वृत्ताकाराङ्कपाली परस्परं अपीडयत् गात्रमालिङ्गत् स हृदयेशयस्य कामस्य हेमनलिनीमृणालाज्जातस्तेन निर्मितः पाश एवास्त बभूव । अतिगौरत्वान्मार्दवत्वाच्च बाहूनां सौवर्णमृणालतुल्यत्वं । पाश-बद्धो यथा वश्यो भवति तथाङ्कपालीपाशेन दृढं बद्धौ तौ कामवशौ जाताविति भावः ॥ ९७ ॥

वल्लभेनेति । प्रेयसीहृदि वल्लभेन परिरम्भपीडितौ गाढा-लिङ्गनेन वामनीकृतौ कुचौ केलतीमदनयोर्रतिकामयोरुपा-श्रये विश्रान्तिस्थानभूते तत्र वक्षसि वृत्तमिलितोपधानतां वर्त्तुलमङ्गतोच्छीर्षकं भावं अवापतुः । प्रभोर्हि विश्रान्तिस्थाने शय्यादौ गण्डोपधानं वृत्तमुच्छीर्षकं भवति । रतिकामौ च प्रभू तत्र वर्त्तेते, अतस्तत्रैव वर्त्तमानौ वृत्तौ वामनीभूतौ कुचौ तयोरुच्छीर्षके इव बभूवतुरित्युत्प्रेक्षा । केलती रतिपर्य्यायः ॥ ९८ ॥

भीमजोरुयुगलं नलार्पितैः
पाणिजस्य मृदुभिः पदैर्वभौ।
उत्प्रशस्ति रतिकामयोर्जय-
स्तम्भयुग्ममिव शातकुम्भजं॥ ९९॥
वङ्कमानि विधिनापि तावकं
नाभिमूरुयुगमन्तराङ्गकं।
स व्यधादधिकवर्णकैरिदं
काञ्चनैर्यदिति तां पुराह सः॥ १००॥

भीमजेति। भीमजोरुयुगलं नलार्पितैर्मृदुभिः पाणिजस्य नखस्य पदैः स्तोकवक्राचिर्मैरिभिर्नखचतैः कृत्वा रतिकामयोः शातकुम्भजं सौवर्णं तयोर्यशःप्रशस्तिर्लिपिरूपा यत्र सैव नख-पदरूपैव यशःप्रशस्तिर्यदेवम्भूतं वा निजजयप्रकाशकं स्तम्भयुग्म-मिव वभौ रतिकामयोरियमेव विजयप्रशस्तिर्नखचतादिकरणं नाम। सुवर्णवर्णत्वादूर्वोः सुवर्णस्तम्भत्वं। अन्यस्यापि प्रभोर्यशः-प्रशस्तिर्जयस्तम्भे लिख्यते॥ ९९॥

वङ्कमानीति। स तां पुरा इति आहावोचत्। इति किं। हे भैमि नाभिमूरुद्वयमन्तरा नाभ्यूरुद्वयमध्ये अङ्गकं कोमलता-तिशयान्मर्दनासहतयाऽन्यं द्रुतं वा मदनसदनाख्यं तावकमङ्गं न केवलं मया किन्तु वीतरागेण विधिना ब्रह्मणापि वङ्क नितराममानि आदृतं। यद्यस्मात् कारणात् स वङ्कधिको वर्णो येषां तैरतिगौरैरत्युत्तमैः काञ्चनैरिदं कामगृहं व्यधा-

पीडनाय मृदुनी विगाह्य तौ
कान्तपाणिनलिने स्पृहावती।
तत्कुचौ कलशपीननिष्ठुरौ
चारहासविहते वितेनतुः॥ १०१॥

इत्यत। निरन्तराट्टतलादुष्णशीतवातादिसम्बन्धाभावाद्लोमलाद्वाङ्गान्तरापेक्षयाधिकवर्णं वराङ्गं दृष्ट्वा प्रदीप्तकामः सन्नेवमुवाचेत्यर्थः। अश्लीलमप्युष्णु तन्मैथुनादन्यत्र निषेधात् वराङ्गदर्शनं युक्तमिति ज्ञेयं। नाभिमित्यादौ, अन्तरान्तरेण (पा० २।३।४) इति द्वितीया। अङ्गकं। अल्पे (पा०५।३।८५) ह्रस्वे (पा०५।३।८६) इति वा कन्। पुराहेति, भूते, पुरिलुङ् चास्मे (पा०३।२।१२२) इति लट्॥ १००॥

पीडनायेति। कलशवत् पीवरौ निष्ठुरौ कठिनौ च तौ अतिप्रसिद्धगुणौ तस्याः कुचौ कर्तृभूतौ कान्तस्य पाणिनलिने करकमले कर्मभूते हारस्य हासः प्रकाशस्तेन विहते आच्छादिते वितेनतुश्चक्रतुः। स्पृशन्तावपि नलकरौ हारदीप्त्या पिहिताविव्यर्थः। अथवा हार एव हासः तेन पराभूते हतोपहासे चक्रतुः। यतो विगाह्यमानावेवाभितः स्पृष्ट्वा पीडनाय मर्दनाय स्पृहावती साभिलाषे इतेच्छे यतः मृदुनी मर्दयितुमसमर्थे। स्वयं मृदुर्हि महतः कठिनस्य च पीडनाय न प्रभवतीति मृदुभ्यां युवाभ्यां विशालौ कठिनौ चावां मर्दयितुमशक्याविति यं वाञ्छा तथा धार्य्यते, स्वपरतारतम्यं न ज्ञायते भवद्भ्यामिति,

या कुरङ्गमदकुङ्कुमाञ्चितौ
नीललोहितरुचौ वधूकुचौ।
स प्रियोरसि तयोः स्वयम्भुवो-
राचचार नखकिंशुकार्चनं॥ १०२॥

तत्कुचाभ्यां नलकरौ हारहास्येन विडम्बिताविवेत्यर्थः। सर्व्वतः स्पृष्टावेव न तु पीडिताविति भावः। अकर्मकठिनौ हस्तौ इति लक्षणात् काठिन्यमेव राजकरस्य गुणस्तथापि नलिनत्वनिरूपणात् कठिनत्वेऽपि कुचापेक्षया मार्द्दवान्मृदुनीत्युक्तं। पीडनाय स्पृष्टवती ते मृदुनी विशेषेण ज्ञात्वा हासविहते चक्रतुरिति वा। अन्योऽपि निष्ठुरो मृदुमुपहसति॥ १०१॥

याविति। यौ वधूकुचौ कुरङ्गमदेन कस्तूर्य्या कुङ्कुमेन चाञ्चितौ पूजितौ कृतविलेपनौ अत एव क्रमेण नीला लोहिता च रुक् कान्तिर्ययोः, अथ च नीललोहितौ हरमूर्त्ती, एवम्भूतौ, स नलः तयोर्यौवनारम्भे प्रियोरसि भैमीवक्षसि स्वयमेव भवतोः प्रादुर्भवतोः रक्तवक्रतीक्ष्णाग्रत्वान्नखैरेव किंशुकैः पलाशपुष्पैरर्चनं पूजां आचचार। कृताङ्गरागयोः कुचयोर्नखपदानि रचितवानित्यर्थः। अन्यनखोल्लेखस्य व्यथाराहित्येन शोभामात्रहेतुत्वादर्चनमित्येवेत्युत्प्रेक्षा। कस्तूर्य्या अभ्यर्हितत्वात् पूर्व्वनिपातः॥ १०२॥

अम्बुधेः कियदनुत्थितं विधुं
स्वानुबिम्बमिलितं व्यडम्बयत्।
चुम्बदम्बुजमुखीमुखं तदा
नैषधस्य वदनेन्दुमण्डलं॥ १०३॥

पूगभागबहुताकषायितै-
र्वासितैरुदयभास्करेण तौ।
चक्रतुर्निधुवनेऽधरामृतै-
स्तत्र साधु मधुपानविभ्रमं॥ १०४॥

अम्बुधेरिति। सुरतावसरेऽम्बुजमुख्या भैम्या मुखं चुम्बत् मिलन्नैषधस्य वदनेन्दुमण्डलं कर्तृ प्रतिदिनमुदयसमये अम्बुधेः समुद्रात् कियत् स्तोकमनुत्थितं तथा समुद्रजले जातेन स्वानुबिम्बेनात्मीयप्रतिबिम्बेन मिलितं निरन्तरं सम्बद्धं विधुं चन्द्रं व्यडम्बयत् अनुचकार। भैमीमुखे कर्तृ नलमुखं कर्मीभूतं चुम्बदिति वा। अनेन विपरीतरतं सूचितं बिम्बप्रतिबिम्बभावनिरूपणेनात्यन्तं तन्मुखयोः सादृश्यं सूचितं। कामसुहृच्चन्द्रोदयनिरूपणाच्च कामोज्जृम्भणं व्यज्यते॥ १०३॥

पूगेति। पूगफलफालिकानां भागोऽग्रस्तस्य बहुतया कषायितैस्तुवररसप्रापितैः, कषायः सुरभावित्यभिधानात् सुरभितैर्वा। तथा पक्केनोदयभास्कराख्येन ताम्बूलमध्ये गृहीतेन कर्पूरेण वासितैः सुरभितैरन्योन्याधरामृतैरधररसैरेवामृतैः कृत्वा तौ तत्र निधुवने सुरते मधुपानस्य विभ्रमं मद्यपानरूपं

आह नाथवदनस्य चुम्बतः
सास शीतकरतामनन्तरम्।
सीत्कृतानि सुदती वितन्वती
सत्त्वदत्तपृथुवेपथुस्तदा ॥ १०५ ॥

विलासं साधु सम्यग्यथा तथा, अथ च मद्यपानजन्यविलासं चक्रतुः। मद्यपानस्थानेऽन्योन्याधरपानमेव चक्रतुस्तेनैव च नितरां सोन्मादौ जाताविति भावः। अन्यो ऽपि कषायरसं कर्पूरवासितं शीतलं मधु पिबति। साधु अनिषिद्धं मध्विति वा। सुरते मधुपानविभ्रममधरामृतैः साधु यथा तथा चक्रतुः। उपदंशस्थानेऽधरामृतानि जातानीत्यर्थः। भोग इति पाठे अनुभवः। राग इति पाठे वक्त्रताम्बूलवर्णक्रमविवर्द्धमानरक्तिमवाङ्मल्येनेत्यर्थः। कषायितैः। तत्करोति (पा० ३।१।२६।१ वा०) इति ण्यन्तान्निष्ठा ॥ १०४ ॥

आहेति। तदा सुरतचुम्बनावसरे सीत्कृतानि वितन्वती कुर्व्वती सा सुदती, तथा कामावस्थाविकारविशेषेण सत्त्वेन दत्तः पृथुवेपथुः कम्पो यस्यास्तादृशी सती, चुम्बतो नाथवदनस्यानन्तरं वर्णैर्विना तत्कार्य्यकारित्वेन शीतकरतां चन्द्रतामाह स्म। चन्द्रस्पर्शाद्यथा सुखं भवति तथा नलमुखस्पर्शात्तस्या अभूदिति भावः। शीतेऽपि सीत्कारः कम्पश्च भवति मुखादक्षरञ्च न निर्गच्छति। शीतं कर्त्तुं शीलमस्य शीतकरः। कृञो हेतुताच्छील्ये (पा० ३।२।२०) इति टः ॥ १०५ ॥

चुम्बनाय कलितप्रियाकुचं
वीरसेनसुतवक्त्रमण्डलम्।
प्राप भर्त्तुममृतैः सुधांशुना
सक्तहाटकघटेन मित्रताम्॥ १०६॥
वीक्ष्य वीक्ष्य पुनरैक्षि सामुना
पर्य्यरम्भि परिरभ्य चासकृत्।

चुम्बनायेति। चुम्बनाय कलितः स्पृष्टः प्रियाकुचो येन तादृशं वीरसेनसुतस्य वक्त्रमण्डलं, सुधांशुना चन्द्रेण मित्रतां साम्यं प्राप। किम्भूतेन चन्द्रेण। स्वैरेवामृतैः आत्मानं भर्त्तुं पूरयितुं सक्तः सङ्गतः हाटकघटः सुवर्णकलशो येन। मुखं चन्द्रसमं, अमृतभरणार्थं चन्द्रसम्बद्धसुवर्णघटसमो भैमीकुचः, मुखेन्दुना स्वीयममृतं कुचकलशे निक्षिप्तं न तु तचत्यं गृहीतं इति अनौचिती नाशङ्कनीया मुखचुम्बनादमृतांशुयोगादिव भैमीकुचः शान्तापो जातः, सुखयाभूदिति भावः। मुखनेत्रस्तनबाहुमूलकपोलौष्ठदयवराङ्गान्यष्टौ चुम्बनस्थानानि रागतः सर्व्वाण्यपि चेति वात्स्यायनः। नयनगलकपोलदन्तवासोमुखान्तस्तनयुगललाटं वा चुम्बनस्थानं। स्तने चूचुकं परिहृत्येति विशेषः। मित्रशब्दस्य तुल्यार्थत्वात् सुधांशुनेति तुल्यार्थैः (पा० २।३।७२) इति तृतीया॥ १०६॥

वीक्ष्येति। अमुना सा वीक्ष्य वीक्ष्य पुनरैक्षि, तथाऽसकृत् वारंवारं परिरभ्य च पुनः पर्यरम्भि पुनरालिलिङ्गे, तथा आद-

चुम्बिता पुनरचुम्बि चादरा-
त्तृप्तिरापि न कथञ्च नापि च ॥ १०७ ॥
छिन्नमप्यतनु हारमण्डलं
मुग्धया सुरतलास्यकेलिभिः।
न व्यतर्कि सुदृशा चिरादपि
स्वेदबिन्दुकितवक्षसा हृदि ॥१०८॥
यत्तदीयहृदि हारमौक्तिकै-
रासि तत्र गुण एव कारणं।

वारंवारं चुम्बितापि पुनरचुम्बि च। तथापि कथञ्चनापि केनापि प्रकारेणानेन तृप्तिकारणसद्भावेऽपि तृप्तिर्नापि न प्राप्ता ॥ १०७ ॥

छिन्नमिति। सुदृशा निरीक्षणे नितरां चतुरयापि मुग्धया सदर्पया च बालया भैम्या सुरतलास्यकेलिभिः सुरतसम्बन्धिभिर्नृत्यविलासैः करधूननाद्यङ्गविक्षेपविलासविशेषैः कृत्वा क्वचिच्छिन्नं त्रुटितगुणमपि अतनु आनाभिविलम्बित्वादिशालं हारमण्डलं मुक्ताहारदाम चिरादपि भूयसापि कालेन न व्यतर्कि। यतः स्वेदबिन्दुकितं सञ्जातस्वेदबिन्दुवक्षो यस्यास्तया। सुरतया सञ्जातस्वेदबिन्दुमण्डलस्य हारमण्डलस्य हारसादृश्यान्मौग्ध्याच्च त्रुटितोऽपि हारो नावबोधीत्यर्थः। स्वार्थकप्रत्ययान्तात् स्वेदबिन्दुकशब्दात्तारकादित्वादितच् ॥ १०८ ॥

यदिति। हारमौक्तिकैस्तदीये हृदि वक्षसि च चित्ते

अन्यथा कथममुत्र वर्त्तितुं
तैरशाकि न तदा गुणच्युतैः॥१०९॥
एकवृत्तिरपि मौक्तिकावलि-
श्छिन्नहारविततौ तदा तयोः।
काययान्यहृदयेऽपि भूषणं
श्रान्तिवारिभरभाविते भवत्॥११०॥

यदामि स्थितं लग्नं तत्र गुणो दोरकस्तारत्वादिर्वेकारणं हेतुः। अन्यथा न चेदेवं तर्हि तदा सुरतसमये गुणच्युतैस्तत्र भ्रष्टैर्मौक्तिकैरमुत्र तदीये हृदि वर्त्तितुं स्थातुं कथं कस्मादशाकि समर्थैर्न जातम्। अथ च तारत्वादिगुणहीनैर्मौक्तिकैस्तदीये हृदये न स्थीयते किन्तूत्तमैरेव। तस्मादुभयरूपेऽपि भैमीहृदये स्थातुं मौक्तिकानामन्वयव्यतिरेकाभ्यां द्विविधोऽपि गुणहेतुरित्यनुमानं। सुरतसमर्द्दान्मुक्ताहारस्त्रुटित इति भङ्ग्यन्तरेणोक्तं। अन्यस्यापि विदग्धस्य हृदयगामित्वे गुण एव हेतुः, गुणहीनेन तु चित्ते स्थातुं न शक्यत इति भङ्ग्या सूचितं। गुणच्युतैः पञ्चमी (पा० २।१।३७) इति योगविभागात् समासः॥१०९॥

एकेति। तदा सम्भोगसमये तयोर्द्वयोर्मध्ये एकस्मिन्नल एव वृत्तिर्यस्या एवम्भूता मौक्तिकावलिरन्यस्या भैम्या हृदये कायाभूषणमभूत्। किम्भूतेऽन्यहृदये। छिन्नहारस्य विततिर्विस्तारो यस्याः। यत. श्रान्तिवारीणि स्वेदबिन्दवस्तेषां भरः पूरस्तेन भाविते व्याप्ते। द्वयोः समीपे सम्मुखस्थितयोर्मध्ये भैम्या हारे

वामपादतललुप्तमन्मथ-
श्रीमदेन मुखवीचिणाऽनिशं।
भुज्यमाननवयौवनामुना-
पारसीमनि चचार सा मुदां॥१११॥
आन्तरानपि तदङ्गसङ्गमै-
स्तर्पितानवयवानमन्यत।
नेत्रयोरमृतसारपारणां
तद्विलोकनमचिन्तयन्नलः॥११२॥

त्रुटितेऽपि स्वेदजलपूरिते हृदये प्रतिविम्बितौ नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यद्धृदये प्रतिविम्बितौ नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यद्धृदय इति सर्व्वनामत्वात् पुंवद्भावः॥११०॥

वामेति। वामपादतलेन लुप्तः मन्मथश्रीमदः कामसौन्दर्य्यगर्व्वो येनातिसुन्दरेणापि अनिशं भैमीमुखवीक्षणात् केवलभैम्यधीनेन अमुना नलेन भुज्यमानं नवं यौवनं यस्याः सा भैमी मुदां सन्तोषाणां पारसीमनि परतीरमर्य्यादायां परमोत्कर्षे चचारावर्त्तत। भावावसानसमयं प्रापेत्यर्थः। वामपादतलमुखवीचीतिपदद्वयं लौकिकोक्तिः। एवम्भूतेन च भुज्यमानत्वान्मुदां परमोत्कर्षं प्रापेति युक्तं। मुखवीक्षणं दिने रात्रावपि वरदानप्रकाशितदीपवशात् ज्ञेयं॥१११॥

आन्तरानिति। नलः स्वीयानान्तराञ्छरीरमध्यवर्त्तिनो

अन्यथा कथममुत्र वर्त्तितुं
तैरशाकि न तदा गुणच्युतैः ॥१०९॥
एकवृत्तिरपि मौक्तिकावलि-
श्छिन्नहारविततौ तदा तयोः।
छाययान्यहृदयेऽपि भूषणं
श्रान्तिवारिभरभाविते भवत् ॥११०॥

यदामि स्थितं लग्नं तत्र गुणो दोरकस्तारल्यादिरेवकारणं हेतुः। अन्यथा न चेदेवं तर्हि तदा सुरतसमये गुणच्युतैस्तत्र भ्रष्टैस्तै-र्मौक्तिकैरमुत्र तदीये हृदि वर्त्तितुं स्थातुं कथं कस्मान्नाशाकि समर्थैर्न जातं। अथ च तारल्यादिगुणहीनैर्मौक्तिकैस्तदीये हृदये न स्थीयते किन्तूत्तमैरेव। तस्मादुभयरूपेऽपि भैमीहृदये स्थातुं मौक्तिकानामन्वयव्यतिरेकाभ्यां द्विविधोऽपि गुणहेतुरित्यनु-मानं। सुरतसमर्द्दान्मुक्ताहारस्त्रुटित इति भङ्ग्यन्तरेणोक्तं। अन्यस्यापि विदग्धस्य हृदयगामित्वे गुण एव हेतुः, गुणहीनेन तु चित्ते स्थातुं न शक्यत इति भङ्ग्या सूचितं। गुणच्युतैः पञ्चमी (पा० २।१।३७) इति योगविभागात् समासः ॥१०९॥

एकेति। तदा सम्भोगसमये तयोर्द्वयोर्मध्ये एकस्मिन्नल एव वृत्तिर्यस्या एवम्भूता मौक्तिकावलिरन्यस्या भैम्या हृदये छाय-याभूषणमभूत्। किम्भूतेऽन्यहृदये। छिन्नहारस्य विततिर्विस्तारो यस्याः। यतः श्रान्तिवारीणि स्वेदविन्दवस्तेषां भरः पूरस्तेन भाविते व्याप्ते। द्वयोः समीपे सम्मुखस्थितयोर्मध्ये भैम्या हारे

वामपादतललुप्तमन्मथ-
श्रीमदेन मुखवीक्षिणाऽनिशं।
भुज्यमाननवयौवनामुना
पारसीमनि चचार सा मुदां॥ १११॥
आन्तरानपि तदङ्गसङ्गमै-
स्तर्पितानवयवानमन्यत।
नेत्रयोरमृतसारपारणां
तद्विलोकनमचिन्तयन्नलः॥ ११२॥

त्रुटितेऽपि स्वेदजलपूरिते हृदये प्रतिविम्बितो नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यहृदये प्रतिविम्बितो नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यहृदय इति सर्व्वनामत्वात् पुंवद्भावः॥ ११०॥

वामेति। वामपादतलेन लुप्तः मन्मथश्रीमदः कामसौन्दर्य्यगर्व्वो येनातिसुन्दरेणापि अनिशं भैमीमुखवीक्षात् केवलभैम्यधीनेन अमुना नलेन भुज्यमानं नवं यौवनं यस्याः सा भैमी मुदां सन्तोषाणां पारसीमनि परतीरमर्य्यादायां परमोत्कर्षे चचारावर्त्तत। भावावसानसमयं प्रापेत्यर्थः। वामपादतलमुखवीक्षीतिपदद्वयं लौकिकोक्तिः। एवम्भूतेन च भुज्यमानत्वान्मुदां परमोत्कर्षं प्रापेति युक्तं। मुखवीक्षणं दिने रात्रावपि वरदानप्रकाशितदीपवशात् ज्ञेयं॥ १११॥

आन्तरानिति। नलः स्वीयानान्तराञ्छरीरमध्यवर्त्तिनो

भूषणैरतुपदाश्रितैः प्रियां
प्रागथ व्यपददेष भावयन्।
तैरभावि कियदङ्गदर्शने
यत्पिधानमयविघ्नकारिभिः ॥ ११३॥

ऽस्पृश्यमानानपि अवयवान् तदङ्गसङ्गमैः सुकुमारतरभैम्यवयवस्पर्शैरतिविधकतया तर्पितान् सुखितानमन्यत। तथा तद्विलोकनस्य लोचनेत्रयोः अमृतस्य सारेण श्रेष्ठभागेन पारणां तद्रूपं दृशीकरणं अचिन्तयद्बुबुधे। पुनः पुनः भैमीगाढालिङ्गनदर्शनाद्यैरन्तर्बहिश्च प्रीणितोऽभूदित्यर्थः। अन्तरशब्दात् अन्तःशब्दाद्वा भावार्थेऽण्। तर्पितान्। एयन्तात् कर्मणि क्तः ॥ ११२ ॥

भूषणैरिति। एष नलः प्रियामाश्रितैः स्वशरीरं मण्डयद्भिः ताटङ्कादिभिर्भूषणैःप्रागतुपदथ तैरस्याः कियतोऽलङ्कृतस्यान्यस्याङ्गस्य दर्शने पिधानमयानां आच्छादनरूपाणां विघ्नानां दर्शनान्तरायाणां कारिभिस्तद्धेतुभूतैस्तैरभावि जातं। अनलङ्कृतं वै तर्हि सर्व्वं दर्शनगोचरो भविष्यत् इति भावयन्नलेवं तस्माद्व्यपददित्यर्थः। भैमीसौन्दर्य्यं तस्यां नलानुरागातिशयश्च सूचितः। रतिसमये भूषणमोचनस्यैव युक्तत्वाद्भूषणसद्भाववर्णनं यद्यप्यनुचितं तथापि यावद्भूषणानि मोचयति तावदपि विलम्बासहिष्णुतया हटसुरतसूचनाद्भूषणवर्णनौचितौ न दोषायेति सदापयुक्तापरिहार्य्यभूषणाभिप्रायेण वेति ज्ञेयं। भूषणानि

योजनानि परिरम्भणेऽन्तरं
रोमहर्षजमपि स्म बोधतः।
तौ निमेषमपि वीक्षणे मिथो
वत्सरव्यवधिमध्यगच्छताम्॥ ११४॥
वीक्ष्य भावमधिगन्तुमुत्सुकां
पूर्व्वमङ्कमणिकुट्टिमे म्रदुं।

स विदर्भसुभ्रुव इति वा पाठः सुगमः। अतुषत्। पुषादित्वा-दङ्॥ ११३॥

योजनानीति। तौ रोमहर्षात् सात्त्विकोत्थरोमाञ्चाज्जा-तमत्यल्पमप्यन्तरं परिरम्भणे आलिङ्गने विषये बहूनि योज-नानि बोधतः स्म। अजानतां। तथा मिथो वीक्षणे मारब्धा-न्योन्यविलोकनेऽत्यल्पं निमेषमक्षिपक्ष्मसङ्कोचसमयमपि वत्सरेण वर्षेण व्यवधिं व्यवधानं बहुवर्षदर्शनविच्छेदकालं अध्यगच्छताम् अज्ञासिष्टां। अल्पीयसापि देशकालव्यवधानेन प्रेमभरादन्यो-न्यविच्छेदस्ताभ्याममानीत्यर्थः। बोधतः। बुध अवगमने भौवा-दिकः स्मयोगे लट्॥ ११४॥

वीक्ष्येति। एषः नलो म्रदुं बालत्वात् सुरतभरासहां लघु-द्रवां पद्मिनीमत एव स्वस्मात् पूर्व्वमेव विन्दुपतनरयरूपं भाव-मधिगन्तुं प्राप्तुं नेत्रनिमीलनगाढालिङ्गनादिचिह्नेनोत्सुकां मत्वरां वीक्ष्य ज्ञात्वा तद्विन्दुस्तम्भनार्थं कोऽयमपूर्व्वः पुरुष इति प्रश्नेन पूर्व्वमप्रज्ञातभयामपि नलरूपधारिणा अन्येनाहं

कोऽयमेत्युदितसम्भ्रमीक्षितां
स्वानुबिम्बमदर्शयदेष तां ॥११५॥
तत्क्षणावहितभावभावित-
द्रागुदश्रात्मसितदीधितिस्थितिः।
स्वां प्रियानभिमतक्षणोदयां
भावलाभलघुतां नुनोद सः॥११६॥

भुक्तेति बुद्धा सुरतसमयसमागतजनान्तरदर्शनादा उदितसम्भ्रमीक्षितां समुत्पादितभयां विमनस्कतया प्रतिबद्धभावोदयां अनन्तरं कः कुत्र तिष्ठतीति कृतप्रश्नान्तां भैमीं अच्छमणिकुट्टिमे निर्मले मणिबद्धभित्तिभागे स्वानुबिम्बप्रतिबिम्बमदर्शत् दर्शयामास। नायमपूर्व्वः कश्चित् किन्तु मदीयमेवेदं प्रतिबिम्बं तत्र ममान्य इति भ्रान्तिर्जातेति स्वप्रतिबिम्बं तामदर्शयदित्यर्थः। अन्यतरस्य पूर्व्वं बिन्दुपतने विषमरतत्वादैरस्यं स्यादिति बिन्दुस्तम्भार्थं अन्यचित्ततया सम्भ्रमजनेन च भावबन्धं कुर्यादिति कामशास्त्रात्तस्या बिन्दुपातप्रतिबन्धमकरोदिति भावः। अदर्शत्। णिचश्च (पा०१।३।७४) इति तङ्। ऋदृशोऽङि गुणः। (पा०७।४।१६) तां बुद्ध्यर्थत्वात् कर्मत्वं॥ ११५॥

एवं भैम्या भावलाभवेगभङ्गोपायमुक्त्वा नलस्य भावलाभवेगभङ्गमाह। तत्क्षणेति। स प्रियाया अनभिमते समये भैमीभावलाभौत्सुक्यात् पूर्व्वमेवोदय उत्पत्तिर्यस्यास्तां, भावलाभे स्वां निजां बिन्दुच्युतेर्लघुतां शीघ्रतां नुनोद अन्यचित्ता-

स्वेन भावजनने स तु प्रियां
वाङ्कमूलकुचनाभिचुम्बनैः ।

करणेन व्यलम्बयदित्यर्थः । तदेवाह । किम्भूतः । तस्मिन्नेव क्षणे निजभावोत्सुक्यसमयेऽविदितभावेन एतस्या इव ममापि भावलाभश्चेत् स्यात्तर्हि विषमरततादेरस्यमेव स्यादतस्तुल्यकालमेवोभयोर्भावलाभं करवाणीति सावधानतयोक्तप्रकारेणैव सावधाने वा भावे चित्ते भाविता ध्यानवासनाभिश्चिन्तिता द्वादशात्मनः सूर्यस्य मितदीधितेश्चन्द्रस्य च स्थितिर्मर्यादा गगनगमनादिप्रकारो येन सः । तद्व्याजेन निजवीजस्तम्भनार्थं स्वस्यैव सम्पादितधैर्यः सन्निति यावत् । अथ च सावधानतया कृता सूर्यचन्द्रापरपर्यायेडापिंगलाख्यदक्षिणवामनाडीस्थयोर्मरुतोः स्थितिः स्थैर्यं येन कुम्भितपवन इत्यर्थः । अन्यचित्ततासम्पादने नासावायुस्तम्भनेन चोपायेनैकसमयोभयभावप्राप्तिपर्यन्तं स्वीयं भावं स्थिरीचकारेति भावः । एतेन भङ्ग्या नलस्य योगाभ्यासोऽपि सूचितः । अन्येन तथा कर्तुमशक्यत्वात् । दक्षिणनासामुद्रणे पुरुषस्य, वामनासिकामुद्रणे योषितो विन्दुस्तम्भो भवतीति, कामशास्त्रात् । स्वीयं तदीयं च भावं स्थिरीचकारेति वा विस्तरेणालं ॥ ११६ ॥

इदानीं समरतमाह । स्वेनेति । स तु नलः पुनः स्वेन स्वयमेव भावजनने उभयोर्भावप्राप्तिसमये स्वेन सह वा स्वेनात्मनैव कर्त्रा यद्भावजननं तस्मिन् सति वा स्वस्य भावजनन-

निर्ममे रतरहःसमापना-
शर्मसारसमसंविभागिनीं ॥ ११७ ॥
विश्लथैरवयवैर्निमीलया
लोमभिर्द्रुतमितैर्विनिद्रतां ।
स्वचितं श्वसितसीत्कृतैश्च तौ
भावमक्रमकमध्यगच्छतां ॥ ११८ ॥

समय इति यावत्, तत्र बाहुमूले कचौ कुचौ नाभिश्च एतेषां चुम्बनैः कृत्वा रतस्य रहसि समापनात्तज्जनितं परमकाष्ठापन्नं शर्म सुखं समापनारूपो वा शर्म सारस्तस्य समस्तुल्यो यः संविभागोऽशस्तद्वतीं समरतप्रापणेन सुखिनीं निर्ममे चकार। स्वेनेत्यस्य प्रथमद्वितीयव्याख्ययोः कचादिचुम्बनजातिः। तृतीयायान्तु कचादेर्निरन्तरं कामाधिष्ठानत्वात्तचुम्बनैरुपायैः स्वस्य भावप्राप्तिसमये तामपि भावमलम्भयदिति भावः। भावभजनेन लिति पाठे स्वीयेन भावभजनेन निमित्तेन बाह्वादिचुम्बनैरिति व्याख्या॥ ११७ ॥

पुनरपि भङ्ग्यन्तरेण तदेवाह। विश्लथैरिति। तौ भावलाभश्रमवशात् स्वोद्वहनेऽपि विश्लथैः शिथिलीभूतैरवयवैरङ्गैस्तथा निद्राभावेऽपि निमीलया श्रमजनितनयनसङ्कोचतया तथा तस्मिन् क्षणे द्रुतं शीघ्रं विनिद्रतामुत्थामं इतैर्गतैर्लोमभीरोमाञ्चैस्तथा श्वसितैः श्रममुखनासिकाश्वासैः सीत्कृतैश्च तैः सर्वैः स्वचितं अक्रमकं युगपत् मध्यातविन्दुच्युतिजन्यसुखरूपं भावम-

आस्त भावमधिगच्छतोस्तयोः
सम्मदेषु करजक्षतार्पणा।
फाणितेषु मरिचावचूर्णना
सा स्फुटं कटुरपि स्पृहावहा॥ ११९॥

ध्यगच्छतां समरतं प्राप्ताविव्यर्थः। भोगिनोः सम्भोगान्ते अथा-
वयवलादिजातिः॥ ११८॥

आस्तेति। एवं भावमधिगच्छतोः सुरतान्तसुखमनुभवतो-
स्तयोः करजक्षतानां नखक्षतानामर्पणा दानं सम्मदेषु परमा-
नन्देषु मध्ये आस्ताभूत् आनन्ददायिकैवाभूदित्यर्थः। नखक्ष-
तस्य सुखदायित्वं कथमित्यत आह। स्फुटं यस्मात् फाणितेषु
दुग्धविकाररूपेषु खण्डविकारेषु वा पानकेषु मध्ये सा सूपशास्त्र-
प्रसिद्धामरिचावचूर्णना कटुरसापि स्पृहावहा मधुररसजन्या
रुचिः परिहारेण दृढामिच्छामावहति। तथा कटुः पीडाज-
निकापि नखक्षतार्पणा सुखकारिण्येवाभूदित्यर्थः। सम्मदेषु ना-
नाप्रकारेषु सुरतेषु भावं प्राप्नुवतोस्तयोस्तस्मिन्नेव समये काम-
शास्त्रप्रसिद्धा कटुः पीडाजनिकापि नखक्षतार्पणा स्पृहावहाभूत्
स्फुटशब्द इवार्थः। केषु केव। फाणितेषु कटुरसा मरिचावचूर्ण-
नेव सुरतान्ते कृतापि पुनः सुरतेच्छामेवोद्दीपितदिति भाव
इति वा। भावमधिगच्छतोस्तयोः कटुरपि सुरतेषु स्पृहावहा
या नखक्षतार्पणा सा स्फुटं निश्चितेषु फाणितेषु मरिचावचूर्ण-
नाभूत्तद्रूपैवाविर्भूदित्यर्थ इति वा। मत्स्यण्डी फाणितं खण्ड-

अर्द्धमीलितविलोलतारके
सा दृशौ निधुवनक्लमालसा।
यन्मुहूर्त्तमवहन्न तत् पुन-
स्तृप्तिरास्त दयितस्य पश्यतः ॥ १२० ॥

तत्क्लमस्तमदिदीपत क्षणं
तालवृन्तचलनाय नायकं।
तद्विधा हि भवदैवतं प्रिया
वेधसोऽपि विदधाति चापलम् ॥ १२१ ॥

विकारः शर्करा सितेत्यमरः। चूर्णना सत्यापपाश (पा० ३।१। २५) इति णिजन्ताद्युच् ॥ ११८ ॥

अर्द्धेति। निधुवनक्लमेन सुरतश्रमेणालसा सुरतायासनिःसहेत्यर्थः। सा दृशौ मुहूर्त्तं क्षणमात्रं अर्द्धं मीलिते ईषत् सङ्कुचिते विलोले तारके ययोस्तादृशे यदवहद्धार तत् तादृक् भैमीनेत्रावस्थानं पश्यतो दयितस्य पुनस्तृप्तिर्नास्त नाभूत् पुनः पश्यत इति वा। पौनःपुन्यदर्शनाभिलाषस्यानिवृत्तत्वात् पश्यन्नेवस्थित इत्यर्थः। तादृशो सा तस्य सुरतसुखायाभूदिति भावः ॥ १२० ॥

तदिति ॥ तदासीनात्तस्याः क्लमः सुरतजः श्रमः नायकं सैन्यस्वामिनं यजमानमपि तं क्षणमात्रं तालवृन्तचलनाय अदिदीपत्तोपदिदेश। सुरतश्रान्तां तां दृष्ट्वा व्यजनवीजनेन श्रमापनयनं चकारेत्यर्थः। हि यतो भवस्य संसारस्य कामसुखसर्य्य-

स्वेदबिन्दुकितनासिकाशिखं
तन्मुखं सुखयति स्म नैषध।
प्रोषिताधरशयालुयावकं
सामिलुप्तपुलकं कपोलयोः ॥ १२२ ॥
क्षीणमेव पृथु सस्मरं कियत्
क्लान्तमेव बहु निर्वृतं मनाक्।

स्वस्य दैवतमिष्टदेवता तद्विधा भैमीसदृशी अतिसुन्दरी सौभाग्यवती प्रिया वेधसोऽपि ब्रह्मणोऽपि स्वविषये चापलमनुरागतरलतां विदधाति करोति किं पुनर्मनुष्यस्येत्यर्थः। पुनरपि सानुरागो जात इति भावः। व्यजनं तालवृन्तकमित्यमरः। अदिदीचत। नियमार्थात्दीचतेर्हेतुमण्णिच् चङ् ॥ १२१ ॥

स्वेदेति। तस्या मुखं नैषधं सुखयति स्म। किम्भूतं। स्वेदबिन्दुकाः सञ्जाता यस्यास्तादृशी नासिकाशिखा नासाग्रं यस्य, तथा प्रोषितो गतः अधरशयालुरोष्ठस्थितो यावकोऽलक्तको यस्य, तथा परिचुम्बनवशात् कपोलयोः सामि अर्द्धं लुप्ताः पुलका रोमाञ्चा यस्य, एवम्भूतं मुखं दृष्ट्वा स सुखी जातः सञ्जातकामश्च जात इत्यर्थः। अत्र पूर्वोत्तरार्द्धे व्यत्यस्ते पठनीये। अन्यथा प्राप्तपुनरात्तदोषापातः। सुखयति। मतुवन्तात्, तत् करोति (पा० ३।१।२६वा०१) इति णिचाविष्टवद्भावात् मतुलोपः ॥ १२२ ॥

क्षीणमिति। तदतिसुन्दरं तदीयमाननं तदा सुरतान्त-

कान्तचेतसि तदीयमाननं
तत्तदालभत लक्ष्ममादरात् ॥ १२३ ॥
स्वेदवारिपरिपूरितं प्रिया-
रोमकूपनिवहं यथा यथा ।
नैषधस्य दृगपात् तथा तथा
चित्रमापदपलप्पतां न सा ॥ १२४ ॥

समये कान्तचेतसि विषये आदरातिशयात्तच्च लक्षसङ्ख्यं द्रव्यं अलभत। मूल्यरहितेऽत्युत्कृष्टे वस्तुनि एतल्लक्षं लभ्यते इति लोकोक्त्या परमोत्कर्षस्याभिव्यञ्जनात् परममुत्कर्षं प्रापेत्यर्थः। किम्भूतं। सुरतसुखानुभववेगसञ्जातस्वीयस्मरचापलस्मरणाद्वा पृथु वक्रतरं क्षीणं लज्जितमेव। तथा पुनः सुरताभिलाषधारणात् कियदीषत् सस्मरं उद्दीप्तकामं। तथा सौकुमार्यातिशयायासवाऊख्याद्वङ्ग सुतरां क्लान्तं म्लानमेव। तया प्रलयाख्यया कामावस्थया साधनभेदावगमराहित्यादेकीभावात् परब्रह्मानन्दानुभवादिव महासुखानुभवविषयसुखानुभव विषयसुखापलापात् मनाक् निर्वृतं अत्यं सुखितं विस्तृतानुभूतसुखमिति यावत्। रतान्तसमये योषिन्मुखमत्यादरकारि भवतीति कामशास्त्रं। तदा तादृक् तदाननं दृष्ट्वा पुनः समदनोऽभूदिति भावः। अथ च लक्षं विषयतामलभतेत्यर्थः ॥ १२३ ॥

स्वेदेति। नैषधस्य दृक् स्वेदवारिणा सुरतश्रमजलेन परिपूर्णं प्रियारोमकूपनिवहं यथा यथा यावत् अपात् सादरमव-

वान्तमाल्यकचहस्तसंयम-
व्यस्तहस्तयुगया स्फुटीकृतं।
बाहुमूलमनया तदुज्ज्वलं
वीक्ष्य सौख्यजलधौ ममज्ज सः ॥ १२५ ॥
वीक्ष्य पत्युरधरं कृशोदरी
वन्धुजीवमिव भृङ्गसङ्गतं।

लोकयेत् सा नलदृक् तथा तथा तावत् तावत् अपदप्राप्ततां तृप्तिं नापदिति चित्रं पुनः पुनरवलोकने हि तृप्तिर्भवत्यत्र तु न जातेत्याश्चर्यमित्यर्थः। अथ च पिपासोरञ्जलिजलेनापि पिपासा शाम्यत्यस्यास्त्वाकण्ठवारिपूरितकूपसदृश पुनःपुनः पानेऽपि पिपासा न शाम्यतीति चित्रमित्यर्थः। एवम्भूतसैनीगैमकूपदर्शनमात्रेण पुनः सकामोऽभूदिति भावः ॥ १२४ ॥

वान्तेति। स सुरतसंमर्दाद्वान्तमाल्यास्त्यक्तकुसुमाः कचहस्तास्तेषां संयमाय ग्रन्थिबन्धनाय व्यस्तमूर्ध्वव्यापारितं हस्तयुगं यया ऽनया भैम्या स्फुटीकृतं तदतिरमणीयं कामवसतिस्थानमुज्ज्वलमनतिगौरं बाहुमूलं वीक्ष्य सौख्यजलधौ ममज्ज निरवधिसुखमन्वभूदित्यर्थः। वीतेति च पाठः। कचहस्त इति हस्तशब्दः प्रशंसावाची। सुखमेव सौख्यं चातुर्वर्ण्यादित्वात्ष्यञ् ॥ १२५ ॥

वीक्ष्येति। सा कृशोदरी नेत्रचुम्बनवशात् संलग्नैर्निजैर्नयनकज्जलैर्भिन्नवर्णतया मञ्जुलं शोभमानं पत्युरधरं भृङ्गेण भ्रमरेण सङ्गतं मिलितं पीयमानमकरन्दं बन्धुजीवपुष्पमिव

मञ्जुलं नयनकज्जलैर्निजैः
संवरीतुमशकन् स्मितं न सा ॥ १२६ ॥
तां विलोक्य विमुखश्रितस्मितां
पृच्छतो हसितहेतुमीशितुः ।
ह्रीमती व्यतरदुत्तरं वधूः
पाणिपङ्करुहिदर्पणार्पणां ॥ १२७ ॥

वीच्य समुत्पद्यमानं स्मितं ईषद्धास्यं संवरीतुं गोपायितुं उत्पद्यमानमेव निरोद्धुं नाशकत् समर्था नाभूत्। उत्तमस्त्रीत्वात् सलज्जत्वात् प्राणेशस्य सविधे स्मितं कर्त्तुमयुक्तं यद्यपि तथापि स्वीयसम्भोगसौभाग्यस्मरणवशादुत्पन्नस्य स्मितस्य संवरीतुमशक्यत्वात् सपत्नीदर्शने च सलज्जत्वेऽपि प्रागल्भ्यागमनशङ्कया सिस्मिय इति भावः ॥ १२६ ॥

तामिति। वधूर्भैमी विमुखं तिर्यङ्मुखं यथा तथा पराङ्मुखीभूय श्रितस्मितां कृतेषद्धास्यां, विमुखी चासौ श्रितस्मिता च तादृशी वा तां विलोक्य हसितहेतु पृच्छत ईशितुर्नलस्य पाणिरेव पङ्करुट् कमलं तस्मिन् करकमले दर्पणस्यार्पणामेवोत्तरं व्यतरद्ददौ, स्मितहेतुमापृष्टा, यतो ह्रीमती। स्वनेत्रचुम्बनवशात्त्वदोष्ठे मेचकज्जलं लग्नमिति लज्जावशात् साक्षादुत्तरं दातुमशक्ता कज्जलाङ्कितं स्वाधरं पश्येति भावेन दर्पणमेवोत्तरं ददावित्यर्थः ॥ १२७ ॥

लाक्षयाऽऽत्मचरणस्य चुम्बना-
च्चारु भालमवलोक्य तन्मुखं ।
सा ह्रिया नतनतानना ऽस्मर-
च्छेपरागमुदितं पतिं निशः ॥ १२८ ॥
स्वेदभाजि हृदयेऽनुबिम्बितं
वीक्ष्य मूर्त्तमिव हृद्गतं प्रियं ।
निर्ममे धुतरतिश्रमं निजै-
र्न्नोनताऽति मृदु नासिकाऽनिलैः ॥ १२९ ॥

लाक्षयेति । कुपित भैमी प्रसादार्थं चरणे पतनात् भैम्याः पद्मिनीत्वात् पङ्कजा मनवस्थेन सुरतारम्भवशाद्वा आत्मचरणस्य लाक्षया चुम्बनात् सम्बन्धाद्धेतोः चारु भालं ललाटं यस्य एवभूतं तस्य नलस्य मुखमवलोक्य निजसुरतधार्ष्ट्यस्मरणाज्जातयालज्जयाहेतुना नत नतं नत प्रकारमाननं यस्याः सा एवम्भूता सती उदितं प्राप्तोदयं उदयानतरं वा उदयमनन्तरं च कालक्रमाय क्षीयमानः शेषः कियदवशिष्टः रागो लौहित्यं यस्य तं निशो रात्र्याः पतिं चन्द्रं अस्मरत् । तन्मुखं तादृगभूदित्यर्थः । ईषदवशिष्टरक्तिमचन्द्रदर्शने यथा प्रीतिर्भवति तया तादृक् मुखदर्शनेऽपि तस्याः प्रीतिर्जातेति भावः । नत नतेति प्रकारे द्विरुक्तिः । पतिं कर्म्मत्व विवक्षया षष्ठभावः ॥ १२८ ॥

स्वेदेति ॥ ललाटलाक्षादर्शनसञ्जातनिजसुरतधार्ष्ट्यस्मरणवशात् ह्रिया नता सा स्वेदभाजि धर्म्मजलयुते स्वहृदये अनुबि-

स्मरसायकनिदेशविभ्रमै-
रप्रतीतचरवेदनोदयं।
दन्तदंशमधरेऽधिगामुका
सा सृशन्मृदु चमच्चकार च॥ १३०॥

स्मितं प्रियं नखं मूर्त्तं साकारं हृद्गतं चित्तस्थमिव वीक्ष्य निजै-रतिमृदुभिः विश्रान्तिकममन्दीभूतैर्नासिकानिलैः श्वासैः धुतो ऽपनीतः रतश्रमो यस्यैतादृशं निर्ममे चकार लज्जानम्रत्वा-न्नासाश्वासानां हृदयप्रतिविम्बित प्रियसम्बन्धात् श्रमापनोदनं युक्तं। निर्ममे इवोत्प्रेक्षा वा। तादृशीं तां दृष्ट्वा स गतश्रमः सहर्षः सञ्जातः, सापि तं तादृशं दृष्ट्वा हर्षवशान्मन्दतरान्श्वा-साश्वासानमोचेति भावः॥ १२९॥

स्मरेति॥ स्मरसायकस्य कामस्य निदेश आज्ञा। तस्य विभ्रमैर्विलासैर्हेतुभिः अप्रतीतचरः पूर्व्वसम्भोगवेलायामज्ञातः वेदनोद्भवो यो दुःखोदयः यस्मात् तं दन्तदंशं अध-रेऽधिगामुका अधुना पीडाकारिणं ज्ञातवती। सामृदु अनि-ष्ठुराङ्गुलीस्पर्शं यथा तथा दन्तदष्टाधरमेवास्पृशत्। अनन्तरं च स्पर्शज पीडानुभवात् चमच्चकार ससीत्कारमङ्गकम्पमपि चकार। आकस्मिकतयैव किमेतत्कदा जातमिति साश्चर्या-ऽभूत्। दन्त दंशं नलोकेति (पा०२।३।६८) षष्ठी निषेधः॥ १३०॥

वीक्ष्य वीक्ष्य करजस्य विभ्रमं
प्रयसार्जितमुरोजयोरियं ।
कान्तमैक्षत हसस्पृशं कियत्
कोपसङ्कुचितलोचनाञ्चला ॥ १३१ ॥
रोपभ्रूपितमुखीमिव प्रियां
वीक्ष्य भीतिदरकम्पिताक्षरं ।
तां जगाद स न वेद्मि तन्वि तं
ब्रूहि शास्मि तव कोपरोपिणम् ॥ १३२ ॥

वीक्ष्येति ॥ इयं प्रेयसा नखेन उरोजयोरुपरि बुद्धिपूर्व्वमर्जितं क्षतं करजस्य नखस्य विभ्रमं कोपसम्भ्रमवशाद्वीक्ष्य वारं वारं विलोक्यानन्तरमेव कियत् किञ्चित् कोपेन कुञ्चितौ उन्मील्य मुकुलितौ पर्य्यायेण गुणाधिक्यवशात् विलोचनाञ्चलौ नेत्रपल्लवौ यया एवम्भूता सती स्वयं क्षतत्वात् सम्भोगसमये तया ज्ञातत्वाच्च हसस्पृशं स्मितस्मितं कान्तमैक्षत कोपेन वक्रमपश्यदित्यर्थः । कोपस्याल्पत्वेन धीरत्वं भैम्या व्यज्यते वीक्ष्य वीक्ष्य सम्भ्रमे द्विरुक्तिः । हसस्पृशं स्पृशोनुदक (पा० ३।२।५८) इति क्वित् ॥ १३१ ॥

रोपेति ॥ सरोपरूषितं कोपयुक्तं मुखं यस्यास्तामिव दन्तदशनादेः सुखकारित्वेन तत्त्वतः कोपरहितत्वेऽपि कृत्रिमकोपेन भ्रुकुटितमुखीं प्रियां वीक्ष्य भीत्या दरमीषत् कम्पितानि सगद्गदान्यक्षराणि यस्यां क्रियायां तद्यथा तथा तां इति

कोपकुङ्कुमविलेपनात्मना-
न्नन्ववाचि कृशतन्ववाचि ते।
भूदयुक्तसमयैव रञ्जना
मानने विधुविधेयमानने॥ १२३॥

जगाद। इति किं। हे तन्वि अहं तं न वेद्मि कस्तव कोप-रोपरोपणं चकार ब्रूहि, शास्मि तव कोपरोपणमिति च पाठः। कोपस्य रोपिणमध्यारोपकं न वेद्मीत्यात्मनः कोपरोपित्वं गोपयति॥ १२२॥

कोपमिति॥ पुनरपि इति किं। ननु कृशतनु अवाचि कोपवशात् अवाच्यभाषणे तथा अवाचि नम्रीभूते तथा विधुनापि विधेया गुणाधिक्यवशाद्विधेया कार्या मानना पूजा यस्यैवम्भूते चन्द्राधिके तवानने रोषरूपेण कुङ्कुमेन विलेपनाद्धेतो-र्मनागल्पीयसीयं रञ्जना रक्तिमसम्पादना मा भूत् न कार्या। यस्मादयुक्तसमयैवाप्रस्तावसमुद्भूतैव किमपि मया नापराद्ध-मिति निर्हेतुकेयमनुचिता कोपरञ्जना त्यज्यतामित्यर्थः। अथ वाऽयं सम्भोगसमयो रात्रिरियं न तु कोपरञ्जनसमयः, तस्माद-न्यदा कोपः कार्योऽधुना तु त्यज्यतामित्यर्थः। अथ च चन्द्रतुल्ये मुखे रञ्जना अयुक्तसमया माऽभूत् किन्तु युक्तसमयैवकार्येत्ययु-क्तसमयत्वमेव निषिध्यते। अथ च चन्द्राधिकं तव मुखं इदानीं रोषरूपितं सम्पूर्णं भवतीति अयुक्तसमया रञ्जना न कार्या कोपस्त्यज्यतामित्यर्थः। अथ च कोपकुङ्कुमविलेपनरञ्जना अयु-

क्षिप्रमस्यतु रुजा नखादिजाः
तावकीरमृतशीकरं किरत्।
एतदर्थमिदमर्थितं मया
कण्ठचुम्बि मणिदाम कामदम्॥ १३४॥
स्वापराधमलुपन् पयोधरे
मत्करः सुरधनुःकरस्तव।

क्षमया यतस्तस्मान्नैव कार्या। शीतकालेऽत्युष्णवीर्यतया वदनप्रसाधनं कुङ्कुमविलेपनं युक्तं, इदानीं वसंतजेन श्रमजेनोष्मणा श्रीखण्डपाण्डिमैवाननप्रसाधनायालं न कुङ्कुमरञ्जनेत्यर्थः॥ १३३॥

क्षिप्रमिति॥ हे भैमि कण्ठचुम्बि मम कण्ठे स्थितं तया कामदमिच्छादायि अतएवैतदर्थं त्वदीयकरजरदनक्षतजपीडापाकरणार्थं भैमीकरजादिक्षतपीडापनोदनं कुर्विति मयाऽर्थितं प्रार्थितं यदिदं चिन्तामणिरत्नदाम माला अमृतशीकरं सुधाबिन्दुं किरत् स्रवत्तत्तावकीस्त्वदीया नखादिजा नखक्षतादिजा रुजाः पीडाः क्षिप्रं अस्यतु शमयत्वित्यर्थः। तस्मात् कोपं मा कार्षीरिति भावः। अर्पितमिति पाठे पीडाशान्त्यर्थं मया त्वदीयकण्ठे क्षिप्तं मत्त्वदीयकण्ठचुम्बीति व्याख्येयं। रुजा भिदादित्वात् (पा॰ ३।३।१०४) अङ् प्रत्ययः॥ १३४॥

स्वापराधमिति॥ हे भैमि मत्करस्तव पयोधरे स्तने सुरधनुःकर इन्द्रचापाख्यनखक्षतविशेषकारी मन्नखक्षतपीडाकरणजं

सेवया व्यजनचालनाभुवा
भूय एव चरणौ करोतु वा ॥ १३५ ॥
आननस्य मम चेदनौचिती
निर्दयं दशनदंशदायिनः ।
शोध्यते सुदति वैरमस्य तत्
किं त्वया वद विदश्य नाधरम् ॥ १३६ ॥

स्वापराधं व्यजनस्य चालना तस्याः सकाशाद्भवतीति भूस्तया व्यजनवीजनसमुद्भूतया सेवया अलुपत्। वा अथवा एतावत्यापि सेवया यदि न सन्तुष्यसि तर्हि भूय एव पुनरपि अयं करस्तव चरणौ करोतु संवाहयतु। चरणसंवाहने ह्यपराधमार्जनं भवति। तस्मात्तदयं करोतित्यर्थः। अथ च चरणौ सम्भोगार्थं ऊर्ध्वीकरोत्वित्यर्थोऽवसेयः। अथ च नानावर्णरत्नमुद्रिकायुक्तत्वात्त्वत्कुचे सुरधनुःकरः, तथाचापराधो नास्त्येव। अथ च मेघे सुरधनुर्युक्तमेवेति पयोधरे तत्कारिणो न कोऽप्यपराधः, यद्यपि भवेत् तथापि व्यजनवीजनसेवयावलोपितश्चरणसंवाहनमपि करोत्वित्यर्थः। भूय एव इति पाठे एव मत्करः। अलुपत् लृदित्वादङ्। धनुःकरः दिवाविभेति (पा० ३।२।२१) टः। इसुसोःसामर्थ्ये इति (पा० ८।३।४४) पक्षे विसर्जनीयस्य षः। करोतीति करः पचाद्यच्। सुरधनुषः कर इति षष्ठी समासः। चालना ण्यन्ताद्युच्। सिचस्य पाचिकत्वाद्वृद्धिः ॥ १३५ ॥

आननस्येति। हे सुदति ममाननस्य चेद्यदि अनौचिती यतो

दीपलोपमफलं व्यधत्त य-
स्त्वत्पटाहृतिषु मच्छिखामणिः।
नो तदागसि परं समर्थना
सोऽयमस्तु पदपातुकस्तव ॥ १३७ ॥
इत्यमुक्तिमुपहृत्य कोमलां
तत्पचुम्बिचिकुरश्चकार सः।

निर्दयं यथातथा दशनदंशदायिनो दन्तचतदानशीलस्य तस्मा-न्मम यद्यपराधिना तत्तर्हि अपराधकारिणोऽस्य मन्मुखस्याधरं विदश्य अतितरां खण्डयित्वा त्वया किमिति तद्दन्तदंशनरूपं वैरं न शोध्यते त्वं वद कथय, अपि तु अपराधिनोऽस्यावयवमोष्ठं दन्तैः खण्डयित्वा वैरनिर्यातनं कुरु। तथा च समः समाधि-रित्यर्थः ॥ १३६ ॥

दीपेति। हे भैमि यो मच्छिखामणिस्त्वत्पटाहृतिषु त्वदीय-वसनकर्षणेषु सतीषु लज्जावशान्मुखवाय्वादिना त्वया कृतं दीप-लोपं स्वकिरणैरेव तिमिरनिराकरणादफलं व्यर्थं व्यधत्त। तस्य मणेरागसि अपराधे परं केवलं करावलम्बनादिवत्सम-र्थना परिहारो नो अस्ति तस्मादुपायान्तराभावात्सोऽयं मौ-लिमणिस्तव पदयोः पातुको वन्दारुरस्तु। उपायान्तराभावे हि नमस्कारेणापि अपराधमार्जनं क्रियते तस्मादयमपि नम-स्कारं करोतित्यर्थः ॥ १३७ ॥

इत्यमिति। स इत्यमुक्तप्रकारेण कोमलां भामयर्कां उक्तिं

आत्ममौलिमणिकान्तिभङ्गिनीं
तत्पदारुणसरोजसङ्गिनीं ॥ १३८ ॥
तत्पदाखिलनखानुबिम्बनैः
स्वैः समेत्य समतामियाय सः ।
रुद्रभूमविजिगीषया रति-
स्वामिनोपदशमूर्त्तिताम्भृता ॥ १३९ ॥

वाचं उपहृत्य उपहारीकृत्य प्रणामकरणवशात्तत्पचुम्बिनः शय्यास्पर्शिनश्चिकुराः केशा यस्य स आत्ममौलिमणिकान्तिर्शि-खशिखामणिद्युतिस्तद्रूपा भङ्गिनी नदी तां तत्पदे भैमीचरणौ तद्रूपे अरुणसरोजे तत्सङ्गिनीं सम्बद्धाञ्चकार । प्रणनामेत्यर्थः । नद्याश्च रक्तोत्पलसम्बन्धो युक्त एव । तत्पचुम्बीत्यनेन शय्यायामेव प्रणामः सूचितः । भङ्गास्तरङ्गाः सन्त्यस्यां सेति विग्रहः ॥ १३८ ॥

तदिति । कृतप्रणामः स नलः स्वैर्निजैस्तस्याः पादयोरखिलेषु दशस्वपि नखेषु जातैरनुबिम्बनैः प्रतिबिम्बैः समेत्य मिलित्वा रुद्रस्य भूमा बहुत्वमेकादशत्वं तस्यापि स्पर्द्धावशाद्विजिगीषया जेतुमिच्छया उपदशमूर्त्तितामेकादशमुर्त्तितां धारयता रतिस्वामिना कामेन समतां साम्यमियाय मदीयः शत्रुर्यैकादशत्वं धारयति तर्हि मयापि तावत्सङ्ख्याकेन भवितुं युक्तमिति । एकादशत्वं यदि कामो धारयेत्तर्हि भैमीदशनखभञ्जातस्वप्रतिबिम्बसम्बन्धको दशमूर्त्तिधारी नलस्तेनोपमीये-

आख्यतैष कुरु कोपलोपनं
पश्य नश्यति क्षपा मधोर्निशा।
एवमेव तु निशान्तरे वरं
रोपशेषमनुरोत्स्यसि क्षणम्॥ १४०॥

तेत्यभूतोपमा। रुद्रभीतीति पाठे एकादशभ्यो रुद्रेभ्यो भीतेः विजिगीषया तदपाकरणाद्धेतोर्यद्येकादशमूर्त्तितां मदनो धारयेत्तर्हि स्वप्रतिबिम्बयोगादेकादशमूर्त्तिर्नलस्तेनोपमीयेतेत्यर्थः। प्रणामवशात्तन्नखेषु प्रतिबिम्बित इति भावः। दशानां समीपे उपदशाः। सङ्ख्यया व्ययेति (पा०२।२।२५) समासः। बहुव्रीहौ सङ्ख्येय (पा०५।४।७३) इति डच्। उपदशा मूर्त्तयो यस्येति समासः॥ १३९॥

आख्यतेति। एष तां इति आख्यत अवोचत्। इति किं। हे भैमि त्वं कोपलोपनं कुरु। मधोर्वसन्तस्य क्षपा दिनापेक्षया स्वभावत एवाल्पपरिमाणा अथ च प्रतिक्षणमपचीयमाना निशा नश्यतीति, पश्य कोपापरित्यागे एवम्प्रकारेणावशिष्टा रात्रिर्गमिष्यति, तस्मात् कोपं मुञ्च। तु पुनस्त्वं एतमेव रोपशेषं निशान्तरे आगामि रात्र्यन्तरे दिनापेक्षया अधिकपरिमाणायां शिशिरर्तुरात्रौ क्षणमात्रं अनुरोत्स्यसि कामयिष्यसे चरमे तन्मनागिष्टं शिष्टं कोपं तदा कुरु इदानीं सम्भोगार्थं प्रसन्ना भव। सर्वं कोपमिदानीमेव चेत् करिष्यसि तर्हि तदा किं करिष्यसि तस्मादर्धं कोपं निशान्तरार्थं स्थापयेति लौकिकरीत्या-

साऽथ नाथमनयत्कृतार्थतां
पाणिगोपितनिजाङ्घ्रिपङ्कजा।
तत्प्रणामधुतमानमाननं
स्मेरमेव सुदती वितन्वती ॥ १४१ ॥
तौ मिथो रतिरसायनात् पुनः
सम्बुभुक्षुमनसौ बभूवतुः।

धुना तावत् कोपं त्यजेति तां भैमीं प्रार्थयति स्मेत्यर्थः। आख्यत। च चिङःख्याञ् (पा० २।४।५४) क्तः। अस्य तिवक्तीति (पा० ३। २।५२) अङ्। ङिलात्तङ् ॥ १४० ॥

सेति। अथ प्रणामभाषणानन्तरं प्रणामं मा कार्षीरित्यादिवचनपूर्वं पाणिभ्यां गोपिते निजाङ्घ्रिपङ्कजे यथा तथा तस्य प्रणामेन धुतो निरस्तो मानः कोपजमौदासीन्यं यस्यैवम्भूतं आननं प्रसादात् स्मेरं भस्मितमेव वितन्वती कुर्व्वाणा सती सा सुदती नाथं कृतार्थतां कृतकृत्यतां अनयत् प्रापयामास तावन्मात्रेण प्रसन्नाभूदिति भावः ॥ १४१ ॥

ताविति। तौ मिथो ऽन्योन्यरतिरसस्यानुरागरसस्यायनात् प्राप्तेः परस्परानुरागविवृद्धेर्हेतोरथ च प्रीतिरेव रसायन प्रभावात्सुरतेच्छायाः पुनरुज्जीवनौषधं तस्माद्धेतोः पुनः सम्बुभुक्षुमनसौ सुरताभिलाषिचित्तौ बभूवतुः। द्वितीयसुरतेच्छू जाताविवत्यर्थः। तु पुनः रजनित्रयोर्मनोरथं द्वितीयसुरतवाञ्छां न चरमे विषेहे। यतः दुष्टा जनिर्जन्म यस्यास्तथा। अस्य जीवितं

चक्रमे न तु तयोर्मनोरथं
दुर्ज्जनी रजनिरल्पजीवना ॥ १४२ ॥
स्वप्नमात्तशयनीययोस्तयोः
स्वैरमाख्यत वचः प्रियां प्रियः ।
उत्सवैरधरबिम्बपानजैः*
सान्तरायपदमन्तरान्तरा ॥ १४३ ॥

सत्त्वं यस्मात्तादृशी सञ्जातप्रभातसमया। अथ वाल्पायुषो जन्म दुष्टमेवेति। यद्वा प्रभातस्य आमन्त्रत्वादिरहसम्भावनावशाद्वा दुष्टा व्याकुला जनी नवोढा यस्यां सा दुर्ज्जनी। सम्भोगेच्छा तु तयोर्न निवृत्ता परं प्रभातसमयस्य सञ्जातत्वात्सम्भोगं न चक्रतुरिति भावः। अन्योऽपि सुरतविषये यद्रसायनं वीर्य्यवृद्ध्यर्थमौषधं सेवमानः पुनः पुनः सुरतेच्छुर्भवति। अन्यचित्ताऽन्यापि दुष्टा वधूः सपत्न्यादिः स्त्रीपुंसयोः सम्भोगं न क्षमते। जननं जनिः। जनिघसिभ्यामिण् (सि॰ कौ॰। उ॰४पा॰२०२ पत्रे)। जनिवध्योरिति (पा॰७।३।३५) न वृद्धिः। ङ्यलोप इति (पा॰ ६।३।११२) दीर्घः पक्षे समासान्तविधेरनित्यत्वात्कबभावः ॥ १४२ ॥

स्वप्नमिति। स्वप्नमात्तं शयनीयं शय्या याभ्यां तयोर्मध्ये प्रियः प्रियां प्रति स्वैरं रहसि स्थितत्वात्स्वच्छन्दं यथा तथा आख्यत

* अधरदानपानजैरिति पुस्तकान्तरे पाठः।

देवदूत्यमुपगत्य निर्द्दयं
धर्म्मभीतिकृततादृगागसः ।
अस्तु सेयमपराधमार्ज्जना-
जीवितावधि नलस्य वश्यता ॥ १४४ ॥
स क्षणः सुमुखि यत्त्वदीक्षणं
तच्च राज्यमुरु येन रज्यसे ।

अवोचत् । किम्भूतं वचः परस्परमधरबिम्बस्य पानं तज्जैरुत्सवैः परमानन्दकारणैर्निर्मितैरन्तरान्तरा मध्ये मध्ये सान्तरायाणि विघ्नानि कियन्तं कालं अनुच्चारितानि सुप्तिङन्तानि पदानि यत्र ॥ १४३ ॥

किमुवाचेत्याह । देवेति । देवदूत्यमुपगत्य अङ्गीकृत्य निर्द्दयं यथा तथा धर्म्माद्भीत्या चित्तग्लान्या दूत्याकरणे प्रतिश्रुतापरिपालनाद्धर्म्मो लुप्येतेति लुप्यमानाद्धर्म्माद्भीत्या धर्म्मस्यैव वा भीतिर्नलोपलक्षणा तया हेतुभूतया कृत तादृशमनिर्व्वाच्यं भवत्पीडनरूपमुक्तप्रकारमागोऽपराधो येन तस्यापराधिनो नलस्य मम जीविताधि यावज्जीवं या वश्यता भवदधीनता सेयमपराधस्य मार्ज्जना शोधयित्री अस्तु । अद्यप्रभृति यावदहं जीवामि तावत्तव वश्यः किंकर एवेति प्रति[illegible] मत्वा

तन्नलस्य सुधयाऽभिषेचनं
यस्त्वदङ्गपरिरम्भविभ्रमः ॥ १४५ ॥
शर्म्म किं हृदि हरेः प्रियार्पणं
किं शिवार्द्धघटनं शिवस्य वा।

महानुत्सवः शोभनवदनत्वादेवेत्यर्थः। अथ च यत्र महत्यपि काले भवदीक्षणं स महानपि कालः सुखरूपत्वात् क्षणतुल्यः सुखेनातिवाहितुं शक्य इत्यर्थः। तथा येन त्वद्विषये मदीयेन मद्विषये त्वदीयेन व्यापारेण त्वं रज्यसे प्रीता भवसि, तच्च तदेव मम उरु राज्यं त्वदनुरागहेतुर्व्यापार एव साम्राज्यं न तु सकलभूमण्डलाधिपत्यमित्यर्थः। तथा यस्त्वदङ्गस्य परिरम्भविभ्रमः आलिङ्गनविलासः त्वच्छरीरेण मदङ्गे कृतो वा परिरम्भविभ्रमः तदेव नलस्य मम सुधयाऽमृतेनाभिषेचनं अभितः स्नानं। सुधाभिषेकादपि भवदङ्गसङ्गः सुखकर इत्यर्थः। सर्व्वथा त्वमेव मम सकलपुरुषार्थसर्व्वस्वभूतासीत्यर्थः॥ १४५ ॥

शर्म्मेति। हरेः श्रीविष्णोः हृदि प्रियार्पणं लक्ष्म्याः स्थापनं किं नाम शर्म्म सुखं। तथा वा अथवा शिवस्य शिवायाः पार्व्वत्या अर्द्धेन घटनं किं शर्म्म तदप्यल्पीयः। तर्हि किं नाम परमं सुखमित्याशङ्क्याह। ननु तन्वि भैमि मदेषु सुरतोत्सवेषु तव तं अतिप्रसिद्धं सरिदुदन्वतोर्नदीसमुद्रयोरिवान्वयं सम्बन्धमभिन्नजलोपलम्भेन तादात्म्यलक्षणं अयमहं अयं शुभावहविधिरूपं वा सम्बन्धं कामये वाञ्छामि इष्टदेवताभ्य इति

देवदूत्यमुपगत्य निर्दयं
धर्म्मभीतिकृततादृशागसः।
अस्तु सेयमपराधमार्ज्जना-
जीविताविधि नलस्य वश्यता ॥ १४४ ॥
स क्षणः सुमुखि यत्त्वदीक्षणं
तच्च राज्यमुरु येन रज्यसे।

अवोचत्। किम्भूतं वचः परस्परमधरबिम्बस्य पानं तज्जैरुत्सवैः परमानन्दकारणैर्निमित्तैरन्तरान्तरा मध्ये मध्ये सान्तरायाणि विघ्नानि कियन्तं कालं अनुचारितानि सुप्तिङन्तानि पदानि यत्र ॥ १४३ ॥

किमुवाचेत्याह। देवेति। देवदूत्यमुपगत्य अङ्गीकृत्य निर्दयं यथा तथा धर्म्माद्भीत्या चित्तशङ्कया दूत्याकरणे प्रतिश्रुतापरिपालनाद्धर्म्मो लुप्येतेति लुप्यमानाद्धर्म्माद्भीत्या धर्म्मस्यैव वा भीतिर्नलोपलक्षणा तया हेतुभूतया कृतं तादृशमनिर्व्वाच्यं भवत्पीडनरूपमुक्तप्रकारमागोऽपराधो येन तस्यापराधिनो नलस्य मम जीविताविधि यावज्जीवं या वश्यता भवदधीनता सेयमपराधस्य मार्ज्जना शोधयित्री अस्तु। अद्यप्रभृति यावदहं जीवामि तावत्तव वश्यः किंकर एवेति प्रतिज्ञां तस्यां मत्वा ममापराधं क्षमस्वेत्यवोचदिति भावः। मार्ज्जना ण्यन्ताद्भावे युच् ॥ १४४ ॥

स इति। हे सुमुखि यत्त्वदीक्षणं स एव नलस्य मम क्षणो

तन्नलस्य सुधयाऽभिषेचनं
यस्त्वदङ्गपरिरम्भविभ्रमः ॥ १४५ ॥
शर्म्म किं हृदि हरेः प्रियार्पणं
किं शिवार्द्धघटनं शिवस्य वा।

महानुत्सवः शोभनवदनत्वादेवेत्यर्थः। अथ च यत्र महत्यपि काले भवदीक्षणं स महानपि कालः सुखरूपत्वात् क्षणतुल्यः सुखेनातिवाहितुं शक्य इत्यर्थः। तथा येन त्वद्विषये मदीयेन मद्विषये त्वदीयेन व्यापारेण त्वं रज्यसे प्रीता भवसि, तच्च तदेव मम उरु राज्यं त्वदनुरागहेतुर्व्यापार एव साम्राज्यं न तु सकलभूमण्डलाधिपत्यमित्यर्थः। तथा यस्त्वदङ्गस्य परिरम्भविभ्रमः आलिङ्गनविलासः त्वच्छरीरेण मदङ्गे कृतो वा परिरम्भविभ्रमः तदेव नलस्य मम सुधयाऽमृतेनाभिषेचनं अभितः स्नानं। सुधाभिषेकादपि भवदङ्गसङ्गः सुखकर इत्यर्थः। सर्व्वथा त्वमेव मम सकलपुरुषार्थसर्व्वस्वभूतासीत्यर्थः ॥ १४५ ॥

शर्म्मेति। हरेः श्रीविष्णोः हृदि प्रियार्पणं लक्ष्म्याः स्थापनं किं नाम शर्म्म सुखं। तथा वा अथवा शिवस्य शिवायाः पार्व्वत्या अर्द्धेन घटनं किं शर्म्म तदप्यन्यीयः। तर्हि किं नाम परमं सुखमित्याशङ्क्याह। ननु तन्वि भैमि मदेषु सुरतोत्सवेषु तव तं अतिप्रसिद्धं सरिदुदन्वतोर्नदीसमुद्रयोरिवान्वयं सम्बन्धमभिन्नजलोपलम्भेन तादात्म्यलक्षणं अयमहं अयं शुभावहविधिरूपं वा सम्बन्धं कामये वाञ्छामि इष्टदेवताभ्य इति

कामये तव महेषु तन्वि तं
मन्वयं सरिदुदन्वदन्वयम् ॥ १४६ ॥
धीयतां मयि दृढा ममेति धी-
र्वक्तुमेवमवकाश एव कः ।
यद्विधूय तृणवद्दिवस्पतिं
क्रीतवत्यसि दयापणेन मां ॥ १४७ ॥

शेषः। महेषूत्सवेषु मध्ये तव सरिदुन्वत्त्वमेव कामये नलन्यदिति वा। हरेर्द्दि प्रियार्पणे शिवस्य च शिवार्द्धघटने आलिङ्गना-दीनां पृथक्स्थितभिन्नदेहसाध्यत्वादालिङ्गनादिजन्यं सुखं ता-वन्नास्त्येव किन्त्वेकदेशस्पर्शमात्रजन्यमेवास्ति तस्मादावयोर्यदि पृथक्त्वं तर्हि तदा सुरतसमये चीरवदेकीभावोऽस्तु। यद्यपृथ-क्त्वमिष्ट तर्हि नदीसमुद्रजलवत्तादात्म्यमेव भवतु न तु हरि-सह्मादिवद्वेदोल्लेख इति भावः। नन्वहमित्यपि पाठः। तव मयेहेति पाठे अयमहमिह भूलोके मया सह ते तव तादृशं सरिदुदन्वत्त्वं कामय इत्यर्थः ॥ १४६ ॥

धीयतामिति। हे भैमि मयि त्वं ममेति धीर्निश्चिता बुद्धि-र्धीयतां न्यस्यतां। मयि स्वबुद्धिरासंसारं त्वया क्रियतामिति वक्तुमेव अभिधातुमप्यवकाशः अवसर एव कः अपि तु नास्तिकोऽर्थ एवं वक्तुमवकाशलेशोऽपि नास्ति। यद्यस्माद्धेतोः दिवस्पतिमिन्द्रं तृणवत्तृणेन तुल्य वर्त्तते तृणवदेव यथा तथा तृणमिव परित्यज्य दयारूपेण पणेन मूल्येन मां क्रीतवत्यसि। उदासीने हि मम

शृण्वता निभृतमालिभिर्भव-
द्वाग्विलासमसकृन्मया किल।
मोघराघवविवर्ज्यजानकी
आविणी भयचलासि वीक्षिता॥ १४८॥

बुद्धिः कार्येत्यारोपः प्रार्थ्यते। विक्रीय मूल्येन गृहीते वस्तुनि तु स्वत्वं न्याय्यमस्त्येवेति तदारोपो न प्रार्थ्यत इत्यर्थः। यदि मयि स्वत्वं नाभविष्यत् तर्हि इन्द्रं परित्यज्य मां नावरिष्यः वृतवत्यसि तावत् तस्मादेवमपि मया याचितुमयुक्तमेवेति। तव किं-करोऽस्मीति भावः। दिवस्पतिं दयापणेनेत्येताभ्यां इन्द्रापेक्षया त्वदपेक्षया वाहमतितरां गुणवानिति वृत इति न किन्तु मद्-रणे तव कृपैव हेतुः। सा यावज्जीवं कार्येत्यर्थः॥ १४७॥

शृण्वतेति॥ किल कदाचित् समये आलिभिः सखीभिः सह असकृत् भवत्या वाग्विलासं कथासंवादं निभृतं पश्चादागत्य ज्ञातं यथा तथा वरदानादृश्यत्वेनावगुण्ठ्य यथा तथा शृण्वता निभृतं रहसि स्थितत्वात् मच्छ्रवणशङ्काभावात् स्वैरं स्वच्छन्दं सखीभिः सह भवत्संवादं किल शनैः पश्चादागमनाद् दृष्टीकरणादिना कपटेन शृण्वतासता वा मया त्वं वीक्षिता एवम्भूता दृष्टासि। किम्भूता मोघं वृथा परीक्षार्थं अकारणे श्रीराघवेण विवर्ज्या त्यक्ता स्वस्मिन्नेवानुरक्तापि जानकी शृणोतीति तच्छीला भीतेव भयेन स्वत्यागशङ्कया भीत्या च व्याकुला। तस्मात् किंकरभूते मय्यन्यथाधीनं कार्येति भावः। यदा

क्षुप्तपत्त्रविनिमीलितक्षुपात्
कच्छपस्य धृतचापलात् पलात्।
त्वत्सखीषु सरटाच्छिरोधुतः
स्वं भियोऽभिदधतीषु वैभवं ॥ १४९ ॥
त्वं मदीयविरहामयाद्‌ निजा
भीतिमीरितवती रघुःसुता।
नोज्झितास्मि भवतीं तदित्ययं
व्याहरद्दरमसत्यकातरः ॥ १५० ॥

यस्माद्भीता दृष्टासि तस्मादवश्यं मयि तवानुरागोऽस्तीति निश्चित्य धीयतां मयि विवेक्तुमयुक्तमिति भावः। राघवः गोत्रापत्ये विदादेराकृतिगणत्वादञ्। बहुत्वे तु यञञोश्चेति (पा० २।४।६४) अञोलुक्। तेन रघूणामन्वयं वक्ष्ये इति साधुः ॥ १४८ ॥

क्षुप्तेति त्वमिति युग्मं। अयं नलः तां प्रति इति वरमभीदं व्याहरत् उवाच। अभयदानं प्रादात्। इति किं। हे भैमि कदाचित् सखीसमूहेन सह गोष्ठ्यां प्रसङ्गात् काकस्माद्बिभेतीति तथ्यं कथ्यतामित्यन्योन्यं भयहेतुप्रश्ने कृते क्षुप्तानि स्पृष्टानि पत्त्राणि यस्यैवम्भूतोऽङ्गुल्यादिना स्पृष्टमात्रः सन् विशेषेण निमीलितः सङ्कुचितस्तस्मात् क्षुपाख्यलज्जालुसंज्ञकादोषधिविशेषात् सकाशादहं सुतरां बिभेमीति कयाचिदुक्तं। एवं चापलं येन स्वभावत एव चपलः कच्छपस्य पलान्मांसात् अह-

सङ्गमय्य विरहेऽस्मि जीविका
यैव वामथ रताय तत्क्षणं।

मिति अन्यया कथितं। अनिशं शिरोधुतो मूर्द्धानं कम्पयतः प्रतिक्षणमन्यवर्णात् सरटात् कृकलासात् सकाशादहमिति अपरयेत्येवं तत्सखीषु स्वं निजं भियोभयस्य वैभवं हेतुं अभिदधतीषु भाषमाणासु सतीषु कयाचिदस्माभिर्निजभयहेतुरुक्तस्त्वयापि कथ्यतामिति त्वं प्रत्युक्ते सति नलवियोगाद्धेतोरहं बिभेमि क्षणमात्रमपि तेन न भाव्यमिति तस्मादेव बिभेमि न त्वन्यस्मादिति मदीयविरहान्निजां भीतिं रहसि ईरितवती त्वं मया श्रुतासि यस्मात् तस्मात् माऽभैषीः। अहं भवतीं कदाचिदपि नोज्झितास्मीति, यतः असत्ये नानाप्रलोभनविषये कातरो भीरुः भाविनस्त्यागस्य दैवाधीनत्वात्सत्यवादित्वमिति भावः। यद्वा असतीष्वकातरः सतीषु विषये भीरुरेव अतस्तद्भयनिराकरणार्थमेवमवददित्यर्थः। क्षुभेति क्षुपसर्ग इति तौदादिकात् अनिटो निष्ठा। शिरोधुत इति क्विबन्तं ॥ १४८ ॥ १५० ॥

सङ्गेति। हे भैमि इत्यतो हेतोः रुष्टया कुपितयेव निद्रया अस्यां रात्रौ आवयोर्नोपसद्यते आमन्त्रतयानभूयते। किमिति वितर्के। इति किं। हे भैमीनलौ यैवाहं निद्रा विरहे विवाहात् पूर्वं वियोगसमये वां युवां स्वप्नदर्शनादिवशात् सङ्गमय्य संयोगं प्रापय्य युवयोः जीविकास्मि प्राणधारणहेतुरभूवमि-

छन्नं दत्थ इति रुष्टयावयो-
र्निद्रयाद्य किमु नोपसद्यते ॥ १५१ ॥
ईदृशं निगदति प्रिये दृशौ
सम्मदात् कियदियं न्यमीलयत्।

त्यर्थः। तत्क्षणं तस्या मम सम्बन्धिनं क्षणं अवसरं वा अथ विवाहानन्तरं स्वकार्यार्थं रताय युवां दत्थः। रात्रिलक्षणे मदीयसमय एव सुरतस्य क्रियमाणत्वात् छन्नं कष्टमनुचितं कृतं उपकारं न स्मरथ इत्यर्थः। आपदि कृतोपकारा हि तदीयेऽवसरे अन्यस्मै दत्ते सति कोपात् स्वामिसमीपं नागच्छतीति, आपदि कृतोपकाराया मम रात्रिरूपोऽवसरः सुरताय दत्तो युवाभ्यां, मह्यं तु मदीयावसरस्य लेशोऽपि न दत्तः प्रभातपर्यन्तं सुरतस्यैव करणादिति कोपवशादिति भावाऽऽवयोर्निद्रा नायातीति नलस्तामवोचदित्यर्थः। आप्रभात ताभ्यां कामकेलयः कृता इति भावः। न क्षणमिति पाठे सैव जीविका तस्यां मम रताय प्रीताय क्षणमल्पमपि समयं न दत्थ इति रुष्टयेति व्याख्येयं। भञ्जमय्य ल्यपि लघुपूर्वादिति (पा० ६।४।५६) णेरयादेशः। जीविका कर्त्तरिण्वुल् वां षष्ठी द्वितीया द्विवचने वामादेशः॥ १५१ ॥

ईदृशमिति। इयं प्रिये ईदृशमेवम्प्रकारमन्यदपि निगदति सतीव सम्मदाद्धर्षात् सुरतानन्दजश्रमादिति यावत्। सम्माद्धेतोः दृशौ नेत्रे कियत् न्यमीलयत् किञ्चित् निमीलितवती

प्रातरान्पति कोकिले कलं
जागरादिव निशः कुमुद्वती ॥ १५२ ॥
मिश्रितोरु मिलिताधरं मिथः
स्वप्नवीक्षितपरस्परक्रियं ।
तौ ततोऽनु परिरम्भसम्पुटे
पीडनां विदधतौ निदद्रतुः ॥ १५३ ॥

अममञ्जातया निद्रया प्रयोजिकयेति शेषः। निदद्राविल्यर्थः। श्रान्तो हि निद्राति मम्मदादेवं गदति सतीति वा दृशौ न्यमीलयत्। मम्मदादिव प्रियप्रियोक्तिश्रवणसञ्जातहर्षवशादित्यर्थः। आनन्दातिशयसुखमनुभवन् हि निमीलितदृग्भवतीति प्रतीयमानोत्प्रेक्षा वा। क्रियदित्यनेन दृशोर्द्धनिमीलनस्य सूचितत्वाद्धन्यत्वं तस्याः सूचितं। केव। प्रातः कोकिले कलं मधुरास्फुटध्वनिं श्रोत्रसुखं आलपति सति कुमुदिनी इव यथा निमीलितोत्पला भवति तथैयमपि। कस्मादिव निशोरात्रिसम्बन्धिनो जागरादिव। रात्रावनिद्रो हि प्रातर्दृशौ घूर्णनेन निमीलयति कुमुदिन्यपि रात्रावनिद्रावशादिव प्रातर्निमीलयति, तस्मादियमपि प्रतीयमानोत्प्रेक्षा। न्यमीमिलत् इति पाठे णौ चङि भ्राजभासेति (पा० ७।४।३) पाक्षिक उपधा ह्रस्वः। जागरात् भावेघञि जाग्रो विचिण्णल्ङित्स्विति (पा० ७।३।८५) वृद्ध्यपवादो गुणः॥ १५२॥

मिश्रितेति। ततोऽनु तादृक्प्रियभाषणमध्य एव भैमीनिद्रानन्तरं परिरम्भरूपे सम्पुटे संश्लेषपेटिकायामिति यावत्। तदत्र

यद्यातायातरंहश्छलकलितरतिश्रान्तिनिश्वासधाराऽ-
जस्रव्यामिश्रभावस्फुटकथितमिथःप्राणभेदव्युदासं ।
बालावद्वोजपत्त्राङ्कुरकरिमकरीमद्रितौर्वीन्द्रवत्त-
स्विन्नाख्यातैकभावोभयहृदयमयाद्द्वन्द्वमानन्दनिद्रां॥१५४॥

पुनरपि पीडनां गाढालिङ्गनं विदधतौ कुर्व्वाणौ तौ, मिश्रितौ परस्परानन्तरालघटितौ ऊरू यस्यां क्रियायां तद्यथा भवति तथा, मिथः पानवशादन्योन्यमिलितावधरौ यस्यां क्रियायां तद्यथा भवति तथा,स्वप्ने वीचिताः परस्परक्रियाः अन्योन्यचुम्बनादिव्यापारा यस्यां तद्यथा तथा निदद्रतुः। चीरनीरालिङ्गनं कृत्वा निद्रितावित्यर्थः। पीडनां।एवन्तलाघुच्॥ १५३ ॥

तदिति। तत् द्वन्द्वं स्त्रीपुंसमिथुनं आनन्देन सम्भोगसुखभरेण निद्रां अयात् प्राप। किम्भूतां निद्रासम्बन्धिश्वासानां यातायातयोर्निर्गमप्रवेशयोः सम्बन्धिनोरंहसो वेगस्य छलेन व्याजेन कलिता अङ्गीकृता या रतिश्रान्तिनिश्वासधाराः सुरतश्रमसञ्जातनिश्वासपरम्परास्तासामन्योन्यमजस्रमनवरतं सुतरां यो व्यामिश्रभावः निद्रावशभैमीनासानिर्गतश्वासपरम्परास्तु निद्रावशनलनासान्तर्गतनिश्वासपरम्पराः प्रविष्टा एवं वैपरित्ये। इति मिश्रीभावार्थमिव यातायाते,तथा च जले जलप्रवेशवदन्योन्यनिश्वासपरम्पराणां यो नितरामभेदोपलम्भ' इति यावत्। तेन कथंभूतेन स्फुटं स्पष्टं कथितो मिथोऽन्योन्यस्य प्राणानां भेदव्युदासो भेदनाशः प्राणैक्यं यस्य तत्। तथा बालाया वक्षोजौ स्तनौ तत्र पत्त्राङ्कुराः पत्त्रवल्लीभूताः तत्पत्त्रवल्लीषु वर्त्तमानाः करिम-

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
यातोऽस्मिन् शिवशक्तिसिद्धिभगिनी सौभ्रात्रभव्ये महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमष्टादशः॥१५५॥

कर्यः कस्तूर्यादिरचिता हस्तिमकर्यस्ताभिर्मुद्रितं चिह्नितं नि-
द्राममयकृतगाढालिङ्गनवशात्तल्लग्नप्रतिरूपकं कृतं उर्वीन्द्रवच-
स्तद्रूपं चिह्नं तेनाख्यातो नितरां स्पष्टं कथित एकभाव एकत्वम-
भेदो यस्यैवम्भूतमुभयोर्भैमीनलयोर्हृदयं वक्षःस्थलमथ च चित्त-
पक्षे। यातेत्यादिवालेत्यादि च द्वयं क्रियाविशेषणत्वेन वा
योज्यं। आत्मैक्यं शरीरैक्यञ्च क्रमेण वर्णितमिति ज्ञेयं। उभ-
योरपि मिश्रितश्वासत्वादेकप्राणशब्दश्लेषादुत्प्रेचितं ॥ १५४ ॥

श्रीहर्षमिति। पूर्वार्द्धं पूर्ववत्। शिवस्य शक्तेश्च सिद्धिर्यत्र
शिवशक्तिसाधनं यत्र कृतं शिवशक्तिसाधननामा ग्रन्थः। शिवभ-
क्तीति पाठे शिवस्य भक्तिः सिद्धिर्यत्र शिवभक्तिप्रतिपादको ग्रन्थ-
विशेषः तस्य भगिनी एककर्तृकत्वात्तस्य विषये सौभ्रात्रेण शोभ-
नभ्रातृभावेन भव्ये प्रशस्ते तत्तुल्यसरसशब्दार्थन्यासे नलीयच-
रिते अष्टादशानां पूरणः सर्गः समाप्तः। शिवभक्तिसिद्धिरपि
मया कृतेति सूचितं। सौभ्रात्रमित्यत्र भावे युवादित्वादण्।
अष्टादशः। तस्य पूरणेडट् (पा०५।२।४८) ॥ १५५ ॥

इति श्रीवेदरकरोपनामश्रीनारायणपण्डितकृते नैषधीय-
प्रकाशे अष्टादशः सर्गः समाप्तः॥

ऊनविंश सर्गः।

श्रीलक्ष्मीन्द्रसिंहो जयत।

निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभि-
र्निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेयुषः।
श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविक-
स्फुटरसमृशाभ्यक्ता वैतालिकैर्जगिरे गिरः ॥ १ ॥

निशीति ॥ सर्गसङ्गतिः स्पष्टा। वैतालिकैर्वन्दिभिर्गिरो जगिरे, ऊचिरे। किम्भूते। निशि रात्रौ। बाल्यं वृद्धिर्वपुः पुष्टिः प्रज्ञोत्साहो बलं मदः दशकेन निवर्त्तन्ते मनः षष्ठेन्द्रियाणि चेति वचनाद्दशदशकस्य शतायुषः पुरुषस्यावमानोपलक्षकाऽवस्थाविशेषो दशमः स विद्यते येषां ते दशमिनो वृद्धास्तेषां भावो दशमिता तामालिङ्गन्त्या अवसानं प्राप्नुयाः सञ्जातप्रायप्रभातायां यामिन्यां प्रियाङ्कं भैमीसमीपमुपेयुषः प्राप्तवतस्तया सह निद्रितस्य निषधदेशवसुधायां मीनाङ्कस्य कामस्य नलस्य विबोधाय गिरः विधित्सुभिः कर्त्तुमिच्छुभिः। कीदृश्यो गिरः श्रोतृणां श्रुत्योः श्रवणयोर्मधु अमृतरूपा अतिमधुरा पदस्रक् सुप्तिङन्तपदमाला तस्या वैदग्ध्या वक्रोक्त्यादिरचनाचातुर्येण विभाविता

जय जय महाराज प्राभातिकीं सुषमामिमां
सफलयतमां दानादक्ष्णो र्दराजसपक्ष्मणोः ।

ध्वनिवृत्त्या व्यञ्जनाव्यापारेण प्रकाशिता भाविका रत्यादिस्थायिव्यभिचारिसहकारिरूपैर्भावैर्युक्ता, ज्ञापिता इति यावत्। तादृशाः स्फुटाः प्रसन्नतरत्वेन बालिशैरपि प्रतीता ये रसाः शृङ्गारादयस्तैर्भृशं नितरामभ्यक्ताः सर्व्वतः सिक्ताः एकपदमपि नीरसं यासु नास्ति अतिरसिका नलप्रबोधार्थं मागधैर्मधुरं प्रातर्वर्णनमारब्धमित्यर्थः। रत्यादयः स्थायिभावाः निर्वेदादयस्त्रयस्त्रिंशद्व्यभिचारिणः। वैतालिका बोधकरा इत्यमरः। दशमोऽवस्थाविशेषो विद्यते यस्यासौ दशमी, अत इन् इति योगरूढोऽयं शब्दः। दशमिन्या वृद्धाया भावो दशमितेति वा। विशिष्टस्तालो वितालः स शिल्पं येषां ते वैतालिकाः शिल्पमिति (पा॰ ४।४।५५) ठक्। सौखशायिका इत्यर्थः। तदुक्तं। वैतालिकास्तु कथ्यन्ते कविभिः सौखशायिकाः। राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः। जगिरे गैशब्दे कर्म्मणि तङ्। अस्मिन् सर्गे भ्रम इति यावद्धरिणी छन्दः ॥ १ ॥

जयेति॥ भो महाराज त्वं जय जय सर्व्वोत्कर्षेण वर्त्तस्व। त्वं इमां प्रत्यक्षदृश्यां प्राभातिकीं प्रातःकालसम्भवां सन्ध्यादिजनितां सुषमां परमां शोभां इत्यमीषत् अलसे तत्कालमेव निद्रात्यागादीषद्घूर्णनयुतेऽर्द्धोन्मिषितपक्ष्मणी ययोरक्ष्णोर्नेत्रयोस्तयोर्दानात् विषयीकरणाद्धेतोः सफलयतमां, अतितमां

प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा
प्रियजनमुखांभोजात्तुङ्गं यदङ्ग न मङ्गलं॥ २॥
वरुणगृहिणीमाशामासादयन्तमसुं रुची-
निचयसिचयांशांशभ्रंशक्रमेण निरंशुकं।

सफलां कुरु। त्वत्तद्दर्शनेनेयं धन्या भविष्यति तस्माच्छीघ्रमु-
द्बुध्यस्वेति भावः। विदर्भजा शय्योत्थायं शय्यायाः सकाशाच्छी-
घ्रमुत्थाय तव प्रथमं पूर्वं प्रातःकालभवं च शकुनं शुभसूचकं
प्रशस्तमस्तु तत्स्थाने भैम्येव भूयात्। उत्थितः सन् प्रथमोत्थि-
तभैमीमुखमेव प्रथमं पश्येत्यर्थः। यद्यस्मात् हे अङ्ग स्वामिन्
प्रियजनस्य मुखांभोजादन्यत् तुङ्गमुत्कृष्टं मङ्गलं शुभावहं वस्तु
नास्ति। प्रातरुत्थाय प्रथमं प्रियजनमुखदर्शनं कर्त्तव्यमिति
लौकिकी स्थितिः। त्वत्तः पूर्वं भैम्युत्तिष्ठत्विति भावः। दरा-
त्तमपञ्चालं तत्कालमुद्बुद्धस्य जातिः। पश्चाच्छयनं पूर्वमुत्था-
नमित्युक्तमकुलस्त्रीजातिश्च। जय जयेति वीप्सायां द्विरुक्तिः।
प्राभातिकीं प्रभाते भवेति, कालाट्ठञ्। सफलयतमां सफल-
शब्दात् तत् करोतीति (पा॰३।१।२६।वा॰१) णन्ता लोटि
तमपि किमेत्तिङव्ययाद्घ (पा॰५।४।११)। शय्योत्थायं अपादाने
परीप्सायामि (पा॰३।४।५२) णमुल्॥ २॥

वरुणेति॥ हे राजन् हरेरिन्द्रस्य महिषी राज्ञी असौ प्राची
हरित् दिक् इनः प्राग्भागे अङ्कःप्रारम्भभागा एव निजमुखं
सम् तिमिरत्यागे ससादसिपात्मैर्मल्यव्याजात् क्षीरं सहासं धत्ते

तुहिनमहसं पश्यन्तीव प्रसादमिपादसा
निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित् ॥ ३ ॥
अमहतितरास्तादृक् तारा न लोचनगोचरा-
स्तरणिकिरणा द्यामञ्चन्ति क्रमादपरस्पराः ।

बिभर्त्ति, उत्प्रेच्यते । कथंभूतेव । वरुणस्य गृहिणीं भार्यां प्रतीचीमाशामासादयन्तं अभिगच्छन्तमतएव रुचीनिचयस्य कान्तिसमूहरूपस्य सिचयस्य वस्त्रस्यांशा भागास्तेषामपि अंशेन लेशेन भ्रंशस्तस्य क्रमेणैकैकभागापागमक्रमेण निर्गता अंशवो यस्य निरंशुकं, अथ च विवस्त्रं अमुं तुहिनमहसं पश्यन्तीव । मय्यनुरक्तस्त्वभ्युदयभागऽभूदिदानीमेतस्यामनुरक्त इमां दशामापन्नोऽयमितीव हसतीत्यर्थः । अन्यापि नारी अनुरागातिविह्वलं गलद्वस्त्रं परस्त्रीमेवमानं विटं दृष्ट्वा मुखं स्मेरं करोति । प्राच्यामरुणोदयोऽभूत् । प्रतीच्यां स्वरुणकिरणप्रसरणवशाच्चन्द्रो निःप्रभोऽस्तं जिगमिपुरस्ति । तस्माच्छीघ्रं बुद्ध्यस्वेति । अंशेन भ्रंशः तृतीयेति (पा० २।१।३०) योगविभागात् समासः । ततः षष्ठीसमासः । इतः मत्स्यर्थेतसिः । एवम्भूतं चन्द्रं पश्यन्ती इतो ऽस्माद्धेतोरिवेति इतो दृश्यमानादस्मात् प्रसादमिपादिति वा । सम्बन्धे षष्ठ्यन्वेव ॥ ३ ॥

अमहतीति ॥ भो राजन् अमहतितराः स्वरूपेणैव सूक्ष्मतरा ध्रुवारुंधत्यादयस्तारा: इदानीं तादृक् पूर्ववल्लोचनगोचरा न भवन्ति स्वरूपेण सूक्ष्मत्वात् । पूर्वमपि चक्षुष्मतापि

कथयति परिश्रान्तिं रात्रीतमः सहयुध्वना-
मयमपि दरिद्राणप्राणस्तमोदयितस्त्विषां ॥ ४ ॥

महता यत्नेन या दृश्यन्ते ता इदानीं सर्व्वथा न दृश्यन्त एव इत्यर्थः। तादृश्यो बहुसङ्ख्याः पूर्वस्थूलाः प्रकाशमानाश्च यास्तारकाः स्वात्याद्र्रादयस्ताः सम्प्रति सुतरामन्याः सूक्ष्माश्च सत्यो नेत्रगोचरा न भवन्तीति वा। यस्मात् तरणेः सूर्य्यस्य किरणाः अपरस्पराः अहमहमिकया सततमविच्छेदेन प्रवृत्ताः सन्तः क्रमात् द्यां गगनं अश्नन्ति गाहन्ते। सूर्यकरस्पर्शवशान्निःप्रभत्वात् तारा न दृश्यन्ते इत्यर्थः। तथा दरिद्राणाः क्षीणाः प्राणाः असवो यस्यैवं भूतोऽस्तं जिगमिषुः। अयं तमोदयितो निशानाथश्चन्द्रो ऽपि रात्रितमसा सह युध्वनां सङ्ग्रामं कुर्वतीनां निजत्विषां परिश्रान्तिं सामस्त्येन ग्लानिं रणपातं च कथयति। न केवलं त्विष एव दरिद्राणप्राणाः किन्तु चन्द्रोऽपि इत्यपि शब्दार्थः। अतिशयेन महत्योमहतितराः। घरूपेति (पा० ६।३।४३) ह्रस्वः। ततो न समासः। गोचरः पुमान्। अपरे च परे च अपरस्पराः अपरस्य क्रियासातत्य इति (पा० ६। १।१४४) सुट्। द्यां सततमविच्छेदेनाश्नन्तीत्यर्थः। सह युध्वनां सहेचेति (पा० ३।२।९६) युधेः क्वनिपि वनोरचेति (पा० ४।१।७) ङीप् रेफान्तादेशश्च प्राप्तौ वनोनहश (पा० ४।१।७।वा० १) इति निषेधान्नभवतः। दरिद्राण इति दरिद्रातेरार्धधातुक इत्यादिना (पा० ६।४।११४।वा० १) प्राप्तेऽप्यालोपे, न दरि-

स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चञ्चच्चञ्चूपुटस्फुटचुम्बितः ।
अपि मधुकरी कालिंमन्या विराजति धूमल-
च्छविरिव रवेर्लाचालक्ष्मीं करैरतिपातुकैः ॥ ५ ॥

द्रायके लोपो दरिद्राणे च नेष्यत इत्यादि (पा० ६।४।११४। कारिका) निषेधान्न भवति ॥ ४ ॥

स्फुरतीति॥ भो राजन् तिमिरस्य स्तोमः समूहः लाचालक्ष्मीं अतिपातुकैः अतिक्रामद्भिः ततोऽप्यधिकं रक्ततरैः रवेः करैः कला पुरूणां बहूनां सितगरुतां श्वेतपक्षाणां हंसानां चञ्चद्भिश्चपलैः अरुणैश्च विलसद्भिर्वा चञ्चूपुटैः स्फुटं यथा तथा चुम्बितः स्पृष्टः पङ्कस्य प्रपञ्चः समूह इव उच्चकैः अतितरां स्फुरति शोभते। तिमिरस्तोमः प्रविष्टसूर्यकिरणसम्पर्कात् विसखननार्थे पङ्कमध्यप्रविष्टहंसारुणवलयचञ्चुपुटशबलपङ्कवच्छोभततरामित्यर्थः। तथा आत्मानं कालीं मन्यते कालिंमन्या अतिकृष्णा च भ्रमर्यपि अरुणतरैः सूर्यकिरणैः धूमलच्छविरिव कृष्णारुणकान्तिरिव शोभततराम्। सूर्यकराः सकलाः तिमिरं चाऽस्योभूतमिति भावः। धूमलौ कृष्णलोहिताविव्यमरः। उच्चकैरव्ययत्वादकच्। मधुकरी जातिवाचित्वाङ्ङीप्। कालिंमन्या आत्ममाने खश्चेति (पा० ३।२।८३) खश्। दिवादित्वात् श्यन्। खित्यनव्ययस्येति (पा० ६।३।६६) ह्रस्वः। अरुर्द्विषदिति (पा० ६।३।६७) मुम्। लाचालक्ष्मीं नलोकेति (पा० २।३।६९) षष्ठीनिषेधः ॥ ५ ॥

रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिशलयस्याग्रैरग्रेशयैरुदविन्दुभिः।
सुषिरकुशलेनायःसूचीशिखाङ्कुरसङ्करं
किमपि गमितान्यन्तर्मुक्ताफलान्यवमेनिरे॥ ६॥
रविरुचिरुचामोङ्कारेषु स्फुटामलविन्दुतां
गमयितुममूरुच्चीयन्ते विहायसि तारकाः।

रजनीति॥ रजन्या वमथुवत् करिणीमुखान्निर्गतजलवत् प्रालेयाम्भसो हिमजलस्य कणा लेशास्तेषां गलत्क्रमेण संभृतैः सञ्चितैः कुशकिशलयस्याग्रेशयैरग्रस्थितैः सूचीतीक्ष्णाग्रभागस्थितैरग्रैर्निर्मलतरैरुदविन्दुभिर्हिमजलकणैः कर्तृभिः मुक्ताफलान्यवमेनिरे अवगणितानि, मौक्तिकतुल्यैर्जातानीत्यर्थः। किम्भूतानि मुक्ताफलानि, सुषिरे विवरकरणे कुशलेन मणिकारेण मध्ये किमपि लोकोत्तरं स्तोकं वा अयःसूच्या लोहसूच्या वेधनशलाकायाः शिखैव सूक्ष्मत्वादङ्कुरस्तेन सङ्करं संयोगं गमितानि प्रापितान्यर्द्धविद्धानीत्यर्थः। वमथुः करिशीकर इत्यमरः। द्वितोथुच् (पा० ३।३।८९)। अग्रेशयैः अधिकरणे शेतेः (पा० ३।२।१५) इत्यजन्ते शयशब्दे शयवासेति (पा० ६।३।१८) सप्तम्या अलुक्। सूची कृदिकारान्ङीष्। सङ्करं ऋदोरप् (पा० ३।३।५७)॥ ६॥

रवीति॥ रवेः पौर्वाह्णिक्यो रुचय एव ऋचः तासां प्रातःकाले रविकिरणानामुद्गतत्वात् "ऋग्भिः पूर्वाह्णे दिवि देव ईयते

स्वरविरचना यासामुच्चैरुदात्ततयाहृताः
शिशिरमहसो बिम्बाद्स्माद्संशयमंशवः ॥ ७ ॥

यजुर्वेदे तिष्ठति मध्ये श्रङ्कः" इत्यादि श्रुतेः। ऋग्वेदवाक्यानामोङ्कारेषु प्रारम्भप्रवणेषु अथ च लक्षणया प्रारम्भेषु उदयसमयेषु स्फुटां प्रकटां अमलां स्वरोच्चारणादिदोषरहितां अनुस्वाररूपां बिन्दुतां गमयितुं प्रापयितुं अमूर्विहायसि स्थितास्तारकाः केनाप्युच्चीयन्तेऽवयवेन सन्दृश्यन्त इव। वृत्तामलत्वाद्योग्यत्वात् स्वल्पप्रणवा बिन्दुनिर्माणार्थं एता गृह्यन्त इव ततो न दृश्यन्त इत्यर्थः। प्रत्यृचमोङ्कारसद्भावात्तद्वाङ्ख्यात्तारा बिन्दूनामिति बहुत्वं। अथच ऊर्द्धं चीयन्ते नीयन्त इति यावत्। सूर्यप्रभोदय एव तारका भश्यन्तीति भावः। तथास्मिन्नयोन्मुखादस्माच्छिशिरमहसश्चन्द्रस्य बिम्बात् मकाशादंशवोऽप्यामाम्नामुच्चैर्नितरां उदूर्ध्वं आपतन्तया गृहीतनयाऽयच लक्षणया दिशालतया उपरिस्थितितया च अयचोच्चैरुदात्त इति उदात्तलक्षणयोगादुच्चैरुदात्तत्वेन योग्यत्वादुत्तमस्वरस्य विरचनाय निर्माणायाऽसंशयं निश्चितं केनापि हृता नीता इव। उदात्तस्य शिरसि उपलभ्यमानत्वर्याञ्चिकोर्द्धरेखा लिख्यते। यजुर्वेदेवरकशाखायामुपनिषदि रुच्चैरुदात्तः समाहारः स्वरित इति लक्षणं द्रष्टव्यं। चन्द्रकिरणानामस्तमसमये उपरिणामित्वात् सक्षोपरितनरेखातुल्यत्वादेवमुत्प्रेक्षितं। सूर्यप्रभोद्गमक्रमेण चन्द्रकिरणा अपि क्षीणीभूता इति भावः। हृता इति पाठे स्वीकृ-

भजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि ।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं छिनत्ति गभस्तिराट् ॥ ८ ॥

ता: । अयंश्चयं उभयत्रापि योज्यं । रुचि ऋचा । ऋत्यक इति (पा॰ ६।२।१२८) मन्नति भाव: ॥ ७ ॥

भजतीति ॥ गभस्तिराट् सूर्य: तिमिरमेव चिकुरास्तिमिरतुल्या: केशास्तेषु गृहीत्वेतियाहं रात्रिं छिनत्ति लघु शीघ्रं विनाशयति । क: कामिव । रावणिरिन्द्रजित् मायामयीं माया-निर्मितां रघुपतेर्जायां सीतामिव । कस्मिन् सति । वाक्यार्थस्य कर्मत्वात्तदीयं छिंसनरूपं कर्म दृष्ट्वा कुमुदे कैरवे मोहं संकोचं भजति सति। अथ च सीताहिंसनरूपं कर्म दृष्ट्वा कुमुदाख्ये वानरे मूर्च्छां गच्छति सति । तथा नले भवति त्वयि दृष्ट्वा सूर्योदयसमयं ज्ञात्वा दृशोरपिधायके उन्मीलितनेत्रे सति । यद्वा नले त्वयि नेत्रयोराच्छादके भवति सति । अथ च नले वानर-सेनापतौ दारुणं तदीयं कर्म दृष्ट्वा किमपि कर्त्तुमशक्यत्वाद्दु:-खवशाद्वा तारापतौ सुग्रीवे च दृशोरपिधायके हतौजसि च निस्तेजस्के चाल्पवद्रमे सति रात्रिर्गता रविरुदित: कुमुदं च निमीलितं कमलं चोन्मीलितं चन्द्रश्च नि:प्रभो जात इति भाव: । मायामय्या: सीताया वध इन्द्रजिता कृत इति रा-मायणे । मायामयीं प्राचुर्यमयटिङीप् । रावणि: अपत्यार्थे-

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुतस्रग्भागश्रीभरं ग्रहसङ्ग्रहः।
मृदुतरकराकारैस्तूलोत्करैरुदरंभरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः ॥ ९ ॥

वाक्कादित्वादित्। चिकुरयाहं मन्यमन्ते उपपदे समासन्तौ (पा० ३।४।५०) इति ग्रहेर्णमुल्। गभस्तिभीराजते गभस्तिराट्। सत्सूद्विषेति (पा० ३।२।६१) क्विप् ॥ ८ ॥

त्रिदशेति॥ ग्रहसङ्ग्रहः शुक्रादिस्थूलतारासङ्ग्रहः त्रिदशा देवास्तेषां मिथुनं तस्य क्रीडासम्बन्धिनि तल्पे मञ्चरूपे विहायसि गगने निधुवनं सुरतसंमर्दः तेन धुता विकीर्णाः स्रजः पुष्पमालाः तासां भाग एकदेशस्तस्य श्रीभरं शोभातिशयं गाहते आलम्बते, तथा विधुः अखण्डः पूर्णः वृत्तश्चन्द्रः गण्डोपधानविधां कपोलतलाधःस्थाप्यमानवृत्तशुभ्रतरोच्छीर्षकप्रकारं न परिहरति त्यजति अङ्गीकरोत्येव, तद्वच्छोभत इत्यर्थः। किंभूतो विधुः मृदुतरकराकारैः अतिमृदुरश्मिरूपैस्तूलोत्करैः कार्पासमसूहैरुदरंभरिः परिपूरितमध्यः। गण्डोपधानं मृदुतरकार्पासपूरितमध्यं वृत्तं शुभ्रं च भवति। स्थूलतरास्तारास्तल्पविकीर्यमाणकुसुमतुल्या इतस्ततो दृश्यन्ते। चन्द्रोऽपि सौरप्रकाशव्याप्तत्वेन सङ्कुचिताभिः स्वकान्तिभिः मध्यमेव पूरयन्मर्दितगण्डोपधानवद्भिःशोभोऽस्तमयोन्मुखो जात इति भावः। सङ्ग्रहः ग्रहवृदुनिश्चिगमश्च (पा० ३।३।५८) त्यप्। उत्करः

दशशतचतुर्वेदीशाखाविवर्त्तनमूर्त्तयः
सविधमधुनाऽलङ्कुर्वन्ति ध्रुवं रविरश्मयः।
वदनकुहरेष्वध्येतॄणामयं तदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥ १० ॥

ऋदोरप् (पा० ३।३।५७)। उदरंभरिः, फलेग्रहिरात्मंभरि-श्चेति (पा० ३।२।२६) चकारस्यानुक्तसमुच्चयार्थत्वादिन् मुमाग-मश्च ॥ ९ ॥

दशेति ॥ दशशतानि शाखा यासान्ता एकसहस्रसंख्याः च-तुर्णामृग्वेदादिवेदानां समाहारश्चतुर्वेदी तस्याः शाखानामा-श्वलायनतैत्तिरीयकादिसंज्ञानां तत्तद्वेदभागानां विवर्त्तनरूपा अतात्विकान्यथाभावरूपाः शाखारूपतां प्राप्ताः मूर्त्तयः स्वरू-पाणि येषां तादृशा रविरश्मयः ध्रुवं यस्मादधुना प्रातःसमये सविधमस्मदादिसमीपप्रदेशं भूषयन्ति सर्व्वेऽपि समीपप्रदेश-मागच्छन्ति तत् तस्मादयं अध्येतॄणां पठतां वदनलक्षणेषु कुह-रेषु दरीषु विषये आकर्ण्यमानवर्णानुरूपस्तेषां वेदशाखीभव-न्मूर्त्तीनां सूर्यकराणामेव श्रुतिपदमयो वेदपदरूपः प्रतिध्वनिः प्रतिशब्दोऽध्वनि गगने उदञ्चति ऊर्द्धं प्रसरति। दरीषु प्रति-शब्दा युक्ताः। अध्वनि मध्यतारध्वनिरहितं यथा तथेति वा। अध्येतारो हि प्रातर्मन्द्रध्वनिना वेदानधीयन्ते। ध्रुवमुत्प्रेक्षायां वा। सूर्योदयो जातः अध्येतारश्च वेदानधीयन्त इत्यर्थः। दश-शतेति मूर्त्तिविशेषणं। चतुर्वेदी समाहारे द्विगोर्ङीप्। पद-मयः ताद्रूप्ये मयट् ॥ १० ॥

नयति भगवानम्भोजस्यानिबन्धनबान्धवः
किमपि मघवत्प्रासादस्य प्रघाणमुपघ्नताम्।
अपसरदरिध्वान्तप्रत्यग्वियत्पथमण्डली-
लगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः॥ ११॥

नयतीति॥ अम्भोजस्य कमलकुलस्य अनिबन्धनबान्धवः अकारणमित्रं तदानन्दकारी भगवान् षड्गुणैश्वर्यसम्पन्नः सूर्यो मघवत इन्द्रस्य वैजयन्ताख्यस्य प्रासादस्य प्रघाणं अलिन्दं किमपि स्तोकं यथा तथा उपघ्नतां आश्रयतां नयति प्रापयति आश्रयति, तावत्पर्यन्तमूर्ध्वमागत इत्यर्थः। अथ च तं श्लिष्यति। पराङ्मुखशत्रोः शूरस्य परस्पराश्लेषो युक्तः। किम्भूतः, अपसरत् पुरःपलायमानमरिरूपं ध्वान्तं तस्य प्रतीचः पश्चिमायाः सम्बन्धिनि वियत्पथे गगनमार्गे मण्डल्या संघीभावेन यल्लगनं संश्लेषः प्रत्यग्दिगन्तगामित्वं, लयनमिति पाठे संघीभावेन यत् तिरोधानं सामस्त्येनादर्शनं तेन फलन् सफलो भवन् अश्रान्तो निरन्तरः स्वर्णाचलस्य मेरोः प्रदक्षिणलक्षणो भ्रमः स एव विभ्रमो विलासो यस्य। सदस्यु परिपालनाय रात्रौ भ्रमतो-यामिकस्य चोरपलायनेन यथा साफल्यं भवति तथा स्वर्णाच-लरक्षणाय सूर्यस्य भ्रमणविलाससाफल्यं युक्तमित्यर्थः। अत-एव स्वर्णाचलपदं प्रायोजि। अत्रापि पूर्वोत्तरार्द्धविपर्यासो ज्ञातव्यः। प्रघाणप्रघणालिन्दा इत्यमरः। बान्धवः प्रज्ञा-दित्वात् स्वार्थेऽण्। मघवत्प्रासादस्य प्रातिपदिकान्तत्वान्न-

नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपक्षिणा-
मिह विहरणैः श्येनम्पातां रवेरवधारयन्।
शशविशसनत्रासादाशामयाच्चरमां शशी
तदधिगमनात्तारापारावतैरुदडीयत ॥ १२ ॥

लोपः। अगारैकदेशे प्रघणः प्रघाणश्च। उपघ्न आश्रये (पा० ३।३।७९=८५) इति च प्रघाणोपघ्नशब्दौ साधू। प्रत्यक् दिक्शब्देभ्य (पा० ५।३।२७) इत्यस्तातेः अञ्चेर्लुगिति (पा० ५।३।३०) लुक्। नखिखादयश्च्छिता (पा० १।१।३७अ०) इत्यव्ययत्वं ॥ ११ ॥

नभसीति ॥ शशी निशाङ्कवर्त्तिशशाख्यपशुविशेषस्य विशसनं मारणं तस्माद्यस्त्रासो भयं तस्माच्चरमामाशां पश्चिमां दिशमयात्, ययौ। तथा तारा नक्षत्राणि तद्रूपैः पारावतैः तस्य चन्द्रपलायनवृत्तान्तस्य सूर्यमृगयारम्भवृत्तान्तस्य वा अधिगमनात् परिज्ञानात् उदडीयत पलायितं। किं विधः शशी। नभसि गगने ध्वान्तमन्धकारस्तद्रूपध्वाङ्क्षाणां काकानां प्रमापणे मारणे विषये पक्षिणां श्येनाख्यपक्षिरूपाणां महसां सूर्यतेजसां इह प्रातःभागे विहरणैः क्रीडनैः रवेः सूर्यस्य श्येनम्पातां मृगयामवधारयन् निर्धारयत्। अन्यस्मिन्नपि राज्ञि मृगयायां श्येनपातेन काकादीन् हिंसति सति शशयुक्तः पुरुषः मदीयं शशमपि मांसार्थमेतदीयाः श्येना हनिष्यन्तीति भिया पलाय्य गच्छति। पारावता अप्युड्डीय यान्ति। सूर्यकिरणा-

भृशमविभक्तास्तारा हाराच्च्युता इव मौक्तिकाः
सुरसुरतजक्रीडालूनाद्द्युसद्दियदङ्गणं।
बहुकरकृतात्प्रातःसम्मार्जनादधुना पुन-
र्निरुपधि निजावस्थालक्ष्मी विलक्षणमीक्ष्यते ॥ १३ ॥

गगने खेलन्ति चन्द्रः प्रतीचीं गतः। ताराश्च न दृश्यन्त इति भावः। इह नभसीति वा। शशेन नित्यं युक्तः शशी। त्रासादिव तदधिगमाद्विवेति च प्रतीयमानोत्प्रेक्षा। अथ शशादनः। पक्षी श्येनः इत्यमरः। श्येनम्पाता च मृगया। पारावतः कलरव इत्यमरः। पतनं पातः भावेघञ् श्येनानां पातः श्येनपातः सोऽस्यां क्रियायां वर्त्तते श्येनम्पाता मृगयेति। घञः सास्यां क्रियेतिञ (पा० ४।२।५८) इति ञः। श्येनतिलस्येतिलस्येति मुम् ॥ १२ ॥

भृशमिति॥ सुरसुरतं देवमिथुनरतं तस्माज्जाता क्रीडा विलाससम्मर्दः अथ च सुरतुल्यराजादिरतक्रीडासम्मर्द्दस्तेन लूनात्त्रुटितात् हारात् च्युता मुक्ता इव हृत्ततरास्तारा: द्युसद्दियदङ्गणं सुराणामजिरभूतं यद्गगनं निशि नितरां अपूपुरन्, तद्गगनं अधुना पुनः बहवः महस्त्रं करा यस्य स सूर्य्यस्तेन अथच रजःशोधकेन खनया कृतात् प्रातःसम्मार्जनात् प्राभातिकात् सम्यङ्मार्जनात्तिमिरनिराकरणद्वारा शोधनादथच शोधन्या रजोऽपनयनेन शोधनान्निरुपधिरुपाधिरहिता स्वाभाविकी निजावस्था सहजदशा तस्याः श्रिया कृत्वा तमीसम्बन्धि-

प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशवलीकृतैः।
अथ रविरुचा ग्रासातिथ्यं नभः खविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः॥ १४॥

शोभात्यागादथच रजःपुष्पमालामुक्ताद्युपाधित्याजनात् सद्यजश्रिया विलक्षणमन्यादृशमीक्ष्यते विलोक्यते। सूर्य्यकरैर्गगनं भूषितं ताराश्च सर्व्वथा न दृश्यन्त इत्यर्थः। दृश्यदिति पाठे हस्ताभिनयादतिमहदित्यर्थः। खलपूः स्याद्बहुकर इत्यमरः। अबिभरुः। भिजभ्यस्तेति (पा० ३।४।१०९) झेर्जुस्। दिवि सीदन्तीति द्युसदः सत्सूद्विषेति (पा० ३।२।६१) क्विप्। हृद्युभ्यांङेरुपसङ्ख्यानं (पा० ६।३।९।वा० १) इत्यलुक् प्राप्तावपि तत्पुरुषेकृतिबहुलमिति (पा० ६।३।१४) बाहुलकाड्डेर्लुक्। दिव उत (पा० ६।१।१३०) सात्पदाद्योरिति (पा० ८।३।१११) षत्वनिषेधः। बहुकरः खलपूपक्षे दिवा विभेति (पा० ३।२।२१) टः। उपधिः उपसर्गे घोः किः (पा० ३।३।९२)॥ १३॥

प्रथममिति। नभः कर्तृ रविरुचां तिमिरपरिषत् तमःसमूहस्तद्रूपा दूर्व्वापर्व्वावल्यो दूर्व्वाग्रन्थिपरम्परास्ताभिः शवलीकृतैः कर्ब्बुरीकृतैर्मिश्रितैस्तारैर्नक्षत्ररूपैरव्यक्तैश्चाखण्डिततण्डुलैः अभग्ननिस्तुषशालिबीजैः कृत्वा अर्घं पूजां प्रथमं उपहृत्य दत्वा अथानन्तरमेव खविहारिभिः खस्मिन् वर्त्तमानैः समन्तात्कैश्च शिशिरस्य हिमस्य क्षोदाश्चूर्णबिन्दवस्तेषां श्रेणीमयैः परम्परा-

असुरहितमप्यादित्योत्थां विपत्तिमुपागतं
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः।
पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं
यदि न वहते सन्ध्यामौनव्रतव्ययभीरुताम् ॥ १५ ॥

रूपैः उदमकुभिः जलमिश्रयवचूर्णैः ग्रामातिथ्यं भोज्यान्नदानलक्षणमतिथिपूजनं सृजति करोति। अन्योऽपि तण्डुलदूर्वादलयुतेन जलेन पूर्व्वमर्घं दत्वा सक्त्वादिना स्वगृहप्राप्तायातिथये भोज्यं ददाति। सूर्यदीप्तयः पूर्व्वं तारास्तिमिरञ्च हिमजलकणानप्यपनयन्ति स्मेति भावः। मूल्ये पूजाविधावर्घः। मुक्ताशुद्धौ च तारः स्यादित्यमरः। अत्र तारशब्दः पुंलिङ्गः। तारयति सांयात्रिकानिति व्युत्पत्तितः पचाद्यच्। रविरुचां सम्बन्धसामान्यविवक्षया षष्ठी। उदकयुक्ताः सक्तवः मध्यमपदलोपी। उदकानि च सक्तवश्चेति वा समासः मन्थौदनेति (पा० ६।३।६०) उदादेशः॥ १४॥

असुरेति। दितिसुता दैत्यास्तेषां गुरुः शुक्रः आदित्येभ्यो देवेभ्यो हेतुभ्यः उत्थां जातां अथ च सूर्यात् सञ्जातां विपत्तिं मरणं नाशञ्च कचवद्वृहस्पतिपुत्रवत् उपागतं प्राप्तं। असुरेभ्यो हितमपि तेषां रात्रिञ्चरत्वादनुकूलमपि तमः प्राणैर्योक्तुं संयोजयितुं कण्ठे लुठतीं जाग्रद्रूपां मृतानां जीवनीमित्यनुगतार्थां विद्यां किं न पठति। अपि तु स्पष्टं पठेदेव। परं चेदयं शुक्राचार्य्यः प्रातःकालीनसन्ध्यायां मौनव्रतं मौनलक्षणे निय-

उदयशिखरिप्रस्थान्यह्ना रणेऽत्र निशः क्षणे
दधति विहरत्पूषाण्युष्मद्रुताश्मजतुस्रवान्।

मस्तस्य व्ययोभङ्गस्तस्माद्भीरुतां भयशीलत्वं यदि न वहते न धारयेत्तर्हीति सम्बन्धः। मौनवशान्मृतजीवनीजपाभावात् कचमिव तमो न जीवयतीत्यर्थः। कचस्य जीवनादि भारतादिभ्योऽवगन्तव्यं। तमः सूर्येणात्यन्तं नाशितमिति भावः। असुरद्वितं चतुर्थी तदर्थेति (पा० २।१।३६) समासः। कचवत् तेन तुल्यमिति (पा० ५।१।११५) वतिः। पठति वहते कालसामान्ये लट्। लुठतीं वैकल्पिकत्वान्नुमभावः ॥ १५ ॥

उदयेति। अह्ना दिनेन सह निशः रात्रेः रणे सङ्ग्रामरूपेऽत्रास्मिन् क्षणे प्रातःकाल इत्यर्थः। तत्र उदयशिखरी उदयाचलस्तस्य प्रस्थानि शिखराणि कर्तृणि उष्मभिः प्रातःकालीनातपसन्तापैः द्रुतानां विलीनानां अश्मजतूनां शिलाजतूनां स्रवान् प्रवाहान् दधति। यद्वा क्षणे उत्सवतुल्ये रात्रिविनाशकारित्वात् सङ्ग्राम इव, सङ्ग्रामे विहरंस्तयोर्युद्धकौतुकदर्शनेन परिक्रीडमानः पूषा सूर्यः ग्रहराजो यत्रैवम्भूतान्युदयाचलसानूनि बालातपसन्तापविलीनशिलाजतुस्रवत्प्रवाहानेव कियत्कालविलम्बधूसरीभूतरुधिरप्रवाहान् धारयन्ति। रणभूमिषु हि कालविलम्बेन धूसरा रुधिरप्रवाहा भवन्ति। अत एवोदयम् उदयं प्राप्नुवन् अरुणो अग्रजस्तत्सन्निधिनि प्रह्वीभावे नमस्कारे विषये च आदरो भक्तिरयस्तस्माद्धेतोः अर-

उदयदरुणप्रह्वीभावादरादरुणानुजे
मिलति किमु तत्सङ्गाच्छङ्क्या नवेष्टकवेष्टना ॥ १६ ॥
रविरथहयानश्वस्यन्ति ध्रुवं वडवा वल-
प्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान्।

णानुजे गरुडे मिलति सङ्गमं प्राप्नुवति सति तयोररुणगरुडयोः सङ्गान्मेलनाद्धेतोः रक्तप्रदीप्ता नवास्तत्कालमायाकादाकृष्टा इष्टका यत्र तादृशी नूतनेष्टकानिर्मिता वेष्टना। नवा इष्टका यत्र शिल्पे तन्नवेष्टकं तेन वेष्टना प्राकार इति वा। किमु न शङ्क्या न तर्क्या अपि तु सैव तर्क्येत्यर्थः। परिचारभूते दिनप्रकाशे युद्ध्यमाने तद्दर्शिनो लीलाविहारिणो यद्राजस्य स्वामिनो महाराजोचितगैरिकसुवर्णभूपितप्राकारोर्ध्वस्थितिः उचिता सम्भाव्यते। अथच दिनरात्र्योः सेनानीभूतयोः सङ्ग्रामे उदयाचलसानूनि तद्भटतुल्यानि रुधिरं धारयन्ति। भटाः प्रहारवशात् रक्तसिक्ता भवन्ति। तत्र च दिनपक्षीयप्रस्थानां जयित्वात् सुवर्णमयगरुडसम्पर्कादा इष्टकस्य वेष्टना सुवर्णपट्टिकाया धारणा न तर्क्या किं, अपि तु जयिनां तया भवितव्यमेवेति, गरुडस्तेषां सुवर्णमयविरुदपट्टिकास्थाने जात इत्युचितमित्यर्थः। नवेष्टकवेष्टनेति स्त्रियाः पुंवदिति (पा० ६।३।३४) पुंवत्। वेष्टकः। कर्त्तरि ण्वुल् ॥ १६ ॥

रवीति। भो राजन् सम्प्रति प्रातःकाले बलस्य प्रतिबलः शत्रुः प्राचीवर्त्तीन्द्रस्तस्य बलं सैन्यं तत्रावस्थायिन्यो मध्यवर्त्तिन्यो

निजपरिवृढं गाढप्रेमा रथाङ्गविहङ्गमी
स्मरशरपराधीनस्वान्ता वृषस्यति सम्प्रति ॥ १७ ॥

वडवास्तुरग्यो गाढप्रेमाः सूर्य्याश्वेषु दृढानुरागाः सत्यः रविरथहयान् समीपगान् समीक्ष्य मैथुनार्थं आत्मनोऽश्वानिच्छन्ति अश्वमुत्प्रेचार्यां निश्चितं वा इच्छन्तीत्यर्थः। यतः स्मरशरपराधीनं स्वान्तं चित्तं यासां ताः। तथा रथाङ्गविहङ्गमी चक्रवाक्यपि निजं स्वीयं परिवृढं चैक्रवाकं इदानीं प्रातः समीपमागमनं दृष्ट्वा कामवाणवशचित्ता अतएव रात्रिवियोगेन दृढानुरागा सती मैथुनवाञ्छया वृषस्यति आत्मनो वृषमिच्छति। वृषवद्बलवन्तं तं मैथुनार्थं कामयतीत्यर्थः। सूर्य्याश्वाः पूर्व्वस्यां आगताश्चक्रवाकयोश्च सङ्गमो जात इति भावः। अश्वस्यन्ति वृषस्यति आत्मनोऽश्वानिच्छन्ति वृषमिच्छतीति च सुप आत्मन (पा० ३।१।८) इति क्यचि अश्ववृषयोर्मैथुनेच्छायामिति (पा० ७।१।५१।वा० १) मैथुनेच्छायामसुगागमः। व्युत्पत्तिमात्रश्चैतत्। रूढ्या तु मैथुनार्थमिच्छन्तीत्येवार्थः। वृषस्यन्ती तु कामुकीत्यमरः। तथा कति रामो वृषस्यन्तीमिति च कालिदासः। प्रभौ परिवृढ (पा० ७।२।२१) इति निपातः। गाढप्रेमेति डाबुभ्यामिति (पा० ४।१।१३) पक्षद्वयेऽपि डाप्। स्रो वैकल्पिकत्वादेव सन्नन्तः। विहङ्गमी जातित्वात् ङीप्। रथाङ्गं चासौ विहङ्गमी चेति समासः ॥ १७ ॥

निशि निरशनाः क्षीरस्यन्तः क्षुधाऽश्वकिशोरका
मधुरमधुरं ह्रेषन्त्येते विलोलितवालधि ।
तुरगसमजः स्थानोत्थायं क्षणन्मणिमन्थभू-
धरभवशिलालेह्यायेहाचणो लवणस्यति ॥ १८ ॥

निशीति। भो राजन् निशि रात्रौ निरशना निराहारा अतएव क्षुधा क्षीरस्यन्तः आत्मनोऽर्थं क्षीरं दुग्धमिच्छन्तः एते अश्वकिशोरकाः अतिप्रसिद्धा अश्ववालकाः मधुरमधुरं अतिकलशब्दं यथा तथा विलोलिताः पुनः पुनश्चालिताः वालधयः पुच्छानि यस्यां क्रियायां तद्यथा तथा ह्रेषन्ति। ह्रेषारवं कुर्वन्ति। तथा तव मन्दुरायां स्थितस्तुरगाणां समजः समूहः स्थानोत्थायं शय्यास्थानाच्छीघ्रमुत्थाय क्षणन् ह्रेषमाणः सन् मणिमन्थनामके भूधरे भवानां जातानां शिलानां सैन्धवशिलानां लेहायास्वादनाय ईहया इच्छया पुनः पुनर्मुखादिचालनचेष्टया वा चणः ख्यातः सन् लवणस्यति। आत्मनो लोलुपत्वेन लवणमिच्छति। अश्वकिशोरकाः प्रातः क्षीरपानार्थं ह्रेषन्ते। अश्वास्तु प्रातः सैन्धवास्वादनाय ह्रेषन्त इति जातिः।सूर्योदयो जात इत्यर्थः। क्षीरस्यन्तो लवणस्यतीत्यत्र चात्मेच्छायां क्यचि अश्वक्षीरेत्यादिना क्षीरलवणयोर्लालसायामिति (पा०७।१।५१।वा०२)वचनात् लालसायामसुक्। किशोरकाः अल्प इति (पा०५।३।८५) कः। ह्रेषन्ति ह्रेषङ्ध्वने। समजः पशुविषयत्वात् समुदोरज (पा०३।३।६९) इत्यप्। स्थानोत्थायं अपादाने परीप्सायामिति (पा०३।४।५२) णमुल्। लेहः भावेघञ् ॥ १८ ॥

उडुपरिषदः किं नार्हत्त्वं निशः किमु नौचिती
पतिरिह न यत्ताभ्यां दृष्टो गणेयरुचीगणः ।
स्फुटमुडुपतेराश्मं वचः स्फुरन्मलिनाश्मन
छवि यदनयोर्विच्छेदेपि द्रुतं वत न द्रुतं ॥ १८ ॥

उडिति । हे राजन् उडुपरिषदः नक्षत्रपरम्परायाः अर्हत्त्वं किं न अपि तु औचित्यमेवैतत् तथा निशो रात्रेः औचिती न किमु अपि त्वौचित्यमेव यद्यस्मात्ताभ्यां तारापङ्क्तिविभावरीभ्यां गणेयोल्पो रुचीगणो दीप्तिसमूहः क्षीणतेजाः पतिः प्राणेश्वरश्चन्द्रः इहास्मिन् समये न दृष्टः । तस्मात्तयोरौचित्यमेवेत्यर्थः । धन्यास्ता या न पश्यन्ति पतिभङ्गं कुलक्षयमिति वचनात् पतिविपदसदृष्ट्वैव द्वयोरपि ध्वस्तत्वादौचित्येव जातेत्यर्थः । स्फुरन्ती प्रकाशमाना कलङ्कव्याजेन मलिना कृष्णा आश्मनी पाषाणसम्बन्धिनी छविः कान्तिर्यस्यैवम्भूतं उडुपतेर्वक्षोमध्यं अथ च हृदयं स्फुटं निश्चितं आश्मं पाषाणविकाररूपं पाषाणघटितमिवातिकठिनं मलिनं चेत्यर्थः । यद्यस्मादनयोस्ताराराज्योर्विच्छेदे वियोगे ऽथच विनाशे सत्यपि द्रुतं शीघ्रं द्रुतं स्फुटितं पाषाणनिर्मितमेवेत्यर्थः । वत खेदे । यत् । वचोविशेषणं वा । स्वस्यापि विलये निकटे सत्यपि तत्पतिना चन्द्रेण स्वप्रेयस्याः प्रेम न दर्शितमिति तस्यानौचितीत्यर्थः । तारापरम्परा रात्रिश्च विनष्टा । चन्द्रोपि क्षीणतेजा आसन्ननाशो जात इत्यर्थः । आर्हन्तीमि पाठे अर्हः प्रशंसायामिति (पा० ३।२।१३३) शतरि अर्हतो

अरुणकिरणे वह्नौ लाजानुडूनि जुहोति या
परिणयति तां सन्ध्यामेतामवैमि मणिर्द्दिवः।
इयमिव स एवाग्निभ्रान्तिं करोति पुरा यतः
करमपि न कस्तस्यैवोत्कः सकौतुकमीचितुं ॥ २०॥

भाव इत्यर्थे ब्राह्मणादित्वात् (पा०५।१।१२४) ष्यञिपित्वान् ङीप्। अर्हतो नुम् चेति (पा०५।१।१२४।वा०२) नुम्। आग्नं विकारेऽपि *अग्नेो विकारे टिलोपः (पा०६।४।१४४।वा०१)* इति टिलोपः। आग्नेनेति सम्बन्धेऽपि विकाराभावाट्टिलोपाभावे, आग्नेनी चासौ छविश्चेति समासे पुंवत् कर्मधारयेति (पा०६।३।४२) पुंवत्॥ १९ ॥

अरुणेति। भो राजन् या सन्ध्या अरुणस्य किरणरूपे वह्नौ उडूनि नक्षत्राण्येव लाजान् जुहोति। दिवो मणिः सूर्य्यस्तामेतां प्रातःसन्ध्यां परिणयति प्रापयति विवाहयतीति अहं अवैमि मन्ये। यतः इयमिव सन्ध्या यथा रक्तवर्णत्वादग्निभ्रान्तिं वह्निविपर्य्ययज्ञानं पुरा करोति अकरोत्। यद्वा यथेयं करोति तथा स एव सूर्य्योऽपि रक्ततरत्वात् उष्णतरत्वाच्च वह्निबुद्धिं पुरा करोति उदितमात्र एव करिष्यति। अथचेयं सन्ध्या पुरा प्रथमं वह्निप्रदक्षिणं परिभ्रमणं यथा करोति तथैवास्या अनन्तरमेव सूर्य्योऽपि वह्निप्रदक्षिणं परिभ्रमणमिदानीमेव करिष्यति। एवकारोऽप्यर्थः। यतश्च सकौतुकं यथा तथा तस्य सूर्य्यस्येव करं किरणमपीक्षितुं कः पुरुषो न उत्कः नोत्सिसुकः, अपि तु

रतिरतिपतिद्वैतश्रीकौ धुरं विभ्रमस्तरां
प्रियवचसि यन्नग्नाचार्या वदामतमां ततः।

मन्देहराक्षसनिराकरणद्वारा अस्य किरणमौचितं सर्व्वोऽप्यर्घदानं करोतीत्यर्थः। अथ च सकौतुकं माङ्गलिकसूत्रकङ्कणेन सह तस्य विवोढुः सूर्य्यस्येव हस्तमपि वीचितुं कः पुरुषो नोन्मनाः अपि तु सकङ्कणं वरकरं सर्व्वोऽपि द्रष्टुमुत्कण्ठित एव। या च वधूः परिणीयते सा प्रदीप्ते वह्नौ लाजान् जुहोति, सा च वह्नि पूर्व्वं प्रदक्षिणीकरोति। वरोऽपि तया सह पश्चात्प्रदक्षिणीकरोतीति सन्ध्यासूर्य्ययोर्वधूवरत्वमुक्तं। अरुणोदयो जातस्तत्रभया च तारा न दृश्यन्ते, अधुना रविरुदेतीति भावः। कौतुकं कुतुके ख्यातं हस्तसूत्रेऽपि कथ्यत इति विश्वः। किरण इति पक्षे जातावेकवचनं, परिणयति णोपदेशत्वाणत्वं। द्रयमिव पुरा करोतीति पक्षे पुरिलुङ्चेति (पा० ३।२।१२२) भूते लट्। पक्षान्तरे तु यावत्पुरेति (पा० ३।३।४) भविष्यति लट्॥ २०॥

रतीति। रतिरतिपत्योः रतिकामयोः द्वितैव द्वैतं रतिद्वैतं कामद्वैतमिति यावत्। तस्येव श्रीः शोभा ययोस्तत्सम्बोधनं हे भैमिनलौ नग्नानां वन्दिनामाचार्य्या वैतालिका वयं प्रिये मनोऽनुकूले वचसि यस्मात्धुरं भारं विभ्रमस्तरां चाटुवचनेषु वयमेव प्रगल्भतराः, ततस्तस्मात् वदामतमां अतितमां ब्रुवाम। सूर्य्योदयो जातस्तस्मात् क्रीडां त्यक्त्वा शीघ्रं शय्यातः उत्तिष्ठतं इति प्रातःकाले धार्म्मिक ब्रूम इत्यर्थः। यद्यूयं प्रियवचनचतुरा-

अपि विरचितो विघ्नः पुण्यद्रुहः खलु नर्मणः
परुषमरुषे नैकस्मै वामुदेतु मुदेऽपि तत् ॥ २१ ॥

स्त्रर्व्येवं परुषं किमिति वदथेत्याशङ्क्याह। तदस्मदुक्तं परुषं वच-
एव पुण्यद्रुहः प्रातःकालीनस्नानसन्ध्यादिधर्म्मविरोधिनः नर्म्मणः
प्रातःकालीनालिङ्गनचुम्बनादिविलासस्य पुनः प्रबोधपूर्व्वमुत्था-
पनादिरचितोऽपि विघ्न वां युवयोरेकस्मै अरुषे क्रोधाभावाय
उदेत्विति न किन्तु खलु निश्चितं मुदेऽपि हर्षायापि उदेतु।
यद्यप्येतदुक्तं तथापि रोषो न कार्य्यः परुषस्यापि पुण्यहेतुत्वात्,
हर्षोऽपि यस्माद्भविष्यति। तथा च हितवादित्व अवयवतात्पर्य्यात्
प्रियवचनचातुर्य्यमप्याहतमेवेत्यर्थः। क्रीडां विहाय शीघ्रमु-
त्तिष्ठतमिति भावः। स्तीत्यादिविशेषणेन नर्म्मोचिती सूचिता।
वां युवयोर्म्मध्ये अरुषे रोषहीनायै एकस्यै भैम्यै मुदे नोदेतु भैम्याः
सम्भोगप्रियत्वान्नर्म्मविघ्ने यद्यपि सन्तोषो न भवेत्तथापि तव
प्रियपुण्यत्वादेवास्माभिरुच्यत इत्यर्थ इति वा। भैम्याःकोपा-
भावायापि नोदेतु मुदेऽपि नोदेतु, भैम्यारोषो वास्तु तोषोऽपि
माभूत्तथापि समयोचितमुच्यत एवेति वा। तत्तस्मादवसरो-
चितभाषित्वात् पुण्यद्रुहो नर्मणः परुषं यथा तथा विरचितो
विघ्नोऽपि निश्चितमकोपाय केवलं उदेतु इति न किन्तु मुदे-
ऽप्युदेतु। सदाखोपजीविना अभिहितेऽपि परुषे रोषो न भवति
किन्तु हर्ष एव भवतीत्यर्थ इति वा। किञ्च प्रियवचःप्रवीणा-
अपि वयं यतो नम्राचार्य्या जितलज्जा अतः स्वच्छन्दं वदाम

भव लघु युताकान्तः सन्ध्यामुपास्स्व तपोमय
त्वरयति कथं सन्ध्येयं त्वां न नाम निशानुजा।
द्युतिपतिरथावश्यङ्कारी दिनोदयमासिता
हरिपतिहरित्पूर्णभ्रूणायितः कियतः क्षणान्॥ २२॥

इति भावः। नष्टो वन्दिक्षपणयोरिति विश्वः। वदामतमां प्रेषातिसर्गेति (पा०३।३।१६३) प्राप्तकाले लोट्। तिङश्चेति (पा०५।३।५६) अतिशये तमप्। पुण्यद्रुहः सत्सूद्विषेति (पा०३।२।६१) क्विप्। उदेतीति पाठे वर्त्तमानसामीप्य इति (पा०३।३।१३१) भविष्यति लट्। एकस्मै तादर्थ्यमात्रविवक्षया चतुर्थी॥ २१॥

भवेति। हे राजन् त्वं तस्मात् लघु शीघ्रं युता पृथग्भूता कान्ता यस्मादेवम्भूतो भव। इदानीं भैम्या सह क्रीडां त्यज। ततः सन्ध्यां नित्यकृत्योपासनामुपास्स्व कुरु। हे तपोमय नित्यकर्माद्यनुष्ठानरूपेण धर्मेणामलोज्ज्वलनिर्दोष निशानुजा रात्र्यनन्तरजाता प्राभातिकी इयं सन्ध्या त्वां कथं नाम न त्वरयति अपि तु त्वरयत्येव। अथ मुहूर्त्तानन्तरक्षणे द्युतिपतिः सूर्यः दिनोदयं दिवसप्रारम्भमवश्यं कारी अवश्यं करिष्यति उदेष्यतीत्यर्थः। यतो हरिरिन्द्रः पतिर्यस्यास्तस्या हरितो दिशः प्राच्याः पूर्णभ्रूणायितः दशमासगर्भ इवाचरितो रक्ततरः कियतश्चित्कतिपयानेव क्षणान् आसिता स्थाता। प्रातःसन्ध्यामुपास्स्वेत्यर्थः। युतेति युमिश्रणामिश्रणयोरिति अस्मादमिश्रणे क्तः त्यक्तादिपदस्यागेन अमङ्गलप्रतीतिपरिहारार्थं युतेति श्लिष्टपदं

330

मुषितमनसश्चित्रं भैमि त्वयाद्य कलागृहै-
र्निषधवसुधानाथस्यापि श्लथश्लथता विधौ ।
अजगणदयं सन्ध्यां वन्ध्यां विधाय न दूषणं
नमसितुमना यन्नाम स्यान्न संप्रति पूषणं ॥ २३ ॥

प्रायोजि। सन्ध्यापदेन कर्मानुष्ठानपर्य्यन्तमेव कान्तारहितो भव तदनन्तरं पुनरपि युता संयुक्ता कान्ता येनेति मिश्रणमपि विवक्षितं एतदर्थमेतत्प्रायोजि वा। कान्तशब्दस्य प्रियादित्वाद्युतेत्यस्य न पुंवत्। त्वरयति हेतुमण्णिच्। कारीति भविष्यत्यावश्यके णिनिः। तद्योगे अकेनोरिति (पा०२।३।७०) निषेधात् दिनोदयमिति षष्ठ्यभावः। आमिता लुट्। भूणायितः आचारक्यङन्तात् क्तः। क्षणान् कालवाचित्वाद्द्वितीया ॥ २२ ॥

मुषितेति। हे भैमि चतुःषष्टिकलानां गृहैर्निवासभूतया त्वया अद्य मुषितं चोरितं मनो यस्यापहृतचित्तस्य त्याजितस्वभावस्य वा निषधवसुधानाथस्य नलस्यापि विधौ श्रुतिविहितसन्ध्यादिनित्यकर्मणि विषये श्लथश्लथता श्लथप्रकारता आलस्यातिशयोऽनादरातिशयो वा वर्त्तत इति चित्रं। परमधार्म्मिकोऽप्यनेककलाभिज्ञया त्वया स्ववशीकारेण धर्मविमुखः कृत इत्याश्चर्यं अनुचितमेतदित्यर्थः। अथ च कलानिधिभूतया त्वया मुषितमनस्कत्वात्कलानिधौ विधावपि अनादर इति चित्रं। कथं शैथिल्यमित्यत आह। यद्यस्मात्परमधार्म्मिकोऽप्ययं सन्ध्यां वन्ध्यां सन्ध्योपलक्षितप्रातःकृत्यरहितां विधाय कृत्वा विहिताकरण-

330

न विदुषितरा काचित्त्वत्तस्ततो नियतक्रिया-
पतनदुरिते हेतुर्भर्त्तुर्मनस्विनि मा स्म भूः।
अनिशभवदत्यागादेनं जनः खलु कामुकी-
सुभगमभिधास्यत्युद्दामापराङ्कवदावदः ॥ २४ ॥

जन्यं दूषणं नाजगणत्। यच्च सम्प्रति पूषणं सूर्य्यं नमसितुमगा-
नाम नमस्कर्त्तुकामोऽपि न स्याद्भवति। नामार्थे। परित्यक्तनि-
त्यकर्मा सूर्य्यस्य नमस्कारमपि न करोतीत्युपालम्भः। अन्योऽपि
कामी कस्याश्चिदासक्तो निजधर्मपत्नीमसंभुञ्जानो वन्ध्यां वि-
धत्ते दोषञ्च न गणयति सम्भोगविघ्नभूतत्वाद्दिनकरमपि नाद्रि-
यते। तथा अयमपि। सन्ध्यादिनित्यकर्मानुष्ठानार्थं चणमपि
न मुमोचेति भावः। गृहशब्दस्य पुंस्त्वाद्बहुवचनान्तत्वेऽपि त्वये-
त्यनेन सामानाधिकरण्यं युक्तं। स्यात् सम्भावने लिङ् ॥ २३ ॥

नेति॥ भो मनस्विन्यतिधैर्य्ययुक्ते सावधाने वा त्वत्तस्का-
शाद्विदुषितरा नितरां पण्डिता सर्व्वलोकशास्त्ररहस्यविदुषी
काचन्या यद्यस्मान्नास्ति ततस्तस्माद्भर्त्तुर्नलस्य नियतक्रियापत-
नान्नित्यसन्ध्यादिकर्मलोपाद्यद्दुरितं तत्र त्वं हेतुः मा स्म भूः
सन्ध्याद्यनुष्ठानार्थं शीघ्रमेनं मुञ्चेत्यर्थः। किञ्च खलु यस्मात्
उद्दामो निरङ्कुशोऽतएव पराङ्कवदावदः अन्यदीयकलङ्कभा-
षणशीलो जनः अनिशं भवत्या अत्यागात् भवत्या कर्तृभूतया वा
ऽमोचनात् हेतोरेनं नलं कामुक्यामतितरां मैथुनेच्छावत्यां
सुभगं तत्परवशं कामुकी पूर्व्वोक्ता सुभगा सौभाग्यवती भवा-

रह सहचरीमेतां राजन्नपि स्त्रितमां क्षणं
तरणिकिरणैः स्तोकोन्मुक्तैः समालभते नभः।
उदधिनिरयद्भास्वत्स्वर्णोदकुम्भदिदृक्षुतां
दधति नलिनं प्रस्थायिन्यः श्रियः कुमुदान्मुदा॥ २५॥

दृशौ स्त्री यस्य एवम्भूतं वाऽभिधास्यति वदिष्यति। स्त्रीपरवशत्वादयं नित्यकर्मापि त्यजतीति निन्दां करिष्यति तस्माद्विहिताकरणप्रत्यवायलोकगर्हादिपरिहारार्थं एनां मुञ्चेति भावः। विदुषितरा उगित्वात् ङीपि तरपि उगितश्चेति (पा० ६।३।४५) पक्षे ह्रस्वः। भवदत्यागात् सर्वनामत्वात् पुंवत्। पूर्वेण सह मयूरव्यंसकादित्वात् समासः। सुभगाशब्दस्य प्रियादित्वात् पूर्वस्य न पुंवत्। वदतीति वदावदः पचाद्यच्। चरिचलीत्यादिना (पा० ६।१।१२।वा० ७) द्वित्वमभ्यासस्यागागमश्च॥ २४॥

रहेति॥ हे राजन् त्वं सहचरीं सदा सहचरणशीलां तथा स्त्रितमां स्त्रीषु श्रेष्ठां एवम्भूतामप्येनां क्षणमात्रं रह मुञ्च। यतः नभः स्तोकोन्मुक्तैः अल्पनिर्गतैर्बालैस्तरणेः सूर्यस्य किरणैः करणैः समालभते आत्मानः कुङ्कुमानुलेपनं करोति। तथा सङ्कुचतः कुमुदात् सकाशाद्विकाशोन्मुखं नलिनं कमलवनं प्रति मुदा प्रस्थायिन्यः प्रस्थास्यन्ते तच्छीलाः श्रियः उदधेः सकाशान्निरयन्निर्गच्छन् भास्वान् सूर्य एवोदकुम्भो जलपूर्णः जलघटस्तं दिदृक्षुतां दर्शनेच्छुतां दधति धारयन्ति। कुमुदान्निर्गताः सत्यः कमलवनं प्रतिगन्तुं सूर्योदयं प्रतीक्षन्त इत्यर्थः। जिग-

प्रथमककुभः पान्थत्वेन स्फुटैचितवृत्तया
ऽप्यनुपदमिह द्रक्ष्यन्ति त्वां महांसि महःपतेः।
पटिमवहनादूहापोहक्षमाणि वितन्वता
महह युवयोस्तावल्लक्ष्मीविवेचनचातुरीं ॥ २६ ॥

मिषवो हि जलपूर्णं कुम्भं विप्रतीच्छन्ते। प्रभातं जातमित्यर्थः। तस्मान्नित्यकर्म्मानुष्ठानार्थमत्यजनीयामप्येनां क्षणमात्रं मुञ्चेति भावः। रह रहत्यागे, त्यजतमां पूर्ववत्। स्तोकान्मुक्तैः स्तोकान्तिकेति (पा० २।१।३९) पञ्चमी समासः पञ्चम्याः स्तोकादिभ्य (पा० ६।३।२) इत्यलुक्। कुम्भान्निर्गता इत्यस्माकता उदकुम्भः एकहलादौ पूरयितव्य (पा० ६।३।५९) इत्युदकस्योदादेशः। दिदृक्षुरित्यप्रत्ययां तत्वान्नलोकेति (पा० २।३।६९) षष्ठीनिषेधाद्द्वितीयेतियोगविभागात् समासः ॥ २५ ॥

प्रथमेति॥ हे राजन् महःपतेः सूर्यस्य महांसि तेजांसि प्रथमककुभः प्राच्याः पान्थत्वेन पथिकतया तेनैव मार्गेणागमनवशात् स्फुटं सविशेषमौचितौ वृत्तम् यैस्तादृशानि सन्ति, अनुपदमनन्तरं सविधमागत्य इह प्रासादे वर्त्तमानं त्वां द्रक्ष्यन्ति विलोकयिष्यन्ति। अनन्तरं पटिम्नोऽतितैक्ष्ण्यस्याथ च प्रज्ञातिशयस्य वहनाद्धारणात् अमतः प्रकाशादेः प्रकटीकरणं ऊहः सतश्च तिमिरादेरपोहो निराकरणं तयोः क्षमाणि समर्थानि अनुकम्प्याप्यर्थस्य प्रज्ञावशादूहनमूह ऊहा वा उक्तस्यापि दोषोद्भावनादर्थसमपोहस्तच समर्थानि सामान्यविशेष-

अनतिशिथिले पुम्भावेन प्रगल्भबलाः खलु
प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः।

भावादिनिर्णयनिपुणानि तानि रवितेजांसि युवयोरिन्द्रनलयोस्तावतीनामनेकप्रकाराणां शोभासम्पद्रूपाणां लक्ष्मीनां विवेचनचातुरीं तारतम्यविचारकौशलं वितन्वतां विस्तारयन्तु अहह चित्रं। अन्यत्रैवंविधस्य चातुर्यस्यादर्शनादाश्चर्यं। इन्द्रातिशयितशोभासम्पत्तिमान्नलो वेति संशये प्रथमदर्शनादिन्द्रे शोभासम्पत्तिमत्त्वसामान्यबुद्धिः। अनन्तरं च नलदर्शनान्नले शोभासम्पत्तिमत्त्वविशेषबुद्धिरिति सामान्यापेक्षया विशेषस्य बलवत्त्वात्, उभयदर्शिभिः सूर्यकिरणैरिन्द्रापेक्षया शोभासम्पत्तिभ्यां नल एवाधिक इति निर्णीयतामिति भावः। अन्योऽपि प्राज्ञः ऊहापोहक्षमः सामान्यविशेषभावादिचातुरीं तनोति। अन्वगन्वक्षमनुगेनुपदं क्लीबमव्ययमित्यमरः। पटिमा पृथ्वादिः। ऊहा स्त्रीत्वविवचायां गुरोश्चहलः (पा०३।३।१०३) इत्यप्रत्ययः॥ २६॥

अनतीति॥ हे राजन् खलु यस्मात् पुम्भावेन पौरुषेण प्रगल्भबलाः उत्कटशक्तयोऽतिधृष्टाः अतएवानतिशिथिले विकासोन्मुखे अत्यल्पकलिकाविधकाठिन्येऽपि पाथोजास्ये कमलमुखे मकरन्दग्रहणार्थं प्रसभं हठान्निविश्य प्रविश्य निरित्वराः निर्गमशीलाः एवम्भूताः अलयः भ्रमराः किमपि कियदङ्कं मुखतः मुखे कृत्वा आनीतं किमप्यपूर्व्वरसं स्वादुतरं सरोजिनीमधुरसं

विमपे मुखनः कृत्वा नीतं वितीर्य सरोजिनी-
मधुरसमुपायोगे जायां नवान्नमचीकरन्॥ २७॥
मिहिरकिरणाभोगम्भोक्तुं प्रवृत्ततया पुरः
कलितचुलुकापोशानस्य ग्रहार्थमियं किमु।

कमलिनीमकरन्दरूपं रसं आस्वाद्यं वस्तु उपायोगे प्रभातकाले वितीर्य दत्त्वा नवान्नं नूतनमपूर्व्वमथ च प्रेमभरात् स्वयमभुक्तमनुच्छिष्टमेव जायां मधुकर्या इत्यर्थः। अचीकरन् कारयामासुः। अविकसितेऽतिकठिने कमले अबलत्वात् प्रवेष्टुमशक्ता एता इति कृत्वा पौरुषेण स्वयं तत्र प्रविश्य मकरन्दं मुखे छत्वा समानीय मधुकरीभ्यो दत्वा ताभिस्तद्भोजयामासुरित्यर्थः। किञ्चिदासन्नसौरप्रकाशत्वात् कमलानि विकासोन्मुखानि जातानीति भावः। अन्येनापि प्रातः शुभयोगेऽन्नप्राशनं कार्य्यते। उपायोग इति पाठो विभावनीयः। नक्तमुषाचशार्वरीति चेति हलायुधः। उपायोगे अर्थाद्दिनेन सह्योगे प्रातरित्यर्थः। निरिन्तराः। इणनशजी (पा० ३।२।१६३) तिकरप्। मुखतः कृत्वेति स्वाङ्गेतसप्रत्यय इति (पा० ३।४।६१) क्त्वः क्त्वा। जायां हृक्रोरिति (पा० १।४।५३) कर्मत्वं। जाया इत्यपि पाठः॥ २७॥

मिहिरेति॥ सरोजिनी कमलिनी दिनोदये प्रातःकाले प्राक् अन्यदत्तापेक्षया पूर्व्वविकसितैकेन दलेन पत्रेणोपलक्षिता साक्षात्कचुरात्मगः मच्यतो गमय इति मतिं जनयति। इति किं इयं मिहिरस्य सूर्यस्य किरणानां आभोगं परिपूर्णतां

इति विकसितेनैकेन प्राग्दलेन सरोजिनी
जनयति मतिं साचात्कर्त्तुर्जनस्य दिनोदये॥ २८॥
तटतरुखगश्रेणीसांराविणैरिव साम्प्रतं
सरसि विगलन्निद्रामुद्राऽजनिष्ट सरोजिनी।
अधरसुधया मध्ये मध्ये वधूमुखलब्धया
धयति मधुपः स्वादुङ्कारं मधूनि सरोरुहां॥ २९॥

भोक्तुं अनुभवितुमथ च भक्षयितुं प्रवृत्ततया कृतप्रारम्भतया हेतुभूतया पुनर्भोजनादावन्नाद्यमृतकरणार्थस्यापोशानस्योपस्तरणमन्त्रोदकस्य ग्रहार्थं कलितो वद्धमुकुलकः प्रकृतिविशेषो यया एवम्भूता किमु। भोजने प्रवृत्तेनापोशनक्रियापूर्व्वमादावन्ते च भोक्तव्यमिति स्मृतेः। अपोशानग्रहीता करकमले एकां कनिष्ठामङ्गुलिं प्रसारयति अन्यास्तु संकोचयतीति संप्रदायः। कमलविकाससमयो जातस्तस्मादुदुध्यस्वेति भावः॥ २८॥

तटेति॥ साम्प्रतं सरसि सरोजिनी सरस्तटे तरुषु वर्त्तमानानां खगश्रेणीनां सांराविणैर्मिलितैः कलकलशब्दैरिव विगलन्ती भ्रश्यन्ती निद्रैव मुद्रा कोरकबन्धो यस्याः, यद्वा विगलन्ती निद्रायाः सङ्कोचस्य मुद्रा भङ्गी यस्याः सा त्यक्तनिद्रोन्मीलितकमललोचनेवाजनिष्ट जाता। कलकलेन च निद्रितस्य निद्रा अपयाति। तथा मधुपो भ्रमरः सरोरुहां मधूनि कमलमकरन्दान् वध्वाः भ्रमर्याः मुखात् लब्धयाऽधरसुधया ओष्ठगतपीयूषेण मध्ये मध्ये स्वादुङ्कारं स्वादूनि माधुर्यातिशय-

गतचरदिनस्यायुर्भ्रंशे दयोदयसङ्कुच-
त्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषां ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां
सह सहचरैरालोकयन्तेऽधुना मधुपारणाः ॥ ३० ॥

युक्तानि कृत्वा धयति पिबति। कमलानि विकसितानि भ्रमरास्त तन्मधूनि भ्रमर्य्यश्च पिबन्तीत्यर्थः। मधुप इति मा-भिप्रायं मद्यपा अप्येतादृशा भवन्ति। समन्ताद्रावाः सांराविणानि अभिविधौ भाव (पा०३।३।४४) इतिनीनुणं तात् स्वार्थे अभिनुण इत्यण् (पा०५।४।१५)। स्वादुङ्कारं स्वादुमिणमुल् (पा०३।४।२६)। मान्तत्वस्य पूर्व्वस्य स्वादुमीति निर्द्देशात् ॥ २९ ॥

गतेति ॥ गतचरदिनस्यातीतचरदिनस्यायुर्भ्रंशेऽवसानकाले सायंसमये दयाया उदयादिव सङ्कुचतां म्लानानां कमलानां मुकुलानि कलिकाः तेषां क्रोडान्मध्यात् नीडेषु प्रवेशं उपेयुषां प्राप्तानां मकरन्दास्वादलाम्पट्यात् सायं सन्ध्यासमयेऽपि कमलेषु स्थितानामनन्तरञ्च तेषु सङ्कुचितेषु बहिर्निर्गन्तुमशक्तत्वात् संकुचत्कमलमध्यरूपेषु नीडेषु स्थितानामिति यावत्। क्रोडमिति पाठे मुकुलविशिष्टकमलक्रोडमेव नीडप्रवेशं गतानां। अनन्तरञ्च रात्रावतीतायां इह प्रातःसन्ध्यासमये भिन्नेषु ईषद्विकसितेषु अम्भोरुहेषु समायतां पूर्व्वदिनासङ्कुचितेषु ईषदुन्मिषितेषु सत्सु सुखेन निर्गमं प्राप्ता-

न्तेभ्यः सकाशादर्थान्नवीनकमलानि उद्दिश्य समागच्छतां मधुलिहां अधुना सहचरैः पूर्व्वदिनान्ते कमलसङ्कोचात् पूर्व्वमेव कमलकोडान्निर्गतैः सहचरैः सहचरीभिश्च मित्रकलत्रादिभिः सह मधुना मकरन्देन कृता पारणाः उपोषितसम्बन्धीनि भोजनानि आलोक्यन्ते लोकैरिति शेषः। ये रात्रौ कमलबद्धास्ते तत्र मकरन्दाभावान्निर्बन्धवशाच्च कृतोपवासाः। अनिबद्धाःसहचरास्तु रात्रौ निद्रावशात् तद्वियोगाद्धि कृतोपवासाः अतः सर्व्वेऽपि प्रातर्मिलित्वा विकसितकमलमधुना पारणां कुर्वन्तीत्यर्थः। पूर्व्वदिनान्ते सङ्कुचितानि कमलानि प्रातः पुनः किञ्चिद्विकसितानीति प्रसिद्धिः। भूयान् समयो जातः तस्माद्बुध्यस्वेत्यर्थः। अन्योऽपि कस्मिंश्चिन्मदीयमित्युते बन्ध्यादौ वा निबद्धे कृपया सङ्कुचितहर्षो भवन्ति। केचिच्च सद्व्युपरते सति उपवासङ्कुर्वाणा गृहमध्यं प्रविश्य दिनान्तरे ज्ञातिभिः सह भुञ्जते। ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभमिति शास्त्रार्थः सहचरपदेन सूचितः। निगडबद्धोऽपि कारागृहेषु भिक्षैपूर्णोचितः समागच्छन् सन् स्वस्य बन्धनवशान्निराहारैर्ज्ञातिभिः सह मधुरैरन्नैः पारणां करोति। क्रोडादीनि यथायथं हेतौ ल्यब्लोपे-पञ्चमी। समायतां हृणः शता। सहचरैः पुमान् स्त्रियेत्येकशेषः (पा॰१।२।६७) ॥ २० ॥

तिमिरविरहात्पाण्डूयन्ते दिशः क्षणतारकाः
कमलहसितैः श्वेतीवोन्नीयते सरसी न का।
शरणमिलितध्वान्तध्वंसिप्रभादरधारणा-
द्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥ ३१ ॥

तिमिरेति ॥ प्राच्यादयो दिशास्तिमिरस्य विरहान्नाशात् पाण्डूयन्ते शुभ्रा इवाचरन्ति, अतएव क्षणाः अप्रकाशाः किञ्चिद्दृश्यास्तारकाः कतिपयनक्षत्राणि यासु एवं विधाः। अन्यापि प्रियवियोगात् पाण्डुरनिभस्रातिकृशनेत्रकनीनिका भवति। तथा का सरसी कमलानां हसितैर्विकासैः कृत्वा श्वेतीव नोन्नीयते न तर्क्यते, अपि तु सर्वा अपि सरस्यस्तैः शुभ्रायन्ते। अन्यापि प्रियप्राप्तेः कमलतुल्यमुखहसितैः श्वेता भवति। एकं गगनशिखरं गगनमध्यभागः शरणार्थं स्वपरित्राणार्थं गगनं प्रति मिलितस्य प्रत्यागतस्य ध्वान्तस्य ध्वंसिनी विनाशिनी या सूर्यप्रभा तस्यास्त्वादरधारणाद्धेतोः निजैरयशोभरैः स्वीयैरकीर्त्तिसमूहैः नीलति श्याम इवाचरतिः, अन्योऽपि शरणागतं परित्यज्य तद्वैरिणामादरेणाङ्गीकुर्व्वन् दुर्य्यशसा श्यामो भवति। दिशः सरांसि च प्रसेदुः। गगनस्य नक्षत्राद्याहार्य्यशोभापगमात् निर्ज्जीसिमान प्राप्तमिति भावः। पाण्डूयन्ते उपमानादाचारेऽर्थे कर्त्तुः क्यङिति (पा॰३।१।११) क्यङ्। अकृत् सार्व्वधातुकयोरिति (पा॰७।४।२५) दीर्घः। वर्णवाचिनः श्वेतशब्दात् वर्णादनुदात्तादिति (पा॰४।१।३९) ङीप् तस्य सप्तनोन्नति नीलवर्णे इति धातुः। आचारक्रियन्तान्नीलशब्दात्क्विप्॥३१॥

सरसिजवनान्युद्यत्पत्रार्यमाणि हसन्तु न
हततुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवं ।
हिमगिरिदृषद्दायादश्रि प्रतीतमदः स्मितं
कुमुदविपिनस्याथो पाथोरुहैर्न्निजनिद्रया ॥ ३२ ॥

सरसिजेति। सरसिजवनानि न हसन्तु अपि तु विकसन्त्येव। यस्मादुद्यनुदितः पत्रःसहायभूतः अर्यमा सूर्यो येषां विकसनशीलानीत्यर्थः । अथ च यदीयमित्रस्योदयो भवति न सर्व्वोऽपि हर्षवशाद्विकसत्येव। तथा कैरवं कुमुदं तन्द्रां सङ्कोचं नोपैतु अपि तु प्राप्नोत्येव। यतः हततुचिः गतसत्त्वोकः सुहृच्चन्द्रो यस्य तादृशं। चन्द्रोदये विकसतः कुमुदस्य चन्द्रक्षये सङ्कोचो युक्तएवेत्यर्थः। अन्योऽपि सुहृत्क्षये मूर्च्छावशान्निमीलति। अथो अथवा पाथोरुहैर्विकसितकमलैः रात्रिसम्बन्धिन्या निजनिद्रया कृत्वा कुमुदवनस्यादः प्रत्यक्षदृश्यं स्मितं विकसितं प्रतीतं विनिमयेन गृहीतं हिमगिरेर्हिमाचलस्य दृषदां शिलानां दायादांशभागिनो सदृशी श्रीःशोभा यस्य शुभ्रतरमित्यर्थः। कमलानां रात्रौ निद्रा कुमुदानाञ्च विकासः प्रातस्तु कमलानां विकासः कुमुदानाञ्च सङ्कोचो दृश्यते ततः स्वीयां निद्रां कुमुदेभ्यो दत्त्वा कमलैस्तद्विकासः परिवृत्त्य गृहीत इति सम्भाव्यत इत्यर्थः। सूर्य्ये उदितः कमलानि विकसितानि कुमुदानि च सङ्कुचितानीति भावः। प्रतीतं प्रतिपूर्व्वादिणो निष्ठा। प्रतीष्टमिति च पाठः अर्थः पूर्व्वोक्त एव ॥ ३२ ॥

धयतु नलिने माध्वीकं वा न वाऽभिनवागतः
कुमुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः।
इह तु लिहते रात्रीतर्षं रथाङ्गविहङ्गमा-
मधु निजवधूवक्त्राम्भोजेऽधुनाऽधरनामकं॥ २३॥

धयत्विति। अभिनवो नूतनः प्रभाते आगतः भ्रमरोत्करः नलिनैर्वर्त्तमानं माध्वीकं मकरन्दं धयतु पिबतु वा न वा। यतः रात्रौ कुमुदमकरन्दौघैः कुक्षिम्भरिः आकण्ठतृप्तः परिपूर्णोदरः रात्रौ कुमुदमकरन्दवृन्दैः पूरितोदरत्वात् प्रातर्मधु पिबतु वा मा पिबतु वा न तत्रास्माकमाग्रह इत्यर्थः। अन्योऽप्याकण्ठतृप्तोऽतिथिर्भुङ्क्ते न वा न तत्रादरः। रथाङ्गविहङ्गमास्तु रात्रीतर्षं सकलां रात्रिं तर्षित्वा वियुक्तत्वात् कुमुदमकरन्दं परित्यज्य पिपासयैव स्थित्वा इह प्रत्यक्षदृश्ये निजवधूवक्त्राम्भोजे वर्त्तमानमधरनामकमोष्ठसंज्ञं मधु अधुना प्रातःसमये लिहते आस्वादयन्ति, एतद्युक्तं। तावतैव वाम्भोजस्यापि कृतार्थत्वं जातमित्यर्थः। अन्यत्रापि बुभुक्षितस्य इच्छया उपोषितस्य भोजनं युक्ततरं भवति। भ्रमरा मकरन्दमास्वादयन्ति चक्रवाकाश्च प्रातर्वियोगापगमात् कमलमकरन्दमनादृत्य निजसहचरीमुखन्तीति भावः। फलेग्रहिरात्मम्भरिश्चेति (पा० ३।२।२६) चात्कुक्षिम्भरिः। रात्रीतर्षं अस्वतिश्चर्योरिति (पा० ३।४।५७) णमुल्। द्वितीया प्रश्रितेति (पा० २।१।२१) समासः॥ २३॥

जगति मिथुने चक्राविवं स्मरागमपारगौ
नवमिव मिथः सम्भुञ्जाते वियुज्य वियुज्य यौ ।
सततमम्टतादेवाहाराद्यदापदरोचकं
तदम्टतभुजां भर्त्ता शम्भुर्विषं बुभुजे विभुः ॥ ३४ ॥

जगतीति । जगति त्रैलोक्यमध्ये चक्राविव मिथुने स्त्रीपुंसौ स्मरागमपारगौ कामशास्त्रपारगामिनौ तावेवास्य वेदिनौ नान्यौ । यद्वा स्मरागमपारगौ चक्रवाकाविव जगति मिथुने नान्ये एतादृशे चतुरे मिथुने स्तः इत्यर्थः । कुत एतज्ज्ञातमित्यत आह । यौ चक्रवाकस्त्रीपुंसौ वियुज्य वियुज्य पुनरन्योन्येन सह रात्रौ वियोगं प्राप्य मिथोऽन्योन्यं नवमिव अतिपरिचयजन्याव-ज्ञाशून्यं सातिस्पृहमिव सम्भुञ्जाते सुरतसुखमनुभवतः । अजस्र-कामसेवनाद्विरागो भवेदिति वियुज्य सम्भोगः प्रत्ययसम्भोगव-दृशातिशयचमत्कारकारी भवतीति कामशास्त्ररहस्यं ज्ञात्वैव तावेवं कुरुत इत्यर्थः । अत्र दृष्टान्तः । यद्यस्मात् अम्टतभुजां केवलपीयूषाहाराणां सुराणां भर्त्ता स्वामी सुलभतराम्टत इति यावत् । विभुर्व्यापकः समर्थो विषभक्षणेऽप्यसम्भावितोपद्रव इति यावत् । स शम्भुः नीरोगकरणद्वारा सर्व्वेषामारोग्यसुख-कारी असम्भावितरोगोऽपीश्वरः सततमम्टतलक्षणादेवाहाराद्ध-स्यादरोचकं अम्टताशनानभिलाषरूपं रोगमापत् प्राप । तत् तस्मात्परिहारार्थं विषं बुभुजे । सततमधुरतरास्वादजन्यारुचि-परिहारार्थमेव स कालकूटं भक्षितवान्, अनन्तरञ्च पुनर-

विशति युवतित्यागे रात्रीमुचं मिहिकारुचं
दिनमणिमणिं तापे चित्तान्निजाच्च यियासति।
विरहतरलज्जिह्वा वंक्राह्वयन्त्यतिविह्वला-
मिह सहचरीं नामग्राहं रथाङ्गविहङ्गमाः ॥ ३५ ॥

म्रतभक्षणे सत्यपेव रुचिरस्य यथा जायते तथा वियोग एव सम्भोगे नितरां रुचिमुत्पादयतीति बुद्ध्या चक्रवाकाभ्यां क्रियत इति तावेव कामशास्त्ररहस्यज्ञाविति भावः। पारगौ अन्तात्यन्तेति (पा॰ ३।२।४८) डः। सम्भुज्जाते भुजोनवन इति (पा॰ १।३।६६) तङ्। अनेन सम्भोगस्य वियोगादेव नूतनत्वं भवतीति सूच्यते ॥ ३४ ॥

विशतीति। युवतित्यागे चक्रवाकनिष्ठस्त्रीवियोगे मिहिकारुचं शीतांशुं विशति सति रात्रीमुचं रात्रिलक्षणप्रियात्यागिनं तथा वियोगजन्ये तापे परितापे ग्रीष्मे च निजाच्चित्ताच्चक्रवाकहृदयात् सकाशात् दिनमणिमणिं सूर्यकान्तं यियासति जिगमिषति सति विरहेण तरलन्ती तरलेवाचरन्ती विह्वलीभवन्ती स्खलन्ती जिह्वा येषां ते रथाङ्गविहङ्गमा विरहेणातिविह्वलां सहचरीं चक्रवाकीं नामग्राहं स्वसङ्केतेन नाम गृहीत्वा इह प्रभाते क्रीडासरसि वा बहुवारं आह्वयन्ति आकारयन्ति। अन्योऽप्यतिविह्वलो बहु वारं आकार्यते स्मिति न वेति सन्देहात्। प्रतिचक्रवाकानां संयोगः परितापत्यागः परस्पराश्लेषं चन्द्रधूसरत्वं सूर्यकान्तसमापत्त्य। मालेयं मिहि-

स्वमुकुलमयैर्नेत्रैरन्धम्भविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् ।

केत्यमरः । रात्रीमुचं क्विप् । रुगिति मम्पदादित्वात् । मिक्षिका रुग्यस्येति समासः । तरलजिक्का तरलेवाचरतीति आचार क्विबन्ताच्छतरि पुम्वत् । आक्रयन्ति स्पर्द्धाभावात्तङभावः ॥ २५ ॥

स्वेति । जनो लोकः स्वमुकुलमयैः आत्मीयकलिकानेत्ररूपैः कृत्वा अन्धम्भविष्णुतया अनन्धाया अप्यन्धत्वाङ्गीकाराङ्गेतोः रवेः अनवेक्षिकां अनवलोकिकां कुमुदिनीं किमु किमर्थं दुर्व्याचष्टे दुष्टां कथयति । अवश्यदर्शनीयपवित्रसूर्यादर्शननियमादियं मित्रोदयं न सहत इति लोकः किमिति निन्दति, अपि त्वयुक्तोयं निन्देत्याक्षेपः । उ अहो किं निन्दतीति वा । अन्धम्भविष्णुतयाऽविचारतया रहस्यमजानन्नेव किमिति निन्दतीति जनविशेषणं वा । कथमयुक्तमित्यत आह । हे श्रोतारः यूयं शृणुत शृणुत तस्याः सूर्यादर्शने हेतुमाकर्णयत । ये राज्ञो नृपस्य दाराः कवीनां पाणिन्यादीनां प्रतिभासमुत्पन्नेषु व्याकरणादिग्रन्थेषु विषये लिखितास्तच्छिष्यैः पठिताश्चातः अवश्यदर्शनीयं सूर्यमपि न पश्यन्तीत्यसूर्यम्पश्या राजदारा इत्येव लिखितास्तच्छिष्यैश्च तथैव पठिताः । ननु प्रकृते किमित्याशङ्ख्याह सा कुमुदिनी किल प्रसिद्धं न भाविनी भविष्यति अर्थाद्राज्ञो दाराः, अपि तु राजचन्द्रस्य अथच नृपस्य दारा भवन्त्येव ।

लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
प्रगुणत प्रगुणान्नासूर्यम्पश्या न सा किल भाविनी ॥३६॥
चुलुकिततमःसिन्धोर्भृङ्गैः करादिव शुभ्यते
नभसि विसिनीबन्धोरन्ध्रच्युतैरुदविन्दुभिः।

राजमहिष्यो हि अतिसुरचितत्वादसूर्य्यम्पश्याः, इयमपि तथा, तस्मादेतस्या अपि असूर्य्यम्पश्यता युक्तेति रहस्यानभिज्ञो जनो इयैवेतां निन्दतीत्यर्थः। किलशब्दः किमर्थो वा। अत्र य इति कुमुदिनीपरामर्शेऽपि दारैः सामानाधिकरण्याद्बहुवचनं। येति पाठः समीचीनः। लिखितपठिता एकवचनं बहुवचनं वा। सूर्य्योदयवशात् कुमुदिनी सङ्कुचितेति भावः। अन्धम्भविष्णुतया कर्त्तरि भुवः खिष्णुजिति (पा० ३।२।५७) अन्धशब्द उपपदे भुवः खिष्णुचः खित्वात् अरुर्द्विषदिति (पा० ६।३।६७) मुम्। अवेचिका खलि प्रत्ययस्थादिति (पा० ७।३।४४) कात्पूर्व्वस्येत्वं। लिखितपठिताः कर्म्मधारयो द्वन्द्वो वा। असूर्य्यम्पश्या. असूर्य्यललाटयोरिति (पा० ३।२।३६) खश् खित्वान्मुम्। अत एव ज्ञापकात् क्रियायोगिनोऽपि नञः समासः॥ ३६॥

चुलुकितेति। गगने गच्छद्भिर्भृङ्गैः उदविन्दुभिरिव नभसि शुभ्यते दीप्यते। किम्भूतैरुदविन्दुभिः चुलुकःकृतश्चुलुके कृत्वा पीतः तमःसिन्धुस्तिमिरसमुद्रो येन तस्य विसिनीबन्धोः पद्मिनीमित्रस्य सूर्य्यस्य करात् किरणादेव हस्तात् रन्ध्रेभ्योऽङ्गुल्यन्तरालविवरेभ्यश्च्युतैर्गलितैः, चुलुकेन पीततमःसिन्धोरुपरित-

शतदलमधुस्रोतःकच्छद्वयीपरिरम्भणा-
दनुपदमदःपङ्काशङ्काममी मम तन्वते ॥ ३७ ॥
घुसृणसुमनःश्रेणिश्रीणामनादरिभिः सरः-
परिसरचरैर्भासां भर्त्तुः कुमारतरैः करैः।

र्त्तमानस्य रवेः कराङ्गुलीविवरेभ्योऽधोगलिताः तत्स्नजलविन्दव इव भृङ्गा गगने शोभन्त इत्यर्थः। चुलुकितेति करविशेषणं वा। अनुपदं गगनात् सकाशात् कमलानि प्रति पातानन्तरं शतदलाख्यान्यतिस्थूलानि कमलानि तेषां मधुस्रोतसः मकरन्दप्रवाहस्य कच्छद्वयो मकरन्दार्द्रभागद्वयं यत्तटद्वयं तस्याः परिरम्भणात् संश्लेषादुभयतस्तत्र लगनाद्धेतोरमी भृङ्गा अदःपङ्काशङ्कां अमुष्य पीतस्य तमःसिन्धोरधःस्थितावशिष्टकर्दमसम्भावनां वैतालिकस्य मम तन्वते विस्तारयन्ति। सकलेऽपि तमोजले पीतेऽवशिष्टतया पङ्क इव भृङ्गाः शोभन्त इत्यर्थः। अमुष्या मकरन्दप्रवाहकच्छद्वय्याः पङ्क इति वा। प्रवाहतटद्वये पङ्को युक्तः। भृङ्गाश्च मकरन्दस्योपरि नोपविशन्ति किन्तु अभित इति तेषां जातिः। प्रातःकालो जातोऽन्धकारः साकल्येन विनष्टः भ्रमरास्तन्नीडेभ्यो निर्गत्य गगन उड्डीय मधुपानार्थं कमलान्युद्दिश्य यान्तीति भावः। चुलुकित इति तत्करोतीति (पा॰ ३।१।२६।वा॰ १) ण्यन्तात्क्तः। शुम्भते शुभङ् दीप्तौ भावे यक् ॥ ३७ ॥

घुसृणेति। घुसृणसुमनसः कुङ्कुमकुसुमानि तासां श्रेणिस्तस्याः श्रीणां कान्तीनां अनादरिभिःअनादरणशीलैः ताभ्योऽपि

अजनि जलजामोदानन्दोत्पतिष्णुमधुव्रता-
वलिशवलनाद्गुञ्जापुञ्जश्रियं ग्रहयालुभिः ॥ ३८ ॥
रचयति रुचिः शोणीमेतां कुमारितमा रवे-
र्यदलिपटली नीलीकर्त्तुं व्यवस्यति पातुका।
अजनि सरसी कल्माषी तद्ध्रुवं धवलस्फुट-
त्कमलकलिकाखण्डैः पाण्डूकृतोदरमण्डला ॥३९॥

रक्ततरैः सरःपरिसरचरैस्तीरसञ्चरणशीलैः कुमारतरैरतिबालैर्भासां भर्त्तुः करैः सूर्यकिरणैः जलजामोदः गगनावगाहिकमलवकुलपरिमलस्तद्विषय आनन्दस्तेनोत्पतिष्णुरुत्पतनशीला मधुव्रतावलिस्तया शवलनात् मिश्रणाद्धेतोः गुञ्जापुञ्जश्रियं अर्द्धरक्तार्द्धकृष्णगुञ्जाराजिशोभां ग्रहयालुभिर्ग्रहणशीलैः अजनि तत्सदृशैर्जातमित्यर्थः। बाला अपि सुमनसां धीराणामपनादरिणो भवन्ति। बाला अपि रक्तकराभवन्तीति केचित्। अजनि भावे चिण्। उत्पतिष्णुः अलङ्कृञि (पा० ३।२।१३६) तीष्णुच्। शवलनं तत्करोतीति (पा० ३।१।२६।वा० १) ण्यन्तान्नपुंसके भावे ल्युट्॥ ३८ ॥

रचयतीति। यद्यस्मात् रवेः कुमारितमा अतिबाला रुचिः सरसीं शोणीं रक्तवर्णां रचयति। यस्माच्च कमले मकरन्दास्वादार्थे पातुका अलिपटली भृङ्गश्रेणी सम्यग्न्यादेतां नीलीकर्त्तुं व्यवस्यति। यतश्चेयं धवलानां स्फुटन्तीनां कमलकलिकानां खण्डैः समूहैः पाण्डूकृतं उदरमण्डलमध्यदेशो यस्याः

कमलकुमलाधाने भानोरहो पुरुषव्रतं
यदुपकुरुते नेत्राणि श्रीगृहत्वविवक्षुभिः।
कविभिरुपमादानादम्भोजतां गमितान्यसा-
वपि यदतथाभावान्मुञ्चत्युलूकविलोचने ॥ ४० ॥

सैतादृशी तस्मात् ध्रुवं निश्चितं इयं सरसी कल्माषी कर्बुरैवा-जनि जाता। रक्तकृष्णश्वेतवर्णमिश्रणात् कर्बुरत्वोत्प्रेक्षा। ध्रुवमुत्प्रेक्षायां वा। बालातपो जातः भ्रमराः परितो भ्रमन्ति कमलानि विकसितानीति भावः। चित्रं किर्मीरकल्माषेत्यमरः। गोणी गोणात्प्राचामिति (पा० ४।१।४३) ङीप्। कुमारितमा घरूपेति (पा० ६।३।४३) ह्रस्वः। पटलकल्माषौ गौरादी ॥३८॥

कमलेति। कमलमात्रस्य कुमलाधाने आनुकूल्याचरणे भानोः अहो अत्याश्चर्यरूपं पुरुषसम्बन्धि व्रतं नियमः, अङ्गीकृतपरिपालनशीलत्वमिति यावत्, यं दृष्ट्वाऽहो आश्चर्यरूपः पुरुष इति सर्व्वे वदन्ति। कुतो ज्ञातमत आह। यद्यस्मात्तात्त्विकानि कमलानि विकासयतीति किं वाच्यं किन्तु श्रियोः कान्तिलक्ष्म्योः गृहत्वं स्थानतां विवक्षुभिः वक्तुमिच्छुभिः व्यासवाल्मीकिकालिदासादिभिः कविभिः उपमादानात् किञ्चिच्छ्रीगृहत्वादिगुणसादृश्यादपि अम्भोजतां कमलत्वं गमितानि प्रापितान्यारोपितकमलत्वान्यपि नेत्रकमलानीति निर्द्दिष्टानि लोकनेत्राण्यसौ रविः उपकुरुते उन्मीलयति। उदिते हि सूर्य्ये लोकनेत्राण्युन्मीलन्ति। अथच घटाद्यर्थग्रहणसमर्थानि

यद्तिमहती भक्तिर्भानौ तदेनमुदित्वर-
न्त्वरितमुपतिष्ठस्वाध्वन्य त्वमध्वरपद्धतेः ।

करोति। यत आलोकसहस्तमेव चक्षुः पदार्थग्रहणसमर्थं। यदपि अतथाभावात् औष्ण्याभावात् कविभिः कमलत्वेनाननुरक्तत्वादुलूकविलोचने मुञ्चति नोन्मीलयति। न च पदार्थानापादयति। यचोलूकस्य दृष्टिस्तचालक्ष्मीरिति लोकप्रसिद्धिस्तन्नेत्रयोः औष्ण्यं दूरनिरस्तं। सूर्य्येण कमलानि कमलतुल्यानि च लोकनेत्राणि विकास्य उलूकनेत्राणि कमलगुणयोगाभावादविकास्यान्वयव्यतिरेकाभ्यां स्वप्रतिज्ञा सत्या कृता। एवंविधः सत्यप्रतिज्ञः कोऽपि नास्तीत्यर्थः। कमलानि विकसितानि सर्व्वोऽपि लोकः प्रबुद्धः कौशिकनेत्रे च निमीलिते प्रातःकालो जात इति भावः। औष्ण्यविवक्षुभिः द्वितीयेति योगविभागात् समासः। उपमितिरुपमानं नपुंसके भावे ल्युट्। उपमीयतेऽनेनेति उपमानं सादृश्यमिति भावः ॥ ४० ॥

यदिति। यद्यपि त्व भानौ अतिमहती भक्तिर्यस्यैवम्भूतो वर्त्तसे तर्हि हे अध्वरपद्धतेर्यज्ञमार्गस्याध्वन्य महायाज्ञिक त्वम् उदित्वरमुदयशीलमेनं सूर्य्यं त्वरितमुपतिष्ठस्व पूजय। शीघ्रमुपस्थाने हेतुमाह। हि यस्मात् इह समये प्रभाते किल प्रसिद्धं रविमभिलक्षीकृत्य उपस्थानमन्त्रेणोर्द्ध्वं क्षिप्ता जलाञ्जलयो मन्देहाख्येषु राक्षसेषु उदवज्रतां शतस्फुटाशनिभावं व्रजन्ति वशीभूय नाम् भस्मीकुर्व्वन्तीति श्रुतावुक्तमित्यर्थः। तिस्रः कोटो-

इह हि समये मन्देहेषु व्रजन्त्युदवज्रता-
मभिरविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल ॥ ४१ ॥
उदयशिखरिप्रस्थावस्थायिनी खनिरत्नया
शिशुतरमहोमाणिक्यानामहर्मणिमण्डली।

ढ्वकोटौ च मन्देहा नाम राक्षसाः इति पुराणञ्च। तस्माद्-
दयात् पूर्वं शीघ्रमुत्तिष्ठस्वेत्यर्थः। अध्वन्यमिति पाठे अध्वरपद्ध-
तेरध्वानमलं गामिनं। भक्तिशब्दस्य प्रियादित्वात् पुंवद्भावा-
द्भावः। अध्वन्य अलङ्गाम्यर्थे अध्वनो यत् खाविति (पा०५।२।
१६) यत्। उदवज्रतां मन्थौदनेत्यादिना (पा० ६।३।६०) उद-
कस्योदादेशः। अभिरभागे (पा० १।४।९१) इत्यभेः कर्मप्रव-
चनीयत्वाद्द्वितीया ॥ ४१ ॥

उदयेति। इयं अहर्मणेः सूर्यस्य मण्डली उदयशिखरिणः
उदयाचलस्य प्रस्थे सानुनि अवस्थायिनी वर्त्तमानाऽधया भूयसो
शिशुतराणि रक्ततराणि महांसि तेजांसि तान्येव माणिक्यानि
तेषां खनिरुत्पत्तिभूमिः ध्वान्तेन तिमिरेण ध्वान्तवच्च ग्रावां
पिधायिकां आकरद्वारा आच्छादिकां रजनिरूपां इमदं
शिलां विधूयापनीय कतमेन केन जनेन विवृद्विता उद्घाटितेति
न खलु नैव जाने रात्रिविगमे यतो दृश्यत इत्यर्थः। वाक्यार्थः
कर्म। न जाने अर्थात्तं जनमित्यर्थं इति वा। अन्यापि माणि-
क्यादिखनिः पर्वतप्रस्थावस्थायिनी छप्पतरशिलापिहिताऽपि
केनापि भाग्यवतोद्घाट्यते। अतिशयितः कः कतमो बह्वाऽनेन

रजनिदृपदं ध्वान्तश्यामां विधूय पिधायिकां
न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥ ४२ ॥
सुरपरिवृढः कर्णात् प्रत्यग्रहीत् किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः।
विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ ४३ ॥

विमुद्रितेत्यहं न जाने, अपि त्वेवमेव जानामि। कालपरिवर्त्तकारिणा ब्रह्मणैवोद्घाटितेत्यर्थ इति काकुर्वा। खनिः खलु खनिरिवेत्युत्प्रेक्षा वा। कतमः डतमच्। अतिशये स्वार्थे वा तम एव ॥ ४२ ॥

सुरेति। सुरपरिवृढः शक्रः कर्णात् कुण्डलद्वयं कर्णभूषणयुगं ब्राह्मणवेषं धृत्वा प्रतिग्रहरूपेणाग्रहीत्। किलेति पुराणादौ प्रसिद्धं। अथ प्रतिग्रहानन्तरं मुदा तत्कुण्डलद्वय खलु निश्चितं प्राच्यै दिशे प्रादात्। हि यस्मात् स शक्रस्तस्याः प्राच्याः पतिः धवः रक्षिता च प्रियान् प्रियायै प्राच्या प्रीत्या निजकर्णादिभूषणं प्रयच्छति। तस्यै दत्तमिति कुतो ज्ञातमत आह। तत्र प्राच्यां तयोर्द्वयोर्मध्ये वा विधुः सायं उदयभाक् उदितः आरक्तकिरणरूपमेकं कुण्डलं व्यलोकि दृष्टं। प्रातः, अहर्मणिः, नवतराम्नात्कालनिर्गताः करा रक्ततरकिरणाः तद्रूपस्वर्णस्रावि सुवर्णस्रवणशीलं तादृशमेव द्वितीयं कुण्डलं विलोक्यते। तस्मात् तस्यै तद्द्वयं तेन प्रत्तमित्यहं शङ्के इत्यर्थः। सूर्य्यस्य कुण्डलत्व-

दहनमविशद्दीप्तिर्यास्तङ्गते गतवासर-
प्रथमसमयप्राप्ते पत्यौ विवस्वति रागिणी।
अधरभुवनात् सोद्धृत्यैषा हठात्तरणेः कृता-
मरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्त्तिताम्॥ ४४॥

मर्थनार्थं शक्राच्चन्द्रस्य कुण्डलनमुक्तं। बालतरकिरणः सूर्य्यः उत्तमसुवर्णत्वाविकर्णकुण्डलमिव शोभत इति भावः। कर्ण-नेन्द्राय कुण्डलद्वयं दत्तमित्यारण्यके पर्व्वणि कथा॥ ४३॥

दहनमिति। या दीप्तिः रागिणी रक्ता सती विवस्वति सूर्य्यलक्षणे पत्यौ गतवासरप्रथमे पूर्व्वदिनावसाने सायङ्काल-समयसत्समयकालं प्राप्तेऽतएवास्तं विनाशं अस्ताचलं वा प्राप्ते गते सति, अग्निर्ज्योतिरित्याद्यग्निहोत्रमन्त्रादिसामर्थ्यात् दहन-मविशत्। सैषा दीप्तिः अधरभुवनात् पातालात् सकाशात् हठात् बलात्कारेणार्थात्तरणिमेवोद्धृत्योदयं प्रापय्य तरणेरग्रे कृतास-रपतिपुरस्य स्वर्गस्य प्राच्या वा प्राप्तिर्यया एवम्भूता सती तीव्रतया तीक्ष्णतया सह वर्त्तमाना मूर्त्तिर्यस्यास्तत्तां धत्ते। क्रमेण सूर्य्ये ऊर्ध्वदेशे प्राप्ते दीप्तिः खरतरा जातेति भावः। या नारी भर्त्तरि विनाशसमयप्राप्ते विनष्टे सति तस्मिन्ननु-रागिणी सती जन्मान्तरेऽपि तत्प्राप्त्यर्थमग्निप्रवेशं कुरुते, सा दुष्कृतैः पातालप्राप्तमपि निरयपतितं, व्यालग्राही यथा व्याल-मित्यादिवचनसामर्थ्यान्निरयाद्बलादुद्धृत्य तस्य कृतस्वर्गप्राप्तिः सतीनां पतिव्रतानां व्रतमेव मूर्त्तिः शरीरं यस्याः, सती गौरी

बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा।
शमनयमुनाक्रोडैः कालैरितस्तमसां पिबा-
दपि यदमलच्छायात् कायादभूयत भास्वतः॥४५॥

तस्या वा व्रतयुक्ता मूर्त्तिर्यस्यास्तत्तां धत्ते। गौरीवदियमपी-
त्यर्थः। समयप्राप्ते प्राप्तापन्न इति (पा॰ २।२।४) समासः॥४४॥

बुधेति। तनुजन्मनोऽपत्यस्य तनौ वर्त्तमानः कालिमा श्यामत्वं किल प्रसिद्धं निश्चितं वा, पितुः स्त्रियोर्वा शितिहरिद्वर्णादीनां कृष्णनीलवर्णपत्रफलशाकादीनां य आहारो तल्लक्षणं शितिहरिद्वर्णं यदाद्यमदनीयं पत्रशाकादि वा तस्माज्जातः सश्यामो मैचाततनयत्वादित्यादि बुधानामुदयनाचार्य्यादीनां इयं कथा गोष्ठी तथ्यैव सत्यैव। यद्यस्माद्धेतोः भास्वतः इतः प्रत्यक्षदृश्यादमलच्छायादुज्ज्वलकान्तेः शुक्लभास्वरादपि तमसां पिबात् तमिस्रैकहारात् कायात् शमनयमुनाक्रोडैः यमयमुनाशनैश्चरैः कालैः श्यामैरभूयतोत्पन्नं। सूर्य्यकायस्योज्ज्वलत्वेऽपि श्यामतमिस्राहारपरिणतिवशात् यमादिभिरपत्यैः श्यामैर्जातं तस्मादियं पण्डितकथा सत्यैवेत्यर्थः। सर्व्वमपि तमः सूर्य्येण नाशितमिति भावः। आद्यं अदेः प्रदृस्तोर्ण्णदिति (पा॰ ३।१।१२४) ण्यत्। कालीव काली वेति पुमान् स्त्रियेत्येकशेषः (पा॰ १।२।६७)। तमसां कर्म्मणि षष्ठी। अभूततद्भावे तङ्। क्रोडः कालोऽशिनः पङ्गुर्मन्दः छायासुतः शनिरित्यमरशेषः॥४५॥

अभजत चिराभ्यासं देवः प्रतिक्षणदात्ययं
दिनमयमयं कालं भूयः प्रसूय तथा रविः।
न खलु शकिता शीलं कालप्रसूतिरसौ पुरा
यमयमुनयोर्जन्माधानेऽप्यनेन यथोज्झितुं ॥ ४६ ॥

अभजतेति। अयं रविर्देवः क्षणदा रात्रिस्तस्या अत्ययं प्रत्यूषं प्रतिरात्र्यवसाने इत्यर्थः। दिनमयं दिनरूपं कालं तुच्छादिलक्षणसमयं अथच तद्रूपं श्यामं वपुः भूयो बहुतरं यथा तथा पौनःपुन्येन वा प्रसूय उत्पाद्य चिरकालमभ्यासं तथा तेन प्रकारेण अभजत अशिश्रयत्। यथा येन प्रकारेण पुरा पूर्व्वं काल प्रसूतिर्यस्याय च काली श्यामा प्रसूतिर्यस्यैवम्भूतोऽसौ सूर्य्यः यमयमुनयोरपि प्रसविष्यतोर्जन्माधाने जन्मार्थं वीजक्षेपसमयेऽपि, अनेन चिराभ्यासेन हेतुना शीलं कालोत्पादनस्य स्वभावमुज्झितुं खलु निश्चितं न शकिता समर्थो भविता। कालप्रसूतिस्वभावः सूर्यः स्वभावस्य दुरतिक्रमत्वात् तावपि कालावुदपादयदित्यर्थः। उदयमानेन सूर्येण दिवसः कृत इति भावः। प्रातःकाले क्रियमाणोऽभ्यासः पटुतरो भवति। चिराभ्यासं मयूरव्यंसकादित्वात् समासः। यद्वाऽकारान्तस्य चिरशब्दस्य अत्यन्तसंयोगे चेति (पा॰२।१।२८) समासः। प्रतिक्षणदात्यये वीप्सायामव्ययीभावे नाव्ययीभावादिति (पा॰२।४।८३) सुपोऽलुक्। तृतीया सप्तम्योर्बहुलमिति (पा॰२।४।८४) त्यम् अत्ययमिति निपातः कालप्रसूतिः पक्षे पुंवत् ॥ ४६ ॥

रुचिरचरणः स्फीतोरुश्रीसनाथरथः शनिं
शमनमपि स त्रातुं लोकानसूत सुताविति।
रथपदकृपासिन्धुर्बन्धुर्दृशामपि दुर्जनै-
र्यदुपहसितो भास्वानास्मान् हसिष्यति कः खलः॥४७॥

रुचिरेति। सुजनैरेवम्भूतो यो भास्वानिति संस्तुतः दुर्जनैर्य-
स्मादेवं उपहसित स्तस्मादतितुच्छाम्परवर्णनोपजीविनः को-
नाम खलोनोपहसिष्यति, अपि तु सर्वोप्युपहसिष्यत्येव। यथा
उदिते सूर्ये सद्भिः सूर्यस्यार्हणा क्रियते तथा खलैर्न, एवं तुच्छा
एते स्वोदरभरणार्थं यत्किञ्चिद्वदन्तीत्यस्माकं खलैर्निन्दायां
कृतायां भवादृशै राजशिरोमणिभिरस्माकमर्हणा क्रियत एवेति
खलानां प्रयासो वृथा एवेत्यर्थः। एवं कथं स्तुतः कथमुपहसित-
इत्यत आह। सूर्यः रुचिराश्चरणाः लक्षितलक्षणया किरणा यस्य
तथा स्फीतस्यारुणस्य उर्व्या महत्या श्रिया सुता सूर्येणैव प्रसूता
उर्वी श्रीस्तया सनाथोऽलङ्कृतो रथो यस्य स.। तथा शनिं शमनं
शनैश्चरदण्डधरौ सुतौ लोकान् त्रातुं असूत। शनिर्हिंस्त्यादि
सिद्धिमात्रहेतुलोकपालतया लोकान् रक्षति। यमोऽपि दुष्टा-
दुष्टयोर्निग्रहानुग्रहौ कुर्वन् धर्माधर्माचरणप्रवृत्तिजननद्वारा
रक्षति। एतादृशौ परोपकारपरौ पुत्रौ असूत। तथा रथपदा-
नामसाधानां चक्रवाकानां कृपासिन्धुर्दयासमुद्रः रथस्य पदेन
व्यवसायेन गत्या जगतो दयासमुद्रो वा। तथा सकलपदार्थग्रहण-
सहकार्यालोकसम्पादनद्वारा दृशां सर्वजनशेषाणां बन्धुः मित्रं

शिशिरजरुजां घर्मं शर्मोदयाय तनूभृता-
मथ खरकराश्यानांस्थानां प्रयच्छति यः पयः।

एवंभूतः सुन्दरः परोपकारकरणैकस्वभावोऽपि इति स्तुतिपक्षः। रुचिस्तेजोरूपस्तापकर इति यावत्। तथा अचरणश्चरणरहितः यद्वा विपरीतलक्षणया रुचिरौ चरणौ यस्य। पुराणादौ चरणाङ्गुल्यादिस्थाने कुष्ठादिदुष्टफलश्रवणात् ध्यानेऽप्यचरणएव सूर्यः। विश्वकर्मणा कुन्दे आरोपितस्य सूर्यस्य तेजसां दुःसहत्वाच्चरणाकारो न निर्मित इति वा। अन्धं प्रति सुनेत्रवचनवद्चरणस्यापि रुचिरचरणत्वोक्त्योपहासः। तथा स्तुतस्य अनूरोः सारथेरूरुशोभया सनाथो रथो यस्य स इत्यपि विरुद्धलक्षणा। तथा शनेः क्रूरग्रहत्वाच्चिरकालभोग्यदुःखदत्वाच्च मस्यापि जगत्प्राणहरणशीलत्वात् परपीडाकरणैकस्वभावो शनिशमनौ पुत्रौ लोकान् त्रातुमस्तूतेत्यपि विरुद्धलक्षणा। तथा तिर्यग्योनिपक्षिविशेषचक्रवाकाणामेव दयासिन्धुर्नान्येषां तापकरत्वात् तादृशानामेव बन्धुर्नान्येषां। यद्वा तेजोभरेण दृष्टिप्रतिघातकारित्वादबन्धुरपि दृशां बन्धुरित्यपि विरुद्धलक्षणेति उपहासपक्षः। एवम्भूतः सूर्यः समुदेतीति भावः॥ ४७॥

शिशिरेति। स भानुरुदस्यति उदेति। स कः, यः शिशिरर्त्तौ शिशिरं हिमं तस्माज्जाता रुक् पीडा येषां तेषां तनूभृतां जनानां शर्मणः सुखस्योदयाय प्राप्तये वसन्तनिदाघसम्बन्धिनं घर्मसुष्णं क्रमेण प्रयच्छति। अथानन्तरं वसन्तनिदाघसम्बन्धिनः खरास्तीक्ष्णतरा कराः सूर्यकिरणास्तैः आश्यानं शुष्कं स्त्यानं आस्यं

जलभयजुषां तापं तापस्पृशां हिममित्यय-
मपरहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ॥ ४८ ॥
इह न कतरश्चित्रं धत्ते तमिस्रततीर्दिशा-
मपि चतसृणामुत्सङ्गेषु स्थिता धयतां क्षणात्।

सुखं येषां तेषां देहिनां सुखाय पयः वर्षासम्बन्ध्युदकं प्रयच्छति दत्ते। ततो जलभयजुषां जलभीनानां तापं दत्ते। ततस्तापस्पृशां शरदातपवतां देहिनां हेमन्ते हिमं दत्ते एवम्प्रकारेण परेभ्यो यद्धितं तस्मिन् विषये मिलतां पौनःपुन्येन घटमानानां कृतेः शीततापजलदानरूपपुरुषव्यापारस्यावृत्तिरावर्त्तना यस्य। यद्वा कृत्यानां शीतादिदानरूपाणां कार्य्याणां आवृत्तिर्यस्यैवम्भूतः परोपकारपरः सूर्य उदेतीत्यर्थः। स्पृशेति द्रवमूर्त्तिस्पर्शयोश्चित्वाभावात् सम्प्रसारणाभावः। निष्ठान्तं। परहितेति चतुर्थीतदर्थार्थेति (पा० २।१।३६) समासः। कृत्या कृञः शचेति (पा० ३।३।१००) योगविभागात् क्यपि कृतिः। चकारात् क्यपि तुकिचकृत्या। पक्षे अर्थार्थे विभाषाकृवृषोरिति (पा० ३।१।१२०) क्यपि तुक् ॥ ४८ ॥

इहेति। पूर्वादीनां चतसृणामपि दिशां उत्सङ्गेषु प्रान्तदेशेषु स्थिता वर्त्तमानास्तमिस्रततीस्तिमिरपरम्पराः क्षणाद्धयतां विनाशयतामपि अर्यम्णः सूर्यस्य रोचिषां तेजसां, रविः शरणं यस्य तद्भावं रूपतत्त्वाभिलाषेत्य प्राप्य निवसद्धर्त्तमानं छायारूपं तमः शमयितुं विनाशयितुं आमैश्वर्य्यमसामर्थ्य-

तरुशरणतामेत्य च्छायामयं निवसत्तमः
शमयितुमभूदानैश्वर्यं यदर्यमरोचिषां ॥ ४९ ॥
जगति तिमिरं मूर्च्छामजन्नजेऽपि चिकित्सतः
पितुरिव निजादस्मादस्रावधीत्य भिषज्यतः।

मभूदिति यत् इदात्रासामर्थ्यविषये कतमः को नाम जनश्चित्ते विस्मयं न धत्ते, अपि तु सर्वोऽप्याश्चर्यं प्राप्नोत्येव। दिगन्तगताया अपि तिमिरपरम्परायाः संहारे येषां शक्तिः तेषां रवितेजसां तरुतलमाचम्यितं छायारूपं समीपवर्त्यपि तमः शमयितुं शक्ति-र्नाभूदित्याश्चर्यमित्यर्थः। तनु इति पाठे तनु अल्पं शरीरं वा शरणं यस्य तद्भावं प्राप्य निवसदित्यर्थः। महदाश्रयेण स्थितमपि यो विनाशयितुं शक्नोति सोऽन्याश्रयेण वर्त्तमानं शमयितुमपि न शक्नोतीत्याश्चर्यमेव। तरुच्छायामयं देहच्छायामयं वा तमो विहाय सर्व्वमपि तमः सूर्य्येण विनाशितमिति भावः। आनैश्वर्य्यं अनीश्वरस्य भाव इत्यर्थे न नञ् पूर्व्वादिति (पा०५।१।१२१) भावप्रत्ययनिषेधेऽपि ब्राह्मणादिष्वनीश्वरशब्दस्य पाठात् ष्यञि नञः शुचीश्वरेति (पा०७।३।३०) पक्षे उभयपदवृद्धिः॥ ४८ ॥

जगतीति। इमौ नासत्यौ निजात् स्वीयात् अस्मात्पितुः सूर्य्यादधीत्यैवायुर्वेदं पठित्वेव भिषज्यतः। स्वर्लोके चिकित्सां कुरुतः। किम्भूतात् पितुः, जगति वर्त्तमानं तिमिरं अथच वस्तु-दर्शनासामर्थ्यजनकं नेत्ररोगविशेषं चिकित्सतो नाशयतः। आ-युर्वेदोक्तप्रतीकारेण शमयतः। तथाऽजन्नजे कमलखण्डे वर्त्तमानां

अपि च शमनस्वामी तातस्ततः किमनौचिती
यदयमुदयः कह्लाराणामुदेत्यपमृत्यवे ॥ ५० ॥
उडुपरिवृढः पत्या मुक्तामयं यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती।

मूर्च्छां सङ्कोचमपि नाशयतः, अयचाप एव संसर्गादाविति वचनादपां मूलभूतत्वादब्जजे लोकसमूहे वर्त्तमानां मूर्च्छां वैचित्त्यध्वस्तचैतन्यभावरूपं मोहमपाकुर्वतः। उपचारचतुरात् कल्याणपाणेर्वैद्यादधीत्यैव हि राजवैद्यो भवति, तस्माद्वैद्यात्स्वपितुरेव वैद्यकमधीत्य ताभ्यामिन्द्रवैद्यत्वं प्राप्तमित्यर्थः। अपि च किञ्च सर्व्वभूतानि शमयति नाशयतीति शमनो यमस्तस्वामी सूर्य्यो तातः पिता ततस्तस्मात् कह्लाराणां कुमुदानामपमृत्यवे सङ्कोचायाथचाकालमरणायोदेति। यत् यतोऽयं सूर्य्योऽदयो निष्कृपः साऽस्य सूर्यस्य किमनौचिती अपि लेशाऽसौचित्यैव कारणगुणप्रक्रमेणैव कार्य्ये गुणारम्भाददयताऽपमृत्युदायिता च यमेनाप्यस्मात् स्वपितुरेव सकाशात् पठितेत्यर्थः। उदयता सूर्य्येण तमो नाशितं, कमलान्युन्मीलितानि, कुमुदानि मुकुलितानीति भावः। पितुः आख्यातोपयोग (पा॰१।४।२९) इत्यपादानत्वं। भिषज्यतः। कह्लादिः॥ ५० ॥

उडुपेति। अयमिदानीमस्तं जिगमिषुः उडुपरिवृढश्चन्द्रमायं उदितः सन् अस्तं गतेन पत्या सूर्य्येण मुक्तां त्यक्तां वियोगिनीं भार्यां पद्मिनीं यद्यमादृतरात्रौ अपीडयत् सङ्कोचितवान्

तदुभयमतः शङ्के सङ्कोचितं निजशङ्कया
प्रसरति नवार्के कर्कन्धूकणारुणरोचिषि॥ ५१ ॥
श्रुतिमयतनोर्भानोर्जानेऽवनेरधराध्वना
विहरणकृतः शाखाः सात्मीकृतानि दृशत्विषां।

अथच करैर्दूषितवान्। यदपि चन्द्रे पद्मिनीं पीडयति सति कुमुद्वती कुमुदविकासव्याजेन रात्रौ जहास, अतएव हेतोः तदुभयं चन्द्रकुमुदिन्यौ कर्कन्धूफलवत् पक्वबदरवत् कणारुणरोचिषि ईषद्रक्तकिरणे नवार्के तरुणादित्ये प्रसरति प्रकर्षेण गच्छत्युदयति सति निजशङ्कया स्वकृतानाचारनिमित्तभयेनैव प्रयोजकेन सङ्कोचितं सङ्कोचं प्रापितं निःप्रभीकृतमित्यर्थः। इत्यहं शङ्के मन्ये। सूर्य उदितः पद्मिनी च विकसिता चन्द्रो निःप्रभोऽस्मीति कुमुदिनी सङ्कुचितेति भावः। अन्यच्चाप्युक्तं प्रमेयं बोद्धव्यं। कर्कन्धूर्बदरी कोलीत्यमरः। सङ्कोचितमिति ण्यन्तात् कर्मणि निष्ठा, अन्यथा व्याख्याने सङ्कुचितमित्येव स्यात्। तदुभयं निजशङ्कया करणभूतया स्वयमेव सङ्कुचितं कृतारम्भमिति वा व्याख्येयं। कर्कन्धुकुणेति पाठश्चिन्त्यः। ग्रन्थविस्तारभयात् साधकबाधकादिर्नोक्तः सुबुद्धिभिर्विविच्य बोद्धव्यं॥ ५१ ॥

श्रुतीति। पक्षिपतिः श्येनः ज्योतिःशास्त्रानुसारेण अवनेर्भूमेरधराध्वना अधस्तनेन मार्गेण पातालमार्गेण रात्रौ विहरणकृतः परिभ्रमतः। तथा श्रुतिमयी वेदरूपा तनुर्देहो यस्य तस्यास्य भानोस्त्विषां दशशतानि एकसहस्रमेव दशशतानि कठकण्ठ-

निशि निशि सहस्राभ्यां दृग्भिः शृणोति सहस्वराः
पृथगहिपतिः पश्यत्यस्य क्रमेण च भास्वराः ॥ ५२ ॥
वक्त न खरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः ।

दिशाखाः निशि निशि रात्रौ रात्रौ सहस्रफणत्वात् प्रतिफणञ्च नेत्रद्वयसद्भावाद्द्वाभ्यां सहस्राभ्यां दृग्भ्यां सहस्रद्वयपरिमिताभिर्दृष्टिभिरनुक्रमेण युगपत् पृथक् च चक्षुःश्रवस्त्वात् साक्षात् शृणोति पश्यति चेत्यहं जाने। क्रियाद्वये क्रमेण हेतुद्वयं। यतः सहस्वराः स्वरूपेणोदात्तादिस्वरैः सह वर्त्तमानाः स्वराणां शब्दरूपत्वाच्छृणोति। तथा भास्वराः शुक्लभास्वररूपाःशाखाः ततः साक्षात् पश्यति च। रात्रौ पातालगामित्वात्तत्र च शेषस्य वर्त्तनाद्देदमयशरीरस्य किरणसहस्ररूपं शाखासहस्रं शेषो नेत्रसहस्रद्वयस्य सत्त्वाद्युगपत् पृथगेकेन नेत्रसहस्रेण शृणोति द्वितीयेन च पश्यतीति युगपत् पृथक्श्रवणदर्शनाभ्यामेव शेषनेत्रसहस्रद्वयस्य सार्थक्यमभूदित्यर्थः। श्रुतिमयतरोरिति पाठे वेदरूपस्य वृक्षस्य शाखा युक्ताः। अध्वना वलिसद्मनेति पाठे वलिसद्मरसातलमित्यभिधानात् स एवार्थः। दशशतानीति काकाक्षिवदुभयत्रापि सम्बध्यते। सहस्वराः वोपसर्जनस्येति (पा० ६।३।८२) पाक्षिकत्वात् सभावाभावः॥ ५२ ॥

वक्रेति। येषां कराणां खरता तीक्ष्णताऽग्रे पूर्व्वाह्नसमये पक्षः अनितरां न प्रतिभासते स्फुरति, सर्व्वथा नोपलभ्यते

उचितमुचितं जालेष्वन्तःप्रवेशिभिरायतैः
कियदवयवैरेषामालिङ्गिताङ्गुलिलिङ्गिमा ॥ ५३ ॥

इत्यर्थः । यद्वा नञ्समासेन नखरताऽतीक्ष्णता । पूर्व्वोक्ते येषां अतितरां तीक्ष्णताभाव उपलभ्यते खलु निश्चितं । अथच येषामुपरिभागे बहवो नखरा नखाः येषां तत्ता उपलभ्यते तेऽमी प्रत्यक्षदृश्या विकासहेतुत्वात् कमलानां सुहृदो बन्धोर्भानोः कमलबन्धोर्वा कराः किरणा एव पाणयः प्रवालरुचः विद्रुमवद्रक्तकान्तयः, अथ च मञ्जिष्ठमाल्यकान्तयः अतिबाला अथच बालपल्लववद्रक्तकान्तयो दृश्यन्त इति शेषः । तथा जालेष्वन्तःप्रवेशिभिः गवाक्षादिविवरमध्यप्रविष्टैः अतएवायतैः तद्गवाक्षदण्डवद्दीर्घीभूतैः कियदवयवैः किरणैः एषां किरणानां पाणीनाञ्च य आलिङ्गितः सम्बद्धः अङ्गुलिलिङ्गिमा अङ्गुलिवल्लिङ्गिमा रुचिमाऽथवाऽङ्गुलिभिर्लिङ्गिमा तत् उचितमुचितमियमतितरामौचिती । गवाक्षविवरप्रविष्टैः किरणावयवैः किरणानामङ्गुलीतुल्यत्वादाश्रिताङ्गुलिवच्चारुता युक्तैव, पाणीनामपि दीर्घैः कतिपयैरवयवैरङ्गुलित्वता चारुता भवतीत्यपि युक्तमेवेत्यर्थः । अङ्गुलिचारुतेत्यपिपाठः । नखोऽस्त्री नखर इत्यमरः । उचितं वीप्सायां द्विरुक्तिः । प्रवेशिभिस्ताच्छील्ये आवश्यके वा णिनिः । आलिङ्गिता लिगिधातोः पक्षे कर्म्मणि ल्यट्, पक्षे निष्ठा । लिङ्गति रमणीयतया चित्तं प्राप्नोतीति गत्यर्थात् धातोः पचाद्यचि पृथ्वादेराकृतिगणत्वादिमनिच् समर्थनीयः ॥ ५३ ॥

नय नयनयोर्द्राक् पेयत्वं प्रविष्टवतीरमू-
र्भवनवलभीजालान्नाला इवार्ककराङ्गुलीः।
भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाद्य याः
पुनरपि धृताः कुन्दे किं वा न वर्द्धकिना दिवः॥ ५४॥

नयेति। भो राजन् त्वं भवनस्य गृहस्योपरि वर्त्तमानानां वलभीनां गृहविशेषाणां जालान्नाला सविवराद्धेतोर्वलभीमेवार्थात् प्रविष्टवतीरमूरर्ककररूपा अङ्गुलीर्जालप्रवेशादङ्गुलीतुल्यान् सूर्यकरान् अथच करेष्वङ्गुलीनां युक्तत्वादर्ककराणामङ्गुलीर्नाला इव कमलदण्डसदृशीर्नयनयोर्द्राक् शीघ्रं पेयत्वं गोचरत्वं नय प्रापय सादरं पश्य, लक्षितयोः कमलत्वाज्जालमार्गप्रविष्टास्त्वया विलोक्यमाना एताः खर्नेत्रकमलनाला इव जनैर्दृश्यन्त इत्यर्थः। जालानां कमलतुल्यत्वात्तन्नाला इव त्वं पश्येति वा। अमूः काः? याः भ्रमतां जालप्रविष्टकिरणमध्ये परिभ्रमतां अणूनां त्रसरेण्वादिरूपरजःकणानां गणेन समूहेन आक्रान्ता व्याप्ता अत एव दिवो वर्द्धकिना स्वर्लोकतक्षणा अशुरेण विश्वकर्मणा पुनरपि कुन्दे शाणचक्रे धृता आरोपिताः सत्यः अद्य भ्रमन्त्य इव किंवा न भान्ति अपि तु तथैव शोभन्ते। यदा भ्रमन्तः शाणघर्षणवशात् परितः पतन्तः येऽणवः शाणतेजसः कणास्तेषां गणैराक्रान्तत्वं युक्तं। विश्वकर्मणा सूर्यः शाणमारोपित इति पुराणं। नयनयोराधेयत्वमिति पाठे स एवार्थः। गुणेति पाठे गुणेन वशिमेत्यर्थः। जालात् जालावेकवचनं॥ ५४॥

दिनमिव दिवाकीर्त्तिस्तीक्ष्णैः क्षुरैः सवितुः करै-
स्तिमिरकवरीलूनां कृत्वा निशां निरदीधरत्।
स्फुरति परितः केशस्तोमैस्ततः पतयालुभिः
ध्रुवमधवलं तत्तच्छायच्छलादवनीतलं ॥ ५५॥

दिनमिति। दिवाकीर्त्तिरिव नापित इव दिवसः तीक्ष्णैः सवितुः करैरेव क्षुरैर्निशां तिमिरकवरीलूनां तमोरूपां वेणीं छिन्नमूलां कृत्वा निरदीधरत् निर्द्धारितवान्। मुण्डयित्वा क्वापि कश्चित् केशोऽवशिष्टः स्यादिति गवेषितवानित्यर्थः। अथवा बहिर्निष्क्रासयामास। नापितोऽपि व्यभिचारादिदुष्टां स्वीयां परकीयां वा स्त्रियं क्षुरैर्मुण्डयित्वा देशाद्बहिर्निष्क्रामयति। ततोऽनन्तरं तस्मात् मुण्डनाद्वा परितस्तत्र पतयालुभिरधःपतनशीलैः केशस्तोमैः कृत्वा अवनीतलं तेषां वृक्षादिपदार्थानां छाया प्रतिबिम्बं तस्य छलाद्व्याजेन ध्रुवं निश्चितं अधवलं श्यामं स्फुरति शोभते। वृक्षाद्यधोभागे कृष्णत्वं मुण्डितकवरीपतयालुकेशवृन्दसम्बन्धकृतं न तु प्रतिबिम्बकृतं इत्यर्थः। छायाव्यतिरिक्तं सर्व्वमपि तमो दिवसे सूर्यकरैर्नाशितमिति भावः। दिवाकीर्त्तिस्तु नापित इत्यमरः। कवरी जानपदेति (पा० ४।१।४२) ङीष् लूनां ल्वादिभ्य (पा० ८।२।४४) निष्ठानत्वं। निरदीधरत् धारेर्ण्यन्तात् णिश्रिद्रुस्रुभ्यः (?) चङि णौ चङ्युपधाया ह्रस्वत्वे (पा० ७।४।१) ह्रस्वत्वे अभ्यासस्य सन्वद्भावात् दीर्घो लघोरिति (पा० ७।४।९४) दीर्घः। तत्तच्छायेति विभाषा सेनेति (पा० २।४।२५) वा नपुंसकत्वं ॥ ५५ ॥

ब्रूमः शङ्खं तव नल यशः श्रेयसे स्पष्टशब्दं
यत्सोदर्यः स दिवि लिखितः स्पष्टमस्ति द्विजेन्द्रः।
अद्धा श्रद्धाकरमिह करच्छेदमप्यस्य पश्य
म्लानिस्थानं तदपि नितरां हारिणो यः कलङ्कः ॥५६॥

इदानीं शाङ्खिकानां शब्दं श्रुत्वा तद्व्याजेन नलयशोवर्णनं कुर्व्वन्ति। ब्रूम इति॥ हे नल वयं श्रेयसे मङ्गलाय स्पष्टः स्फुटः शब्दो यस्य तं शङ्खं तव यश एव ब्रूमः, त्वत्कीर्त्तिमेव शङ्खरूपतया वर्णयामः। शाङ्खिकैर्यः शङ्खो वाद्यते तत्तद्यश एव, तदुज्ज्वलतरं तव यश इत्यर्थः। शङ्खस्वनो हि मङ्गलदीपकः। त्वद्यशोऽपि लोकानां शुभाय तव पुण्यश्लोकत्वाद्भवति। यस्य शङ्खस्य यशसश्च समुद्रप्रभवत्वाच्छुभ्रतरत्वाच्च सोदर्य्यः समानोदर्य्यो भ्राता स प्रसिद्धो द्विजेन्द्रश्चन्द्रः दिवि स्पष्टं लिखितोऽस्ति निःप्रभत्वाच्चित्रलिखित इव निर्व्यापारः स्फुटोऽत्र दृश्यत इत्यर्थः। त्वमिह गगने प्रत्यूषसमये वाऽस्य चन्द्रस्य अद्धा निश्चितं श्रद्धाकरं शङ्खसहोदरत्वास्तिक्यबुद्धिजनकं करच्छेदं किरणविनाशमपि पश्य, शङ्खेऽपि किरणा न सन्ति अस्यापीदानीं न सन्ति। किञ्चास्य हरिणसम्बन्धी हारिणो यः कलङ्कस्तद्रूपं नितरां अतिशयितं म्लानेः श्यामतायाः स्थानमपि पश्य शङ्खस्याप्युदरभागे नितरां श्यामतास्ति सा चन्द्रेऽपि तस्मादपि चन्द्रस्य शङ्खसोदर्य्यत्वं निश्चितं तथा चन्द्रमपि तव यशो ब्रूम इत्यर्थः। उक्तप्रकारेण शङ्खसोदर्य्यत्वं चन्द्रस्य यद्यप्यस्ति तदपि तथाच हरिण-

सम्बन्धी यः कलङ्कस्तदस्य सुतरां स्थानिस्थानं पश्य। चन्द्रस्य शङ्खेयशङ्काभावत्वेऽपि निष्कलङ्कं शङ्खमेव तव यशो ब्रूमः। न तु सकलङ्कं चन्द्रमिति भाव इति वा। अथच हे राजन् तव यशःश्रेयसे यशोविवृद्धये सृष्टशब्दं विरचितस्तुतिवाक्यं शङ्ख-नामानं मुनिं ब्रूमः। शङ्खस्तव यशोवृद्धये स्तुतिं चकारेत्यर्थः। यस्य शङ्खमुनेः सोदर्यो भ्राता स लिखितनामा द्विजेन्द्रो ब्रा-ह्मणश्रेष्ठो दिवि स्पष्टमस्ति। इह लिखिते अङ्काकारं मत्स्यविश्वा-सकारकं अङ्का साक्षाल्लिखितं वा करयोः पाण्योः छेदं कर्त्तन-मपि पश्य। तथा हरतीति हारीतस्तस्य शङ्खस्य भ्रातुरुद्यानफ-लहर्त्तुरस्य लिखितो यः स्वकलङ्कः पापं तदेव स्थानिस्थानं पश्य। अथच श्रेयसे लोकानां कल्याणाय पुण्यश्लोको सृष्टः नल इति शब्दो यस्मिन् एवम्भूतं तव यशः शङ्खनामानमृषिं ब्रूमः समा-नधर्मत्वात्, न तु तद्भ्रातरं कलङ्कित्वात्, सोऽपि धर्मार्थं स्तुति-वाक्यानि सृष्टवान्। यस्य भ्रातेति पूर्व्ववत्। लिखितस्य चौर्य्यं हस्तच्छेदश्च भारते ज्ञातव्यः। शाङ्खिकास्तच्छ्रेयोधार्थं शङ्खं वा-दयन्ति तस्मात्क्षीणमुक्तिष्ठेति भावः। लिखितमुनिरेव दिवि ताराशङ्खो जात इति केचित्। समानोदरे शयित इत्यर्थे सोदराद् इति (पा॰ ४।४।१०८) यः। अस्मादेव निर्देशात्प्र-त्ययविवक्षायामेव विभाषोदर इति (पा॰ ६।३।८८) पाक्षिकः समानस्य सः। हारिणः सम्बन्धेऽण्। पक्षे आवश्यके णिनिः ॥ ५६ ॥

ताराशङ्खविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः
सारम्भं चलता करेण निविडां निष्पीडनां लम्भितः।
छेदार्थोपहृताम्बुकम्बुजरजोजम्बालपाण्डूभव-
च्छंखच्छित्करपत्रतामिव वहत्यस्तंगतार्द्धो विधुः॥५७॥

तारेति। विशाखानक्षत्ररूपस्य भाद्रमण्डलसम्बन्धस्य शङ्खाकारशङ्खस्य विलोपकः स्वप्रभया नाशकस्तस्य तथा जलजं कमलानि भिन्दतो विकासयतोऽथच यतस्ताराशङ्खविलोपकस्यात एव जलजं शङ्खं खण्डयतःतीक्ष्णत्विषः सूर्यस्येव शाङ्खिकशिल्पिनः सारम्भं सोद्योगं चलता प्रसरता अथच घर्षणवशात् साटोपं गमनागमने कुर्व्वता करेण रश्मिना पाणिना च निविडां निष्पीडनां बाधां दृढां यन्त्रणाञ्च लम्भितः प्रापितः अस्तं गतमर्द्धं यस्य एतादृशो विधुश्चन्द्रः शंखच्छेदसौकर्य्यार्थमुपहृतमानीतं यदम्बु जलं तस्य कम्बुजरजोजम्बालः छिद्यमानशंखसञ्जातरजश्चयकर्दमः उदकसम्बन्धाद्रजः कर्दमीभवति, तेन पाण्डूभवन्नोद्धमयत्वादधवलमपि धवलपङ्कवशात् धवलं भवत्, यच्छंखच्छित् शंखच्छेदकारि करपत्रं तद्भावं इव प्रातः समये वहति चन्द्र इत्यर्थः। शांखिकशिल्पिनो हि छेदसौकर्य्यार्थं छिद्यमानशंखादिदेशे जलं क्षिपन्ति। दृढतरग्रन्थिच्छेदादौ च करपत्रं करेण निविडं पीडयन्ति शांखादिच्छेदकरपत्रस्यार्द्धचन्द्राकारं सञ्जातरजःपङ्कपाण्डुरत्वं भवति। अस्तमितार्द्धचन्द्रस्तादृक्करपत्रतुल्यो दृश्यत इत्यर्थः। सूर्योदये शातधारा सुप्ताः कमलानि

यत्पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमा-
न्दृष्टीः पूरयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः ।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाऽऽद्रियतेतरां कविनृभिः पद्मोपमा चक्षुषः ॥ ५८ ॥

विकसितानि चन्द्रोऽर्द्धेनास्तमित इति भावः । जलजं पद्मे जा-
त्येकवचनं पाण्डुभवदिति चिः ॥ ५७ ॥

यदिति ॥ अंशुमान् पाथोजानां कमलानां विमुद्रणप्रक-
रणे उन्मीलनप्रस्तावे एव यद्यस्मात् दृष्टीर्लोकनेत्राणि निर्नि-
द्रयति विगतनिद्राः करोति उन्मीलयतीत्यर्थः । यस्माच्च हरिः
श्रीविष्णुः शिवपूजासमये एककमलन्यूनं जलरुहां कमलानां
सहस्रं स्वीयेनाक्ष्णा पूरयति स्म। तत्तस्मात् सरसीरुहां दृशामपि
वास्तवं अबाधितं साजात्यं तुल्यजातीयत्वं अस्ति । यत् साजात्यं
मूलमारोपकारणं यस्यास्तादृशी यन्निबन्धना चक्षुषः पद्मेन
सहोपमा सादृश्यं कविनृभिः कालिदासादिभिः कविभिरा-
द्रियतेतरां अत्यादरेणोपनिबध्यते। यदि नेत्राणि कमलसजा-
तीयानि नाभविष्यन् तर्हि रविः कमलोन्मीलनप्रस्तावे तानि
नोदमीलयिष्यत्, श्रीविष्णुश्च कमलसहस्रं नेत्रेण नापूरयिष्यत्,
नह्यन्यप्रस्तावेऽन्यस्य योग्यताऽस्ति, तस्मात् दृशां कमलानाञ्च सा-
जात्यं वास्तवमस्त्येवेत्यर्थः।उदितः सूर्यः कमलानि विकसितानि
सर्व्वोऽपि जनः प्रबुद्धः, तस्मात् त्वमपि प्रबुद्धस्वेति भावः । विष्णुः
स्वचक्षुषा कमलसहस्रं पूरितवानिति लिङ्गपुराणादौ द्रष्टव्यं।

अवैमि कमलाकरे निखिलयामिनीयामिक-
श्रियं श्रयति यत् पुरा विततपत्त्रनेत्रोदरं।
तदेव कुमुदं पुनर्दिनमवाप्य गर्भभ्रम-
द्विरेफरवघोरणाघनमुपैति निद्रामुदं ॥५९॥

विमुद्रणेति विगतमुद्रं करोतीत्यर्थे ण्यन्ताद्भावे ल्युट्। निर्निद्र-यतीति तत्करोतीति णिच्, पूरयतीत्यत्रापि। समाना जातिः साजात्यमिति विग्रहे चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् समानस्येति योगविभागात् समानस्य सः। वास्तवं आगतार्थे सम्बन्धे वा अण्। तत्त्वपर्य्यायात् वस्तुशब्दात् प्रज्ञादित्वात् स्वार्थे वा। पद्मो-पमा पद्मीसमासः॥ ५८॥

अवैमीति। यत्कुमुदं कमलानामाकरे देवखातसरसि वा अथ च कमलायाः लक्ष्म्याः आकरे गृहे कोषागारे विततं विस्तारितं पत्त्ररूपनेत्राणामुदरं येन विततानि पत्त्राण्येव नेत्रमध्यानि येन तत्। विकस्वरं अथ च प्रसारितपत्त्रनेत्रोदरं उन्मीलितनेत्रं सत् निखिलयामिन्याः सकलाया रात्र्याः सम्ब-न्धिनो यामिकस्य रात्रिचतुःप्रहरप्राहरिकस्य सकलरात्रिजा-गरूकस्य श्रियं शोभां पुरा श्रयति अशिश्रयत्। सायमारभ्य सूर्योदयावधि यद्विकसितमभूत्। अथ च सकलां रात्रिं जजा-गार, तदेव कैरवं पुनरिदानीं दिनमवाप्य गर्भे भ्रमन्तः सूर्य-किरणसङ्गमजातशोषसङ्कोचवशान्निर्गन्तुमशक्नोरन्तःसञ्चारिणो द्विरेफास्तेषां निर्यन्धमध्यातो रवसाद्रूपा या घोरणा प्रसुप्त-

इह किमुपसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः ।
भण फणिभवशास्त्रे तातङः स्थानिनौ का-
विति विहिततुहीवागुत्तरः कोकिलोऽभूत् ॥ ६० ॥

घर्घरा खाण्डवरस्तया घनं निविडं यथा तथा निद्रामुदं निद्रासम्बन्धिसुखं उपैति, अन्तर्गतभ्रमरं मत् मङ्कुचतीत्यर्थः । अथ च यः कोपागारे सकलां रात्रिं जागर्त्ति स दिवसे घोरणाघनं यथा तथा निद्रातीत्यर्थः । इत्यहमवैमि मन्ये । पुराश्रयतीति पुरिलुङ्चास्मे (पा० ३।२।१२२) इति भूते लट् । घोरणेति घुरेधातोर्णिजन्तात् युच् ॥ ५८ ॥

इहेति । इह प्रभाते पृच्छाशंसिनः प्रश्नवाचिनः किमशब्दस्य प्रथमान्तं रूपं तेनैव प्रतिनियमिता प्रतिक्षणं शब्दान्तरभाषणाद् व्यावर्त्तिता वागेन कौ कौ इति नियतभाषिणा वायसेन काकेन फणिनः शेषाद्भवमुत्पन्नं महाभाष्यलक्षणं शास्त्रं पाणिनीयमिति यावत् । तत्र तातङ्लक्षणस्यादेशस्य स्थानिनौ आदेशिनौ कौ भण कथयेति पृष्टः छतप्रश्न एषः कोकिलः विहिता छता या तुहीति वाक् सैवोत्तरं यस्यैवम्भूतोऽभूत् । किं काकः प्रातः स्वभावत एव कौ काविति वदति कोकिलस्य तुही तुहीति । काकः स्वभावात् कौ काविति प्रथमद्वितीयवचनान्तं प्रश्नशब्दं ब्रूते । कोकिलश्च तुही तुही इति तयोरेषा तुश्च हिश्च तुही तुह्योस्तातङाशिष्यन्यतरस्यामिति पाणिनिसूत्रक्र-

दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः
कण्ठे शब्दौघसिद्धिक्षतवक्रकठिनी शेषभूषानुयातः।
सर्वं विस्मृत्य दैवात् स्मृतिमुषसि गतां घोषयन्यो घुसंज्ञां
प्राक्संस्कारेण सम्प्रत्यपि घुवति गिरः पट्टिकापाठनेन॥६१॥

रणशीलः सन् तु हि स्थाने तातङोविधानात्तुहीति तातङः स्थानिनाविल्युत्तरं कोकिलो दत्तवान् किं। प्रभातं जातं काकादयः शब्दायन्त इति भावः। सूत्रवार्त्तिकयोर्महाभाष्येणैव दार्ढ्यापादनात् फणिभवेत्युक्तं। स्थानं प्रसङ्गः सोऽस्त्यनयोरिति स्थानिनौ अत इनीति इनिप्रत्ययः (पा०५।२।११५)॥ ६०॥

दाक्षीति। अयं आकर्ण्यमानः कोपि शब्दः कोपि कश्चित् कपोतः घुकलक्षणः पक्षी दाक्षीपुत्रस्य इक्षगोत्रसञ्जातमातृकस्य पाणिनेस्तन्त्रे पाणिनीयव्याकरणे अधीतं पठनमस्यास्तीति अधीती पठितपाणिनीयव्याकरणोऽभवत्। अनेकेषु पाणिनिशिष्येषु मध्ये कोऽपि कपोतरूपः शिष्योऽभूत् ध्रुवमित्यहमुत्प्रेक्षे। किम्भूतः तदध्ययनवशादेव कण्ठे देवादिशब्दौघानां सिद्धये उदाहरणसाधनाय क्षता घृष्टा वक्री कठिनी खट्टिका तस्याः शेषः अङ्गुलीलग्नोऽवशिष्टभागस्तद्रूपया भूषयाऽनुयातः सम्बद्धः खट्टिकाशेषरेखया कण्ठेऽलेखत् इत्यर्थः।बालादिभिः पट्टिकादौ खट्टिकया लिखितं पठित्वा सरस्वतीबुद्ध्या सायं लिपिप्रोञ्छसमाङ्गुलिलग्नखटिकादिरजसा कण्ठे रेखां रचयन्तीति लोकरीतिः। कपोतस्य कण्ठः स्वभावेनैव धूसरो भवति। यः कपोतः सर्व्वमपि शास्त्रं

पौरस्त्यायां घुसृणसुमनःश्रीजुषो वैजयन्त्याः
स्तोमैश्चित्तं हरति हरिति चीरकण्ठैर्मयूखैः ।

विस्मृत्य दैवात् स्मृतिं गतां उपसि प्रातःस्मृतां दाधाघ्वदाविति पाणिनिकृतां घुसंज्ञां पुनर्विस्मरणभिया घोषयन् पुनः पुनः पठन् सन् भूयसि कालेऽतीतेऽपि सम्प्रत्यपि प्राक् काष्टघटितपट्टिकालिखितसूत्रपाठादिपाठनेन संस्कारेण पटुतराभ्यासाहितवासनया शिरो धुवति, विस्मृतस्य प्रातःस्मृतिर्भवति । कपोतस्य प्रातर्घुशब्दं करोति, शिरश्च कम्पयति, तस्मादियमुत्प्रेक्षा । बालाश्च शालासु काष्ठघटितपट्टिकासु खटिकादिलिखितं धवलाकारं सूत्रपाठादि आवेशेन घोषयन्तः शिरः कम्पयन्ति । योऽपि विस्मृतं पुनः स्मरति सोऽपि शिरः कम्पयति । इतश्चापत्यं अत इञ् (पा० ४।१।९५) इतो मनुष्यजातेरिति (पा० ४।१।६५) ङीप् तन्वोक्तस्य विषयस्य कर्मणि सप्तमी । अधीतमनेनेत्यधीती इष्टादेराकृतिगणत्वादिनिः । घोषयन् चौरादिकात् घुषेः शता । धुवति तौदादिकात् धूञ्कम्पने इत्यस्माच्छ्म्यङित्वाद्गुणनिषेधे उवङ् ॥ ६१ ॥

पौरस्त्यायामिति । जाम्बूनदतनुः उत्तमसुवर्णतुल्यस्वरूपो ऽतएव यज्ञमेधस्य वैजयन्तास्यस्योपरिवर्त्ती सुवर्णकलशरूपो ऽसौ भानुः पौरस्त्यायां हरिति प्राच्यां दिशि कुङ्कुमेन युक्तायाः कुङ्कुमवदा सुमनसः श्रीः शोभा तां जुषो भजन्त्या वैजयन्त्याः पताकायाः स्तोमैः सङ्घरूपैः चौरयुक्तकण्ठैर्लक्षणयाऽतिवालैर्म-

भानुर्जाम्बूनदतनुरसौ शक्रसौधस्य कुम्भः
स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ॥ ६२ ॥

पूर्वे. कृत्वा चित्तं हरति। इन्द्रसौधस्योपरि वर्त्तमाना बालतराः सूर्यकिरणास्तदीयरक्तपताकासमूहा इव, सूर्यश्च स्वर्णकलश इव शोभत इत्यर्थः। राजादिप्रासादेषु हि रक्ता भूयस्यः पताकाः सुवर्णकलशाश्च वर्त्तन्ते। यतोऽयं इन्द्रसौधस्य स्वर्णकुम्भरूपोऽत एवैतस्माद्भवाभिरुत्पन्नाभिर्भाभिः कर्त्रीभिः तिमिररूपोऽतिश्यामो जलधिस्तस्य यत्पानं ग्रासेन तिरोधापनं तत् स्थाने नितरामुचितं। कुम्भोद्भवो ह्यगस्त्यः पूर्वंसमुद्रमधात्, अतः तासामपि भानुरूपकुम्भोद्भवत्वात् समुद्रपानं युक्तमित्यर्थः। सूर्य ऊर्ध्वमागतस्तिमिरञ्च सर्व्वं निरस्तमिति भावः। तोकैरिति पाठे तोकमपत्यं पताकाया अपत्यरूपैस्तत्सदृशैरित्यर्थः। पौरस्त्या पुरोदेशे भवा दक्षिणपश्चात्पुरसस्त्यगिति (पा० ४।२।९८) त्यक् किति चेति (पा० ७।२।११८) वृद्धिः। कर्तृकर्मणोः कृतीति (पा० २।३।६५) कर्तरि प्राप्तापि षष्ठी उभयप्राप्तौ कर्मणीति (पा० २।३।६६) नियमेन व्यावर्त्तितत्वात् तिमिरजलधेरित्यत्रैव भवति। भाभिरित्यत्र तु कर्त्तरि तृतीयैव ॥ ६२ ॥

द्वित्रैरेव तमस्तमालगहनग्रासे द्रवीभावुकै-
स्त्रैरस्य सहस्रपत्रसदसि व्यश्राणि वस्त्रोत्सवः।
घर्माणां रयचुम्बिनं वितनुते तत् पिष्टपिष्टीकृत-
क्ष्मादिग्व्योमतमोऽघमोघमधुना मोघं निदाघद्युतिः॥ ६३॥

द्वित्रैरिति। तमस्तमालानां तिमिररूपातिश्यामलतरुविशेषाणां गहनस्य गाम्भीर्यस्यैव ग्रासे विनाशे द्रवीभावुकैर्वनवञ्जितां व्रजद्भिः द्वित्रैरल्पसङ्ख्यैरेव अस्य सूर्यस्योस्रैः किरणैः सहस्रपत्राणां सदसि आकरे वस्त्रोत्सवः दिनसम्बन्धी हर्षो विकासो यस्माद्व्यश्राणि वितीर्णः तत्तस्मात् कारणान्निदाघद्युतिः सूर्यः घर्माणामुष्णानां किरणानां ओघं समूहं अधुना द्वित्रैरेव करैस्तमोविनाशे पद्मविकासे च जाते रयचुम्बिनं वेगवत्तरं मोघं निष्फलं वितनुते विस्तारयति। किम्भूतं अतएव पिष्टं पिष्टं अतस्ततकृतं पिष्टपिष्टीकृतं अत्यन्तचूर्णीकृतं क्ष्मादिग्व्योम्नां भूदिगाकाशानां तम एवाघं मालिन्यात्पातकं येन। तिमिरविनाशस्य कमलविकाशस्य च द्वित्रैरेव किरणैस्तत्करणे पिष्टपेषणवदैयर्थमित्यर्थः। दवदावौ वनारण्यवह्नौ किरणोस्रमयूखेत्यादि, घस्रो दिनाहनी इत्यादयमरः। द्वित्रैः द्वौ त्रयो वा द्वित्राः सङ्ख्ययेति (पा०२।२।२५) बहुव्रीहौ, बहुव्रीहौ सङ्ख्येय इति (पा०५।४।७३) डच्। द्रवीभावुकै भुवो लषपतपदेति (पा०३।२।१५४) ताच्छील्यादावुकञ्। व्यश्राणि दानार्थाच्छ्रणतेश्चौरादिकात्कर्मणि चिण्।

दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानु-
र्भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयं।
न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानं
द्यामद्यापि द्युमणिकिरणश्रेणयः शोणयन्ति॥ ६४॥

रयचुम्बितं पिष्टपिष्टीकृतमिति च कर्म्मणि भावे वा निष्ठा ॥ ६३ ॥

दूरेति। अयं भानुः तिमिरजलधेस्तमःसमुद्रस्य शोषकत्वाद्वाडवो बडवानलरूपश्चित्रभानुरग्निस्तथा ताम्यन्त्याः खिद्यन्त्या वनरुहवन्याः कमलवन्या एव कान्तायाः केल्या क्रीडया वैहासिकः परिहासकः क्रीडानर्मकारी,हेलामात्रेण विकाशक इत्यर्थः। तथा दूरं गगनमार्गमारूढ ऊर्ध्वमागतः एवम्भूतः सन् स्वात्मीयं स्वीयतेजोरूपत्वात् सहजं भास्वरं श्वेतिमानं स्वपरप्रकाशकं शुक्लभास्वररूपत्वमद्यापि दूरारूढत्वेऽपि किमिति कुतो न दधते धारयति, तथा द्युमणेः सूर्य्यस्य किरणश्रेणयश्चाद्यापि द्यां गगनं किमिति न शोणयन्ति रक्तीकुर्व्वन्तीति प्रश्नद्वयं। यद्वा स्वीयं रूपं रविर्न धत्त इति कुतो ज्ञातमित्याशङ्क्य प्रत्यक्षं प्रमाणयति, यस्मादद्यापि सूर्य्यकिरणपंक्तयः शोणयन्ति तस्माद्भास्वरश्वेतिमा सूर्य्येण न धृत इति ज्ञायत इत्यर्थः। एवंविशिष्टः सूर्य्यो दूरारूढः सञ्जातस्तस्मादद्यापि सूर्य्यकिरणाः स्वीयं शुक्लभास्वरत्वं किमिति न दधते न धारयन्ति। ऊर्द्धमागतः सूर्य्यः कमलानि च विकसितानि तस्माच्छीघ्रमुत्तिष्ठेति भावः।

प्रातर्वर्णनयाऽनया निजवपुर्भूषाप्रसादानदा-
द्देवी वः परितोषितेति निहितामान्तःपुरीभिः पुरः।
स्रुता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीं॥ ६५॥

चित्रभानुर्विभावसुरित्यमरः। दूरारूढः गम्यादिदर्शनात्सभासः। वैहामिक इति विहामे नियुक्तः सप्रयोजनं शिल्पमस्येति। तत्र नियुक्त (पा॰ ४।४।६८) इति वा शिल्पमिति (पा॰ ४।४। ५५) ठक्। प्रयोजनमिति (पा॰५।१।१०८) ठञ्। खात्मीयं वृद्धाच्छः (पा॰ ४।२।११४)। दधते दधधारण इत्यस्यैकवचनान्तं धाञश्च बहुवचनान्तश्चेति। श्वेतिमा पृथ्वादिः। श्रोणं कुर्व्वन्तीति तत्करोतीति ण्यन्ताषाविष्टवद्भावः पुंवद्भावः टिलोपो वा॥ ६४॥

प्रातरिति। स्रुता मण्डनमण्डलीं भूषणश्रेणीं परिदधुः तत्तदस्वर्णाद्यवयवेषु धारयामासुः। किम्भूतां आन्तःपुरीभिरवरोधमध्यारिणीभिः सखीभिरित्युक्ता पुरो मागधानामग्रे निहितां स्थापितां। इति किं। हे मागधाः अनया प्रातर्वर्णनया प्रयोजिकया परितोषिता नितरां सन्तोषं प्रापिता देवी कृताभिषेका राज्ञी भैमी निजवपुर्भूषाः स्वीयशरीरालङ्कारभूतानेकविधसुवर्णमणिप्रभृतीनि भूषणान्येव प्रसादान् पारितोषिकाणि वो युष्मभ्यं अदादिति। पुनः किम्भूतां माणिक्यरोचिर्मयया पद्मरागप्रभारूपया क्रोधस्य आवेगः आडम्बरस्तेन

आगच्छन्भणतामुषः क्षणमथातिथ्यं दृशोरानशे
स्वर्गङ्गाम्बुनि वन्दिनां कृतदिनारम्भास्तुतिर्भूपतिः।
आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतुक-
प्राप्तं नैरवरागतैरविदितप्रासादतो निर्गमः॥ ६६॥

सरागलोचनरुचा अरुणनेत्ररुचा कृत्वा दारिद्र्यस्य विद्राविणीं पलायनकारिणीं मयि स्थितायामप्यत्र त्वं कथं नाम स्थातुमिच्छसि इति क्रुद्धयाऽनया माणिक्यप्रभारूपनेत्रारुणकान्त्या कृत्वा दारिद्र्यं दूरादपसारितं। एवं प्रभातवर्णने क्रियमाणे भैम्या निजशरीरभूषणैस्ते सम्मानिता इत्यर्थः। अन्योऽपि रोषारुणलोचनरुचा किञ्चिद्विद्रावयति। आन्तःपुरीभिरिति बहुत्वेन माणिक्येत्यादिना भूषणानां भूयस्त्वममूल्यत्वञ्च सूचितं। देवी अद्यादित्यनेन च नलः स्नानार्थं गतः प्रासादे नास्तीति सूचितं। प्रातर्नृत्तपट्टीकमध्ययं। परितोषिता व्यन्तान्विष्टा। आन्तःपुरीभिः सम्बन्धेऽण्। अन्तःपुरिकेति पाठे अन्तःपुरशब्दात् अन्तःपूर्व्वपदाट्ठञिति (पा० ४।३।६०) भवार्थे ठञ्। रोचिर्मयेति स्त्रियाः पुंवदिति (पा० ४।३।३४) पुंवत्॥ ६५॥

आगच्छदिति। भूपतिर्नलः वन्दिनां दृशोरातिथ्यं प्रेक्षणविशेषद्योतितप्रेमभक्तियाऽऽभ्र्येम गोचरत्वं आनशे लेभे। किम्भूतानां क्षणमात्रमुषः प्रभातसमयं भणतां वर्णयतां। किम्भूतः स्वर्गङ्गाम्बुनि मन्दाकिनीजले कृतदिनारम्भास्तुतिः कृतप्रातःस्नानः, तथा अवरागतैर्नलवर्दिगंगमानन्तरमागतैर्भीमागधै-

रविद्वितोऽज्ञातः प्रासादतो निर्गमः राजगृहाद्बहिर्निर्गमो यस्य। तथा प्रियायोतुके भैमीपाणिग्रहणसमये कन्यादानप्रतिष्ठाङ्गतया दोयमाने वस्तुनि मध्ये प्राप्तं अतिपुष्पकं अतिक्रान्तपुष्पकाख्यकुवेरविमानं अतिरमणीयवेगवत्तरं सर्व्वत्राप्रतिहतगमनञ्च रथमधिष्ठायारूढ़ानन्दाञ्जवातिशयसञ्जातहर्षादागच्छन्। मागधागमनात् पूर्व्वं न तु वर्णनानन्तरं प्रबुद्धः प्रासादान्निर्गच्छन्नित्यर्थः। अतएव भैम्येवेति सम्मानिता इति पूर्व्वश्लोके उक्तं। तस्याः परमधार्म्मिकत्वं सूचितं। क्षतदिनारम्भानुतिरागच्छन्नित्यनेन वक्ष्यमाणभैमीप्रत्युद्गमनं उत्तरसर्गकृतिश्च सूचिता। नलस्य पुण्यश्लोकत्वात् सर्व्वत्राप्रतिहतत्वात् तस्य च रथस्य पूर्व्वमेव सुसह्याद्रिसमुद्रकापथमित्यादिना सर्व्वत्राप्रतिहतगतिर्लोकेश्च। अतिपुष्पकत्वोक्तेः स्वर्गगमनोक्तिर्युक्तैव। आनशे अश्नोतेरेति (पा०७।४।७२) नुट्। अतिपुष्पकं अत्यादयः क्रान्ताद्यर्थ इति (पा०२।२।१८।वा०५) समासः। रथं अधिशीङ्स्थासामित्याधारस्य (पा०१।४।४६) कर्मत्वं। यौतकप्राप्तमिति पाठे कर्तृकरणेति (पा०२।१।३२) समासः। अपरागतैः काला इति (पा०२।१।२८) द्वितीया समासः। प्रासादतो निर्गमः पञ्चमीतियोगविभागात् समासः पश्चाद्बहुव्रीहिः ॥ ६६ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
एका न त्यजतो नवार्थघटनामेकान्नविंशे महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः॥६७॥

श्रीहर्षमिति। पूर्वार्धः पूर्ववत्॥ मुख्यां नवार्थघटनां नवार्थनिर्मितिमत्यजतोऽमुञ्चतः नूतनमेव प्रमेयं सर्व्वत्र वदतः श्रीहर्षस्य। एकान्नविंशः विंशतेः पूरण इत्यर्थे डटि विंशतेर्डितीति (पा० । ।) लोपे च विंशः। तत एको नविंश इति, तृतीयेति योगविभागात् समासे एकादिसैकस्य वाऽदुगिति (पा०६।३।७६) नञः प्रकृतिभावः एकशब्दस्यादुगागमश्च ॥ ६७ ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे एकान्नविंशः सर्गः॥

उत्तरनैषधचरिते ।

विंशः सर्गः ।

श्रीलक्ष्मीनृसिंहो जयत ।

सौधाद्रिकुट्टिमानेकधातुकाधित्यकातटम् ।
स प्राप रथपाथोभृद्वातजातजवो दिवः ॥ १ ॥
ततः प्रत्युदगाद्भैमी कान्तमायान्तमन्तिकं ।
प्रतिचीं सिन्धुवीचीव, दिनोद्धारे सुधाकरम् ॥ २ ॥

सौधेति । सर्गसङ्गतिरुक्तैव । स, रथ एव पाथोभृत् मेघः दिवः स्वर्गात् गगनाच्च सौधो राजसदनमेवाद्रिस्तस्य कुट्टिमः नानावर्णानेकमणिबद्धभूमिः सैवानेकधातुका नानाविधगैरिकादिधातुयुक्ताऽधित्यकोर्द्ध्वभूमिस्तस्यास्तट पर्यन्तप्रदेशं प्राप । किंभूतः वातात् सकाशादधिको जातो जवो वेगो यस्य । यद्वा जातो जवो यस्य स जातजवः वातो जातजवो यस्माद्वेतोः तेनापि यस्माद्रथात् सकाशाद्वेगः शिचितः, अथवा तेन जातवेगः मेघोऽपि उक्तविशेषणविशिष्टो पर्व्वतोर्द्ध्वदेशं गगनात् पतति । धातुकेति शेषादिभाषेति (पा॰५।४।१५४) कप् ॥ १ ॥

तत इति । ततः सौधोर्द्ध्वभूमिप्राप्यनन्तरं दिनोद्धारे दिनप्रारम्भे प्रभाते अन्तिकं आयान्तं सुधाकरं चन्द्रं प्रतीचीसिन्धुवीचीव पश्चिमदिक्समुद्रलहरीव भैमी रथादवतीर्य्यान्तिकं

स दूरमादरं तस्या वदने मदनैकदृक्।
दृष्टमन्दाकिनीहेमारविन्दश्रीरविन्दत ॥ ३ ॥
तेन स्वदेशसन्देशमर्पितं सा करोदरे।
बभ्राजे बिभ्रती पद्मं पद्मेवोन्निद्रपद्मदृक् ॥ ४ ॥

गृहपरिसरप्रदेशमागच्छन्तं कान्तं नलं प्रति लघीलत्योदगात् प्रत्युज्जगाम। एतेन भैम्या नले आदरातिशयः सूचितः अन्तिक इत्यपि पाठः। अधिकरणे चेति चकारबलात् दूरान्तिकार्थेभ्योऽपि सप्तमीविधानात् सप्तमी। वीची कृदिकारादिति ङीष् (पा० ४।१।४५।वा०) दिनौकारे ओमाङोश्चेति (पा० ६।८५) पररूपम् ॥ २ ॥

स इति। दृष्टा मन्दाकिन्याः हेमारविन्दश्रीर्येन एवम्भूतः स नलः तस्या वदने दूरं स्वर्णकमलादपि नितरामादरं अविन्दत लेभे, अतएव मदने एका केवला मुख्या वा दृक् यस्य सः, स्वर्णकमलादप्यधिकं तत् दृष्ट्वा स सम्भोगवासनयाऽपश्यदित्यर्थः। एका दृग्यस्येति एकदृक् मदने एकदृक् सप्तमीति योगविभागात् समासः। माद्यति मदर्यो भवतीति मदनः नन्द्यादित्वात् ल्युः ततः समानाधिकरणे वा यड्मीहिः ॥ ३ ॥

तेनेति। सा पद्मेव श्रीरिव बभ्राजे, किम्भूता स्वदेशस्यागमनसमये मन्दाकिनीस्वर्णकमलं मम क्रीडार्थमानेयमिति सन्देशरूपं पद्मं तेन नलेनार्पितं दत्तं करोदरे बिभ्रती, तथा हर्षादुन्निद्रपद्मदृक् विकसितकमलतुल्यनेत्रा लक्ष्मीरपि करे पद्मं

प्रियेणाल्पमपि प्रत्तं बहु मेनेतरामसौ।
एकलक्षतया दध्यौ यत्तमेकवराटकम्॥ ५॥
प्रेयसाऽवादि सा तन्वी त्वदालिङ्गनविघ्नकृत्।
समाप्यतां विधिः शेषः क्लेशश्चेन्नसि चेन्न ते॥ ६॥

धारयति प्रमादादिकमितपद्मदृक् भवति। मन्देशः कर्मणि घञ्॥ ४॥

प्रियेति। असौ भैमी प्रियेण प्रेम्णा दत्तं एककमलरूपत्वात् अल्पमपि बहु मेनेतरां नितरां बहु मेने। यद्यस्माद्धेतोरेको मुख्यः वराटको बीजकोशो यस्य तं पद्मं एकमेव लक्षं नयनविषयो यस्य यस्मा वा तद्भावेन वस्तुविलोकनपरित्यागेन तदेकपरतयाऽत्यादरेण दध्यौ, अचिन्तयत्, शोभां पुनः पुनरपश्यदित्यर्थः। अथ च यदल्पमपि दत्तं बहुतरं न मन्येत तदेकस्वामी वराटकस्य तमेककपर्दकमपि एकलक्षसंख्यापरिमितद्रव्यत्वेन न ध्यायेदिति श्लेषप्रतिभोत्थार्थापत्तिः। तेन प्रेम्णा स्वर्णकमलदानात् 'रमन्ति हि प्रेम्णि गुणा न वस्तुनि' इति न्यायेन तत् स्वर्णकमलं लक्षकोटिपरार्द्धद्रव्यादपि नितरामधिकं मेने इति भावः। प्रियपदेन प्रेमभरः सूचितः। पद्मस्य पुंलिङ्गत्वात्तमिति पुंनिर्देशः॥ ५॥

प्रेयसेति। प्रेयसा नलेन सा भैमी इत्यवादि उक्ता। इति किं। हे तन्वि कृशाङ्गि तवालिङ्गनविघ्नं करोतीति कृत् स शेषः स्नानसन्ध्यानन्तरकरणीयत्वेनावशिष्टः श्रुतिस्मृत्युक्ताऽनतिक्रमणीयो

क्वैतावान्नर्ममर्मविद्विद्यते विधिरद्य ते।
इति तं मनसा रोषाद्वोचद्वचसा न सा ॥ ७॥

नित्याग्निहोत्रादिरूपो विधिर्मया समाप्यतां परिपूर्णक्रियतां तदेव वदेति सामप्रश्नः। परं यदि ते चेतसि आश्लेषविलम्बवशात् क्लेशः खेदस्तेन्न भवेत् समागतेनाश्लेषलोलुपेन मया भवदाश्लेषः कर्त्तव्यः। परं अन्तरा यस्तपःशेषो विधिरस्ति स पुनः प्रसन्नचित्तत्वेन यदनुजानासि तर्ह्येव समाप्तिं नेष्यते नान्यथेत्यर्थः। भैमीकर्मकालिङ्गनविषयमेतत्, भैमीकर्तृकालिङ्गनविषये अनालिङ्गनखिन्नां तां प्रत्येवं तेन प्रार्थना कृतेति भावः। विधेः शेष इत्यपि पाठः ॥ ६ ॥

क्वेति। असौ भैमी इति रोषात् ईर्ष्यया तं मनसैवावोचत् मनस्येवमेवाचिन्तयत्, न वचसा साक्षादवोचेत्यर्थः। इति किं। हे प्रिय नर्ममर्मवित् आलिङ्गनादिकेलिरहस्यभेदी एतावान् अतिवकुलः अद्यापि ते तव विधिः क्व कुतः, कियति वा काले, विद्यते अपि तु नास्त्येव। सर्व्वोऽपि विधिस्तथाचरित एव केवलं ममालिङ्गनार्थं जात्युत्तरमात्रमेतत्। यद्वा अद्यैतावान् क्व विद्यते, अपि तु नास्त्येव। पूर्व्वं कदाप्येतावतो विधेरदर्शनात्। इदमपि जात्युत्तरमेवेत्यर्थः। रोषार्थः रोषवशात्मन्ज्ञावशाद्वा सा साक्षान्न बभाष इत्यर्थः। मनोरणमेव मम करोरोपीति रुष्टाऽभूदिति भावः। नर्ममर्म विध्यति इति व्यधेः क्विपि नम्रमारणे च नहि वृतीति (पा॰६।३।११६) पूर्व्वपदस्य दीर्घः ॥ ७ ॥

क्षणविच्छेदकादेव विधेर्मुग्धे विरज्यसि।
विच्छेत्ताऽहं चिरं न त्वा हृदाऽऽह स्म तदा कलिः ॥ ८ ॥
सावज्ञेवाथ सा राज्ञः सखीं पद्ममुखीमगात्।
लक्ष्मीः कुमुदकेदारादारादम्भोजिनीमिव ॥ ९ ॥

क्षणेति। तदा भैमीचिन्तावसरे ग्टहारामस्थ विभीतकनिवासी कलिः हृदा मनसा इति आह स्म अवोचत्। इति किं। हे मुग्धे मूढे भैमि क्षणविच्छेदकात् क्षणमात्रवियोगकात् विधेर्नित्यकर्मण एव हेतोस्त्वं विरज्यसे उद्विग्ना भवसीति काकुप्रश्नः। एतावता उद्वेगो न कार्य्य इत्यर्थः। यतोऽहं कलिस्त्वा त्वां चिरं बहुकालं न विच्छेत्ता त्वां विच्छेदभाजां न करिष्यामि, अपि तु वियोजयिष्याम्येवेति। एवमहं करिष्यामि न जानासीति सप्रतिभं मनोरथमकरोदित्यर्थः। भावी वियोगः सूचितः। विच्छेता ताच्छील्ये तृन्। त्वेति त्वमाविति (पा० ७।२।९७) त्वादेशः ॥ ८ ॥

सावज्ञेति। अथ एवं नलवाक्यश्रवणोद्वेगानन्तरं सा भैमी नलेन अमालिङ्गनात् स्वयमारब्धालिङ्गनानङ्गीकाराद्वा सावज्ञेव सापमानेव सती पद्ममुखीं नलात् सकाशाङ्गैम्यागमनमज्ञातहर्षत्वादिकमितकमलतुल्यवदनां सखीं कलानाम्नीं अगात् प्रतिजगाम। का कस्मात् कामिव। लक्ष्मीःकुमुदानां केदारात् क्षेत्रात् आरान्निकटे पद्मरूपवदनां अम्भोजिनीं कमलिनीमिवेत्युपमा। लक्ष्मीनिर्गमे च कुमुदक्षेत्रस्य यथा म्लानत्वं तथा

ममासावपि मा सम्भूत् कलिद्वापरवत्परः।
इतीव नित्यसत्रे तां स त्रेतां पर्य्यतूतुपत्॥ १०॥
क्रियां प्राक्तेतनीं कृत्वा निषेधन् पाणिना सखीं।
कराभ्यां पृष्ठगस्तस्या न्यमीमिलदसौ दृशौ॥ ११॥

भैमीनिर्गमे नलस्य, अम्भोजिन्याश्च लक्ष्म्यागमनानन्तरं यथा हर्षस्तथा भैम्यागमनानन्तरं सख्या इति सूचितमुपमया॥ ८॥

ममेति। स नलः इतीव हेतोर्नित्यसत्रे नित्याग्निहोत्रे विषये तां आहवनीयगार्हपत्यदक्षिणाग्निरूपेण प्रसिद्धां त्रेतां, अथ च त्रेताख्यं द्वितीयं युगं आज्यादिना पर्य्यतूतुपत् परितोषितवान् पूजितवांश्च। इति किं। असौ त्रेताऽपि कलिद्वापरवत् मम परः शत्रुर्मा सम्भूत्, इति। अग्नित्रयसम्यपूजनेऽहितकारित्वाच्छत्रुरेव भवति, एतेन चाकरणे प्रत्यवायभियैव नित्याग्निहोत्रमकरोत् तत्वतस्तु भैमीपरवश एवाभूदिति भावः। त्रेता त्वग्नित्रये युगे इत्यमरः। अतूतुपत् णौचङ्युपधा ह्रस्वः (पा० ७।४।१)॥१०॥

क्रियामिति। दमयन्त्या इति। युग्मम्। असौ नलः पृष्ठगः सन् कराभ्यां तस्या दृशौ न्यमीमिलत् पिदधौ। किं कृत्वा प्राक्तेतनीं प्राभातिकीं अर्चाऽग्निहोत्रादिक्रियां कृत्वा, किं कुर्व्वन् पाणिनाऽहमागत इति तस्या अग्रे भवत्या न कथनीयमिति करसंज्ञयैव सखीं निषेधयन्, अत एव सहास्याभिर्नलस्य सम्मुखीभिः दमयन्त्या वयस्याभिः समीक्षितः। तथा किं कुर्व्वन्निव प्रद-क्षिणां करद्वयमुक्ताभ्यां प्रेयसीदृशोरिदपरिमाणमितयोर्दैर्घ्य-

दमयन्त्या वयस्याभिः सहास्याभिः समीक्षितः।
प्रसृतिभ्यामिवायामं मापयन् प्रेयसीदृशोः॥ १२॥
तर्किताऽऽलि त्वमित्यर्द्धवाणीका पाणिमोचनात्।
ज्ञातस्पर्शान्तरा मौनमानशे मानसेविनी॥ १३॥
साऽवादि सुतनुस्तेन कोपस्ते नायमौचिती।
त्वां प्राप्तं यत्प्रसादेन प्रिये तन्नाद्रिये तपः॥ १४॥

मायामं मापयन्निव। क्रीडाकारिणामियं जातिः। युग्मपाणिनि करप्रसृतिरित्यमरः। प्रसृतिप्रमाणे दृशाविति सूचितं। प्राक्तनीं मायं चिरमिति(पा० ४।३।२३) युट् टित्वान्ङीप् मोलेरकर्मकत्वाद्गतिबुद्धीत्यादिना अणौ कर्तुर्णौ कर्मत्वात् दृशाविति द्वितीया। मापयन् मा माने अस्माद्धेतुमण्णिचि शता॥ ११॥ १२॥

तर्कितेति। हे आलि सखि मया नेत्रपिधायनी त्वं तर्किता ज्ञातासीत्येवंरूपाऽर्द्धा मां मुञ्चेत्याद्यवचनात् अपरिपूर्णपदा वाणी यस्याः तथा स्वकराभ्यां नलपाणेर्मोचनहेतोः ज्ञातं स्पर्शान्तरं स्वीयस्पर्शादिलक्षणो नलस्पर्श इति यया ज्ञातस्पर्शमन्तरं चेतो यस्या इति वा। सा मौनमानशे प्राप। यतो मानसेविनी मानिनी। स्पर्शेन नलं ज्ञात्वा मामवज्ञाय नेत्रयोर्मनुष्यकोऽधुना स्पृष्टैव किमित्यागत इत्यभिमानात् किमपि नावददित्यर्थः। वाणीकेति नद्यन्तत्वात् नद्यृतश्चेति (पा० ५।४।१५३) कप्॥ १३॥

सेति। तेन नलेन सुतनुः शुभाङ्गी सा इति अवादि उक्ता। अयि प्रिये भैमि ते तवायं मयि कोपो नौचितो। औचितीशब्द-

निशि दास्यङ्गतोऽपि त्वां स्नात्वा यन्नाभ्यवीवदं।
तं प्रवृत्ताऽसि मन्तुं चेन्मन्तुं तद्वद वन्द्यसे ॥ १५ ॥
इत्येतस्याः पदासत्त्यै पत्यैषा प्रेरितौ करौ।
रुध्वा सकोपं सातङ्कं तङ्कटाचैरमूमुदत् ॥ १६ ॥

स्त्रीविशिष्टलिङ्गत्वादुचितोऽयं नेत्यर्थः। अहं यस्य प्रसादेन त्वां प्राप्य प्राप्तवानस्मि तत्तपोऽस्मिन्वोचादि नाद्रिये आदरेण न कुर्यामित्याक्षेपे काकुः प्रश्नः। एवंविधमहाफलस्य तपसोऽत्यादरो युक्त एवेत्यर्थः। त्वत्प्रापकत्वादेवास्यादरः क्रियते न त्वन्यथा तस्मात् कोपं माकार्षीरिति भावः ॥ १४ ॥

निशीति। हे भैमि अहं निशि तव दास्यं आलिङ्गनादिचुम्बनादिचरणपर्य्यन्तं सेवाकारित्वं गतोऽपि सन् प्रातःस्नात्वा त्वां नाभ्यवीवदं न नमस्कृतवानिति यत् तं मन्तुं अपराधं मन्तुं अङ्गीकर्तुं त्वं प्रवृत्ताऽसि चेत्तर्हि वद तवापराधमार्ज्जनायेदानीमेव वन्द्यसे नमस्क्रियसे। रात्रौ दास्यं प्राप्त इत्यनेन सखीषु भैमीरतिचिह्नत्तमपि सूचितम्। अभ्यवीवदं अभि पूर्व्वात्नमस्कारार्थाच्चौरादिकाद्वदेः स्वार्थे णिचि चङि चणौ चङी (पा० ७। ४।१) इत्युपधा ह्रस्वः ॥ १५ ॥

इतीति। एषा इत्येवमुक्तप्रकारेणैतस्याः भैम्याः पदासत्त्यै चरणनिकटीभावाय प्रणामार्थं पत्या प्रेरितौ करौ नमस्कारारम्भानौचित्याद्रतिचिह्नत्तस्य प्रकटनेन वा सरोषं, पतित्वात् स्वीयचरणयोः पतिकरस्पर्शस्यानौचित्याद्वा आतङ्को भयं तेन

अवोचत ततस्तन्वीं निषधानामधीश्वरः।
तदपाङ्गचलत्तारझलत्कारवशीकृतः॥ १७॥
कटाक्षकपटारब्धदूरलङ्घनरंहसा।
दृशा भीत्या निवृत्तं ते कर्णकूपं निरूप्य किं॥ १८॥

च सह यथा तया, चरणस्पर्शात् पूर्व्वमेव रुद्धा स्वकराभ्यां निवार्य्य तं कटाक्षैरमूमुहत् कामाधीनं चकार। एवं तया विलोकित एव कामवशो जात इति भावः। पदास्मै तादर्थ्यमात्रे चतुर्थी। मुहेरकर्म्मकत्वाद्गतिवुद्धीत्यादिना (पा० १।४।५२) अणौ कर्त्तुर्णौ कर्म्मत्वात्तमिति द्वितीया। अमूमुहत् हेतुमण्णिचि चङि उपधा ह्रस्वादिः॥ १६॥

अवोचतेति। ततस्तस्यास्तादृशकटाक्षविलोकनानन्तरं निषधानामधीश्वरः तन्वीं वक्ष्यमाणं अवोचत। किम्भूतः तारशब्दस्य कनीनिकावाचित्वे नपुंसकलिङ्गत्वात्तस्यापाङ्गे चलतस्तारस्य कनीनिकायाः किरणोल्लासलक्षणो दर्शननमस्कारझलत्कारश्चमत्कारस्तेन वशीकृतः, यद्वा चलन्ती तरला तारा यत्र तादृशस्यासौ झलत्कारश्च ततः पूर्व्वया षष्ठीसमासः। झलत्कार इति देश्यं पदं॥ १७॥

कटाक्षेति। हे प्रिये कटाक्षकपटेन नेत्रप्रान्तवक्रविलोकनव्याजेनारब्धं कर्त्तुं व्यवसितं दूरलङ्घने अतिदूरदेशातिक्रमणे रंहो वेगो यस्याः, एतादृश्या ते दृशा कर्णरूपं कूपं अग्रे निरूप्य विलोक्य भीत्या पुनर्निवृत्तं परावृत्तं किमित्युत्प्रेक्षा। दूरं

सरोषाऽपि सरोजाक्षि त्वमुदेषि मुदे मम।
तप्ताऽपि शतपत्रस्य सौरभायैव सौरभा ॥ १९ ॥
छेत्तुमिन्दौ भवद्वक्त्रबिम्बविभ्रमविभ्रमं।
शङ्के शशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः ॥ २० ॥

गन्तुमुपक्रान्ता हि महान्तं कूपं पुरो दृष्ट्वा भयेन शीघ्रं परावर्तन्त एव। दृशेत्यनेन स्त्रीत्वं युज्यते, स्त्रिया हि भीतिर्युक्ता॥१८॥

सरोषेति। हे सरोजाक्षि सरोषाऽपि त्वं मम मुदे हर्षायैवोदेषि भवसि, अङ्गानामालिङ्गनाद्यर्थं दुरापत्वेन स्पृहणीयतरत्वात्सौन्दर्य्यातिशयाच्चेत्यर्थः। यस्मात्तप्ताऽपि उष्णस्पर्शापि सूरः सूर्यस्तत्सम्बन्धिनी सौरी भा दीप्तिः शतपत्रस्य कमलस्य विकासपूर्वं सौरभायैवेति न तु म्लान्यै। सौरभेत्यत्र पुंवत्कर्मधारयेति (पा० ६।३।४२) पुंवत् भावः ॥ १९ ॥

छेत्तुमिति। हे भैमि विधिर्ब्रह्मा पूर्व्वं निष्कलङ्केऽपीन्दौ विषये अतिसादृश्यात् प्रतिक्षणं भवन् उत्पद्यमानो भवतो वा वक्त्रबिम्बस्य विभ्रमः विशिष्टा भ्रान्तिस्तस्य विभ्रमं विलासं छेत्तुं शशाङ्कं आनङ्के, शशरूपेण कलङ्केन चिह्नितवानित्यहं शंके। यतो भिन्नभिन्न प्रकारः किञ्चित्किञ्चिद्भेदयुक्तो विधिर्घटपटादिविधानं यस्य तादृशः। तस्माद्भवन्मुखशशाङ्कयोरुत्पद्यमानसादृश्यभ्रान्तिनिरासाय चन्द्रं कलङ्केन चिह्नितवानित्यर्थः। इत्यहं मन्ये। निष्कलङ्कं भवन्मुखं चन्द्रादप्यधिकमिति भावः। आनङ्के चौरादिकात्लक्षणार्थाद्दर्शिटि। भिन्नभिन्नेति प्रकारे द्विरुक्तिः ॥ २० ॥

ताम्रपर्णीतटोत्पन्नैर्मौक्तिकैरिन्दुकुक्षिजैः।
बहुस्पर्द्धतरा वर्णाः प्रसन्नाः स्वादवस्तव ॥ २१ ॥
त्वद्गिरः क्षीरपाथोधेः सुधयैव सहोत्थिताः।
अद्य यावदहो धावद्दुग्धलेपलवस्मिताः ॥ २२ ॥

ताम्रपर्णीति। तव वर्णास्त्वद्वदननिर्गता वर्णाः प्रसन्नाः स्पष्टतराः, निर्दोषत्वादुज्ज्वलाश्च, तथा स्वादवो मधुराः सुश्राव्याः क्रमेण मलयनिर्गतमलयदक्षिणसमुद्रगामिताम्रपर्ण्याख्यनद्यास्तटे उत्पन्नैः, तथा अमृतमयस्य इन्दोः कुक्षौ जातैर्मौक्तिकैः सह बह्वी धृता स्पर्द्धा सादृश्यदर्पो यैस्ते, अतिशयेन बहुस्पर्द्धा बहुस्पर्द्धतराः, इक्षुकुक्षिजैरिति पाठे इक्षुकुक्षेर्जातैर्मौक्तिकैः। ताम्रपर्णीजातस्य मौक्तिकस्य सौन्दर्य्यं न तु माधुर्य्यं। इक्षुकुक्षौ मौक्तिकानि यदि जायेरन् तदा माधुर्य्यातिशयात् तैः सह बहुस्पर्द्धतरा इत्यभूतोपमा। इक्षुर्वंशविशेषस्तत्रोत्पन्नस्य मौक्तिकस्य वैद्यकनिर्घण्टे शैत्यं माधुर्य्यं पित्तोपशमकत्वञ्चोक्तं वंशान्मौक्तिकोत्पत्तिः प्रसिद्धा पूर्व्वमुक्ता च ॥ २१ ॥

त्वदिति। तव गिरः क्षीरपाथोधेः क्षीरसमुद्रात् सकाशात् सुधयैव सहोत्थिताः उत्पन्नाः। यस्मादद्य यावत् अद्यतनदिनमवधीकृत्य अद्यापि अहो चित्रं धावत्प्रसरत् दुग्धलेपलवरूपं स्मितं हास्यं यासां तादृश्यः। अमृतेन सह निर्गतत्वादमृतवन्मधुरक्षीरसमुद्राच्च निर्गतत्वात् स्मितव्याजेन दुग्धलेपलवा एवाद्यापि अनुवर्त्तन्ते, तद्द्रववत्स्मितायेति भावः। धावत् धावु गतिशुद्ध्योरित्यस्माच्छता ॥ २२ ॥

पूर्व्वपर्व्वतमाश्लिष्टचन्द्रिकश्चन्द्रमा इव।
अलञ्चक्रे स पर्यङ्कमङ्कसङ्क्रमितप्रियः॥ २३॥
प्रावृडारम्भणाम्भोदः स्निग्धो द्यामिव स प्रियां।
परिरभ्य चिरायास विश्लेषायासमुक्तये॥ २४॥
चचुम्बास्यमसौ तस्या रसमग्नः श्रितस्मितं।
नभोमणिरिवाम्भोजं मधुमध्यानुबिम्बितः॥ २५॥

पूर्व्वेति। स नलः पर्य्यङ्कमलञ्चक्रे। किम्भूतः, अङ्के सङ्क्रमिता समारोपिता प्रिया येन सः। कः कमिव, आश्लिष्टा चन्द्रिका कौमुदी येन स चन्द्रमाः पूर्व्वपर्व्वतमिव॥ २३॥

प्रावृडिति। सः प्रियां विश्लेषः प्रातःस्नानादिनित्यकर्म्मानुष्ठानवशेन तावन्मात्रभिन्नदेशावस्थायितया वा वियोगस्तज्जनितो य आयासः खेदस्तस्य मुक्तये निवृत्तये परिरभ्य चिराय आस तस्थौ शुशुभे वा। कः कामिव प्रावृडारम्भणे वर्षारम्भे अम्भोदो मेघो द्यामिव। किम्भूतः स्निग्धः सजलत्वात् श्यामः। मेघो यथा वीनां श्लेषो योगः शरदादौ सदा गगने क्रीडद्भिः पक्षिभिर्यः श्लेषः सम्बन्धस्तज्जनितदुःखपरिहाराय जलभिया पक्षिणां नीडनिवेशित्वात्तद्योगक्लेशमुक्तये दिवमालिङ्ग्य चिरं तिष्ठति। किम्भूतः स्निग्धोऽतिमोतिमान्। असगतिदीप्त्यादामेषु॥ २४॥

चुचुम्बेति। असौ रसमग्नः प्रेमभरपरवशः सन् तस्या गतरोपत्वादालिङ्गनसुखाच्चाश्रितस्मितं आस्यं चुचुम्ब। कः कमिव

अथाहूय कलां नाम पाणिना स प्रियासखीं ।
परस्तादेशितामूचे कर्त्तुं नर्म्मणि साक्षिणीं ॥ २६ ॥
कस्मादस्माकमज्ञास्या वयस्या दयते न ते ।
आसक्ता भवतीष्वन्यं मन्ये न वक्र मन्यते ॥ २७ ॥

मधुमध्ये मकरन्दमध्ये अनुविम्बितः प्रतिफलितः, अत एव रसमग्नो नभोमणिः सूर्य्यः अम्भोजमिव श्रितविकासं। सूर्य्य-पद्मयोर्दूरदेशत्वात् कथं चुम्बनमिति प्रश्ने मधुमध्यानुविम्बित इत्युत्तरं ॥ २५ ॥

अथेति। अथ चुम्बनानन्तरं स पाणिना हस्तसंज्ञया कलां नाम प्रियायाः सखीमाहूय ऊचे। किम्भूतां नर्म्मणि अन्योन्य-रहःक्रीडाहास्ये साक्षिणीं कर्त्तुं पुरस्तादग्रे वेशितां स्थापितां। वेशितां एकान्तनिष्टा ॥ २६ ॥

कस्मादिति। हे कले अज्ञास्या पद्ममुखी ते वयस्या मैमी कस्मात्कारणादस्माकं न दयते कृपां न करोति कथय पृच्छेति शेषः। स्वयमेव कारणमाशङ्कते भवतीषु भवादृशीषु भूयसीषु सखीषु आसक्ता सामस्त्येन अनुरक्ता सती हितकारिणमप्यन्यं मादृशं वक्र यथा तथा नितरां न मन्यते, इत्यहं मन्ये, तेन मयि कृपां न करोतीत्यर्थः। राज्ञावात्मानं मम हस्तेन स्पृष्टुमपि नाददिति तां प्रति सूच्यते। भवदासक्तेरस्माकमियं दशा अनया कृतेति कलां प्रत्यपि सोपालम्भनं। अथ च नवपरिचयेऽप्य-स्माकं दयते चिरपरिचयेऽपि ते तुभ्यं दयते। कुतः भवतीषु

अन्वग्राहि मया प्रेयान्निशि स्वोपनयादिति।
न विप्रलभते तावदालीरियमलीकवाक्॥ २८॥
आह सैषा नलादन्यं न जुषे मनसेति यत्।
यौवनानुमितेनास्यास्तन्मृषाऽभून्मनोभुवा॥ २९॥

आसक्ता सती अन्यं मलचणं बङ्ग मन्यते। यत इत्युत्तरानुरोधेन व्याख्येयं। अस्माकं धीगर्येति (पा०२।३।५२) षष्ठी अस्मदो-द्वयोश्चेति (पा०१।२।५९) एकत्वेऽपि बहुवचनं॥ २७॥

अन्विति। अलीकाऽसत्या वाक् यस्याः सेयं इत्युक्ता विश्वास-स्थानभूता भवादृशीरालीः सखीस्तावन्न विप्रलभते प्रतारयति। इति किं। मया निशि आलिङ्गनचुम्बनादिना स्वस्यात्मशरीरस्यो-पनयाद्दानादानुकूल्येन रमणात् मया प्रेयान्नलोऽन्वग्राहीति विप्रलभते प्रतारयति। मादृशान् यद्यपि वञ्चयति तथापि भवादृशीः कथं वञ्चयेदिति तावच्छब्दार्थः। अलीकवाक् न प्रतारयतीति विपरीतलचणया सोल्लुण्ठभाषणाद्विप्रलभत एवे-त्यर्थः। आलीस्तावन्न विप्रलभते, अपि तु ता अपि वञ्चयत्ये-वास्मादृशान्तु का कथेति काकुर्वा। तस्मादियमस्माकं न दयते इत्येव तथ्यं जानीत सर्व्वथा वाऽस्या वचसि भवतीभिर्न विश्व-सनीयमिति भावः। एतेन भेदोपायप्रयोगः कृत इति सूचितं॥ २८॥

पुनरप्यलीकतामेवाह। आहेति। एषा भवादृशीनां पुर इति यत् आह स्म। इति किं। अहं नलादन्यं मनसाऽपि न जुषे

आस्यसौन्दर्य्यमेतस्याः शृणुमो यदि भाषसे।
तद्धि लज्जानमन्मौलेः परोक्षमधुनाऽपि नः ॥ ३० ॥
पूर्णयैव दिलोचन्या सैषालीरवलोकने।
द्रागद्दगन्ताणुना मान्तु मन्तुमन्तमिवेक्षते ॥ ३१ ॥

भेजे इति तदेतस्याः प्रतिवाक्यं, यौवने प्रस्तुते सति अनुमितेन प्रकटीभूतेन मन एव भूः स्थानं यस्य तेन कामेन छला मृषा मिथ्याऽभूत्। यदन्यस्य कामस्य मनसि धारणादसत्यप्रतिज्ञेयमिति निन्दा। वस्तुतस्तु तारुण्यमारभ्य मय्येवानुरक्तेति स्तुतिरेवास्याः कृतेति व्याजस्तुतिः ॥ २८ ॥

आस्येति। हे कले त्वं एतस्या आस्यसौन्दर्य्यं चिरपरिशीलनज्ञानाशेषविशेषत्वाद्यदि भाषसे तर्हि वयं शृणुमः। आदर्शे स्वमुखदर्शनवदसङ्गतमेतदित्याशङ्क्य हेतुमाह, हि यस्मात्तदेतदस्या आस्यसौन्दर्य्यं अधुनाऽपि विवाहमारभ्याद्यतनक्षणपर्य्यन्तं नोऽस्माकं परोक्षमप्रत्यक्षं नेत्रविषयो न जातमित्यर्थः। यतः लज्जया नमन्मौलेर्नम्रमस्तकायाः नम्रमौलित्वादेतन्मुखं कदाऽपि न मया दृष्टं तस्मादेतदास्यसौन्दर्य्यं त्वं कथयेत्यर्थः। एतस्या मुखमपि न दृष्टं सम्भोगकथा तु दूरापास्ता। यस्मादेतदीयवचने सर्व्वथा न विश्वसनीयं इति भावः। अधुनेत्यस्य वर्त्तमानार्थत्वात् परोक्षस्य भूतार्थत्वाद्वर्त्तमानस्य भूतत्वविरोधात् परोक्षाधुनाशब्दयोरर्थान्तरपरिग्रहादविरोधाभास इति ॥ ३० ॥

पूर्णयेति। सैषा, आलीर्भवादृशीः सखीः पूर्णयैव दिलोचन्या

नालोकते यथेदानीं मामियन्तेन कल्पये।
योऽहं दूत्येऽनया दृष्टः सोऽपि व्यस्मारिषीदृशा॥ ३२॥

नेत्रद्वयेनावलोकते मान्तु पुनः मन्तुमन्तमिव सापराधमिव एकस्या अपि दृशः अन्तः प्रान्तदेशस्यापि अणुर्लेशस्तेनापि द्राक् झटिति चणमात्रमेव ईचते। पूर्णद्विलोचन्या चिरकालविलोकनस्य का कथा इत्यर्थः। सापराधोऽपि सरोषया दृशा विलोक्यते। प्रियया च प्रेयान् दृगन्तेनैव विलोक्यते, सख्यादिबान्धवजनस्तु सरलैः सकलैः नेत्रैः। द्विलोचन्या समाहारद्विगोर्द्विगोरिति (पा॰४।१।२१) ङीप्॥ ३१॥

नेति। हे सखि यथा येन प्रकारेण यत इति यावत्, यस्मादिदानीं इयं मां नालोकते, तेन हेतुना योऽहं दूत्यावसरे अनया दृष्टोऽप्यहमीदृशा सर्व्वथाऽनवलोकिन्याऽनयैव व्यस्मारिषि विस्मृत इति कल्पये सम्भावयामि। सम्प्रति जिज्ञासिताशेषविशेषं मां दृच्यतीति तु कथादूरेऽस्तु, किन्तु सर्व्वथा नावलोकयत्यपीत्यर्थः। स एवायमिति प्रत्यभिज्ञानं यद्यभविष्यत्तर्हि तादृग्व्यलोकयिष्यत्, नत्वेवं, तस्माद्विस्मृत एवाहमनयेति कल्पना युक्तेति सोत्प्रासपूर्व्वकवक्रोक्तिः। कल्पये। चिन्तार्थचौरादिकात्कृपेः णिचश्चेति (पा॰१।३।७४) तङ्। व्यस्मारिषि विस्मरतेः कर्म्मणि लुङुत्तमैकवचने, इटि, स्यसिच्सीयुडित्यादिना (पा॰६।४।६२) सिचःसियुडागमे, तस्य चिण्वद्भावे, अचो-ञ्णितीति (पा॰७।२।११५) वृद्धिः॥ ३२॥

रागं दर्शयते सैषा वयस्याः सूनृतामृतैः।
मम त्वमिति वक्तुं मां मानिनी मौनिनी पुनः॥ ३३॥
कां नामन्त्रयते नाम नामग्राहमियं सखी।
कले नलेति नास्माकं स्पृशत्याह्वां तु जिह्वया॥ ३४॥

रागमिति। हे कले सैषा वयस्या भवादृशीः सूनृतानि प्रियाणि सत्यानि च वचनानि तद्रूपैरमृतैः कृत्वा रागं निजां प्रीतिं दर्शयते बोधयति, भवतीष्वतितमा मम प्रीतिरिति ज्ञापयतीत्यर्थः। मां पुनः त्वं ममेति एतावन्मात्रमपि वक्तुं मौनिनी तूष्णींभवतीत्यर्थः। यतो हृथैव मानिनी धृताभिमाना, न हि मया किमप्यपराद्धमित्यर्थः। त्वं मदीय इत्येतावतैव वचनेनाहं सनाथः, परं तावदपि न वदतीति मय्यस्याः कृपा नास्त्येवेति सोल्लुण्ठनं, लज्जावशान्न वदतीति व्याजेन स्तुतिर्वा। दर्शयते णिचश्चेति (पा॰१।३।७४) तङ्। वयस्या दृशेर्बुध्यर्थत्वाद्गतिबुद्धीति (पा॰१।४।५२) अणौ कर्तृर्णौ कर्मत्वं॥ ३३॥

कामिति। हे कले इयं कां नाम सखीं नामग्राहं नाम गृहीत्वा नामन्त्रयते सम्बोधनपूर्वं नाह्वयति, अपि तु सर्वामपि। नाम शिरश्चालने। अस्माकमसात्सम्बन्धिनीं तु पुनर्नलेति सम्बुध्यन्तामाह्वां संज्ञां जिह्वया न स्पृशति नोच्चारयति रहस्यभाषणं तु दूरापास्तमित्यर्थः। स्त्रीणां भर्तुर्नामग्रहणस्य निषिद्धत्वादनौचित्यारोपेणोपालम्भाद्व्याजस्तुतिः। आह्वानमाह्वा, आतश्चोपसर्गे (पा॰३।३।१०६) इत्यङ्॥ ३४॥

अस्याः पीनस्तनव्याप्ते हृदयेऽस्मात्तु निर्दये।
अवकाशलवोऽप्यस्ति नात्र कुत्र बिभर्त्तु नः॥ ३५॥
अधिगत्येदृगेतस्या हृदयं मृदुतामुचोः।
प्रतीम एव वैमुख्यं कुचयोर्युक्तवृत्तयोः॥ ३६॥

अस्या इति। अस्याः परिदृश्यमानेऽत्र हृदये अवकाशलवः स्थानलेशोऽपि नास्ति तस्मान्नोऽस्मान् कुत्र कस्मिन् स्थाने बिभर्त्तु धारयतु। अवकाशलेशाभावे हेतुमाह। यस्मात् पीनाभ्यामाबाहुमूलप्रसृताभ्यां स्तनाभ्यां व्याप्ते समन्तादावृतेऽतिसङ्कटेऽपि दयया समावेशो भवति, इत्याशङ्क्य साऽपि नास्तीत्याह, अस्मासु निर्दयेऽस्मद्विषये कृपारहिते। एतेन नास्याः कश्चिदपराध इति सोल्लुण्ठं। उच्चकुचाभ्यामहमुपर्य्येव ध्रिये न तु मम हृदयस्पर्शः कदाऽपि दीयत इत्यौचित्येऽप्यनौचित्यारोपादक्तोक्तिर्व्याजस्तुतिर्वा॥ ३५॥

अधिगत्येति। हे कले वयं ईदृगेवं पूर्व्वोक्तप्रकारेण कठिनं तस्या हृदयमधिगत्य प्राप्य ज्ञात्वा वा मृदुतामुचो कठिनाश्रयवशात् काठिन्यं भजतोः कदाप्यनालिङ्गनान्मयि विषये निर्दययोरिति यावत्। तथा युक्तमुचितं वृत्तमाचरणं ययोः, कदाचिदप्यालिङ्गनकारणादिस्वहृल्लचणयाऽनाचारशीलयोरिति यावत्। एवम्भूतयोरस्यास्स्तनयोः कदाचिदप्यालिङ्गनादानादैमुख्यं पराङ्मुखत्वमेव प्रतीमो जानीमः। आलिङ्गने कुचौ सम्मुखौ भवतः। निर्दयहृदयत्वादेव तस्याः पराङ्मुखत्वादेवगूढावेतत्कुचावपि

सदा मम पराङ्मुखाविव जाताविव्यर्थः। अथ च स्त्रीणां हृदयस्यातिमृदुत्वादेतस्या हृदयमीदृग्गतिमृदु ज्ञात्वाऽपि सर्व्वस्य तस्यावरणान्निर्दयत्वं भजतोः, अत एव विपरीतलक्षणया युक्तवृत्तयोरनाचारशीलयोः। मृदु प्रति हि मृदुनैव भवितव्यं। विशेषतस्तु स्त्रियम्प्रति, तथा च विपरीताचरणादनाचारशीलयोरत एव वैमुख्यं पराङ्मुखत्वं, अथच विरुद्धमुखत्वं जानीम एव। अनाचारशीलो हि कस्मैचिदपि स्वं मुखं न दर्शयति मलिनमुखश्च भवति। एतयोरयुक्तप्रकारेण पराङ्मुखत्वं चूचुकयोः श्यामत्वान्मलिनमुखत्वं जानीम इति सोल्लुण्ठं। अथचैतस्या हृदयं कठिनं ज्ञात्वा आर्जवं हि कुटिलेषु न नीतिरिति न्यायेन निष्ठुरत्वमङ्गीकुर्व्वतोः। यस्मादुचितं वृत्तं स्थितिर्ययोरथ च युक्ताचारयोः पराङ्मुखत्वं प्रतीम एव। हृदयस्योपर्य्यूर्द्धमुखेन वर्त्तमानत्वात् हृदयं प्रति कुचौ सदा पराङ्मुखाविवेत्यर्थः। युक्ताचारो हि कठिनहृदयं प्रति निर्दयो भूत्वा तस्मात् पराङ्मुख एव भवति, न तु पश्यति, अथ च ईदृक्सुन्दरमन्तरपरित्यागेनास्या हृदयं प्राप्य कठिनतरत्वगुणं भजतोः तथा पीवरत्वादन्योन्यसंश्लिष्टयोर्वर्त्तुलयोश्च विगतमुखत्वं निमग्नचूचुकत्वगौरत्वविरुद्धश्याममुखत्वञ्च जानीम एव। अथ चेदृग्गतिकोमलमेतदीयं हृदयं ज्ञात्वा प्राप्य वा मूढतामनुभवतोरालिङ्गनादीनामपि विषये सकम्पयोरतएव युक्ताचारयोर्विशिष्टमत्युन्नतं मुखमपि ययोस्तादृक् प्रसन्नमुखत्वञ्च जानीम एवेति इत्यादि ज्ञातव्यं ॥ ३६ ॥

इति मुद्रितकण्ठेऽस्मिन् सोल्लुण्ठमभिधाय तां।
दमयन्तीमुखाधीतस्मितयाऽसौ तया जगे ॥ ३७ ॥
भावितेयं त्वया साधु नवरागा खलु त्वयि।
चिरन्तनानुरागाहं वर्त्तते नः सखीः प्रति ॥ ३८ ॥

इतीति। अस्मिन्नले इत्युक्तप्रकारेण सोल्लुण्ठं वक्रोक्त्यादिसहितं यथा तथा तां भैमीं कलां वा अभिधायोक्ता मुद्रितकण्ठे मौनिनि सति दमयन्तीमुखादधीतं स्मितं यया नलवक्रोक्तिमाकर्ण्य हसद्भैमीमुखं दृष्ट्वा सञ्जातहासया भैमीमुखेनाधीतं स्मितं यस्याः, नलीयसोल्लासवचनात् स्वयं हसन्ती भैमीमपि हासयति सेत्यर्थः। तादृश्या वा तया कलया असौ नलो जगे, अभाणि। सोत्कण्ठनं तु सोल्लासमित्यमरः। उल्लुण्ठनमुल्लुण्ठः, भावे घञ्, तेन सह यथा स्यादिति क्रियाविशेषणं। मुखाधीतेति पञ्चमीति योगविभागात् समासः। पक्षे कर्तृकरणे कृतेति (पा०२।१।३२) तृतीयासमासः। अस्मै तयेति पाठे क्रियया यमभिप्रैतीति (पा०१।४।३२वा०१) सम्प्रदानत्वं ॥ ३७ ॥

कस्मादस्माकमित्यस्योत्तरमाह ॥ भावितेति। हे राजन् त्वयेयं साधु सम्यक् भाविता सम्यक् तर्किता यत्त्वयि विषये खलु निश्चितं नवरागा नवप्रीतिर्वर्त्तते नवोढत्वादधार्ष्ट्येन सलज्जा वर्त्तत इत्यर्थः। त्वयि नवरागा सती नः सखीः प्रति चिरन्तनो योऽनुरागस्तस्याहं योग्यं यथा तथा वर्त्तते बहुकालीनत्वेहवशात् स्निग्धवदित्यर्थः। त्वयि नवरागा सती नः प्रति [illegible] स्माना-

स्मरशास्त्रविदा सेयं नवोढा नस्त्वया सखी।
कथं सम्भुज्यते बाला कथमस्मासु भाषतां ॥ ३९ ॥

नुरागाईमतिदृढप्रीतिर्यथा तथा वर्त्तते न तु त्वयीत्येकवाक्यता वा। तस्मात्स्वभावशाद्धाष्ट्यान्मय्युदासीना भवतीषु तु प्रीतिमती तव बुद्धिरुत्पन्नेत्यर्थः। अथ च त्वयेयं साधु तर्किता साध्विति काका विपरीतलक्षणया वा साध्वेव विपरीतमेव तर्कितेत्यर्थः। यद्वा अकार प्रश्लेषेणासाधुतर्किता, खलु यस्मात् त्वयीयं नूतनानुरागा अतिदृढप्रीतिर्वर्त्तते, अस्मासु तु जीर्णानुरागयोरयं यथा तथा अतिशिथिलप्रीतिर्वर्त्तते न तु त्वयि। अतिपरिचयादवज्ञा इत्यादि न्यायादित्यर्थः। यतोऽस्मभ्यं दयते तुभ्यं न दयत इति पूर्वोक्तवचनात्· त्वया सत्यमुक्तं इत्यर्थः। यद्वा सम्यक् भाविता भावं प्रापिता द्राविनेत्यर्थः यस्मात् त्वयि नवरागत्वाद्दृढप्रीतिः सतो अस्मान्प्रति पुराणप्रीतिमद्रूपमतिशिथिलप्रीतिर्वर्त्तते न तु त्वयि। तथा सम्यग्भाविता·यथा त्वय्येव दृढप्रीतिः सतो अस्मान् सर्व्वथा न गणयतीत्यर्थः। तस्मादस्मान् वृथैव उपहससीति भाव इति मोल्लुण्ठं ॥ ३८ ॥

अन्वयाहोत्यादेरुत्तरमाह ॥ स्मरेति।

बालां बलान्न भुञ्जीत विरागोत्पत्तिशङ्कया।
भुञ्जीत चेत्त्रपाभीतित्याजनक्रमसङ्गतां॥

इत्यादि स्मरशास्त्रविदा कामशास्त्ररहस्यज्ञेन त्वया नवोढा

नवपरिणीता सेयं बाला नोऽस्माकं सखी कथं सम्भुज्यते, अपि तु विरागोत्पत्तिभिया बलादुपमर्दनं कथं विद्रूयते, अत एव त्वया सम्भुक्तत्वादेवास्मासु कथं केन प्रकारेण भाषतां कथयतु, अपि तु त्वत्कृतरतत्वादेव किञ्चिदपि न कथयतीति स्पष्टोऽर्थः। अथ चैवं वक्रोक्तिः कामशास्त्रज्ञेन त्वयेयं नवोढा बाला कथं किंवा सम्भुज्यते, अपि तु सामस्त्येन भोगो न क्रियत एव, किन्तु स्मरशास्त्रवित्त्वात् स्वल्पमेव भुक्ता मुच्यत इत्यर्थः। अत एवास्मासु किं भाषतां, अपि तु अतिपीडनाभावान्न किञ्चिदप्यस्मासु भाषते। या हि बाला सुरते नितरां पीड्यते सैव सखीषु ममातिपीडा भवति मया सोढुं न शक्यत इत्यादि वदति, न तु सामिभुक्तमुक्तेत्यर्थः। अथ च कामशास्त्रज्ञेन त्वया बालाऽपीयमेतन्मनोऽनुकूलमेव भुक्ता, अतः कथमस्मासु भाषतां अपि तु न कथञ्चिद्भाषते कस्याप्यग्रे न कथयतीत्यर्थः। बाला हि कामशास्त्रकौशलवशाद्यथानुरागं भुक्ता यद्यपि भोगं सहते तथाप्यतीव लज्जालुत्वात् सम्भोगरहस्यं कस्याप्यग्रे न कथयतीत्यर्थः। तस्मादुभावपि वञ्चकौ युवामस्मान् वञ्चयथ इति भावः। अथ च सामर्थ्याच्छास्त्रविदा कामशास्त्रज्ञेन त्वया नवोढेयं बाला केन प्रकारेण सम्भुज्यते कार चिन्तय तं प्रकारमित्यर्थात् राधेत्तमेव सम्भोगमक्षतमेष कथयसि, सम्भोगप्रियेण स विस्तरोऽतः स्मरेति काकुक्तिः। कथञ्चियमस्मासु भाषतामपि तु नास्मासु कथयतीत्यर्थः। अथ च विपरीतलक्षणया त्वयेयं भुक्ता अनया रहस्यमस्मासु कथितं किमिति नः प्रतारयसीत्यर्थः। अथ च

नासत्यवदनं देव त्वा गायन्ति जगन्ति यं ।
प्रिया तस्य सरूपा स्यादन्यथालपना न ते ॥ ४० ॥

त्वयेयं बाला परिणीता कथं समन्ताद्भुज्यते, अपि तु अनुचितमेतत् विदुषाऽपि त्वया क्रियते, अस्मासु कथं न भाषतां अपि तु भाषत एवेत्यादि ज्ञातव्यं ॥ ३८ ॥

आलीरियमश्लीकवागित्यंशस्य, आह श्रेत्यत्र तन्नृपाभूदित्यस्यांशस्योत्तरमाह॥ नासत्येति। हे देव राजन् जगन्ति त्रयोऽपि लोका यं त्वा त्वां असत्यं वचनं भाषणं यस्य तादृशं न गायन्ति किन्तु सत्यवादिनमेव वदन्ति। यद्वा न असत्यं नासत्यं सत्यमेव भाषणं यस्य तं तस्य तादृशस्य सत्यभाषिणस्ते तव प्रिया अन्यथा विपरीतार्थमलीकमालपनं भाषणं यस्यास्तादृगसत्यवादिनी सरूपा तुल्यस्वभावा योग्या न स्यात् किन्तु सत्यवादिन्येव प्रिया तव योग्या स्यादित्यर्थः। तस्मादस्मासु यदनया कथितं सत्यमेवेति भावः। अथ च वक्रोक्तिः, त्रयो लोका यं त्वामसत्यभाषिणं न गायन्ति, अपि तु असत्यभाषिणमेव गायन्ति। यद्वा आ ईषदपि सत्यभाषणं यस्य तं सदाऽनृतवादिनं त्वां वदन्ति तस्यानृतवादिनस्तवान्यथालपनात् सत्यवादिनी सदृशी योग्या न स्यात् किन्तु असत्यवादिन्येवोचिता। कृतमपि सम्भोगमहं न कृतवानिति वदसि तथेयमपि रात्रौ कृतमपि सम्भोगं नेति वदति योग्यं योग्येन सम्बध्यत इति न्यायो युक्तः, इति द्वावपि प्रति सोल्लुण्ठं। भो राजन् त्रयोऽपि लोका नासत्यवदयिनोकुमा-

मनोभूरस्ति चित्तेऽस्याः किं नु देव त्वमेव सः।
त्वदवस्थितिभूर्यस्मान्मनः सख्या दिवानिशम्॥ ४१॥
सतस्तेऽथ सखीचित्ते प्रतिच्छाया स मन्मथः।
त्वयास्य समरूपत्वमतनोरन्यथा कथं॥ ४२॥

रवन्मुखं यस्य तमतिसुन्दरमुखं वदन्ति तस्य तव प्रिया अन्यथाऽनुरूपं त्वपरं मुखं यस्यास्तादृशी तुल्यरूपा न स्यात् किन्तु सुन्दरतरवदनेव योग्या स्यात्, तया च त्वन्मुखवदेवैतस्या अपि मुखं सुन्दरमिति जानीहीति भावः॥ ४०॥

आह सेत्यादेः श्लोकत्रयेणोत्तरमाह॥ मनोभूरिति। अस्याश्चित्ते मनोभू कामोऽस्तीति सत्यं, हे देव किन्तु त्वमेव स मनोभूः न तु त्वदन्यः कश्चिदित्यर्थः। कुतः, यस्मात् कारणात् सख्या भैम्या मनः दिवानिशं तवावस्थितेर्भूः स्थानं। कामपरत्वे मनसि भवति, नलपरत्वे मनोभूः स्थानं यस्य, अस्याश्चेतसि सुन्दरतरो मनोभूस्त्वमेव वर्त्तसे नान्य इति॥ ४१॥

यद्यहमेव कामस्तर्हि मद्विषयेऽस्याः कामो नास्तीति नलीयावान्तरच्छन्नाशङ्कानिराकरणव्याजेन प्रकारान्तरेण तस्यैवोत्तरमाह॥ सत इति। अथाथवा स मन्मथो सख्याः भैम्याश्चित्ते सतो वर्त्तमानस्य तव प्रतिच्छाया प्रतिविम्ब एव न तु स्वतन्त्रो विम्बरूपः, प्रतिविम्बश्च स्वच्छ एव मुकुरादौ भवतीति भैमीमनसः स्वच्छतरत्वं द्योतितं। कुत एतदित्याशङ्कान्यथानुपपत्तिप्रमाणयति। अन्यथा यदि प्रतिच्छाया न भवेत्तर्ह्यतनोरनङ्गस्य

कः स्मरः कस्त्वमन्नेति सन्देहे शोभयोभयोः ।
त्वय्येवार्थितया सेयं धत्ते चित्तेऽथवा युवां ॥ ४३ ॥

रस्यास्य कामस्य त्वया सह सरूपत्वं कथं स्यादपि तु न कथञ्चित्, ऐलनामत्यादीनां मशरीरत्वात् त्वया सह सारूप्यं युज्यते, अयं त्वतनुस्तस्मादस्य प्रतिविम्बत्व एव त्वत्सारूप्यं युज्यते। प्रतिविम्बमेव ह्यशरीरमपि तुल्यरूपं भवति। तस्मात् प्रतिविम्बस्य विम्बं विना स्यातुमशक्यत्वान्मनसि तव धारणात् सारूप्यं त्वत्प्रतिविम्बभूतं त्वदेकविषयं कामं नान्तरीयकतया धारयतीत्यर्थः। विम्बत्वे अनङ्गत्वेन सारूप्यानुपपत्तेः प्रतिविम्ब एवायमित्यनुमानं ॥ ४२ ॥

क इति। अथ चोभयोर्द्वयोर्भवतोस्तुल्यया शोभया कत्वाऽत्र द्वयोर्मध्ये स्मरः कः त्वं नलश्च क इति सादृश्यात् सन्देहे सति अथास्मिन् सन्देहे सति वा त्वय्येव विषये अर्थितया साभिलाषतया सेयं भैमी युवां द्वावपि स्मरनलौ चित्ते धत्ते। सर्व्वो ह्यतिसदृशयोः 'काचमण्यादिपदार्थयोः सन्देहे एकतरपरित्यागे मणिरेव परित्यक्तः स्यात्तन्मा भूदिति मण्यर्थित्वेनैव यावन्निर्णयं काचमपि न मुञ्चति। तथा तुल्यशोभत्वेन निश्चेतुमशक्यत्वात् स्मरपरित्यागे भवानेव परित्यक्तः स्यात्तन्मा भूदिति त्वय्येव साभिलाषतया द्वावपि न मुञ्चतीत्यर्थः। त्वदर्थमेव धारयति न तु कामार्थं त्वामिति भावः। त्वयेति पाठे तया हेतुना याऽर्थिता तयेत्यर्थः ॥ ४३ ॥

त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात्।
शङ्कया पङ्कजाक्षी त्वां दृगंशेन स्पृशत्यसौ ॥ ४४ ॥
विलोकनात् प्रभृत्यस्या लग्न एवासि चक्षुषोः।
स्वेनालोकय शङ्का चेत् प्रत्ययः परवाचि कः ॥ ४५ ॥

पूर्णचेत्यादेरुत्तरमाह ॥ त्वयीति। पङ्कजाक्षी असौ त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वस्याप्रत्यावर्त्तमानत्वस्य दर्शनाद्धेतोः शङ्कया चित्तवत् पुनरप्रत्यावृत्तिभिया त्वां दृगंशेन नेत्रप्रान्तेन स्पृशति पश्यति। न तु पूर्णया द्विलोचन्या, त्वयि न्यस्तेति अनुरागातिशयः, पङ्कजाक्षीति दृशोरतिसौन्दर्यञ्च सूचितं। सुन्दरवस्तुनः पुनरप्रत्यावृत्तौ महद्भयं इति च सूचितं। शङ्कयेवेति प्रतीयमानोत्प्रेक्षा ॥ ४४ ॥

नालोकत इत्यादेरुत्तरमाह ॥ विलोकनादिति। विलोकनात् प्रभृति अनया प्रथमं त्वं यदा दृष्टोऽसि तदारभ्य त्वं अस्याश्चक्षुषोः संलग्न एवासि। त्वामेवेयं सदा पश्यति नान्यत् किञ्चिदपीति। अस्यास्त्वयि महती नेत्रप्रीतिरित्यर्थः। एवं सति मद्वचने इयं मिथ्या वदतीति शङ्का अविश्वासश्चेत्तर्हि एतदीयचक्षुषोर्मध्ये अहं वर्त्ते न वेति निश्चेतुं स्वेनात्मनैवावलोकय एतदीयचक्षुषी पश्य अहमत्र वर्त्ते इत्यनुभवेनैव निर्द्धारयिष्यसीत्यर्थः। स्वेनालोकने हेतुमाह। परवाचि को नाम प्रत्ययो विश्वासः, अपि त्वनुभवयोग्येऽर्थे परवचनमप्रमाणमेवेत्यर्थः। इक्षुकनीनिकायां सम्मुखं दृष्टुरवश्यं प्रतिबिम्बो भव-

परीरम्भेऽनयारभ्य कुचकुङ्कुमसङ्क्रमं ।
त्वयि मे हृदयस्यैवं राग इत्युदितैव वाक् ॥ ४६ ॥

त्वयैवेति छन्नोक्तिः । अथच नेत्रलग्नत्वादेव नेत्रकज्जलवदीक्षितुमसामर्थ्यान्नालोकत इति त्वया सत्यमेवोक्तमित्यर्थः । अत्र चेच्छङ्का तर्हि स्वनेत्रलग्नमेव गोलकादि स्वयमालोकय तदा ज्ञास्यसि, यतः परवाचि कः प्रत्ययः । विलोकनात् आरभ्यार्थयोगे पञ्चमी ॥ ४५ ॥

रागं दर्शयत इत्यादेरुत्तरमाह ॥ परीति । अनया परीरम्भे गाढालिङ्गने क्रियमाणे तव हृदये कुचकुङ्कुमस्य सङ्क्रमसारभ्योपक्रम्य तद्व्याजेन मे हृदयस्य मनसोऽय च वक्षसस्त्वय्येवं अनेन प्रकारेण रागोऽनुरागोऽय च रक्तिमा, एतादृशी वागुदितैव, साक्षात् यद्यपि नोक्तं तथाप्युक्तप्रायमेवेत्यर्थः । गाढालिङ्गनं ह्यनुरागं विना न घटत इति गाढालिङ्गने कुचकुङ्कुमाङ्गरागलेपनव्याजेन मम त्वय्येवमनुरागो वर्त्तत इत्यन्तर्गतोऽनुरागभर एव प्रकटीकृत इति भावः । हृदयस्यैवेति पाठे त्वय्येवेति योजना । त्वयि मे हृदयस्यैव रागो न तु वाचिकः । मत्सादौ तु वाङ्मात्रेणैव रागो न तु हृदयस्येति वा । उदितैवेति पाठे त्वमेवा । अनया गाढालिङ्गनेन तव हृदये मग्नमिदं परिदृश्यमानं कुचकुङ्कुमादिकमेव सर्व्वमपि रात्रिवृत्तान्तमस्मान् बोधयतीति त्वयैव वक्ष्यमीति सूचितं ॥ ४६ ॥

कुचौ दोषोज्झितावस्याः पीडितौ ब्रणिनौ त्वया।
कथं दर्शयतामास्यं वृहन्तावावृतौ ह्रिया ॥ ४९ ॥

धिष्ठिते स्थाने स्थातुमशक्तौ वहिर्निर्गच्छत्येव। वहिरपि यदादि त्वया हृदयं स्पृष्टं तदादि साटोपं निर्गताविति भावः। अध्यासिते हृद्यन्तरमस्मान्ताविति वान्वयः ॥ ४८ ॥

अधिगत्येत्यादेरुत्तरमाह॥ कुचाविति। दोषेणोज्झितौ निर्दोषावथ च दोषायां रात्र्यां कूर्पासेन त्यक्तौ, तथा वृहन्तावतिपीवरौ, अत एव त्वया पाणिभ्यां पीडितौ मर्दितौ ब्रणितौ नखैश्च क्षतयुक्तौ क्षतावस्थाः कुचौ दिने ह्रिया हेतुना आवृतौ वस्त्रेणाच्छादितौ सन्तौ आस्यं चूचुकाग्रं कथं दर्शयतां अपि तु न कथञ्चित्। रात्रौ हि सम्भोगसमये निर्विघ्नं स्तनदर्शनं भवेत् दिवा तु ह्रिया नखक्षतादिसम्भोगचिह्नदर्शनभिया च वस्त्रावृतत्वात् कथं नाम चूचुकाग्रस्यापि दर्शनं स्यादपि तु न कथञ्चिदित्यर्थः। दोषया रात्र्या त्यक्तौ रात्रेर्गतत्वाद्दिनप्रकाशसम्बद्धौ, अत एव ह्रिया वस्त्रावृतत्वाद्दिवा वैमुख्यमेव तयोर्युक्तमित्यर्थः, इति वा। वहिःस्थितं त्वाम्प्रति वैमुख्यासम्भवात् हृदयस्थितस्य तव स्वमुखं कथं दर्शयतामिति ह्रिया पराङ्मुखत्वाद्वा भीत्या कुचौ स्वमुखं न दर्शयतः। स्वाश्रयभूतस्य भैमीहृदयस्य वा कुचौ स्वमुखं न दर्शयतः। न हि कुचौ हृदस्य सम्मुखौ भवतः। अन्योऽपि दोषोज्झितो निरपराधो लब्धप्रतिष्ठो धनादिग्रहणेन पीडितो नासादिकर्त्तनेन क्षत-

मनसाऽयं भवन्नामकामसूक्तजपव्रती।
अचक्षत्वं सखीकण्ठस्त्वमत्येकावलिच्छलात् ॥ ४७ ॥
अध्यासिते वयस्याया भवता महता हृदि।
स्तनावन्तरसम्मान्तौ निष्क्रान्तौ ब्रूमहे बहिः ॥ ४८ ॥

कां नामन्वयत इत्यादेरुत्तरमाह ॥ मनसेति। अयं सख्या भैम्याः कण्ठो मनसैव भवतो नलेति ते नाम तदेव कामसूक्तस्य प्रकाशको मन्त्रस्तस्य जपः स एव व्रतं अस्यास्तीति तादृशः सन् एकावलिच्छलात्, एकयष्टिकमुक्ताहारविशेषव्याजात् अचक्षत्वं पद्माद्यादिरचितां जपमालिकां चुम्बति। भर्तृनामग्रहणनिषेधात् 'सहस्रं मानसो जपः' इति मानसजपे फलविशेषश्रवणाच्च मुक्ताहारजपमालिकया त्वन्नामैव मनसा जपतीति भावः। नलेति स्मरणमात्रेणैव कामोद्रेकात्तन्नाम्नः कामसूक्तत्वं ॥ ४७ ॥

अस्या पीनस्तनेत्यादेरुत्तरमाह ॥ अधीति। महता नितरां गौरवयुक्तेनाथ च महापरिमाणेन भवता त्वया वयस्यायाः भैम्या हृदि अध्यासितेऽधिष्ठिते सति अन्तर्हृदयमध्येऽसमान्तौ स्थातुमशक्तौ स्तनौ हृदयात् बहिर्देशे निष्क्रान्तौ, इति वयं ब्रूमहे सम्भावयामः। यदाप्रभृति त्वं चित्ते समस्तदाप्रभृत्येवैतौ बहिर्दृश्येते तस्मात् पूर्वमन्तरवस्थितत्वादद्दर्शनं दृश्येते मदधिष्ठानागमनात् तु बहिर्निर्गतौ इति तवैवावकाशोऽभूत् न तु कुचयोस्तस्मादस्यामेवं प्रतारयसीति भावः। अन्योऽपि महताऽ

कुचौ दोषोज्झितावस्याः पीडितौ व्रणितौ त्वया।
कथं दर्शयतामास्यं बृहन्तावावृतौ ह्रिया ॥ ४९ ॥

धिष्ठिते स्थाने स्थातुमशक्तो वहिर्निर्गच्छत्येव। वहिरपि यदादि त्वया हृदयं स्पृष्टं तदादि माटोपं निर्गताविति भावः। अध्यासिते हृदन्तरमभ्मान्ताविति वान्वयः॥ ४८॥

अधिगत्येत्यादेरुत्तरमाह॥ कुचाविति। दोषेणोज्झितौ निर्दोषावथ च दोषायां रात्र्यां कूर्पासेन त्यक्तौ, तथा वृहन्तावतिपीवरौ, अत एव त्वया पाणिभ्यां पीडितौ मर्द्दितौ व्रणितौ नखैश्च चतयुक्तौ क्षतावस्थाः कुचौ दिने ह्रिया हेतुना आवृतौ वस्त्रेणाच्छादितौ सन्तौ आस्यं चूचुकाग्रं कथं दर्शयतां अपि तु न कथञ्चित्। रात्रौ हि सम्भोगसमये निर्विघ्नं स्तनदर्शनं भवेत् दिवा तु ह्रिया नखचतादिसम्भोगचिह्नदर्शनभिया च वस्त्रावृतत्वात् कथं नाम चूचुकाग्रस्यापि दर्शनं स्यादपि तु न कथञ्चिदित्यर्थः। दोषया रात्र्या त्यक्तौ रात्रेर्गतत्वाद्दिनप्रकाशसम्बद्धौ, अत एव ह्रिया वस्त्रावृतत्वाद्धेतो वैमुख्यमेव तयोर्युक्तमित्यर्थ., इति वा। वहिःस्थितं त्वाम्प्रति वैमुख्यासम्भवात् हृदयस्थितस्य तव स्वमुखं कथं दर्शयतामिति ह्रिया पराङ्मुखत्वाद्वा भैम्या कुचौ स्वमुखं न दर्शयतः। स्वाश्रयभूतस्य भैमीहृदयस्य वा कुचौ स्वमुखं न दर्शयत.। न हि कुचौ हृदस्य सम्मुखौ भवतः। अन्योऽपि दोषेोज्झितो निरपराधो सम्प्रतिष्ठो धनादिग्रहणेन पीडितो नासादिकर्त्तनेन क्षत-

इत्यसौ कलया सूक्तैः सिक्तः पीयूषवर्षिभिः।
ईदृगेवेति पप्रच्छ प्रियामुन्नमितानना॥ ५० ॥
बभौ च प्रेयसीवक्त्रं पत्युरुन्नमयन् करः।
चिरेण लब्धसन्धानमरविन्दमिवेन्दुना॥ ५१ ॥
ह्रीणा च स्मयमाना च नमयन्ती पुनर्मुखं।
दमयन्ती मुदे पत्युरत्युच्चैरभवत्तदा॥ ५२ ॥

व्रणो लज्जितः कस्याप्यग्रे मुखं न दर्शयति। व्रणितो तार-
कादित्वादितच्॥ ४८ ॥

इतीति। कलया पीयूषवर्षिभिरमृतं क्षरद्भिरतिमधुरैः सूक्तैः
शोभनवक्रोक्त्यादिरूपैर्वाक्यैः सिक्तः सञ्जातगाढप्रेमभरोऽसौ नलः
उन्नमितं पाणिना ऊर्द्ध्वीकृतमाननं यस्यास्तां प्रियां भैमीं हे
भैमि इदं कलावचनमीदृगेवमेवेति सत्यमिति पप्रच्छ। उन्नमि-
तेति ज्वलङ्कलेति (सि०कौ०चा०१२५पत्रे) मित्पक्षे ह्रस्वः॥५०॥

बभाविति। पत्युः करोऽरविन्दमिव बभौ। किङ्कुर्वन् प्रेय-
सीवक्त्रमुन्नमयन्। किम्भूतमरविन्दं चिरेण बहुकालेन वैरं वि-
स्मृत्य निवृत्तवैरतया इन्दुना सह लब्धं सन्धानं येन, अभू-
तोपमा। चन्द्रकमलयोः सदा वैरित्वं॥ ५१ ॥

ह्रीणेति। सम्भोक्तिकलोक्तिवक्रोक्तिप्रत्युक्तिपरिहासेन ह्रीणा
स्मयमाना चातएव लज्जावशेन सितश्च नलेन द्रष्टव्यमिति
बुध्या वा, अत्युच्चैर्भितरामुन्नमितमपि मुखं पुनर्नमयन्ती दम-
यन्ती तदा तस्मिन्नुक्तावसरे पत्युर्मुदेऽभवत्। अत्युच्चैर्मु-

भूयोऽपि भूपतिस्तस्याः सखीमाह स्म सस्मितं।
परिहासविलासाय स्पृहयालुः सहप्रियः॥ ५३॥
हन्तुं मन्तुं दिनस्यास्य वयस्येयं व्यवस्यतात्।
निशीव निशिधात्वर्थं यदाचरति नात्र नः॥ ५४॥

देऽभूदिति वा। तादृशीं तां दृष्ट्वा नितरां हृष्टोऽभूदिति भावः॥ ५२॥

भूय इति। प्रियया सह वर्त्तमानो भूयोऽपि पुनरपि वक्रोक्त्यादिपरिहासविलासाय स्पृहयालुरभिलाषुको भूपतिस्तस्याः सखीं कलां सस्मितं यथा तथा आह स्म। विलासाय स्पृहेरीप्सितः (पा॰१।४।३६) सम्प्रदानत्वं। सहप्रियः वोपसर्जनस्येति (पा॰६।३।८२) पाक्षिकत्वात् सादेशाभावः॥ ५३॥

हन्तुमिति। हे कले इयं तव वयस्या अस्य वर्त्तमानस्य दिनस्य मन्तुमपराधं हन्तुं सोढुं व्यवस्यतात् प्रयततां। कोऽपराधो दिनस्येत्यत आह। यद्यस्मादियं भैमी निशीव रात्राविव नोऽस्माकं निशि चुम्बन इति पठितस्य धातोरर्थमत्र दिने नाचरति, रात्रौ यथा मां निःशङ्कं चुम्बति तथा भवतीभ्यो लज्जया दिने नेति दिनस्यापराधस्तस्मात्तस्यापराधं क्षमस्वेति प्रार्थित इत्यर्थः। व्यवस्यतामिति पाठे आत्मनेपदं चिन्त्यं॥ ५४॥

दिनेनास्या मुखस्येन्दुः सखा यदि निरस्कृतः।
तत्कृताः शतपत्राणां तन्मित्राणामपि श्रियः ॥ ५५॥

दिनेनेति। दिनेनास्या मुखस्य सखा इन्दुर्यदि तिरस्कृतः निष्प्रभीकृत्य पराभूतः, एवमपराधस्तेनाम्यते तर्हि तस्य भैमीमुखस्य सादृश्यान्मित्रभूतानां बह्वनां शतपत्राणां कमलानां श्रियो विकासलक्ष्म्योऽथ च सम्पदोऽपि तेन कृताः। अनेकापकारकारिण्येकस्मिन् पराभूते यदि बह्वनां क्षेमं भवति तदा महानुपकार एवेति तन्मुखमित्रभूतानां कमलानां प्रकाशकलाद्दिनेनोपकार एव कृतो नापकारस्तस्मादेतस्यापराधो नास्तीति मन्मुखचुम्बनं दिनेऽपि कुर्व्विति भावः। एकस्मिन् धर्षितापाये बह्वनामपकारिणि बह्वनां भवति क्षेमं तस्य पुण्यप्रदो बध इत्युक्तेः। तत्कान्ता इति पाठे दिनस्य मित्रभूतानां सम्बन्धात् सलक्ष्मीकाणां कमलानां, अथ च शतसंख्यानि बह्वनि पत्राणि वाहनानि येषां मित्राणां श्रियोऽपि तेन चन्द्रेण कान्ताश्छिन्नाः। रात्रौ सङ्कोचकरणात् दिनेन तु तन्मुखमित्रं चन्द्रो धर्षितश्चन्द्रेण तु दिनमित्राणि बह्वनि कमलानि धर्षितानीति चन्द्रेण स्वयं वैरनिर्य्यातनं कृतमेवेति दिनस्यापराधोऽनया न गणनीय इत्यर्थः। तन्मुखमित्राणां कमलानां श्रियोऽपि छिन्ना अपि तु न, किन्त्वभिवृद्धिमेव प्रापितास्तस्मात् पूर्व्ववदेवापराधो नास्तीति काकुर्वा। तन्मुखमित्रं चन्द्रो यदि दिनेन तिरस्कृतस्तर्हि दिनमित्राणां कमलानामपि श्रियस्तेन तन्मुखेन छिन्नाः, स्वकान्त्या

लज्जितानि जितान्येव मयि क्रीडितयाऽनया।
प्रत्यावृत्तानि तत्तानि पृच्छ सम्प्रति कम्प्रति ॥ ५६ ॥
निशि दष्टाधरायापि सैषा मह्यं न रुष्यतु।
क्व फलं दृश्यते बिम्बीलता कीराय कुप्यति ॥ ५७ ॥

तेषां निःशोभीकरणात् वैरं निर्यातितमेवेति दिनस्यापराधो न गणनीय इति भाव इति वा ॥ ५५ ॥

लज्जितानीति। हे कले अनया मयि विषये तावल्लज्जितानि लज्जाविशेषा जितान्येव निरस्तान्येव। यतो रात्रौ क्रीडितया कृतसुरतक्रीडया मयि प्रदर्शितबहुविधसुरतचातुर्य्यया, तत्तस्मात् सम्प्रति तानि लज्जितानि यत् पुनः प्रत्यावृत्तानि तत् कं प्रति उद्दिश्येति त्वमेनां पृच्छ, मयाऽस्याः सुरतचातुर्य्यधार्ष्ट्यं बहुवारं दृष्टमेव। त्वामेव प्रति इयं लज्जत इति जानीहीति भावः ॥ ५६ ॥

इदानीं श्लोकचतुष्टयेन स्वापराधमाशङ्क्य परिहरति॥ निशीति। सैषा निशि दष्टः अधरो येन तस्मादपि मह्यं न रुष्यतु न कुप्यतु:, यस्मात् पक्वबिम्बी फलं दृश्यते आस्वाद्यते, कीराय शुकाय बिम्बीलता क्व कुप्यति, अपि तु न कुतोऽपि। किन्तु स्वसम्बन्धेन शोभाहेतवे तस्मै स्निह्यत्येवेत्यर्थः। दन्तक्षते कृतेऽपि व्रणसम्बन्धवशान्नितरामधरशोभाकारित्वेन मह्यं प्रसाद एव युक्तो न तु कोप इति भावः। रुष्यतीति पाठे सिद्धवत्कारेणोक्तिः। मह्यं कीराय च क्रुध द्रुहेति (पा० १।४।३७) चतुर्थी ॥ ५७॥

शृणीपदसुचिह्ना श्रीश्चोरिता कुम्भिकुम्भयोः ।
पश्यैनस्याः कुचाभ्यान्तनृपस्तौ पीडयामि न ॥ ५८ ॥
अधरामृतपानेन ममास्यमपराध्यतु ।
मूर्द्धा किमपराद्धं यत् पादौ नाप्नोति चुम्बितुं ॥ ५९ ॥

शृणीति। एतस्याः कुचाभ्यां शृणीपदं अङ्कुशाघातचत-मेव शोभनं चिह्नं यस्याः, अथ चाङ्कुशाकारनखपदविशेष एव शोभनं चिह्नं यस्या सा कुम्भिनःकरिणः कुम्भयोः श्रीः शोभा सम्यच्च यस्माच्चोरिता, पश्य, एतत्कुचयोरङ्कुशाकारं नखं यदि नास्ति तर्हि त्वमेव विलोकय। तत्तस्मान्नृपो दण्ड्यदण्डकरणाधिकारी अहं तौ स्तेयकारिणावेतत्कुचौ न पीडयामि, अपि तु पीडयाम्येव। तयोः पीडनं दण्डरूपनखक्षतादिरूपं चोचितमित्यर्थः। राज्ञा हि चोरस्य दण्डः क्रियते। ममापराधो नास्तीति भावः। अङ्कुशो स्त्री शृणिर्द्वयोरित्यमरः। शृणी कृदिकारादिति (पा० ४।१।४५ वा०) ङीप् ॥ ५८ ॥

अधरेति। ममास्यं मुखमेतस्या अधरामृतस्य पानेन क्लत्वाऽपराध्यतु, अयं मुखस्यापराधोऽङ्गीकृत इत्यर्थः। मम मूर्द्धा पुनः किमपराद्धं यो मस्तकः प्रणामहेतुनाऽस्याः पादौ चुम्बितुं स्प्रष्टुमपि नाप्नोति, नमस्कर्तुमपि न ददाति कोऽपराधो तेन कृत इति पृच्छेत्यर्थः ॥ ५९ ॥

अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया।
वीणाऽऽह परुषं यन्मां कलकण्ठी च निष्ठुरं॥ ६० ॥
सेयमालिजने स्वस्य त्वयि विश्वस्य भापतां।
ममताऽनुमताऽस्मास्तु पुनः प्रस्मर्य्यते कुतः॥ ६१ ॥

अपराद्धमिति। भवद्वाणीश्राविणा त्वद्वचनाकर्णनशीलेन मया वीणायाः कोकिलायाश्च तव वा किमपराद्धं को वाऽपराधः कृत इति कले त्वं भैमीमनेन किमपराद्धमिति पृच्छ। यद्यस्माद्वीणा साम्प्रतं परुषमाह, कलकण्ठी कोकिला च मां प्रति निष्ठुरं ब्रूते तस्मादपराधः सम्भाव्यते। येन हि यस्याः कश्चिदपराधः क्रियते तं प्रति सा तदीयो वा तत्सदृशः कश्चित्परुषं भाषते। अथच वीणाकोकिलयोःस्वरे यस्मान्माधुर्य्यं नास्ति तस्मात् पश्चादागत्य निभृतं मयाऽममचभापमाणाया भवत्या भारती श्रुता न त्वन्येन केनाप्यामयेनेति। सोऽप्यपराधो न भवतीत्यर्थः। वीणाकोकिलालापापेक्षया भैमीवाणी मधुरतरा रात्रौ एतद्वाणीमाधुर्य्यं मया बहुनुभूतं, इदानीन्तु त्वां दृष्ट्वा मां प्रति तूष्णीमस्ति इति। परुषं निष्ठुरं च क्रिया विशेषणं। परुषं निस्नेहं निष्ठुरं सतिरस्कारं। कलकण्ठी अङ्गगात्रेति (पा० ४।१। ५४। वा०) ङीप्॥ ६० ॥

सेति। हे कले सेयं स्वस्यालिजने त्वयि विषये विश्वस्य भापतां कथयतु। अस्मास्तु विषये अनुमताऽङ्गीकृता ममता स्वीयतामतिः पुनः कुतः प्रस्मर्य्यते विस्मर्य्यते इति त्वं पृच्छ। इयं च

अथोपवदने भैम्याः स्वकर्णोपनयच्छलात्।
सन्निधाप्य श्रुतौ तस्या निजास्यं सा जगाद तां॥ ६२॥
अहो मयि रहोवृत्तं धूर्त्ते किमपि नाभ्यधाः।
आस्व सत्यमिमं तत्ते भूपमेवाभिधापये॥ ६३॥

त्वयि विश्वस्य कथयसीत्यर्थः। रात्रौ रतानुकूल्यमाचरितमनया इदानीं तु तव समक्षं प्रातिकूल्यं किमित्याचर्यत इति भाव इत्युपालम्भनभङ्गिः। प्रशब्दस्य गतार्थतया विस्मरणार्थता ॥ ६१॥

अथेति। अथ नलोक्त्यनन्तरं सा कला भैम्याः उपवदने वदनसमीपे स्वकर्णस्य उपनयच्छलात् समीपनयनव्याजात् तस्या भैम्याः श्रुतौ कर्णे निजास्यं सन्निधाप्य सन्निहितं कृत्वा तां जगाद। अवदन्त्या अपि भैम्या वचनं शृण्वतीव कर्णं भैमीमुखसमीपे कृत्वा अनन्तरञ्च तद्वचः प्रतिवचनमेकान्ते वितरन्तीव भैमीकर्णसमीपे निजमुखं कृत्वा भैमीं जगादेत्यर्थः। कथकानुकथकजातिः। उपवदनेऽव्ययीभावे सप्तम्या अम्भावाभावः। सन्निधाप्य हेतुमण्यन्तात्ल्यप्॥ ६२॥

अहो इति। हे धूर्त्ते वचनचतुरे त्वं मयि विषये रहोवृत्तं एकान्ते निष्पन्नमालिङ्गनादि किमप्येकमपि अल्पमपि च नाभ्यधाः, अहो आश्चर्यं एतादृशी धूर्त्ता काऽपि न दृष्टेत्यर्थः। त्वं आस्व तिष्ठ तिष्ठः, यद्यपि त्वं नाचकथा, तथापि ते तव तद्रहोवृत्तं सत्यं सत्यमादिनमिमं भूपं नलमेवाभिधापये

स्मरशास्त्रमधीयाना शिच्चिताऽसि मयैव यं ।
अगोपि सोऽपि त्वत्तो किं दाम्पत्यव्यत्ययस्त्वया ॥ ६४ ॥

वादयामि । अहमपि त्वया यतो वञ्चिता तथा किञ्चिद्रचयिष्यामि यथा नल एव स्वयं त्वदीयसुरतप्रागल्भं प्रकटयति मां वञ्चयित्वा कथङ्कारं स्यास्यसि क यास्यसि चणमात्रं स्थिरा भवेति सरोपोक्तिः। सभ्यमिति पाठे आभिधापये नलं सभ्यं जानीहीत्यर्थः। आत्मसभ्यमिति पाठे इमं भूपमेव तमेवेदमसभ्यं सभार्या जनसमचं वक्तुमनर्हं तद्रहोवृत्तमाश्विदानीमेवाभिधापये तिष्ठ तिष्ठेत्यर्थः। भूपं अकथितञ्चेति (पा॰१।४।५१) कर्मत्वं अभिधापये अभिपूर्वाद्धापणार्थाद्धातेर्हेतुमखिचि णिचश्चेति (पा॰१।३।७४) तङ् ॥ ६३ ॥

स्मरेति। स्मरशास्त्रं वात्स्यायनादिप्रणीतं शास्त्रं अधीयाना पठन्ती त्वं तत्र प्रतिपादितं यं दाम्पत्यव्यत्ययं विपरीतसम्भोगं मयैव शिचिताऽसि। स दाम्पत्यव्यत्ययः त्वया कृताऽपि निष्पाद्यापि मम पुरस्तात् किमगोपि गोपितः कथयेति प्रश्नः। नितरां धार्ष्यमवलम्ब्य मया शिचितं विपरीतसुरतं कृताऽपि ममैव पुरस्तादकृतमेव कथयसीति नितरां वञ्चनचतुराऽसीति भावः। स्मरशास्त्रं नलोकेति (पा॰२।३।६९) षष्ठीनिषेधः। दम्पत्योर्भावः सम्भोग इति यावत्। पत्यन्तपुरोहितादिभ्य इति (पा॰५।१।१२८) यक् ॥ ६४ ॥

मौनिन्यामेव सा तस्यां तदुक्तीरिव शृण्वती।
वादं वादं मुहुश्चक्रे हुं हुमित्यान्तरान्तरा ॥ ६५ ॥
अथासावभिसृत्यास्या रतिप्रागल्भ्यशंसिनी।
सख्या लीलाम्बुजाघातमनुभूयालपन्नृपं ॥ ६६ ॥

मौनिन्यामिति। सा कला तस्यां भैम्यां मौनिन्यामवदन्त्यामेव सत्यां तदुक्तीर्भैमीवचनानि शृण्वतीव भैम्यामवदन्त्यामपि भैमी मां प्रति किमपि वदतीत्यहं शृणोमीति नलम्प्रति प्रकटयन्ती वादं वादं भैमीवचनप्रतिवचनव्याजेन स्वयमेव किञ्चिदुक्त्वा अन्तराऽन्तरा मध्ये मध्ये मुहुर्मुहुः हुं हुं इति शब्दं चक्रे। वदत्यचिक्कीत्यादेर्वक्ष्यमाणस्य सत्यत्वबुद्धिजननार्थं पूर्वरङ्गभूतमलीकमेव श्रवणोत्तरदानरीतिप्रकटनमकरोदिति भावः। वादं वादं आभीक्ष्ण्ये णमुल् चेति (पा॰ ३।४।२२) द्विर्वचनस्य ॥ ६५ ॥

अथेति। अथ श्रवणप्रकारप्रकटनानन्तरं असौ कला नृपं अभिसृत्य भैम्याः सकाशान्नलं प्रति गत्वा वक्ष्यमाणमेव अवोचत्। किम्भूता, अस्या भैम्या रतिप्रागल्भ्यशंसति वर्णयति त्वल्लीला विपरीतसुरतमपि करोषि साम्प्रतं नितरां धृष्टा जातासीति भैमीकर्णे प्रेमभाषणं कुर्वाणा, अत एव सख्या भैम्या लीलाम्बुजेनाघातमनुभूय प्राप्य रतिप्रागल्भ्यं नलेन शंसयति तच्छीलेति च। शंसिनी केवलाद्धेतुमण्यन्ताद्वा शंसेस्ताच्छील्ये णिनिः ॥ ६६ ॥

दृष्टं दृष्टं महाराज त्वदर्थाभ्यर्थना क्रुधा।
यत्ताडयति मामेवं यदा तर्जयति भ्रुवा ॥ ६७ ॥
वदत्यचिह्नि चिह्नेन त्वया कोनैष नैषधः।
शङ्के शक्रः स्वयं कृत्वा मायामायातवानयं ॥ ६८ ॥
स्वर्णदीस्वर्णपद्मिन्याः पद्मदानं निदानतां।
नयतीयं त्वदिन्द्रत्वे दिवस्यागमनस्य ते ॥ ६९ ॥

दृष्टमिति। हे महाराज सार्व्वभौम इयं नलाय सम्भोगं वितरेति त्वदर्थं त्वत्सम्भोगसम्बन्धितया क्रियमाणमभ्यर्थनं तस्माज्जातया क्रुधा कोपेन हेतुना मामेवं लीलाकमलाघातप्रकारेण यत्ताडयति, यदा यच्च भ्रुवा कटाक्षेण तर्ज्जयति भीषयते तत्त्वया दृष्टं दृष्टं त्वं पश्य पश्येत्यर्थः। त्वयि परपुरुषबुद्धिं कृत्वा तत्र मां कथं प्रवर्त्तयसीति मां ताडयति भ्रूक्षेपेण चेतः परं मा वादीरिति तर्ज्जयती च तत्त्वं पश्येति भावः दृष्टं दृष्टं सम्भ्रमे द्विरुक्तिः ॥ ६७ ॥

वदतीति। हे राजन् इयं इति वदति। इति किं हे कल्ये यदर्थमर्थनां त्वं करोषि एष नैषधः त्वया केन चिह्नेन अचिह्नि निर्द्धारितः, तर्हि कः अयं शक्रः स्वयंवरणकाल इव माया नलरूपं कृत्वा स्वयमायातवान् इति अहं शङ्के त्वदर्थमर्थनां कुर्व्वन्त्या मम कर्णे इति वदति ॥ ६८ ॥

भैमी त्वदिन्द्रत्वे इन्द्रप्रमाणमाह ॥ स्वर्णदीति। इयं स्वर्णद्यां मन्दाकिन्यां स्वर्णपद्मिन्याः पद्मस्यात्मनो दानं, दिवः स्वर्गात्ते

भाषते नैषधच्छायामायाऽमायि मया हरेः।
आह चाहमहल्यायां तस्यार्कोर्णितदुर्नया॥ ७०॥
सम्भावयति वैदर्भी दम्भोग्राभामतिस्तव।
जम्भारित्वं कराम्भोजाद्दम्भोलिपरिरम्भिणः॥ ७१॥

भूमिं प्रति आगमनञ्च तवेन्द्रत्वे निदानतां प्रथमकारणतां नयति प्रापयति। न हि मनुष्यस्य स्वर्णदीस्वर्णपद्मिनीसुवर्णकमलानयने स्वर्गादागमने च सामर्थ्यं दृष्टं। तस्मान्नलरूपं धृत्वा पूर्वं इन्द्र एवायमागत इति। एतदर्थं साम्प्रत्यर्थना त्वया कर्तुमयुक्ता इतीयं मत्कर्णे कथयतीति भावः। स्वर्णदीति पूर्वपदात्सञ्ज्ञायामग इति (पा० ८।४।३) णत्वं॥ ६९।

भाषत इति। हरेरिन्द्रस्य नैषधस्य छायाया कान्तेः माया कापट्यं मया स्वयंवरकाले अमायि ज्ञातेति इयं भाषते। स्वयंवरकाले तव परस्त्रीलाभावात् नलरूपं धृतं, इदानीन्तु परस्त्रीलभियैवं न करिष्यतीति मया प्रत्युक्ता सती इयं भैमी अहल्यायां गौतमपत्न्यां तस्येन्द्रस्यार्कोर्णिता व्यभिचारलक्षणो दुष्टो नयो यया एवंविधोऽयमिति चाह ब्रूते। परस्त्रीलभीतिरपि तस्य नास्ति तस्मादिन्द्र एवायमिति त्वयाऽभ्यर्थना न कार्येति मां प्रति भाषत इति भावः। नैषधस्येव छाया यस्यामिति मायाविशेषणेन प्रथमा॥ ७०॥

समिति। कृशायाभा मतिर्यस्याः सा वैदर्भी दम्भोलिः सार्वभौमत्वसूचकं वज्रं तत्परिरम्भिणो युक्तात् कराम्भोजाद्धेतोस्तव

अनन्यसाक्षिकाः साक्षात्तदाख्याय रहःक्रियाः ।
शङ्कातङ्कं नुदैतस्या यदि त्वं तत्त्वनैषधः ॥ ७२ ॥
इति तत्सुप्रयुक्तार्थं निह्नुतीकृतकैतवाम् ।
वाचमाकर्ण्य तद्भावे संशयालुः शशंस सः ॥ ७३ ॥

जम्भारिरत्वमिन्द्रत्वं सम्भावयति, तर्कयति न ह्यनिन्द्रो वज्रहस्तः । रेखारूपादपि वज्रादेवमनुमानात् कुशाग्रबुद्धित्वमस्याः ॥ ७१ ॥

अनन्येति । तस्माद्धो राजन् त्वं यदि तत्त्वेन नैषधो भवसि न तु छद्मना, तत्तर्हि न विद्यतेऽन्यो भैमीभवद्व्यतिरिक्तः साक्षी यासु युवाभ्यामेव ज्ञायन्त इत्यर्थः। तादृशो रहःक्रिया एकान्तक्रीडाः साक्षात् स्वयमेवाथ च व्यङ्ग्यवृत्तिं विना आख्याय प्रकटं कथयित्वा एतस्याः शङ्कातङ्कमिन्द्रमायासंशयभयं त्वं नुद निराकुरु एतत्प्रत्यायिकां क्रीडासमयचेष्टामुक्त्वा अस्माकमेतस्याश्च सन्देहमपनुदेत्यर्थः । सत्यनैषध इति वा पाठः ॥ ७२ ॥

इतीति । इत्युक्तप्रकारेण तया कलया सुप्रयुक्तत्वेन कैतवद्योतकहास्यादिविकारव्यतिरेकेण सुवर्णकमलदानादिन्द्रत्वनिश्चायकोपपत्तिमत्तया च सम्यक् प्रयुक्तत्वेन निह्नुतीकृतं आच्छन्नं कैतवं छद्म यस्यास्तां कलावाचमाकर्ण्य तद्भावे मयीन्द्रभ्रान्त्यैवेयं चुम्बनादि न करोति किमिति भैम्याशये संशयालुः सन्दिहानः स नलः भैमीभ्रान्तिनिरासार्थं शशंस रहोवृत्तमित्यर्थः ॥ ७३ ॥

स्मरसि छद्मनिद्रालुर्मया नाभौ शयार्पणात्।
यदानन्दोल्लसल्लोमा पद्मनाभीभविष्यसि ॥ ७४ ॥

स्मरसीति। हे भैमि छद्मना निद्रालुर्निद्राणा अलीकमेवाङ्गीकृतनिद्रात्वं मया नाभौ शयस्य करकमलस्यार्पणाद्धेतोः आनन्देन सात्त्विकभावेनोल्लसन्ति लोमानि यस्याः मत्करनाभिस्पर्शेन जातरोमाञ्चा सती पद्मयुक्तनाभिर्यस्यास्तादृशी भविष्यसि सञ्जाता, तत् स्मरसि। पाणिरोमाञ्चसम्बन्धात् सकण्टककमलसम्बन्धसम्भावनया पद्मनाभीत्वं तव यज्जातं तत्स्मरेत्यर्थः। नलपाणिः पद्मस्थानीयः रोमाञ्चश्च तत्कण्टकस्थानीयः। अथ च विकसितकमलदलतुल्यरोमाञ्चोद्गमात् पद्ममिव नाभिर्यस्यास्तादृशी जाताऽसि तत्स्मर। शयार्पणं रोमाञ्चोद्गमे हेतुः। अथ च नाभौ शयार्पणात्पद्मनाभः पद्मनाभः श्रीविष्णुर्भविष्यसि। पद्मनाभी भविष्यसीति च्विः। तत् स्मरसि नाभौ करकमलधारणाच्छ्रीविष्णुर्जाताऽसि। न हि विष्णुं विनाऽन्यस्य नाभौ कमलमस्तीत्यर्थः। निद्रिताऽसीति बुद्ध्या वसनस्रंसनार्थं नाभिसमीपं मया करेऽर्पिते तत्संस्पर्शाज्जातसात्त्विकरोमाञ्चा जाताऽसि तत् स्मरेति भावः। आनन्दोल्लासि लोमेति निद्राया अलीकत्वं द्योतितं। न हि निद्रायाः सत्यत्वे करस्पर्शाद्रोमाञ्चोद्गमो भवति। भैमीपक्षेऽपि पद्मनाभीति च्विः। स्मरतियोगेऽलभूतेऽभिज्ञावचने लृट्। लदानन्देति पाठः सम्यः ॥ ७४ ॥

जानासि ह्रीभयव्यग्रा यन्नवे मन्मथोत्सवे ।
सामिभुक्तैव मुक्ताऽसि मृद्वि खेदभयान्मया ॥ ७५ ॥
स्मर जित्वाऽऽजिमेतस्त्वां करे मत्पदधाविनि ।
अङ्गुलीयुगयोगेन यदाश्लिष्यं घने जने ॥ ७६ ॥

जानासीति । हे मृद्वि सुकुमाराङ्गि शीघ्रद्राविणि च भैमि मया नवे मन्मथोत्सवे ह्रीभयाभ्यां व्यग्रा व्याकुलितचित्ता त्वं, अतिमृदुत्वात् सम्पूर्णसम्भोगोपमर्दासहतया तव खेदो भविष्यतीति भयात् सामि अर्द्धं भुक्तैव अप्राप्तसुरतावसानैव यत् मुक्ताऽसि तज्जानासि स्मरसि । सामिभुक्ता सामीति (पा॰ २।१।२७) समासः ॥ ७५ ॥

स्मरेति । हे भैमि आजिं सङ्ग्रामं जित्वा त्वां आशामुखेनेतः प्राप्तोऽहं नमस्कारार्थं चालनार्थं वा मत्पदधाविनि मच्चरणस्पर्शिनि तव करे अङ्गुलीयुगयोगेन मदीयचरणाङ्गुलीद्वयसम्बन्धेन दर्शनार्थं समागते घने भूयसि जने मध्ये यदाश्लिष्यं आलिङ्गितवान् तत्स्मर । जनसमक्षं साक्षादालिङ्गनस्यानौचित्यात्तत्रावसरोत्कण्ठाभरतरलतया चरणाङ्गुलिद्वयेन त्वत्पाणिपीडनवशात्त्वदालिङ्गनवाञ्छां त्वां प्रति द्योतितवान् तत् स्मरेत्यर्थः । आश्लिष्यं श्लिष आलिङ्गने लुङुत्तमैकवचने श्लिषः क्सः विभाषासाकाङ्क्ष इति (पा॰ ३।२।११४) वैकल्पिकत्वादङभावः ॥ ७६ ॥

वेत्थमानेऽपि मत्यागदूना स्वं माञ्च यन्मियः।
मद्दृष्टाऽऽलेख्यपश्यन्ती व्यवधा रेखयाऽन्तरा ॥ ७७ ॥
प्रसृतन्तत्त्वया तावद्यन्मोहनविमोहितः।
अहमोऽधरपानेषु रसनामपिवन्तव ॥ ७८ ॥
त्वत्कुचार्द्रनखाङ्कस्य मुद्रामालिङ्गनोत्थितां।
स्मरेः स्वहृदि यत् स्मेरसखीः शिल्पं तवानुवं ॥ ७९ ॥

हे भैमि माने प्रणयकलहे सत्यपि मत्कर्मकत्यागेन दूना क्षणमात्रमपि मद्विरहं सोढुमशक्ता सती मिथ एकान्ते स्त्रीरूपं स्वं पुंरूपं माञ्चालेख्ये पश्यन्ती संयुक्तपरस्परदर्शनसुखमनुभवन्ती त्वं मया दृष्टा सती यच्चित्रलिखितयोरावयोरन्तरा मध्ये तुलिकादिलिखितया रेखया व्यवधाः व्यवधानं कृतवत्यसि तदेत्य जानासीत्यर्थः ॥ ७७ ॥

प्रसृतमिति। हे भैमि मोहनेन सुरतेन विशेषेण मोहितः सुरतपरवशः मोहनकारिणा कामबाणेन मोहितो निरस्तविवेकोऽहं तवाधरपानेषु अहमः सन् तव रसनां जिह्वामपिवं तत्त्वया तावत् प्राकाम्येन प्रसृतं। जिह्वायलेहनमपि कामशास्त्रोक्तमिति ॥ ७८ ॥

त्वदिति। अहं स्वहृदये तवालिङ्गनोत्थितां तव कुचे तात्कालिकत्वादार्द्रस्याशुष्कस्रुधिरस्य मया कृतस्य नखाङ्कस्य मुद्रां सहसा तद्दर्शनादेव स्मेरसखीः हास्यपरास्तव सखीः प्रति तव शिल्पं भवत्यया भैम्येदं नखक्षतं कृतं पश्यतेति स्वनिर्माणं यद-

त्वयाऽन्याः क्रीडयन्मध्येमधुगोष्ठि रुषेक्षितः ।
वेत्सि तासां पुरो मूर्ध्ना त्वत्पादे यत्किलास्खलं ॥ ८० ॥
वेत्थ मय्यागते प्रोष्य यत्त्वां पश्यति हार्दिनि ।
अचुम्बीरालिमालिङ्ग्य तस्यां केलिमुदा किल ॥ ८१ ॥

नुवं तत्स्मरेः चिन्तयेः । स्मेर इति पाठे स्मेरः सन्नहमित्यर्थः, सखीः मुख्यं कर्म । शिल्पमिति अकथितञ्चेति (पा० १।४।५१) कर्मत्वं ॥ ७८ ॥

त्वयेति । मधुगोष्ठ्या मद्यशालाया मध्ये मद्यसहपानावसरे अन्याः सपत्नीः क्रीडयन् त्वया रुषा रोषकलुषितया दृशा ईक्षितो ऽहं तासां सपत्नीनां पुरः समक्षमेव किल मद्यमत्तत्वात् स्खलनव्याजेन त्वत्पादे मूर्ध्ना यदस्खलं यदपतं तद्वेत्सि जानासि । स्खलनव्याजेन प्रणामेन त्वां प्रसादितवान् अस्मि तत्स्मरेत्यर्थं इति भावः । मध्येमधुगोष्ठि पारे मध्ये षष्ठ्या वेति (पा० २।१।१८) समासः ॥ ८० ॥

वेत्थेति । मयि प्रोष्य विजययात्रां कृत्वा आगते एव हार्दिनि प्रेमभरतरले त्वां पश्यति सति आलिं सखीं आलिङ्ग्य अन्याः सति तस्यां केलिमुदा हर्षेण किल विलासप्रकरणव्याजेन यत्त्वां अचुम्बीः तद्वेत्थ स्मरसि । कामशास्त्राभ्यामकौशलवशात्सख्यालिङ्गनचुम्बनव्याजेन मां प्रत्यालिङ्गनचुम्बनद्वारा स्वप्रेमभरं यत् सूचितवत्यसि तत्स्मरेति भावः । हे हार्दिनि इति भैमीसम्बुद्धिर्वा । प्रोष्य प्रपूर्वाद्वसेः क्त्वापि यजादित्वात्

जागर्त्ति तत्र संस्कारः स्वमुखाङ्कवदानने।
निक्षिप्यायाचिषं यत्त्वां न्यायांत्ताम्बूलफालिकाः॥ ८२॥
चित्ते तदस्ति कश्चित्ते नखजं मयि यत् क्रुधा।
प्रागभावाधिगमागःस्थे त्वया शम्बाकृतं क्षतं॥ ८३॥

सम्प्रसारणं। हार्द्दिनि हृदयस्य हृल्लेखेति (पा०६।३।५०) हृद्भावः॥ ८१॥

जागर्त्तीति। अहं ताम्बूलस्य चर्व्वितपूगफलनागवल्लीदलस्य फालिकाः शकलानि स्वमुखात् भकाशाङ्कवत्या आनने निक्षिप्य निधाय यदीयो निक्षेपः स तस्मै दातव्योऽन्यथा दण्ड्यं इति न्यायाच्छास्त्रोक्तयुक्तेर्यत्त्वा: ताम्बूलफालिकाः मदीयाः पुनर्मह्यं देहीति याचितवान् तत्र विषये स्मरणकारणभूतो भावनाख्यः संस्कारो जागर्त्ति स्फुरद्रूपो वर्त्तते स्मरसि किमित्यर्थ इति प्रश्नः॥ ८२॥

चित्त इति। मयि प्राक् त्वय्यप्राप्तसुरतान्तसुखायामेव सत्यां यो भावाधिगमः सुरतान्तसुखप्राप्तिः तद्रूपे आगस्यापराधे तिष्ठतीति एवम्भूते सति मयि विषये वा समरतस्यैव सुखहेतुत्वाद्विषमरतस्यासुखहेतुत्वात् क्रुधा मध्य एव सुखजन्याद्रोपाद्धेतोः नखजं क्षतं त्वया यत् शम्बाकृतं। प्रथमं फालकृष्टे क्षेत्रे पुनरपि सीतावदारणवत्प्रथमकृष्टभूम्यां पुनः कर्षणवत् प्रथमकृतनखक्षतमध्य एव पुनरपि गाढतरं नखक्षतं यदारोपितं तत्ते चित्ते अस्ति कच्चित् तत्स्मरेत्यर्थः। शम्बाकृतं द्वितीये खादि-

स्वदिग्विनियमेनैव निशि पार्श्वविवर्त्तिनोः ।
स्वप्नेष्वप्यस्तवैमुख्ये सख्ये सौख्यं स्मरावयोः ॥ ८४ ॥
क्षणं प्राप्य सदस्येव नृणां विमनितेक्षणं ।
दर्शिताधरसद्दंशा ध्याय यन्मामतर्ज्जयः ॥ ८५ ॥

त्यमरः शय्याकृतं कृत्रो द्वितीयेति (पा०५।४।५८) डाच् लक्षणया प्रयोगः ॥ ८३ ॥

स्वेति । स्वीयस्वीयदिशो विनिमयेनैव परिवर्त्तनेनैव निशि पार्श्वविवर्त्तिनोर्वामदक्षिणकुक्षिपरिवर्त्तनशीलयोर्न तु यथावस्थितयोः सम्मुखयोरेवैवम्भूतयोः आवयोस्तव मम च स्वप्नेष्वपि निद्रास्वपि मध्ये अस्तं त्यक्तवैमुख्यं पराङ्मुखत्वं यत्र तादृशे सख्ये मैत्रे यत्सौख्यं सुखसुखितं वा तत्स्मर । सम्मुखयोर्हि यथावस्थितयोरेव पार्श्वपरिवर्त्तिनोर्द्वयोरपि पृष्ठभागघटनात्पराङ्मुखत्वमेव स्यादिति स्वस्वदिग्विनिमयपूर्व्वकमेव पार्श्वपरिवर्त्तनेनैव वैमुख्याभावान्निद्रासमयेऽपि साम्मुख्येन यदावयोर्मैत्र्यं तत्स्मरेत्यर्थः । स्वदिग्विनिमयेन पार्श्वपरिवर्त्तनं वाऽन्योन्यसाम्मुख्यमेव भवतीति सर्व्वसाक्षिकं । सौख्यं स्वार्थे भावे वा ष्यञ् ॥ ८४ ॥

क्षणमिति । सदस्येव सभायामेव वर्त्तमानाऽपि त्वं सभास्थानां नृणां विमनितानि कार्य्यान्तरदर्शनपराणि कृतानि ईक्षणानि यत्र येन वा तादृशं क्षणं अवसरं नृत्ताद्युत्सवं वा प्राप्य सद्यः अङ्गुल्यादिना दर्शितोऽधरे वर्त्तमानो सद्दंशो सत्क्षतो दन्तव्रणो यया एवम्भूता सती तर्जन्यादिना मां यदतर्जयः

तथाऽवलोक्य लीलाब्जनालभ्रमणविभ्रमात्।
करौ योजयताऽध्येहि यन्मयाऽसि प्रसादिता ॥ ८६ ॥
ताम्बूलदानमन्यस्तकरजं करपङ्कजे।
न मम स्मरसि प्रायस्तव नैव स्मरामि तत् ॥ ८७ ॥
तदध्येहि स्मृपोद्यं मां हित्वा यत्र गता सखीः।
तत्रापि मे गतस्याग्रे लीलयैवाच्छिनस्तृणं ॥ ८८ ॥

ध्याय स्मर। विमनितेति तत्करोतीति (पा०३।१।२६।वा०) णिचि णाप्रातिपदिकेति सि० कौ० चु०१५१ इष्टवद्भावादि-लोपः ॥ ८५ ॥

तथेति। तथाऽधरदन्तक्षतदर्शनपूर्वं तर्जनप्रकारमालोक्य लीलाब्जनालस्य कराभ्यां भ्रमणरूपाद्विभ्रमात् तद्व्याजात् प्रणामप्रसादाञ्जलिबन्धनरूपेण करौ योजयता संयुक्तौ कुर्वता मया कोपत्याजनपूर्वं यत्प्रसादिताऽसि तदध्येहि स्मरेत्यर्थः। इक् स्मरणे ॥ ८६ ॥

ताम्बूलेति। त्वं त्वदीयकरपङ्कजे मम ताम्बूलदानं अन्यस्तकरजं अच्छिन्ननखक्षतं प्रायो बाहुल्येन न स्मरसि। अहमपि मदीयपाणिपद्मे त्वत्कृतं तत्पाच्छेदकं तत्ताम्बूलदानं अच्छिन्ननखक्षतं यथा तथा बाहुल्येन नैव स्मरामि किन्त्वन्योन्यवीटिकादानक्षणे प्रेमभरात्पाणिपद्मगर्भारोपितनखक्षतमेव सदा ताम्बूलदानमावयोरभूदिति भावः ॥ ८७ ॥

तदिति। कस्याप्यपराधे स्मृपोद्यमेतन्माकार्षीरित्यादि स्मृपोद्यं

स्मरसि प्रेयसि प्रायो यद्द्वितीयरतास्पृहा ।
शुचिरात्रीत्युपालब्धा त्वं मया पिकनादिनी ॥ ८९ ॥
भुञ्जानस्य नवं निम्बं परिवेविषती मधौ ।
सपत्नीष्वपि मे रागं सम्भाव्य स्वरुषः स्मरेः ॥ ९० ॥

अलीकभाषिणं मां कोपेन हित्वा सखीः प्रति गता त्वं तत्रापि सखीसमीपे भवदीयपृष्ठदेशानुवर्त्तित्वेन गतस्य मे अग्रे लीलयैव स्वभावेनैव यत्तृणं अच्छिनः चिच्छेद तदध्येहीति पूर्व्ववत्, अद्यप्रभृत्यलीकभाषिणस्तवाहं न काऽपि त्वं मम न कोऽपि इति मैत्रीविच्छेदकसूचकं वा तृणच्छेदं यथा बालकाः कुर्व्वन्ति तद्वदत्र त्वयाऽपि कृतमिति स्मरेत्यर्थः। मृषोद्यं राजसूयेति (पा० ३।१।११४) निपातः ॥ ८८ ॥

स्मरसीति। हे प्रेयसि बालत्वात्स्त्रीकुमार्यविशेषाच्च यत् द्वितीयरताभिलाषिणोऽपि मम द्वितीयस्य रतस्यास्पृहा तथा पिकवन्नदति तच्छीला कोकिलतुल्यकूजना त्वं मया शुचिरात्री यीष्मर्तुसम्बन्धिनी रात्रीति उपालब्धा सोपालम्भमामन्त्रिताऽसि तत्प्रायः स्मरसि कथयेत्यर्थः। शुचिरात्रिरपि स्वल्पप्रमाणत्वादेकवारसुरतेनैव जातप्रभातत्वात्, द्वितीयसुरतास्पृहा। वसन्तनैकट्याच्च पिकनादोऽस्यां वर्त्तत इति। तत्रापि प्रभाते कोकिलालापो भवतीत्यर्थः। यद्वा वसन्तस्यातीतत्वात्कोकिलानामभावतः पिकव्यतिरिक्ताः पक्षिणः अपिकास्तन्नादयुक्ता ॥ ८९ ॥

भुञ्जानस्येति। मधौ वसन्ते नवं नूतनसमागतपत्रपुष्पादिकं

स्मर शार्करमास्वाद्य त्वया राद्धमिति स्तुवन्।
स्वनिन्दा रोषरक्तात्तु यदभैषं तवाधरात्॥ ९१॥

निम्बं भुञ्जानस्य मे सपत्नीष्वपि रागं प्रीतिं सम्भाव्य अनुमाय कोपवशात् पुनः निम्बमेव मम भोजनार्थं परिवेविषती पात्रे परितः चिपन्ती त्वं स्मृष्यः स्वीयात् कोपात् स्वकोपस्य वा स्मरेः, मधुतरशर्करादिपरित्यागेनातिकटुरसेऽपि चेदस्यैवं रुचिस्तर्हि मदीयापेक्षयातिहीनासु मत्सपत्नीष्वप्यस्य रुचिः स्यादिति स-म्भाव्य बहुतरनिम्बमेव भुङ्क्ष्वेति वारंवारं अतिकटुनिम्बातिदा-नेन यत्कोपाच्चां प्रति व्यञ्जितवत्यसि तत्स्मरेति भावः। वदन्ते च जना निम्बं भुक्ते। परिवेविषती परिवेषणार्थात्परिपूर्व्वाद्विषेः शता। स्ताविति (पा० ६।१।१०) द्विर्वचनं, स्मृष्यः अधीगर्थेति। षष्ठी (पा० ३।२।५२) कर्म्मत्वविवचया द्वितीया वा॥ ९०॥

स्मरेति। शार्करं शर्कराविकारभूतं शर्करासंस्कृतं वा कि-मपि भक्ष्यमास्वाद्य एतत् सर्व्वातिशायिरसं अमृतस्वादिरस्वया त्वया साधितं किमिति स्वादातिशयात् अतिस्तुवन् वारंवारं तदेव वर्णयन्, अहं सर्व्वातिशायिरसमेतच्छार्करमिति स्तुतौ अधरस्यापि सर्व्वमधुरवर्गान्तःपातितया निन्दापर्य्यवसानात्म-दपेक्षयाऽप्येतदधिकरममिति अयं वर्णयति। ननु तर्ह्ययमप्यति, अयमेतदेव रमयतु मम तु कथाऽप्यनेन न कार्य्येति स्वनिन्दया रोषस्तेन रक्तात्तवाधरात् पुनर्यदभैषं भीतवानस्मि तत् स्मर। कोपेन लोहित्यं युक्तं मदधरकम्पशार्करवर्णनया कुपितया

3304

मुखादारभ्य नाभ्यन्तं चुम्बं चुम्बं न तृप्तवान्।
न प्राप्तं चुम्बितुं यत्ते धन्या तच्चुम्बतु स्मृतिः ॥ ९२ ॥
कमपि स्मरकेलिं तं स्मर यत्र भवन्निति।
मया विहितसम्बुद्धी प्रोडिता स्मितवत्यसि ॥ ९३ ॥

त्वया अधरस्फुरणादिना व्यञ्जितात्कोपाद्यद्भैयं तत्स्मरेति भावः। 'शार्करं विकारे मंज्ञातार्थे वा अण्, अधरात् भीत्रेत्यपादानत्वम् (पा०१।४।२५) ॥ ९१॥

मुखादिति। मुखादारभ्य नाभ्यन्तं नाभिपर्यन्तं त्वदङ्गं चुम्बं चुम्बं चुम्बित्वा चुम्बित्वा अतृप्तवान् असमाप्तचुम्बनेच्छुः सन्नहं स्मरमन्दिरं यत्तदङ्गं पाण्यादिना प्रतिबन्धात्लज्जातिशयाद्वा गोपितत्वात्तच्चुम्बितुं न प्राप्तं तत्स्मरमन्दिरं धन्या स्मृतिः चुम्बतु इति अतिरागात्स्मरमन्दिरमपि चुम्बितुं प्रवृत्तस्य मम तत्र दत्तवती तत्स्मरेति भावः। चक्रवर्तिनाऽपि मया यच्चुम्बितुं न प्राप्तं तत्स्मृत्या प्राप्तं अत एव सा धन्येति भावः। मुखाधिकचकुचनाभिमूलवराङ्गभागाश्चुम्बनस्थानानि ॥ ९२ ॥

कमिति। त्वं कमपि तं अनिर्वचनीयं लोकोत्तरपुरुषायितारव्यं स्मरकेलिं कामकेलिं स्मर, यत्र कामकेलौ पुंस्त्वारोपेण भवन्नित्येवं पुंलिङ्गोचितसम्बुद्ध्या मया विहिता सम्बुद्धिर्यस्याः सा त्वं प्रोडिता स्मितवत्यसि कामशास्त्राभ्यासकौशलाद्विपरीतसुरतमकार्षीः तत्स्मरेत्यर्थः। केलौ पुंस्त्वं पूर्वं दर्शितं ॥ ९३ ॥

3304

नीलदाचिबुकं यत्र मदाक्तेन श्रमाम्बुना।
स्मर हारमणौ दृष्टं स्वमास्यं तत्क्षणोचितं ॥ ८४ ॥
स्मर तन्नखमन्त्रोरौ कस्तेऽधादिति न त्रपा।
ह्रीदैवतमलुम्पं यद्व्रतं रतपरीक्षणं ॥ ८५ ॥

नीलदेति। तत्रोक्तरूपे पुरुषायिते ललाटकपोललिखितपत्रवल्लीसम्बन्धिना मदेन कस्तूर्य्याक्तेन मिश्रितेन कलुषितेन गच्छता श्रमाम्बुना आचिबुकं हनुभागमभिव्याप्य नीलत् नीलवर्णं भवत् उपरिस्थितत्वादधोविलोकयतो मुखस्य कस्तूरीमिलितेन गलता श्रमजलेन चिबुकसम्बन्धस्यौचित्यान्नीलं भवत् एवम्भूतं। अधोभागे वर्त्तमानस्य मम हृदि वर्त्तमाने मुक्ताहारमध्यमणौ तत्क्षणं विपरीतरताचरणसमये तत्क्षण उत्सवे वा उचितमुक्तरीत्या योग्यमथ च पुरुषायितक्षणे तादृशस्य श्रमजलस्य चूचुकातिवाहित्वेनोचितं दृष्टं स्वमास्यं स्मर। मदो रेतसि कस्तूरी गर्व्वे हर्षेभदानयोरित्यभिधानान्मदसदृश एकदेशलक्षणया मृगमदवाची। नीलत् आचारक्विबन्ताच्छता। नीलवर्णधातुरिति केचित्॥ ८४ ॥

स्मरेति। अथ मत्स्थिते तवोरौ को नखमधाद्दत्तवानिति त्रपाऽसत्यभाषी सन् ह्रीरेव दैवतं यस्य तत्, अत एव रतस्य परीक्षणं परीक्षाकरणं यद्यथार्थरूपं रतिप्रतिबन्धकं व्रतं नियमं यदलुम्पं निर्वर्त्तितवान्, तत्स्मर। परपुरुषसम्बन्धशङ्कोत्पादनार्थं त्रपाभाषणेन रसान्तरमुत्पाद्य लज्जाकृते सुरतप्रतिबन्धकगु-

वनकेलौ स्मराश्वत्थदलं भूपतितं प्रति- ।
देहि मह्यमुदस्येति मञ्जिरा मीडितासि यत् ॥ ९६ ॥
इति तस्या रहस्यानि प्रिये शंसति सान्तरा ।
पाणिभ्यां पिदधे तस्याः श्रवसी ह्रीवशीकृता ॥ ९७ ॥
कर्णौ पीडयती सख्या वीक्ष्य नेत्रासितोत्पले ।
अप्यपीडयतां भैमीकरकोकनदे नु तौ ॥ ९८ ॥

योगं यन्निर्वर्त्तितवान् तत् स्मरेत्यर्थः । व्रतं यद्दैवतं भवतीति ह्रीदैवतमित्युक्तं ॥ ९५ ॥

वनेति । त्वं इति मञ्जिरा यद् मीडितासि तत्स्मर । इति किं । हे भैमि त्वं वनकेलौ आरामविहारसमये भुवि पतितं अश्वत्थदलं उदस्य पाणिना उत्क्षिप्य मह्यं प्रतिदेहीति अश्वत्थपत्रसदृशं विपुलञ्च गुह्यमिति कामशास्त्रवचनात् भूपतिताश्वत्थदलयाचनेन वराङ्गयाचनस्य सूचितत्वाद् मीडितासि तद् स्मरेति भावः ॥ ९६ ॥

इतीति । सा भैमी प्रिये इति पूर्व्वोक्तप्रकारेण तस्या रहस्यानि एकान्तरतवृत्तानि शंसति सति ह्रिया वशीकृता लज्जिता सती अन्तरा मध्ये एवासमाप्त एव वचने पाणिभ्यां सख्याः कलायाः श्रवसी कर्णौ पिदधे आच्छादितवती । इतः परमयं सङ्गुप्तमपि रहस्यमस्यै कथयिष्यति तदनया अनाकर्णनीयमिति बुध्या तस्याः कर्णौ पिधत्तेत्यर्थः ॥ ९७ ॥

कर्णपिधानमेवोत्प्रेक्षते ॥ कर्णाविति । भैमीकरावेव कोक-

तत्प्रविष्टं सखीकर्णे पत्युरालपितं ह्रिया।
पिदधाविव वैदर्भी स्वरहस्याभिसन्धिना॥ ९९॥
तमालोक्य प्रियाकेलिं नले सोत्प्रासहासिनि।
आरात्तत्त्वमबुध्वाऽपि सख्यः सिष्मियिरेऽपराः॥ १००॥

नदे रक्तोत्पले अपि कर्त्तारौ सख्याः कलाया नेत्रे एवासितो-त्पले तस्या एव कर्णौ पीडयती यन्त्रयती वीक्ष्य तौ कलाकर्णौ कर्मभूतौ अपीडयतां नु। कलानेत्रनीलोत्पलयोराकर्णपूर्णतया कर्णाक्रमणात् पीडाकरणे इव भैमीकररक्तोत्पले अपि साजा-त्यान्नेत्रनीलोत्पलसाहायकाचरणबुद्ध्येव स्पर्द्धयेव वा भैमीक-रकोकनदे अपि तत्कर्णौ पीडयामासतुः किमिति भावः। सवर्णयोः साहाय्यकं स्पर्द्धा च युक्ता। पीडयती वा नपुंसकस्येति (पा० ७।१।७९) नुमभावः॥ ९८॥

पुनरन्यथोत्प्रेक्षते॥ तदिति। वैदर्भी सखीकर्णे प्रविष्टं तत्पू-र्वोक्तं रहस्यरूपं पत्युरालपितं स्वरहस्यं एतत्कर्णाभ्यां सका-शात् बहिर्मा गादिति अभिसन्धिना अभिप्रायेणेव ह्रिया पिदधौ आच्छादितवती। अन्यदपि गोप्यवस्तु भाण्डे निक्षि-प्यान्यो मा ज्ञासीदिति तद्द्वारं पिधीयते॥ ९९॥

तमिति। आराद्दूरे स्थिता अपराः सख्यस्तत्त्वं नलहा-सकारणमबुध्वाऽपि सिष्मियिरे जहसुः। कस्मिन् सति। नले तं पूर्वोक्तं प्रियाकेलिं आलोक्य सोत्प्रासहासिनि उत्प्रासेनोच्चैस्त्वेन सह यथा तथा हसति सति। नलाट्टहासश्रवणमात्रेण सिष्मि-यिर इत्यर्थः॥ १००॥

दम्पत्योरुपरि प्रीत्या ता धराप्सरसस्तयोः।
ववृपुः स्मितपुष्पाणि सुरभीणि मुखानिलैः॥ १०१॥
तदास्यहसिताज्जातं स्मितमासामभासत।
आलोकादिव शीतांशोः कुमुदश्रेणिजृम्भणं॥ १०२॥
प्रत्यभिज्ञाय विज्ञाऽथ स्वरं हासविकस्वरं।
सख्यास्तासु स्वपत्रायाः कला जातबलाऽजनि॥ १०३॥

दम्पत्योरिति। ताः सख्य एव धरायां उर्व्वश्याद्यप्सरसः तयोर्द्दम्पत्योरुपरि प्रीत्या प्रेमातिशयेन मुखानिलैः सुरभीणि स्मितान्येव पुष्पाणि ववृपुः सर्व्वा अपि सख्यस्तावुभौ क्रीडावशाज्जहसुरित्यर्थः। मुखानिलसुरभित्वेन तासां पद्मिनीत्वं सूचितं तयोः षष्ठ्यतसर्थेति (पा॰२।३।३०) षष्ठी॥ १०१॥

तदेति। अस्य नलस्यास्यहसिताज्जातमासां सखीनां स्मितं शीतांशोरालोकात् सकाशाज्जातं कुमुदश्रेण्यां जृम्भणं विकासनमिवाभासत। तदस्येति क्वचित् पाठः॥ १०२॥

प्रतीति। अथ सखीसमूहहास्यानन्तरं विज्ञा अतिचतुरा कला तासु सखीषु मध्ये स्वपत्राया निजमित्रभूतायाः कस्याश्चित् सख्याः स्वरं हास्येन विकस्वरं सुव्यक्तं, अत एव सोऽयं मत्सख्या एव स्वर इति प्रत्यभिज्ञाय परोक्षप्रत्यक्षोभयात्मकज्ञानविषयं कृत्वा, जातं बलं यस्यास्तादृशी भैमीप्रतारणार्थं समस्यायोत्साहसम्भियुक्ता वाऽजनि। मत्पक्षीयाऽत्र विद्यतेऽतोऽस्याः सकाशान्मां मोचयिष्यति, अवशिष्टमाकर्णयिष्यतीति साऽऽश्वस्ताऽ

साऽऽह्वयोच्चैरथोचे तामेहि स्वर्गेण वञ्चिते।
पिब वाणीः सुधावेणीर्नृपचन्द्रस्य सुन्दरि ॥ १०४ ॥
साऽश्रृणोत्तस्य वाग्भागमनत्यासत्तिमत्यपि।
कल्पग्रामाल्पनिर्घोषं वदरीव कृशोदरी ॥ १०५ ॥

भूदिति भावः। अन्योऽपि केनचित् प्रतिबद्धः स्वपक्षीयं दृष्ट्वा जातबलो भवति। सखीस्वरश्रवणन्तु कर्णपिधानात् पूर्वमेव ज्ञातव्यं अन्यथा स्वरश्रवणानुपपत्तेः। भैमीकरयोः कोमलतरतया कर्णनिविडपीडनसामर्थ्याभावेन वा स्वरश्रवणोपपत्तेः। तच्छ्रुत्वा इति च पाठः ॥ १०३ ॥

सेति। अथ स्वपक्षीयस्वरप्रत्यभिज्ञानानन्तरं सा कला तां स्वसखीं उच्चैस्तारस्वरं यथा तथा आहूय इति ऊचे। इति किं दूरस्थत्वात् हे स्वर्गसुखेन वञ्चिते सुन्दरि एहि समीपमागच्छ। आगत्य त्वं नृप एवाह्लादकत्वाच्चन्द्रस्तस्य सुधावेणीः अमृतप्रवाहरूपा वाणीः पिब सादरमाकर्णयेति। स्वर्गेऽपीन्द्रमृतपानमेव, नलपरिहासाकर्णनसुखं स्वर्गसुखमेव तदनुभवेत्यर्थः ॥ १०४ ॥

सेति। कलयाऽऽहूता ऽनत्यासत्तिमत्यपि अत्यन्तनैकट्यरहिताऽपि यत्र स्थिता किञ्चित् श्रूयते किञ्चिन्नेति तत्र स्थिता कृशोदरी सा कलासखी तस्य वचोभागमवशिष्टमंशं अशृणोत् कलाकर्णयोर्भैम्या पिहितत्वादाहूता सखी नलकथ्यमानरहस्यकथाशेषमशृणोदित्यर्थः। का कमिव। कृशोदरी कृशमध्या अल्पजलेति यावत्। एवम्भूता वदरी कल्पग्रामगाद्यो ग्रामस्तस्याल्पनिर्घोषं

अथ स्वपृष्ठनिष्ठायाः शृण्वन्त्या नैषधाभिधाः।
नलमौलिमणौ तस्या भावमाकलयत् कला ॥ १०६ ॥
प्रतिविम्बेक्षितैः सख्या मुखाकूतकृतानुमा।
तद्व्रीडाद्यनुकुर्व्वाणा शृण्वती चान्वमायि सा ॥ १०७ ॥

लोककलकलं तत्र पठतां वेदध्वनिम्वा तमिव, वदरिकाश्रमस्थो लोकः मुनिजनस्थानभूतः कल्पग्रामनिवासिनो जनस्य कोलाहलं शृणोतीति तैर्थिकप्रसिद्धिः ॥ १०५ ॥

अथेति। अथ कलासख्या नलवाक्यशेषश्रवणानन्तरं स्वपृष्ठे निष्ठा स्थितिर्यस्याः कर्णपिधानपरतया कलापश्चाद्भागे स्थितायास्तया कलासखीं प्रति रहस्यं ब्रुवतो नैषधस्याभिधा वचनानि शृण्वन्त्याः तस्या भैम्या भावं रहस्यकथनाद्धासकोपाभिव्यञ्जकमुखचेष्टाविशेषं नलस्य मौलिमणौ शिरोरत्ने प्रतिविम्बवशादाकलयदज्ञासीत्, ददर्शेत्यर्थः। नलेन कलासखीं प्रति रहस्ये उक्ते भैम्या हासकोपादिचेष्टां नलमौलिरत्ने प्रतिविम्बितां सा कला ददर्श न त्वशृणोदित्यर्थः ॥ १०६ ॥

प्रतिविम्बेति। प्रतिविम्बे ईक्षितैः सख्याः पृष्ठस्थिताया भैम्याः स्वपक्षसख्या वा मुखाकूतैः व्रीडाहास्यादिसूचकमुखसङ्कोचविकासादिचेष्टितैः कृता कृता अनुमाऽनुमितिर्यया तादृङ्मुखविकारदर्शनात् प्रायेण नलेनैवमुक्तं स्यादित्येवं कृता नलवाक्यार्थसम्भावना यया सा, तया तस्या भैम्याः स्वपक्षसख्या वा नलवाक्यानुरूपव्रीडाद्यनुकुर्व्वती प्रतिविम्बदर्शनादेवाङ्गसङ्कोचाद्यभिनयेना-

कारङ्कारं तथाकारमूचे साऽश्रृणवन्तमां।
मिथ्या वेत्थ गिरश्चेत्तद्व्यर्थाः स्युर्मम देवताः॥ १०८॥
मत्कर्णभूषणानान्तु राजन्निविडपीडनात्।
व्यथिष्यमाणपाणिस्ते निषेद्धुमुचिता प्रिया॥ १०९॥

नुकुर्व्वाणा दर्शयन्ती सती सा कला भैमीपाणिपिहितकर्णाऽपि तत् मीडाद्यनुकरणादेव भैमीवत्सखीवद्वा नलवचनं शृण्वती-त्यमानि भैमीनलाभ्यां सम्भाविता। व्रीडादि न लोकेति (पा॰२।३।६९) षष्ठीनिषेधाद्द्वितीया। अनुकुर्व्वाणा अनुपरा-भ्यां कृञ् इति (पा॰१।३।७९) परस्मैपदविधानाच्छानजभावे ताच्छील्ये शत्रौ वा चानश्॥ १०७॥

कारमिति। सा कला तथा पूर्व्वोक्तभैम्याः स्वपत्सख्या वा नलमौलिमणिदृष्टं मुखव्रीडादर्शायाकारं कृत्वा कृत्वा अनया सर्व्वं श्रुतमिति यथा प्रतीतिर्भवति तथाऽभिनयं कृत्वा इत्यूचे। इति किं। अहं भवदीयं सर्वं वृत्तान्तं सर्व्वमश्रृणवन्तमां नि-तरां आकर्णितवत्यस्मि, हे भैमि त्वं भवद्वचनश्रवणसूचिका मम गिरः मिथ्या चेद्वेत्थ जानीषे अनाकर्णितमप्याकर्णितमियं वद-तीति मन्यसे चेत्तर्हि अभीष्टसिद्ध्यर्थं प्रत्यहं पूज्यमाना मम गौर्य्यादीष्टदेवताः व्यर्थाःनिष्फलाः स्युरिष्टदायिन्यो मा भूवन्नि-ति मया शपथः क्रियते इति नलं प्रत्येवोचदा। अश्रृणवन्तमां तिङश्चेति (पा॰५।३।५६) तमप्॥ १०८॥

मदिति। इतीति युग्मम्॥ सा कला इति पूर्व्वोक्तं नलं प्रति

इति सा मोचयाञ्चक्रे कर्णौ सख्याः करग्रहात् ।
पत्युराश्रवतां यान्त्या मुधायासनिषेधिनः ॥ ११० ॥
श्रुतिसंरोधजध्वानसन्ततिच्छेदतालताम् ।
जगाम झटितित्यागस्वनस्तत्कर्णयोस्ततः ॥ १११ ॥

उक्ता सख्या भैम्याःकरग्रहात् पाणिभ्यां पीडनात् सकाशात् कर्णौ मोचयाञ्चक्रे,अर्थाद्भैम्यैव प्रयोज्यया । तृतीयान्तस्तु सप्तम्यर्थः । किंभूतायाः । कर्णपिधानरूपान्मुधायासात् वृथाप्रयासात् निषेधिनो निवारयितुः पत्युराश्रवतां वचनकारित्वं यान्त्या गच्छन्त्यास्तद्वचनकारिण्या इत्यर्थः । शपथरूपकलावचनमाकर्ण्य कर्णपिधानप्रयासो व्यर्थ इति निविडपीडनात् तव पाणिपीडैव भविष्यतीति तत्कर्णौ मुञ्चति । नलवचनाद्भैमी तत्कर्णावमुञ्चदित्यर्थः । इति किं । हे राजन् मत्कर्णपिधानवशात् कर्णभूषणानां निविडपीडनाद्धेतोस्तु पुनः सौकुमार्यातिशयादितः परमपि वर्धिष्यमाणां पीडां प्राप्स्यन्तौ पाणी यस्यास्तादृशी ते तव प्रिया निषेद्धुमुचितेति, कर्णपिधानफलं नास्ति, पिधानप्रयासो व्यर्थः, प्रत्युतास्याः पीडा भविष्यति, इयं त्वया निषेध्यत्यर्थः ॥ १०८ ॥ ११० ॥

श्रुतीति । ततः कर्णमोचनानन्तरं, ततो विस्तृतो, वा तस्याः कलायाः कर्णयोः झटिति शीघ्रं त्यागस्तस्माच्छीघ्रहस्तमोचनाज्जातो यो यत्नादिस्वनः स श्रुत्योः संरोधान्निविडपीडनाज्जातो यो ध्वानः शब्दस्तस्य सन्ततिरविच्छिन्नता निरन्तरं समुत्पन्नो गुमगुमारव इति यावत् । तस्य छेदे विरतौ तालतां हस्तताल्ल-

साऽपसृत्य कियद्दूरं मुमुदे सिस्मिये ततः।
इदञ्च तां सखीमेत्य ययाचे काकुभिः कला ॥ ११२॥
अभिधास्ये रहस्यं तद्यदश्रावि मयाऽनयोः।
वर्ण्यताकर्णितं मह्यमेह्यालि विनिमीयतां ॥ ११३॥

यवाद्यपरिच्छेद्यगीतादिक्रियामानभूतकालतां जगाम। झटिति-मुद्रितकर्णमोचनादनुभूयमानयन्त्रादिशब्दः कर्णपिधानसमयेऽनुभूयमानगुमगुमारवविरामज्ञापकोऽभूदित्यर्थः। एतच्च प्रत्यचसिद्धं ॥ १११॥

सेति। सा कला ततोऽनन्तरं तस्माद्दम्पत्युपवेशनस्थानाद्वा सकाशात् कियत्किञ्चिद्दूरमपसृत्य गत्वा मुमुदे सिस्मिये प्रतारणकौशलवशाज्जहास च तां स्वसखीं श्रुतनलवचनां एत्य इदं वक्ष्यमाणं काकुभिरर्थविशेषव्यञ्जकैरुच्चनीचैर्ध्वनिविकारैः कृपणभाषणैर्ययाचे, अवोचदिति यावत् ॥ ११२॥

अभिधास्य इति। हे सखि मया अनयोर्यद्रहस्यमश्रावि अहं तं रहस्यं तुभ्यमभिधास्ये। मत्कर्णपिधानानन्तरं अनयोः रहस्यं त्वया आकर्णितं तत्त्वं मह्यं वर्णय कथय, एहि शीघ्रमागच्छ विनिमीयतां परिवृत्तिः क्रियतां। मह्यं क्रियया यमभिप्रैतीति (पा० २।४।३२वा०१) सम्प्रदानत्वं भिन्नवाक्यत्वादन्वादेशाभावान्न मयादेशः॥ ११३॥

वयस्याभ्यर्थनेनास्याः प्राक्कूटश्रुतिनाटने।
विस्मितौ कुरुतः स्मैतौ दम्पती कम्पितं शिरः ॥ ११४ ॥
तथाऽऽलिमालपन्तीं तामभ्यधान्निषधाधिपः।
आस्व तद्वञ्चितौ स्वश्चेन्मिथ्या शपथसाहसात् ॥ ११५ ॥
प्रत्यालापीत् कलाऽपीमं कलङ्कः शङ्कितः कुतः।
प्रियापरिजनोक्तास्य त्वय्येवाऽद्य मृषोद्यता ॥ ११६ ॥

वयस्येति। अश्रुतरहस्यश्रवणार्थमाहूताया वयस्याया अभ्यर्थनेन स्वाश्रुतश्रवणप्रार्थनेन हेतुनाऽस्याः कलायाः अशृणवन्त मामित्यादिप्राक्कूटश्रुतिः पूर्वकृतमिथ्याशिरःकम्पादिपूर्वं श्रवणं तस्या नाटनेऽभिनये विस्मितौ अनया कथमावां प्रतारितौ स्वः दृष्टं दृष्टं इति मिथोवचनपूर्वकं साश्चर्यौ तौ दम्पती शिरःकम्पितं कुरुतः स्म। नाटने चौरादिकान्नटेर्नपुंसके भावे ल्युट् ॥ ११४ ॥

तथेति। निषधाधिपः तथा रहस्यविनिमयकथनप्रार्थनरूपेण यां स्वपक्षभूतां आलिं प्रत्यालपतीं तां कलामभ्यधात् अवोचत्। हे कले मिथ्याशपथरूपात् साहसादविचारकारित्वाद्धेतोः चेद्यद्यावां कर्णमोचनार्थमेव त्वयाऽलीकवचनोक्त्या वञ्चितौ प्रतारितौ स्वो भवावः तर्हि आस्व तिष्ठ तिष्ठ। तत्तर्हि आस्वेति भिन्नं वा प्रतारनिमित्तं तज्जनोक्तिमूचे इत्यर्थः ॥ ११५ ॥

प्रत्येति। कलाऽपि इमं नलं प्रति उद्विग्न आलापीत्, अवोचत्, हे राजन् त्वया प्रियाया भैम्याः परिजनस्य सेवकभूताया ममोक्तस्य वचनस्य एतावत्सु दिनेषु मध्ये अद्यैव मृषोद्यता मि-

सत्यं खलु तदाश्राषं परं गमगुमारवं।
शृणोमीत्येव चावोचं न तु त्वद्वाचमित्यपि॥११७॥
आमन्त्य देव तेन त्वां तद्दैयर्थ्यं समर्थये।
शपथः कर्कशोदर्कः सत्यं सत्योऽपि दैवतः॥११८॥

व्याभाषणरूपः कलङ्को दोषः कुतः कस्माद्धेतोः शङ्कितः सम्भावितः तत्कारणं कथयेति सत्यवादित्वाद्भैम्याः परिचारिकायाः ममालीकभाषित्वं सम्भावयितुमप्यशक्यमित्यर्थः। भैमी राज्ञी वृत्तमपि सुरतमसदये अवृत्तमिति कथयति परिजनस्य प्रभुसदृशो युक्तः। तथाचालीकभाषणं मम गुणा एव न तु कलङ्क इत्यर्थः। परिजनस्योक्ताविति वा पाठः॥११६॥

स्ववचनस्य सत्यतां प्रतिपादयति। सत्यमिति। अहं तदा श्रवणपिधानकाले खलु निश्चितं अश्रौषं इति सत्यं, परं केवलं गुमगुमारवं न तु त्वद्वचनं। तथाच श्रवणमात्रं सत्यमेवेत्यर्थः। शपथकरणसमये शृधातोः सकर्मत्वेऽपि कर्माविवक्षया अहं शृणोमीत्येव वाऽवोचं न तु त्वद्वाचमिति विशेषणमप्यब्रुवं। शपथोऽपि साधारणश्रवणमात्रविषयत्वात् सत्य एवेति। न कथञ्चिदपि ममालीकभाषित्वं त्वया शङ्कनीयमित्यर्थः। अशृणवन्मामिति तत्रोक्तत्वादत्र शृणोमीति श्रवणमात्रोपलक्षणपरं न तु भूतवर्त्तमानपरमिति ज्ञातव्यं॥११७॥

यथाः शुर्ममेति देवताशब्दस्यान्यार्थत्वेन शपथो मया न कृत एवेति समर्थयते। आमन्त्र्येति। हे राजन् अहं तेन

असम्भागकथारम्भैर्वञ्चयेथे कथं नु मां।
हन्त सेयमनर्हन्ती यत्तु विप्रलभे युवां॥ ११९॥

व्यर्था स्युरित्यादिना वाक्येन देवेति तामामन्त्र्य सम्बोध्य ताः श्रवणप्रतिपादिका अशृणवन्तमामित्यादयो मम गिरो व्यर्था अलीकाः स्युः यथा त्वं मिथ्याभूता वेत्थ तादृश्य एव कामं स्युरिति अशृणवन्तमामित्यादीनां त्वद्वचनश्रवणप्रतिपादिकानामपि गिरां वैयर्थ्यमेव समर्थये मिद्धान्तत्वेन प्रतिपादयामि। अथ च या गुमगुमारवरूपा अश्रौषं याश्च त्वं मिथ्या वेत्थ तासां गिरां अनुकरणशब्दत्वात् अर्थशून्यत्वात् निरर्थकत्वाद्वैयर्थ्यं समर्थये पूर्व्वकृतस्य शपथस्यान्यमर्थं कृत्वा कथमपलपसीत्यत आह।

सत्येनापि शपेद्यस्तु देवाग्निगुरुसन्निधौ।
तस्य वैवस्वतो राजा धर्मस्यार्द्धं निकृन्तति॥

इत्यादि मन्वादिवचनप्रामाण्याद्देवतासमन्तो सत्योऽपि शपथो सत्यं निश्चितं यस्मात् कर्कशोदर्कः दारुणपरिणामः किं पुनरसत्यः तस्मादिति ज्ञात्वा मया शपथो न कृत एव। परं देवस्यैव शपथभ्रान्तिर्जातेत्यर्थः। अत एव त्वां देवेत्यामन्त्रितवती दैवते सत्योऽपि शपथः कर्कशोदर्क इति यन्मन्वादिभिरुक्तं तत्सत्यं। यस्माच्छपथभ्रान्त्या सम्प्रत्येव त्वया मयि कलङ्क आरोपित इत्यर्थ इति वा॥ ११८॥

इदानीं आर्जवं हि कुटिलेषु न नीतिरिति न्यायादलीकभाषणेऽपि अदोषत्वमाह। असम्भोगेति। हे भैमीनलौ युवां

कर्णे कर्णे ततः सख्या श्रुतमाचख्यतुर्मिथः।
मुहुर्विस्मयमाने च स्मयमाने च ते वहु॥ १२०॥
अथाख्यायि कलासख्या कुप्य मे दमयन्ति मा।
कर्णाद्द्वितीयतोऽप्यस्याः सङ्क्रोप्यैव यद्ध्रुवं॥ १२१॥

भैमी मह्यं स्प्रष्टुमपि न ददाति नलेनाहं कदाचिदपि न स्पृष्टा ऽपि इत्यसम्भोगकथारम्भैरन्योन्यसम्भोगाभावविषयवृत्तान्तारम्भैः मिथोऽनुभूतसुरतभरनिह्नवैः छलात् मां कथं नु कथमिव वञ्चयेथे प्रतारयथः। यत्तु पुनः, अहं कर्म्मीभूतौ युवां विप्रलम्भे प्रतारयामि सेयमहं अनर्हन्ती अयोग्या अनुचितकारिणी इत्त कष्टं चित्रं वेति काकुः। युवाभ्यामहं वञ्चनीया मया तु भवन्तौ न वञ्चनीयौ का वा रीतिरियं वञ्चनकरणसाम्यात् समदोषगुणौ युवामहं चेति भावः। अर्हन्तीति अर्हः प्रशंसायामिति शतरि उगितान्ङीप् नुम् युवां कर्तृत्वेन चावृत्त्या योज्यं॥ ११८॥

कर्ण इति। ततः स्ववञ्चकत्वदोषपरिहारानन्तरं भैमीसुरतप्रागल्भ्ये मुहुर्विस्मयमाने आश्चर्य्यं कुर्व्वाणे च वहु नितरां स्मयमाने हसन्त्यौ च ते कलासखीलक्षणे सख्यौ भैम्या वा सहचर्य्यौ मिथोऽन्योन्यस्य कर्णे कर्णे स्वस्वश्रुतं रहस्यं आचख्यतुः। चावन्योन्यसमुच्चये। अन्योन्यकर्णापेक्षया वीप्सायां द्विरुक्तिः॥ १२०॥

अथेति। अथान्योन्यकर्णे तत्तद्रहस्यकथनानन्तरं कलायाः सख्या कलयैव सख्या वा भैमी आख्यायि इति उक्ता हे दम-

प्रियः प्रियामथाचष्ट दृष्टं कपटपाटवं।
वयस्ययोरिदं तस्मान्मा सखीष्वेव विश्वसीः ॥१२२॥
आलापि कलयाऽपीयं पतिर्नालपति क्वचित्।
वयस्येऽसौ रहस्यं तत्सभ्ये विस्रम्भमीदृशि ॥१२३॥

यन्ति त्वं मे मह्यं मा कुप्य अहं यदब्रुवं तदस्या द्वितीयतोऽपि कर्णात् मह्योऽप्येवाब्रुवं, अस्या एकेनैव कर्णेन श्रुतं न तु द्वितीयेनेति लौकिकादाभाषणात् परिहासोऽपि। एवमिति पाठे एवम्प्रकारेण मह्योपेति। कुप्य मे क्रुधद्रुहेति (पा०१।४।३७) सम्प्रदानत्वं मा निरनुबन्धकः अब्रुवं लङ् ॥१२१॥

प्रिय इति। अथ सख्युक्त्यनन्तरं प्रियः प्रियां आचष्टे इति ऊचे। इति किं हे भैमि त्वं वयस्ययोः कपटपाटवमिदं वचनचातुर्यं दृष्टमनुभूतं यतः तस्मात्सखीष्वेव मा विश्वसीः किन्तु मयि कदाचिद्विश्वसिहि सखीषु नैव विश्वसीः किन्तु मय्येवेति वा। यद्वा मा विश्वसीरेव ॥१२२॥

आलापीति। कलयाऽपि इयं भैमी मधुरकाकूक्त्या आलापि इत्युक्ता। इति किं। हे वयस्ये असौ तव पतिः क्वचिदपि देशे जने वा त्वद्रहस्यं नालपति किन्तु गोपायत्येव। तत्तस्मादीदृशि एतत्सदृशेऽन्यस्मिन्नपि सभ्ये साधौ विस्रम्भं विश्वसनीयं त्वया किं पुनरेतस्मिन्निति विदग्धलक्षणया अयं सर्व्वस्यापि त्वद्रहस्यं प्रकटयत्येव, असभ्यश्चासोऽयमित्यस्मिन्नेतत्सदृशेऽन्यस्मिन्नपि नैव विश्वसीरिति। नालपति अपिनालपति विस्रम्भमपि तु नेति काकुर्वा। आलपीत्यपि क्वचित्पाठः ॥१२३॥

इति व्युत्तिष्ठमानायां तस्यामूच नलः प्रियाम्।
भण भैमि बहिःकुर्व्वे दुर्व्विनीते गृहादमू॥ १२४॥
शिरःकम्पानुमत्याऽथ सुदत्या प्रीणितः प्रियः।
चुलुकं तुच्छमुत्क्षिप्य सख्योः सलिलमक्षिपत्॥१२५॥

इतीति। नलस्तस्यां कलायां इति उक्तप्रकारेण प्रतिबन्ध्या व्युत्तिष्ठमानायां प्रतिरोधकारिण्यां सत्यां प्रियां प्रति इत्यूचे। इति किं। हे भैमि अहं दुर्व्विनीते दुष्टे नितरां विश्वासघातिन्यौ अमू सख्यौ गृहाद्बहिःकुर्व्वे निष्कासयामि भण आज्ञापय। एतेन नलस्य सम्भोगेच्छा व्यज्यते तदर्थमेव कुर्व्वे इति लट्। व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि चेत्यभिधानादूर्द्ध्वकर्म्मलाभावात् उदोऽनूर्द्ध्वकर्म्मणीति (पा०१।३।२४) तङ्। व्युत्तिष्ठमानायां विरोधाचरणे कृतोद्यमायां वा॥१२४॥

शिर इति। अथोक्तविषयकथानन्तरं सुदत्या भैम्याः शिरःकम्पेन या सखीनिष्कासनस्यानुमतिरनुज्ञा तया कृत्वा प्रीणितो जनितानन्दः प्रियः सख्योर्विषये तुच्छं रिक्तं चुलुकमुत्क्षिप्य उद्यम्य वरुणवरेण प्राप्तं सलिलं तन्निष्कासनार्थं अक्षिपत्। सख्योर्दुष्टत्वाच्छिरःकम्पेन भैम्या तद्बहिष्करणमङ्गीकृतं, नलस्याशयानुसारेण भैम्यपि सम्भोगेच्छयैवैते बहिष्कर्त्तुमिच्छति मत्सम्भोगोऽनुमतोऽस्या इति सन्तुष्टोऽत एव तन्निर्गमनार्थं जलं क्षिप्तवानिति भावः। शिरःकम्प एवानुमतिर्यस्यास्तया सुदत्येति वा॥ १२५॥

तच्चित्रदत्तचित्ताभ्यामुच्चैः सिचयसेचनं।
ताभ्यामलम्भि दूरेऽपि नलेच्छापूरिभिर्ज्जलैः॥ १२६॥
वरेण वरुणस्यायं सुलभैरम्भसां भरैः।
एतयोस्तिमितीचक्रे हृदयं विस्मयैरपि॥ १२७॥
तेनापि नापसर्पन्त्यौ दमयन्तीमयं ततः।
दर्पणादर्शयत् पश्य नन्विमे तन्वि मे पुरः॥ १२८॥

तदिति। तुच्छचुलुकमोचनमात्रेण जलसेचनात् तज्जलेन चित्रे आश्चर्य्ये दत्तं स्थापितं चित्तं ययोस्ताभ्यां दूरेऽपि स्थिताभ्यां सखीभ्यां तुच्छं चुलुकं नलेच्छामात्रेण पूरयन्ति सर्व्वमाप्लावयन्ति तच्छीलैः परिपूर्णतरैर्जलैः कृत्वा उच्चैर्नितरां सिचयस्य वस्त्रस्य सेचनमार्द्रीभावोऽलम्भि प्रापि॥ १२६॥

वरेणेति। अयं नलो वरुणवरेण सुलभैरनायासलभ्यैरम्भसां भरैः पूरैः तथाऽऽकस्मिकदर्शनप्रभवैर्विस्मयैराश्चर्य्यैरपि कृत्वा एतयोः सख्योः क्रमेण हृदयं उरःस्थलमन्तरञ्च स्तिमितीचक्रे पूर्व्वमनार्द्रमप्यार्द्रीचक्रे तथाऽनिश्चलमपि निश्चलीचक्रे वारिपूरसेकेनातितरां आश्चर्यं जातमित्यर्थः। तिमस्तिम आर्द्रीभावे॥ १२७॥

तेनेति॥ स्थितौत्थयेति॥ युग्मं॥ ततो जलसेकानन्तरं अयं नलः तेन तावता जलसेकेनापि गृहाद्बहिर्नापसर्पन्त्यौ अनिर्गच्छन्त्यौ ते सख्यौ कुचदर्शनाज्जातेन दर्पेण दमयन्तीं अदर्शयत्। दर्पणेनेति पाठे कुचदर्शनोपलक्षकपाणिचेष्टाभिनयेन, ननु तन्वि

क्लिन्नीकृत्याम्भसा वस्त्रं जैनप्रव्रजितीकृते।
सख्यौ सचौमभावेऽपि निर्विघ्नस्तनदर्शने ॥ १२९ ॥
अम्बुनः शाम्बरत्वेन मायैवाविरभूदियं।
तत्पटावृतमप्यङ्गमनयोः कथयत्यदः ॥ १३० ॥

त्वं मे पुर इमे सख्यौ पश्य। किम्भूते सख्यौ। अम्भसा कर्तृभूतेन करणेन कर्तृभूतेन मया वा वसनं क्लिन्नीकृत्यार्द्रीकृत्य जैनप्रव्रजितीकृते दिगम्बरपरिव्राजिकात्वं प्रापिते। यतः सचौमभावे दुकूलसाहित्ये सत्यपि निर्विघ्नमन्तरायरहितं स्तनदर्शनं ययोस्ते सूक्ष्मतरे वस्त्रे जलसिक्ते निरन्तरमङ्गदर्शनं भवति तथा च नग्नप्राये एते सख्यौ ममाये विलोकयेति तयोर्लज्जात्यागद्वारा वहिर्निर्गमनार्थं कुचदर्शनोपलचकपाणिचेष्टाभिनयेनादर्शयदित्यर्थः। दृशेर्बुध्यर्थत्वात् दमयन्तीमित्यत्र, अणौ कर्तुर्णौ कर्मत्वं। जैनानां दिगम्बराणां प्रव्रजिता प्राव्राजिकास्त अतादृश्यौ तादृश्यौ कृते, अभूततद्भावे(पा०५।४।५०) इति च्विः ॥१२८॥ ॥ १२८ ॥

अम्बुन इति। अदः जलं कर्तृ, अनयोः सख्योः पटावृतमप्यङ्गं स्तनजघनादिकर्म यत्कथयति प्रकटयति सेयं अम्बुनः नीरचीराम्बुशम्बरमित्यभिधानाच्छम्बरसंज्ञत्वेनाथ च शम्बराख्यदैत्यभावेन मायैवाविरभूत् प्रकटाऽजनि। शाम्बरी हि माया अविद्यमानमपि वस्तु प्रकाशयति। अत्रापि निर्जले जलदर्शनात् अगम्ये गम्यीकरणाच्चेयं शाम्बरी मायेव प्रकटाऽभूदितिच्छलेन नन्ववचः कविवचो वा। एवमुत्तरश्लोकेऽपि ज्ञेयम् ॥ १३० ॥

वाससो वाऽम्बरत्वेन दृश्यतेयमुपानमत्।
चारुहारमणिश्रेणितारवीक्षणलक्षणा ॥ १३१ ॥
ते निरीक्ष्य निजावस्थां ह्रीणे निर्ययतुस्ततः।
तयोर्वीक्षारसात् सख्यः सर्वा निश्चक्रमुः क्रमात् ॥ १३२ ॥

अत्रैव पक्षान्तरमाह। वासस इति। वा अथवा स्नानाद्रङ्गानां द्वयं दृश्यता प्रत्यक्षगोचरता वाससोऽम्बरत्वेनातिस्वच्छवस्त्रविशेषत्वेनाथचाम्बरशब्दवाच्यत्वसादृश्यादाकाशत्वेनोपानमत् समागता जाता। निरावरणमम्बरे स्थितं वस्तु यथा प्रकटं दृश्यते तथैव वस्त्रावृतमपि च दृश्यते तर्हि तत्राम्बरत्वमेव हेतुरित्यर्थः। किम्भूता। चारवः स्थूलतरनिर्मलमनोहरा मणयः मौक्तिकानि तेषां श्रेणयः पङ्क्तय एव ताराणि नक्षत्राणि तेषां वीक्षणमेव लक्षणं स्वरूपं चिह्नं वा यस्याः सा। अम्बरे हि नक्षत्रदर्शनं भवति तदेव च तस्य लक्षणं तद्वदत्रापि वस्त्रावृतत्वेऽपि जलसेकाद्धारमुक्ताफलानि स्फुटानि दृश्यन्ते तस्मादम्बरत्वमेव हेतुर्युक्त इत्यर्थः। तारशब्दस्य नक्षत्रवाचित्वं बहुधा दर्शितं ॥ १३१ ॥

ते इति। ते सख्यौ नितरां जलसेकाद्गोप्याङ्गदर्शनरूपां निजावस्थां निरीक्ष्य ह्रीणे लज्जिते सत्यौ ततस्तद्राजगृहात् निर्ययतुः, बहिर्निर्जग्मतुः। अन्या अपि सर्वाः सख्यः तयोर्जलार्द्रीकृतवस्त्रयोः सख्योर्वीक्षारसात् दर्शनकौतुकातिशयात् तयोः पश्चात् क्रमान्निश्चक्रमुः ॥ १३२ ॥

ता वह्निर्भूय वैदर्भीमूचुर्नीतावधीतिनि।
उपेक्ष्ये ते पुनः सख्यौ मर्मज्ञे नाधुनाप्यमू॥ १३३॥
उच्चैरूचेऽथ ता राजा सखी यमिदमाह वः।
श्रुतं मर्म ममैताभ्यां दृष्टं मर्म मया तयोः॥ १३४॥

ता इति। ताः सख्यो वहिर्भूय गृहाद्बहिःस्थिता वैदर्भीमूचुः हे नीतौ नीतिशास्त्रे अधीतिनि सुतरां कृताभ्यासे भैमि ते त्वया मर्मज्ञे त्वद्रहस्यवेदिन्यावमू सख्यौ अधुनाऽपि पूर्व्वं यत्कृतं तत् कृतमेवेतःपरमपि यावद् दूरं न गमिष्यतस्तावत् पुनर्नोपेक्ष्ये "विरोधयेन्न सर्व्वज्ञं नोपेक्षेत विरोधिनम्। प्रसादयेदशक्यं तु" इत्यादिवचनः स्मरणात् मर्मज्ञयोरेतयोस्त्वया नीतिशास्त्रप्रवीणयोपेक्षा नैव कार्य्या किन्त्वेते पुनः प्रसादनीये आकारणीये वेत्यर्थः। मर्मज्ञो ह्युपेक्षितो विकरोतीति नीतिशास्त्रं तस्मादेते आकारणीये प्रसादनीये वेत्यर्थः॥ १३३॥

उच्चैरिति। अथ राजा ताः सखीरुच्चैर्दूराद्दाकर्णनयोग्यं तारस्वरं वक्ष्यमाणप्रकारेणोचे। हे सख्यः वो युष्माकमियं सखी युष्मानिदं वक्ष्यमाणमाह, एताभ्यां मम मर्म रहस्यं श्रुतमित्येतावत् मया तु पुनरनयोः सख्योर्मर्म गुह्यमङ्गं दृष्टं श्रुताद्दृष्टं बलवदिति न्यायादेताभ्यामहमेव प्रबलवतीति न काऽपि मे भीतिरिति वक्ष्यमाणस्य भैमीवचनानुवादरूपेण नलोऽवोचदित्यर्थः। राजेति पाठे ताः प्रति राजा, ऊचे इत्यर्थः॥ १३४॥

मद्विरोधितयोर्वाचि न श्रद्धातव्यमेतयोः।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥ १३५ ॥
धौतेऽपि कीर्त्तिधाराभिश्चरिते चारुणि द्विषः।
स्तपामषीलवैर्लक्ष्म लेखितुं के न शिल्पिनः ॥ १३६ ॥

मदिति। हे सख्यः वह्निर्निष्कासनाद्यनुमितिद्वारा मया विरोधितयोः कृतवैरयोरेतयोः सख्योर्वाचि न श्रद्धातव्यं सत्यत्वबुद्धिर्न कार्या, विरोधिनो हि प्रायेणासत्यमेव वदन्तीत्यर्थः। किञ्च विधिर्ब्रह्मा इमे सख्यौ मायानां कपटानां मिथ्याऽसत्यानाञ्च सिंहासने कपटासत्यसर्व्वाधिपत्ये अभ्यषिञ्चत्। योऽनयोर्जलसेको दृश्यते स ब्रह्मकृतो मायामिथ्यासिंहासनाभिषेक एवेति भैमी मन्यत इत्यर्थः। तस्माद्भवतीभिरेतयोर्वचसि न विश्वसनीयमिति भावः ॥ १३५ ॥

यत्तुवचसि न विश्वसनीयमित्येतदेवार्थान्तरन्यासेन समर्थयते। धौतेऽपीति। कीर्त्तिधाराभिः कीर्त्तिपूरैः धौते अत एव चारुणि मनोज्ञे धवले एवंविधेऽपि द्विषच्चरिते स्तपामष्याः लवैः लेशैः कृत्वा लक्ष्म कलङ्कं लिखितुं के जनाः शिल्पिनश्चतुरा न भवन्ति अपि तु सर्व्वेऽप्यलीकदोषारोपं कुर्व्वन्त्येवेति मद्विरोधितयोर्वचसि न विश्वसनीयमित्यर्थः। अन्येऽपि शिल्पिनो जलधाराक्षालिते स्मरणीये कुड्यादौ मस्यादिवर्णैश्चित्रं लिखन्ति केचिद्द्विषः शिल्पिनो वा ॥ १३६ ॥

ते सख्यावाचचक्षाते न किञ्चिद्ब्रूमहे बहु ।
वच्यावस्तत्परं यस्मै सर्व्वा निर्वासिता वयं ॥ १३७ ॥
स्थापत्यैर्न स्म वित्तस्ते वर्षीयस्त्वचलत्करैः ।
क्षतामपि तथावाचि करकम्पेन वारणां ॥ १३८ ॥
अपयातमितो धृष्टे धिग्वामश्लीलशीलतां ।
इत्यक्तौ चोक्तवन्तश्च व्यतिष्ठाते स्म ते भिया ॥ १३९ ॥

ते इति । ततस्ते सख्यौ इति आचख्याते ऊचतुः । इति किं । आवां अन्यत्किञ्चित् बह्वधिकं न ब्रूमहे किन्तु यस्मै प्रयोजनाय सर्व्वा वयं युवाभ्यां गृहाद्बहिर्निर्वासिता निष्कासितास्तद्देव परं केवलमावां वच्यावो वदिष्यावः सर्व्वासामपि सुरतार्थं वयं निष्कासिता इति कथयिष्यावो न चान्यत्किञ्चिदिति ॥ १३७ ॥

स्थापत्यैरिति । ते सख्यौ तथावाचि सुरतार्थं वयं निष्कासिता इति वचने विषये स्थापत्यैः सौविदल्लैः करकम्पेन क्षतामपि वारणां निषेधं न वित्तःस्म जानीतः स्म यस्माद्वर्षीयस्तेन वार्द्धकेन चलन्तः कराः येषां तैः वार्द्धकातिशयजनितदोषवशेन स्वाभाविककरकम्पनभ्रान्त्या क्षतमपि निषेधं न वित्तः इत्यर्थः । सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते, इत्यमरः । अतिशयेन वृद्धो वर्षीयान्, इयसुनि प्रियस्थिरेति (पा॰ ६।४।१५७) वर्षादेशः ॥ १३८ ॥

अपेति । हे धृष्टे अतिनिर्लज्जे सख्यौ युवामितो गृहात्

आह स्म तद्गिरा ह्रीणां प्रियां नतमुखीं नलः।
ईदृग्भण्डसखी काऽपि निस्त्रपा न मनागपि ॥ १४० ॥

अपयातं निर्गन्तुं यस्माद्वा युवयोरश्लीलशीलतां ग्राम्यभाषण-सखीभावत्वं धिक् धिक् इति तैः व्याप्तत्यैरुक्ते गदिते सति ते सख्यौ तेभ्यो मारणभिया व्यतिद्राते स्म पलायाञ्चक्रतुः, एवं उक्तवन्तस्ते कञ्चुकिनश्च पलायाञ्चक्रुः। तयोः पलायमानयोः पश्चात्सगन्ति स्म तयोर्भोगेच्छुतां ज्ञात्वा सखीतर्जनव्याजेन तेऽपि निर्गता इति भावः। ते इति व्यतिद्राते इति द्विवचनबहुवचनश्लेषः। इत्युक्ते सतीति वा। व्यतिद्राते इति वचनद्वयेऽपि तुल्यं रूपं। द्रातेः परस्मैपदत्वादात्मनेपदं चिन्त्यं। व्यतिद्राति स्मेति पठनीयं इत्युक्ते ते उक्तवन्तश्च सर्व्वे व्यतिद्राति स्मेत्यर्थः ॥ १३८ ॥

आहेति। नलरतार्थं सर्व्वे निर्व्वासिता इति तयोः सख्योर्गिरा ह्रीणां लज्जितां अत एव नतमुखीं प्रियां इति आह स्म। इति किं। इदृगश्लीलभाषणशीला भण्डा निर्लज्जाः सख्यो यस्यास्तादृशी काऽपि मनागपि निस्त्रपा निर्लज्जा न। अपि तु सखीयुक्तत्वमेव समानशीलव्यसनेषु सख्यमिति न्यायादनुरूपयो र्हि सख्यं युक्तमिति त्वमपि लज्जां मुञ्चेति सकामस्य नलस्य वचः। भण्डसखी कापि ईदृक् त्वत्सदृशी न दृष्टा ॥ १४० ॥

अहो नापत्रपाक्रान्ते जातरूपमिदं मुखं।
नानितापार्ज्जनेऽपि स्यादितो दुर्वर्णनिर्गमः ॥ १४१ ॥

अहो इति। अहो भैमि ते इदं मुखं जातं रूपं सौन्दर्यं यस्यैवंविधं सदपत्रपाकं गतलज्जं न भवति किन्तु सलज्जमेव, स्त्रीणां तु लज्जैव महद्भूषणमित्यर्थः। नापत्रपाकमिति समासेनैकपदं वा। अथ च पत्राणां नागवल्लीदलानां पाकः फलभूतः पूगादियोगसञ्जातो रागः स नास्ति यस्य तदपत्रपाकं तादृशं न भवति ताम्बूलरागसहितमिति यावत्, अत एव नितरां जातलावण्यं। अथ च सुन्दरमपि नापत्रपाकं सलज्जं। अहो चित्रम्, असुन्दरं हि सलज्जं भवति स्वं न दर्शयति। इदन्तु सुन्दरमपि स्वं न दर्शयतीत्याश्चर्यं। अतिनम्रत्वान्मुखं किञ्चिदपि न दृश्यत इत्यर्थः। अथ च त्रपैवाकं दुःखमपगतंत्रपाकं यस्मादपत्रपाकं तादृङ्न भवति लज्जारूपदुःखसहितमत एव न जातं रूपं यस्य सुरतार्थं सर्वनिर्व्वासने ताभ्यामुक्तं लज्जातिशयान्मुखं नितरां मलिनं जातं चित्रमेतदित्यर्थः। अथ च पत्रयोर्म्मूत्पुटयोर्मध्ये यः पाकः स नास्ति यस्य तादृशमपि न भवति यत्तदपत्रपाकं शतपुटपाकमिति यावत्, एवम्भूतं सुवर्णमेव तव मुखमहो चित्रं सुमुख्य सुवर्णत्वमाश्चर्य्यकारीत्यर्थः, यतः सलज्जमत एव नितरां तापस्य क्रोधाग्नेरर्ज्जने सम्पादने सत्यपि समक्षमश्लीलभाषणादिना सखीकोपे समुत्पादिते सत्यपि, इतो मुखात् सकाशात् दुर्व्वर्णानां परुषाक्षराणां निर्गमो न स्यात्

तामथैष हृदि न्यस्य ददौ तल्पतले तनुं ।
निमिष्य च तदीयाङ्गसौकुमार्य्यमसिस्वदत् ॥ १४२ ॥
न्यस्य तस्याः कुचद्वन्द्वे मध्येनीवि निवेश्य च ।
स पाणेः सफलं चक्रे तत्करग्रहणश्रमं ॥ १४३ ॥

कोपे सत्यपि लज्जावाऊल्यात् सखीः प्रत्युत्तरमपि परुषं न भाषसे एतदपि चित्रमित्यर्थः। अथच कृतपुटपाकसुवर्णसुरूपं यतो ऽतएव पुटरहितं नितरामग्निदाहे सत्यप्यस्मात् सुवर्णाद्दुर्वर्णस्य रजतस्य निर्गमो न स्यात् पुटपाकादेव मिश्रितरजतनिर्गमे सति निर्दुष्टस्य शुद्धरजतस्य पश्चात् सुतरामग्निदाहे कृतेऽपि दुष्टाशयस्य पूर्व्वमेव गतत्वात्तस्माद्रजतनिर्गमो न भवत्येव। तथा सति तापार्जनेऽप्यस्मान्मुखादपि दुर्वर्णनिर्गमो न स्यात् सपचपाकजातरूपं ते मुखमित्यर्थः। अथच वर्णसाम्येन सुवर्णसदृशं ते मुखं यद्यपि तथापि नितरामग्निदाहे तस्माद्दुर्वर्णं निर्गच्छत्येव। अतितापार्जनेऽपि ते मुखाद् दुर्वर्णनिर्गमो नास्त्येवेत्याश्चर्यमित्यर्थः। अत्युत्तमशोऽखवर्षसुवर्षवर्णापरुषभाषिणी चासीति भावः। अपचपाकं पचे न कपीति (पा० ७।४।१४) ह्रस्वनिषेधः॥ १४१ ॥

तामिति। अथैष नलस्तां हृदि न्यस्य तल्पतले शय्यायां तनुं शरीरं ददौ पृष्ठेन शय्यां पस्पर्शेत्यर्थः। तदालिङ्गनसुखवशादेव निमिष्य नेत्रे निमील्य तदीयाङ्गसौकुमार्य्यमसिस्वदत्, अनुबभूव च॥ १४२ ॥

न्यस्येति। स तस्याः कुचद्वन्द्वे स्वकरं न्यस्य निक्षिप्य तथा

स्थापितामुपरि खस्य तां मुदा मुमुदे वहन्।
तदुद्वहनकर्तृत्वमाचष्ट स्पष्टमात्मनः ॥ १४४ ॥
स्विद्यत्कराङ्गुलीलुप्तकस्तूरीलेपमुद्रया।
फूत्कार्य्यपीडनौ चक्रे स सखीषु प्रियास्तनौ ॥ १४५ ॥

नीवीनां मध्ये च नाभिमूले निवेश्य स्थापयित्वा पाणेः स्वकरस्य तस्याः करग्रहणे पाणिविवाहने विषये जातश्रमं सफलं चक्रे। स्तनजघनादिस्पर्शसुखानुभवादित्यर्थः। एतदेव विवाहफलं यत् स्तनादिस्पर्शसुखानुभवनं। अथच तत्प्रसिद्धं करस्य राजोपदायाः ग्रहणं तज्जनितस्वपाणेः श्रमं सफलं चक्रे स्तनादिमर्द्दनमेव राजदण्ड इत्यर्थः। अथच स्वपाणेर्भैम्याः करे यद्ग्रहणं निरोधनं तज्जनितं तस्याः श्रमं सफलं चक्रे। कुचनीवीस्पर्शमात्रेण निर्वृत्तो न लज्जान्तरे करं निवेशितवान् न च सम्भुङ्क्ते इत्यर्थः। एतच्चो-त्तरत्वसम्भोगनिषेधाल्लभ्यते ॥ १४३ ॥

स्थापितामिति। स मुदा कामाभिलाषेण स्वस्योपरि स्था-पितां वक्षसि निवेशितां तां वहन् मुमुदे सुखातिशयाज्जहर्ष। स्पष्टमुत्प्रेक्ष्यते। आत्मनस्तस्या भैम्या उद्वहनं विवाहं प्रति अथचो-र्ध्वधारणं प्रति कर्तृत्वमाचष्ट चेति शब्दश्लेषोत्प्रेक्षा ॥ १४४ ॥

स्विद्यदिति। स प्रियास्तनौ स्विद्यन्तीभिः सञ्जातसात्त्विकस्वे-दाभिः कराङ्गुलीभिः लुप्तया कस्तूरीलेपसम्बन्धिन्या मुद्रया पत्रभङ्गरचनाविशेषेण हत्वा सखीषु विषये फूत्कार्य्यौ महाफल-मस्मकथनीयं पीडनं मर्दनं ययोस्ताभ्यां वा तौ चक्रे। भैमी-

तत्कुचे नखमारोप्य चमत्कुर्व्वंस्तयेचितः ।
सोऽवादीत्तां हृदिस्थन्ते किं मामभिनदेष न ॥ १४६ ॥
अहो अनौचितीयन्ते हृदि शुद्धेऽप्यशुद्धवत् ।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥ १४७ ॥

-कुचयुगले खरचितां कस्तूरीपत्रवल्लीरचनां मोञ्छितां दृष्ट्वा प्रियेण गाढमेतौ पीडितावित्यन्योन्यमुखैः कलकलं सख्यो यथा फूत्कारं कुर्व्वन्ति, इत्थं कुचमर्दनं स्वयमेव यथा जानन्ति तथा तत्कुचौ ममर्देति भावः । लोकेऽपि स्वकृतां मुद्रां लुप्तां दृष्ट्वा अन्यथाभावशङ्कया उच्चैः फुत्कारं कुर्व्वन्तीति ॥ १४५ ॥

तदिति । तस्याः कुचे नखमारोप्य निखाय स्वयमेव चमत्कुर्व्वन्नङ्गसङ्कोचाभिनयपूर्व्वं शङ्कमानो नखक्षतपीडाविशेषादेव तया किञ्चित्कोपेनेचितः, हे भैमि एष नखस्ते हृदिस्थं मां किं नाभिनदपि तु मामपि व्यदारयदेव । अन्यथा कथं त्वदीये हृदि नखे क्षिप्ते ममाङ्गचमत्कार इति ॥ १४६ ॥

अहो इति । हे भैमि तीक्ष्णमुखैर्नापितकल्पितशिताग्रैर्मम नखैः शुद्धे निष्कपटेऽपि हृदि अशुद्धं रुधिरं वर्त्तते कल्पते यत्र तद्यथा तथाऽङ्को मयूरपदादिचिह्नमकल्पि आकारीति यत्ता इयं महती अनौचिती अहो चित्रं । कैरिव । दोषारोपरूपपरुषभाषणवशात् तीक्ष्णमुखैः दुःसहवदनैः खलैरिव । यथा खलैः शुद्धेऽपि पुरुषे अशुद्धवत् सदोषे पुरुष इव अङ्को दोषारोपः कल्प्यते सा यथाऽनौचिती, नखक्षतेन रुष्टायाः स्वेनैव

यच्चुम्बति नितम्बोरू यदालिङ्गति च स्तनौ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितं ॥ १४८ ॥
लीनचीनांशुकं स्वेदि दरालोक्यं विलोकयन्।
तन्नितम्बं स निश्वस्य निनिन्द दिनदीर्घतां ॥ १४९ ॥

नखानामनौचित्यप्रकटनव्याजेन प्रसादनामकरोदित्यर्थः। अ-शुद्धवदिति पचे सप्तमीसामर्थ्याद्वतिः ॥ १४७ ॥

यदिति। हे भैमि गुणमयं सूच्मं शुक्लतरतन्तुकं ते वासः नितम्बोरू जघनमूरू च यद्यस्माच्चुम्बति स्पृशति तथा यस्माच्च ते स्तनौ आलिङ्गति तत्तस्मात् कारणाच्छुभानां रमणीयानां दशानां प्रान्ततन्तूनां यथोग्यमुचितं तद्भुङ्क्ते तादृशं भोगमनुभवतीत्यर्थः। यत्तदौ वासोविशेषणे वा। अथच यो गुणमयः शौर्य्यौदार्य्यादि-गुणपरिपूर्णो निर्दोषस्य शुभाया दशायाः पूर्व्वाचरितपुण्यपरि-पाकोपनतशुभयद्योगानुकूलसमयविशेषस्योचितं भोगं लभते स एव सुन्दरतररमणीयनितम्बोरुचुम्बनं तत्कुचालिङ्गनञ्च भज-ते नान्य इति त्वन्नितम्बादिचुम्बनकारिणो मत्तोऽपि वसनमेव धन्यमिति भावः। नितम्बोरू प्राण्यङ्गत्वादेकवद्भाव इति ॥१४८॥

लीनेति। सात्त्विकस्वेदवशादतिसूक्ष्मत्वात् समच्छवीभूय लीनं संलग्नं चीनाख्यं अंशुकं यत्र, तथा स्वेदि सात्त्विकस्वेदयुक्तं अत एव च दरालोक्य ईदृशं नितम्बं विलोकयन् स कामोन्मत्तो भूत्वा निश्वस्य दिने सुरतनिषेधान्निरागतया निश्वाससमोच-नेन दुःखमभिव्यज्य दिनस्य दीर्घतां कथं वा दिनं शीघ्रं गमि-

देशमेव ददंशासौ प्रियादन्तच्छदान्तिकं ।
चकाराधरपानस्य तत्रैवालीकचापलं ॥ १५० ॥
न क्षमे चपलापाङ्गि सोढुं स्मरशरव्यथां ।
तत्प्रसीद प्रसीदेति स तां प्रीतामकोपयत् ॥ १५१ ॥

व्यतीत्यादिना निनिन्द । सुरतार्थं दिनावसानमभिललाषेत्यर्थः । कामपरवशत्वात् सम्भोगेच्छुरभूत्, दिवा तन्निषेधाच्च सुरते सहसा न प्रवृत्त इति भावः ॥ १४९ ॥

देशमिति । असौ प्रियादन्तच्छदोऽधरस्तस्यान्तिकं समीपवर्त्तिनं देशं कपोलचिबुकादिभागमेव पूर्वं दशनैर्ददंश, अनन्तरं तत्रैवाधरसमीपदेश एव अधरोपान्तस्थापितमुख एवाधरपानस्यालीकमेव चापलं पुनरोष्ठचालनं चुक्कारादित्वरां चकार । चापलस्यालीकत्वञ्च तादृगभिनयमाचरणात् तात्त्विकचापलकरणेऽपि अधरसम्बन्धाभावाज् ज्ञेयं । सम्भुचातिशयाद् यावता क्षणेनाधरं चुम्बितुं प्राप्यते तावन्तमपि विलम्बं सोढुमशक्तः सन्नयमधर एवेति भ्रान्त्या वाऽधरोपान्तदंशादि चकारेति भावः । अतिरिरंसोरियं जातिः ॥ १५० ॥

नेति । स परिहासादिवशादालिङ्गनादिवशाच्च पूर्वं प्रीतां प्रसन्नामपि तां इत्युक्त्वाऽकोपयत् । इति किं । हे चपलापाङ्गि अहं स्मरशरव्यथां सोढुं न क्षमे शक्तोऽस्मि यतस्तस्मात् त्वं मम प्रसीद प्रसीद मह्यं सुरतं देहि देहीति दिने रन्तुमनुचितत्वात् कोपव्याजेनापि दिनं गमयितुं तामकोपयदित्यर्थः । प्रसादनमपि

नेत्रे निषधनाथस्य प्रियाया वदनाम्बुजं।
ततस्तनतटौ ताभ्यां जघनं घनमीयतुः ॥ १५२ ॥
इत्यधीरतया तस्य हठवृत्तिविशङ्किनी।
झटित्युत्थाय सोत्कण्ठमसावन्वसरत्सखीः ॥ १५३ ॥

कोपं विना न सम्भवतीति कोपसम्पादनं। प्ररथ्यतामिति च पाठः। चपलापाङ्गि अङ्गगात्रेति (पा० ४।१।५४वा०१) ङीष् ॥ १५१॥

नेत्रे इति। निषधनाथस्य नेत्रे पूर्वं प्रियाया वदनाम्बुजं ततोऽनन्तरं स्तनतटौ, अनन्तरञ्च ताभ्यां स्तनतटाभ्यां सकाशाद् घनं पीवरं जघनं इयतुः प्रापयतुः सुरतौत्सुक्यात् सादरं वदनादिक्रमेणालोकयदिति भावः। अम्बुजतटजघनपदैः सादरालोकनार्हत्वं सूचितं। घनपदं सादरालोकनद्योतनार्थं। क्रियाविशेषणत्वेन सर्व्वत्र वा योज्यं ॥ १५२ ॥

इतीति। इत्येवं वदनादिविलोकनपूर्व्वं जघने चिरकालं सादरदृष्टिस्थापनद्वारा धीरतया रतोत्सुकतयाऽस्य हठवृत्तौ बलात् सुरतारम्भे विशङ्किनी विशेषतः शङ्कमाना सम्भावयन्ती असौ झटिति मञ्चादुत्थाय चिरनिर्गतसखीगवेषणाय सोत्कण्ठं यथा तथा कलायाः सखीरन्वसरत्। सख्यनुसरणोत्कण्ठाव्याजेन प्रियसुरतारम्भं पर्य्यहार्षीदिति भावः। अतिमात्रं रसपरवशता दोषाय रसाभासस्य नायकस्य नीरसतामेवापादयतीति तदुभयपरिजिहीर्षया रसान्तरद्वारेण सम्भोगशृङ्गारपरां काष्ठामापादयितुं श्रीहर्षेण भैमीनलयोर्विप्रलम्भस्याभ्यां विप्रलम्भस्यैवोपक्रमः कृतः ॥ १५३ ॥

न्यवारीव यथाशक्ति स्यन्दमन्दं वितन्वता ।
भैमीकुचनितम्बेन नलसम्भोगलोभिना ॥ १५४ ॥
अपि श्रोणिभरस्वैरां धर्तुं तामशकन्न सः ।
तदङ्गसङ्गजस्तम्भो गजस्तम्भोरुदोरपि ॥ १५५ ॥
आलिङ्ग्यालिङ्ग्य तन्वङ्गि मामित्यर्द्धगिरं प्रियं ।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ ॥ १५६ ॥

न्यवारीवेति । नलसम्भोगलोभिना भैमीकुचनितम्बेन मन्दं शनैः स्यन्दगमनं वितन्वता स्वीयपीवरतातिशयेन शीघ्रं गन्तुमददता सता भैमीशक्तिमनतिक्रम्य शीघ्रगमनप्रतिबन्धकत्वरूपनिजशक्त्यनुसारेणैतो रतिगृहाद्बहिस्त्वया न गन्तव्यमिति न्यवारीव न्यषेधीव । निर्गताऽपि स्तननितम्बभराक्रान्तत्वाच्छीघ्रं गन्तुं न शशाकेति भावः । कुचनितम्बेन प्राण्यङ्गत्वादेकवद्भावः । लोभिना अत इनी (पा० ५।२।११५) इनिः ॥ १५४ ॥

अपीति । स श्रोणिभरेण नितम्बभाराक्रान्तत्वेन स्वैरां मन्दगामिनीमपि समीपे गच्छन्तीमपि तां स्वयं गजबन्धनस्तम्भवदुरू दीर्घौ च पीवरौ दोषौ बाहू यस्यैवम्भूतः सन् अङ्कपाल्यां धर्तुं नाशकत्, यतस्तस्या अङ्गसङ्गाज्जघनाङ्गस्पर्शाज्जातो निष्क्रियत्वरूपसात्त्विकभावः स्तम्भो यस्य सः सात्त्विकस्तम्भवशात् तां धर्तुं नाशकदित्यर्थः ॥ १५५ ॥

आलिङ्ग्येति । असौ भैमी इति पूर्वोक्तप्रकारेणार्द्धगिरं वाक्यशेषं वक्तुमसमर्थं प्रियं नलं स्मित्वाऽधीरत्वेन हसित्वा नि-

प्रियस्याप्रियमारभ्य तदन्तर्दूनयाऽनया ।
शेके शालीनयाऽऽलिभ्यो न गन्तुं न निवर्त्तितुं ॥ १५७॥

इत्य परावृत्य वलितग्रीवं पश्यन्ती सती द्वारस्य पारं देहली-बहिःप्रदेशमगात्। इति किं। हे तन्वङ्गि प्रियं आलिङ्गालिङ्गापरिपूर्णवाग् वाणी यस्य तमित्यर्थः। कामोन्मादबाहुल्येन गद्गदभिन्नस्वरतया आलिङ्गालिङ्ग मां सुखय पश्चाद्गच्छेति वाक्यशेषः। स्मितादयः सम्भोगशृङ्गाररसाङ्गीभूततयाऽलङ्काराः ॥ १५६ ॥

प्रियस्येति। प्रियस्य तत्सम्भोगप्रातिकूल्यलक्षणमप्रियमारभ्य कृत्वा तद्वशादेवान्तर्हृदये दूनया उपतप्तया प्राप्तपश्चात्तापयेति यावत्। द्वारबहिर्देशं प्राप्तयाप्यनया प्रियस्यान्येप्सिताचरणानन्तरं तस्य प्रसादनमकृत्वैव सखीं प्रतिगन्तुमयुक्तमिति विचार्यालीभ्यः सखीः प्रति गन्तुं न शेके समर्थाऽभूत् तत्रैव तस्थावित्यर्थः। सखीभ्यः सकाशान्निवर्त्तितुं नलं प्रति परावर्त्तितुमपि न शेके यतः शालीनयाऽधृष्टयाऽतिशलज्जया, अस्मदुद्देशे नागताऽपि सुरतार्थं प्रियं प्रति पुनर्गतेति सख्यो वदिष्यन्ति तथा च लज्जा स्यादिति भिया पुनर्न निवृत्तेत्यर्थः। नलविषयैव वा लज्जा। क्षणमात्रं मार्गमध्ये चिन्तावशात्तूष्णीं स्थितेति भावः। आलीभ्यः गत्यर्थकर्मणीति (पा०२।३।१२) चतुर्थी। निवृत्तिं प्रत्यपादानत्वात् पञ्चमी वा ॥ १५७ ॥

अकथयदथ वन्दिसुन्दरी द्वाः-
सविधमुपेत्य नलाय मध्यमह्नः।
जय नृप दिनयौवनोष्मतप्ताऽऽ-
प्लवनजलानि पिपासति क्षितिस्ते॥ १५८॥
उपहृतमधिगङ्गमम्बु कम्बु-
च्छवि तव वाञ्छति केशभङ्गिसङ्गात्।

अकथयदिति। अथ परिहासपूर्वं भैमीवहिर्निर्गमनानन्तरं पुरुषस्यान्तःप्रवेष्टुमशक्यत्वादवसरज्ञापकवचनस्यावश्यं श्रावणीयत्वाद्वन्दिसुन्दरी विदग्धमागधवनिता द्वाःसविधं द्वारदेशसमीपमुपेत्य इति अह्नो मध्यं मध्याह्नमकथयत् व्यज्ञापयदित्यर्थः। इति किं। हे नृप जय सर्व्वोत्कर्षेण वर्त्तस्व दिनस्य यौवनं मध्याह्नस्तत्सम्बन्धिनोष्मणा तप्ता, आतपसन्तापेन कृतसन्तापवती क्षितिः ते आप्लवनजलानि माध्याह्निकस्नानजलानि पिपासति पातुमिच्छति। माध्याह्निकस्नानावसरो वर्त्तत इत्यसूचयदित्यर्थः। मध्याह्नतप्तो हि जलं पातुमिच्छति। अकथयदिति लङ्। अचकथदिति पाठे ण्यन्ताच्चङ्। नलाय क्रियया यमभिप्रैतीति (पा०१।४।३२।वा०१) सम्प्रदानत्वं॥ १५८॥

उपेति। अधिगङ्गं गङ्गामधिकृत्य वर्त्तमानमुपहृतं भागीरथ्याः सकाशादानीतं कम्बुच्छवि शङ्खधवलं अम्बु तव कृष्णतरकुटिलकेशपाशस्य भङ्गिभिः कुटिलभावैः सह सङ्गात् सम्बन्धात्, अनन्तरं सम्बन्धे जाते तरङ्गैः कृताऽसमाऽतुल्यरूपा विषमा वा

अनुभवितुमनन्तरं तरङ्गा-
समशमनस्वसृमिश्रभावशोभाम् ॥ १५९ ॥
तपति जगत एव मूर्ध्नि भूत्वा
रविरधुना त्वमिवाद्भुतप्रतापः ।
पुरमथनमुपास्य पश्य पुण्यै-
रधरितमेनमनन्तरं त्वदीयैः ॥ १६० ॥

अतिकृष्णा वा शमनस्वसा यमभगिनी यमुना तया सह मिश्र-भावेन मिलितत्वेन सङ्गमेन या शोभा तां गङ्गायमुनासम्भूत-प्रयागकामनीकमनुभवितुं प्राप्तुं वाञ्छति। शुभ्रतरस्य जलस्य कृष्णतरकेशपाशसङ्गे सति प्रयागजलशोभा भविष्यतीति। गङ्गा-जलेच्छां पूरय माध्याह्निकस्नानं कुर्व्विति भावः। अधिगङ्गं विभक्त्यर्थेऽव्ययीभावः ॥ १५९ ॥

तपतीति। हे राजन्, अद्भुतोऽसह्यः प्रकृष्टस्तापः करौघो यस्य स रविरधुना मध्याह्नसमये जगत एव विश्वस्यापि मूर्ध्नि भूत्वा तपति। क इव। त्वमिव। यथा अद्भुतः प्रतापः चात्रतेजो यस्य स त्वं विश्वस्य मूर्ध्नि चरणमारोप्य तपसि राजलक्ष्म्या दीप्यसे तथे-त्यर्थः। मध्याह्नसमयो निश्चितो वर्त्तत इत्यर्थः। अत एव पुर-मथनं हरमुपास्याराध्योपार्ज्जितैरिति शेषः। एवम्भूतैस्त्वदीयैः पुण्यैर्देवपूजानन्तरं त्वमेनं सूर्य्यमधरितं मस्तकोपरिभागादधा-रितं तिर्य्यग्गगनभागे वर्त्तमानमेनं सूर्य्यं पश्य। देवपूजानन्तरं हि सूर्य्यो नमस्क्रियत इत्याचारात्त्वमपराह्णे सूर्य्यं नमस्कुर्व्विति

आनन्दं हठमादरन्निव हरध्यानार्चनादिक्षण-
स्यासत्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः।
पक्षद्वारदिशं प्रति प्रतिमुहुर्द्राग्निर्गतप्रेयसी-
प्रत्यावृत्तिधिया दिशन् दृशमसौ निर्गन्तुमुत्तस्थिवान्॥१६१॥

भावः। अधुना तु त्वद्दृशः यत्पूजाजनितपुण्यैस्त्वया जितो-ऽधोगतो भविष्यतीत्यर्थः॥१६०॥

आनन्दमिति। असौ भूपतिः स्नानाद्यर्थं वहिर्निर्गन्तुं शय्यायाः सकाशादुत्तस्थिवान्। किम्भूतः। द्राक् झटिति वहिर्निर्गतायाः प्रेयस्या भैम्याः प्रत्यासत्तिधिया परावृत्यागमनस्य बुध्या पुनरप्यागमिष्यति किमिति सम्भावनया तद्विलोकनार्थं पक्षद्वारदेशं पार्श्वद्वारप्रदेशं प्रति लक्षीकृत्य प्रतिमुहुर्मुहुर्मुहुर्दृशं दिशन् ददानः, तथा प्रियतमाया विच्छेदो वियोगस्तज्जन्येन खेदेन दुःखेनालसोऽपि तथा हरध्यानार्चनादेः क्षणस्य सध्याक्ष-स्यासत्तौ, अतिनैकट्ये सत्यामपि हठं यथा स्यादेवं बलात्कारेण गतमप्यानन्दमाहरन्निव परावर्तयन्निव, अर्चनादिरेव क्षण उत्सवस्तदासत्त्याऽपीति वा विरहखेदायासे सत्यपि नित्याह्निक-काललोपभिया शिवभक्त्या च सानन्दबलाद्वहिर्निर्गत इत्यर्थः। श्लोकचतुष्टयेनोत्तरसर्गसङ्गतिः सूचिता इति ज्ञेयं। प्रतिमुहु-रित्यर्थे प्रतेर्मुहुः शब्देन सह सुपेति (पा०२।१।४) समासः मुहुर्मुहुरित्यर्थः॥१६१॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः॥१६२॥

समाप्तो विंशः सर्गः॥

श्रीहर्षमिति। पूर्वार्द्धः पूर्ववत्॥ अन्यैः श्रीहर्षव्यतिरिक्तैः कविभिरक्षुण्णा रसस्य शृङ्गारादेः प्रमेयस्य समासोक्त्यादेश्च भणितिर्गुम्फना यत्र तादृशेऽपूर्वरसादिमति महाकाव्ये विंशः सर्गः विंशतेः पूरणः व्यगलत् समाप्तिमितः। भणितौ। भाषितपुंस्कं विंशः तस्य पूरणे डटिति (पा०५।२।४८) डट्॥१६२॥

इति श्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे विंशः सर्गः॥

उत्तरनैषधचरित ।

एकविंशः सर्गः ।

तं विदर्भरमणीमणिसौधा-
दुज्जिहानमनुदर्शितसेवैः ।
अर्पणान्निजकरस्य नरेन्द्रै-
रात्मनः करदता पुनरूचे ॥ १ ॥

इदानीं पूर्व्वसर्गान्तप्रस्तावितमध्याह्नस्नानदेवपूजादिवर्णनार्थमेकविंशं सर्गमारभते। तमिति। विदर्भरमण्या भैम्या मणिसौधान्मणिबद्धसुधाधवलितप्रासादात् सकाशादुज्जिहानं बहिर्निर्गच्छन्तं नलमनुलक्षीकृत्य दर्शिता अन्तःपुरद्वारि प्रणामादिना ज्ञापिता सेवा यैः, अवसरपर्य्यन्तं बहिःस्थितैरन्तरङ्गैर्नरेन्द्रैर्नलहस्तावलम्बनार्थं निजकरस्यार्पणाद्धेतोरात्मनः स्वस्य करदता पुनरूचे पुनरुक्तीचक्रे इत्यर्थः । पूर्व्वं सर्व्वेऽपि राजानः बलिरूपकरसमर्पणात् करदा अभूवन्, इदानीन्तु सोपानमार्गेणावरोहतो नलस्य हस्तावलम्बनार्थं निजपाणिसमर्पणात् करदा जाता इति छलेनोत्प्रेक्षा। एतेन नलस्य चक्रवर्त्तित्वं द्योत्यते ॥ १ ॥

तस्य चीनसिचयैरपि बद्धा
पद्धतिः पदयुगात् कठिनेति।
तां प्यधत शिरसा खलु माल्यै
राजराजिरभितः प्रणमन्ती ॥ २ ॥
द्रागुपाक्रियत तस्य नृपैस्त-
दृष्टिदानवहमानकृतार्थैः।

तस्येति। खल्वितीव हेतोः अभितः पार्श्वद्वयेऽपि प्रणमन्ती राजराजिर्नृपपरम्परा तां सिचयैर्बद्धामपि पद्धतिं शिरसा माल्यैः शिरोधृताभिः पुष्पमालाभिः प्यधत आच्छादयति स्म। इति किं। चीनसिचयैः देशविशेषोद्भवैः सूक्ष्ममृदुभिर्वस्त्रैर्बद्धा खचिता आच्छादितापि सती पद्धतिः तस्य नलस्य पदयुगात् सकाशात् कठिनेति, मृदुतरयोर्हि चरणयोर्मृदुतरपुष्पबद्धायां भुवि गमनं युक्तं इति शिरोधृतपुष्पसंस्तरणं यावद्भवति ताव-त्पर्य्यन्तं मध्येमार्गं तस्य सादरं दण्डवत् प्रणामं सर्व्वेऽपि चक्रुरित्यर्थः ॥ २ ॥

द्रागिति। अथ प्रणामानन्तरं तेन कृतं दृष्टिदानं नेत्र-निरीक्षणं तत्क्षणेन वहमानेन कृतार्थैः सफलश्रमैर्नृपैः देशे भवं देश्यं स्वस्वदेश्यं स्वीयस्वीयदेशभवं तत्रान्यत्र वाऽपूर्व्वं दुर्लभं अत्युत्तमं, तथा यत्नेन बुद्धिपूर्व्वं शिक्षावशेन कल्पितैरारोपितै-र्दन्तमोक्षणत्वादिरमणीयकलादिगुणविशेषैरधिकं अतितरां विचमायर्य्यरूपं मदसौराधितैश्च गुणैरतितरामाश्चर्य्यकारि-

स्वस्वदेश्यमथ रत्नमपूर्व्वं
यत्नकल्पितगुणाधिकचित्रं ॥ ३ ॥
अङ्गुलीचलनलोचनभङ्गि-
भ्रूतरङ्गविनिवेदितदानं।
रत्नमन्यनृपढौकितमन्ये
तत्प्रसादमलभन्त नृपास्तत् ॥ ४ ॥

मणिमुक्ताकरितुरगादिरत्नं वस्तु तस्य द्राक् शीघ्रं प्रणामानन्तरमव्यवहितमेवोपाढ्कियत उपदीकृतं। तत्र उपदीकृते रत्नजाते दृष्टिदानमेव बहुमान इति वा। केनेदमिदमानीतमित्यादरमप्यपूर्वं तेषु दृष्टिदानमेवेति वा यत्नेति पाठे यत् कल्पितगुणाधिकचित्रं न भवति किन्तु स्वाभाविकगुणाधिकचित्रमेतद्रत्नमिति सम्बन्धः। देश्यं भवार्थे दिगादित्वाद्यत् दिश्यमिति पाठेऽपि, रत्नजातावेकवचनं, एवमुत्तरश्लोकेऽपि ॥ ३ ॥

अङ्गुलीति। अन्ये चिरकालसेविनस्तदानीमेवागता वा नृपा अन्यनृपढौकितं उपदीकृतं तत्पूर्व्वोक्तं मणिमुक्तादिरत्नजातमेव तस्य नलस्य प्रसादं पारितोषिकं दानं अलभन्त। किम्भूतं। अङ्गुलीचलनेन लोचनभङ्ग्या प्रसादसूचकनेत्रवीचणविशेषेण भ्रूतरङ्गेण च एतस्मै एतद्देहीति सेवकान् प्रति एतत् त्वं गृहाणैतत् त्वं गृहाणेति राज्ञः प्रत्येव वा विशेषेण निवेदितं दानं यस्य। अन्यैरानीतमन्येभ्यो दत्तवान् न तु कोषागारे निवेशितवानि-

तानसौ कुशलसूनृतसेकै-
स्तर्पितानथ पितेव विसृज्य।
अस्त्रशस्त्रखुरलीषु विनिन्ये
शैष्यकोपनमितानमितौजाः॥ ५ ॥

त्यनेनौदार्यातिशयश्चातुर्यञ्च सूच्यते। चतुरो हि तदीयमेव तस्मै न ददाति। अङ्गुल्यादिचालनेन आदानादिवेदनमीश्वरजातिः॥ ४ ॥

तानिति। अथ नूतनागतराजस्वीकृतोपदानानन्तरं चिरागतराजेभ्यो वितरणानन्तरं असौ अमितौजा अतुल्यपराक्रमो नलो नूतनागतान् राज्ञः कुशलसूनृतसेकैः कुशलप्रश्नप्रश्नस्निग्धसत्यप्रियवचनामृतसेचनैः भवतां राष्ट्रे देहे च कुशलं भवतां कार्य्यं करिष्यामीत्येवंरूपैः कृत्वा तर्पितान् प्रीणितान् सबङ्कमानं स्वशिविरं विसृज्य शैष्यकेन शिष्यभावेन प्रयोजकेनोपनमितान् समीपमानीतान् अस्त्रादिशिक्षार्थं समीपमागतानन्यनृपान् अस्त्राण्याग्नेयादीनि शस्त्राणि वाणादीनि तेषां खुरलीषु हस्तचरणादिसंस्थानचातुरीविशेषेषु विनिन्ये तद्विषयं कौशलमशिक्षयदित्यर्थः। क इव, पितेव। शैष्यकेति भावे योपधाद्वुञ्। शिष्यतेति च पाठः॥ ५ ॥

मर्त्यदुःप्रचरमस्त्रविचार-
ञ्चारु शिष्यजनतामनुशिष्य।
स्वेदबिन्दुकितगोधिरधीरं
स श्वसन्नभवदाप्लवनेच्छुः॥ ६॥
यक्षकर्दममृदून्मृदिताङ्गं
प्राक्कुरङ्गमदमीलितमौलिं।

मर्त्येति। स नल आप्लवेच्छुः जलावगाहनाय साभिलाषोऽभवत्। किम्भूतः। मर्त्येषु दुःप्रचरमविद्यमानप्रसरं मर्त्यैः दुःप्रचर्य्यते दुःप्रचरं नलातिरिक्तैर्मर्त्यमात्रैरज्ञाताशेषविशेषं अस्त्राणां आग्नेयाद्यस्त्राणां विचारं मोचोपसंहारोपायप्रकारविशेषं चारुः प्रौढप्रतिभःशिष्यजनस्तत्समूहं चारुसम्यग्वा अनुशिष्य शिक्षयित्वा स्थितोऽनन्तरं श्रमवशाज्जाता ये स्वेदबिन्दुकास्ते सञ्जाता यस्य तादृशो गोधिः ललाटं यस्य अत एव धीरं दीर्घं न धीरमल्पं श्वसन्। बिन्दुकेत्यत्राल्पार्थे कन्। तारकादिलादितच्। ललाटमलिकं गोधिरित्यमरः॥ ६॥

यक्षेति। उच्चकुचा अङ्गनास्तं बकुलपरिमलेनानुबन्धिताः मिलन्तो भृङ्गा येषु तैर्गन्धवारिभिः कर्पूरादिवासितजलैः सिषिचुः अभ्यङ्गस्नानमकारयन्नित्यर्थः। किम्भूतं। प्राक् पूर्वं कर्पूरागरुकस्तूरीचन्दनकक्कोलचूर्णरूपेण यक्षकर्दमेन सुगन्धिद्रव्येण कृत्वा मृदु यथा तथा शनैः उन्मृदितं अङ्गं यस्य तथा पश्चात् कुरङ्गमदेन कस्तूरिकया मीलितः सम्बन्धं प्रापितः

गन्धवारिभिरनुबधितभ्टङ्गै-
रङ्गना सिषिचुरुच्चकुचास्तं॥ ७॥
भूभृतं पृथुतपा घनमाप्त-
स्तं शुचिः स्नपयति स्म पुरोधाः।
सन्दधज्जलधरस्खलदोघ-
स्तीर्थवारिलहरीरुपरिष्टात्॥ ८॥

गौरसिर्यस्य कस्तूरिकानिर्व्वासिततैलशिरस्नमिति यावत्। तथा।

कर्पूरमगरुश्चैव कस्तूरीचन्दनं तथा।
कक्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्द्दमः॥

इति* विष्णुपुराणात्॥ ७॥

भूभृतमिति। अभ्यङ्गस्नानानन्तरं शुचिः साचार आप्तो हितः स्वकुलपरम्परायातः पुरोधाः पुरोहितः जलधराज्जलपूर्णात् स्वर्णकलशात् स्खलन् पतन्नोघः सन्ततधारापरम्परा यामान्ताः प्रयागादितीर्थवारीणां लहरीस्तरङ्गान् उपरिष्टात् सन्दधत् प्रक्षिपन् सन् पृथुना तपसा चान्द्रायणादिजन्येन च पुण्येन घनं पूर्णं तं भूभृतं नलं स्नपयति स्म। पूर्व्वमुष्णोदकस्नानेन शरीरशुद्धिं कारयित्वा सङ्कल्पपूर्व्वं शीतलोदकेन वेदोक्तमन्त्रस्नानमकारयदिति भावः। शुचिराषाढः पृथुना तपसा माघमासेनाघनं माघमारभ्य वृक्षाणां गलितपत्रत्वादगहनं एवम्भूतं पर्व्वतमभिषिञ्चती विशिष्टा लहरीरुपरि धारयन्

* गन्धद इति पा०।

प्रेयसी कुचवियोगहविर्भुग्
जन्मधूमविततीरिव बिभ्रत्।
स्नायिनः करसरोरुहयुग्मं
तस्य गर्भधृतदर्भमराजत्॥ ९॥
कल्प्यमानममुनाचमनार्थं
गाङ्गमम्बु चुलुकोदरचुम्बि।
निर्मलत्वमिलितात् प्रतिबिम्बा
द्यामयच्छदुपनीय करे नु॥ १०॥

यज्ञजलं विक्षिपन् आषाढः पृथुतपो येषां तैस्तपस्विभिर्घनं निरन्तरव्याप्तं पर्व्वतमभिषिञ्चतीति वा। तपा माघ इत्यमरः शुचिस्त्वयमाषाढ इति च॥ ८॥

स्नानक्रममाह॥ प्रेयसीति। स्नायिनो मन्त्रवत्तीर्थजलावगाहनस्नानविधिना स्नानं कुर्व्वाणस्य करसरोरुहयुग्मगर्भयोस्तर्जनीकनिष्ठान्तरालयोर्धृतौ दर्भौ येन एवम्भूतमराजत् शुशुभे। किम्भूतमिवोत्प्रेक्षते। प्रेयस्याः कुचवियोग एव हविर्भुक् तस्माज्जन्म यासान्ताः धूमविततीर्बिभ्रदिव दर्भाणां श्यामत्वाद्धूमविततित्वं युक्तम्॥ ९॥

कल्प्येति। अमुना आचमनमर्थः प्रयोजनं यस्य आचमनं कर्त्तुं वा कल्प्यमानं स्वीक्रियमाणं चुलुकोदरचुम्बि चुलुकमध्यवर्त्ति गाङ्गं अम्बु कर्त्तृ निर्मलत्वेन मिलितस्तस्मिन् जातः प्रतिबिम्बो यस्यास्तां द्यां स्वर्गं उपनीय समीपस्थां कृत्वा हस्तप्राप्यां

मुक्तमाप्य दमनस्य भगिन्या
भूमिरात्मदयितं धृतरागा।
अङ्गमङ्गमनु किं परिरेभे
तं मृदो जलमृदुग्रहयालु॥ ११॥

कृत्वा करे आयच्छत्। दाएदाने तदुत्क्षेचार्यां स्नानप्रारम्भानन्तरमाचमनं चकारेत्यर्थः। अन्यदपि दुर्लभं वस्तु हस्ते आनीय दीयते॥ १०॥

मुक्तमिति। भूमिः आत्मनो भूपतित्वाद्दयितं प्रियं भर्त्तारं नलं स्नानकाले दमनस्य भगिन्या भैम्या मुक्तं विरहितमाप्य लब्ध्वा धृतो रागो लौहित्यं यया अथ च सानुरागा सती उपरादिमृत्तिकानिषेधात्तत्परिहाराय जलस्पर्शमात्रेण शिथिलावयवाः मृदुतरस्पर्शाः स्नानार्थमानीताः मृदो गङ्गादिमृत्तिका गृहयालु गृह्णन्तं अनुकं आत्मनः कामुकं तं अङ्गमङ्गं प्रत्यङ्गं परिरेभे आलिलिङ्ग। शौतमार्गेण ललाटाद्यङ्गेषु रक्तमृत्तिकालगनव्याजेनान्यदा दुःप्रापं स्ववल्लभं भूरालिलिङ्गेति भावः। प्रतीयमानोत्प्रेक्षा। अन्याऽपि सपत्नीमुक्तं वल्लभं चिरात्प्राप्य सानुरागा सती प्रत्यङ्गमालिङ्गति कं सुखं लब्धोत्कर्षं सुखोद्देशेनालिलिङ्गेति वा।

शुक्ला विप्रस्य रक्ता तु क्षत्रियस्याथ मृद्दिशः।
पीता शूद्रस्य कृष्णा तु क्रमान्मृद उदाहृताः॥

इति स्मृतेः। अनुकं अनुकाभिकाभीकःकमिता (पा०५।२।७४)

प्राणमायतवतो जलमध्ये
मञ्जिमानमभजन्मुखमस्य।
आपगा परिवृढोदरपूरे
पूर्व्वकालमुचितस्य सुधांशोः॥ १३॥
मर्त्यलोकमदनः सदृशत्वं
बिभ्रदभ्रविशदद्युतितारम्।

प्राणमिति। सुवर्णघटितमहापात्रस्थतीर्थलोपकल्पितसमन्त्रककरकृतावगाहनजलमध्ये।

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्व्विकां।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः॥ इति।

याज्ञवल्क्योक्तलक्षणलक्षितं प्राणं प्राणायामं आयतवतः कृतवतः जलमध्ये मुखं नमीकृत्य कनिष्ठाङ्गुष्ठेन नासामुखश्वासनिरोधपूर्व्वं अघमर्षणं कृतवत इति यावत्। एवम्भूतस्यास्य नलस्य जलान्तर्वर्त्तिमुखं आपगानां परिवृढस्य स्वामिनः समुद्रस्य उदरपूरे गर्भप्रवाहमध्ये मन्थनात् पूर्व्वकालं उषितस्य कृतवासस्य सितांशोश्चन्द्रस्य मञ्जिमानं सौन्दर्य्यमभजत् सागरोदरस्थचन्द्रभ्रममभूदित्यर्थः। पुंसिभूम्न्यसवःप्राणा इत्यमरोक्तेः प्राणशब्दस्य बहुवचनान्तत्वनियमादेकवचनं चिन्त्यं। आयतवतः

मूलमध्यशिखरस्थितवेधः
शौरिशम्भुकरकाण्ड्रिशिरस्थैः।
तस्य मूर्ध्नि च करे शुचिदर्भैः
वारि वान्तमिव गाङ्गतरङ्गैः॥ १२॥

इति साधुः। अनुकिमिति पाठे सर्व्वाण्यङ्गानि सचीक्त रेभे किमित्यर्थः॥ ११॥

मूलेति। सायमूलैस्त्रिभिरगर्भैर्दर्भैस्तस्य मूर्द्ध्नि शुचि ...... कुत्रापमसम्बन्धात् पवित्रतरञ्च मार्जनं मन्त्रं तत्सम्बन्धि वारि च करे विक्षिप्तं। क्वचिद्वेपे किम्भूतैः।

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः।
कुशाग्रे शङ्करं विद्यात्त्रयो देवाः कुशे स्थिताः॥

इति वचनात् मूले मध्ये शिखरे च क्रमेण स्थितानां वेधःशौरिशम्भूनां ब्रह्मविष्णुहराणां क्रमेण करके कमण्डलौ अङ्घ्रौ पदाम्बुजे शिरसि च गङ्गा सर्व्वदेति पुराणप्रामाण्यस्थितैरेवम्प्रकारेण दर्भेषु सम्बर्द्धिर्गङ्गासम्बन्धिभिस्तरङ्गैर्वान्तमिव उद्गीर्णमिव कुशमूलादिस्थितब्रह्मादिदेवता यत्र करकादिनिष्ठगाङ्गतरङ्गभ्रष्टैरिव पवित्रैर्दर्भायजलैः स्नानाङ्गभूतं मार्जनमकरोदित्यर्थः। कमण्डलौ करक इत्यमरः। वान्तं उद्गिताकः यस्य विभाषेति (पा० ७।२।१५) निष्ठायामिण्निषेधः॥ १२॥

प्राणमायतवतो जलमध्ये
मज्जिमानमभजन्मुखमस्य।
आपगा परिवृढोदरपूरे
पूर्व्वकालमुषितस्य सुधांशोः ॥ १२ ॥
मर्त्यलोकमदनः सदृशत्वं
बिभ्रदम्बविशदद्युतितारम्।

प्राणमिति। सुवर्णघटितमहापात्रस्थतीर्थलोपकल्पितसमस्त-ककरकृतावगाहनजलमध्ये ।

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्व्विकां ।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः॥ इति।

याज्ञवल्क्योक्तलक्षणलक्षितं प्राणं प्राणायामं आयतवतः कृतवतः जलमध्ये मुखं नम्रीकृत्य कनिष्ठाङ्गुष्ठेन नासामुखश्वासनिरोधपूर्व्वं अघमर्षणं कृतवत इति यावत्। एवम्भूतस्यास्य नलस्य जलान्तर्वर्त्तिमुखं आपगानां परिवृढस्य स्वामिनः समुद्रस्य उदरपूरे गर्भप्रवाहमध्ये मन्थनात् पूर्व्वकालं उषितस्य कृतवासस्य सितांशोश्चन्द्रस्य मज्जिमानं सौन्दर्य्यमभजत् सागरोदरस्थचन्द्रभ्रममभूदित्यर्थः। पुंसिभूम्न्यसवःप्राणा इत्यमरोक्तेः प्राणशब्दस्य बहुवचनान्तत्वनियमादेकवचनं चिन्त्यं। आयतवतः यमेः क्तवतुः। अत्यन्तसंयोगे द्वितीया ॥ १२ ॥

मर्त्येति। मर्त्यलोकमदनो नलः दशदिश एव वसनं यस्य तस्य दिगम्बरस्य विधुमौलेश्चन्द्रशेखरस्य स्पर्द्धयेव अम्बरं वस्त्रं अप

अम्बरं परिदधे विधुमौले
स्पर्द्धयेव दशदिग्वसनस्य ॥ १४ ॥
भीमजामनुचलत् प्रतिवेलं
संयियंसुरिव राजऋषीन्द्रः ।

च गगनं परिदधे। अत्र कृतदशदिग्रूपविभागं गगनमुच्यते तेन गगनवसनस्येत्यर्थः। किम्भूतं। सदृशत्वं दशाभिर्दीर्घप्रान्ततन्तुभिः सह वर्त्तते तद्भावं अथ च दशभिःसहवर्त्तमानं तद्भावं दशत्व-सङ्ख्यायोगिदिग्विभागोपाधिरेव दशत्वसङ्ख्यायोगित्वं बिभ्रत् सद्-शत्वमुदितभागत्वं बिभ्रदिति नलविशेषणं वा। तथा अभ्रव-दौचित्याच्छरन्मेघस्येवाभ्रका परिपर्य्या यस्य शुभ्रतरद्रव्यविशेष-स्येव वा। विशदा शुभ्रतरा द्युतिर्यस्य अत एव तारं सूक्ष्मतरं धवलद्युतिवत् तारश्चेति एकपद्यं वा अभ्रवद्विशदा द्युतिर्यस्य तद्भावस्ततातामारात् आदत्ते तद्धवलतरं वा शरन्मेघवदभ्रक-द्रव्यवद्वा निर्म्मलाद्युतिर्यासां तादृशस्तारका यत्र। यद्वा अ-भ्राणि मेघा विशन्ति अत एव मेघावृतलाद्द्युतयः कान्ति-रहितास्तारका यत्रेति वा। अच्छिन्नं धौतं वस्त्रं परिदध इत्यर्थः ईश्वरोऽपि विशिष्टमाकाशमेव वस्ते शिवकामयोर्विशे-षात् स्पर्द्धा युक्ता। अभ्राणि विशन्तीति पचे द्वितीयेति योग-विभागात् समासः ॥ १४ ॥

भीमजामिति। राजऋषीणां सदाचारनृपाणां मध्ये इन्द्रः स नलः उत्तरीयस्योपरितनवस्त्रस्य परिवेषमिषेण वेष्टनव्याजेन

प्राणमायतवतो जलमध्ये
मञ्जिमानमभजन्मुखमस्य।
आपगा परिवृढोदरपूरे
पूर्व्वकालमुचितस्य सुधांशोः ॥ १२ ॥
मर्त्यलोकमदनः सदृशत्वं
बिभ्रदभ्रविशदद्युतितारम्।

प्राणमिति। सुवर्णघटितमहापात्रस्थतीर्थलोपकल्पितसमन्त्रककारकृतावगाहनजलमध्ये।.

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्व्विकाम्।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः॥ इति।

याज्ञवल्क्योक्तलक्षणलक्षितं प्राणं प्राणायामं आयतवतः कृतवतः जलमध्ये मुखं नमीकृत्य कनिष्ठाङ्गुष्ठेन नासामुखश्वासनिरोधपूर्व्वं अघमर्षणं कृतवत इति यावत्। एवम्भूतस्यास्य नलस्य जलान्तर्वर्त्तिमुखं आपगानां परिवृढस्य स्वामिनः समुद्रस्य उदरपूरे गर्भप्रवाहमध्ये मन्थनात् पूर्व्वकालं उषितस्य कृतवासस्य सितांशोश्चन्द्रस्य मञ्जिमानं सौन्दर्य्यमभजत् सागरोदरस्थचन्द्रतुल्यमभूदित्यर्थः। पुंसिभूम्न्यसवःप्राणा इत्यमरोक्तेः प्राणशब्दस्य बहुवचनान्तत्वनियमादेकवचनं चिन्त्यं। आयतवतः यमेः क्तवतुः। अत्यन्तसंयोगे द्वितीया॥ १२॥

मर्त्येति। मर्त्यलोकमदनो नलः दशदिश एव वसनं यस्य तस्य दिगम्बरस्य विधुमौलेश्चन्द्रशेखरस्य लर्द्धयेव अम्बरं वस्त्रं अथ

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुराचीं ।
वीच्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवाभूत् ॥ १७ ॥

येदिति व्यासवचनेन वैधस्नानानन्तरं वस्त्रादिना केशमार्जनस्य निषेधात् केशेषु शेषं जलं केशप्रान्तेभ्यो गलद्यज्जलं जलविन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः, यद्वा जलमौक्तिकानि मुक्तावत् स्थूलजलविन्दवस्त एव दन्ताः यस्याः सा एवम्भूता रमणीयदशना तिलकं दधारेति भावः। अन्याऽप्येवंविधा तरुणी कञ्चिद्भजत इति ॥ १६ ॥

श्वैत्येति। श्वैत्येन शैत्येन च जलदैवतं येषां तैराप्यैः तज्जलदैवतं वरुणस्तत्सम्बन्धिभिर्वारुणैर्मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरसलक्षणस्वविषयलाभेन प्रमुदितां अतितरां सन्तुष्टां चतुराचीं इन्द्रियचतुष्टयं क्रमेण चक्षुस्त्वक्श्रोत्ररसनसमाहाररूपां नेत्रादिचतुष्टयीं वीच्य घ्राणेन्द्रियं सहजगन्धस्य पृथिव्या असाधारणगुणत्वाज्जले तदसम्भवात् कर्पूरादिवासितस्य च जलस्य देवस्नापनादिधर्मकर्मासु प्रतिषेधादौपाधिकस्याप्यसम्भवात् मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन लोभस्तज्जातीयस्पर्द्धा, विगलि-
[illegible] सत् च्वतं चेत्यादिसन्ध्याघमर्षणे चुलुकोदकस्पर्शमिषेण
[illegible] जिघ्रतीति सलिलघ्रं जलाघ्राणं कुर्वदिवाभूत्, लोभस्य-

प्राववार हृदयं स समन्ता-
दुत्तरीयपरिवेषमिषेण ॥ १५ ॥
स्नानवारिघटराजदुरोजा
गौररत्नतिलकविन्दुमुखेन्दुः ।
केशशेषजलमौक्तिकदन्ता
तं वभाज सुभगाप्लवनश्रीः ॥ १६ ॥

हृदयं मनः अथ च वक्षःस्थलं समन्तात् प्राववार ववन्ध पिदधे च। किम्भूतं। यतः प्रतिवेलं वारं वारं भीमजामनुलचीकृत्य अनुरागातिशयाच्चलदभिमुख धावत्। किम्भूत इव तद्धृदयं संयियंसुरिव सम्यक् नितरां नियन्तुमिच्छुरिव चणमात्रं त्वया न गन्तव्यमिति गाढं सयत्नं कर्त्तुमिच्छति वा स्नत्यादाविकवासस: कर्मानधिकारोऽतउत्तरीयवस्त्रधारणं युक्तं। अन्योऽप्यन्यत्र गमनोत्सुको बलाद्रज्ज्वादिना स्थाप्यते समन्तादिति च पाठः। राजा च्चयिरित्यक इति प्रकृति भावः ॥ १५ ॥

स्नानेति । सुभगा मनोहरा अथ च सौभाग्यवती आप्लवनश्रीः स्नानलक्ष्मीस्तं वभाज सिषेवे स्नानेन नितरां शुशुभे इत्यर्थः। किम्भूता। स्नानार्थं वारि तद्युक्ताः सुवर्णघटास्त एव राजन्तौ उरोजौ कुचौ यस्याः सा तथा ऊर्द्ध्ववृत्ततिर्य्यगर्द्धचन्द्राकाराः वर्णानां क्रमात्तिलका इति दचवचनात्। ललाटे धृतो गौररत्नतिलकविन्दुर्गङ्गातीरमृद्गोपीचन्दनादिरचितो वर्त्तुलतिलकः स एव गौरवृत्तत्वान्मुखेन्दुर्यस्याः सा तथा दृशवर्णैर्न मार्ज-

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुरार्चीं।
वीक्ष्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवाभूत्॥ १७॥

येदिति व्यासवचनेन वैधस्नानानन्तरं वस्त्रादिना केशमार्जनस्य निषेधात् केशेषु शेषं जलं केशप्रान्तेभ्यो गलद्यज्जलं जलविन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः, यद्वा जलमौक्तिकानि मुक्तावत् स्थूलजलविन्दवस्त एव दन्ताः यस्याः सा एवम्भूता रमणीयदशना तिलकं दधारेति भावः। अन्याऽप्येवंविधा तरुणी कञ्चिद्भजत इति॥ १६॥

श्वैत्येति। श्वैत्येन शैत्येन च जलदैवतं येषां तैराद्यैः तज्जलदैवतं वरुणस्तत्सम्बन्धिभिर्वारुणैर्मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरसलक्षणस्वस्वविषयलाभेन प्रमुदितां अतितरां सन्तुष्टां चतुरार्चीं इन्द्रियचतुष्टयं क्रमेण चक्षुस्त्वक्श्रोत्ररसनसमाहाररूपां नेत्रादिचतुष्टयीं वीक्ष्य घ्राणेन्द्रियं सहजगन्धस्य पृथिव्या असाधारणगुणत्वाज्जले तदसम्भवात् कर्पूरादिवासितस्य च जलस्य देवस्नापनादिधर्मकर्मासु प्रतिषेधादौपाधिकस्याप्यसम्भवात् मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन लोभस्तज्जातीयस्पर्द्धा, विगलितविवेकं सत् च्युतं चेत्यादिसन्ध्याघमर्षणे चुलुकोदकस्पर्शमिषेण सलिलं जिघ्रतीति सलिलघ्रं जलाघ्राणं कुर्व्वदिवाभूत्, लोभस्य-

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुरार्चीं।
वीक्ष्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवाभूत् ॥ १७ ॥

येदिति व्यासवचनेन वैधस्नानानन्तरं वस्त्रादिना केशमार्जनस्य निषेधात् केशेषु शेषं जलं केशप्रान्तेभ्यो गलद्यज्जलं जलविन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः, यद्वा जलमौक्तिकानि मुक्तावत् स्थूलजलविन्दवस्त एव दन्ताः यस्याः सा एवम्भूता रमणीयद्शना तिलकं दधारेति भावः। अन्याऽप्येवंविधा तरुणी कश्चिद्भजत इति ॥ १६ ॥

श्वैत्येति। श्वैत्येन शैत्येन च जलदैवतं येषां तैराद्यैः तज्जलदैवतं वरुणस्तत्सम्बन्धिभिर्वारुणैर्मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरसलक्षणस्वस्वविषयलाभेन प्रमुदितां अतितरां सन्तुष्टां चतुरार्चीं इन्द्रियचतुष्टयं क्रमेण चक्षुस्त्वक्श्रोत्ररसनसमाहाररूपां नेत्रादिचतुष्टयीं वीक्ष्य घ्राणेन्द्रियं सहजगन्धस्य पृथिव्या असाधारणगुणत्वाज्जले तदसम्भवात् कर्पूरादिवासितस्य च जलस्य देवस्नापनादिधर्म्मकर्मासु प्रतिषेधादौपाधिकस्याप्यसम्भवात् मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन लोभस्तज्जातीयस्पर्द्धा, विगलितविवेकं सत् स्वतं चेत्यादिसन्ध्याघमर्षणे चुलुकोदकस्पर्शमिषेण सलिलं जिघ्रतीति सलिलघ्रं जलाघ्राणं कुर्व्वदिवाभूत्, लोभस्य-

प्राववार हृदयं स समन्ता-
दुत्तरीयपरिवेषमिषेण ॥ १५ ॥
स्नानवारिघटराजदुरोजा
गौरम्रत्तिलकविन्दुमुखेन्दुः।
केशशेषजलमौक्तिकदन्ता
तं वभाज सुभगाप्लवनश्रीः ॥ १६ ॥

हृदयं मनः अथ च वचःस्थलं समन्तात् प्राववार ववन्ध पिदधे च। किम्भूतं। यतः प्रतिवेलं वारं वारं भैमजामनुलक्षीकृत्य अनुरागातिशयाच्चलदभिमुखं धावत्। किम्भूत इव तद्धृदयं संयियंसुरिव सम्यक् नितरां नियन्तुमिच्छुरिव चणमात्रं लया न गन्तव्यमिति गाढं सयत्नं कर्त्तुमिच्छति वा स्नात्यादाविकवासमः कर्मानधिकारोऽत उत्तरीयवस्त्रधारणं युक्तं। अन्योऽप्यन्यत्र गमनोत्सुको वलाद्रज्ज्वादिना स्थाप्यते समन्तादिति च पाठः। राजा ऋषिरित्यक्त इति प्रकृति भावः ॥ १५ ॥

स्नानेति। सुभगा मनोहरा अथ च सौभाग्यवती आप्लवनश्रीः स्नानलक्ष्मीस्तं वभाज सिषेवे स्नानेन नितरां शुशुभे इत्यर्थः। किम्भूता। स्नानार्थं वारि तद्युक्ताः सुवर्णघटास्त एव राजन्तौ उरोजौ कुचौ यस्याः सा तथा ऊर्द्ध्ववृत्ततिर्यगर्द्धचन्द्राकाराः वर्णानां क्रमात्तिलका इति दक्षवचनात्। ललाटे धृतो गौरम्रत्तिलकविन्दुर्गङ्गातीरमृद्गोपीचन्दनादिरचितो वर्त्तुलतिलकः स एव गौरम्रत्तलाम्मुखेन्दुर्यस्याः सा तथा हस्तवर्त्तेन मार्ज-

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुराचीं।
वीक्ष्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवाभूत्॥ १७॥

येदिति व्यासवचनेन वैधस्नानानन्तरं वस्त्रादिना केशमार्जनस्य निषेधात् केशेषु शेषं जलं केशप्रान्तेभ्यो गलद्यज्जलं जलबिन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः, यद्वा जलमौक्तिकानि मुक्तावत् स्थूलजलबिन्दवस्त एव दन्ताः यस्याः सा एवम्भूता रमणीयदशना तिलकं दधारेति भावः। अन्याऽप्येवंविधा तरुणी कञ्चिद्भजत इति॥ १६॥

श्वैत्येति। श्वैत्येन शैत्येन च जलदैवतं येषां तैराप्यैः तज्जलदैवतं वरुणस्तत्सम्बन्धिभिर्वारुणैर्मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरसलक्षणस्वस्वविषयलाभेन प्रमुदितां अतितरां सन्तुष्टां चतुराचीं इन्द्रियचतुष्टयं क्रमेण चक्षुस्त्वक्श्रोत्ररसनसमाहाररूपां नेत्रादिचतुष्टयीं वीक्ष्य घ्राणेन्द्रियं सहजगन्धस्य पृथिव्या असाधारणगुणत्वाज्जले तदसम्भवात् कर्पूरादिवासितस्य च जलस्य देवस्नापनादिधर्मकर्मासु प्रतिषेधादौपाधिकस्याप्यसम्भवात् मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन लोभस्सञ्जातोयस्पर्द्धा, विगलितविवेकं सत् स्वतं चेत्यादिसन्ध्याघमर्षणे चुलुकोदकस्पर्शमिषेण सलिलं जिघ्रतीति सलिलघ्रं जलाघ्राणं कुर्वदिवाभूत्, लोभस्य-

राज्ञि भानुमदुपस्थितयेऽस्मि-
न्नात्तमम्बु किरति स्वकरेण।
भ्रान्तयः स्फुरति तेजसि चक्रु-
स्त्वष्टृतर्कुचलदर्कवितर्कं ॥ १८ ॥

ईर्ष्यां विगलितविवेको ह्यविषयेऽपि प्रवर्त्तते। सन्ध्याघमर्षणं चकारेति भावः। श्वैत्यं वर्णवाचित्वात् ष्यञ्। चतुराचीं समाहारे द्विगोरिति (पा० ४।१।२१) ङीप्। सलिलघ्नं आदन्तत्वात् कः॥ १७॥

राज्ञीति। अस्मिन् राज्ञि भानुमतः सूर्य्यस्योपस्थितये उपस्थानार्थं आत्तं गृहीतमर्घ्यदानसम्बन्धि स्वकरेण स्वपाणिना अर्घ्यदानानन्तरं वा "असावादित्यो ब्रह्म" इत्यादिमन्त्रपूर्व्वकं जलं शिरः परितः स्वपाणिना स्फुरति प्रकाशमाने तेजसि सौरप्रभाप्रसरे मध्ये गलद्बिन्दु क्रमेण किरति सति भ्रान्तयः छिद्रोदकस्येव भ्रादच्छिद्रपरिभ्रमणानि लोकस्य त्वष्टुर्विश्वकर्म्मणस्तर्कुः शाणचक्रं तत्र घर्षणवशाच्चलतो भ्राम्यतो विस्फुलिङ्गपतनशीलतेजःकणस्य अर्कस्य वितर्कं तद्विषयविशिष्टमूहं चक्रुः। प्रकाशमानसौरप्रभासचिद्रगलद्बिन्दुजलभ्रमणदर्शनेन विश्वकर्म्मणा सूर्य्यः पुनरपि शाणचक्रे धृतः किं। अत एव तत्कणाः पतन्तीति लोकस्य तदानीं बुद्धिरभूदित्यर्थः। भानुमदुपस्थितये गृहीतमम्बु स्वकरेण विकिरन् यस्मिन् राज्ञि विषये लोकस्य तदानीं भ्रान्तयो मध्याह्नप्रभाप्रसरे प्रकाशमाने सति शाणचक्रपरिभ्रमसूर्य्यसमा-

सम्यगस्य जपतः श्रुतिमन्त्राः
सन्निधानमभजन्त कराब्जे।
शुद्धबीजविशदस्फुटवर्णाः
स्फाटिकाक्षवलयच्छलभाजः॥ १९ ॥

वनां लोकस्य चक्षुरिति वा। राज्ञा यदम्बु गृहीतं तस्मिन् चित्रे जले स्फुरति प्रतिफलति रवितेजसि जायमाना भ्रान्तयो भ्रमणानि लघुस्वचक्रं चलदर्कं वितर्कयाञ्चक्रुः। उत्क्षिप्ता आपो वियति भ्रमन्त्यः पतन्ति तत्प्रतिविम्बितेजस्यपि भ्रमणानि जायन्ते तत्रोत्प्रेचा इति वा। अर्घदानं सूर्य्योपस्थानञ्च कृतवानिति भावः। स्फुरितेजसीति पाठे जलविशेषणं॥ १८॥

सम्यगिति। श्रुतिमन्त्राः सम्यग् जपतः सावित्र्यादिमन्त्रमावृत्त्योपांशु उच्चारयतः अस्य कराब्जे सन्निधानमभजन्त अशोभन्त। किम्भूताः शुद्धैरागमोक्तक्रमोच्चारणनिर्मलैर्वह्निवारुणादिबीजैः कृत्वा विशदस्फुटाः मात्रादिसाकल्योच्चारणेनासन्दिग्धा वर्णाः अक्षराणि येषु। अथ च शुद्धेषु त्रासादिदोषरहितेषु बीजेषु स्फाटिकगुटिकासु विशदो धवलः प्रकटो वर्णः कान्तिर्येषां। यद्वा निर्दोषः स्फाटिकबीजान्येव धवलाः प्रकटा वर्णा अक्षराणि येषु। तथा स्फाटिकाक्षाणां वलयस्य मालाया छलं भजन्ति ते तदाकारेण परिणता भक्त्यतिशयात् मूर्त्तीभूय तत्पाणिपद्मे वसन्ति स्मेति भावः। उपस्थानानन्तरं सावित्रीजपञ्च कृतवानिति भावः॥ १९॥

पाणिपर्व्वणि यवः पुनराख्या-
द्देवतर्पणयवार्पणमस्य।
न्युप्यमानजलयोगितिलौघैः
स द्विरुक्तकरतालुतिलोऽभूत्॥ २०॥
पूतपाणिचरणः शुचिनोच्चै-
रध्वना नितरपादहतेन।

पाणीति। अस्य पाणिपर्व्वणि हस्ताङ्गुलीनां ग्रन्थौ काण्डे वर्त्तमानो यवाकारः सामुद्रिकलक्षणभूतशुभरेखाविन्यासरूपो यवो देवतर्पणजले यवार्पणं कर्मभूतं पुनरुक्तमाख्यात् अकरोदित्यर्थः। देवतर्पणं हि यवैः क्रियते ते चाङ्गुलीपर्व्वसु पूर्व्वमेव वर्त्तन्ते एतावतैव पौनरुक्त्यं। तथा न्युप्यमानेन पितृभ्यो दीयमानेन जलेन योगिभिः सहजक्षिप्यमाणैः कृष्णतिलौघैः कृत्वा स नलो द्विरुक्तः पुनरुक्तः करतालुतिलः करकमलमध्यवर्त्तिसामुद्रिकलक्षणभूतः सूक्ष्मकालतिलाकारो अङ्को यस्य तादृशोऽभूत्। पितृतर्पणं हि तिलैः क्रियते स च तिलस्तलहस्तमध्ये वर्त्तत एवेति पौनरुक्त्यं ब्रह्मयज्ञदेवपितृतर्पणमपि तेनाकारीति भावः। आद्यन्तयोर्देवपितृतर्पणयोर्मध्ये वर्त्तमानं ऋषितर्पणमपि तेन कृतमिति ज्ञेयं। न्युप्यमानं ग्रह्यादित्वात् सम्प्रसारणं॥ २०॥

पूतेति। एष राजा चामी ऋषिः श्रुतिधर्माचरणशीलो नलः देवपूजागृहप्रवेशौचित्यार्थं पूतं जलक्षालितं पाणिचरणौ येनैवंभूतः सन् शुचिना गोमयलिप्तेन पवित्रेण तथा नितरस्य नला-

ब्रह्मचारिपरिचारिसुरार्चा-
वेश्म राजदुहितापि विवेश ॥ २१ ॥
क्वापि यन्नभसि धूपजधूमै-
र्मेचकागुरुभवैर्भ्रमराणाम् ।
भूयते स्म सुमनः सुमनःस्र-
ग्दामधामपटले पटलेन ॥ २२ ॥

तिरिक्तस्य पादेनाहतेऽन्यचरणस्पर्शदूषितेनेत्यर्थः । उच्चैः ऊर्द्धं अध्वना सोपानबद्धमार्गेण । यद्वाऽनितरपादहतेन अत एवोच्चैर्नितरां शुचिनाऽध्वना ब्रह्मचारिण उपनीता द्विजाः परिचारिणो देवसेवाकारिणो यत्र एवम्भूतं सुरार्चावेश्म सुवर्णादिनिर्मितमन्त्रसंस्कृतप्रतिमा गृहं देवपूजासम्बन्धिनो गृहं विवेश ॥ २१ ॥

क्वेति । यस्य देवपूजागृहस्य नभसि अन्तरावकाशे क्वापि कस्मिन्नपि प्रदेशे सुमनसां देवानां पूजार्थमानीताः सुमनसः पुष्पाणि तासां स्रग्दामानि मालापरम्पराः । यद्वा स्रजः कण्ठमाला दामानि शिरोमाल्यानि तेषां धामानि स्थानानि मध्यस्थापितपुष्पवेणुसुवर्णादिपात्राणि तेषां पटले समूहे विषये तेषामुपरिष्टात् मेचकागरुसमूहैः कृष्णागरुसमुद्भवैर्धूपजैः सौगन्ध्यार्थं रचितैर्धूमोत्पन्नैर्धूमैरेव भ्रमराणां पटलेन गणेन भूयते स्म जातं । पुष्पाणामुपरि भ्रमरैर्भाव्यं तथा च धूपजधूमा एव तत्स्थाने जाता इत्यर्थः । सुमनसो मालत्याः पुष्पाणां मालापरम्परास्तासां स्थानं तद्रचितमिति यावत् एवं पटलं वितानं

साङ्कुरेव रुचिपीततमाये-
र्यैः पुरास्ति रजनीरजनीव।
ते धृता वितरितुं त्विदशेभ्यो
यत्र हेमलतिका इव दीपाः ॥ २३ ॥

यत्र तादृशे वा देवानामुपरि पुष्पवितानमपि निबद्धं यत्रेत्यर्थः। देवपूजार्थं उपहृतपुष्पमालापरम्पराणां स्थानभूतं पटलं गृहप्रान्तच्छदिर्यत्तादृशपटान्तरप्रदेशे देवतागारे हि छदिः प्रान्ते। सौरभरामणीयकार्थं पुष्पमाला बध्यन्ते तासामुपरि धूमा एव भृङ्गा जाता इत्यर्थ इति वा। बहुतरा धूपाः पुष्पमालाश्च यत्र सन्तीति भावः। सुमना मालतीजातिरित्यमरः। प्रान्तेऽथ पटलं छदिः ॥ २२ ॥

साङ्कुरेति। यत्र देवगृहे ते दीपा हेमलतिका इव त्रिदशेभ्यो वितरितुं धृताः स्थापिताः सन्ति ते के यैः यैर्दीपैरुच्या दीप्त्या पीतं ग्रस्तं तमो यस्यास्तादृशी सा भूता भविष्यति वा रजनी रात्रिः साङ्कुरेवोद्भिन्नप्रत्यग्रतेजोऽङ्कुरसहितेव पुरास्ति अभूत् भविष्यति वा। तथा यैः रुचा कान्त्या पीततमा अतितरां पीतवर्णा अत्यन्तगौरो रात्रिः उद्भिन्नप्रत्ययाङ्कुरा रजनीव हरिद्रेव अभूत् भविष्यति वा। रात्रिः पीतीभूततया हरिद्रावत्, प्रदीपकलिकाश्च तदङ्कुरा इवेत्युत्प्रेक्षोपमा वा। निशाख्या काञ्चनी पीतेत्यमरः। पीततमा पक्षे सान्तं पक्षे तमवन्तं। पुराक्षीति परिभुङ् चेति (पा० ३।२।१२२) यावत् पुरेति (पा० ३।३।४) भविष्यति वा लट् ॥ २३ ॥

यत्र मौक्तिकमणेर्विरहेण
प्रीतिकामवृतवह्निपदेन ।
कुङ्कुमेन परिपूरितमन्तः
शुक्तयः शुशुभिरेऽनुभवन्त्यः ॥ २४ ॥

यत्रेति। यत्र देवागारे मौक्तिकमणेः प्रियतमस्य विरहेण कर्त्रा कुङ्कुमस्य स्वोद्दीपनहेतुतया प्रीतिस्तथा कामं वृतं दत्तं कामेन कर्त्रा वा दत्तं वह्नेः पदं दाहकलादिरूपोऽधिकारः तद्रूपं चिह्नं वा यस्य तेन कुङ्कुमेन केसरेण परिपूरितं अन्तर्मध्यभागमनुभवन्त्यो बिभ्राणाः शुक्तयः शुशुभिरे वियोगिन्योऽपि विरहाग्नितप्तं हृदयमनुभवन्ति । कुङ्कुमपूर्णाःशुक्तयो वियोगिन्यो रूपकेन वर्ण्यन्ते। यद्वा मौक्तिकमणेर्विरहेण उपलक्षिताः शुक्तयः कुङ्कुमस्य कामोद्दीपने हेतुतया या प्रीतिस्तया युक्तेन कामेन। अन्यत् पूर्ववत्। वृतदाहकत्वरूपाधिकारेण कुङ्कुमेन परिपूरितं अन्तः अनुभवन्त्यः शुशुभिरे इति वा । प्रीतो हि किञ्चित् पदं ददाति। शुक्तयः विशिष्टेन कुङ्कुमेन उपलक्षिताः सत्यः मौक्तिकमणेर्विरहेण पूर्णं मध्यमनुभवन्त्य इव शुशुभिरे इति प्रतीयमानोत्प्रेक्षा वा । प्रीतेति पाठे स्वोद्दीपकत्वेन प्रीतात् कामात् वृतवरेण लब्धवह्निपदं येनेत्यर्थः। मुक्ताफलोत्पत्तिहेतुभूताः शुक्तयः पुत्रविरहेण मातरो यथा हृदयान्तर्दाहं वहन्ति तथा कुङ्कुमरूपमन्तर्दाहं वहन्त्यः शुशुभिरे इति वा ॥ २४ ॥

अङ्कचुम्बिघनचन्दनपङ्कं
यत्र गारुडशिलाजममत्रम्।
प्राप केलिकवलीभवदिन्दोः
सिंहिकासुतमुखस्य सुखानि॥ २५॥
गर्भमेणमदकर्दमसान्द्रं
भाजनानि रजतस्य भजन्ति।
यत्र साम्यमगमन्नमृतांशो-
रङ्करङ्ककलुषीकृतकुक्षेः॥ २६॥

अङ्केति। यत्र देवागारे अङ्कचुम्बी मध्यवर्त्ती घनश्चन्दनपङ्को यस्य तत् गारुडशिलाजं अतिनीलस्थलगरुडोद्गारमणिघटितम-मत्रं पात्रं केल्या लीलामात्रेण कवलीभवन् ग्रासीभवन् मुखम-ध्यवर्त्त्यर्द्धभाग इन्दुर्यस्य तस्य सिंहिकासुतमुखस्य राहुवदनस्य शीतलान्नभोजनसुखानि प्राप तत्सममभूदित्यर्थः। गारुडमणि-पात्राणि यत्र चन्दनभरितानि सन्तीति भावः। अमत्रमिति जात्या एकवचनं भवदिन्दोर्भापितपुस्तकं॥ २५॥

गर्भमिति। यत्र देवागारे एणमदकर्दमेन कस्तूरीपङ्केन सान्द्रं पूर्णगर्भमध्यं भजन्ति बिभ्राणानि रजतघटितानि भाज-नानि पात्राणि अङ्करङ्कुः कलङ्कमृगः तेन कलुषीकृतो मलीनी-कृतः कुक्षिर्यस्य तस्यामृतांशोश्चन्द्रस्य साम्यमगमत्। देवपूजार्थं रजतपात्राणि कस्तूरीपूर्णाणि यत्र सन्तीति भावः॥ २६॥

उन्निद्रानसुक्रताङ्कुरशङ्का
यत्र धर्म्मगहने खलु तेने।
भूरिशर्क्करकरम्भवलीना-
मालिभिः सुगतसौधसखानां ॥ २७ ॥
खर्व्वमाख्यद्मरौघनिवासं
पर्व्वतं क्वचन चम्पकसम्पत्।
मल्लिकाकुसुमराशिरकार्षीद्
यत्र च स्फटिकसानुमनुच्चं ॥ २८ ॥

उन्निद्रानेति। धर्म्मेण गहने निविडे, अन्य च पुण्यकानन-रूपे यत्र देवपूजार्थरचितस्थे उच्चवर्त्तुलधवलतराणां सुगत-सौधानां बौद्धदेवालयानां वा सखायः सदृशास्तेषां भूरि शर्करा येषु तेषां करम्भवलीनां दधिसक्तूपहाराणां दध्योदनोपहा-राणां वा आलिभिः पङ्क्तिभिः उन्निद्रान उद्गच्छन् सुक्रता-ङ्कुरस्य शङ्का सम्भावना खलु निश्चितं तेने व्यरचि। आम्रा-दिवने हि·आम्राद्यङ्कुर एवोद्गच्छति तथा धर्म्मकानने धर्म्मा-ङ्कुर एवेति। यत्र शर्करामिश्रितं दध्योदनवल्लिश्रेणय उपक-ल्पिताः सन्तीति भावः। सुगतसौधसखानां राजेति (पा०५। ४।८२) टच्॥ २७ ॥

खर्व्वमिति। यत्र क्वचन प्रदेशे विकसितचम्पककुसुमानां सम्पत् उच्चतरपुञ्जः भ्रमरौघाणां निवासभूतं पर्व्वतं मेरुं खर्व्वं ह्रस्वमाख्यत्, सुमेरुवर्णश्चम्पकराशिर्मेरोरप्युच्चतरो यत्रास्ती-

स्वात्मनः प्रियमपि प्रतिगुप्तिं
कुर्व्वती कुलवधूमवजज्ञौ।
हृद्यदैवतनिवेद्यनिवेशा-
द्यत्र भूमिरवकाशदरिद्रा ॥ २९ ॥
यत्र कान्तकरपीडितनील-
ग्रावरश्मिचिकुरास्तु विरेजुः।

त्यर्थः। तथा मल्लिकाकुसुमराशिः स्फटिका एव शिखराणि यस्य तं कैलासं पर्व्वतं अनुच्चं खर्व्वं अकार्षीत्। शुद्धतरस्फटिकवर्ण-कैलासतुल्यो मल्लिकापुष्पराशिः कैलासादप्युच्चतरो यत्रासी-त्यर्थः। पृथगन्वयात् खर्व्वानुच्चपदद्वयं भिन्नमिति ज्ञेयं ॥ २८ ॥

स्वात्मन इति। यत्र हृद्यानां वर्णरसादीनां मनोहारिणां देवतासम्बन्धिनां निवेद्यानां पक्वखाद्याद्युपहाराणां निवेशाद्-वस्थापनाद्धेतोः तिलमात्रावकाशेनापि दरिद्रा रहिता भूमिः स्वात्मनः प्रियं नलं प्रत्यपि लज्जीकृत्य गुप्तिं सर्व्वाङ्गं सुवर्णरूपं गोपनं कुर्व्वती, शोभनस्य स्वस्य वा देहस्य गोपनं कुर्व्वती वा, तिलमात्रमपि प्रदेशं द्रष्टुमददाना सती कुलवधूमवजज्ञौ, अवमेने, कुलस्त्रीतुल्याऽभूदित्यर्थः। कुलवधूरपि स्वप्रियं प्रति लज्जातिशयात् स्वशरीरं गोपयति। बहूनि निवेद्यानि यत्र स्थापितानि सन्तीत्यर्थः ॥ २९ ॥

यत्रेति। यत्र वर्त्तमानासु कुट्टिमक्षितिषु चन्द्रकान्तादि-मणिबद्धभूमिषु देवपूजावसरे गात्रेणां [illegible]

गाढमूर्द्धविधुतेरनुविम्बात्
कुट्टिमक्षितिषु कुट्टमितानि ॥ ३० ॥
नैकवर्णमणिभूषणपूर्णे
स क्षितीन्दुरनवद्यनिवेद्ये।
अध्यतिष्ठदमलं मणिपीठं
तत्र चित्रसिचयोच्चयचारौ ॥ ३१ ॥

मूर्द्धविधुतेः शिरःकम्पस्यानुविम्बात् प्रतिबिम्बाद्धेतोस्तद्व्याजेन कुट्टमितानि हठक्रियमाणचुम्बनादिपरिहारार्थं कामिनीशिरःकम्पविलसितानीव विरेजुः। किम्भूतासु। भौमा भीमसेनस्तद्वत् सूर्य्यकान्ताश्चन्द्रकान्ता वा तेषां करैः किरणैः पीडिताः पुरस्तादन्तुं प्रतिबद्धास्तत्रैव घनीभूता इति यावत्। नीलग्रावरश्मयो नीलमणिकिरणा एव चिकुराः सुनीला केशा यासां तासु। कामिन्यो हठपरिचुम्ब्यमाना प्रियपाणिगृहीता नीलमणिरश्मितुल्याः। सुनीलाः केशा यासां। क्षतकचग्रहाःसत्यः चुम्बनादिपरिहाराय शिरःकम्पनरूपान् विलासान् कुर्व्वन्ति। मणिबद्धा भूमयो देवसेवका गायकाश्च यत्र सन्तीति भावः ॥ ३० ॥

नेति। स क्षितीन्दुः भूचन्द्रो नलः तत्रोक्तरूपे देवपूजागृहे अमलं मणिभीरत्नैः खचितं पीठमध्यतिष्ठत्। किम्भूते। नैकवर्णा मणयो येषु देवार्थं कल्पितैर्नानावर्णैः भूषणैः पूर्णे। तथाऽनवद्यानि मोदकादिनिवेद्यानि यस्मिन्। तथा चित्राणां नाना-

सम्यगर्चति नलेऽर्कमर्हणं
भक्तिगन्धिरमुनाऽकलि कर्णः।
श्रद्दधानहृदयं प्रति चान्तः
साम्बमम्बरमणिर्निरचैषीत्॥ ३२॥

वर्णानामाश्चर्यकारिणां देवार्थमानीतानां सिचयानां वस्त्राणां उच्चयेन राशिना चारौ रमणीये। मणिपीठं अधिशीङिति (पा०१।४।४६) कर्मत्वम्। चार्विति पाठे पीठविशेषणं॥३१॥

पञ्चायतनपूजायां प्राथम्येन सूर्यपूजाया विहितत्वात् प्रथमं सूर्यपूजामाह। सम्यगिति। नले सूर्यकान्तमणिरूपं सुवर्णादिघटितप्रतिमारूपं वाऽर्कं सम्यक् श्रौतस्मार्तमार्गेण अर्हणं त्वरारहितं सावधानतया चिरकालं अर्चति सति अमुना सूर्येण कर्णो राधेयो भक्तिगन्धः अल्पा भक्तिर्यस्य तादृश अकलि अज्ञायि, सूर्यभक्तोऽपि कर्णो नलापेक्षया अतिहीन एवेति सूर्येण अन्तर्निश्चित इत्यर्थः। तथा नले अर्कं शनैरर्चति सति अम्बरमणिः सूर्यः श्रीकृष्णपुत्रं साम्बं अन्तःकरणे श्रद्दधानहृदयं प्रति श्रद्दधानहृदयमात्रं निरचैषीत् निश्चितवान्। साम्बोऽपि भक्ततया प्रसिद्धोऽप्यल्पश्रद्धावान्न तु नलवदत्यन्तभक्त इति निश्चिकायेत्यर्थः। उभाभ्यामपि सकाशान्नलस्य सूर्ये महती भक्तिरभूदिति भावः। अर्चतीत्यचौरादिकादर्चतेः शता। भक्तिगन्धि अल्पाख्यायां (पा०५।४।१३६) इति गन्धस्य इत्। हृदयं प्रति सुप्रतिना मात्रार्थे (पा०२।१।९) इत्यव्ययीभावः॥ ३२॥

तत्तदर्थ्यमरहस्यजपेषु
स्त्रुङ्मयः शयममुष्य बभाज।
रक्तिमानमिव शिक्षितुमुच्चै-
रक्तचन्दनजबीजसमाजः ॥ ३३ ॥
हेमनामकतरुप्रसवेन
त्र्यम्बकस्तदुपकल्पितपूजः।

तदिति। तेषामर्थ्यसम्बन्धिनां रहस्यानां श्रौतस्मार्तमन्त्राणां जपेषु उपांशुमन्त्रावृत्तिषु विषये स्त्रुङ्मयो जपमालिकारूपः रक्तचन्दनकाष्ठजानां कृतच्छिद्रमणीनां फलमध्यवर्त्तिबीजानां वा समाजःसमूहः जपतोऽमुष्य नलस्य शयं हस्तं बभाज सिषेवे। उत्प्रेक्षते। तत्करे वर्त्तमानं उच्चैरतिशयितं रक्तिमानं रक्तत्वं शिक्षितुमिव। अन्योऽपि शिष्य उपाध्यायं सेवत एव। रक्तचन्दनबीजजपमालिकाजापेन सौरमन्त्राणां शीघ्रफलदत्वात् सौरमन्त्रान् रक्तचन्दनमालिकया जजापेत्यर्थः। स्त्रुङ्मयः एकाचत्वान्मयट्॥ ३३ ॥

इदानीं श्लोकाष्टकेन हरपूजामाह हेमेति। हेमनामकधत्तूरस्य तरोः प्रसवेन विकसितकुसुमेन कृत्वा तेन नलेन उपकल्पिता पूजा यस्य स त्र्यम्बको राजितः शुशुभे। उत्प्रेक्षते। कयेव। रतीशं युधि विजित्य बलात् आत्तया गृहीतया कुसुमरूपया काहलया धत्तूरपुष्पाकारवाद्यविशेषेणेव, कुसुमकाहलयोपलक्षित इवेति वा। शराणां कौसुमत्वाद् वादित्राणामपि कौसु-

आत्तया युधि विजित्य रतीशं
राजितः कुसुमकाहलयैव ॥ ३४ ॥
अर्चयन् हरकरं स्मितभाजा
नागकेसरतरोः प्रसवेन।

मतया युक्तत्वात् कामकाहलायाः कौसुमत्वमुचितमेव। पराभूतात् कामाद्बलात् गृहीतया कौसुमकाहलयेव धत्तूरपुष्पेण राजत इत्यर्थः। अन्योऽपि शत्रुं जित्वा बलाद् गृहीतेन छत्रवादित्रादिना शोभते सौन्दर्य्येण स्वस्पर्द्धितया स्वस्य शिवभक्ततया कामस्य च शिवविरोधित्वात् स्वविरोधिनं स्वामिविरोधिनञ्च स्मरं रणे जित्वा तस्माद्बलात्तेनैव गृहीतया कुसुमकाहलया धत्तूरपुष्पेण कृत्वा नलेन उपकल्पितपूजः शुशुभे। सेवको हि स्वविरोधिनं स्वस्वामिविरोधिनञ्च रणे जित्वा तच्छत्रवादित्रादिबलाद् गृहीत्वा स्वामिन उपढौकयति तेन च स्वामी शोभते इति वा। प्रियतरेण धत्तूरपुष्पेण स राजा नलः शिवमपूजयदिति भावः। धत्तूरः कनकाह्वय इत्यमरः। वाद्यभाण्डविशेषे तु काहलेति विश्वः ॥ ३४ ॥

अर्चयन्निति। स्मितं विकासं भजते स्मितभाक् तेन विकसितेन नागकेसराख्यस्य तरोः प्रसवेन पुष्पेण कृत्वा हरकरं सुवर्णादिघटितदक्षिणमूर्त्यादिशिवप्रतिमापाणिं अर्चयन् पूजार्थं स्थूलतरं शुभ्रतरं केसरतरुकुसुमं तत्पाणौ स्थापयन् सोऽयं नलः तिरश्चा दिशः तिर्य्यग्वर्त्तमानप्राच्यादिदिगष्टकान्

सोऽयमापयदतिर्य्यगवाग्दिक्-
पालपाण्डुरकपालविभूषाम् ॥ ३५ ॥
नीलनीरुहमाल्यमयीं स
न्यस्य तस्य गलनालविभूषाम् ।
स्फाटिकीमपि तनुं निरमासी-
न्नीलकण्ठपदसान्वयतायै ॥ ३६ ॥

अवाच्या अधोदिशः सकाशाचान्या अतिर्य्यगवाग्दिक् ऊर्द्धा तस्याः पालो रक्षको ब्रह्मा तस्य चिरकालघर्षणाद्गतकान्तिं पाण्डुरं धवलं शिरः तेन ब्रह्मकपालेन कृत्वा विभूषां अलङ्कृतिं कपालरूपां विभूषां आपयत् अलम्भयत्। हरेण ब्रह्मणः पञ्चमं शिरः छिन्नं तत्प्रायश्चित्तं कुर्व्वतो हरस्य भिक्षार्थं करे तिष्ठति ततश्च तत्प्रतिमायामपि तेन भवितुं युक्तमिति नागकेसरपुष्परूपेण ब्रह्मकपालेन तत्करमलञ्चकारेत्यर्थः। चाम्पेयः केशरो नागकेसरः काञ्चनाह्वय इत्यमरः। हरकरमर्चनापेक्षया कर्म्मत्वम्, पक्षे आप्नोतेर्गत्यर्थत्वादणौ कर्त्तुर्णौ कर्म्मत्वं। तिर्य्यगवागिति अव्ययं तिर्य्यगवाक्वासौ दिक् च वा इति समासः॥ ३५ ॥

नीलेति। स नलः तस्य हरस्य स्फाटिकनिर्म्मितामपि तनुं हरप्रतिमां नीलनीरुहाणां माल्यं माला तन्मयीं गलनालः कण्ठः तस्य विभूषां भूषणं न्यस्य आवध्य नीलकण्ठवाचकं यत्पदं तस्य सान्वयतायै अन्वयसाहित्याय नीलः कण्ठो यस्येति सम्बन्धसार्थक्याय निरमासीत् निर्म्मितवान्। नीलोत्पलमालां कण्ठे

प्रीतिमेष्यति कृतेन ममेह-
कर्म्मणा पुररिपुर्मदनारिः।
तत्पुरः पुरमतोऽयमधात्ती-
द्धूपरूपमथ कामशरञ्च ॥ २७ ॥

बध्वा स्फाटिकीमपि शिवप्रतिमां नीलकण्ठपदसंहितामकरो-दित्यर्थः। कण्ठे एव नीलोत्पलपूजां चकार अन्यत्र तु चन्द-नश्वेतपुष्पादिभिः पूजितवानिति भावः ॥ २६ ॥

प्रीतिमिति। पुराणां दैत्यविशेषाणां रिपुस्तथा मदनस्य अरिः शिवः मम कृते ईदृशा कर्म्मणा पुरकामशरदाहरूपव्या-पारेण प्रीतिमेष्यति प्रसन्नो भविष्यति। अतो हेतोरिव इति वुध्येव अयं नलस्तस्य पुररिपोः कामारेः पुरः धूपस्वरूपं अथच धूप-वेषधारिणं पुरं गुग्गुलं अधाक्षीत् ददाह। अथ च तद्दाहानन्तरं धूपविशेषरूपं कामशरञ्च ददाह यस्यारिर्यद्रिपुः शरस्य यदर्थे येन दह्यते स तस्मिन् प्रीयत एव। शिवभयेन वेषान्तरधारिणं पुरं दैत्यं कामवाणञ्च मोहनाख्यं ददाहेत्यर्थः। धूपसमर्पणान्तां शिवपूजामकरोदिति भावः। ईदृशपुष्पपूजां तेन भक्तियुक्तेनापि कर्म्मणा पुररिपुः कामारिः शिवो मम कृते मदर्थं मयि विषये प्रीतिं न यास्यति एतावताऽपि सन्तुष्टो न भविष्यति, अतः कारणादिव तदग्रे पुरं कामशरञ्च ददाह। एवं कृते सन्तुष्टो भविष्यतीति धियेति भाव इति वा। पुररिपुर्मदनारिः इति च योगस्यैवात्र प्राधान्याच्च पौनरुक्त्यं। गुग्गुलो कथितः पुर इति

तन्मुहूर्त्तमपि भीमतनूजा-
विप्रयोगमसहिष्णुरिवायं ।
शूलिमौलिशशिभीततयाऽभू-
द्ध्यानमूर्च्छननिमीलितनेत्रः ॥ ३८ ॥
दण्डवद्भुवि लुठन् स ननाम
त्र्यम्बकं शरणभागिव कामः ।

विश्वः । तत्पुरः शेषषष्ठीसमासः । अन्यथाऽव्ययेन सह षष्ठीसमासनिषेधः स्यात् । तदिति लुप्तषष्ठीकविभक्तिप्रतिरूपकमव्ययं, पृथक् पदं वा ॥ ३७ ॥

तदिति । तन्मुहूर्त्तं तस्मिन् देवपूजाचणेऽपीत्यर्थः । भीमतनुजायाः विप्रयोगमसहिष्णुरयं नलः शूलिमौलौ वर्त्तमानाच्छशिनो भीततयेव त्रिनेत्रध्यानेन यन्मूर्च्छनं एकाग्रतालक्षणः प्रलयः तेन हेतुना निमीलिते सङ्कोचितपक्ष्मीकृते नेत्रे येनैवम्भूतोऽभूत् । विरहित्वाद् हरशिरश्चन्द्रदर्शनस्य नितरां सन्तापकारित्वभिया ध्यानमूर्च्छनव्याजेन नेत्रे निमीलितवानित्यर्थः । पूजानन्तरं शिवस्य ध्यानं चकारेति भावः । शूलधारिणाऽपि यः शिरसि धृतः तस्मादधिकभयं सूचयितुं शूलिपदं प्रायोजि । तन्मुहूर्त्तं कालाध्वनोरत्यन्तसंयोगे (पा० २।३।५) इति द्वितीया । विप्रयोगं न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्द्वितीया ॥ ३८ ॥

दण्डवदिति । स नलो दण्डेन तुल्यं साष्टाङ्गयोगेन भुवि

आत्मशस्त्रविशिखासनबाणान्
न्यस्य तत्पदयुगे कुसुमानि ॥ ३९ ॥
त्र्यम्बकस्य पदयोः कुसुमानि
न्यस्य सैष निजशस्त्रनिभानि।
दण्डवद्भुवि लुठन् किमु काम-
स्तं शरण्यमुपगम्य ननाम ॥ ४० ॥

लुठन् सन् त्र्यम्बकं ननाम। किं कृत्वा। तस्य हरस्य पदयुगे पुष्पाञ्जलिदानार्थमञ्जलिना धृतानि कुसुमानि न्यस्य समर्प्य। तच्चोत्प्रेक्ष्यते। तान्येव कुसुमानि आत्मनः शस्त्रं खड्गादि, विशिखासनं धनुः, बाणान् स्वशस्त्रभूतानि पुष्पाणि तस्य हरस्य पदयुगे न्यस्य समर्प्य शरणभाक् काम इवाद्यप्रभृतिशस्त्रं न धारयामि दासोऽस्मि मच्छस्त्राणि त्वमेव गृहाणेत्यादिवचनपूर्वकं चरणयुगसमीपे स्वशस्त्राणि कुसुमानि परित्यज्य दण्डवद्भुवि लुठन् सदा रक्षेत्यादि वदन्, शरणं रक्षितारं शिवमेव भजमानो रूपसाम्यात् काम इव ध्यानानन्तरं पुष्पाञ्जलिदानपूर्वकं भक्त्यतिशयेन दण्डवत् प्रणाममकरोदित्यर्थः। विशिखासनं तूणीरं वा। अन्योऽपि शरणागत एवमेव करोति ॥ ३९ ॥

त्र्यम्बकेति क्षेपकः। सैष इत्यत्र सोऽचिलोपे चेदिति (पा० ६।१।१३४) सुलोपः। पूर्वश्लोकोक्त एवार्थः ॥ ४० ॥

व्यापृतस्य शतरुद्रियजप्तौ
पाणिमस्य नवपल्लवलीलं।
भृङ्गभङ्गिरिव रुद्रपराक्ष-
श्रेणिराश्रयत रुद्रपरस्य ॥ ४१ ॥
उत्तमं स भजति स्म महोग्मन्
पूरुषं पुरुषसूक्तविधानैः।

व्यापृतेति। रुद्रशब्दात् परेषां पश्चादुच्चार्य्यमाणानां रुद्राक्षाणामित्यर्थः। रुद्रः परो दैवतं येषां वा रुद्रपराः शिवभक्ताः तत्सम्बन्धिनां तैर्धार्य्यमाणानामिति यावत्। तादृशानाञ्च अक्षाणां मणीनां श्रेणिर्माला भृङ्गभङ्गिर्भ्रमरपङ्क्तिरिवास्य नलस्य नवपल्लवलीला यस्य तत्सदृशमित्यर्थः। एवंविधं पाणिं करं आश्रयत, सिषेवे। किम्भूतस्य। रुद्रपरस्य शिवभक्तस्य अत एव शतं रुद्रा देवता अस्य,शतरुद्रसम्बन्धिनः शतरुद्रियसञ्ज्ञस्य"नमस्ते" इत्यादिशिवसूक्तस्य जप्तौ जपे विषये व्यापृतस्य सव्यापारस्य, रुद्राक्षाणां रुद्रप्रियत्वान् नमस्त इत्यादिषडङ्गरुद्रजपं रुद्राक्षजपमालया चकारेत्यर्थः। भृङ्गमालाऽपि नवपल्लवं सेवते। शतरुद्रियेत्यत्र शतरुद्राद्घश्चेति वक्तव्यात् (पा० ४।२।२८वा०) घः। जप्तौ तितुत्रेति (पा० ७।२।९) इड् निषेधः। "पद्माक्षैश्चैव रुद्राक्षैः"इत्यादि हारीतोक्तो हरोक्तश्च जपमालाविधिर्द्रष्टव्यः। अणिमादिसिद्धये पद्माक्षैश्चैव रुद्राक्षैरिति ज्ञातव्यं॥ ४१ ॥

उत्तममिति। स महोग्मनलः उत्तमं पूरुषं पुरुषोत्तमं

द्वादशापि च स केशवमूर्त्ती-
र्द्वादशाक्षरमुदीर्य्य ववन्दे ॥ ४२ ॥

पुरुषसूक्तस्य सहस्रशीर्षेत्यादिषोडशर्चां विधानैरनुष्ठानप्रकार-विशेषैः।

"दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा।
अर्चितं स्याज्जगदिदं तेन सर्व्वं चराचरं ॥
आनुष्टुभस्य सूक्तस्य त्रिष्टुभस्तस्य देवताः।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः" ॥

तथा। "ॐकारपूर्व्वकैश्चैव सर्व्वैर्मन्त्रैः पृथक् पृथक्।
आवाहनासनं पाद्यमर्घ्यमाचमनीयकं ॥
स्नानं वस्त्रोपवीतञ्च गन्धमाल्यादि च क्रमात्।
धूपं दीपञ्च नैवेद्यं नमस्कारं प्रदक्षिणं।
षोडशोद्वासनं कुर्य्यादेष नारायणो विधिः" ॥

इत्यादिस्मृतिवाक्यविहितप्रत्यृक्क्रमं निर्द्दिष्टषोडशोपचारैर्महति स्म अपूजयत्। तथा स नलः "यवादेसुवातेवगभमोन" इति व्युत्क्रमोक्तं द्वादशाक्षरं वासुदेवमन्त्रं वैष्णवागमोक्तक्रमेण उदीर्य्य सम्यगुच्चार्य्य द्वादशापि केशवसम्बन्धिनीर्मूर्त्तीर्व्विष्णवो द्वादशशा-लग्रामशिलामूर्त्तीर्विवन्दे तुष्टाव प्रणनाम वा ता अप्यपूजय-दिति भावः।

"शिला द्वादश भो वैश्य शालग्रामसमुद्भवाः।
विधिवत् पूजिता येन तस्य पुण्यं वदामि ते ॥

कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः।
यत्स्याद्द्वादशकल्पेषु दिनेनैकेन तद्भवेत्" ॥

इति विष्णुपुराणादिति भावः। पूर्वोक्तद्वादशाक्षरमन्त्रार्थ्य द्वादशसङ्ख्याका अपि केशवसम्बन्धिनोर्मूर्त्तीः सामर्थ्यादेतन्मन्त्राक्षरक्रमसूचिताः। "ॐ केशवाय धात्रे नमः" इति प्रकारेण

"द्वादशादित्यसहिता मूर्त्तीर्द्वादश विन्यसेत्।
केशवाद्याःक्रमाद्देहे वक्ष्यमाणविधानतः ॥
ललाटे केशवं धात्रा कुक्षौ नारायणं पुनः।
अर्य्यम्णा हृदि मित्रेण माधवं कण्ठदेशतः ॥
वरुणेन च गोविन्दं पुनर्दक्षिणपार्श्वके।
अंशुना विष्णुमंसस्थे भगेन मधुसूदनं ॥
गले विवस्वता युक्तं त्रिविक्रममनन्तरं।
वामपार्श्वस्थमिन्द्रेण वामनाख्यमथांसके ॥
पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतं।
हृषीकेशाह्वयम्पृष्ठे पद्मनाभं ततःपरं ॥
त्वष्ट्रा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत्।
द्वादशार्णमहामन्त्रं ततो मूर्द्ध्नि प्रविन्यसेत्" ॥

द्वादशाक्षरमन्त्रगर्भितमिति ज्ञातव्यं। इति प्रकारान्तरमागमोक्तं द्रष्टव्यं। महीयानिति पाठे नितरामागमशास्त्रकोविदः परमभक्तश्चेत्यर्थः। पुरुषाः पूरुषा नराः, इत्यमरः ॥ ४२ ॥

मल्लिकाकुसुमदुण्डुभकेन
स भ्रमीवलयितेन कृते तं।
आसने निहितमैचत साचात्
कुण्डलीन्द्रतनुकुण्डलभाजं॥ ४२॥
मेचकोत्पलमयी वलिबन्धु-
स्तदलिस्रगुरसि स्फुरति स्म।

कथमप्यपूजदित्याह। मल्लिकेति। स नलो भ्रमीभिर्भ्रमणैर्वेष्टनैर्वलयितेन वलयाकारीभूतेन मल्लिकाकुसुमसम्बन्धिना दुण्डुभकेन निर्विषनिष्फणस्थूलराजिलतुल्येन घनस्थूलतरदाम्ना कृत्वा नलेनैव कृते रचिते आसने निहितं स्थापितं तं पुरुषोत्तमं साचात् तत्त्वतः कुण्डलिनां चक्षुःश्रवसामिन्द्रः शेषस्तस्य तनुः शरीरं तस्य कुण्डलं पुच्छवेष्टितवलयाकारशरीरभागं तद्भजत इति कुण्डलाकारे शेषशरीरे वर्त्तमानमैचत। दुण्डुभस्य विफणतया साम्यात् स्थूलघनतरे पुष्पदाम्नि दुण्डुभपदं लाचणिकं। दुण्डुभप्रतिकृतिर्दुण्डुभकः। इवेति प्रतिकृताविति (पा० ५।३।९६) कन्। दुडि निमज्जने दुण्डतीति दुण्डुभ इत्यौणादिकः पृषोदरादिर्वा॥ ४२॥

मेचकेति। मेचकोत्पलानि नीलोत्पलानि तन्मयी तेन, नलेन समर्पिता वलिस्रक् पूजामाला वलिबन्धुः वलेर्बन्धनकारिणः श्रीविष्णोरुरसि स्फुरति स्म, अशोभत। उत्प्रेचते। कौस्तुभाख्यमणेः सम्बन्धि कुट्टिमं कौस्तुभमणिबद्धा भूः वक्षोलक्षणं

कौस्तुभाख्यमणिकुट्टिमवास्तु-
श्रीकटाक्षविकटायितकोटिः ॥ ४४ ॥
स्वर्णकेतकशतानि स हेम्नः
पुण्डरीकघटनां रजतस्य।
मालयाऽरुणमणेः करवीरं
तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥ ४५ ॥

तद् वास्तु वसतिस्थानं यस्यास्तस्या श्रियः कटाक्षाणां विकटायितानि विस्तारान्नीलतरनेत्रगोलकवक्रत्रिस्फुरितकिरणास्तेषां कोटिःपरम्परेव। नीलोत्पलमालायाः वक्षस्येव वर्त्तमानत्वात् तत्रैव च लक्ष्म्या अपि वर्त्तमानत्वात् साम्यं। तत्कटाक्षविकटायितकोटिरिव अशोभत इति प्रतीयमानोत्प्रेक्षा। वलिबन्धुः इति पूर्व्वेण द्वितीयेति योगविभागात् समासः। विकटायितं आचारक्विबन्तत्वाद्भावे निष्ठा ॥ ४४ ॥

स्वर्णेति। स नलः तस्य पुरुषोत्तमस्य मूर्ध्नि हेम्नः सुवर्णघटितपुष्पाणां मालया कृत्वा स्वर्णकेतकीपुष्पाणां शतानि,तथा रजतस्य रूप्यघटितपुष्पाणां मालया कृत्वा पुण्डरीकाणां सिताम्भोजानां घटनां समर्पणां, तथाऽरुणमणेः समर्पितमाणिक्यपद्मरागादिरक्तवर्णमणीनां मालया च कृत्वा करवीरपुष्पाणि एतत् सर्व्वं पुनरुक्तमकार्षीत्। सुवर्णनान्येनैव पूजायाः सिद्धत्वात् स्वर्णकेतकादिनिरर्थकं चकारेत्यर्थः। स्वर्णकेतकादिभिः सुवर्णघटितपुष्पादिभिश्च श्रीपुरुषोत्तममपूजयदिति भावः। विष्णुपूजायां

नाल्पभक्तबलिरन्ननिवेद्यै-
स्तस्य हारिणमदेन स कृष्णः।
शङ्खचक्रजलजातवदर्च्चः
शङ्खचक्रजलपूजनयाऽभूत् ॥ ४६ ॥

कमलकरवीरजपावाणपुष्पव्यतिरिक्तानां रक्तपुष्पाणां निषेधः। तद्धारोपितकरवीरकुसुमपूजानिषेध इत्यविरोधः। पुनरुक्तं नपुंसकमनपुंसकेन (पा०१।२।६९) इत्येकशेषैकवद्भावौ ॥ ४५ ॥

नाल्पेति। स पुरुषोत्तमः तस्य नलस्यान्ननिवेद्यैः तेन समर्पितैर्नानाविधौदनानामुपहारैः कृत्वा नाल्पोऽतिमहान् भक्तबलिः, ओदनोपहारो यस्य, अथ च अतिमहान्भक्तःश्रद्धापरो बलिर्वैरोचनिर्यस्यैवम्भूतोऽभूत्। तथा नलसमर्पितेन हारिणमदेन कस्तूर्या कृष्णवर्णोऽय च कृष्णनामाऽभूत्। तथा हेमरूप्यादिवद्धदक्षिणावर्त्तादिशङ्खानां चक्रं समूहस्तत्र स्थितेन जलेन कृत्वा या पूजना अभिषेकार्घ्यदानादिरूपा तया कृत्वा शङ्खचक्रजलेन जातवती सम्पन्नाऽर्चा पूजा यस्य, अथ च शङ्खःपाञ्चजन्यः, चक्रं सुदर्शनं जलजातं पद्मं तानि निवेद्यन्ते यस्यास्तादृशी शङ्खचक्रपद्मयुक्ताऽर्चा प्रतिमा यस्यैवम्भूतोऽभूत्। पुरुषोत्तमसम्बन्धिनामेतेषां शब्दानामन्वर्थत्वं। एतत्कृतान्ननैवेद्यादिसमर्पणेन इदानीमभूदित्यर्थः। एतन्निबन्धना एवास्य एताः सञ्ज्ञा इति वा। अत्र प्रतीयमानोत्प्रेक्षा। प्रतिकृतिरर्चा पुंसि इत्यमरः। नाल्पेति न समासः। हारिणेऽपि सम्बन्धेऽण् ॥ ४६ ॥

राज्ञि कृष्णलघुधूपजधूमाः
पूजयत्यहिरिपुध्वजमस्मिन् ।
निर्ययुर्भवधृता भुजगा भी-
दुर्यशो मलिनिता इव जालैः ॥ ४७ ॥
अर्घनिस्वमणिमाल्यविमिश्रैः
स्वैरजातिमयदामसहस्रैः ।
तं पिधाय विदधे वसुरत्न-
क्षीरनीरनिधिमग्नमिवैषः ॥ ४८ ॥

राज्ञीति। कृष्णलघु कृष्णागुरुः तस्य धूपजधूमा धूपकरण-सम्बन्धिनो धूमा अस्मिन् राज्ञि नलेऽहिरिपुर्गरुडो ध्वजे यस्य तं गरुडध्वजं धूपोपचारेण पूजयति सति जालैर्गवाक्षैर्वहिर्निर्ययुः। उत्प्रेक्षते। भीरेव दुर्यशो गरुडासक्तिः भयजन्येन अयशसा खतो धवलतरा अपि मलिनिताः श्यामीकृता देवतागारस्थितेन भवेन हरेण स्वदेहे भूषणत्वेन धृता वासुकिप्रमुखा भुजगा इव। अयमस्मद्रिपुकेतुं याजयति, अतो रिपुनिकटे स्थातुमयुक्तमिति हराश्रिताः सबला अपि सर्पा दुर्यशोमलिनिता इव दण्डायमानकृष्णागुरुधूमव्याजेन जालैर्निर्ययुरित्यर्थः। अन्योऽपि भीमलिनो जालादिद्वारेण निर्गच्छति। अगुरुपर्यायो लघुशब्दः तेन कृष्णागुरुरित्यर्थः ॥ ४७ ॥

अर्घेति। एष नल अर्घेन मूल्येन निस्वा दरिद्रास्तेषां अत्युत्तमानां मणीनां माल्यैर्मालाभिर्विमिश्रैः स्वैरजातिम-

अक्षसूत्रगतपुष्करवीज-
श्रेणिरस्य करसङ्गमेत्य।
शौरिसूक्तजपितुः पुनरापत्
पद्मसद्मचिरवासविलासं॥ ४९॥

यदामभिरसौ विकसितमालतीकुसुममालाभिरसौ तं पुरुषोत्तमं पिधाय आच्छाद्यैव बहूनि रत्नानि यस्मिन् एवम्भूतो यः क्षीरनीरनिधिस्तत्र मग्नमिव विदधे चकार। मध्ये मध्ये मणिमालाभिर्मध्ये पुष्पमालाभिः सवेष्ट्य बहुरत्नक्षीरसमुद्रशायिनमिव चकारेत्यर्थः। रत्नस्थाने रत्नान्येव क्षीरस्थाने च तानि दामानि ते राशिभिः पर्य्यपूपुजदिति भावः। समुद्धतिशयो भक्त्यतिशयश्च सूचितः। बहूनि रत्नानि क्षीराणि च यस्मिन् स चासौ निधिश्चेति वा॥ ४८॥

अक्षेति। अक्षसूत्रजपमालां तां गतानि प्राप्तानि तत्र विद्यमानानीति यावत्। ईदृशानि यानि पुष्करवीजानि कमलवीजानि तेषां श्रेणिः पद्माक्षरचिता जपमालिका शौरिसूक्तजपितुः "विष्णोर्नुक" इत्यादिविष्णुसूक्तजपशीलस्य अस्य नलस्य करसङ्गं पाणिपद्मसम्बन्धमेत्य प्राप्य पुनरपि पद्मरूपे सद्मनि स्वगृहे चिरं वासः स्थितिस्तेन कृत्वा यो विलासः शोभा तं आपत्, प्राप। विष्णुमन्त्रा हि पद्माक्षमालया जप्यन्ते नलकरस्य पद्मसदृशः तत्सम्बन्धात् पद्माक्षमाला पुनरपि पद्मसद्मनिवासं प्राप्तेवेति प्रतीयमानोत्प्रेक्षा। पुष्कराणि दृशापि चैत्य-

कैटभारिपदयोर्नतमूर्द्ना
सञ्जिता विचकिलस्रगनेन।
जह्नुजेव भुवनप्रभुणाऽभात्
सेविताऽनुनयताऽऽयतमाना ॥ ५० ॥

मरः। जयितुः ताच्छील्ये ष्टनि द्वितीयेति योगविभागात् पूर्व्वेण समासः ॥ ४८ ॥

कैटभेति। अनुनयता अर्थादात्मानमेव चरणसमीपं प्रापयता भुवनप्रभुणा लोकनाथेन नतमूर्द्ना नम्रशिरसा प्रणामलचणं षोडशमुपचारं कुर्व्वता अनेन नलेन कैटभारेः श्रीविष्णोः पदयोः सञ्जिता पुष्पाञ्जलिलेन समर्पिता आयतमाना अतिदीर्घा विचकिलस्रक् मल्लिकामाला जह्नुजा गङ्गेवाभात्। चरणसम्बन्धादतिदैर्घ्यादुज्ज्वलतरत्वाच्च गङ्गेव शुशुभ इत्यर्थः। साप्येवंविधा। अथ च अन्याऽपि मानिनी नायिका एवंविधा प्रियेणैवमनुनीयते। अथ च भूलोकं प्रति गमनार्थं यतमाना सप्रयत्ना अतएवानु पश्चान्नयता परावर्त्त्य पुनरपि ब्रह्मलोकं प्राप्य पुनरागन्तव्यमिति प्रार्थयमानेन नतमूर्द्ना लोकनाथेन ब्रह्मणा सेविता जाह्नवीव। भुवनप्रभुणा रुद्रेण वा उक्तविशेषणविशिष्टेन जलप्रभुणा वरुणेन समुद्रेण वा सेवितेति वा। प्रणामान्तां षोडशोपचारपूजां समापयदिति भावः। स्रजेति विचकिलो मल्लीप्रभेदे मदनेऽपि चेति विश्वः ॥ ५० ॥

स्वानुरागमनघः कमलायां
सूचयन्नपि हृदि न्यसनेन।
गौरवं व्यधित वागधिदेव्याः
श्रीष्टचोर्ध्वनिजकण्ठनिवेशात्॥ ५१॥
इत्यवेत्य वसुना बहुनाऽपि
प्राप्नुवन्न मुदमर्चनया सः।
सूक्तिमौक्तिकमयैरथ चारै-
र्भक्तिमैहत हरेरुपचारैः॥ ५२॥

स्वेति। इतीति युग्मं। स नलः इति पूर्वोक्तं श्रीविष्णोर भिप्रायमवेत्य ज्ञात्वा बहुनाऽपि वसुना स्वर्णमणिवसनादिना लक्ष्मीस्थानीयेन समर्पितेन कृता या अर्चना तया मुदं न प्राप्नुवन् हर्षमलभमानः। अथ पश्चात् सूक्तैर्ये सरसशोभनप-दबन्धास्तद्रूपाणि मौक्तिकानि तन्मयैश्चारैरेकावल्यादिहारैरेव उपचारैः पूजनैः कृत्वा भक्तिमैहत तेन हरेर्भक्तिर्मैहती कृते-त्यर्थः। सम्यग्वैदिकपूजनं कृत्वा श्रीपुरुषोत्तमदशावतारादि-स्तुतिं प्रारेभ इति भावः। इति किम्। न विद्यते अघं दुःखं पापं दारिद्र्यञ्च यस्मात् सोऽनघः पुण्यश्लोकः श्रीविष्णुः हृदि न्यसनेन स्थापनेन कृत्वा कमलायां लक्ष्म्यां विषये स्वस्यानु-रागं प्रेमभरं तां प्रति लोकं प्रति वा सूचयन्नपि श्रीष्टचा-च्चिजपदयादूर्ध्वमुपरिभागे वर्त्तमानो निजकण्ठस्तत्र निवेशात् स्थापनाद्धेतोः वागधिदेव्याः सरस्वत्या गौरवं व्यधित बहुम-

दूरतः स्तुतिरवाग्विषयस्ते
रूपमस्मदभिधास्तव निन्दा।
तत् क्षमस्व यदहं प्रलपामी-
त्युक्तिपूर्व्वमयमेतदवोचत् ॥ ५३ ॥

स्नानमकृत। अन्योऽपि राजादिः एकां प्रियामधोभागे स्थापयन्नालिङ्गनादिना सम्भावयन्नन्यां तत्सपत्नीं प्रियतमां तदीयवक्षस्थोर्द्ध्वदेशे स्थापयन् कण्ठाश्लेषञ्च कुर्व्वंस्तस्या गौरवं करोति। तथा विष्णोर्वक्षसि लक्ष्मीः तिष्ठति तदुपरिभागे कण्ठे सरस्वती तिष्ठति विष्णोः सरस्वत्यां गौरवमधिकमिति ज्ञात्वा सरस्वत्या कृत्वा स्तुतिश्चक्रे इत्यर्थः। मौक्तिकरूपमूर्त्तेर्नैर्मल्यं सूच्यते। स्तुत्या नलस्य भक्त्यतिशयश्च ॥ ५२ ॥
॥ ५२ ॥

स्वमौद्धत्यं परिहरन् स्तुतिमाह। दूरत इति। अयं नलः इत्युक्तिपूर्व्वं यथातथा पूर्व्वमेवमुक्त्वा एतद्वक्ष्यमाणप्रकारमवोचत्। इति किं। हे स्वामिन् ते तव स्तुतिर्दूरतो नितरां अवाग्विषयो वाचामगोचरो यतस्तव रूपं "यतो वाचो निवर्त्तन्ते" इत्यादि श्रुतेर्यद्गोचरो नेति मदीया स्तुतिः कथङ्कारं कर्त्तुं शक्या स्वरूपकथनेऽप्यशक्यत्वात् तव स्तुतिरप्यशक्यकरणैवेअत एवास्माभिः कृताऽभिधा भवद्गुणवर्णनविषया वाणी तव निन्दैव। अत्यन्ताल्पकत्वावकत्वादवाग्गोचरस्यापि वा गोचरकरणाच्चेत्यर्थः। एवं सत्यपि मूर्खतया यदहं प्रलपामि स्वरू-

स्वप्रकाश जड एष जनस्ते
वर्णनं यदभिलष्यति कर्त्तुं।
नन्वहर्पतिमहः प्रति स स्या-
न्न प्रकाशनरसस्तमसः किं ॥ ५४ ॥
नैव वाङ्मनसयोर्विषयो भू-
स्त्वां पुनर्न कथमुद्दिशतां ते।

पाशानान्निरर्थकं वदामि तत् क्षमस्वेति। प्रसादयामीत्यनेन नि-
तरामनौद्धत्यं सूचितं ॥ ५३ ॥

स्वेति। ननु हे स्वप्रकाश सूर्यादिवत्प्रकाशान्तरनिरपेक्ष परमात्मन्, एष मल्लक्षणो जडोऽविद्याच्छादितचैतन्यो जनस्ते वर्णनं कर्त्तुं यदभिलषति सोऽहर्पतेः सूर्यस्य महस्तेजः प्रति लक्षीकृत्य सूर्यतेजोऽहं प्रकाशयिष्यामीति तमसोऽन्धकारस्य प्रकाशने रसोऽनुरागः किं न स्यात्, अपि तु स्वप्रकाशस्य तव वर्णनं जडस्य ममाभिलाषः सूर्यतेजःप्रकाशने तमसोऽभिलाष इवात्यन्तमनुचित एवेत्यर्थः। आत्मा स्वप्रकाश इति वेदान्त-सिद्धान्तः ॥ ५४ ॥

ननु यदि त्वं जडो मदीयं स्वरूपं न जानासि तर्हि त्वदीये वाङ्मनसी कथं मत्परायणे इत्याशङ्कां परिहरन् स्तुत्यवसरं दातुमाह। नैवेति। हे भगवन् त्वं "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादिश्रुतिप्रामाण्याद्वाङ्मनसयोर्विषयो गोचरो नैव भूः ताभ्यां वक्तुं न शक्यम एव यद्यपि तथापि ते

उत्काचातकयुगस्य घनः स्यात्
तृप्तये घनमनाप्नुवतोऽपि ॥ ५५ ॥
छद्ममत्स्यवपुषस्तव पुच्छा-
स्फालनाज्जलमिवोद्गतमब्धेः ।

वाङ्मनसे पुनस्त्वां कथं नोद्दिशतां, अपि तु अविषयमपि त्वामुद्दिश्य प्रवर्त्ततामेवेत्यर्थः। दृष्टान्तमाह। अतिदूरवर्त्तित्वात् घनं मेघं अनाप्नुवतोऽलभमानस्यापि उत्कस्य जलार्थमुत्कण्ठितस्य चातकस्य स्त्रीपुंसयुगस्य घनो मेघो जलदानेन तृप्तये स्यादेवेति दृष्टान्तेन अविषयोऽपि भवान् स्तुतो ध्यातश्च मोक्षहेतुः स्वयमेवानुग्रहीष्यतीति तव स्तुतिं कर्त्तुं युक्तमेवेति भावः। वाङ्मनसयोः अचतुरेत्यादिना (पा० ५।४।७७) साधुः ॥ ५५ ॥

इदानीं प्रथमं मत्स्यावतारं स्तोतुमाह। छद्मेति। हे हरे शङ्खासुरापहृतवेदोद्धरणरूपेण छद्मना मत्स्य एव वपुर्यस्य तस्य तव पुच्छेनास्फालनादाघातादूर्द्धमुद्गतं चिप्तमुच्छलितं अब्धेः सागरस्य जलमेव गगनाङ्गणस्य सङ्गात् सम्बन्धात् शैत्यं धवलतामेत्य प्राप्य विबुधालयस्य स्वर्गस्य गङ्गा मन्दाकिनी आविरस्ति प्रकटीभवति। तदेव जलं मन्दाकिनीभूय गगने स्फुरतीत्यर्थः। वेदरक्षणद्वारा लोकानुग्रहार्थमेव त्वया तत्तच्छरीरं धार्य्यते इति भावः। एवमुत्तरत्रापि ज्ञेयं। श्वैत्यमेवेति वाऽन्वयः। "यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत" इत्यादिश्रीकृष्णवचनमेव छद्मपदेन सूचितं। सागरोदकस्याश्रयो-

श्वैत्यमेत्य गगनाङ्गणसङ्गा-
द्याविरस्ति विबुधालयगङ्गा ॥ ५६ ॥
भूरिवृष्टिधृतभूवलयानां
पृष्ठसीमनि किणैरिव चक्रैः ।
चुम्बिताऽवतु जगत्स्थितिरक्षा
कर्म्मठस्य कमठस्तव मूर्त्तिः ॥ ५७ ॥

पार्थिवतया प्रतिभासमानस्यापि गगने चिरतया निरुपाधिकं शुक्लमेवापां रूपं प्रकटितमित्यनेनातिस्थूलतरशरीरवत्त्वं सूचितं। नदी चाद्यापि तथैव तिष्ठति न त्वधः पततीति सामर्थ्यातिशयः सूच्यते। यद्यपि नलः शैव इति प्रथा तथापि शिवस्य विष्णुभक्तत्वाद्विष्णुस्तुत्यैव च शिवस्य प्रीतिसम्भवादैकरूप्याच्च नलस्य विष्णुस्तुतिकरणं श्रीहर्षस्य च परमवैष्णवत्वात् पुरुषोत्तमस्तुतिनिबन्धनं युक्तमेवेति न काचिदनुपपत्तिः। अत एवोपसंहारेऽपि हरिहरं परिपूज्येत्युक्तं ॥ ५६ ॥

कूर्मं वर्णयति॥ भूरीति। हे भगवन् तव कमठभङ्ग्या मूर्त्तिर्जगदवतु। किम्भूता। भूरिषु वृष्टिषु धृतानां प्रतिसर्गभूवलयानां किणैः अतिघर्षणनिष्ठुरीभूतसञ्जातवैवर्ण्यत्वग्व्रणैरेव चक्रैः चक्राकाररेखाविन्यासविशेषैः पृष्ठसीमनि स्थले चुम्बिता स्पृष्टा। किम्भूतस्य। स्थितौ चये सन्नये रक्षायां च कर्मठस्य कर्मशूरस्य पृष्ठे धारणेन स्थितिरक्षणक्षमस्य। पृथ्वीधारणद्वारा लोकानुग्रहार्थमेव कमठरूपं त्वया धृतमिति भावः। सप्तपाता-

दिक्षु यत्खुरचतुष्टयमुद्रा-
मभ्युपैमि चतुरोऽपि समुद्रान्।
तस्य पोत्रिवपुषस्तव दंष्ट्रा
तुष्टयेऽस्तु मम वास्तु जगत्याः॥ ५८॥
उद्धृतिस्खलदिलापरिरम्भा-
न्नोमभिर्विदिरितैर्वरुद्दृष्टैः।

त्वान्तेऽधस्तात् फणिमण्डलेन शेषो भुवं बिभर्त्ति ततोऽप्यधो ब्रह्माण्डाधःकटाहस्य भारं पृष्ठे वहन् ब्रह्माण्डावरणरूपे जले कूर्म्मराजो वर्त्तत इति पुराणं। एतेन प्रतिसर्गमनन्तभूमण्डल-धारणेन अनिर्वाच्यमहिमत्वं सूचितं। कमठपृष्ठे च स्वभावतश्च-क्राणि भवन्ति॥ ५७॥

श्लोकद्वयेन वराहं वर्णयति॥ दिक्ष्विति। अहं चतसृषु प्राच्यादिदिक्षु चतुरोऽपि समुद्रान् यस्य वराहस्य खुराणां चतुष्टयस्य मुद्रां विन्यासं स्थापितचरणातिभारसञ्जातभूगर्भ-मेव अभ्युपैमि जाने। तस्य पोत्रिवपुषो महावराहदेहस्य तव दंष्ट्रा मम तुष्टये कामपूर्त्याऽऽनन्दाय अस्तु। किम्भूता दंष्ट्रा। जगत्याः पातालादुद्धरणावसरे दंष्ट्राग्रधारणाद् भूमेर्वास्तु व-सतिस्थानं धृतमभूदित्यर्थः। कोल.पोत्री किरिः किटिरित्य-मरः॥ ५८॥

उद्धृतीति। हे केल्या क्रीडामात्रेण कोल धृतवराहरूप भगवन् हिरण्याक्षं दैत्यं हत्वा पातालात् सकाशादुद्धृतौ उद्धु-

ब्राह्ममण्डमभवद्दलिनीयं
केलिकोल तव तत्र न मातः ॥ ५९ ॥
दानवाद्यगहनप्रभवस्त्वं
सिंह मामव रवैर्घनघोरैः।

रणसमये स्खलन्त्याः पतन्त्या इलाया भुवः परिरम्भात् समारम्भेण धारणात्, आलिङ्गनाच्च हेतोः बहु नितरां हृष्टैः उन्नतीभूतैः अत एव ब्रह्माण्डं निर्भिद्य बहिरितैर्निर्गतैर्लोमभिः कृत्वा ब्राह्ममण्डं तव वलेः पूजायाः सम्बन्धिनीयं तत्कालविकसितकदम्बकुसुममिव अभवत्। किम्भूतस्य। तत्र ब्रह्माण्डे स्थूलतरदेहत्वान्न मातः सम्मातुमशक्तस्य। एवंविधकुसुमपूजायोग्यस्त्वमेव भवसीत्यर्थः। अन्योऽपि योपिदालिङ्गनादुदितरोमाञ्चो भवति। ब्राह्मं जाताविति साधुः। मातः मामान इत्यस्माच्छता ॥ ५८॥

श्लोकद्वयेन श्रीनृसिंहं वर्णयति। दानवेति। हे नृसिंह दानवानामाद्यस्य प्रथमस्य हिरण्यकशिपोर्गहनं मरणरूपं सङ्कटं तदर्थं प्रभव उत्पत्तिःप्राकट्यं यस्य तन्मारणार्थं कृतावतारः, अथ च दानवो हिरण्यकशिपुः तद्रूपमाद्यं पुरातनं यद्गहनं वनं तत्र प्रभवो यस्य,पुरातने हि वने सिंहसम्भवो युक्तः,अथ च दानवानामाद्यभक्तः श्रीहरिभक्तत्वान्मुख्यः प्रह्लादस्तस्य गहने पितृकारितताडनादिदुःखनिमित्ते हिरण्यकशिपुविदारणद्वारा भक्तप्रह्लादसंरक्षणार्थं प्रतोत्पत्तिर्येन तादृशस्त्वं घनवन्मेघवद्घोरैर्गम्भीरैर्निर्विडैर्वापघोषैर्वा रवैः सिंहनादैर्मामव। किम्भूतः। घैरिपः

वैरिदारिदिविषत्सुकृतास्त्र-
ग्रामसम्भवभवन्मनुजार्द्धः ॥ ६० ॥
दैत्यभर्त्तुरुदरान्धुनिविष्टां
शक्रसम्पदमिवोद्धरतस्ते ।
पातु पाणिरुणिपञ्चकमस्मा-
च्छिन्नरज्जुनिभलग्नतदन्त्रं ॥ ६१ ॥

शत्रून् दारयन्ति तच्छीलानि दिविषदां मुनीनां देवानाञ्च सुकृतानि शस्त्राणि च तेषां ग्रामः समूहस्तस्माद् सम्भव उत्पत्तिर्यस्य तादृशो भवन् सम्पद्यमानो मनुजो मनुष्य एवार्द्धं एकदेशो यस्य। दानवाघेति पाठे दानवानां पापानि तेषां गहनं लक्षणया बाहुल्यं तेन प्रभवो यस्य दानवदुरितोद्रेकात् तिर्य्यग्योनिः सिंहरूपस्त्वं दिविषत्पुण्योद्रेकाच्चोत्तमयोनिर्मनुष्यस्त्वमित्यर्थः। दानवनामाद्यस्य हिरण्यकशिपोर्गहने सभामहोद्याने प्रभवः प्रकटनं यस्य वा। एतेन स्वर्गवासिनां पुण्यैरस्त्रैश्च कृतमनुष्यार्द्धदेहः स्वतेजोनिर्म्मितसिंहार्द्धश्च नरहरिर्हिरण्यकशिपोर्म्महासभोपवने एवावततारेति सकलपुराणसंवादः। प्रकटितस्तम्भादिति तु प्रवादमात्रमिति भागवतविरोधादुपेक्ष्यं ॥ ६० ॥

दैत्येति। हे श्रीनृसिंह ते पाणिसम्बन्धिनां सृणीनां तीक्ष्णतरनखरूपाणामङ्कुशानां पञ्चकमस्मान् पातु। किम्भूतस्तेन तव। दैत्यभर्त्तुः हिरण्यकशिपोः उदरलक्षणे अन्धौ कूपे निविष्टां पतितां शक्रसम्पदं उद्धरत इव, तस्माद् वहिर्निर्गमयत इव।

स्वेन पूर्य्यत इयं सकलाशा
मे वलेन मम किं भवतेति।

किम्भूतं पञ्चकं। छिन्नरज्जुनिभानि मध्यत्रुटितपूर्वकपतितदोरक-तुल्यानि लग्नानि तस्य दैत्यरिपोः उदरस्य चान्त्राणि यत्र यस्य वा। यथा कूपपतितं वस्तु समुद्धर्त्तुं लोहनिर्म्मिताङ्कुशपञ्चकं कूपमध्ये निक्षिप्य वलयित्वा पूर्व्वनिमग्नरज्जुखण्डसहितं तद्यथाऽऽदाय निर्गच्छति तथा तव रज्जुस्थानीयभुजदण्डकपाणिजस्य-णिपञ्चकं दैत्यराजोदरकूपपतितामिन्द्रसम्पदमुद्धरच्छिन्नरज्जु-निभलग्नतदन्त्रं सन्नामवलित्यर्थः। स्नणाति छिनत्तीति स्नुणि-रौणादिकः। अस्मान्, अस्मदो द्वयोश्चेति (पा०१।२।५९) बहुत्वं ॥ ६१ ॥

श्लोकचतुष्टयेन वामनं वर्णयति। स्वेनेति। हे वामन इति पूर्व्वार्द्धोक्ता या कपटवाक् तस्यां विषये पटीयान् अतिनिपुणो वटुर्ब्रह्मचारिवेषधारी च यतस्त्वं सोऽस्मादादीनां मम वा मनसः सम्मदं हर्षं देहि। सर्व्वाभिलापपूरणं कुर्व्वित्यर्थः। वटुवामश्च कपटवाचो भवन्ति। इति किं। पादत्रयमात्रस्थलयाचिनि वामने किमेतदल्पीयस्त्वया याचितं सकलमेतद्भुवनं गृहाण अहं ददामीति दानशूरत्वाद्वलिचक्रवर्त्तिनि भाषमाणे श्लेषवक्रोक्तिच्छलेन वामनस्य प्रत्युत्तरमेतत्। भो वले चक्रवर्त्तिन् भवता स्वेन आत्मना धनरत्नादिद्रव्येण वा इयं मदीया सकला आशा सर्व्वोऽप्यभिलाषो न पूर्य्यते, अपि तु परिपूर्णीकरिष्यत एव, परं

त्वं वटुः कपटवाचि पटीयान्
देहि वामन मनःप्रमदं नः ॥ ६२ ॥

मम तस्य भिक्षोर्निस्पृहस्य वा किं प्रयोजनमिति शेषः। त्वं सर्व्वं दातुं समर्थ एव परन्तु मम प्रयोजनं नास्ति कुटीनिर्म्माणार्थं पादत्रयमितं स्थलमेव देहीत्यर्थः। स्वेन आत्मीयेन बलेन सैन्येन च निजशक्त्या वा सकला दिक् भवता पूर्य्यते आद्रियत एव तथाऽपि मम किं तेन यो यद्याचते तस्मै तद्ददासीति प्रत्यक्षदर्शनाद्धस्ताभिनयदर्शनीयेयं सकलानां तृष्णा। भो बले त्वया परिपूर्णीक्रियते, अतो मम कलया लेशेन सहिताऽल्पीयसीति यावत्। एवम्भूता पादत्रयमिता। तस्मात् किं न पूर्य्यते अपि तु पूरयिष्यते एव। अथ च भो बले इयं सकलाऽपि विदित्वा मम स्वेनात्मना न पूर्य्यतेऽपित्ववशिष्यत एव। भवता किं कर्त्तुं शक्यते, अपि तु न किञ्चिदित्यर्थ इति वा। मया सकलाऽपि दिगात्मना पूर्य्यते भवता बलेन किं कर्त्तुं शक्यत इति वा। अथ च भो बले पादत्रययाचनविषया मम सकला तृष्णा भवता स्वेनात्मस्वरूपेण स्वदेहेन किं न पूर्य्यतेऽपि तु पूरयिष्यत एव मदीयःशरीरधारणेन लोकद्वये पादद्वयेन मया व्याप्ते प्रतिश्रुतं तृतीयं पादमदातुं निरयो भविष्यतीति भिया अवशिष्टपदस्थापनार्थं स्वशरीरमेव त्वया दास्यत इत्यर्थः। त्वां पाताले पातयिष्यामीति भावः। भूस्वर्गरूपलोकद्वयमेव बलेः स्वं नरकपतनभिया स्वशरीरमेव तृतीयपादत्वेन दत्तमिति श्रीभागवते।

दानवारिरसिकाय विभूते-
र्वच्मि तेऽस्मि सुतरां प्रतिपत्तिं।
इत्युदग्रपुलकं वलिनोक्तं
त्वां नमामि कृतवामनमायं॥ ६३॥

"पदं तृतीयं कुरु शीर्ष्णि मे निजं" इति वचनात्। इत्यादिकपटवाग् ज्ञेया। प्रमदसम्मर्दौ हर्षे इति (पा० ३।३।६८) साधुः॥ ६२॥

एवं वामनेनोक्ते वलिरुत्तरमाह। दानेति। हे वामन अहं कृता वामनस्य ह्रस्वपुरुषस्य माया येन तथाऽहमनेन ज्ञात इति ज्ञात्वा जाताश्चर्य्यवशादुदग्रपुलकं सञ्जातरोमाञ्चमिति पूर्व्वोक्तप्रकारेण वलिचक्रवर्त्तिना उक्तं भाषितं त्वां नमामि। इति किं। हे ब्रह्मन् अस्मि अहं दानवारिणि रसिकाय कृताभिलाषाय ते तुभ्यं विभूतेः स्वीयसम्पदः सुतरां प्रतिपत्तिं सङ्कल्पेन दानं वच्मि इच्छामि। सर्व्वामपि सम्पद तुभ्य दातुमिच्छामि। अथ त्वं दानवानामरिः शत्रुरसि ते तव कायविभूतेः शरीरवैभवस्य प्रतिपत्तिं ज्ञानं नितरामहमिच्छामि कीदृशं महच्छरीरं धारयिष्यसि तद्द्रष्टुमिच्छामीत्यर्थः। यद्वा तव कायवैभवस्य प्रतिपत्तिं रूपान्तरं धारयिष्यामीति त्वया सूचितं सुखेन धारणीयमित्यहं कामये इत्यर्थः। अस्मीत्यहमर्थेऽव्ययं॥ ६३॥

भोगिभिः क्षितितले दिवि वासं
बन्धमेष्यसि चिरं ध्रियमाणः।
पाणिरेष भुवनं वितरेति
छद्मवाग्भिरव वामन विश्वं॥ ६४॥

एवं बलिनोक्ते वामनः प्राह। भोगिभिरिति। हे वामन इति एवंरूपाभिः छलवाग्भिः कपटवचनैरुपलक्षितस्त्वं विश्वं अव रक्ष। इति किं। भो बले चिरं चिरायुषेन बहुकालं क्षितितले भूलोके दिवि वा ध्रियमाणोऽवतिष्ठमानस्त्वं भोगिभिः सुखिभिर्मित्रभ्रात्रादिभिःसह सम्बन्धं संयोगं एष्यसि प्राप्स्यसि यदि, यदि भूलोकेऽवस्थितिमिच्छसि तर्हि तत्र, यदि दिवि तत्र वा मित्रादिभिः सह सुखेन चिरकालमवस्थितिं प्राप्स्यसीत्यर्थः। इत्याशीः। एष प्रतिग्रहार्थं प्रसार्यमाणः प्रत्यक्षदृष्टो मम करोऽस्ति तस्मादत्र पाणौ यद्दानसम्बन्धिभुवनं जलं वितर देहीति। अथ च क्षित्यास्तले पातालक्षणे दिवि रमणीयत्वात् स्वर्गे भोगिभिःसर्पैर्ध्रियमाणो बध्यमानः सन् चिरकालं वासं दुःखबहुलत्वाद् वसतिरूपं बन्धनं प्राप्स्यसि। यद्वा चिरञ्जीवन् पाताले सर्पैः सह वासं बन्धनञ्च एष्यसि वा। इवार्थो वा। दिवि वेत्यर्थः। यथा सुखिभिः सह स्वर्गे तिष्ठन् सम्बन्धं प्राप्नोषि तथेदानीमेव पाताले सर्पैः सह सम्बन्धमेष्यसि। यद्वाऽदिवि स्वर्गव्यतिरिक्ते पाताले तृतीयपादार्थं स्वर्गात् सकाशात् त्वमस्वर्गरूपपाताले पातयिष्यसीत्यर्थः। एष चक्रविक्षेपतत्परो

आशयस्य विवृतिः क्रियते किं
दित्सुरस्मि हि भवच्चरणेभ्यः।
विश्वमित्यभिहितो बलिनाऽस्मान्
वामन प्रणतपावन पायाः ॥ ६५ ॥

मम करोऽस्ति, इन्द्राद् गृहीतं भुवनं त्रैलोक्यं देहि पुनस्तस्मै समर्पयेति, भुवनं वितरेत्यवतारप्रयोजनं सूच्यते। जीवनं भुवनं जलं, पिष्टपं भुवनं। इति चामरः ॥ ६४ ॥

एवं वामनेनोक्ते बलिः पुनराह। आशयस्येति। हे वामन प्रणतपावन, बलिना इति पूर्व्वोक्तप्रकारेण अभिहित उक्तस्त्वं अस्मान् पायाः रक्ष। इति किं। भो वामन त्वया आशयस्य पाणेर्विवृतिः प्रसारणं किं क्रियतेऽपि तु तन्न कर्त्तव्यं। आशब्दोऽयोग्यतया शिरःकम्पपूर्व्वकं वारणाभिनये। अनुचितमेतत्र कर्त्तव्यमित्यर्थः। आ सामस्त्येन नितरां आशयस्य विवरणं किं क्रियतेऽपि तु तन्न कर्त्तव्यमिति वा, वाक्यपूरणे वा। हि यस्माद्भवच्चरणेभ्यः पूज्येभ्यो भवद्भ्यः विश्व सकलं हेमरत्नादि च दित्सुर्दातुमिच्छुरस्मि, चरणशब्दः पूजार्थः। अहं सर्व्वमिदानीमेव ददामि किमिति पाणिप्रसारणेनैतावदधैर्य्यं प्रकटीक्रियत इत्यर्थः। अथ च महत्त्वपात्त्वाद् बहुभ्यो भवदीयपादेभ्य सर्व्वं दित्सुरस्मि सर्व्वस्वदानेन भवच्चरणान् पूजयिष्यामि तस्मात् करप्रसारणं किं क्रियते ॥ ६५ ॥

क्षत्रजातिरुदियाय भुजाभ्यां
या तवैव भुवनं सृजतः प्राक्।
जामदग्न्यवपुषस्तव तस्या-
स्तौ लयार्थमुचितौ विजयेतां ॥ ६६ ॥
पांशुला बहुपतिर्नियतं या
वेधसाऽरचि रुषा नवखण्डा।

श्लोकत्रयेण परशुरामं स्तौति ॥ क्षत्रेति। हे भगवन् तव तौ भुजौ विजयेतां सर्व्वोत्कर्षेण वर्त्तेतां। तौ कौ। प्राक् सृष्ट्यादौ भुवनं सृजतो ब्रह्मरूपिणस्तवैव "बाहू राजन्यः कृतः" इति श्रुतिप्रामाण्याद् भुजाभ्यां सकाशाद् या क्षत्रजातिः क्षत्रियमात्र उदियाय उत्पन्ना तस्याः क्षत्रजातेर्लयार्थं क्षयार्थं जामदग्न्यवपुषस्तव यौ भुजौ उचितौ, कारणे कार्यलयस्यौचित्यात्।

"अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं।
एषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति" ॥

इति भारतवचनाच्चावतारप्रयोजनमुक्तं। जातेर्नित्यत्वादुत्पत्तिविनाशावयुक्ताविति ये आक्षिपन्ति ते आविर्भावतिरोभावयोर्विवक्षितत्वेनोत्तरणीयाः। वेदान्तसिद्धान्ते जातेर्नित्यत्वाभाव इत्यपि। जामदग्न्येति गर्गादिषु पाठसामर्थ्याद् यञ् इति ज्ञातव्यं। विजयेतां विपराभ्यां जेरिति(पा०१।३।१९)तङ्॥६६॥

पांशुलेति। नियतं सर्व्वदा पांशुला धूलिबहुला बहवो मन्वादयः पतयो यस्याः सा मन्वादिभिः पालिता च या

तां भुवं कृतवतो द्विजभुक्तां
युक्तकारितरता तव जीयात्॥ ६७॥
कार्त्तवीर्य्यभिदुरेण दशास्ये
रैणुकेय भवता सुखनाश्ये।

भूः वेधसा रुषेव नवखण्डा भारतादिनवसङ्ख्यविभागाऽरचि निर्म्मिता। तां नवखण्डामपि सकलां भुवं द्विजभुक्तां काकादिपक्षिभिः कृतोपभोगां व्याप्तां, अथ च ब्राह्मणैर्दत्तफलां कृतवतः त्रिसप्तकृत्वः क्षत्रियमात्रं हत्वा निष्कण्टकीकृत्य प्रतिवारं ब्राह्मणेभ्यो ददतस्तव युक्तकारितरता नितरामुचितकरणशीलता जीयात् सर्व्वोत्कर्षेण वर्त्तताम्। एवंविधमतिशूरं दानशूरञ्च त्वां प्रति प्रणतोऽस्मीत्यर्थः। नियतमित्युत्प्रेक्षायां वा। रुषा नियतं रुषेवेत्यर्थ इवि वा। अथ च या स्वैरिणी अत एव बहुभिर्जारैर्भुक्ता सती तद्भर्त्ता कोपेन करचरणादिसन्धिषु पृथक् तत्कालच्छेदेन नवानि प्रत्यग्राणि खण्डानि यस्यास्तादृशी कृतखण्डा तामग्निसंस्कारनिवारणाद्धेतोः काकादिभिः पक्षिभिर्भक्षितां कुर्व्वतो भर्त्तुर्युक्तकारिता सर्व्वैः कीर्त्त्यते। स्वैरिणी पांशुला समेत्यमरसिंहः॥ ६७॥

कार्त्तवीर्य्येति। हे रैणुकेय रेणुकापुत्र कार्त्तवीर्य्यभिदुरेण यदीयकारागारे निबद्धो रावणोऽपि बहूनि वर्षाण्यतिष्ठत् तं कार्त्तवीर्य्यं सहस्रार्जुनं हतवता भवता दशास्ये रावणे सुखेन अनायासेन नाश्ये हन्तुं शक्ये सति कालभेदस्य विरहाद्-

कालभेदविरहादसमाधिं
नौमि राम पुनरुक्तिमहं तां ॥ ६८ ॥

भयोरवतारयोरेककालीनत्वादसमाधिं परिहाररहितां मनुष्यावतारेण चत्रियेण दाशरथिना रामेण विधेयान्तराभावात् तस्मिन्नेव काले किमर्थमवतीर्णमिति वक्तुमशक्यत्वात् प्रयोजनाभावादहं ते भो राम पुनरुक्तिं दाशरथिरूपजामदग्न्यरूपां दाशरथिरूपां वाऽहं नौमि स्तौमि। अन्यत्र पुनरुक्तेः कार्य्यभेदात् कालभेदाद्वा परिहारः कर्त्तुं शक्यते। वीप्सायामप्येककालप्रयुक्तस्यापिशब्दस्य भयादरसम्भ्रमादिना परिहारोऽस्त्येव, अत्र तु पूर्व्वेणैवोत्तरावतारकार्य्यस्यापि कर्त्तुं शक्यत्वात् कार्य्यभेदाभावाच्च परिहारो नास्तीत्यर्थः। स्वतन्त्रस्य तव केनाप्यनुयोगः कर्त्तुं न शक्यत इति भावः। जामदग्न्यस्य मानुषत्वेऽपि दैवज्ञानस्य तथैव सद्भावाद्देवाचावध्यत्वस्य रावणे वृतत्वात् तस्य तेन हन्तुमशक्यत्वाद्रावणवधपर्य्यन्तं च श्रीरामस्य दैवज्ञानाभावान्मानुषत्वेन तेनैव तस्य हन्तु शक्यत्वात् कार्य्यभेदादेकस्मिन्नपि कालेऽवतारान्तरस्य युक्तत्वात् सूक्ष्मः परिहारोऽस्त्येव। तथापि स्थूलदृष्ट्या परिहाराभाव उक्त इति ज्ञेयं। नर्मदायां जलक्रीडां कुर्व्वता सहस्रार्ज्जुनेन रावणः कारागारे निक्षिप्त इतीतिहासः। रैणुकेय इति चत्रियत्वसूचनं। अपत्यार्थे स्त्रीभ्यो ढक् (पा०४।१।१२०) इति ढक्॥ ६८॥

हस्तलेखमसृजत् खलु जन्म-
स्थानरेणुकमसौ भवदर्थं।
राम राममधरीकृततत्त-
ल्लेखकः प्रथममेव विधाता॥ ६८॥

दशभिः श्लोकैः श्रीरामचन्द्रं वर्णयति। हस्तेति। भो राम दाशरथे असौ विधाता भवदर्थं तादृशोत्तमशिल्पनिर्माणार्थं जन्मस्थानं रेणुकैव यस्य तादृशं रामं प्रथमं त्वदपेक्षयाऽऽद्यं जामदग्न्यं खलु निश्चितं हस्तलेखमेवासृजत्, चक्रे। त्वन्निर्माणार्थं जामदग्न्यं हस्ताक्षराभ्यासमेवाकरोदित्यर्थः। खल्विवार्थे वा हस्तलेखमिव चक्रे। किम्भूतः। अधरीकृताः एतादृशनिर्माणसमर्थत्वान्नितरां हीनाः कृता ते प्रसिद्धा लेखका देवा इन्द्रादयो दक्षप्रभृतयोऽष्टौ प्रजापतयो वा येन तादृशः। अथ वा न अधराः स्वर्गस्था अप्यधराः कृता भूमौ अवतारितास्ते हनुमत्सुग्रीवादिरूपा इन्द्रादयो देवा येन सः। प्रथमस्यैव हस्तलेखरूपत्वेन हीनत्वं न तु द्वितीयस्येत्यर्थोक्तं। प्रथममेवाद्यमेव रामं न तु द्वितीयं त्वामिति वा। उत्तमशिल्पनिर्माणार्थं हि हस्तलेखा पूर्वं क्रियते। हीनाः कृतास्ते तेऽतिप्रसिद्धा लेखका लिपिकराः येन स इति वा। अक्षराभ्यासोऽप्येवमेव क्रियते। जन्मस्थाने रेणुः पृष्टिकादिचूर्णरूपः पांसुर्यस्यैतादृशं। हस्तलेखं शेषादिभाषेति (पा०५।४।१५७) कप्॥ ६८॥

उद्भवाजतनुजादज कामं
विश्वभूषण न दूषणमत्र।
दूषणप्रशमनाय समर्थं
येन देव तव वैभवमेव॥ ७०॥

उद्भवेति। हे अज जन्मरहित श्रीरामचन्द्र। अजस्य रघुपुत्रस्य तनुजाद्दशरथात् सकाशात् कामं स्वेच्छया उद्भव उत्पत्तिर्यस्य भो विश्वविभूषण जगदलङ्कारभूत, अत्र दशरथादपि जन्मविषये, अजस्यापि जन्मविषये दूषणं दोषलेशोऽपि नास्ति। यस्य पितामहेनाप्यजेनोत्पन्नस्तत्पुत्रः स्वपिता कुतस्तरामुत्पन्नः तत्पुत्रः स्वयं कुतस्तमामुत्पत्स्यते। तथा स्वयमप्यजः कथं जायत इत्याशङ्कायां स्वेच्छामात्रविलसितमित्याशङ्कापरिहारः। ब्रह्मैव हि स्वाविद्यया संसरति मुच्यते चेति न्यायात्। विश्वभूषणस्य तव दूषणरूपत्वाभावादपि दूषणलेशोऽपि तव नास्तीत्यर्थः। अथ वाऽजतनुजादजस्योत्पत्तिर्युक्तैव, अजो हि छागस्तत्पुत्रोऽप्यज एव जातिनामत्वादजशब्दस्येत्यपि दूषणाभावः। दूषणाभावे हेत्वन्तरमप्याह। येन कारणेन हे देव श्रीराम तव वैभवमेव प्रभाव एव दोषाणां प्रकर्षेण शमनाय नाशाय समर्थं यत्स्मरणादिवैभवादन्येषामपि भक्तानां दोषा नश्यन्ति तत्स्वरूपे दोषलेशसंसर्गोऽपि कथङ्कारं स्यादपि तु न कथञ्चिदित्यर्थः। अथ च दूषणाख्यराक्षसविनाशाय तवैव सामर्थ्यं यतस्तस्मादत्र तवोत्पत्तौ सत्यां दूषणाभावो युक्त एवेति छलं। अथ च परशु-

नो ददासि यदि तत्त्वधियं मे
यच्छ मोहमपि तं रघुवीर।
येन रावणचमूर्युधि मूढा
त्वन्मयं जगदपश्यदशेषं ॥ ७१ ॥
आज्ञया च पितुरज्ञभिया च
श्रीरहीयत महीप्रभवा हि:।

रामे सत्यपि तस्मिन्नेव काले त्वं दशरथात् सुखेनोत्पद्यस्व। अत्र तवोत्पत्तिविषये दूषणं पुनरुक्तिदोषो नास्ति। यतो दूषणादिरावणान्तराक्षसविनाशाय तवैव सामर्थ्यं न तु परशुरामस्येत्यत्र दूषणशब्द उपलक्षणपरः। तस्मादेककालोत्पन्नत्वेऽपि कार्यभेदान्न पुनरुक्तिदोषः। एतेनावतारप्रयोजनमुक्तं। अनुकामनिति पाठे कामं सत्यीकृत्य यथेच्छमित्यर्थः॥ ७० ॥

नो ददासीति। हे रघुवंश्यानां मध्ये वीर, ईश्वरतम श्रीरघुनाथ त्वं तत्त्वधियं मोक्षोपयोगिनमात्मतत्त्वं साक्षात्कारं यदि मे मह्यं नो ददासि तर्हि तं मोहमपि तां विशिष्टां भ्रान्तिमेव यच्छ देहि। तं कं। येन मोहेन भयसञ्जातभ्रान्तिविलासेन युधि मूढा भ्रान्ता रावणचमूरशेषं सकलं जगत् त्वन्मयं श्रीरामचन्द्ररूपमपश्यत्। रावणसेनया च मोहेन जगद्रामात्मकं दृष्टमिति सर्वपुराणे॥ ७१ ॥

आज्ञयेति। हे श्रीरामचन्द्र भवता महीप्रभवा कृत्यादुपायैर्भूमेः कोत्पन्ना श्री राज्यलक्ष्मी', अथ च भूमेरुत्पन्ना लक्ष्मीर-

लङ्घितश्च भवता किमु न द्वि-
र्वारिराशिरुदकाङ्कगलङ्कः ॥ ७२ ॥

तारूपा जानकी क्रमेण पितुराज्ञया च यज्ञेभ्यो भिया च मूर्ख-जनापवादभयेन च द्विर्द्विवारमहीयत त्यक्ता। वनवासाङ्गीकारा-द्राज्यलक्ष्मीः, जनापवादभयाच्च वह्नौ विशुद्धाऽपि सीता त्यक्ता, इत्येवं द्विप्रकारं त्यक्तेत्यर्थः। एवं पितुराज्ञाकारी लोकप्रवाद-भीरुश्च कोऽपि नास्तीति भावः। चावन्योन्यसमनुचये। तथा वा-रिराशिररिराशिर्वा द्विवारं द्विधा च न लङ्घितः किमु, अपि तु सेतुं बद्धा समुद्रोऽपि लङ्घित एव। तथा रावणादिप्रभुसमूहो-ऽपि पराभूत एव। वा चार्थ इवार्थो वा। अरिराशिश्च अरिरा-शिरिव वागन्धनार्थाद्धातोः क्विपि वानीति वाः स चासावरिरा-शिश्च स सकलो वैरिसङ्घ इत्यर्थः। किंभूतः। उदकाङ्कगा जलम-ध्यगा लङ्का यस्य यदीयजलमध्ये लङ्कास्तीत्यर्थः। अरिराशिर-पि समुद्रजलमध्यवर्त्तिनी लङ्का यस्य। समुद्रपक्षे यस्येत्यस्योदकेन सम्बन्धः। अरिराशिपक्षे तु लङ्कायाः। एतावान् विशेषः। उत्कृष्टमकं दुःखं यस्मात्सादृशो अङ्कगा लङ्का यस्येति वा। उत्कृष्टमकं कर्त्तनलक्षणं दुःखमुदकं तदेवाङ्कयिक्तं येषां ता-दृशा गलाः कण्ठा यत्र क्रियायां यथा तथा कः किमु शत्रुसङ्घो न लङ्घितः, अपि तु सर्वोऽपीति वा। सागरस्यापि बन्धना-द्रावणस्यापि वधाच्च एतादृशो महाप्रभावः प्रतापः तदन्यः कोऽपि नास्तीति भावः ॥ ७२ ॥

कामदेवविशिखैः खलु नेशं
माऽर्पयज्जनकजामिति रक्षः।
देवतादमरणे वरवाक्यं
तथ्यदत्वमपुनाद्भवदस्त्रैः॥ ७२॥
तद्यशो हसति कम्बुकदम्बं
शम्बुकस्य न किमम्बुधिचुम्बि।

कामदेवेति। रक्षो रावण इतीव हेतोर्दैवतान्मरणाभावविषये देवाद्धेतोर्न मरिष्यसीति ब्रह्मणो वरवाक्यं यत् सत्यं कुर्वन् स्वमात्मानं भवदस्त्रैरपुनात् धूतकल्मषं चकार। इति किं। जनकजां सीतां रामायार्पयद्ददद्दं रक्षः कामदेवस्य मोहनशोषणादिभिर्विशिखैः खलु निश्चितं मा नेशं तद्विरहमन्तापवशान्मृतो मा भूवमिति। सीताप्रत्यर्पणे कामदेवस्य देवत्वात् तद्बाणैर्मरणे वरवाक्यमसत्यं स्यादितीव तामददद् वरवाक्यसत्यत्वार्थं मानुषावतारकामरूपभवद्बाणैरात्मानं नाशितवानित्यर्थः। कामबाणात् शरीरविनाशमात्रं त्वद्बाणात् तु मरणे संसारहेतुनिःशेषकल्मषक्षय इति महान् विशेषोऽपुनादित्यनेन सूच्यते। नेशं माङ्योगादडभावः। तथ्यवत् तत्करोतीति (पा० ३।१।२६वा०) ण्यन्तान्लुङन्ता॥ ७२॥

तदिति। हे रघुनाथ नामशेषिजः कथाशेषोकृतो यतः सेनया महितो दशास्यो येन तत्स्मात् तव यशादशो शम्बुकः यत् शमं विनाश्य आप तत् शम्बुकस्य शम्बुकनाम्नः शूद्रस्य शम्बु-

नामशेषितससैन्यदशास्या-
दस्तमाप यदसौ तव हस्तात् ॥ ७४ ॥
मृत्युभीतिकरपुण्यजनेन्द्र-
त्रासदानजमुपार्ज्य यशस्तत् ।
क्षीणवानसि कथं न विहाय
क्षुद्रदुर्जनभिया निजदारान् ॥ ७५ ॥

धिचुम्बि समुद्रमध्यवर्त्ति यशःकम्बु कदम्बं शङ्खवृन्दं धवलतया किं न हसति अपि तु हसत्येव तत्तुल्यं भवतीत्यर्थः। येन त्वत्करेण अतिशूरो रावणो हतः तेनैवान्त्यवर्णोऽधमो दुर्बलः शम्बुकोऽपि हत इति महत् तस्य भाग्यमित्यर्थः। यो ह्युत्कृष्टं बलिनं हन्ति तेनैव हीने दुर्बले हते दुर्बलस्य महद् यशो भवति। ब्राह्मणस्य बालपुत्रमरणनिमित्तं शूद्राणामविहितधूमपानमधोमुखं कुर्वन्तं शम्बुकं शूद्रं श्रीरघुनाथो हतवानितीतिहासः। अयं च शम्बुकस्य जलशुक्तेः श्वैत्यरूपं यशः समुद्रमध्यस्थं शङ्खवृन्दं हसति तत्तुल्यं भवतीति युक्तमेव। नामशेषितेति। तत्करोतीति (पा॰३।१। २६वा॰१) णन्तान्निष्ठा ॥ ७४ ॥

मृत्युभीतीति। यस्मात् मृत्योर्यमादन्येषां भीतिस्तस्यापि मृत्योर्भीतिकरः पुण्यजनेन्द्रो राक्षसेन्द्रो रावणस्तस्यापि मरणपर्य्यन्तं त्रासदानाद् भयोत्पादनाद्धेतोर्जातं तत् अतिप्रसिद्धं लोकत्रयेऽपि गीयमानं यश उपार्ज्य क्षुद्रोऽत्यल्पको दुर्जनस्तस्माद्भिया भयेन पामरलोकापवादभिया निजदारानात्मनः

इष्टदारविरहौर्वपयोधि-
स्त्वं शरण्य शरणं स ममैधि।
लक्ष्मणक्षणवियोगकृशानौ
यः स्वजीवितहृणाहुतिरध्वा॥ ७६॥

प्रियां सीतां विहाय परित्यज्य कथं न ह्रीणवान् लज्जितवानसि, लज्जितव्यं तावत् त्वयेत्यर्थः। यो रावणाय भयं दत्तवान् तस्य दुर्जनभीत्या निष्ठुरजनापवादभयेन प्रियापरित्यागे लज्जैव युक्ता। अभिमानान्निजस्त्रीहर्ता रावणो नाशितो लोकापवादभयाच्च सापि परित्यक्तेति एतादृशः शूरोऽभिमानी लोकापवादभीरुश्च कोऽपि नास्तीति भावः। यातुधानः पुण्यजन इत्यमरः। भीतिकरेति ताच्छील्ये टः॥ ७५॥

इष्टेति। हे शरण्य शरणागतभक्तरक्षक रघुनाथ स त्वं मम शरणं रक्षकः एधि भव। स कः। यस्त्वं इष्टदाराणां सीतायाः विरह एव दुःसहत्वादौर्वो वडवानलः तस्य पयोधिः आश्रयः एवंविधः सन् लक्ष्मणस्य क्षणमात्रमपि वियोगः स एव दुःसहत्वात् कृशानुस्तत्र स्वजीवितानामात्मप्राणानामेव हृणानामाहुतेस्तद्रूपहोमद्रव्यस्य यज्वा होता। योऽहि लक्ष्मणवियोगं क्षणमात्रं सोढुमशक्तस्तृणवदिच्छामात्रेण स्वप्राणांस्तत्याज। स यावज्जीवं सीताविरहानलं कथं सोढवानिति क्रिययोर्विरोधादाश्चर्यं। यज्वना चाहुतिरग्नौ हूयते। सीताविरहसहनेन जितेन्द्रियधुर्यत्वं सूचितं। इन्द्रजितः शक्त्या मूर्च्छिते लक्ष्मणे स्वयमपि मुमूर्षु

क्रौञ्चदुःखमपि वीक्ष्य शुचा यः
श्लोकमेकमसृजत् कविराद्यः।
स त्वदुत्थकरुणः खलु काव्यं
श्लोकसिन्धुमुचितं प्रबबन्ध ॥ ७७ ॥

तया मुनिरूपकालकृतसमयभङ्गभयप्रतिज्ञे लक्ष्मणे रघुनाथाज्ञया शरयूजलप्रवेशेन कृतदेहत्यागे सति तद्वियोगमसहमानस्तल्वणमेव रघुनाथोऽपि गोप्रतारतीर्थे जलप्रवेशेन स्वयमपि स्वर्धाम प्रापेति युद्धकाण्डोत्तरकाण्डरामायणकथा। एतेन स्त्रीवियोगदुःखादपि भ्रातृवियोगदुःखं दुःसहमिति सूचितं। परमकारुणिकस्त्वं शरणागतं मामपि रक्षेति सूचितं ॥ ७६ ॥

क्रौञ्चेति। दैवी वाक् येन भुवं प्रथममानीता स आद्यः प्रथमः कविर्वर्णको यो वाल्मीकिः क्रौञ्चयोः पक्षिविशेषयोर्मध्ये रिंसावेकस्मिन् व्याधेन हतेऽन्यस्य दुःखं शोकमपि वीक्ष्य तिर्यग्योनेरपि तस्य दुःखं दृष्ट्वा उत्पन्नया शुचा शोकेन हेतुना।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहित ॥

इत्यादिकमेकं श्लोकमसृजत्। स कविस्त्वयि उत्पन्नः करुणरसो यस्य सीताविरहविक्लवमहानुभावभवद्दर्शनोत्पन्नशोक इव श्लोकानां सिन्धुः सागरभूतं चतुर्विंशतिसहस्रमितरामायणाख्य काव्यमुचित योग्य प्रबबन्ध। तिर्यग्योनिविषये शोकेन येन श्लोकः कृतः तस्य उत्तमपुरुषविषये महाकाव्यनिर्माणमुचि-

विश्रवःपितृकयाप्तुमनर्हं
सश्रवस्त्वमनयेत्युचितज्ञः।
त्वं चकर्त्तिथ न शूर्पणखायाः
लक्ष्मणेन वपुषा श्रवसी वा ॥ ७८ ॥

तमेव। अथ च त्वया सिन्धुर्बद्धः। अयमपि त्वदेकचित्तः सिन्धुं बबन्धेत्युचितं। परित्यक्तसर्व्वसङ्गो मुनिरपि त्वद्दर्शनं कृतवान्। एतादृशः परमपुरुषोऽसीति खल्वित्यर्थः॥ ७७॥

विश्रव इति। हे रघुनाथ, इति हेतोः उचितं जानाति यः स उचितकारी त्वं चतुर्द्दशावतीर्णत्वात् लक्ष्मणलक्षणेन स्वीयेनैव वपुषा शूर्पनखायाः श्रवसी कर्णौ त्वं न चकर्त्तिथ, अपितु कर्त्तितवान् एव। इति किं। विश्रवा मुनिः पिता यस्याः, अथ च कर्णरहितः पिता यस्यास्तयाऽनया शूर्पनखया सश्रवस्त्वं सकर्णत्वं प्राप्तुमनर्हमयोग्यमिति स्त्रीवधस्यानौचित्यात् कर्णच्छेद एवोचितः, यतः अकर्णपितृकाया अकर्णत्वस्यौचित्यात्कर्णौ लक्ष्मणेन कर्त्तयामासियेत्येवंविधः समुचितकारी महाप्रभावोऽसीति भावः। वा इवार्थो वा इतीव हेतोरिति योजना। विश्रवःपितृकया न सूतस्येति (पा॰५।४।१५३) कप्। शूर्पणखा पूर्व्वपदात् सञ्ज्ञायामिति (पा॰८।४।३) णत्वं। नखस्य स्वाङ्गत्वेऽपि नखमुखात् सञ्ज्ञायामिति (पा॰४।१।५८) ङीबभावः। अन्वर्था चेयं सञ्ज्ञा॥ ७८॥

330H

ते हरन्तु दुरितव्रततिं मे
यैः स कल्पविटपी तव दोर्भिः ।
छद्मयादवतनोरुदपाटि
स्पर्द्धमान इव दानमदेन ॥ ७९ ॥

नवभि. श्लोकै. श्रीकृष्ण वर्णयन्ति । त इति । कंसादितत्तद्दैत्यमारणरूपछद्मना यादवसञ्ज्ञा तनुर्यस्य, अथ च छद्मया नीतिछद्मया एवम्भूता चासौ आदवतनुश्च, मायावान् कंसादिवधनवक्लिरूपशरीरस्य तस्य श्रीकृष्णरूपस्य तव यैर्दोर्भि. भुक्तिमुक्तिप्रदैश्चतुर्भिर्दोर्भिरतिप्रसिद्ध. कल्पविटपी कल्पितफलदानसमर्थः पारिजातवृक्ष. उदपाटि उन्मूलित । किं कुर्व्वन्निव। तादृशकल्पितदानसमर्थ. कोऽपि नास्त्येवेति दानमदेन दर्पेण तैर्भुजै. सह स्पर्द्धमान इव। ते बाहवो मे दुरितानां व्रततिं लतां दैन्यमहति रहन्तु उन्मूलयन्तु। पारिजातलक्षणमहावृक्षोन्मूलने समर्थाना तेषां लतोन्मूलने सुतरा सामर्थ्यं। कपटदावानलदेहस्य च भुजाना वृक्षलताद्युन्मूलने सामर्थ्यं युक्तमेवेत्यर्थ । दानशूरो महाप्रभावश्च तादृश कोऽपि नास्तीति भाव । सत्यभामया याचित. पारिजात. इन्द्रं जित्वान्मूल्य सत्यभामाङ्गणे श्रीकृष्णेन स्थापित इति हरिवंशोक्ति । निर्ऋतिव्रततिमिति पाठे स्यादलक्ष्मीस्तु निर्ऋतिरित्यमर. ॥ ७९ ॥

330H

बालकेलिषु तदा यदलावीः
कर्परीभिरभिहत्य तरङ्गान्।
भाविबाणभुजभेदनलीला-
सूत्रपात इव पातु तदस्मान्॥ ८०॥
कर्णशक्तिविफलां खलु कर्त्तुं
सज्जितार्ज्जुनरथाय नमस्ते।

बालेति। हे कृष्ण त्वं तदा कृष्णावतारसमये भूयसीषु बालकेलिषु मध्ये कर्परीभिः स्फुटितघटशकलैः कृत्वा यमुनाजले तरङ्गानभिहत्य तेषामभिघातं कृत्वा ताननेकप्रयत्नेनालावीः अच्छैत्सीः इति यत् तत् कर्परीभिस्तरङ्गलवनं कर्त्तृ उषाहरणावसरे भावि करिष्यमाणबाणासुरभुजच्छेदनं तल्लक्षणलीला विलासः तत्सम्बन्धी सूत्रपात इव प्रथममार्जवच्छेदनाभ्यासरूपमिव अस्मान् पातु रक्षतु। अक्षरपङ्क्तिः रज्जुलार्थं बालैः प्रथमं खटिकादिप्रांचितसूत्रपातनं क्रियते। तथादिभिरपि काष्ठस्यार्जवेन छेदनार्थं गैरिकादिप्रचितसूत्रपातनं क्रियते तद्वद्बाणभुजार्जवच्छेदनार्थं कर्परीभिरभिहत्य तरङ्गलवनं यदकारि तव बालक्रीडनमस्मानवतु इत्यर्थः। कर्पर्याघाते ते तरङ्गच्छेदनमिति बालजातिः। अवतारप्रयोजनञ्चोक्तं॥ ८०॥

कर्णेति। हे कृष्ण ते नमोऽस्तु। किम्भूताय। ते उरसि लग्ना इन्द्रजिन्मुक्ता शक्तिर्यस्य तं लक्ष्मणं द्रोणाचलानीतविशल्यकरौषधिप्रक्षेपेण धृतं निष्कासितं शक्तिलक्षणं शल्यं यस्य तादृशं

केतनेन कपिनोरसि शक्तिं
लक्ष्मणं कृतवता हृतशल्यं ॥ ८१ ॥
नापगेयमनयः सशरीरं
द्यां वरेण नितरामपि भक्तं ।
मा स्म भूत् सुरवधूसुरतज्ञो
द्व्यपि व्रतविलोपभियेति ॥ ८२ ॥

कृतवता। केतनेन ध्वजस्यपताकारूपेण कपिना हनूमता कृत्वा कर्णस्य शक्तिमाङ्गिकं बलं, अथ च इन्द्रदत्तां शक्तिं अफलां कर्त्तुमिव सज्जितौ योजितौ अर्ज्जुनरथौ येन तस्मै नरनारायणरूपाय। यो हि यत्र कर्म्मणि शक्तः स तत्र नियोक्तुमुचितः स हनूमांश्च शक्तिविफलीकरणे दृष्टप्रभावस्तस्मात् कर्णशक्तिविफलीकरणार्थमिवार्ज्जुनरथे तं स्थापितवानसीति भक्तवत्सलाय तुभ्यं नम इत्यर्थः। यो मर्मभूतां उरःस्थितां शक्तिं विफलीकरोति सत्त्ववणस्थां सुतरां विफलीकरोत्येवेति छलेनोक्तिः,खलु इवार्थः उरसि शक्तिः अमूर्द्धमस्तकादिति अलुक् (पा०६।३।१२) ॥८१॥

नेति। हे कृष्ण त्वं नितरां भक्तमपि आपगेयं भीष्मं सशरीरेण प्रसादेन कृत्वा इति॰विचार्य्य कारणात् वा द्यां स्वर्गं न अनयः न प्रापितवानसि। इति किं। स भीष्मः अनेन शरीरेण सुरतं न करिष्याम्यद्यप्रभृति मम ब्रह्मचर्य्यमिति नियमवान् व्रतस्य विलोपाद्भीतस्तया भिया हेतुना द्व्यपि स्वर्गेऽपि सुरवधूनां रम्भादीनां सुरतज्ञो मा भूत् इति। भक्ततमस्य वरदानेन

घातितार्कसुतकर्णदयालु-
र्जैत्रितेन्दुकुलपार्थकृतार्थः।
अर्द्धदुःखसुखमभ्यनयस्त्वं
साश्रुभानुविहसद्विधुनेत्रः ॥ ८३ ॥

यद्यपि तेनैव शरीरेण स्वर्गप्रयाणमुचितं तथाऽपि तस्य शरीरस्य स्वर्गप्रापणेऽपि न कोऽप्युपयोगस्तेन तच्छरीरस्यातितुच्छत्वात् तच्छरीरं विनाश्य यतः स्वर्गमनयः न तु तुच्छशरीरसहितस्य प्रापणे तवाशक्तिरिति भावः। यद्वा भुक्तेरतितुच्छत्वाच्छरीरं विनाश्य मुक्तिमेव प्रापितवानिति हेतुः। आपगेयं अपत्यार्थे स्त्रीभ्य इति (पा०४।१।१२०) ढक् ॥ ८२ ॥

घातितेति। अर्कसुतेन प्रयोज्येन समरे घातितो योऽर्कसुतः कर्णस्तस्मिन् विषये दयालुः सकरुणः। तथा स्वसामर्थ्येन जैत्रितो जेता कृतो दत्तजय इत्यर्थः। इन्दुकुलं सोमवंशभूतः पार्थोऽर्जुनस्तेन कृत्वा कृतार्थः सम्पादितावतारप्रयोजनः कृतकृत्यत्वात् सहर्षः, अत एव क्रमेण साश्रुः पुत्रशोकवशाद् रुदन् भानुः सूर्य्यः पुत्रविजयाच्च विशेषेण हसन् हर्षानुभवं कुर्वन् विधुश्चन्द्रः तावेव दक्षिणवामनेत्रे यस्य एतादृशः त्वं यथाक्रमं अर्द्धदुःखं अर्द्धसुखञ्च अभ्यनयः, अभिनयेन युगपद्दर्शनवानसि। परमार्थतोऽविद्यमानमप्यनाद्यविद्याविलासाद्दर्शितवानसीत्यर्थः। सूर्य्यचन्द्रयोर्विष्णुनेत्रत्वात् कर्णस्य च सूर्य्यपुत्रत्वात् नाशे शोकात् सूर्य्यस्य साश्रुत्वं, अर्ज्जुनस्य च सोमवंशत्वात् तद्विजये चन्द्रस्य

प्राणवत्प्रणयिराध न राधा-
पुत्रशत्रुसखता सदृशी ते।
श्रीप्रियस्य सदृगेव तव श्री-
वत्समात्महृदि धर्त्तुमजस्रं ॥ ८४ ॥

हर्षेण विहसितत्वात् ताभ्यामर्द्धसुखदुःखाभिनयेन अद्भुतरूपो ऽसीति भावः। घातितेति हेतुमण्यन्तान्निष्ठा। जैत्रितेति तत् करोतीति (पा०३।१।२६वा०) ण्यन्तान्निष्ठा। पार्थेति कुरुत्वात् ह्र्यण्यन्धकेत्यण् (पा०४।१।११४) अर्द्धञ्च तद्दुःखसुखञ्चेति द्वन्द्वगर्भः कर्मधारयः ॥ ८३ ॥

प्राणेति। प्राणवत् प्रणयिनी निरूपाधिप्रेमास्पदं राधाख्या गोपिका यस्य एवम्भूत हे श्रीकृष्ण ते तव राधापुत्रः कर्णः तस्य शत्रुरर्जुनस्तत्सखता तन्मैत्री सदृशी योग्या न। राधावल्लभस्य हि राधापुत्रशत्रुमैत्री कथंकारमुचिता, अपि तु अयुक्तैव विरोधादित्यर्थः। एकत्र राधा गोपिका, अन्यत्र तु कर्णपालनकारिणी कैवर्त्तवधूरिति परिहारः। श्रियः प्रियस्य श्रीर्वल्लभा यस्य वा तस्य तव श्रीवत्सं ब्राह्मणपादन्यासरूपलाञ्छनं। अथ च श्रियो वत्सं पुत्रमजस्रं आत्महृदि धर्त्तुं सदृगेव उचितमेव, यस्य श्रीर्वल्लभा स तत्पुत्रं स्ववक्षसि सदा बिभर्त्तीति युक्तमेवेत्यर्थः। एतादृशः स्वपक्षपातदर्शी लोकत्रितये ब्राह्मणभक्तिपरश्च कोऽपि नास्तीति भावः। प्रणयिराधेति स्त्रियाः पुंवदिति (पा०६।३।३४) ॥ ८४ ॥

तावकापरतनोः सितकेश-
स्त्वं हली किल स एव च शेषः।
साध्वसाववतरस्तव धत्ते
तज्जराचिकुरनालविलासं॥ ८५॥

तावकेति। हे श्रीकृष्ण हली लाङ्गलधरो बलभद्रः स एव च शेषोऽनन्तस्त्वमेव शेषावताररूपोऽपि बलभद्रो भवानेव न तु स त्वत्तो भिन्न इत्यर्थः। त्वं बलभद्रः स एव शेषः त्वत्तो हली न भिद्यते। हलिनश्च शेषो न च भिद्यत इति वा। यतः कायस्य सम्बन्धाज्जरसा सितकेशः धवलितकचः किलेत्यागमे। विष्णुपुराणादौ च यदुक्तं "उज्जहारात्मनः केशौ सितकृष्णौ ततः प्रभुः" इति। तव इयं तावकी न विद्यते परा उत्कृष्टाऽन्या यस्याः सा तावकी अपरा तनुस्तत्सम्बन्धिनी सर्व्वोत्कृष्टा सत्त्वमूर्त्तिस्तस्याः सितकेशः श्वेतकेशरूपो हली तव अवतारः अंशावताररूपोऽसौ हली त्वं किल त्वदवयवभूतकेशरूपत्वात् तस्य, स च हल्येव शेष इति वा। शेषरूपबलदेवलक्षणोऽसाववतरो मूर्त्तिः, अत एव तस्याः त्वदीयाया अपरतनोर्जरसा धवलीकृतस्य चिकुरनालस्य केशदण्डस्य विलासं वर्णसारूप्यं साधु यथा तथा धत्ते। अतिगौरो बलदेवस्त्वदियापरतनुर्धवलकेश इव भातीत्यर्थः। केशस्यापि दीर्घत्वधवलत्वाभ्यां जराधवलदीर्घकेशसारूप्यधारणं युक्तमेव। कारणगुणा हि कार्य्ये गुणानारभन्त इति न्यायाच्च युक्तमेव। अंशावतारो बलभद्र इति चोक्तं। अत्र श्वेतकेशः सदृश एव

न तु जरायोगादिति वा। यतो हरिर्नित्यतरुण इति पुराणादिप्रसिद्धिः। वस्तुतस्तु कस्य ब्रह्ममुखस्य सदृशौ सुखस्वरूपाविव्यर्थः। प्रकाशत्वेन सत्त्वस्य सितशब्दवाच्यत्वात् मोहकत्वेन च तमसः कृष्णशब्दवाच्यत्वात् सितकृष्णौ सत्त्वतमोगुणद्वयात्मकावेताववतारौ भूभारोत्तारणार्थं प्रभुरादिनारायणः स्वस्मात् प्रकटीचकारेति विष्णुपुराणस्यसितकृष्णपदस्यार्थः। "कृष्णस्तु भगवान् स्वयं" इति श्रीभागवतवचनेन कृष्णस्तु लीलाविग्रहधारी परब्रह्मैव। "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः" इति भगवद्वचनात्। बलभद्रस्तु अवतारः, रामो रामश्च रामश्चेति वचनात्, अन्यथा बलभद्रस्य सत्त्वमूर्त्तित्वं कृष्णस्य तमोगुणमूर्त्तित्वं प्रापद्येत, न च तथास्तीति बलभद्रस्य तमः प्रधानत्वदर्शनादित्याशयः। शितिकेश इति पाठे शितौ धवलमेचकावित्यभिधानात्। त्वदीयपुरातनोः सम्बन्धी शितिकेशः श्यामकेशरूपस्त्वं, हली च धवलकेशरूपः स एव च हलीति शेषः। बलभद्रः शेषावतार इति पुराणादौ। स त्वदीयधवलकेशविलासं धत्ते तत्साधु। कृष्णस्य कृष्णवर्णत्वाद् हलिनश्चातिगौरत्वाद्यथा क्रमश्यामसितगौरत्वमौत्प्रेक्षिकत्वेनैव व्याख्येयनित्यलमतिविस्तरेण। तावकापरेति पाठः साधीयान्, यतः युष्मदस्मदोरिति खञि (पा० ४।३।१) तवकादेशे वृद्धौ च वृद्धिनिमित्तस्येति (पा० ६।३।३८) पुंवद्भावप्रतिषेधे सत्यकोऽपि कर्मधारयत्वात् पुंवत्कर्मधारयेति (पा० ६।३।४२) प्रतिप्रसवात् पुंवद्भावः। अवतरः। पूर्ववत्॥ ८५॥

हृद्यगन्धवह भोगवतीश:
शेषरूपमपि बिभ्रदशेष:।
भोगभूतिमदिरारुचिरश्री-
रुल्लसत्कुमुदवन्धुरुचिस्त्वं॥ ८६॥

हृद्येति। हृद्यो हृदयानन्दकारी गन्धश्चन्दनादिसौरभं तं वहसि धारयसि तत्सम्बोधने हे एवंविधस्यसौरभधारिन् श्रीकृष्ण त्वं शेषरूपं बलभद्ररूपं। अथ च नागाधीशरूपं बिभ्रत् धारयन्नपि अशेष उभयविधोऽपि शेषो न भवसि इति विरोधः। अथ च न विद्यते शेषः शिष्टं भिन्नं यस्मात् असौ ऽशेषः सकलजगदात्मकत्वमिति तत्परिहारः। अथ च बलभद्रोऽप्यतिशृङ्गारित्वाद् हृद्यगन्धवहः, अत एव भोगवतीनां सुखीनां गोपिकादीनां ईशः प्राणप्रियः। अथ च भोगवत्या अतितरां सुखिन्याः रेवत्या ईशः पतिरिति। श्रीकृष्णोऽपि हृद्यगन्धशरीरं स्वाभाविकं चन्दनादिजन्यञ्च गन्धं वहतीनां भोगवतीनां सुखिनीनां गोपिकादीनामीशः। शेषोऽपि जलक्रीडाचालितचन्दनकर्पूराद्यङ्गरागसम्वन्धिहृद्यसौरभधारिण्याः भोगवत्याः पातालनद्याः पतिः। कर्पूरादिवज्जलसौरभयुक्ताया नागर्य्या वा क्षितिहेतुत्वाद् हृद्यो गन्धवहो वायुर्यस्य स स्वामी नागपुर्य्या नद्या वा पतिः। तथा कृष्णरूपस्त्वं भोगस्य सुखस्य भूतेर्हेतोः मदिरावत् रुचि सुखं राति जनयति या तादृशी श्रीःकायकान्तिर्यस्य सः। भोगः शेषफणा तत्कायो वा स एव भूः स्थानं तस्या ऊतिः अवनं

स्वाधिष्ठानेन रक्षणं तेन माद्यति हृष्यतीति भोगभूतिमत्ती। तथा इराया भूमेरिव रुचिरा रमणीया दूर्वादलश्यामला श्रीः कान्तिर्यस्य सः स्निग्धश्यामलकायकान्तिरित्यर्थः। इरायाः भारत्याः प्रियायाः धरण्या वा रुचिरा रमणी श्रीः कान्तिर्यस्मादिति वा। तयोरुभयोः सपत्न्योरपि रुचिं प्रीतिं ददाना समवर्तिनी श्रीः हृदिस्था लक्ष्मीर्यस्येति वा। भोगानां कालियफणानां भूतिरैश्वर्य्यजनितो दर्पः तं मथ्नाति तादृशो वा। पृथग्वा पदं। गोपिकादिसम्भोगसुखसमृद्धिर्भोगभूतिः तद्वान् स चासौ उक्तरीत्या इरारुचिरश्रीश्चेति वा। अथ च बलभद्ररूपस्त्वं भोगस्य सुखस्य भूतिरुत्पत्तिहेतुः तादृशी या मदिरा तया कृता रुचिरा रमणीया सरागा कान्तिः शोभा यस्य। बलदेवो हि सर्व्वदा मदिरामत्तः। अथ च शेषरूपस्त्वं भोगस्य स्वकायस्य फणानां वा भूतिः समृद्धिः तद्वान् अतिदीर्घमहाकायः सहस्रफणासमृद्धिमान् वा। तेन माद्यति स चासौ स्वशिरःसु धारणेन भूमेः रुचिं राति ददातीति रुचिरा श्रीः कायकान्तिर्यस्य सः। तथा कृष्णरूपस्त्वं उल्लसन्ती कुमुदवन्धोः चन्द्रस्य सम्बन्धिनी रुचिः प्रीतिर्यस्मिन् सर्व्वाह्लादकारित्वाच्चन्द्र इव सर्व्वप्रेमास्पदभूत इत्यर्थः। कुमुत् श्वेतं कैरवं तस्य अबन्धुः तद्विरोधिनी कृष्णा रुचिः श्रीर्यस्य जलदश्याम इत्यर्थः इति वा। उल्लसन्ती कुमुदाख्ये वानररूपे सुहृदि रुचिः प्रीतिर्यस्य रामावतारे इति वा। पृष्ठे दंष्ट्रायां वा उल्लसन्ती कुः पृथ्वी यस्मिन्मोदत इति मुदः स चासौ स

रेवतीश सुषमा किल नील-
स्याम्बरस्य रुचिरा तनुभासा ।

च तथा बन्धुषु बन्धौ वा बलभद्रे वा रुचिः प्रीतिर्यस्य स चासौ स चेति वा। उल्लसन्ती कुमुदतुल्येऽतिगौरे बन्धौ बलभद्रे रुचिः प्रीतिर्यस्येति वा। उल्लसन्ति कुमुदानि येन स चन्द्र एव उद्दीपकत्वाद् बन्धुर्यस्य सः प्रद्युम्नावतारः कामः तत्र रुचिः पुत्रत्वात् प्रीतिर्यस्येति वा। अथ च बलभद्ररूपत्वं, उल्लसन्ती कुमुदबन्धुः कैरवसदृशी गौरतरा कुमुदबन्धोश्चन्द्रस्येव वा गौरतरा रुचिः कान्तिर्यस्य। उल्लसन्ती कुः पृथ्वी यस्मात् तस्मिन्मुदे सहर्षे बन्धौ अनुजे श्रीकृष्णे रुचिः प्रीतिर्यस्य वा। उत्कर्षेण लसन्कुमुदबन्धुः पार्वणचन्द्रः तस्येव रुचिर्यस्य। उल्लसत् कुमुदबन्धौ उक्तप्रकारेण प्रद्युम्ने रुचिर्यस्येति वा। अथ च शेषरूपत्वं उल्लसन्ती कुमुदनाम्नि सर्पे सुहृदि प्रीतिर्यस्य। उल्लसन्ती चन्द्रस्येव धवला कान्तिर्यस्य वा। उल्लसन्ती कुमुदस्य चन्द्रस्य बन्धुःसदृशी कान्तिर्यस्य वा। उल्लसत्पृथ्वीकः सदर्पः सुहृत्प्रीतिर्यस्य वा। कुमुदेऽपि कुमुत्प्रोक्तमिति विश्वः। गोत्रा कुः पृथिवी पृथ्वीत्यमरः। भोगः सुखं वधे वाद्ये शरीरफणयोर्मत इति विश्वः। इरा वारिसुराभूमिभारतीषु इति च। ऊतिः। अवतेः ज्वरत्वरेति (पा० ६।४।२०) वस्योपधायाश्च ऊठि। मत् इति सम्पदिनेर्मश्चेति क्विपि। मुदः इगुपधलक्षणकः॥ ८६॥

रेवतीशेति। हे रेवतीनाम्न्याः प्रियाया ईश, तथा हे कामपालपूरक कुः पृथ्वी तस्या मुदो हर्षस्याविर्भावेन प्रादुर्भावेन

कामपाल भवतः कुमुदावि-
र्भावभावितरुचेरुचितैव ॥ ८७ ॥

भाविता सञ्चारिता रुतिः प्रीतिरिच्छा वा यस्य तस्य भवतः श्रीकृष्णतनुभासा कायकान्त्या कृता नीलस्य अम्बरस्य तत्तुल्येत्यर्थः। तव रुचिराः शोभना, लोकानां रुचिं प्रीतिं ददाना वा। रेवतीशसुषमा चन्द्रसम्बन्धिनीपरमा शोभा उचितैव किल। आकाशस्य चन्द्रशोभा उचितैव। अथ च बलभद्रस्वरूपत्वाद् रेवतीशसुषमा बलभद्रस्य परमशोभा उचितैव। किम्भूतस्य। कुः पृथ्वी तस्या मुदस्य हर्षस्य आविर्भावेन प्रकटनेन भाविनी त्रिलोकानां रुचिः प्रीतिर्येन। कुमुदस्य चन्द्रस्य आविर्भावेन वा। अथ च रेवतीनाम्नी प्रिया सदृशी। तथा हे कामपाल बलभद्र कुः पृथ्वी तस्या मुदस्य हर्षस्याविर्भावेन प्रादुर्भावेन भाविता सञ्चारिता रुचिः प्रीतिरिच्छा वा यस्य तस्य भवतः तव तनुभासा कायकान्त्या नीलस्याम्बरस्य वस्त्रस्य रुचिं दीप्तिं राति ददाति एवंविधा सुषुमा उत्कृष्टशोभा उचिता योग्यैव किल। धवलवस्तुसम्पर्कान्नीलं अतिशयेन शोभते। अथ च हे कामपाल कन्दर्पपोषक रेवतीश चन्द्रकुमुदानां कैरवाणां अविकासेन भाविता स्फुरिता रुचिः कान्तिः प्रीतिर्वा यस्य भवतः तनुभासा बिम्बतेजसा नीलस्य अम्बरस्य आकाशस्य सुषमा परमा शोभा उचितैवेति ध्वनिः ॥ ८७ ॥

एकचित्ततितिरद्वयवादिन्
न त्रयीपरिचिताध्वबुधस्त्वं।

चतुर्भिः श्लोकैर्बुद्धं वर्णयति ॥ एकेति। हे अद्वयवादिन् द्वैतवाद्यघटपटादिभेदानामसत्यतया प्रतिपादनेनैकस्याज्ञानकारणतयैव सत्यताङ्गीकारादद्वैतवादिन् त्वं मां पाहि। किम्भूतः। एकैव चित्ततितिः ज्ञानसन्ततिर्यस्य दीपकलिकान्यायेन क्षणिकज्ञानप्रवाह एवैकीयस्य मतेन तु तदतिरिक्तं न किञ्चिदस्ति तादृशः। अत एवाद्वयवादिन्निति योजना। तथा त्रय्या अपरिज्ञातो ज्ञातस्तादृशो न भवसीत्यत्रयीपरिचितो नञ् समासो वा। नेति पृथग्वा। वेदत्रयीगम्योऽपि न भवसीत्यर्थः। अथ च वेदत्रय्या परिचितः कृतपरिचयः वेदत्रयी परिचिता अभ्यस्ता येन तादृशो वा न भवसि। सर्व्वस्य क्षणिकताङ्गीकाराद्धर्माधर्मभोगव्यवस्थाया निरासादनङ्गीकृतवेदप्रामाण्य इत्यर्थः। अत एव बुधः पण्डितः। न हि पण्डितं विना वेदादिसर्व्वदूषणसमर्था अन्यस्य बुद्धिः सम्भवति। अथ च अत्रयीपरिचितोऽपि बुध इति विरोधाभासः। न हि वेदत्रयमजानानस्यापि पण्डितत्वं सम्भवति। अथ च यः पण्डित एकमेवाद्वितीयं ब्रह्मेति मन्यमानो वेदान्ती स वेदत्रयीं न मन्यते इति विरोधः। वेदान्तिना हि वेदप्रामाण्यस्य स्वीकृतत्वात्। अथ च अद्वयवादाद् दिलमह्यामपि यो नाङ्गीकरोति स त्रिलमह्यां न मन्यत इति युक्तमेवेत्यर्थः। तथा माध्यमिकानामपि किञ्चिन्मात्रमतभेदेन सौद्धसिद्धान्तपातित्वात्।

पाहि मां विधुतकोटिचतुष्कः
पञ्चबाणविजयी षडभिज्ञः ॥ ८८ ॥

न सन्नासन्नसदसन्न चाप्यनुभयात्मकं।
* चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकं विदुः॥

इति। अनिर्व्वचनीयप्रपञ्चवादित्वाद् विधुतं निराकृतं सत्, असत्, सदसत्, तद्विलक्षणं, कोटिचतुष्कं प्रकारचतुष्टयं येन, अथ च त्रिलनिषेधान्निरस्तचतुष्टयः, तथा विरक्तत्वाद्दिगम्बरत्वाच्च पञ्चबाणः कामस्तद्विजयी मारजित्, अथ च वणशब्दे इत्यस्माद् घञि: बाणशब्दः। तं पञ्चसङ्ख्यावाचिनं पञ्चशब्दं न सहत इत्यर्थः। यो हि चतुष्टयं न सहते स पञ्चापि न सहत इति युक्तमेवेत्यर्थः। तथा देशादिव्यवहितवस्तुदर्शनं देशादिव्यवहितशब्दश्रवणमतीतजन्मस्थितिस्मरणं परचित्तज्ञानमविद्यास्मितारागद्वेषाभिनिवेशाख्यपञ्चक्लेशक्षयः, अणिमादिसिद्धिश्चेति षडभिज्ञा ज्ञानप्रकारा यस्य स षडभिज्ञः। वेदानुसारिभिर्दैत्यैः पराभूता देवा ब्रह्माणं शरणं गताः, ब्रह्मणा प्रसादितो नारायणो बुद्धरूपेणावतीर्य्य दैत्यबुद्धिं वेदार्थेभ्यश्च्यावयित्वा बौद्धमतमुपदिदेश, ततस्ते देवानां जय्याः सम्पन्ना इति। अत एव चैतदीयमतपरिभाषयैव स्तुतिरकारि। परिचिता ऽप्यबुद्धबुधस्त्वमिति पाठे नेति पदं भित्वा त्वया वेदत्रयी न

---

* चतुष्काशेति पाठान्तरं।

तत्र मारजयिनि त्वयि साक्षा-
त्कुर्व्वति क्षणिकतात्मनिषेधौ।
पुष्पवृष्टिरपतत् सुरहस्तात्
पुष्पशस्त्रशरसन्ततिरेव॥ ८९॥

परिचिता न स्वीकृतप्रामाण्या। अव्यविरोधे। तथापि बुधस्त्वमित्यर्थः। परिचिताध्वबुध इति पाठे त्रयीपरिचितानां वैदिकानामध्वनि मार्गे बुधः पण्डितो न भवसि, अवैदिकमार्गमेव जानान इत्यर्थः॥ ८८॥

तत्रेति। तत्र तस्मिन्नवतारूपे सौन्दर्याज्जितेन्द्रियत्वाच्च मारजयिनि कामस्य जैत्रे त्वयि क्षणिकता, सर्व्वं क्षणिकं सत्त्वात्, तथा आत्मनिषेधस्य, "समनस्केन्द्रियजन्यनीलपीताद्याकारसविकल्पकनिर्विकल्पकवासनोपचितचित्सन्ततिरेवात्मा, भूतान्येव चेतयन्ते, मनसा संयोगेन ज्ञानमुत्पद्यते, तस्माद्देह एवात्मा न तु नित्योऽन्यः कश्चित्" इत्यादिप्रकारेण सर्व्वभावानां क्षणमात्रावस्थायितां नैरात्म्यञ्च स्वदर्शनोक्तसमाधिना साक्षात् कुर्व्वति सति पुष्पशस्त्रस्य कामस्य शरसन्ततिर्बाणपरम्परारूपा सुरहस्तात् पुष्पवृष्टिर्वापतत्। अतिबले हि शत्रौ भीतानां करादायुधा निपतन्ति। कामोऽपि त्वत्तो भीतः, पुष्पशरस्य तथा च तस्य करात् त्वद्भयेन पतिता पुष्परूपबाणपरम्परा क्षणिकतात्मनिषेधौ साक्षात् कुर्व्वति त्वयि विषये सुरमुक्ता पुष्पवृष्टिरिवापतदित्युत्प्रेक्षा। कामोऽपि देव एव पुष्पवृष्टिमोचने हेतुः। यो हि लोको-

तावके हृदि निपात्य कृतेयं
मन्मथेन दृढधैर्य्यतनुत्रे ।
कुण्ठनादतितमां कुसुमाना-
ञ्छत्रमित्रमुखतेव शराणां ॥ ९० ॥

त्तर वस्तुप्रत्यक्षगोचर करोति यस्य कश्चन विजयते तयोरु-
परि देवैः पुष्पवृष्टिः क्रियत इत्यादि ज्ञातव्य ॥ ८९ ॥

तावक इति । मन्मथेन दृढमभेद्य धैर्य्यमेव तनुत्रं कवच यस्य तस्मिंस्तावके हृदि मनसि अथ च वक्षसि अर्थात शरान् निपात्य नितरां दृढपातपूर्व्वं यथा तथा पातयित्वा दृढतनुत्रत्वादेव अतितमां कुण्ठनात् तैक्ष्ण्यत्यागाद्धेतोः कुसुमरूपाणां शराणां छत्र मित्रञ्च येषां तानि, छत्रस्य वा मित्राणि मुखानि येषा ते भग्नत्वादिशकलितमुखास्तेषा भावस्तत्ता सूचीमुखतापरित्यागेन छत्रतुल्यवृत्तमुखतेय प्रत्यक्षदृश्या कृता। दृढतनुत्रे हि पतितो बाण कुण्ठितत्वाद्वृत्तमुखो भवति। स्मरशरा. शरत्वात पूर्व्वं सूचीमुखा आसन्, इदानीं धैर्य्यकञ्चुके त्वदीये हृदि निपात्य नितरा कुण्ठनादिव तेषा पुष्परूपाणां शराणां छत्राकारमुखता जातेत्युत्प्रेक्षोपमा वा। विकसितानि पुष्पाणि छत्रतुल्यानि भवन्ति । अथ च छत्र छायाकारित्वात् सुखदमेव न तु दु.खद यथा तथा कामशरा अपि त्वद्धृदयस्य निर्वापका एव जाता., न तु त्वा जेतुमशक्नन्नित्यर्थ । एतादृशो जितेन्द्रिय कोऽपि नास्तीति भाव.। निपात्य एन्तात् क्यप् ॥ ९० ॥

यत् तव स्तवविधौ विधिरास्यै-
श्चातुरीं चरति तच्चतुरास्यः।
त्वय्यशेषविदि जाग्रति शर्व्वः
सर्व्वविद्ध्रुवतया शितिकण्ठः॥ ९१॥

यदिति। विधिः तव स्तवविधौ स्तुतिविधौ बहुभिरास्यैर्मुखैः चातुरीं वैदग्ध्यं यत् यदि चरति प्राप्नोति नानाप्रकारैर्यदि वर्णनं करोति तत् तर्ह्येव। चतुराणि वर्णननिपुणानि आस्यानि यस्य वा तादृशो भवेन्नान्यः। अथ च त्वद्वर्णनाविधौ यस्माच्चातुरीं प्राप्नोति तस्मादेव हेतोश्चतुराण्यास्यानि यस्येति चतुरास्यो न तु चत्वार्य्यास्यानि यस्येति विग्रहेण चतुरास्यः। आस्यानाञ्चतुष्के सत्यपि तत्रार्थे गौरवाभावात्, अत्र तु गौरवसद्भावात् तथैवोच्यत इत्यर्थः। त्वदीयस्तुतिपरत्वाद् ब्रह्मणो लोकत्रयेऽप्येवं कीर्त्तिरजनीति भावः। तथा शर्व्वो हरः त्वयि बुद्ध एव अशेषविदि सर्व्वज्ञे जाग्रति सति सर्व्वविदं सर्व्वज्ञमात्मानं ब्रूते स सर्व्वविद्ध्रुवस्तत्तयैव,परगुणस्यात्मन्यारोपणेन हेतुना कलङ्केन शितिकण्ठो नीलकण्ठः न तु कालकूटभक्षणेन-नीलकण्ठः त्वत्स्पर्द्धितया लोकत्रयेऽपि महेशस्य एवमपयशो जातमित्यर्थः। ब्रह्ममहेशाभ्यामपि प्रकाशात् त्वमेव परमपुरुषः सर्व्वज्ञश्चेति भावः। अन्यस्य यथाऽऽत्मस्तुत्या सर्व्वज्ञसन्निधौ लज्जया मालिन्यं भवति॥ ९१॥

धूमवत् कलयता युधि कालं
म्लेच्छकल्पशिखिना करवालं ।
कल्किना दशतयं न मम कल्कं
त्वं व्युदस्य दशमावतरेण ॥ ९२ ॥

श्लोकद्वयेन कल्किनं स्तौति ॥ धूमवदिति । त्वं धूमवत्कालं करवालं खड्गं युधि म्लेच्छैः सह युद्धे कलयता धारयता कालं मृत्युरूपं करवालं खड्गं धूमवद् धूममिव धारयता वा । अत एव म्लेच्छानां कल्पशिखिना प्रलयकालानलरूपेण म्लेच्छा इव म्लेच्छाः पापिनस्तेषां वा, म्लेच्छप्रायाणां वा, एवम्भूतेन कल्किना कल्किमञ्ज्ञेन दशमावतारेण कृत्वा मम दशतयं दशावयवकं कल्कं पापं व्युदस्य निराकुरु समूलमुन्मूलयेत्यर्थः। अथ च यः स्वयं कल्की सोऽन्यकल्कं विनाशयतीति विरोधः कल्किशब्दस्य विष्णुनामत्वात् तत्परिहारः । म्लेच्छकल्पशिखिनेत्यवतारप्रयोजनमुक्तं। अदत्तस्य वस्तुनः स्वयं ग्रहणं, यागीयातिरिक्ता हिंसा, परस्त्रीगमनञ्चेति त्रिविधं कायिकं। पारुष्यं, अनृतं, पैशून्यं, असम्बद्धप्रलापश्चेति चतुर्विधं वाचिकं । परद्रव्यग्रहणेच्छा, परानिष्टचिन्ता, वृथैव परेषु दोषाभिध्यानञ्चेति त्रिविधं मानसं। इति दशविधं पापं। चक्षुस्त्वक् श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थमनोजन्यं वा दशसु मासेषु भवतीत्याहुः, गर्भवासलक्षणं दुःखमिति वा। कल्कः पापाशये पापे, इति विश्वः ॥ ९२ ॥

देहिनेव यशसा भ्रमतोर्व्वीं
पाण्डुरेण रणरेणुभिरुच्चैः।
विष्णुना जनयितुर्भवताऽभू-
न्नाम विष्णुयशसश्च सदर्थं॥ ९२॥
सन्तमद्वयमयेऽध्वनि दत्ता-
त्रेयमर्ज्जुनयशोऽर्जुनवीजं।

देहिनेति। हे कल्किन् विष्णुयशसस्तन्नामकस्य जनयितुः पितुः विष्णुरितिनाम भवतैव त्वयैव कृत्वा सदर्थं सान्वयमभूत्। किम्भूतेन भवता। रणरेणुभिरुच्चैः पाण्डुरेण धवलतरेण शरीरधारिणा तथा दुष्टगवेषणार्थं उर्व्वीं भ्रमता विष्णुना व्यापकेन विष्णुमञ्ज्ञकेन च पाण्डुरत्वाद् व्यापित्वाच्च देहिना शरीरधारिणा यशसेव यशोरूपेणेव विष्णुव्यापकं यशो यस्य तथा पुत्रेणेति यावत्। तस्य तव पितुर्नाम सान्वयमभूज्जातप्रायमेवेति भाविन्यपि भूतवदुपचारः। अतीतकलियुगावतारापेक्षया अभूदिति निर्द्देशो वा। पूर्व्वं तु डित्यादिवत्तन्नामाभूत्, त्वयुपपन्ने तु सार्थकमभूदित्यर्थः॥ ९२॥

सन्तमिति। दत्तात्रेयं स्तौति। अहं दत्तात्रेयनामानं त्वां नौमि। किम्भूतं। अद्वयमयेऽध्वनि अद्वैतमार्गे एकात्म्यवादे सन्तं वर्त्तमानं। तथा अर्ज्जुनस्य कार्त्तवीर्य्यार्ज्जुनस्य यशसो यदर्जुनं तस्य वीजं मूलं। पूर्व्वं कार्त्तवीर्य्येणाराधितो दत्तात्रेयः, तव यशो लोकत्रयव्यापि भविष्यतीति वरं दत्तवान्। अर्ज्जुन इति

नौमि योगजनितानघसञ्ज्ञं
त्वामलर्कभवमोहतमोर्कं ॥ ९४ ॥
भानुसूनुमनुगृह्य जय त्वं
राममूर्त्तिहतवृत्रहपुत्रः ।
इन्द्रनन्दनसपत्नमपि त्वां
नौमि कृष्ण निहतार्कतनूजं ॥ ९५ ॥

पाठे अर्ज्जुनयश एवार्ज्जुनहृहस्तस्य वीजं। हृहस्योत्पत्तिर्वीजादेव युक्ता। यद्वा अर्ज्जुनं धवलं यशो यस्य एवंविधोऽर्ज्जुनः कार्त्तवीर्य्यस्तस्य वीजं। तथा योगेनाष्टाङ्गयोगेन जनिता उत्पादिता मायादिराहित्यादनघ इत्यपरा सञ्ज्ञा यस्य तद्वा हि देवैर्योगवाङ्ल्यादनघेति सञ्ज्ञा कृता। अलर्कनाम्नः ऋतुधजुध्वजमदालसापुत्रस्य राज्ञो भवमोहो ममतादिरूपः संसारमोहः स एव तमोऽन्धकारः तस्य विनाशहेतुत्वादर्कस्त्वं। योगोपदेशेन तस्य मोहं चिच्छेदेति पुराणकथा ॥ ९४ ॥

एवं दशावतारान्निर्वर्ण्य भक्तिशयेन पुनरपि कियतस्तानेवावतारान् त्रिविक्रमं हरिहरौ वालमुकुन्दञ्च सङ्क्षेपेण चतुर्विंशतिश्लोकैर्वर्णयति। भानुसूनुमिति। हे विष्णो भानुसूनुं सूर्य्यपुत्रं सुग्रीवमनुगृह्य वालिनं हत्वा तद्वधूं तारां तस्मै दत्त्वा राज्याभिषेकद्वारा कृतार्थीकृत्य राममूर्त्त्या रामावतारेण हतो मारितो वृत्रघ्नस्य इन्द्रस्य पुत्रः वाली येन स त्वं रामो जय उत्कर्षेण वर्त्तस्व। नमस्तोऽभीत्यर्थः। तथा भो कृष्णावतार अर्द्ध

देहिनेव यशसा भ्रमतोर्व्वीं
पाण्डुरेण रणरेणुभिरुच्चैः।
विष्णुना जनयितुर्भवताऽभू-
न्नाम विष्णुयशसस्य सदर्थं॥ ८३॥
सन्तमद्वयमयेऽध्वनि दत्ता-
त्रेयमर्ज्जुनयशोर्जुनबीजं।

देहिनेति। हे कल्किन् विष्णुयशसस्तन्नामकस्य जनयितुः पितुः विष्णुरितिनाम भवतैव त्वयैव कृत्वा सदर्थं सान्वयमभूत्। किम्भूतेन भवता। रणरेणुभिरुच्चैः पाण्डुरेण धवलतरेण शरीरधारिणा तथा दुष्टगवेषणार्थं उर्व्वीं भ्रमता विष्णुना व्यापकेन विष्णुसञ्ज्ञकेन च पाण्डुरत्वाद् व्यापित्वाच्च देहिना शरीरधारिणा यशसेव यशोरूपेणेव विष्णुव्यापकं यशो यस्य त्वया पुत्रेणेति यावत्। तस्य तव पितुर्नाम सान्वयमभूज्जातप्रायमेवेति भाविन्यपि भूतवदुपचारः। अतीतकलियुगावतारापेक्षया अभूदिति निर्द्देशो वा। पूर्व्वं तु डित्थादिवत्तन्नामाभूत्, त्वयुपपन्ने तु सार्थकमभूदित्यर्थः॥ ८३॥

सन्तमिति। दत्तात्रेयं स्तौति। अहं दत्तात्रेयनामानं त्वां नौमि। किम्भूतं। अद्वयमयेऽध्वनि अद्वैतमार्गे एकात्म्यवादे सन्तं वर्त्तमानं। तथा अर्ज्जुनस्य कार्त्तवीर्य्यार्ज्जुनस्य यशसो यदर्जुनं तस्य बीजं मूलं। पूर्व्वं कार्त्तवीर्य्येणाराधितो दत्तात्रेयः, तव यशो लोकत्रयव्यापि भविष्यतीति वरं दत्तवान्। अर्ज्जुन इति

नौमि योगजनितानघसञ्ज्ञं
त्वामलर्कभवमोहतमोऽर्कं ॥ ९४ ॥
भानुसूनुमनुगृह्य जय त्वं
राममूर्त्तिहतवृत्रहपुत्रः ।
इन्द्रनन्दनसपत्नमपि त्वां
नौमि कृष्ण निहतार्कतनूजं ॥ ९५ ॥

पाठे अर्जुनयश एवार्ज्जुनवृक्षस्तस्य वीजं। वृक्षस्योत्पत्तिर्वीजादेव युक्ता। यद्वा अर्ज्जुनं धवलं यशो यस्य एवंविधोऽर्ज्जुनः कार्त्तवीर्य्यस्तस्य वीजं। तथा योगेनाष्टाङ्गयोगेन जनिता उत्पादिता मायादिराहित्यादनघ इत्यपरा सञ्ज्ञा यस्य तदा हि देवैर्योगवाञ्छयादनघेति सञ्ज्ञा कृता। अलर्कनाम्नः ऋतुध्वजमदालसापुत्रस्य राज्ञो भवमोहो ममतादिरूपः संसारमोहः स एव तमोऽन्धकारः तस्य विनाशहेतुत्वादर्कस्त्वं। योगोपदेशेन तस्य मोहं चिच्छेदेति पुराणकथा ॥ ९४ ॥

एवं दशावतारान्निवर्ण्य भक्तातिशयेन पुनरपि कियतस्तानेवावतारान् त्रिविक्रमं हरिहरौ वालमुकुन्दञ्च सङ्क्षेपेण चतुर्विंशतिश्लोकैर्वर्णयति। भानुसूनुमिति। हे विष्णो भानुसूनुं सूर्य्यपुत्रं सुग्रीवमनुगृह्य वालिनं हत्वा तद्वधूं तारां तस्मै दत्त्वा राज्याभिषेकद्वारा कृतार्थीकृत्य राममूर्त्त्या रामावतारेण हतो मारितो वृत्रघ्नस्य इन्द्रस्य पुत्रः वाली येन स त्वं रामो जय उत्कर्षेण वर्त्तस्व। नमस्तेऽभीत्यर्थः। तथा भो कृष्णावतार अहं

वामनादणुतमादनुजीया-
स्त्वं त्रिविक्रमतनूस्तदिक्कः ।
वीतहिंसनकथादथ बुद्धात्
कल्किना हतसमस्त नमस्ते ॥ ६६ ॥

इन्द्रनन्दनस्य अर्ज्जुनस्य सपक्षं मित्रभूतं अत एव निहतो मारितोऽर्कतनूजः कर्णो येन तं त्वामपि नौमि स्तौमि । अपिशब्दाद्राममपीत्यर्थः । कृष्णेन अर्ज्जुनेन कृत्वा निहतोऽर्कतनूजो येनेति वा। यो भानुसूनुमनुगृह्णाति स निहतार्कतनूजः। कथं। तथा यो हतेन्द्रपुत्रः स इन्द्रपुत्रमित्रं कथमिति विरोधार्थोऽपिशब्दः । निग्राह्यानुग्राह्ययोस्तत्पुत्रयो रामकृष्णावतारयोश्च भेदाद् विरोधपरिहारः । एतादृग्विरुद्धचरितत्वाद् दुर्विज्ञेयः। परमपुरुषोऽसीति भावः ॥ ६५ ॥

वामनादिति । रामकृष्णौ वर्णितौ । हे विष्णो अणुतमात् ह्रस्वतमशरीराद् वामनाद् वामनावतारादनुपश्चात् त्रिविक्रमस्य त्रिविक्रमावतारस्य तन्वा शरीरेण, त्रिविक्रमावताररूपया वा तन्वा स्तृता व्याप्ता दिशो येन स त्वं जीयाः, सर्व्वोत्कर्षेण वर्त्तस्व। त्रिविक्रमेति सम्बुद्धिर्वा। तथा वीता निवृत्ता हिंसनकथा प्राणिवधवार्त्ताऽपि यस्मादेवम्भूताद् बुद्धावतारात्, अथ पश्चात् कल्किना दशमावतारेण कृत्वा हतं मारितं कलिमलदूषितं समस्तं प्राणिजातं येन तादृशविष्णो ते तुभ्यं नमः । यो ह्रस्वतमः स तनुशृहदिक्को व्यापकदेहः कथं। तथा यस्य वीतहिंसन-

मां त्रिविक्रम पुनीहि पदे ते
किं लगन्नजनि राहुरपानत्।
किं प्रदक्षिणनकृद्भ्रमिपाशं
जाम्बवानदित ते बलिबन्धे ॥ ९७ ॥

कथाः स एव हतमनस्कः कथमिति विरोधः। अवतारभेदेन परिहार इति भावः। वामनत्रिविक्रमौ वर्णितौ ॥ ९६ ॥

मामिति। हे त्रिविक्रम त्वं मां पुनीहि, तथा गगनव्यापिनी ऊर्द्धकृते ते पदे विष्णुपदे लगन् नक्षत्रमालामध्यवर्त्ती श्यामरूपो राहुरपानदजनि पादरक्षिकेव जातो किं। एतावदतिमहच्छरीरं धृतं। यस्य चरणस्थाने गगनस्थो राहुः उपानदिव जात इत्यर्थः। माऽपि श्यामा चरणे च लगति। तथा प्रदक्षिणनं प्रदक्षिणाख्यं पञ्चदशमुपचारं कुर्वन् जाम्बवान् ऋक्षराजो ब्रह्मावतारो बलिबन्धननिमित्ते ते तुभ्यं भ्रमिपाशं भ्रमणरूपवलयाकारवेष्टनमेव पाशं बन्धनरज्जुमेव अदित दत्तवान् किं। यो हि कश्चिद्बद्धुमुपक्रमते तस्मै केनचित् पाशो दीयते। यद्यपि देवेन च बलिर्वाग्बन्धमेव प्रापितो न तु रज्ज्वादिबन्धं तथाऽपि लोके बद्ध इति प्रसिद्धिवशाद् बन्धशब्दच्छलेन कविः पाशशब्दं प्रायुङ्क्त। जाम्बवान् किल तदा त्रिविक्रमस्य षोडशोपचारपूजामकृतेति प्रवादः। अत्रापि त्रिविक्रमो वर्णितः। बन्ध इति पाठे हलन्तादन्येश्चतुर्थी। ते इत्यस्य विशेषणं। बन्ध इति पाठे तस्मादेव सम्बुद्धिः ॥ ९७ ॥

अर्द्धचक्रवपुषाऽर्ज्जुनबाहून्
यो लुनात् परशुनाऽथ सहस्रं।
तेन किं सकलचक्रविलूने
वाणबाहुनिचये ऽश्चति चित्रं॥ ६८॥
पाञ्चजन्यमधिगत्य करेणा-
पाञ्च जन्यमसुरानिव वक्षि।

अर्द्धेति। यो जामदग्न्यो भवान् चक्रस्यार्द्धं समो भागस्तस्येव वपुः स्वरूपं यस्य तदाकारेण परशुना कृत्वा सहस्रमर्ज्जुनबाहून् शीघ्रमेव अलुनात् चिच्छेद। तेनैव भवता सकलेन सम्पूर्णेन चक्रेण सुदर्शनाख्येन विलूने छिन्ने वाणासुरबाहुनिचये विषये लोकश्चित्रमाश्चर्य्यमश्चति किं, अपि तु न प्राप्नोति। अथ च किमश्चति किमिति प्राप्नोति, अपि तु वृथैव तत्। येन पूर्व्वं एकस्य बाहुसहस्रं छिन्नं तेनैव यदान्यस्य बाहुसहस्रे छिन्ने न किञ्चिच्चित्रं तस्य तत्र कृतशक्तित्वादित्यर्थः। येन च अर्द्धेनैव चक्रेण बाहुसहस्रं छिद्यते तेन समग्रेण चक्रेण बाहुसहस्रे छिन्ने सुतरां न किञ्चिच्चित्रमित्यर्थः। परशुरामकृष्णौ वर्णितौ॥ ६८॥

पाञ्चजन्यमिति। हे विष्णो त्वं वामकरेण पाञ्चजन्यनामानं शङ्खमधिगत्य धृत्वा तथा अपां जलानां जन्यन्तु उत्पाद्य कमलवद्दक्षिणकरे कृत्वा असुरान् दैत्यान् इति वक्षीव प्रतिवदसीव। इति किं। हे दैत्या अचेतनोऽपि अयं शङ्खः मयि

चेतनास्थ किल पश्यत किं ना-
चेतनोऽपि मयि मुक्तविरोधः॥ ९९ ॥
तावकोरसिलसद्वनमाले
श्रीफलद्विफलशाखिकयेव।

विषये मुक्तविरोधः किं न, अपि तु त्यक्तविरोध एव। किल यस्मात् पाञ्चजन्यत्वे सत्यपि अपाञ्चजन्यत्वमङ्गीकरोतीति यूयं पश्यत। यतः सचेतनाःस्थ चैतन्ययुक्ता वर्त्तध्वे कस्मान्मयि विषये विरोधं कुरुथेति। अचेतना अपि मयि विरोधं नाचरन्ति किमुत मरणभीताः सर्व्वज्ञाः, तस्मान्मयि विरोधं मास्माकुर्द्ध। शब्दत एव विरोधोऽर्थद्वयेन तत्परिहारः। अथ वा अचेतन एव मयि मुक्तविरोधः शङ्खवत्, यूयं तु सचेतनाः स्थ तस्मान्मयि विरोधं माऽऽचरथेति शङ्खवद्भवतोऽपि यावदचेतनान्न कुर्व्वे तावद्विरोधो न त्यज्यत इति। अथ च अचेतनोऽपि शङ्खो मयाऽद्यापि न मोच्यते सचेतनास्तु शङ्खादयो भवन्तः कथं वा मया मोच्येरन्, अपि तु युष्मान् मारयिष्याम्येवेति वचीत्यर्थः। अधिगत्य च अधिगत्यैवेति पचे सम्बन्धः। अचेतनोऽपि मयि मुक्तविरोधः किं न पश्यतेति वा। अपामिति कृत्यानां कर्त्तरि (पा० २।३। ७१) इति षष्ठी॥ ९९ ॥

तावकेति। कमलया लक्ष्म्या लसन्ती पत्रपुष्पफलमयी माला वनमाला यस्मिंस्तस्मिंस्तावकोरसि श्रीफलस्य विल्ववृक्षस्य द्विफलशाखिकयेव फलद्वययुक्तया ह्रस्वकोमलशाखयेव स्तोय-

स्वीयते कमलया त्वदजस्र-
स्पर्शकण्टकितयोत्कुचया च ॥ १०० ॥
त्यज्यते न जलजेन करस्ते
शिक्षितुं सुभगभूयमिवोच्चैः ।
आननञ्च नयनायितबिम्बः
सेवते कुमुदहासकरांशुः ॥ १०१ ॥

ते। किम्भूतया श्रिया। तव अजस्रं अनवरतं स्पर्शं आश्लेषस्तेन कण्टकितया सञ्जातसात्त्विकरोमाञ्चया, तथा उत्कुचया च उन्नतपीवरस्तनया च। यत्र हि वनाभां माला पङ्क्तिर्विलसति तत्र सकण्टकया पलसहितया च बिल्वशाखया स्वीयते। तथाचापि त्वदनमालत्वादिशिष्टया लक्ष्म्या विशिष्टबिल्वशाखयेव स्वीयत इत्युपमोत्प्रेक्षा वा। शाखिका। अल्पे इति ह्रस्वे इति वा (पा० ५।३।८५।८६) कः ॥ १०० ॥

त्यजत इति। जलजेन शङ्खेनाथ च पद्मेन ते करः कदाचिदपि न त्यज्यते सशङ्खचक्रगदापद्मत्वात् तवैवेत्यर्थः। तत्रोत्प्रेक्षते। उच्चैरत्यन्तं सुभगभूयं त्वत्करकमलरश्मिमादिसौभाग्यं शिक्षितुमिव। गुरुशुश्रूषा हि विद्याप्राप्तिहेतुः। तथा कुमुदहासकराः कैरवविकासकारिणोंऽशवो यस्य स चन्द्रः, नयनायितं नेत्रमिवाचरितं बिम्बं यस्य तथाभूतः सन् त्वदीयवामनयनीभवंश्चन्द्रः परमं निष्कलङ्कत्वादि त्वन्मुखसौभाग्यं शिक्षितुमिव त्वदाननञ्च गुरुं सेवते। अनयोः सौभाग्यं पद्मचन्द्रयोरद्यापि

ये हिरण्यकशिपुं रिपुमुच्चै-
रावणञ्च कुरुवीरचयं च।
हन्त हन्तुमभवंस्तव योगा-
स्ते नरस्य च हरेश्च जयन्ति ॥ १०२ ॥
केयमर्द्धभवता भवतो हे
मायिना ननु भवः सकलस्त्वं।

नागतमिति सूच्यते। पाञ्चजन्येत्यादिश्लोकत्रयेण मूलप्रकृतिरेव वर्णिता। नयनाचितेति आचारक्यङन्तान्निष्ठा। हासकरेति ताच्छील्ये टः ॥ १०१ ॥

य इति। हे विष्णो ये तव क्रमेण नरस्य मनुष्यस्य च हरेः सिंहस्य च तथा नरस्य श्रीरामचन्द्रस्य हरेः सुग्रीवस्य च तथा नरस्य अर्ज्जुनस्य हरेः श्रीकृष्णस्य च संयोगा उच्चैरधिकं रिपुं हिरण्यकशिपुं हन्तुं तथा उच्चैरिपुं रावणं हन्तुं तथा उच्चैरिपुं कुरुवीराणां भीष्मादीनां चयं समुदायं हन्तुं अभवन्, ते
७ तव नरस्य हरेश्च योगा जयन्ति सर्व्वोत्कर्षेण वर्त्तन्ते हन्त आश्चर्य्ये। अवतारत्रयेऽपि नरहरियोगावलम्बनाद्योगः संश्लेषो मैत्री च ॥ १०२ ॥

केति। हे विष्णो तव इयं पुराणादिषु दृश्यमाना अर्द्धं भवो महेशो यस्य तादृशोऽर्द्धभवः, तत्ता हरिहरमूर्त्तिता काऽप्यपूर्व्वा आश्चर्य्यकारिणी। मायिना भवता देहैः मुखात् प्रभृति चरणपर्य्यन्तं श्यामलादितत्तदमाधारणचिह्नयुक्तताऽर्द्धस्य,

शेषतामपि भजन्तमशेषं
वेद वेदनयनो हि जनस्त्वां ॥ १०२ ॥

अर्द्धस्य च धवलत्वाद्यसाधारणचिह्नयुक्तता ईदृशी लोकोत्तरा तव माया आश्चर्य्यकारिणीत्यर्थः। अथ च केयं अपि तु अनुचितैव। ननु यस्मात् त्वं सकलः समयो भवो महेशः। अथ च चन्द्रकलासहितो यो महेशः स्वतन्त्रमूर्त्तिः स त्वमेव। तथा च सकलभवरूपस्यार्द्धभवरूपता विरोधादयुक्ता। आश्चर्य्यकारित्वेऽप्ययमेव हेतुः। हरिहरात्मकता च अवतारान्तरमिति। अवतारभेदेन तु विरोधपरिहारः। भवत इयं अर्द्धभवता का कथमूढेत्यर्थ इति वा। अथ च तवेयमर्द्धसंसारता काऽपि तु विरुद्धा चित्ररूपा वा। यतः सकलः समयः कलाभिरवयवैः सह वर्त्तमानस्य भवः संसारः, उत्पत्तिधर्म्मा त्वमेवेति वा। हि यस्मात् वेदा एव नयनानि यस्य सः सकलवेदार्थनिश्चयदृढमत्ययो जनो लोकस्त्वां शेषतां एकदेशभूततां पृथग्भूततां भजन्तमपि अशेषं चराचरं जगद्रूपं वेद जानाति। सर्व्वं विष्णुमयं जगदित्यादिश्रुतिस्मृतिभिस्तव चराचररूपत्वप्रतिपादनात् त्वयि सकलभवत्वं युक्तमेवेत्यर्थः। किं पुनर्हरिहरादिचिह्नरूपधारणं। अथ च शेषोऽपि विष्णोरेव मूर्त्तिः, अनन्ततां भजति स एव कथमशेषोऽनन्तो न भवतीति च विरोधः, व्याख्यानान्तरेण तत्परिहारः ॥ १०२ ॥

प्राग्भवैरुदगुदग्भवगुम्फा-
न्मुक्तियुक्तिविहताविह तावत्।
नापरः स्फुरति कस्यचनापि
त्वत्समाधिमवधूय समाधिः॥ १०४॥

प्राग्भवैरिति। प्राग्भवैः प्राक्तनैः पूर्व्वजन्मोपार्जितैः कर्मभि-र्हेतुभिः उदगुदग्भवस्य उत्तरोत्तरस्य संसारस्य जन्मनो वा गु-म्फाद्ग्रथनाद्धेतोः आत्यन्तिकी दुःखनिवृत्तिः, अविद्यास्तमयो वा मोक्ष इत्येव लक्षणा मुक्तेर्युक्तिर्योगः प्राप्तिरिति यावत्। तस्याः विहतौ अनेकजन्मसु तत्तत्सुकृतदुष्कृतरूपकर्मार्जनान्मूलसद्भा-वात् संसारानिवृत्तौ कथं नाम मुक्तिः सम्भवतीत्यादिभिर्युक्ति-भिरनुपपद्यमानतायां तावन्निश्चयेन सत्यां इहैव पूर्व्वपक्षे विषये कस्यचनापि वादिनः त्वयि समाधिश्चित्तैकाग्र्यं ध्याने सन्ततानुचिन्तनं तदवधूय परिहृत्य अपरोऽन्यः समाधिः परि-हारः सिद्धान्तरूपो न स्फुरति प्रकाशते। उक्तयुक्त्या यद्यपि मुक्तिविहतिस्तथापि तव ध्यानादिद्वारा प्राप्तपरमात्मरूपसा-क्षात्कारेण च प्राचीनतत्तज्जन्मार्जितकर्मणां समूलमुन्मूलनादि-दानीमन्यकर्मानारम्भे प्रारब्धकर्म्मणो भोगादेव क्षयान्नैष्कर्म्य-सम्पन्ने मुक्तिर्युज्यत एवेति सर्व्वेषामपि वादिनां त्वत्समाधिरेव सिद्धान्त इत्यर्थः। मुक्तिहेतुस्त्वमेवेति भावः। न तावत् स्फुर-तीति वा॥ १०४॥

ऊर्द्धदिक्कदलनं किमकार्षीः
किं तनं हरिहरीभवनाय।
किञ्च तिर्य्यगभिनो नृहरित्वे
कः स्वतन्त्रमनु नन्वनुयोगः॥ १०५॥

ऊर्द्धेति। हे विष्णो त्वं हरिहरीभवनाय अहरिहरयोरपि हरिहरयोर्भवनाय हरिहरमूर्त्तीभवितुं ऊर्द्धा दिग्यस्मिन् तदूर्द्धदिक्कमेवम्भूतं दलनं विभागो यस्मात्तादृशीं तनं हि:प्रकारं किं किमर्थमकार्षीः, हरिहरमूर्त्तौ चरणादिमूर्द्धपर्य्यन्तं तत्तद्दिग्दृग्वर्णादिधारणेऽधोभागमारभ्योर्द्धभागपर्य्यन्तं किमर्थमकार्षीः। नृहरित्व इव तिर्य्यग्विभागमेव किमिति नाकार्षीरित्यर्थः। चरणादेवारभ्य देवतावर्णनस्य कर्त्तुं युक्तत्वादूर्द्धदिक्केत्युक्तं। यदि च हरिहरतनुं त्वमूर्द्धदिक्कविभागमकार्षीस्तर्हि नृहरित्वे च नरहरीभवितुं तिर्य्यग्यथा तथा किमित्यभिनः विभक्तवान्। कण्ठादधोभागे नरत्वेन ऊर्द्धभागे सिंहत्वेनैव तिर्य्यग्दिक्कविभागं किमित्यकार्षीः। हरिहरत्व इव ऊर्ध्वदिक्कविभागमेव किमिति नाकार्षीरित्यर्थः। एवमाक्षेपद्वयं स्वयमेव परिहरति। ननु भो विष्णो स्वतन्त्रं त्वां अनु त्वां प्रति अनुयोगः प्रश्नः कः, अपि तु न युक्तोऽयं प्रश्नद्वारक आक्षेपः। समर्थो हि स्वेच्छया यत्किञ्चित् करोति परं किमर्थमेवं करोषीत्याक्षेपार्हः स न भवतीत्यर्थः। न खलु परतन्त्राः प्रभुधिय इति न्यायेन स्वेच्छामात्रेण तथारूपं करोषीति भावः, अत्र हरिहरनरहरिवर्णनं। ऊर्ध्वदिक्केति यजमौषौ कप्॥ १०५॥

आप्तकाम सृजसि त्रिजगत् किं
किं भिनत्सि यदि निर्म्मितमेव ।
पासि चेदमवतीर्य्य मुहुः किं
स्वात्मनाऽपि यदवश्यविनाश्यं ॥ १०६ ॥
जाह्नवीजलजकौस्तुभचन्द्रान्
पादपाणिहृदयेक्षणवृत्तीन् ।

आप्तेति । हे आप्तकाम अवाप्तसकलाभिलाष विष्णो त्वं त्रिजगत् किं सृजसि । यदि निर्म्मितमेव तर्हि निष्प्रयोजनमेव किं भिनत्सि । यदि चेदं स्वात्मनाऽपि यदवश्यं विनाश्यं स्वयमपि निश्चयेन संहरणीयमेव तर्हि मुहुर्वारं वारं तेन तेन रूपेण अवतीर्य्य जन्मादिक्लेशमप्यनुभूय इदं जगत् किमर्थं पासि च । यदवश्यं विनाश्यं तत्कोऽपि न हि स्वात्मना स्वयमेव पालयति प्रयोजनाभावात् । सृष्टिपालनसंहारान् किमर्थं करोषीत्यर्थः । अत्रापि कः स्वतन्त्रमित्यादि पूर्व्व एव परिहारः । ब्रह्मादिरूपस्त्वमेवेति भावः । इष्टप्राप्तिरनिष्टनिवृत्तिश्चेति द्वयं प्रयोजनं सर्व्वस्य । ततश्च इष्टप्राप्तौ अनिष्टनिवृत्तेरन्तर्भावं मन्यमानः श्रीहर्ष आप्तकामेत्येव सम्बुद्धिमकृतेति ज्ञेयं ॥ १०६ ॥

जाह्नवीति । अस्मित्सलिलादुत्थिता निर्गता लोला स्वभावतश्चपलाऽपि श्रीर्लक्ष्मीः यथाक्रमं जाह्नवी च जलजं पाञ्चजन्यश्च कौस्तुभश्च चन्द्रश्च तान् पादे पाणौ हृदये ईक्षणे नेत्रे वृत्तिरवस्थानं येषामेवम्भूतान् परिचितान् समुद्रैकाश्रयतया सह-

उत्थिताऽब्धिसलिलात्त्वयि लोला
श्रीः स्थिता परिचितान् परिचिन्त्य ॥ १०७ ॥
वस्तु वास्तु घटते न भिदानां
यौक्तनैकविधबाधविरोधैः ।

वासमज्ञातखेदान् सुहृदस्त्वयि विष्णौ परिचिन्त्य विचार्य्य दृष्ट्वैव च त्वयि स्थिता श्रीः चाञ्चल्यं परित्यज्य त्वयि नित्यावस्थिताऽभूत्। किं जाङ्गव्यादयो लक्ष्मीश्च तव सेवां कुर्व्वन्ति, एतादृशः परमपुरुषोऽसीति भावः ॥ १०७ ॥

वस्त्विति। हे विष्णो घटपटादिवस्तुजातं यौक्तैः युक्तिसम्बन्धिभिर्युक्तिशतैर्न्यायोत्थैर्नैकविधैर्बहुप्रकारैर्बाधैः साधारणदूषणैः तथाविधैः ब्रह्माद्वैतप्रतिपादकसर्व्वोपनिषद्वाक्यवैपरीत्यरूपैरसाधारणदूषणैश्च यद्वा अनेकविधान् भिन्नान् घटपटादीन् बाधन्ते इति नैकविधबाधास्तथाभूतैर्विरोधैर्हेतुभिरिदमस्माद्भिन्नमिदमस्माद्भिन्नमित्येव विशेषणत्वेन प्रतीयमानानां भिदानां वास्तु आधारो न घटते न प्रयुज्यते किन्तु अभिन्नं ब्रह्माद्वैतमेव घटत इत्यर्थः। तर्हि भेदप्रतीतेः का गतिरित्यत आह। तदिति। यस्मादुक्तहेतुभिर्भेदस्तद्विशिष्टं वस्तु वा न घटते तस्मादनिर्व्वाच्यानाद्यविद्यारूपेण त्वदीहितेन त्वच्चेष्टितेनानिर्व्वचनीयत्वादिना अतिप्रसिद्धेन त्वदीहितेन वा कारणेन कर्त्रा वा विजृम्भितः प्रकटीभूतः कृतो वाऽविद्यमानोऽप्यारोपत्वेन प्रत्यायितः घटपटादिरूपो भेदो यस्य तादृशमेव तद्वस्तुजातमि-

तत्त्वदोहितविजृम्भिततत्त्व-
ह्नेदमेतदिति तत्त्वनिरुक्तिः ॥ १०८ ॥
वस्तु विश्वमुदरे तव दृष्ट्वा
वाह्यवत् किल मृकण्डतनूजः ।

त्वयैवं तत्त्वस्य प्रामाणिकस्यार्थस्य निरुक्तिर्निर्व्वचनं निश्चितोक्तिः। अभेददर्शनोक्तयुक्तिशतबाधात् तत्तच्छ्रुतिविरोधाच्च तत्त्वतो वस्तुभेदाभावे प्रतिभासमानस्य च भेदस्य द्विचन्द्रबुद्धिवदप्रामाणिकत्वे सकलमिदं जगदभिन्नमिति श्रवणमननादिक्रमेण सञ्जातमभवत्। साक्षात्कारस्य सर्व्वदानन्दघनस्त्वमेको न तु त्वदतिरिक्तं किञ्चिदिति बोधःसमुदेतीति तत्त्वनिर्णय इति भावः। एतेन तत्त्वमसीत्याद्युपनिषदर्थोऽपि सङ्गृहीत इति ज्ञेयं। योक्तेति समस्ते ऽण्। युक्त्यन्तरग्रन्थान्तरात् सुधिया बोद्धव्यं विस्तरभयादत्र न लिखितं ॥ १०८ ॥

वस्त्विति। किलेत्यागमे हे विष्णो मृकण्डतनूजः मार्कण्डेयः वाह्यवत् वाह्ये त्रिजगति यथा वर्त्तते तथैव तवोदरे वर्त्तमानं विश्वं त्रैलोक्यसम्बन्धिघटपटादिसर्व्वं वस्तु दृष्ट्वा विशेषणमिश्रं एकत्रैवोदरे द्वयोरपि स्थितत्वादविविक्तमुभयं पूर्व्वं वहिरन्तश्च वर्त्तमानत्वाद् द्विविधं स्वात्मानं न विविञ्चन् अनिश्चिन्वन् वहिश्चरो योऽहमुदरं प्रविष्टः स कः, यश्च पूर्व्वमेवोदरे वर्त्तते स क इति भवन्मायोपवृंहितत्वाद्विशेषेणाजानन् स कतमो द्वयोरन्तर्वहिश्चरयोर्मध्ये क इति विवेक्तुमशक्नुवन् सन् निर्ययौ। मायाबा-

स्वं विमिश्रमुभयं न विविञ्च-
न्निर्य्ययौ स कतमस्त्वमवैषि॥ १०९॥
ब्रह्मणोऽस्तु तव शक्तिलतायां
मूर्द्ध्नि विश्वमथ पत्युरहीनां
बालतां कलयतो जठरे वा
सर्व्वथाऽसि जगतामवलम्बः॥ ११०॥

त्वत्तो भवन् निश्वासेन त्वदोदरं प्रविश्य तत्र लोकत्रयं प्रदर्श्य मार्क-ण्डेयस्तस्य वक्त्राच्छनैर्विनिर्गतः स कतम इति त्वमेवावैषि जानीषे नान्य इत्यर्थः। अयमितिहासो हरिवंशादेव ज्ञेयमित्यलं। बा-लमुकुन्दरूपोऽपि त्वमेवासीति भावः। यद्वा यस्य तवोदरे बाह्यं सर्व्वं वस्तु दृष्ट्वा मार्कण्डेयो जठरस्थेन स्वेनैव विमिश्रमुभयं स्वम-जानन् सन् निर्ययौ स कतमोऽनेकेष्ववतारेषु मध्ये को वा वि-शिष्टस्तवावतार इति त्वमेव जानीषे नान्यः कश्चित् त्वां जानाति स्वप्रकाशत्वादित्यर्थ इति व्याख्येयं। कतम इत्यत्र बहूनां जा-तिपरिप्रश्ने डतमच् (पा०५।३।९३)॥ १०९॥

ब्रह्मण इति। स्थावरजङ्गमात्मकं विश्वं ब्रह्मणः परमात्म-स्वरूपस्य तव शक्तिरूपायां सामर्थ्यरूपायां लतायां सृष्टेः प्राक् अस्तु वर्त्ततां। सृष्टेः प्रागमूर्त्तंब्रह्मणि विश्वं लीयत इति पुरा-णोक्तेः। तथा च त्वन्मायालतायां विश्वं वर्त्तते। अथ सृष्ट्या-नन्तरं सृष्टं विश्वं त्वदंशस्य अहीनां पत्युः शेषस्य मूर्द्ध्नि वर्त्ततां। प्रलये च संहारार्थं बालतां मायाशिशुत्वं कलयतोऽङ्गीकुर्वतः

धर्म्मवीजसलिला सरिदङ्घ्रा-
वर्थमूलमुरसि स्फुरति श्रीः।
कामदैवतमपि प्रसवस्ते
ब्रह्म मुक्तिदमसि स्वयमेव ॥ १११ ॥
लीलयाऽपि तव नाम जना ये
गृह्णते नरकनाशकरस्य।

तवैव जठरे चास्तु समस्तमास्तामित्येवं सर्व्वथा सर्व्वप्रकारेण त्वं जगतामवलम्बोऽसि। वा समुच्चयार्थः। एतेन सृष्टिस्थितिलयकर्त्ता त्वमेवेति सूचितं। अस्तीत्यपि क्वचित् पाठः ॥ ११० ॥

धर्म्मेति। हे विष्णो धर्म्मस्य प्रथमपुरुषार्थस्य वीजं प्ररोहकारणं सलिलं यस्याः सा सरिद् गङ्गा तव अङ्घ्रौ चरणे स्फुरति शोभते। तथा अर्थस्य द्वितीयपुरुषार्थस्य मूलमादिकारणं श्रीस्तवोरसि स्फुरति। तथा कामरूपदैवतं कामरूपस्तृतीयपुरुषार्थोऽपि ते प्रसवः कृष्णरूपस्य तव प्रद्युम्नरूपतया पुत्रत्वादधीन एवेत्यर्थः। तथा मुक्तिदं चतुर्थपुरुषार्थभूतमोक्षदानसमर्थं ब्रह्म परमात्मरूपेणैव त्वमसि चतुर्विधपुरुषार्थहेतुतया धर्म्मार्थकाममोक्षार्थिनां त्वदुपासनैवोचितेति भावः ॥ १११ ॥

इदानीं कतिचिद्भिः श्लोकैः भगवन्नामसङ्कीर्त्तनमाहात्म्यं वर्णयति। लीलयेति। हे विष्णो ये जना नरकस्य भौमासुरस्य नाशकरस्य, अथ च पुण्यश्लोकत्वान्निरयनाशकारिणस्तव नाम राम विष्णो इत्यादिसञ्ज्ञां सङ्केतपरिहासादिप्रसङ्गान्तरकृ-

तेभ्य एव नरकैरुचिता भी-
स्ते तु बिभ्यतु कथं नरकेभ्यः ॥ ११२ ॥
मृत्युहेतुषु न वज्रनिपाताद्
भीतिमर्हति जनस्त्वयि भक्तः।

यया लीलया विलासमात्रेणापि गृह्णते उच्चारयन्ति तेभ्य एव त्वन्नामग्राहिभ्य एव सकाशात् पातकियातनास्थानभूतैर्महारौरवादिनरकैर्भीस्तत्कर्तृका तदधिकरणा वा भीतिरुचिता योग्या तेभ्य एव तैर्भयं प्राप्तुमुचितमित्यर्थः। ते तु नरकनाशकारिभवन्नामग्राहिणः क्षीणपापा नराः पुनः नरकेभ्यः सकाशात् कथं नाम बिभ्यतु भयं प्राप्नुवन्तु अपि तु न कथञ्चित्। तदुक्तं श्रीभागवते।

साङ्केत्यं पारिहास्यञ्च स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥ इति।

लीलयाऽपीत्यपिशब्देन ये बुद्धिपूर्वं भवन्नामजपमेव कुर्वन्ति तेभ्यो नरका बिभ्यन्तीति किमु वक्तव्यमिति सूचितं। नरकैर्भीरिति, कर्तृकर्मणोः कृतीति (पा० २।३।६५) षष्ठी प्राप्तावपि भीरिति सम्पदादित्वात् क्विपि। स्त्र्यधिकारविहितत्वात् स्त्रीप्रत्ययत्वे कर्तृकरणयोरिति (पा० २।३।१८) कर्त्तरि तृतीया ॥ ११२ ॥

मृत्युहेतुष्विति। हे विष्णो त्वयि विषये भक्तो जनोऽनेकेषु मृत्युहेतुषु मध्ये वज्रनिपातान्मृत्युकारणात् सकाशाद्भीतिं ना-

यत् तदोच्चरति वैष्णवकण्ठा-
न्निष्प्रयत्नमपि नाम तव द्राक् ॥ ११३ ॥
सर्व्वथाऽपि शुचिनि क्रियमाणे
मन्दिरोदर इवावकिरा ये।

र्हति भयं प्राप्तुं योग्यो न भवति। यद्यस्मात् कारणात् तदा वज्रपातसमये तस्य वैष्णवस्य कण्ठान्निष्प्रयत्न निरन्तरं हरिस्मरणाभ्यासबलेन तस्मिन् काले विशिष्टमुद्यमं विनापि तव श्रीरामकृष्णादिनाम द्राक् शीघ्रमुच्चरति निर्गच्छति। वज्रनिपातान्मरणे सञ्जातेऽपि तस्मिन् समये उक्तरीत्या नामोच्चारणसद्भावात् तावन्मात्रेण मोक्षप्राप्तेः पुनर्जन्माभावान्मृत्योर्भयं वैष्णवस्य नास्तीति भावः। मृत्युहेतुषु मध्ये अन्यापेक्षया दारुणात् मृत्युहेतोर्वज्रनिपातादपि सकाशाद्वैष्णवो भयं नार्हति, अन्येभ्यो नार्हतीति किं वाच्यमित्यर्थः। तस्मान्मृत्युसमये वैष्णवकण्ठान्निष्प्रयत्नमपि तव नाम द्राक् निर्गच्छति। व्याघ्राद्यनेकेषु मृत्युषु हरिस्मरणादेव मृत्युभयं नास्तीति ज्ञातव्यं। उच्चरति सकर्म्मकत्वाभावात् तङभाव.॥ ११३ ॥

स्मरणमाहात्म्यमाह। सर्व्वथापीति। हे विष्णो सर्व्वथा मनोवाक्कायनियमाद्यनेकप्रकारैर्निर्धूतपापतया शुचिनि शुद्धे ब्रह्मार्पितफलत्वेन बन्धककर्म्मरहिते वा क्रियमाणेऽपि भविनां संसारिणां चेतसि मनसि ये अज्ञानप्रमादकृता अवकरा रागादिदोषा उद्भवन्ति तेषां दोषाणां भवतोऽनुस्मृतिर्ध्यानं तस्या

उद्भवन्ति भवि चेतसि तेषां
शोधनी भवदनुस्मृतिधारा ॥ ११४ ॥
अस्मदाद्यविषयेऽपि विशेषे
रामनाम तव धाम गुणानां ।

धारा परम्परैव शोधनी चालनहेतुर्नान्यः कश्चित्। कस्मि-न्निव। मन्दिरोदरे गृहमध्य इव यथा पुनः पुनर्मार्जनेन विर-जस्के क्रियमाणे गृहमध्ये ये तृणरजःपुञ्जाः नवा नवा उद्भ-वन्ति तेषां शोधनी सम्मार्जनी भवति तथेत्यर्थः। भवदनुस्मृति-रेव चित्तशुद्धिसम्पादनद्वारा नैष्कर्म्यसम्पादनेन मोक्षहेतुरिति भावः। भुवीति पाठे चेतस्येव भुवि स्थाने इत्यर्थः। सम्मार्जनी शोधनी स्यात्। सङ्करोऽवकरस्तथेत्यमरः ॥ ११४ ॥

पुनरपि नामान्तरापेक्षया रामनाम्नो माहात्म्यमाह। अ-स्मदिति। अत्रैते गुणाः सन्तीति विशेषाकारेण विशेषे अस्म-दादीनामज्ञानामविषये बुध्यगोचरे सत्यपि तव सहस्रनामसु मध्ये रामेति नाम गुणानां धाम स्थानं। यद्वा हे राम तव नाम गुणानां स्थानं। अज्ञातेऽपि विशेषे कुत एव तन्निर्णीतमि-त्याशङ्क्य अर्थापत्तिं प्रमाणयति। अन्यथा तु पुनर्यद्येवं न स्यात् तर्हि ननु जनुस्त्रितयेऽपि जामदग्न्यदाशरथिबलभद्ररूप जन्मत्रयेऽपि भवतैव कस्माद्धेतोः आग्रहेण पौनःपुन्येन वा रामरामेत्येव नाम अन्वयन्धि अङ्गीकृतं। अनेकजन्मस्वेतस्य त्वयैव स्वीकारात् तवाप्येतत् प्रियतममिति ज्ञायते। तस्माद्रा-

अन्वबन्धि भवतैव तु कस्मा-
दन्यथा ननु जनुस्त्रितयेऽपि॥ ११५॥
भक्तिभाजमनुगृह्य दृशा मां
भास्करेण कुरु वीततमस्कं।
अर्पितेन मम नाथ न तापं
लोचनेन विधुना विधुनासि॥ ११६॥
लङ्घयन्नहरहर्भवदाज्ञा-
मस्मि हा विधिनिषेधमयीं यः।

मनाम गुणगणस्थानमित्यर्थापत्तिः। तथा च शिवेनापि राम रामेति रामेतीत्यादि पार्वतीं प्रत्युक्तं॥ ११५॥

भक्तेति। हे नाथ त्वं भास्करेण सूर्य्यरूपया दक्षिणया दृशा त्वयि भक्तिभाजं मामनुगृह्य मयि प्रसाददृष्टिपातं कृत्वा वीततमस्कं गताज्ञानं कुरु। प्रसाददृष्टिपातनात् मम सकलामथविद्यां विनाशयेत्यर्थः। सूर्य्येण च तिमिरं निरस्यते। तथा मयि अर्पितेन प्रसादनिहितेन विधुना चन्द्ररूपेण वामलोचनेन कृत्वा मम त्रिविधमपि तापं न विधुनासि न दूरीकरोषि, अपि तु निराकुर्व्विति काकुः। चन्द्रेण च शीतलत्वात् तापशान्तिः क्रियते। एवं स्तुवन्तं मां प्रसाददृश्या विलोक्य कृतार्थीकुर्व्विति भावः॥ १६॥

लङ्घयन्निति। हे स्वामिन् योऽहं, सन्ध्यावन्दनादि कुर्य्यादिति विधिः, ब्राह्मणहननादि न कुर्य्यादिति निषेधः, तन्मयीं

दुर्लभं स तपसाऽपि गिरैव
त्वत्प्रसादमहमिच्छुरलज्जः ॥ ११७ ॥
विश्वरूप कृतविश्व कियत् ते
वैभवाद्भुतमणौ हृदि कुर्वे।

तद्रूपां भवदाज्ञां श्रुतिस्मृतिरूपामहरहः प्रतिदिनं लङ्घयन्नति-क्रामन् यत् कर्त्तव्यतया त्वयोपदिष्टं तन्न करोमि, यन्न कर्त्त-व्यमित्युपदिष्टं तत् करोम्येवेति त्वदाज्ञां लङ्घयन् अस्मिन् वर्त्ते। हा कष्टं, अनुचितकारी सोऽहं महीयसा तपसा दुर्लभं त्वत्प्र-सादं इच्छुः प्रसीदेति गिरैव प्रार्थयमानःसन् अलज्जो निर्ल-ज्जोऽस्मि। यो हि एकदाऽपि प्रभोराज्ञां करोति सोऽपि कथ-ञ्चित् स्वामिप्रसादं लभते। यस्तु कदापि स्वाम्याज्ञां न करोति स दग्धोऽपि भवति वाङ्मात्रेण प्रसादमिच्छन्निर्लज्ज एव। अत एव दयालुस्त्वं प्रसीद प्रसीदेति भावः। त्वत्प्रसादं न लोकेति षष्ठीनिषेधः (पा० २।३।६८) ॥ ११७ ॥

विश्वेति। हे विश्वरूप स्थावरजङ्गमात्मक, तथा कृतविश्व स्थावरजङ्गमकारिन् विष्णो, अहं ते तव वैभवाद्भुतं सामर्थ्याति-शयजन्यं तद्रूपं वा आश्चर्यं अणौ परमाणुरूपे हृदि मनसि कियत् किं परिमाणं कुर्वे, अपि तु आधारस्याल्पीयस्त्वादा-धेयस्य च महीयस्त्वात् सर्व्ववैभवाद्भुतमणौ हृदि धारयितुं न शक्नोमीत्यर्थः। यद्यपि ते सामर्थ्यं महत् तथापि कियदल्पमेव धारयामीति वा युक्तमेतत्। यस्माद् दरिद्रोऽकिञ्चनो जनः

हेम नह्यति कियन्निजचीरे
काञ्चनाद्रिमधिगत्य दरिद्रः ॥ ११८ ॥
इत्युदीर्य्य स हरिं प्रति सम्प्र-
ज्ञातवासिततमः समपादि।

काञ्चनाद्रिं सुमेरुमधिगत्य प्राप्य स्फुरदुरुसुवर्णग्रहणाभिलाषो ऽपि सन् शतधा शकलीभूते अत्यन्तजीर्णे निजचीरे स्वीये वस्त्रे कियत् किं परिमाणं हेम नह्यति बध्नाति, अपि तु अल्पमेव ग्रन्थौ बध्नाति असामर्थ्यात्, तथा सकलगुणवर्णनाभिलाषे सत्यपि सामर्थ्याभावात् कियन्मात्रं गुणवर्णना कृतेति भाव इति स्तुत्युपसंहारः ॥ ११८ ॥

इतीति। स नलो हरिं प्रति इत्युक्तप्रकारेण उदीर्य्य प्रसाद्य सम्प्रार्थ्य द्विविधसमाधिमध्ये सम्प्रज्ञाताख्येन समाधिना तत्र वासिततमः अतितरां वासितमनाः तदेकतानः समपादि जातः, अत एव भावनाबलेन सम्प्रज्ञाते ध्यानबलेन विलोकिते साक्षात्कृते विष्णोर्विषये प्रीतेः प्रेम्णः भक्तेश्च सदृशानि योग्यानि कर्म्माणि आनन्दवाद्यगीतनृत्यादीनि चरितुं कर्त्तुं शीलं यस्य सः। यदुक्तं भागवते।

शृण्वन् सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्म्माणि च यानि लोके।
गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः॥ इति।

भावनाबलविलोकितविष्णोः
प्रीतिभक्तिसदृशानि चरिष्णुः ॥ ११९ ॥
विप्रपाणिषु भृशं वसुवर्षी
पात्रसात्कृतपितृक्रतुकव्यः।

एवं सम्प्रार्थ्य प्रतिमादिसाकारध्यानेन विष्णुं साक्षादृष्ट-तेति भावः। विष्णुरिति पाठे भावनाबलेन विलोकितो विष्णुर्येन सः, अत एव प्रीतिभक्तिसदृशानि चरिष्णुः। विष्णुप्रीत्यर्थं भक्तियोग्यान्युपहारादीनीत्यर्थः। ध्यानसमाधिर्द्विविधः सम्प्रज्ञातोऽसम्प्रज्ञातश्च। ध्येयध्यातृभावयुक्तः साकारध्यानसमाधिः सम्प्रज्ञातः। सम्वित्सवेद्यभेदविलोपेन निराकारस्वप्रकाशपरमाणुलक्षणात्मसाक्षात्स्यध्यानसमाधिरसम्प्रज्ञात इति योगशास्त्रं ॥ ११९ ॥

विप्रेति। एष नलः भक्तः सन् शरणं भोजनगृहं प्रविवेश, नयलं गृहप्रवेशिनो जातिः। किम्भूतः। विप्रपाणिषु भृशं नित्यदानसम्बन्धिवसुगोभूतिलहिरण्यादि वर्षत्येवंशीलः। तथा पात्रसात्कृतं विद्यातपोभ्रतयुक्तपात्रभूतब्राह्मणाधीनं देयं कृतं पितृक्रतुकव्यं नित्यश्राद्धरूपपितृयज्ञसम्बन्धि कव्यं येन। तथा श्रेयसा स्नानदेवपूजादिनित्यश्राद्धतत्कर्मानुष्ठानजन्येन पुण्येन पुष्पादिना च हरिहरावभेदबुद्ध्या विष्णुशिवरूपनारायणं परिपूज्य तस्मिंस्तदर्पणेन तं परितोष्य भक्तिनम्रः सन् नमस्कारं कृत्वा नित्यश्राद्धान्नशेषार्पणं कृत्वा भोजनार्थं गृहं प्राविशदिति

श्रेयसा हरिहरौ प्रतिपूज्य
प्रह्व एष शरणं प्रविवेश ॥ १२० ॥
माध्यन्दिनादनुविधेर्वसुधासुधांशु-
रास्वादितामृतमयौदनमोदमानः ।

भावः । हव्यकव्ये दैवपैत्रे इत्यमरः । पात्रमाहेये चाचेति (पा० ५।४।५५) साति: ॥ १२० ॥

माध्यन्दिनादिति । स वसुधासुधांशुर्भूचन्द्रो नलो माध्यन्दिनान् मध्यन्दिने विधेयाद् विधेरनु पश्चात् पञ्चमहायज्ञनिर्वपणानन्तर आस्वादितः अमृतमयशाकसूपादिव्यञ्जनादिना अमृतरूप ओदनस्तेन शालितण्डुलप्रभवौदनेन कृत्वा मोदमानः, आस्वादितो अमृतमय ओदनो येन, अत एव मोदमानो हृष्यमाणो हृष्टतमः, एवम्भूतः सन् प्राच यत्र भैम्या सह परिहासविलासं कृतवांस्तं पूर्व । अथ च वास्तुशास्त्रे शयनस्थानं प्राच्य कर्त्तव्यमित्युक्तत्वान्मुख्यराजप्रासादात् पूर्वदिक्स्थं .सचित्रं चित्रलेख्ययुक्तमद्भुतरूप वा । तया अत्युच्चत्वात् शोभासाम्याच्च अविदूरितो निकटीकृतो वैजयन्तो महेन्द्रप्रासादो येन त वैजयन्तेन तुल्य वेश्माचल प्रासादरूपं पर्व्वत निजरुचीभि. स्वीयकायकान्तिभिरलञ्चकार । भोजन कृत्वा त प्रासादमारूढवानित्यर्थः । चन्द्रोऽपि उदयन् आस्वादितामृतरूपेणोदनेन मोदमानः सुधापूर्णोदनेन मोदमान. सुधापूर्णोऽद्भुतरूपं प्राच्यां वर्त्तमानत्वादुच्चसन्निहितवैजयन्तं प्राच्यां

प्राचं सचित्रमविदूरितवैजयन्तं
वेश्माचलं निजरुचीभिरलञ्चकार ॥ १२१ ॥
भीमात्मजाऽपि कृतदैवतभक्तिपूजा
पत्यौ च भुक्तवति भुक्तवती ततोऽनु ।

वर्त्तमानमचलमुदयाचलं निजकिरणैरलङ्करोति । अथ च चित्रमिति विरोधादाश्चर्यं। चन्द्रो हि मध्यन्दिने वर्त्तमानं मध्यन्दिनसमयानन्तरमस्ताचलमेव रुचिभिरलङ्करोति न तु प्राच्यमचलं। अयं तु चन्द्रो मध्याह्नानन्तरमपि प्राच्यमचलमलञ्चकारेत्याश्चर्यमित्यर्थः । चित्रस्वानिति पाठे पूर्व्ववदन्यत्। आस्वादितं सर्व्वैर्भ्यो गृहीतं यदमृतं जलं तद्रूपेणोदनेन मोदमानः सूर्य्योऽप्येवम्भूतमुदयाचलं निजदीप्तिभिरलङ्करोति । अथ च सूर्य्योऽपि मध्याह्नानन्तरमस्ताचलमेवालङ्करोति न तु प्राच्यमलङ्करोति। अयं तु सूर्य्यः प्राञ्चमचलमलङ्कृतवानिति चित्रमित्यर्थः । प्राचं ऋत्विगित्यादिना (पा० ३।२।५९) क्विनि उगिदचामिति (पा० ७।१।७०) नुमि रूपं ॥ १२१ ॥

भीमेति। ततो नलप्रासादारोहणानन्तरं भीमात्मजाऽपि तस्याङ्कं अध्यास्त । कीदृशी। कृता गौर्य्यादिदेवतानां भक्त्या षोडशोपचारपूजा यया। तथा पत्यौ च भुक्तवति सति स्वयमपि भुक्तवती। अनन्तरञ्च भूषणभरेण अलङ्कारबाहुल्येन योऽतिभरो गौरवं तेन अलसमङ्गं यस्याः सा। भूषणबाहुल्येन अतिभरा यया वा भूषणभरमपि वोढुमसमर्था अतिमृद्वी

तस्याङ्कमङ्कुरिततत्परिरिप्सुमध्य-
मध्यास्त भूपणभरातितराससाङ्गी ॥ १२२ ॥
तामन्वगाद्श्रितविम्बविपाकचञ्चोः
स्पष्टं शलाटुपरिणत्युचितच्छदस्य।

तदशान्मन्दगतिर्वा। कीदृशमङ्कं। अङ्कुरिता सम्यगुदिता तत्परिरिप्सा भैम्यालिङ्गनवाञ्छा यस्य तादृशो मध्यो मध्यदेशो यस्य। उक्तविशेषणविशिष्टा सती नलाश्रया तदङ्कं समुपाविशदिति भावः। अपि समुच्चयार्थः। पत्यौ भुक्तवतीति पतिव्रताजातिः। परिप्सुद्धमध्यमिति पाठान्तरं चिन्त्यं। अङ्कं अधिशीङ्स्थासामिति (पा० १४४६) कर्म्मत्वं ॥ १२२ ॥

तामिति। काऽपनिर्द्दिष्टनामा अतिसुन्दरी वाला सखी तां भैमीं अनुलचीकृत्य पश्चात् अगात् जगाम। कीदृशी। कीरस्य शुकस्यैकं पञ्जरं करवारिरुहे पाणिपद्मे वहन्ती। उत्प्रेच्यते। शुकस्य आत्मनो वा सुवर्णादिघटितत्वात् पञ्जरस्यैव वा मूर्त्तिं सौन्दर्य्यपुञ्जमिव पृथक्करे पञ्जररूपेण वहन्तीति सम्बन्धः। किम्भूतस्य कीरस्य। अश्रितस्य भचितस्य पक्कस्य विम्बीफलस्य विपाकः परिणामस्तद्रूपा चञ्चुर्यस्य अतिप्रियभुक्तपक्वविम्बीफलमेव तदीयचञ्च्वाकारेण परिणतमिति यावत्। तादृशस्यातिरक्तचञ्चोरित्यर्थः। तथा स्पष्टं सर्व्वथापि शलाटु अपरिपक्वं यत्किञ्चित् फलं भुक्तविम्बीफलमेव वा तस्य परिणतिः अतिनीलता तस्या उचिता तद्योग्यास्तत्तुल्या अतिनीलाः छदाः

कीरस्य काऽपि करवारिरुहे वहन्ती
सौन्दर्य्यपुञ्जमिव पञ्जरमेकमाली ॥ १२२ ॥
कूजायुजा वकुलपक्षगितिम्निसीम्ना
स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन।

पक्षा यस्य। अपक्कानि श्यामानि भक्षितानि यानि फलान्तराणि बिम्बीफलान्येव वा यदीयच्छदाकारेण परिणतानीति यावत्। तादृशस्य अतिहरितपक्षस्य रक्तचञ्चुत्वं नीलपक्षत्वञ्च जातिः। पाठितशुकादिपञ्जरादिधारिण्याः सख्या अपि नायिकानुगमनं जातिः। भोजनानन्तरं पाठितशुकसारिकादिशब्दानां गीतस्य च श्रवणेन नृत्यादिवीक्षणेन च क्रीडनं राज्ञामपि जातिः। आमे फले शलाटु स्यादित्यमरः ॥ १२२ ॥

कूजेति। एका सखी पिकेन कोकिलेन सह उपलक्षिता वा तां भैमीं अन्ववर्त्तत अनुलक्षीकृत्य जगाम। किम्भूतेन पिकेन। कूजया मधुराव्यक्तेन शब्देन सह आत्मानं युनक्तीति युजा युक्तेन कुहूशब्दं कुर्व्वतेत्यर्थः। तया वकुलो भूयान् पक्षाणां शितिमा कृष्णत्वं तस्मिन् सीम्ना अवधिभूतेन अत एव विशेषेण कुहूरिति पदस्य तथा तदर्थस्य तत्पदवाच्यस्य अमावास्यारूपस्य च मिथो अन्योन्यसम्बन्धो यत्र तादृशेनेव स्पष्टमुक्तेनार्थौ कुहूपदयोगित्वात् कृष्णतमत्वाच्च अमावास्याविषये कुहूपदपदार्थयोस्तादात्म्यरूपेणेति यावत्। अमावास्याऽपि कृष्णपक्षसम्बन्धिनी मर्य्यादा

तिर्य्यग्धृतस्फटिकदण्डकवर्त्तिनैका
तामन्ववर्त्तत पिकेन मदाधिकेन ॥ १२४ ॥
प्रिय्याः कलाविधिषु भीमभुवो वयस्या
वीणा मृदुक्कणनकर्म्मणि याः प्रवीणाः।
आसीनमेनमुपवीणयितुं ययुस्ता
गन्धर्व्वराजतनुजा मनुजाधिराजं ॥ १२५ ॥
तासामभासत कुरङ्गदृशां विपञ्ची
किञ्चित् पुरः कलितनिष्कलकाकलीका।

भवति। अत एव कुहूशब्दवाचा च। तया तिर्य्यक् तिरश्चीनं करधृतस्फटिकदण्डकः छत्रदण्डः तत्र वर्त्तिना स्थितेन तया मदाधिकेन मदोन्मत्तेनेत्यर्थः ॥ १२४ ॥

प्रिय्या इति। या भीमभुवो भैम्या वयस्याः सख्यः कला-विधिषु चतुःषष्टिकलाकर्म्मसु विषये भैम्या एव प्रियाः, तथा वीणाया मृदुकणनकर्म्मणि मधुरशब्दरूपे व्यापारे प्रवीणास्ता गन्धर्व्वराजो विश्वावसुस्तस्य तनूजाः कन्याः तत्तुल्याः प्रासाद आसीनं एनं मनुजाधिराजं नलं उपवीणयितुं वीणयोपगातुं ययुः प्रापुः ॥ १२५ ॥

तासामिति। तासां कुरङ्गदृशां विश्वावसुकन्यानां विपञ्ची वीणा अभासत शुशुभे। किम्भूता। किञ्चित् पुरः ईषत्पूर्व्वं प्रारम्भसमये कलिता अङ्गीकृता निष्कला गम्भीरमन्द्रस्वरश्रुति-वर्णविशेषाभिव्यक्तिरहिता काकली सूक्ष्ममधुरा अव्यक्तरागवि-

भैमीतयामधुरकण्ठलतोपकण्ठे
शब्दायितुं प्रथममप्रतिभावतीव ॥ १२६ ॥
सा यद्गताखिलकलागुणभूमभूमी-
भैमीतुलाधिगतये स्वरसङ्गताऽऽसीत् ।

शेषो यथा । अत एवोत्प्रेक्ष्यते । भैम्यास्तया अनिर्वचनीयमधुरस्वरयुक्तायाः कण्ठलताया उपकण्ठे शब्दायितुं तस्याः पुरस्ताच्छब्दं कर्तुं प्रथमं प्रारम्भे अप्रतिभावतीव प्रतिभारहितेव अधृष्टेव । अन्योऽप्यधिकविद्यस्य पुरस्ताद्भाषितुं गातुं वा अधृष्टत्वादशब्दः सन् प्रथमं मन्दमेव भाषते गायति वेति सङ्गीतविद्याविदामियं जातिः । प्रथमं गायमानाः प्रारम्भे काकलीमारचयन्तीति काकल्यादिसङ्गीतशास्त्रादेव गन्तव्यं । काकलीकेति न वृतस्येति कप् (पा० ५।४।१५३) शब्दायितुं शब्दवैरेति (पा० ३।१।१७) क्यङ् ॥ १२६ ॥

सेति । सा विपञ्ची यद्गतानामखिलानां गीतनृत्यादिचतुःषष्टिकलानां सौन्दर्यादिगुणानाञ्च भूम्नो बाहुल्यस्य भूमी स्थानभूता भैमी तस्यास्तुलाधिगतये साम्यप्राप्तये स्वयमपि पूर्वोक्तप्रकारेण तादृशी सती भैमीस्वरतुल्यत्वप्राप्तये सत् स्वरैः षड्जादिभिः सङ्गता सम्बन्धा आसीत् । अथ च भैम्या सार्द्धं साम्यप्राप्तये स्वरस्वाच्छन्द्याभिलाषं गताऽभूत् । असौ विपञ्ची तं भैमीसाम्यस्वाच्छन्द्याभिलाषलक्षणमविनयमत्युत्तमावमागतमेव परिवादं लोकमुखे स्फुटं दोषं प्राक् पूर्वं एत्य प्राप्य । अथ

तं प्रागसावविनयं परिवादमेत्य
लोकेऽधुनाऽपि विदिता परिवादिनीति ॥ १२७ ॥
नादं निषादमधुरं ततमुज्जगार
साऽभ्यासभागवनिभृत्कुलकुञ्जरस्य।

·च परिवादं वीणावादनसाधनं तद्रूपमविनयं प्राप्य अधुनाऽप्यद्य यावदपि लोके परिवादिनीति विदिता ख्याता परिवादयोगात् परिवादिनीत्यद्यापि गीयत इत्यर्थः। अथ च वीणावादनसाधनयुक्ता। यद्वा सप्ततन्त्रीयुक्ता वीणा परिवादिनी। भीतो भयानि पश्यतीति न्यायेन पूर्व्वमपि लोके दुष्टतां प्राप्ता पुनरपि उत्तमस्य पुरस्तात् प्रागल्भ्ये दोषान्तरं शङ्कमानेव अप्रतिभावतीति प्राचीनश्लोकार्थहेतुतया योज्यं। परिवादः कलङ्के स्याद्वीणावादनवस्तुनीति विश्वः ॥ १२७ ॥

नादमिति। अवनिभृतां कुलं वंशस्तत्र कुञ्जरः श्रेष्ठस्तस्य नलस्य अभ्यासभाक् समीपवर्त्तिनी सा तन्त्री वीणाद्यरूपा निषादस्वरेण मधुरं अर्थ्यं नादं उज्जगार उद्गीर्णवती। किम्भूता। ततः सश्रुतीनां द्वाविंशतिश्रुतियुतानां षड्जादीनां मूर्द्ध्नि नादप्रान्ते कम्पः कम्पितस्वरो यया, ततः सह श्रुतिभिर्यथा तथा मूर्द्धनि वीणाया एव उपरितनभागे कम्पितः स्वरो यया, वीणोर्द्धं समग्राङ्गुलिं संयोगाद्धि निषादस्वरो जायते तादृशी वा। ततः सश्रुतीनां द्वाविंशतिविदां सङ्गीतशास्त्रविदां मूर्द्ध्नि कम्पो यस्मा वा। तथा विचित्रं करचापलं नानारूपं ·आरा-

स्तम्बेरमीव कृतसंश्रुतिमूर्द्धकम्पा
वीणा विचित्रकरचापलमाभजन्ती ॥ १२८ ॥
आकृष्य सारमखिलं किमु वल्लकीनां
तस्या मृदुस्वरमसर्जि न कण्ठनालं ।

स्थावरोहादिक्रमेण अङ्गुलिप्रान्तस्पर्शवशेन वादकपाणिचाञ्चल्यलक्षणमेवानेकस्थानावस्थानलक्षणं आ सामस्त्येन भजन्ती निषादप्रधानं ललितादिमङ्गलगीतं प्रकटीचकारेत्यर्थः। केव। स्तम्बेरमी हस्तिनीव। साऽपि अवनिभृत् पर्व्वतः कुलं वंश उत्पत्तिस्थानं यस्य तादृशपर्व्वतभवस्य हस्तिश्रेष्ठस्य राजसम्बन्धिनो वा हस्तिनः समीपवर्त्तिनी सकामा। तथा जातिस्वभावात् कृतः संश्रुतिभिः शिरःकम्पः सशब्दशिरःकम्पो यया। तथा नानाप्रकारं शुण्डदण्डताण्डवं भजमाना सती ततं निषादस्य गजो वदति इति शास्त्रप्रामाण्यान्निषादस्वरेण मञ्जुलं नादं उद्गिरन्ती। चापलमाभवन्तीत्यपि पाठः। स्तम्बेरमीति स्तम्बकर्णयोरित्यचि (पा० ३।२।१३) हलदन्तादित्यलुकि (पा० ६।३।९) जातिवाचित्वात् ङीष् ॥ १२८ ॥

आकृष्येति। ब्रह्मणा वल्लकीनां वीणानां अखिलं अन्तःसारं श्रेष्ठभागं आकृष्य तस्या भैम्याः कण्ठनालं ग्रीवादण्डः किमु न असर्जि न सृष्टं, अपि तु तमेव सारमादाय तदीयं कण्ठनालं सृष्टं। यतो मृदुस्वरं सकलवीणासारनिर्मितत्वादेव भैमीकण्ठस्य मधुरतमत्वं जातमित्यर्थः। यद्वा एवं तेनैव हेतुना

तेनान्तरं तरलभावमवाप्य वीणा
क्षीणा न कोणममुचत् किमु वा लयेषु ॥ १२९ ॥
तद्दम्पतिश्रुतिमधून्यथ चाटुगाथा
वीणास्तथा जगुरतिस्फुटवर्णबन्धं।

हृतसारतयैव अन्तरं वीणादण्डमध्यगतं तरलभावं लक्षणया मन्दशब्दलमवाप्य क्षीणा किमु लज्जितेव। वीणालयेषु स्वरविश्रान्तिरूपासु मूर्च्छनासु विषये कोणं वा लीलाधनुःसदृशाकारं वीणावादनसाधनं सत् नामुचत्। गृहीतसारोऽन्योऽपि निःसारतया अगम्भीरान्तःकरणतां प्राप्य क्षीणः सन् आलयेषु गृहेषु कोणं कुड्यभागद्वयसंयोगस्थानं न मुञ्चति। पुष्कलच्छिद्रस्य वीणादण्डस्वरोऽतिगम्भीरः प्रशस्ततरो भवति मधुरतरं वीणा क्वणति स्रोति भावः। वीणास्वरापेक्षया भैमीस्वरस्याधिक्यमेतेन सूचितं। वीणादण्डस्य सच्छिद्रत्वेन निःसारत्वोत्प्रेक्षा। वीणादिवादने कोणोऽप्येकदेशो गृहस्य चेति विश्वः ॥ १२९ ॥

तदिति। अथ काकल्युद्गिरणानन्तरं गन्धर्व्वराजकन्यानां वीणाः तयोर्दम्पत्योः श्रुतीनां कर्णानां मधूनि अमृततुल्यानि भैमीनलप्रियस्तुतिकारिणीनां चाटुगाथाः श्लोकान् तथा तेन प्रकारेण अतिस्फुटो वर्णबन्धः तन्त्रीविनिबद्धाक्षरविन्यासो यस्मिंस्तद्यथा तथा जगुः। यथा येन प्रकारेण वसुमत्यां भूमौ रतिरूपाया भैम्या गृह्यकः पञ्जरबद्धः कीरः शुकः मुदं किरन् श्रोतृ-

इत्थं यथा वसुमतीरतिगृह्यकास्ताः
कीरः किरन्मुदमुदीरयति स्म विश्वाः ॥ १३० ॥
अस्माकमुक्तिभिरवेय्यय एव बुद्धे-
र्गाधं युवामतिमती सुमहे तथापि ।
ज्ञानं हि वागवसरावचनाद्भवद्भ्या-
मेतावदप्यनवधारितमेव न स्यात् ॥ १३१ ॥

णां हर्षमुत्पादयन् विश्वाः सर्व्वाः तत्तद्दर्णमाचादिमहिता गाथाः इत्थं वक्ष्यमाणरीत्या उदीरयति स्म । तिर्य्यग्योनिः शुकोऽपि यथा श्रवणमात्रेण सर्व्वा अपि गाथा अनुवदितुं शक्नोति तथा तन्त्रीषु स्फुटतराचरवन्धान् भैमीनलस्तावकश्लोकान् वीणाः स्फुटं गायन्ति स्मेति भावः । एतेन गन्धर्व्वराजकन्यानां वीणा-प्रावीण्यं शुकस्यापि प्रज्ञातिशयः सूचितः । गृह्यकाः पचिमृ-गाद्येकास्ते गुह्यकाश्च ते, इत्यमरः ॥ १३० ॥

इत्थमिति यदुक्तं तदेवाह । अस्माकमिति । यद्यपि अति-शयिता मतिः प्रज्ञा ययोस्तौ युवां अस्माकमुक्तिभिर्गाथारूपा-भिरेव अस्मद्वाग्वचनाभिः अस्माकं बुद्धेर्गाधं उत्तानार्थत्वं अवे-य्यथ एव ज्ञास्यथ एव, तथापि वयं युवां सुमहे स्तुम एव । हि यस्मात् भवद्भ्यां वागवसरे स्तावकादिवचनावसरे सत्यपि अवचनात् अभाषणाद्धेतोरेतावत् अत्युन्नतार्थोऽप्यल्पमपि अ-स्मदीयं ज्ञानं नावधारितमेव न स्यात् अज्ञातमेव न स्यानाच्च इत्यर्थः । तस्मात् स्तुम एव । वर्णनायां क्रियमाणायां अयमस्य-

भूभृद्भवाङ्कभुवि राजशिखामणेः सा
त्वञ्चास्य भोगसुभगस्य समः क्रमोऽयं।

ज्ञानो यज्ज्ञान इति वा ज्ञातुरग्रे प्रसिद्धो भवति तस्माद्वर्ण-
याम इति भावः। इत्येवं वीणानिबद्धगन्धर्व्वपुत्रीवचनं शुके
अन्ववददित्यर्थः। एवमुत्तरत्रापि ज्ञेयं। एतेन गन्धर्व्वपुत्रीभिः
स्वमौद्भूत्यं परिहृतं॥ १३१॥

भूभृदिति। सा भूभृद्भवा हिमाचलसुता पार्व्वती भोगै-
र्वासुक्यादिसर्पशरीरैः सुभगस्य भूषितस्य राजा चन्द्रः शिखा-
मणिर्यस्य चन्द्रमौलेः अङ्कभुवि उत्सङ्गदेशे, वर्त्तत इति शेषः,
प्रियतमत्वात्। त्वञ्च त्वमपि भीमपुत्रीचन्दनादिभोगैर्मनोहरस्य
राज्ञां मुकुटमणेः श्रेष्ठतमस्यास्य नलस्य उत्सङ्गदेशे वर्त्तसे,
इत्ययं क्रमः समः। परिपाटी उचिता। पार्व्वत्या महेशस्य च
तत्र नलस्य च राजन्यायाः राजश्रेष्ठस्य च अन्योन्यसम्बन्धः समु-
चित एवेत्यर्थः। अथ च समस्तुल्यः। यथा तयोः सम्बन्धः तथा
युवयोरपीत्यर्थः। अथ वाऽयं शब्दश्लेषरूपः सम्बन्धस्तुल्यः। एवं
यद्यपि क्रमः समस्तथापि स पुनर्भेदो विसदृशत्वं यत् नाक-
पालस्येन्द्रस्य कलनांशत्वेन एव भवनं तया कलितस्य ख्यातस्य
राजत्वादिन्द्रांशत्वेन प्रसिद्धस्य भर्त्तुर्नलस्य सम्बन्धिनी अत्राप्य-
स्मिन्नपि जन्मनि भवती सती पतिव्रता। अपि शब्दान्न केवल-
मत्रैव किन्तु जन्मान्तरेऽपि त्वं सत्येव। अन्यथाऽत्रापि सतीत्वानुप-
पत्तेः। पार्व्वती तु ब्रह्मकपालस्य कलनया करे धारणाया

यन्नाकपालकलनाकलितस्य भर्त्तु-
रन्यापि जन्मनि सती भवती स भेदः ॥ १३२ ॥
एषा रतिः स्फुरति चेतसि कस्य यस्याः
सूते रतिं द्युतिरथ त्वयि चातनोति ।

कलितो विदितो न भवति अकपालकलकलनाकलितस्या-दृशोऽपि न भवति। कपालिलेन ख्यातस्य भर्त्तुर्महेशस्य सम्बन्धिनी पूर्व्वजन्मनि दक्षापत्यत्वे एव सती न तु हिमवदपत्यत्वेऽपीति महद्वैषम्य। हरस्य नलस्य चोक्तसकलश्लेषसाम्यत्वेऽपि पार्व्वत्यास्तव किञ्चिदेव शब्दश्लेषसाम्यं न तु सर्व्वं उक्तरीत्या तवाधिकत्वादित्यर्थः। हिमवदपत्यत्वे पार्व्वत्या सतीलोकेर्निन्दा नाशङ्कनीया भैमीस्तुतिपरस्य सतीशब्दस्य पार्व्वत्या नामपरत्वमात्रव्यावर्त्तकत्वेनोक्तेर्निन्दापर्य्यवसानाभावात् ॥ १३२ ॥

एषेति। एषा भैमी कस्य वा चेतसि रतिः कामप्रियेति स्फुरति। अपि तु न कस्यापि यतो यस्या एतस्या द्युतिः कायकान्तिः रतिं कामप्रियां सूते। अथ च अनुरागं प्रसूते अर्थात् त्वयि अङ्गजलात् कान्तिः पुत्री। रतिश्च तत्पुत्री सा यस्मान्न स्त्रीः सेयं रतिरिति कस्य वा चेतसि मतिः स्यान्न कस्यापीत्यर्थः। अथवा त्वय्यपि विषये त्रैव्यक्षेण हरसम्बन्धिना वीक्षणेन तृतीयनेत्रेण खिलीकृतः न्यूनीकृतः निर्जरत्वेन देवत्वेन सिद्धोऽमरत्वरूप आयुषोऽध्वा मार्गो यस्य तादृशस्य मकरध्वजस्य कामस्य भ्रमरूपमादृश्यात् किमयं काम इति सन्देहः को वा तनोति अपि

चैत्यच्चवीक्षणखिलीकृतनिर्जरत्व-
सिद्धायुरध्वमकरध्वजसंशयं कः ॥ १३३ ॥
एतां धरामिव सरिच्छविहारिहारा-
मुल्लासितस्त्वमिदमाननचन्द्रभासा ।

तु न कोऽपि करोति। कामस्य हरेण दग्धत्वात् सन्देहनिवृत्ति-रित्यर्थः। आ इत्याश्चर्य्ये। यस्य तव अङ्गजा कान्तिर्यतो रतिं सूते ततो रतिः सा तवापि न स्त्री। सा कामस्य स्त्री। तस्मात् त्वयि कामसंशयं कोऽपि न करोतीत्यर्थ इति नलं प्रति तद्वचनं शुकेन अन्ववादीदिति वा। रतिकामाभ्यामपि युवामतितमां सुन्दराविति भावः। चैत्यचेति सम्बन्धे अणि, नव्याभ्यामिति (पा० ७।३।३) वृद्धिनिषेधे पूर्व्वमैजागमः ॥ १३३ ॥

एतामिति। हे नल त्वं विभासि। किम्भूतः। एतां भैमीं बिभ्रत् अङ्के धारयन्। किम्भूतां। सरितां नदीनां छविं कान्तिं हरन्ति तच्छीला उज्ज्वलतरा मौक्तिकहारा यस्यास्तां। तथा वेद्यां अन्तः अन्तर्वेदि वेदिकामध्यं तददतिकृशा श्रीः शोभा यस्याः, अन्तर्मध्ये वेदिवदतिकृशा श्रीर्यस्या वा। तथा जनमनसां प्रियः आनन्ददायी मध्यदेशः शरीरमध्यभागो यस्यास्तां। किम्भूतस्त्वं। अस्या भैम्या आननं तन्मुखमेव चन्द्रस्तस्य भासा कान्त्या उल्लासितः हर्षं प्रापितः। क इव। चन्द्रभासा वृद्धिं प्रापितः पयसां राशिः समुद्र इव। कामिव। धरां भूमिमिव। यथा पृथ्वीं अङ्के धारयन् समुद्रः शोभते। किम्भूतां धरां। सरितो नद्य एव

विभ्रद्विभासि पयसामिव राशिरन्त-
र्वेदिश्रियं जनमनःप्रियमध्यदेशां ॥ १२४ ॥
दत्ते जयं जनितपत्त्रनिवेशनेयं
साचीकृतेन्दुवदना मदनाय तन्वी ।

छ्व्या कान्त्या हारिणो मनोहरा हाराः यस्यास्तां । तथा अन्तर्वेद्याख्या या गङ्गायमुनामध्यभवा श्रीर्यस्यास्तां । तथा जनमनसां प्रियो मध्यदेशो विन्ध्यहिमाचलान्तरभूभागरूप आर्य्यावर्त्तपरपर्य्यायः पुण्यभूतो मध्यदेशो यस्यास्तां ।

हिमवद्विन्ध्ययोर्मध्ये यत् प्राक्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥

इति मनुः । इदमाननं षष्ठीसमासः ॥ १२४ ॥

दत्त इति । जनितानि सखीभिः कस्तूर्य्यादिविरचितानि यत्र निवेशनानि मकराद्याकारपत्त्रवल्लीलिखितानि यस्यां सा पत्त्रवल्लीविभूषिता, तया अक्षिभ्यां सह वर्त्तमानः साक्षः असाक्षः साक्ष कृतः सनेत्रतां प्रापितः साचीकृतः स चासाविन्दुश्च स एव वदनं यस्याः सा चन्द्राधिकवदना इय तन्वी कृशाङ्गी भैमी मदनाय जयं दत्ते । एवंविधभैमीदर्शनेन कामो नितरामुल्लसतीत्यर्थः । अथ च कामाय जयं दत्ते । एवंविधभैमीदर्शनवशीकृतस्त्वं कामेन जीयसे इत्यर्थः । यद्वा कायकान्त्या भर्त्सितो जितो मत्स्यकेतुः कामो येन तस्य तव अत्र भैम्या विषये भुक्तिरेवैतच्छरीरोपभोगः एतन्मध्य उदरभागे स्थितस्य वर्त्तमानस्य दुर्बल-

मध्यस्थदुर्बलतमत्वफलं किमेत-
द्भक्तिर्यदत्र तव भक्षितमत्स्यकेतोः ॥ १२५ ॥

तमत्वस्य कार्श्यस्य फलं परिपाकः किमिति प्रश्नः, सम्भावना वा। अतिसुन्दरस्य तवैतच्छरीरभोगेऽतिकृशैतदुदररामणीयकमेव प्रयोजकमित्यर्थः। अथ च मध्यदेशवर्त्तिनोऽतिकार्श्यस्य फलं एतदेव यदतिसुन्दरस्य तवात्र भुक्तिर्नामेत्यर्थः। कामेन तव विजये एतन्मुखचन्द्रस्य च साक्षाद्दृष्टत्वात् साक्षित्वमुक्तं। अथ च कामेन जितमिति कामस्य जयदाने साक्षीकृता इन्दुवदनाः सभ्यस्य उपयाताः। अपि हि कामेन नलो भैमीवशीकृत इति जानन्ति एवं सत्यपि क्रूरोक्त्यादिना तर्जितः कामो येन तस्य तव अन्यस्मिन् भैमीविषये वा विवादविषयोपभोगो लब्धजयं कामं क्रूरोक्त्या सन्तर्ज्य तदीयमन्यं भैमीरूपं वा विषयं त्वं भुङ्क्ष्व। एतदुदरमध्यवर्त्तिनो कार्श्यस्य फलं किं रामणीयकातिशयात् परित्यक्तुमशक्तः सन् अन्यदीयमपि विषयं बलादन्यायेनैव भुङ्क्ते इत्यर्थः। अथ च मध्यस्थानां सभ्यानां दुर्बलतमत्वस्य ज्ञानदौर्बल्यस्य नियन्तुमसामर्थ्यस्य स्वदत्तजयनिर्वहणाशक्तत्वस्य वा फलं परिपाकं किमियमिति सम्भावना, अत्रापि विवादपदे साक्षिवादनं कृत्वा जयपत्रदानपुरःसरं एकस्मै जयपत्रं दीयते। तत्र निर्णये कृतेऽपि मध्यस्थास्तु दुर्बला भवन्ति तर्हि पराजितोऽप्येको लब्धजयमपि द्वितीयं तिरस्कृत्य तदीयं विवादं पदं चेत्यादिकं बलाद्भुङ्क्ते, कथमन्यथा ससाक्षिकजय-

चेतोभवस्य भवती कुचपत्त्रराज-
धानीयकेतुमकरा ननु राजधानी।
अस्यां महोदयमहस्युभि मीनकेतोः
के तोरणं तरुणि न ब्रुवते भ्रुवौ ते॥ १३६॥

पत्त्रहस्तं निर्भर्त्स्य अन्योन्यादीयभुक्तिं करोतीत्यर्थापत्तिः। साचीकृतेति तेन सहेति तुल्ययोग इति (पा० २।२।२८) बहुव्रीहिः। बहुव्रीहौ सक्थ्यक्ष्णोरिति (पा० ५।४।११३) षचिचिः। षचे साचाद्भ्रष्टरीति (पा० ५।२।९१) इनौ चिः॥१३५॥

चेत इति। ननु भैमी भवती चेतोभवस्य राजधानी। कीदृशी। कुचपत्त्रेषु राजानः श्रेष्ठाः पत्त्रवल्ल्य इत्यर्थः, तेषु धानीयः स्थापनीयः। यद्वा कुचपत्त्रमेव राजधानी यो राजधानीसम्बन्धीकेतुर्ध्वजचिह्नभूतो मकरो मत्स्यो यस्यां स राज्ञो मुख्यावस्थाननगर्यां राजधान्यां साभिज्ञानचिह्नरूपः पताकादिध्वजो भवति। तथा च केतुभूतस्य मकरस्य त्वत्कुचयोर्वर्त्तमानत्वात् त्वं कामराजस्य राजधानी साक्षान्मदननगरी। मदनस्त्वय्येव वर्त्तत इत्यर्थः। अत एव हे तरुणि आरूढयौवने भैमि के जना मीनकेतोर्मकरध्वजस्य सम्बन्धिनं महोदयरूपं महं उत्सवं महान् अभ्युदयो यस्मिंस्तादृशं वा उत्सवं स्पृशन्त्यां स्वस्वामिकामोत्सववत्यां अस्यां भवद्रूपायां राजधान्यां ते तव भ्रुवौ तोरणं न ब्रुवते। अपि तु सर्व्वेऽपि जनास्त्वद्भ्रूयुगं कामाभ्युदयोत्थितवक्रितश्रियं वंशद्वयनिबद्धं आम्रादिमाङ्गलिकसुना-

अस्या भवन्तमनिशं भवतस्तथैनां
कामः श्रमं न कथमृच्छतु तामगच्छन्।
छायेव वामथ गतागतमाचरिष्णो-
स्तस्याध्वजश्रमहरा मकरध्वजस्य ॥ १३७ ॥

लपल्लवरूपं तोरणमेव वदन्ति। कामस्त्वदेकाश्रयः सन् सर्वो-त्कर्षेण वर्त्तत इति भावः। पत्त्रराजीत्यपि पाठः स्पष्टार्थः रा-जेति पाठो मुख्यः। राजाहः इत्यादिना (पा॰ ५।४।९१) स-मासान्तष्टच्॥ १३६ ॥

अस्या इति। हे नल अस्या भैम्याः सकाशात् भवन्तं अ-निशं गच्छन्, तथा भवतः सकाशात् एनां भैमीं अनिशं गच्छन् प्राप्नुवन् यातायातं कुर्वन् कामः कथं नाम श्रमं ऋच्छतु ग-च्छतु अपि तु श्रमं न गच्छत्येव। सदा यातायातं कुर्व्वन् श्रमं गच्छतीति युक्तमेव। अथ वा यस्मात् वां युवयोः छाया कायकान्तिरेव उक्तरीत्या गतागतमाचरिष्णोस्तस्य मकरध्व-जस्य अध्वनि जातं श्रमं हरति श्रमहरा एवम्भूता भवतीति शेषः। दृश्यमानभवच्छोभावशादेव यातायातश्रमं न वेत्ती-त्यर्थः। अथ च वृक्षच्छत्रादिनिर्म्मितच्छायाभागे गतागते कुर्व्वतः पुरुषस्य श्रमं हरत्येव। भैम्यास्त्वय्येव कामस्तव च भैम्यामेव नान्यत्रेत्येवं परस्परानुरागः कुत्रापि नास्तीति भावः ॥ १३७ ॥

खेदाम्बुवप्रणयिनी तव रोमराजी
रत्यै यदाचरति जागरितव्रतानि।
आभासितेन नरनाथ मधूत्थसान्द्र-
मग्नासमेषुशरकेसरदन्तुराङ्गः ॥ १३८ ॥

खेदेति। हे नरनाथ खेदो घर्मजलं तस्मिन् तेन वा आ-स्रवः स्नानं तत्र प्रणयिनी प्रीतिमती सात्त्विकसञ्जातखेदपूर-व्याप्ता तव रोमराजिः रत्यै सुरतार्थं जागरितस्य उद्बुद्धस्य व्रतानि उद्गतरोमाञ्चनिचयान् यदाचरति उन्निद्रा भवतीति यावत्। तेन कारणेन रोमाञ्चेन वा त्वं मधुनः पुष्परसस्योत्था-नेनोदयेन सान्द्रः पुष्परसपूरेण निरन्तरं व्याप्तत्वाच्छरीरा-न्तःप्रविष्टाः असमेषोः कामस्य पुष्परूपा शरास्तेषां केसरैः पिच्छप्रायैर्दन्तुरं उच्चावचीकृतं अङ्गं यस्य एवम्भूतस्य खेदरो-माञ्चो युक्तत्वात् प्रत्यङ्गमन्तर्मध्ये समधुकामबाणसम्बन्धिबहिर-वस्थितो यत्र तत्र रागव्याप्ताङ्ग इवाभासि मैत्रीयोगात् सखे-दरोमाञ्चो रिरंसुः कामशास्त्रयोजितः सुतरां शोभसे इत्य-र्थः। अथ च रोमराजिर्दूतीस्थानीया। तथा च तव दूती रोमराजिः कृततीर्थस्नाना रत्यै कामप्रियां त्वदधीनां कर्तुं यस्माज्जागरणादिनियमान् करोति तेन कारणेन विशिष्टनि-मग्नकामबाणपिच्छसम्भृत इव शोभसे। अन्याऽपि तरुणीकृत-स्नाना रत्यर्थं कान्तेन सह खेदात् सकलां रात्रिं जागर्ति ॥ १३८ ॥

प्राप्ता तवापि नृप जीवितदेवतेयं
घर्माम्बुशीकरकरं वनमम्बुजाक्षी।
ते ते यथा रतिपतेः कुसुमानि बाणाः
खेदस्तथैव किमु तस्य शरक्षतास्रं॥ १३९॥
रागं प्रतीत्य युवयोस्त्विममं प्रतीची
भानुश्च किं द्वयमजायत रक्तमेतत्।

प्राप्तेति। हे नृप अम्बुजाक्षी तव जीवितदेवता प्राणेश्वरी इयं भैम्यपि घर्माम्बुशीकरकरं वनं खेदजलविन्दुमिश्रणं प्राप्ता। इयमपि त्वदीयस्पर्शवशात् सात्त्विकखेदयुक्ताऽभूदित्यर्थः। न केवलं त्वमेव स्थितः,अपि तु इयमपीत्यपेरर्थः। अथ च देवतायाः खेदो नास्ति इयन्तु देवताऽपि सखेदेति चित्रमित्यपि शब्दार्थः। अतश्च कुसुमान्येव यथा येन प्रकारेण ते ते भैमीकरचरणादि-रूपेण प्रसिद्धपराक्रमाः मोहनशोषणादिकाः कामबाणाः तथैव तेनैव प्रकारेणायं खेदस्तस्य कामस्य सम्बन्धि कामेन रचितं शर-क्षतास्रं क्षीयबाणव्रणरुधिरं किमु। एतस्याः कामबाणविद्धत्वात् खेदः। तच्च व्रणरुधिरत्वं नैव सम्भावयितुं युक्तं यादृशो यच्च तादृशो बलिरिति न्यायेन पुष्पबाणानां धवलत्वात् तज्जन्य रुधिरमपि तादृगेव युक्तं इति खेदजलस्य रुधिरत्वं युक्तमित्यर्थः। कुङ्कुमाङ्गरागलगनाद्वा रक्तत्वात् खेदजलस्य रुधिरत्वं युक्तं। इयमपि कामबाणविद्धा रिरंसुरस्तीति भावः॥ १३८॥

रागमिति। प्रतीची दिक् भानुश्च एतद्द्वयं युवयोः तं सात्त्वि-

तदीक्ष्य वां किमिव केलिसरित्सरोजैः
कामेषुतोचितमुखत्वमधीयमानं ॥ १४० ॥

कस्वेदरोमाञ्चसूचितं इमं सत्यचट्टश्यमिव अनुरागं प्रतीत्य किं ज्ञात्वेव रक्तं अजायत लोहितवर्णमभूत्, भैमीनलाविदानीं रिरंसू अपि दिवामैथुननिषेधभिया साशङ्कौ वर्त्तेते । तस्माद्रात्रिं करिष्यामीति सूर्यमस्तं प्रापयितुमिव प्रतीची रक्तवर्णाऽभूत् । इदानीं मयाऽप्यस्तं गन्तुं युक्तमितीव सूर्योऽपि रक्तवर्णोऽभूदित्यर्थः । अथ च सरागौ युवां दृष्ट्वा तद्द्वयमपि सरागमभूत् । अथ च युवयोरेव केलिसरितः सरोजैः कमलैः तद् भानुप्रतीचीरूपं रक्तमिथुनं वीक्ष्य वां भैमीनलौ च वीक्ष्य किं दृष्ट्वेह सन्ध्यासमयकामस्य इषुतोचितं शरत्वयोग्यं मुखं अग्रं येषां तद्भावस्तं तीक्ष्णाग्रत्वं अधीयमानं अभ्यस्यमानं विद्यत इति शेषः । वाञ्च सानुरागौ दृष्ट्वा कमलैर्मुकुलीभवनव्याजेन पुष्पबाणतीक्ष्णाग्रत्वमनुभूयते किं । कामो हि रिरंसुस्त्रीपुंसौ दृष्ट्वा तीक्ष्णमुखैः शरैर्विध्यतीत्यर्थः । अथ च एतौ भैमीनलौ प्रतीचीभास्करौ च यदि सरागौ जातौ तर्हीदानीं रात्रिः सन्निहिताऽस्तीति अस्माभिरपि मुकुलीभावं प्राप्तुमुचितमिति तैरपि मुकुलीभूतं । पद्मानां सङ्कुचितमुखत्वं कामशरयोग्यं तीक्ष्णमुखीभावेनोत्प्रेक्षितं सन्ध्याकालो जातः, कमलानि च मुकुलितानि इति भावः ॥ १४० ॥

अन्योन्यरागवशयोर्युवयोर्विलास-
स्वच्छन्दताच्छिदपयातु तदालिवर्गः ।
अत्याजयन् सिचयमाजिमकारयन्वा
दन्तैर्नखैश्च मदनो मदनः कथं स्यात् ॥ १४१ ॥
इति पठति शुके मृषा ययुस्ता
वड्ङ्नृपकृत्यमवेत्यसान्ध्यवेलं ।

अन्योन्येति । आलिवर्गः अन्योन्यरागेण परस्परानुरागेन रमणाभिलाषेण वशयोः रिरंसयाऽन्योन्याधीनयोर्युवयोर्विलासस्य स्वच्छन्दतां निःशङ्कप्रवृत्तिं छिनत्ति कामक्रीडाविप्रकारी यस्मात् तस्मादपयातु गृहाद्बहिर्निर्गच्छतु, यस्मात् मदनः कामः सिचयं वसनं अत्याजयन् अपरिहारयन्, अर्थात् स्त्रीपुंसौ, तथा दन्तैर्नखैश्च करणभूतैः आजिं सङ्ग्रामं एतैरुपलक्षितं वा नानाबन्धकरसुरतसमयुद्धं च स्त्रीपुंसौ अकारयन् सन् मादयतीति मदनः मदकारी कथं वा स्यादपि लेवमेव कारयन् मदनो हर्षकारी भवेदेव तस्मात्सखीवर्गो गृहान्निर्गच्छत्विति त्यर्थः । मदनः कथं स्यात् कथं भवेत्, मदनः, नन्द्यादित्वात् ल्युः ॥ १४१ ॥

इतीति । ता गन्धर्व्वराजपुत्र्यः सख्यश्च शुके इति पूर्व्वोक्तं पठति सति व्यक्तं भाषमाणे सति गन्धर्व्वपुत्रीवीणानिवद्धा गाथाः स्पष्टमनुवदति सति सान्ध्यवेलं दिनरात्रिसन्धिवेलायां भवं वड्ङ्नृपकृत्यं सन्ध्यावन्दन सायं होमादिकं नलस्य नित्यकर्म्म अवेत्य

कुपितनिजसखीदृशार्द्धदृष्टाः
कमलतयेव तदा निकोचवत्यः ॥ १४२ ॥
अकृत परभृतः स्फुहिस्फुहीति
श्रुतवचनस्तगनूक्तिचुञ्चुचञ्चुः।

ज्ञात्वा मृषालीकमेव अत्रेदानीं भवतीभिः न स्थातव्यमिति शुकोऽस्मान्निष्काशयति तर्हि वयं याम इति मिषमात्रेण ययुर्गेहाद्बहिर्निर्जग्मुः। रिरंसुरपि नलः सन्ध्यावन्दनादिसमये नित्यकर्म्माद्यतिक्रम्य सम्भोगं न करोति रिरंसुर्भैम्यपि स्वयं यत्नं न करोति इति यद्यपि ता जानन्ति तथापि भैमीपरिहासार्थं तादृशं शुकवचनमेव व्याजीकृत्य बहिर्निर्गता इत्यर्थः। किम्भूतास्ताः, कमलतयेव कमलरूपत्वेनेव तदा सन्ध्यासमये निकोचवत्यः सङ्कोचवत्यः। कमलानि सन्ध्यायां सङ्कुचन्ति। तादृश्या दृथागमनारम्भेण ब्रीडाशीलसञ्जननात् कुपितायाः निजसख्या भैम्या दृगर्द्धेन एकदेशेन दृष्टाः विलोकिताः सङ्कोचत्वान्नेत्रतृतीयभागतिर्य्यग्व्यापारेणैव दृष्टाः। कुपिता हि मानिनी दृगन्तेन पश्यति। निकोचः भावे घञ्॥ १४२॥

अकृतेति। सख्या पूर्व्वमानीतः परभृतः कोकिलोऽपि उन्मत्तत्वात् स्वभावाच्च जातो नेत्रयो रागो लौहित्यं यस्य एवंविधः सन् स्फुहिस्फुहीत्येवं रूपं शब्दमकृत, पिकः स्वभावादेव स्फुहि स्फुहीत्येवं चुकूजेत्यर्थः। तत्रोत्प्रेक्षते। पठिता समाप्तिं प्रापिता भक्ष्य स्तुतिः स्तुतिर्येन तं स्तुतिं कृत्वा तूष्णीभूतं कीरं शुकं मनीय

पठितनलनुतिं प्रतीव कीरं
नमिव नृपं प्रति जातनेत्ररागः ॥ १४३ ॥
तुङ्गप्रासादवासादथ झटिमक्रमतामायतीं केलिकुल्या-
मद्राक्षीदर्कबिम्बप्रतिकृतमणिना भीमजा राजमानाम् ।

उद्दिश्येव स्तुहिस्तुहीत्यकृत। रे कीर किमिति तूष्णीम्भूतोऽसि इतःपरं नलस्य स्तुतिं कुर्विति नलस्तुतौ बुद्धिं प्रावर्त्तयदित्यर्थः। एवं वचने पिकस्य कथं सामर्थ्यमित्याशङ्क्याह। श्रुता वीणानिबद्धशुकानूदितवचनस्रक् तस्याः अनूक्तिः सर्व्वानुवादः तया वित्तो प्रसिद्धो प्रवीणचञ्चुर्यस्य तादृशः, शुकानूदितं सर्व्वमनूद्य इतःपरमपि स्तुहिस्तुहीत्याहेत्यर्थः। नेत्ररागेत्युत्प्रेक्षते न नलं प्रतीव लक्षीकृत्येव जातनेत्र प्रीतिसुन्दरतरं नयनानन्दकारिणं नलं दृष्ट्वा जातनेत्रप्रीतिः स्तुहिस्तुहीत्यकृतेत्यर्थ इति रागशब्देनोत्प्रेक्षा अनूक्तिचञ्चुरिति तेन वित्त इति (पा० ५।२।२६) चुञ्चुप् ॥ १४३ ॥

तुङ्गेति। अथैनं वीणाक्वणनानुवादिशुकालापानन्तरं भीमजा केलिकुल्यां क्रीडाकृत्रिमनदीमद्राक्षीत्। किम्भूतां भैम्याः तुङ्गे उच्चतरे प्रासादे वासात् स्थितेर्हेतोः स्वभं क्रमतां आयतीं प्राप्नुवतीं। अधोदेशे स्थिता स्वय महीयस्युच्चतरदेशे स्थितां भैमी प्रत्यणीयस्त्वेन प्रतिभासमानां तामित्यर्थः। तथा अस्तगामिनोऽर्कबिम्बस्य प्रतिकृत्या प्रतिबिम्बरूपेण महाप्रकाशेन मणिना राजमानां। तथा वक्रं वक्रं स्वभावकुटिलं भंजन्ती गच्छन्ती, अत

वक्रं वक्रं व्रजन्ती फणियुवतिरिति त्वत्तुभिर्व्यक्तमुक्ता-
ऽन्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामात्तिरुत्या ॥१४४॥
अथ रथचरणौ विलोक्य रक्ता-
वतिविरहौ सततादृताविवास्त्रैः।

एव फणियुवतिरिति कृष्णसर्पीयमिति चक्षुभिः वामश्रोतैः रथ-पदमिथुनैश्चक्रवाकस्त्रीपुंसयुगलैः व्यक्तं स्पष्टं सक्रमन्योन्यं परस्परं यथा तथा तीरे विषये विद्रुत्य पलाय्य कर्मभूते वा द्वे तीरे प्रतिगत्वा आर्त्तिरुत्या विरहपीडासम्बन्धिना रुतेन कृत्वा सूचितां प्रकटीकृतां। दूरस्थत्वात् सान्ध्यतमसावृतत्वाच्च स्पष्टतरमदृश्य-मानाऽपि तदीयमिति चक्रवाककूजितेन ज्ञापिता। फणियुवतिरिति सूचितामिति वा। कृष्णसर्प्यपि कृशा भवति सूर्य्यबिम्ब-तुल्येन शिरस्थेन मणिना शोभते च। वक्रं वक्रं व्रजिताञ्च दृष्ट्वा जनाः पक्षिणो वा पलाय्य दीनस्वरोपलक्षिताः परस्परमद्व-वाधं मुञ्चन्ति। सूर्य्यमस्तं जिगमिषुं दृष्ट्वा चक्रवाकमिथुनानि सान्ध्यविरहपीडया रुतं कृत्वाऽन्योन्यं मुक्त्वा पलाय्य केलिकुल्या-परावारे तीरे तिष्ठन्तीति भैमी दर्शयत्यर्थः। उच्यतेऽस्मिन्निति वासः। तुङ्गप्रासादमारुह्य अद्राक्षीदिति व्यङ्गोपो वा ॥१४४॥

अथेति। अथ केलिकुल्यादर्शनानन्तरं सा भैमी रक्तौ पर-स्परानुरक्तौ स्वभावेन रक्तवर्णौ च अतिविरहौ सततं नितरां वियोगासहिष्णुतयाऽऽदृतौ कामशरैर्विद्धौ, अस्त्रैः रुधिरैरिव रक्तौ रथचरणौ चक्रवाकौ विलोक्य तं वर्त्तमानपद्मानां सृति-

अपि तमकृत पद्मसुप्तिकालं
श्वसनविकीर्णसरोजसौरभं सा ॥ १४५ ॥
अभिलपति पतिम्प्रति स्म भैमी
सदय विलोकय कोकयोरवस्थां ।
मम हृदयमिमौ च भिन्दतौ द्रा
क इव विलोक्य नरो न रोदितीमां ॥ १४६ ॥

कालं सङ्कोचसमयं सायं सन्ध्यासमयमपि विरहपीडितकोकदर्शनदुःखेन सञ्जातश्वसनो निश्वासभरस्तं निर्गमेन कृत्वा विकीर्णं सरोजसौरभं यस्मिन्, तादृशं अकृत, सन्ध्यासमये पद्मसङ्कोचात् सौरभासम्भवेऽपि निश्वासमोचनेन पद्मिनीत्वात् पद्मसौगन्ध्यं तदानीमपि विस्तारयति स्मेत्यर्थः । तौ तादृशौ दृष्ट्वा भृशं निःश्वस्तेत्यर्थः । अन्योऽप्यस्ततरक्तपादं दृष्ट्वा भृशं निःश्वसिति । विरहासहताहताविवासैरिति पाठः सुयोज्यः । रथचरणौ पुमान् स्त्रिया (पा० १।२।६७) इत्येकशेषः ॥ १४५ ॥

अभीति । भैमी पतिं प्रति इति अभिलपति स्म अवोचत् । इति किं । हे सदय सकरुण त्वं कोकयोरवस्थां विरहविक्लत्वं विलोकय द्रा कष्टं । इमौ कोकौ भिन्दतौ पृथग्देशावस्थितौ कुर्वतौ अत एव मम भैम्या अपि हृदयञ्च एतच्छोकेन विदारयन्तीं इमां कोकयोरवस्थां विरहविक्लत्वं विलोक्य क इव नरः सचेता मनुष्यो न रोदिति अपि तु सर्वोऽपि

कुमुदमुदमुदेष्यतीमसोढा
रविरविलम्बितुकामतामतानीत्।
प्रतितरु विरुवन्ति किं शकुन्ताः
स्वहृदि निवेशितकोककाकुकुन्ताः ॥१४७॥

परिदेवनं करोत्येव। मदयत्नात्तव दुःखं भविष्यतीति किं युक्तमित्यर्थः ॥ १४६ ॥

कुमुदेति। हे प्रिय रविः उदेष्यतीं उत्पत्स्यमानां कुमुदानां मुदं विकासरूपं हर्षं असोढेव सोढुमशक्नुवन्निव अविलम्बितु सत्वरं गन्तुकामो यस्य तद्भावस्तता तां अतानीत् विस्तारितवान्। आसन्नास्तमयो वर्त्तत इत्यर्थः। तथा शकुन्ताः पक्षिणः प्रतितरु विरुवन्ति विशेषेण रुतं कुर्व्वन्ति आसन्ननेत्रनिमीलनावासार्थिनो विरुवन्तःसन्तः स्वस्वनिवासवृक्षं प्रतिगच्छन्तीत्यर्थः। तत्रोत्प्रेक्षते स्वहृदि निवेशिताः कोकानां काकवः शोकविकृता विरावा एव अतिपीडाकारित्वात् कुन्ताः भल्लायैस्तादृशाः किं। चक्रवाकशोकपीडिता इव पक्षिणः क्रन्दन्तीत्युत्प्रेक्षा। अन्योऽपि वैरिणां उदेष्यतीं अभिवृद्धिं असहमानः सत्वरं कुत्रचिद्गच्छति। तथा अपरःसकृपः कश्चिद्दुःखितं कञ्चिद्दृष्ट्वा क्रन्दति। सोढा इत्। मुदं नलोकेति (पा० २।३।६९) षष्ठीनिषेधः। उदेष्यती आच्छीनद्योरिति (पा० ७।१।८०) विकल्पान्नुमभावः ॥ १४७ ॥

अपि विरहमनिष्टमाचरन्ता-
वधिगमपूर्व्वकपूर्व्वसर्व्वचेष्टौ ।
इदमहह निदर्शनं विहङ्गौ
विधिवशचेतनचेष्टितानुमाने ॥ १४८ ॥

अपीति । हे प्रिय स्वस्यानिष्टमपि विरहमाचरन्तौ स्वयमेव कुर्वाणौ तर्हि सदास्वानिष्टाचरणस्वभावावेव भविष्यत इत्यत आह । अधिगमो ज्ञानं तत्पूर्व्विकाः पूर्व्वा विरहाचरणात् प्राचीनाः सर्व्वाश्चेष्टा कर्त्तव्यता ययोस्तौ । अधिगमो लाभो हितमिति यावत् । तत्पूर्व्विकास्तदुद्देश्या पूर्व्वाश्चेष्टा ययोस्तादृशौ वा । बुद्धिपूर्व्वकारी हि स्वाहितेन प्रवर्त्तते, कोकयोश्च दिने भोजनादयः सकलाश्चेष्टा ज्ञानपूर्व्विकाः स्वहिताः । एवं सति अनेनैव स्वभावादेतौ सन्ध्यायां अकस्मादेवान्योन्यविरहे स्वयमेव यस्मादाचरतः तस्माद्विधिवशं दैवाधीनं चेतनानां प्राणिनां चेष्टितं पूर्व्वकर्म्माधीनं प्राणिनामाचरणमित्येवंरूपे अनुमाने कार्य्यकारणविशेषज्ञाने विषये यावेतौ विशिष्टौ विहङ्गौ कोकौ । इदमेव निदर्शनं, अयमेव दृष्टान्तः । अहह अद्भुते खेदे वा, तस्मात् प्राचीनकर्म्मानुसारेणैव प्राणी कदाचित् हित कदाचिच्चाहितमाचरतीति भावः । प्राणिनो दैवाधीनचेष्टिताः ज्ञानेऽपि प्रतिकूलतया प्रवर्त्तमानत्वात् । चक्रवाकवत् । इत्युपमानं ॥ १४८ ॥

अद्रिस्थारुणिमेष्टकाविसरणैः शोणे कृपाणः स्फुटं
कालोऽयं विधिना रथाङ्गमिथुनं विच्छेत्तुमन्विच्छता।
रश्मिग्राहिगरुत्मदग्रजसमारब्धाविरामभ्रमौ
दण्डभ्राजिनि भानुशाणवलये संसज्य किं निज्यते॥१४९॥

अद्रीति। स्फुटमुत्प्रेक्षते हे प्रिय रथाङ्गमिथुनं विच्छेत्तुं वियोक्तुं। अथ च विशेषेण विदारयितुं अन्विच्छता विधिना ब्रह्मणा दैवेन वा अयं कालः सन्ध्यासमय एव स्फुटं खड्गगुणयोगात् कालः कृष्णलोहमयः कृपाणः भानुशाणवलये सूर्यरूपे शाणचक्रे संसज्य संयोज्य निज्यते किं तीक्ष्णीक्रियते किमित्यर्थः। किम्भूते वलये। अस्तमयकालसान्निध्यात् अद्रिस्थः किरणस्तोऽरुणिमा स एव इष्टकाविसरणानि इष्टकाचूर्णप्रसारणानि तैः शोणे रक्तवर्णे तथा रश्मिग्राहिणा गरुत्मतोऽग्रजेन अरुणेन समारब्धाऽविरामा निरन्तरां भ्रमिर्भ्रमणं तस्मिन् सदा अरुणेन कृतभ्रमणे। अथ वा आकर्षणरज्जुग्राहिभिः अरुणसमैस्तद्वत्तेजस्विभिर्बलिभिः पुरुषैः आरब्धनिरन्तरभ्रमणे तथा दण्डसंज्ञकेन सूर्यपार्श्ववर्त्तिना भ्राजिनि शोभनशीले। अथ च शाणचक्राधारभूतेन आकर्षणरज्जुसंयुतेन दारुमयेन दण्डेन शोभमाने सन्निहितास्तमयसूर्यसायंसन्ध्यासमयसान्निध्याच्चक्रवाकयुगं तीक्ष्णतरखड्गविदारितमिव विधिवशादियुक्तं सत् व्यथत इति भावः। अन्योऽपि किञ्चिच्छेत्तुं खड्गमुक्तविशेषणविशिष्टे शाणचक्रे तीक्ष्णं करोति। किरणप्रसरैः

इति स विधुमुखीमुखेन मुग्धा-
लपितसुधासवमर्पितं निपीय।
स्मितशबलवलन्मुखोऽवदत् तां
स्फुटमिदमीदृशमीदृशं यथात्थ॥ १५०॥
स्त्रीपुंसौ प्रविभज्य जेतुमखिलावालोचितैाचित्ययो-
र्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ।

रश्मी माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विका इत्य-मरः। भ्रमाविति भाषितं पुस्तं। निज्यते णिजिर्शौचे इत्य-स्मात् कर्मणि यक्। नकारतकारभ्रान्त्यैव तिज्यत इति पठन्ति तदसत्॥ १४९॥

इतीति। स नलोऽपि तां भैमीमिति अवदत्। इति किं। हे प्रिये त्वं यथा आत्थ तत् स्फुटं निश्चितं ईदृशं सत्यमेवेत्यर्थः। किम्भूतः। इति पूर्वोक्तरीत्या विधुमुख्या भैम्या मुखेनार्पितं दत्तं मुग्धं मनोहारि आलपितं मञ्जुभाषितमेव सुधासवं रसवा-ऽस्वादमृतं उन्मादकत्वाच्च मधु निपीय आस्वाद्य सादरमा-कर्ण्य च स्मितेन शबल मिश्रितं वलत् भैमीसन्मुखं भवत् मुखं यस्य सः। कामिनो हि कामिनीमुखार्पितं मद्यं सानुरागं पि-बन्ति, अनन्तरं चलितमुखाः सहासं किञ्चिद्वदन्ति च॥ १५०॥

स्त्रीति। अयि प्रिये अहं वक्रतरे त्वद्भ्रुवौ रतिः प्रसूनशरः कामश्च तयोर्नम्रां स्त्रीजयाय रत्या पुञ्जयाय च कामेन आक-र्णमाकृष्य वक्रितां चापद्वयीं वेद्मि। त्वद्भ्रुवावेव तयोर्धनुषी

त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकमुक्त्येषिणो-
स्त्वन्निश्वासलते मधुश्वसनजं वायव्यमस्त्रं तयोः ॥ १५१ ॥
पीतो वर्णगुणस्तवातिमधुरः कायेऽपि सोऽयं यथा
यं बिभ्रत् कनकं सुवर्णमिति कैराद्दत्य नोत्कीर्त्यते।

इत्यर्थः। किम्भूतयोः। अखिलौ त्रिजगति वर्त्तमानौ तत्तज्जातीयौ स्त्रीपुंसौ प्रविभज्य विभागं कृत्वा पृथग् जेतुं आलोचितं विचारितं औचित्यं याभ्यां तयोः। स्त्रियाः स्त्र्येव जेतुं योग्या। पुंसश्च पुमानेवेति आलोचितौचित्तयोरित्यर्थः। तथा नालीकानां त्रिलस्थिमाचनालीकाख्यशरविशेषाणां मुक्तिं मोचणमिच्छतः एवंशीलयोः। रतिकामयोः सम्बन्धिनीं द्विनलिकीं नालीकमोचणोपायभूतशरन्यवंशद्वयपर्व्वद्वयं त्वन्नासाच्छलेन त्वदीयवामदक्षिणनासापुटद्वयव्याजेन निह्नुतां गोपितां जानामि। त्वन्नासापुटद्वयमेतन्न भवति किन्तु नालीकद्वयमुक्तुपायभूता रतिकामयोः द्विनलिकीत्येवाहं शङ्के इत्यर्थः। तथा त्वन्निश्वासलते वामदक्षिणनासानिश्वासधाराद्वयं तयोः रतिकामयोः प्रत्येकं मधुश्वसनजं वसन्तकालीनमलयानिलप्रभवं वायव्यं वायुदेवताकं अस्त्रमेवाहं वेद्मि, सुन्दरत्वद्भूनासाद्यवयवदर्शनमात्रेण कामवश्यत्वं भवतीति भावः। द्विनलिकी समाहारे द्विगोः ङीप्। वायव्यं साऽस्य देवता (पा० ४।२।२४) इत्यर्थे वाय्वृतुपित्रुषसो-यत् (पा० ४।२।३१) ॥ १५१ ॥

पीत इति। हे भैमि वर्णेषु शुक्लादिषु मध्ये गुणो विशेषि-

का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य-
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥ १५२ ॥

कादिभिर्गुणपदार्थत्वेन निर्दिष्टः पीतो हरिद्राभो वर्णः स च स एव अतिमधुरो रमणीयतरो न तु वर्णान्तरं मधुरमित्यर्थः। यथा येन कारणेन अयं पीतो वर्णः तेऽपि तवापि काये देहे वर्त्तते, अत्युत्तमया त्वयापि देहे धार्य्यते तस्मादयमत्युत्तम इत्यर्थः। अथ च रूपान्तरापेक्षया शुक्लरूपस्यैव प्रधानत्वादन्येषां चाप्रधानत्वात् वर्णेषु मध्ये गुणो प्रधानभूतोऽपि पीतो हरिद्राभो वर्णः स एवातिमधुरः प्रधानभूत इत्यर्थः। यस्मादयं ते काये वर्त्तते। अप्रधानस्यापि केनचिदत्युत्तमेनाङ्गीकृतत्वाद्धि प्राधान्यं भवति, तथा च त्वयाङ्गीकृतत्वात् प्राधान्यं युक्तमेवेत्यर्थः। अथ च गुणः पीत एव नान्यो गुणः पीतवर्ण एव गुणरूपोऽन्ये तु दोषरूपा इत्यर्थः। स एव च अतिमधुरः। उभयत्रापि हेतुः। पीतोऽयं तव काये वर्त्तते तस्माद्गुणोऽतिमधुरश्चेत्यर्थः। अथ च तव काये वर्त्तमानोऽयं प्रत्यक्षगम्योऽतिमधुरो रसो यथा पीतः तत्तचुम्बनस्थानचुम्बनेनास्वादितः, तथा तव काये सोऽतिप्रसिद्धो वर्णगुणो गौरिमाऽपि पीतः सादरं निरीक्षितोऽथ च हरिद्राभ इत्यर्थः। अपि चान्योन्यसमुच्चये। सोऽतिमधुरोऽधरो यथा पीतस्तथायं वर्णगुणोऽपि पीत एवेति वा सम्बन्धः। अथ च तव अतिमधुरो वर्णगुणो वर्णात्मकश्शब्दलक्षणो यथा पीतः आस्वादितः, अतिमधुरा तव वाणी पीतेत्यादि ज्ञातव्यं

एवं रूपत्वेनोक्ता प्रकृतपीतरूपवर्ण एव युक्तिमाह। त्वच्छरीराश्रयं पीतवर्णं बिभ्रत् कनकचम्पकशोभनो वर्णो यस्य तत् सुवर्णमिति कैर्जनैः आदृत्य आदरेण नोत्कीर्त्यते नोद्दीप्यते। अपि तु त्वदङ्गधृतसुवर्णतुल्यवर्णधारणादेव वर्णकं सुवर्णमित्युच्चैः कीर्त्यते। अथ च त्वच्छरीराश्रयं पीतवर्णं धारयच्चामीकरं शोभनो वर्णोऽस्येति व्युत्पत्त्या सुवर्णमिति कैर्जनैरादरेण नोद्दीप्यते, अपि तु त्वच्छरीराश्रितपीतवर्णमिति त्वदीयाङ्गमेव सुवर्णमिति कीर्त्तिर्लेभे इत्यर्थः। अथ च शोभनो वर्णः स्तुतिर्यस्य त्वदङ्गवर्णं बिभ्रदतितरां स्तुत्यं, न तु स्वत इति मुख्यया वृत्त्या सुवर्णमिति त्वदीयमङ्गमेव, कनकं तु त्वदङ्गवर्णसाम्यधारणाद्गौण्या वृत्त्या लोकेन कथ्यत इत्यर्थः। अत एव पीतवर्णस्य पुरस्ताद् प्रधानानां वर्णान्तराणां नीलरक्तादीनां वर्णना का, अपि तु सा नैव कुत्राप्युपयुज्यते, तत्कथा न कार्यैव, यावत् यतः कारणात् यो धवलिमा शुक्लगुणःषड्विधेषु रूपेषु मध्ये राजैव श्रेष्ठतम एव निर्मलत्वादभ्यर्हितत्वाद् रूपविभागवेलायां वैशेषिकैः प्रथमोच्चारितत्वाच्च प्रधानभूत एव तस्य प्रधानभूतस्यापि योगात् सम्बन्धाद् रजतं दुष्टोऽसमीचीनो वर्णो यस्य तस्य भावस्तत्ता दुर्वर्णशब्दवाच्यता तद्रूपं दुर्यशः अकीर्त्तिरतिनिन्दितनीलादिवर्णान्तरयुक्तन्तु दुर्वर्णतां प्राप्नोतीति किं वाच्यमित्यर्थः। यावत् सकलं रजतमिति वा। अत्र प्रधानस्यापि पीतरूपस्य भैमीशरीरेणाङ्गीकृतत्वादेव■त्तमत्वं तद्योगात् काञ्चने सुवर्णमिति कीर्त्तिः। भैमीशरीरेणाङ्गीकृतत्वादेव च उत्तमस्यापि धवलिम्नोऽनुत्त-

खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणात्
दृष्टे रोहति दोहदेन पयसां पिण्डेन चेत् पुण्ड्रकः।

मता। धवलिमा वर्णवाचित्वाद्गुणवचनत्वाद्वा इमनिच्॥१५२॥

इदानीं नवभिः श्लोकैर्भैम्या वाणीं वर्णयति। खण्डेति। हे भैमि पुण्ड्रकः स्थूलेक्षुविशेषः पयसां पिण्डेन दुग्धानामत्यन्ताग्नि-संयोगाद्घनीभूतेन गोलकेनैव दोहदेन एवम्भूते स्थले क्षेत्रे चेत् रोहति साङ्कुरो भवति। किम्भूते स्थले। खण्डः शर्करा तस्य क्षोदः चूर्णमेव मृत् मृत्तिका यस्मिन्, तथा मधु अमृतं माक्षिकमेव वा पयो यस्याः तया कादम्बिन्या मेघमालया तर्पणात् पूर्णजल-करणाद्धेतोर्द्विगुणाद्दृष्टमेघमालादृष्टजलं हि क्षेत्रं पुनः कृष्यते तादृशे समीकृते,उप्तं हि बीजं अङ्कुरार्थं पुनः पयोऽपेक्षत तत्स्था-नेऽत्र दुग्धगोलकः। दोहदेत्यनेन निरातङ्कमभिवृद्धिः सूचि-ता। अनन्तरञ्च प्ररूढाङ्कुरः सन् पुण्ड्रकः फलोत्पत्तिसमय-पर्यन्तं द्राक्षाणां द्रवः पक्वफलनिष्पीडितरसस्तस्य सेचनैः कृत्वा इक्षुदण्डादपि परिणतमाधुर्यातिशयं फलं यदि धत्ते तदा तर्हि ततोऽपि विशिष्टेक्षुफलादपि सकाशात् त्वद्गिरां तव वाणीना-मुद्देशाय निर्देशार्थं मधुरशब्द आधारो मूलप्रकृतिर्यस्य तादृ-शस्तमप् प्रत्यय उदेति उत्पद्यते। कीदृग्भैम्या वाणीति पृष्टे उक्त-विशेषणविशिष्टादिक्षुफलादतिमधुरतमेति तदा निर्देष्टुं शक्यत इति अतिशायने तमप् तदैव सङ्गच्छत इत्यर्थः। एवंविशिष्ट-फलं यदि भवेत् तर्हि तदेव तावदतिमधुरं तस्मादप्यतिमधुरं

स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्प्रत्ययः ॥ १५३ ॥
उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जयन्
दानान्तश्रुतशर्कराचलमथस्वेनामृतान्धः स्मरः ।

वस्तु विद्यते किं इति पृष्टे निःसीममधुरतमस्यान्यस्याभावात् तमप् प्रत्ययान्तमधुरशब्देन भवद्वाण्यैवोत्तमत्वेन दातुं योग्या न तु विशिष्टमपीक्षुफलं निःसीममाधुर्याभावात् तमप्प्रत्ययानुपपत्तेः, किमुत मधुराणि द्रव्यान्तराणि त्वद्वचनवन्मधुरतमं वस्तु किञ्चि-दपि न दृष्टं इति भावः । एवंविधे चेत्रे यदि पुण्ड्रको रोहति स च पयसां पिण्डेन दोहदेन द्राक्षाद्रवसेचनैश्च दोहदेन यदि फलं धत्ते इति वा । कादम्बिनी मेघमालेत्यमरः । पुण्ड्रो दैत्य-विशेषेक्षुभेदेऽपीति विश्वः । ततः स्वार्थे कन् ॥ १५३ ॥

उन्मीलदिति । अमृतमेवान्धोऽन्नं यस्य देवत्वात् तादृशो भ-वन् स्मरो यदि इक्षुरस एवोदधिस्तस्मात् सकाशात् नव्यां देवा-सुरोत्थापितपूर्वसुधाया अन्यादृशीं सुधामात्मनैवोत्थापयेन्नि-र्गमयेत् तर्हि सा मधुरतमा सुधा मत्कर्णयोः परमां पारणां अद्वितीयव्रतिरेतुं भवत्या जिह्वायाः कृतिं त्वद्रसनानिर्मितां वाणीं आह्वयेत स्पर्द्धापूर्वकमाकारयेत् । किम्भूतः स्मरः । उन्मी-लन् अतिप्रकाशमानः अतिशयितः गुडस्य इक्षुरसविकारस्य पाकः तज्जन्या ये तन्तव ऊर्ध्वाधःप्रसारितगुडनिर्गतदोरकाः त एव दैर्घ्यात् लता तयैव रज्ज्वा मन्थभ्रमणदोरकेण कृत्वा दा-

नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत् सा भव-
ज्जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणां ॥ १५४॥
आस्ये या तव भारती वसति तल्लीलारविन्दोल्लस-
द्वासे तत् कलवैणनिक्वणमिलद्वाणीविलासामृते ।

नान्ते तुलापुरुषदानादिमध्ये आयुरारोग्यैश्वर्य्यादिफलकः श्रुतः शर्कराचलः स एव मथो मन्थानमन्दरः तस्य भ्रमीर्भ्रमणानि अर्जयन् कुर्वन्,तया रज्वा शर्कराचलं मन्थानं चालयन् अति-मधुरसामयीसम्पादितं हि मधुरतमं भवतीत्येवंविधमधुररसा-मयीकलान्मधुरतमाऽपि अन्या सुधा भवद्वाणीतुल्या भवेद्वा न वा तदन्या तु नैवेत्यर्थः ।

अथातः सम्प्रवक्ष्यामि शर्कराचलमुत्तमं ।
यस्य प्रदानाद्विष्णुर्करुद्रास्तुष्यन्ति सर्व्वदा ॥

इति दानखण्डे। आह्वयेत स्पर्द्धायामाङः (पा० १।३। ३१) इति तङ् ॥ १५४ ॥

आस्य इति। हे प्रिये तवास्ये या भारती सरस्वती वसतिः। किम्भूते आस्ये। तस्या भारत्या एव हस्ते स्थितस्य लीलारवि-न्दस्येव उल्लसन् प्रसरन् वासो गन्धो यस्मिन् पद्मिनीत्वात् पद्म-तुल्यपरिमले। तया तस्या एव कलो वैणो निक्वणः मधुरःस्फुटो वीणासम्बन्धी नादः तद्रूपं मिलन् सम्बध्यमानं वाणीविला-सरूपं वक्रोक्त्यादिनानाविधवाग्विलासरूपं अमृतं यस्मिन्। तया

तत्केलिभ्रमणार्हगैरिकसुधानिर्म्माणहर्म्याधरे
तन्मुक्तामणिहार एव किमयं दन्तस्रजा राजतः ॥ १५५ ॥
वाणी मन्मथतीर्थमुज्ज्वलरसस्रोतस्विनी काऽपि ते
खण्डा खण्ड इतीदमीयपुलिनस्यालप्यते वालुका ।

तस्या एव केलिभ्रमणार्हं लीलागमनयोग्यं गैरिकेनोक्तधातुविशेषेण सुधया धवलतया धवलसाधनचूर्णद्रव्येण च चित्रादिनिर्म्माणं यत्र तादृशं यत् हर्म्यं गृहं तद्रूपस्तत्तुल्यो ऽधरो यस्मिन् तादृशे आस्ये पुरो दृश्यमाने ये दन्तस्रजौ द्वे दन्तमाले राजतः शोभेते । तद्रूपः अयं पुरो दृश्यमानः तस्या भारत्याः मुक्तामणिरचितो हार एव किं तद्दन्ते रेजाते इत्यर्थः । सरस्वतीवीणाक्वणिततुल्या तव वाणीत्यर्थः । अत्र प्राधान्येन वाणीवर्णनं, अन्यत्प्रासङ्गिकं । पद्मगन्धादिभिर्मुखे भारतीवासोऽनुमीयते । ईश्वराणां गृहं गैरिकादिविचित्रं भवति गैरिकयुक्ता सुधेति वा ॥ १५५ ॥

वाणीति । हे भैमि वाणी काऽपि वर्णयितुमशक्यत्वात् लोकोत्तरा, अथ वा निर्दिश्यमाना उज्ज्वलरसस्रोतस्वती शृङ्गाररससम्बन्धिनी वा नदी, अथ च निर्म्मलजलसम्बन्धिनी वा नदी अत एव मन्मथस्य तीर्थं कामोद्दीपिका, तथा इदमीयस्याः अस्या नद्याः सम्बन्धिनः पुलिनस्य सम्बन्धिनी वालुकैव इक्षुविकाररूपः खण्ड इति आलप्यते गीयते । तथा पूताः निर्म्मलाः सिताः शुभ्राः चक्रिकाः शर्कराशकलचक्राणि एतस्यास्तीरस्य मृदैव धवलमृत्तिकयैव रचिताः किं । तथा पीयूषं अमृतं अस्याः सम-

एतत्तीरस्तदेव किं विरचिताः पूताः सिताचक्रिकाः
किं पीयूषमिदम्पयांसि किमिदन्तीरे तवैवाधरौ ॥ १५६ ॥
परभृतयुवतीनां सम्यगायाति गातुं
न तव तरुणि वाणीयं सुधासिन्धुवेणी ।
कति न रसिककण्ठे कर्त्तुमभ्यस्यतेऽसौ
भवदुपविपिनाम्रे ताभिराम्रेडितेन ॥ १५७ ॥

म्रीनि पयांसि इदम्पयांसि किं अस्या जलान्येव अन्ततलेनालप्यन्ते किं । तथा तवाधरावेव इदन्तीरे अस्या नद्यास्तीरे उभौ तटौ किं । शृङ्गाररसप्रधाना कामोद्दीपिका भवद्वाणी मधुरतमेति भावः ॥ १५६ ॥

परेति । हे तरुणि प्रादुर्भूतयौवने सुधासिन्धुवेणी सुधानदीप्रवाहरूपा तव इयं वाणी परभृतयुवतीनां सम्यगायात्वेन गातुं भाषितुं नायाति, यस्माद्धेतोस्ताभिः कोकिलाभिरसौ त्वद्वाणी भवत्या उपविपिने उपवने स्थितो य आम्रवृक्षः तस्मिन् स्थित्वा रसालाङ्कुरास्वादेन रसिकेऽतिमधुरे, अय च ममाप्येवं वाणी भवत्वेवं साभिलाषे कण्ठे कर्त्तुं कण्ठस्थां कर्त्तुं आम्रेडितेन पुनःपुनर्घोषणेन कतिवारान्नाभ्यस्यते, अपि तु बहुवारमभ्यस्यत एव । तस्मादद्यापि तासां भवद्वाणी मन्दग् नायातीति ज्ञायत इत्यर्थः । कोकिलालापादपि त्वद्वाणी मधुरतमेति भावः । भिक्षाटनेन विद्याभ्यासः सुकर इति सूचनार्थं परभृतपदं । पुनरपेक्षया स्त्रीणां विशेषतस्तरुणीनामिति सूचनार्थं युवतिपदं ॥ १५७ ॥

ऊर्ध्वस्ते रदनच्छदः स्मरधनुर्बन्धूकमालामयं
मौर्व्वी तत्र तवाधराधरतटाधःसीमलेखालता।
एषा वागपि तावकी ननु धनुर्वेदः प्रिये मान्मथः
सोऽयं कोणधनुष्मतीभिरुचितं वीणाभिरारभ्यते॥ १५८॥
स ग्राम्यः स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां
तच्च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः।

ऊर्ध्व इति। हे प्रिये ते ऊर्ध्वो रदनच्छदः ओष्ठएव बन्धूकमालामयं स्मरधनुः तवाधराधरतटस्य अधःसीमापर्य्यन्तं मर्य्यादायां वर्त्तमाना लेखा सैव दैर्घ्याल्लता तत्र कामचापे मौर्व्वी एषा। तावकी वागपि मान्मथः कामसम्बन्धी कामाद्वैतप्रतिपादकः धनुर्वेदएव सोऽयं विशिष्टस्त्वद्वाणीरूपो मान्मथधनुर्वेद उचितं योग्यं यथा तथा कोणधनुष्मतीभिर्वीणावादनसाधनधनुर्युक्ताभिः वीणाभिः आरभ्यते, अभ्यस्यते परमत्रापि नायातीत्यर्थः। त्वद्वाणी वीणाक्वणितादपि मधुरतमेति भावः। धनुर्वेदस्य धनुर्धरैरेवाभ्यस्यत इत्यौचित्यं, अभ्यस्यते एतदुचितमिति वा। यत् स्वस्य नायाति तदागमनार्थमभ्यासोऽप्युचित एवेत्यर्थः॥ १५८॥

स इति। हे मुग्धे सुन्दरि यः पुरुषः मधु किं नामेति पृच्छति प्रश्नं कुर्व्वाणे जने विषये तवाधरमेव उत्तरं न दत्ते स ग्राम्यः पामरोऽचतुरः, न तु तव नगरनिवासयोग्य इत्यर्थः। तथा हेम किं प्रकारकमिति प्रश्नं कुर्व्वाणे जने विषये यस्त्वद्वपुरेव

यः किं मध्विति नाधरं तव कथं चेमेति न त्वद्वपुः
कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरं ॥१५८॥
मध्ये बद्धाणिमा यत्सगरिममहिमश्रोणिवक्षोजयुग्मा
जाग्रच्चेतोवशित्वा स्मितधृतलघिमा मां प्रतीशित्वमेषि।

उत्तरं न दत्ते। स विदग्धानां चतुराणां संसदि सभायां सदा अपाङ्क्तेयतां पङ्क्तिवर्हिर्भूतत्वं याति गच्छति तेषां पङ्क्तौ नोपवेश्यते सोऽप्यचतुर इत्यर्थः। तथा सुधा नाम कीदृगिति पृच्छति प्रश्नं कुर्वाणे जने यत्ते गिरश्च उत्तरं न दत्ते, सारस्व विशिखास्तञ्च पुरुषं स्प्रष्टुमपि विगानोन्मुखा जुगुप्साये कृतोद्यमाः नीरसोऽयमिति जुगुप्सायां न स्पृशन्ति न भिन्दन्तीति किं वाच्यं सोऽप्यचतुर इत्यर्थः। त्वद्वाणी सुधाया अपि मधुरतमेति भावः। अधरादिवर्णनं तु प्रासङ्गिकं। ग्राम्यः। ग्रामाद्यखञौ (पा० ४।२।९४) इति भवार्थे यः। पाङ्क्तेयः नद्यादित्वाड्ढक्॥ १५८॥

मध्य इति। हे प्रिये त्वं यद् यस्माद्धेतोर्मध्ये उदरभागे बद्धो धृतः अणिमा सौक्ष्म्यातिशयो यया सा कृशोदरी, तथा गरिममहिमभ्यां गुरुत्वमहत्त्वाभ्यां सह वर्त्तमानं श्रोणिर्नितम्बः वक्षोजयुग्मं स्तनयुगञ्च यस्याः सा गुरुस्थूलनितम्बा महोच्चकुचा च, तथा जाग्रत् स्फुरद्रूपं चेतसि वशित्वं जितेन्द्रियता यस्याः सा पतिव्रता। तथा स्मिते ईषद्धासेऽपि धृतो लघिमाऽल्पत्वं यया सा, अल्पहासेत्यर्थः। तथा मां प्रत्युद्दिश्य ईशित्वं स्वामितामेषि,

सूक्तौ प्राकाम्यरम्या दिशि विदिशि यशोलब्धकामावसाया
भूतीरष्टावपीशस्तददित मुदितः स्वस्य शिल्पाय तुभ्यं॥ १६०॥

मम प्राणेश्वरी। तथा सूक्तौ वचनचातुर्यविषये प्राकाम्येन प्रकारवाहुल्येन रम्या वक्रोक्त्यादिनानाप्रकारं वाणीं वक्तुं यो यथा वाञ्छति तथा वक्तुं त्वमेव जानासि नाऽन्या। तथा दिशि प्राच्यादौ विदिशि आग्नेयादौ च यशसः सौन्दर्य्यादिविषयकीर्त्तेः यशसा वा हत्वा लब्धः कामेन स्वेच्छया अप्रतिहतप्रसरोऽवसायो गतिर्यया सा त्रैलोक्यप्रसरकीर्त्तिः, एवंविधा यस्मात् तस्मात् कारणात् मुदितो हृष्टः ईश ईश्वरः त्वां निर्माय सौन्दर्य्यादिना मुदितः परितुष्टः सन् अणिमादीरष्टावपि भूतीः महासिद्धीः तुभ्यं स्वशिल्पाय त्वद्रूपाय निजनिर्म्माणाय अदित प्रायच्छत्। सन्तुष्टो हि पित्रादिः अपत्यादिभ्यः स्वयं धृतमलङ्कारादि ददाति। तथेश्वरेण सन्तुष्टेन स्वयं धृतमणिमा महिमा गरिमा लघिमा वशित्वमीशित्वं प्राकाम्यं कामावसायिता चेत्येवमष्टविधमैश्वर्य्यं तुभ्यं दत्तं, अन्यथा एतत्त्वयि कथं स्यादित्यर्थः। एवं सृष्टिः कस्याश्चिदपि नास्तीति भावः। शब्दश्लेषभङ्गिच्छलेनैतत् सर्व्वमुक्तमिति ज्ञेयं। वाणीवर्णन एव तात्पर्य्यं। मध्यादिवर्णनं प्रासङ्गिकं। अणिमादौ गुणवचनत्वादिमनिच्। वश इन्द्रियाणां स्वाधीनत्वं तदस्यास्तीति वशी तद्भावो वशित्वं जितेन्द्रियत्वं ईशनमीशः ऐश्वर्य्यं तदस्यास्तीति ऐशी तद्भावः ईशित्वम्॥१६०॥

त्वद्वाचः स्तुतये वयं न पटवः पीयूषमेव स्तुम-
स्तस्यार्थे गरुडामरेन्द्रसमरः स्थाने स जानेऽजनि।
द्राक्षापानकमानमर्द्दनसृजा चीरे दृढावज्ञया
यस्मिन्नामधृतोऽनया निजपदप्रक्षालनानुग्रहः॥ १९१॥
शोकश्चेत् कोकयोस्त्वां सुदति नुदति तद्व्याहराज्ञाकरस्ते
गत्वा कुल्यामनस्तं व्रजितुमनुनये भानुमेतज्जलस्थं।

त्वदिति। हे प्रिये वयं त्वद्वाचः स्तुतये न पटवः, तस्मात् पीयूषममृतमेव स्तुमः तस्य अमृतस्यार्थे स पुराणादिप्रसिद्धः गरुडस्यामरेन्द्रस्य च समरः अजनि स्थाने युक्तं तदित्यहं जाने मन्ये। नाम यस्माद्धेतोरनया तव वाण्या यस्मिन्नमृते निजपादयोः प्रक्षालनेनैवानुग्रहो धृतः कृतः। किम्भूतया द्राक्षापानकस्य पक्वद्राक्षासम्बन्धिनः संस्कृतरसविशेषस्य मानोऽहङ्कारस्तस्य मर्द्दनं खण्डनं सृजति तया। तथा चीरे दुग्धे विषये दृढा अन्येन त्याजयितुमशक्या अवज्ञा यस्यास्तया। अथ च यस्मिन् पीयूषे भवद्वाक्यभूतया वाण्या स्वीयसुप्तिङन्तरूपाणां पदानां प्रक्षालनादनुपश्चाद् ग्रहाणां ग्रहः कृतो ऽस्त्येव, अमृतक्षालिततयैव निर्दोषमधुरञ्च वदसीत्यर्थः। द्राक्षाक्षीरे तिष्ठतः पीयूषादपि त्वद्वाणी मधुरतमेति भावः। प्रभोर्यस्मिन्ननुग्रहातिशयः स एव चरणक्षालनादि करोति ॥ १९१॥

शोकेति। हे सुदति कोकयोर्विरहजनितः शोकः षदय-

बद्धे यद्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं
दत्त्वैवाभ्यां तदम्भोञ्जलिमिह भवतीं पश्य मामेष्यमाणं॥१६२॥

इदयलात् त्वां चेनुदति तर्हि व्याहर आज्ञापय। ते आज्ञाकरः अहं कुल्यां गत्वा एतस्याः कुल्याया जलस्थं उदकप्रतिबिम्बितं भानुं सूर्यं अनस्तं अस्ताभावं प्रजितुं प्राप्तुं अस्तमगन्तुं, यद्वा अनस्तं अस्ताचलप्रतियोगिभूतं उदयाचलं गन्तुं अनुनये प्रार्थये। इदानीं त्वया अस्तो न प्राप्तव्यः पुनरुदयाचले गन्तव्यं इत्येवं सूर्यं करसम्पुटयोजनया सम्प्रार्थ्य पुनः प्राचीं नेष्यामीति यावत्। यदि मया अञ्जलौ बद्धेऽपि अयं सूर्यः मामनुनये प्रार्थनायां विमुखः स्याद् यतः एकः केवलो ग्रहोऽभिनिवेशो यस्य एवंविधः, अथ च एको मुख्यो ग्रहराजः तत्तर्हि सूर्यार्घदानसम्बन्धिनं अम्भोञ्जलिं आभ्यां कोकाभ्यामेव दत्त्वा इह प्रासादे भवतीं प्रति पुनरेष्यमाणमागमिष्यन्तं मां पश्य, एवं कोकनदव्याजेन बहिः सन्ध्यामुपासीतेति वचनात् सायंसन्ध्योपासनानिमित्तं बहिर्निर्गमनार्थमनुज्ञां याचितवानिति भावः। सुदतीत्यनेनोक्त्याऽनन्तरं ईश्वरदत्तकिरणप्रकाशेन महानानन्दो जनिष्यते तदर्थं व्याहरेति प्रार्थन इति सूच्यते। दत्त्वेति पाठे उत्प्रेक्षा। एष्यमाणं गत्यर्थादीङो लटः शानच्॥१६२॥

तदानन्दाय त्वत्परिहसितकन्दाय भवती
निजालीनां लीनां स्थितिमिह मुहूर्त्तं मृगयताम्।
इति व्याजात् कृत्वाऽऽलिषु वलितचित्तां सहचरीं
स्वयं सोऽयं सायन्तनविधिविधित्सुर्बहिरभूत्॥ १६३ ॥

तदिपि। सोऽयं नलः स्वयं सायन्तनं विधिं सान्ध्याग्निहोत्रादिकं कर्म्म विधित्सुः कर्त्तुकामः सन् प्रासादाद्बहिरभूत्, निरगादित्यर्थः। किं कृत्वा इति व्याजादेवंप्रकारेण सूर्य्यानुनयसखीगवेषणमिषेण सहचरीं भैमीं आलिषु सखीषु विषये चालिङ्गनमिषाद् वलितं चित्तं यस्यास्तादृशीं कृत्वा। इति किं हे प्रिये अहं सूर्य्यानुनयार्थं नदीम्प्रति गमिष्यामि भवती च निजालीनां निजसखीनां इहात्रैव कस्मिंश्चित् प्रदेशे त्वया न द्रष्टव्यमिति लीनां गुप्तां स्थितिं त्वत्कर्त्तृकं कर्म्मकं वा परिहसितं परिहासितं परिहासक्रीडैव कन्दो मूलं उत्पत्तिहेतुर्यस्य तादृशाय तज्जनिताय तासां सखीनामानन्दाय मुहूर्त्तं मृगयतां गवेषयतु इति। एवं तद्वचनाद्भैमी क्वचिल्लीनाः सखीर्गवेषितुं निर्गता। नलोऽपि सायंसन्ध्यां कर्त्तुं बहिर्निर्गमनादिना उत्सर्गसङ्गतिः सूचिता। विधित्सुः द्वितीयेति योगविभागात् समासः॥ १६३ ॥

बद्धे यद्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं
दत्त्वैवाभ्यां तदम्भोञ्जलिमिह भवतीं पश्य मामेष्यमाणं॥१६२॥

इदयलात् लां चेद्वदति तर्हि व्याहर आज्ञापय। ते आज्ञाकरः अहं कुल्यां गला एतस्याः कुल्यायाः जलस्थं उदकप्रतिबिम्बितं भानुं सूर्यं अनस्तं अस्ताभावं प्रजितुं प्राप्तुं अस्तमगन्तुं, यद्वा अनस्तं अस्ताचलप्रतियोगिभूतं उदयाचलं गन्तुं अनुनये प्रार्थये। इदानीं त्वया अस्तो न प्राप्तव्यः पुनरुदयाचले गन्तव्यं इत्येवं सूर्यं करसम्पुटयोजनया सम्प्रार्थ्य पुनः प्राचीं नेष्यामीति यावत्। यदि मया अञ्जलौ बद्धेऽपि अयं सूर्यः मामनुनये प्रार्थनायां विमुखः स्यात् यतः एकः केवलो ग्रहोऽभिनिवेशो यस्य एवंविधः, अथ च एको मुख्यो ग्रहराजः तत्तर्हि सूर्यार्घ्यदानसम्बन्धिनं अम्भोञ्जलिं आभ्यां कोकाभ्यामेव दत्त्वा इह प्रासादे भवतीं प्रति पुनरेष्यमाणमागमिष्यन्तं मां पश्य, एवं कोकनदव्याजेन बहिः सन्ध्यामुपासीनेति वचनात् सायंसन्ध्योपासनानिमित्तं बहिर्निर्गमनार्थमनुज्ञां याचितवानिति भावः। सुदतीत्यनेनोक्त्याऽनन्तरं ईश्वरदत्तकिरणप्रकाशेन महानानन्दो जनिष्यते तदर्थं व्याहरेति प्रार्थ्यत इति सूच्यते। दत्त्वेति पाठे उत्प्रेक्षा। एष्यमाणं गत्यर्थादीडो लटः शानच् ॥ १६२ ॥

तदानन्दाय त्वत्परिहसितकन्दाय भवती
निजालीनां लीनां स्थितिमिह मुहूर्त्तं मृगयताम्।
इति व्याजात् कृत्वाऽऽलिषु वलितचित्तां सहचरीं
स्वयं सोऽयं सायन्तनविधिविधित्सुर्बहिरभूत्॥ १६३॥

तदिति। सोऽयं नलः स्वयं सायन्तनं विधिं सान्ध्याग्निहोत्रादिकं कर्म विधित्सुः कर्त्तुकामः सन् प्रासादाद्बहिरभूत्, निरगादित्यर्थः। किं कृत्वा इति व्याजादेवंप्रकारेण सख्यनुनयसखीगवेषणमिषेण सहचरीं भैमीं आलिषु सखीषु विषये चालिङ्गनमिषाद् वलितं चित्तं यस्यास्तादृशीं कृत्वा। इति किं हे प्रिये अहं सख्यनुनयार्थं नदीम्प्रति गमिष्यामि भवती च निजालीनां निजसखीनां इहाचैव कस्मिंश्चित् प्रदेशे त्वया न द्रष्टव्यमिति लीनां गुप्तां स्थितिं त्वत्कर्तृकं कर्मकं वा परिहसितं परिहासितं परिहासक्रीडैव कन्दो मूलं उत्पत्तिहेतुर्यस्य तादृशाय तज्जनिताय तासां सखीनामानन्दाय मुहूर्त्तं मृगयतां गवेषयतु इति। एवं तद्वचनाद्भैमी क्वचिल्लीनाः सखीर्गवेषितुं निर्गता। नलोऽपि सायंसन्ध्यां कर्त्तुं बहिर्निर्गमनादिना उत्सर्गसङ्गतिः सूचिता। विधित्सुः द्वितीयेति योगविभागात् समासः॥ १६३॥

उत्तरनैषधचरिते।

द्वाविंशः सर्गः।

ॐ तत्सत्।

उपास्य सान्ध्यं विधिमन्तिमाशा-
रागेण कान्ताधरचुम्बिचेताः।
अवाप्तवान् सप्तमभूमिभागे
भैमीधरं सौधमसौ नरेन्द्रः॥ १॥

इदानीं पूर्व्वसर्गान्तप्रस्तावितं सायङ्कालं वर्णयिष्यन् कविर्द्वाविंशं सर्गमुपक्रमते। उपास्येति। असौ नरेन्द्रो नलः सन्ध्याप्रान्तभावेनान्तिमाशायाः प्रतीच्या आशाया दिशो रागेण रक्तवर्णेन हेतुना कान्ताया अधरचुम्बि अधरोष्ठस्मारि चेतो यस्य तादृशः सन्ध्यारागसदृशभैम्यधरस्मारी सन् तद्विरहासहिष्णुतया बहिरवस्थातुमशक्तो यत्र सा विद्यते तं सप्तमे भूमिभागे कक्षायां स्थितं भैम्याः धरं पर्व्वतरूपं सौधं हर्म्यं प्रासादं स्व सप्तमीमुपकारिकामवाप्तवान् प्राप। किं कृत्वा। सान्ध्यं सन्ध्यासम्बन्धिनं सन्ध्याजपादिविधिमुपास्य कृत्वा॥ १॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
तस्यागादयमेकविंशगणनः काव्येति नव्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः॥ १६४॥

श्रीहर्षमिति। तस्य कृतौ श्रीहर्षकृते अतिशयेन नव्ये अपूर्वतरप्रमेयपरिपूर्णे भैमीभर्तुः चरित्रवर्णनं प्राचुर्य्येण प्रस्तुतं यत्र तादृशे काव्ये एकविंशतेः पूरणः एकविंशगणना सङ्ख्या यस्य यद्वा एकविंशतेः पूरणी एकविंशा गणना सङ्ख्या यस्य सः सर्गोऽगात् समाप्तः॥ १६४॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते उत्तरनैषधीयव्याख्यायां एकविंशः सर्गः॥ २१॥

उत्तरनैषधचरिते ।

द्वाविंशः सर्गः ।

ॐ तत्सत् ।

उपास्य सान्ध्यं विधिमन्तिमाशा-
रागेण कान्ताधरचुम्बिचेताः ।
अवाप्तवान् सप्तमभूमिभागे
भैमीधरं सौधमसौ नरेन्द्रः ॥ १ ॥

इदानीं पूर्व्वसर्गान्तप्रस्तावितं सायङ्कालं वर्णयिष्यन् कविर्द्वाविंशं सर्गमुपक्रमते। उपास्येति। असौ नरेन्द्रो नलः सन्ध्याप्रान्तभावेनान्तिमाशायाः प्रतीच्या आशाया दिशो रागेण रक्तवर्णेन हेतुना कान्ताया अधरचुम्बि अधरोष्ठस्मारि चेतो यस्य तादृशः सन्ध्यारागसदृशभैम्यधरस्मारी सन् तद्विरहासहिष्णुतया वहिरवस्थातुमशक्तो यत्र सा विद्यते तं सप्तमे भूमिभागे कक्षायां स्थितं भैम्याः धरं पर्व्वतरूपं सौधं हर्म्यं प्रासादस्य सप्तमीमुपकारिकामवाप्तवान् प्राप। किं कृत्वा। सान्ध्यं सन्ध्यासम्बन्धिनं सन्ध्याजपादिविधिमुपास्य कृत्वा ॥ १ ॥

प्रत्युद्गजन्त्या प्रियया विमुक्तं
पर्य्यङ्कमङ्कस्थितसज्जशय्यं।
अध्यास्य तामप्यधिवास्य सोऽयं
सन्ध्यामुपश्लोकयति स्म सायं॥ २॥
विलोकनेनानुगृहाण ताव-
द्दिशं जलानामधिपस्य दारान्।

प्रतीति। सोऽयं नलः सायङ्कालसम्बन्धिनीं सन्ध्यां रात्रिन्दिनसम्बन्धिनं मुहूर्त्तं भैम्याः पुरउपश्लोकयति स्म श्लोकैः स्तौति स्म। किं कृत्वा। प्रत्युद्गजन्त्या सम्मुखमागच्छन्त्या प्रियया विमुक्तमङ्के मध्ये स्थिता सज्जा आस्तृता शय्या तूलिका यत्र तं पर्य्यङ्कमध्यास्य स्वयमधिष्ठाय तां भैमीमपि अधिवास्य तत्रोपवेश्य। पर्य्यङ्कं अधिशीङ (पा०१।४।४६) इति कर्म्मत्वम्। अधिवास्य ण्यन्तादस्तेर्ल्यप् तस्य धात्वन्तरत्वात् उपान्वध्याङ्वस (पा०१।४।४८) इति कर्म्मत्वाप्राप्तेस्तामधिवास्येत्यत्र सामर्थ्यात्तत्रैवेति ज्ञेयं। उपश्लोकयति सत्यापपाशेति (पा०३।१।२५) णिचि स्म योगे भूते लट्॥ २॥

विलोकनेनेति। हे भैमि त्वं जलानामधिपस्य वरुणस्य दारान् भार्य्यां पश्चिमां दिशं विलोकनेनानुगृहाण कृतार्थीकुरु तावदादौ विलोकनेनानुगृहाण वर्णनया तु पश्चादित्यर्थः। यावच्चन्द्रोदयादिना प्राच्यां रामणीयकं भवति तावत्सन्ध्यारागेण कृतरामणीयकां पश्चिमां दिशं विलोकयेति वा तावच्छब्दार्थः। जलाधिपस्य च भार्य्या दुःखिता विलोकनादिना

अक्षालि लाक्षापयसैव येय-
मपूरि पङ्कैरिव कुङ्कुमस्य ॥ ३ ॥
उच्चैस्तरादम्बरशैलमौले-
श्च्युतो रविर्गैरिकगण्डशैलः।
तस्यैव पातेन विचूर्णितस्य
सन्ध्यारजोराजिरिहोज्जिहीते ॥ ४ ॥

अनुगृहीतुमर्हा भवतीत्युक्तिः। येयं पश्चिमा दिक् लाक्षापयसा-ऽलक्तरसेन कृत्वा केनापि अक्षालीव क्षालितेव। तथा कुङ्कुमस्य पङ्कैः कृत्वा केनापि अपूरीव। एवंविधा रक्ता दृश्यते यत-स्तस्माद्रमणीयामेतां विलोकयेत्यर्थः ॥ ३ ॥

उच्चैरिति। हे प्रिये रविरेव गैरिकाख्यधातुविशेषसम्बन्धी गण्डशैलः उच्चैस्तरादत्युन्नतादम्बरशैलस्य गगनगिरेर्मौलेः शिखरात् मकाशाच्च्युतः पतितः स्थूलपाषाण एवाधः पतितोऽयच सन्निहितः पातेनोच्चतरगिरिशिखरादधःपतनेन हेतुना विचूर्णितस्य विशेषेण सूक्ष्मचूर्णीकृतस्य तस्यैव गैरिकगण्डशैलस्य सम्बन्धिनी सन्ध्यैव रजोराजिः सन्ध्यासम्बन्धी राग इत्यर्थः। इह सायङ्काले पश्चिमदिशि वा उज्जिहीते उपरिष्टात् प्रसरति। अस्तसमये सूर्यस्य रक्तत्वाद्गगनगिरिशिखराच्च्युतत्वाच गैरिकगण्डशैलत्वं। उच्चतरात् प्रदेशात् पतितो गण्डशैलश्चूर्णीभवति। चूर्णीभूतस्य रजोराजिरूर्द्ध्वं प्रसरति। तद्रजोराजिरेव सन्ध्यारागः प्रायेणोर्द्ध्वं गच्छति प्रसरतीत्यर्थः ॥ ४ ॥

अस्ताद्रिचूडालयपक्कणालि-
च्छेकस्य किं कुक्कुटपेटकस्य।
यामान्तकूजोल्लसितैः शिखौघै-
र्दिग्वारुणी द्रागरुणीकृतेयं॥ ५॥
पश्य द्रुतास्तद्रुतहर्य्यनिर्य्यत्-
करावलीदैङ्गुलवेत्रयाऽत्र।

अस्तेति। हे प्रिये कुक्कुटानां पेटकस्य समूहस्य यामान्ते प्रहरान्ते या कूजा शब्दितं तद्वशादुल्लसितैः प्रकाशमानैः किञ्चिदुच्चीभूतैः उत्फुल्लजपाकुसुमतुल्यैः शिखानां शिरसि रक्तचर्म्ममयकेसराणामौघैर्वृन्दैः किमियं वारुणी दिक् द्राक् अकस्मादरुणीकृता रक्तीकृतेत्युत्प्रेक्षा। किम्भूतस्य। अस्ताद्रेश्चूडा शिखरं सैव लयः स्थानं यस्य स च पक्कणः शवरगृहं तस्यालिः समूहस्तत्र छेकस्याश्रितस्य शवरैर्गृहेषु सङ्गृहीतस्य, कुक्कुटानां कूजने उन्नमितशिखत्वं जातिः, ते च यामान्ते कूजन्ति सायं समये कूजनादुत्फुल्लशिखावृन्दसम्बन्धादरुणीभवनसम्भवार्थं यामान्तेत्याद्युक्तम्। पक्कणः शवरालयः। गृहाश्रिताः पचिमृगाश्छेकास्ते इत्यमरः। पेटकं पुस्तकादीनां मञ्जूषायां कदम्बकमिति विश्वः॥ ५॥

पश्येति। सन्ध्ययाऽत्र सायंसमये चन्द्रस्य नायिका रात्रिः तत्सम्बन्धिनः प्रतीहारस्य दौवारिकस्य पदेऽधिकारमास्पदमपि पश्य विलोकय। किम्भूतया। द्रुतं शीघ्रं अस्तङ्गतस्य सूर्यस्य निर्यन्तो बहिर्निर्गच्छन्तो करावली किरणपरम्परैव, दैङ्गुलं

निषिध्यमानाहनि सन्ध्ययाऽपि
रात्रिप्रतीहारपदेऽधिकारं ॥ ६ ॥
महानटः किं नु स भानुरागे
सन्ध्याय सन्ध्यां कुनटीमपीशां।

हिङ्गुलाख्यं रञ्जकरक्तद्रव्यविशेषेण रक्तं वेत्रं दण्डविशेषोऽस्यास्तया। किम्भूते पदे। निषिध्यमानं निवार्य्यमाणप्रवेशं अहो दिनं यस्मिन्। स्त्रिया हि दौवारिकी स्त्र्येव युक्तेति सन्ध्यैव रात्रेर्दौवारिकी जातेत्यर्थः। सूर्य्योऽस्तमितो दिनं गतं रात्रिरागतेति सायंसन्ध्यया ज्ञाप्यत इति भावः। दौवारिक्यपि हैङ्गुलवेत्रपाणिः सती प्रविशन्तं कमपि प्रतिषेधयति। तिर्य्यक्करावलीति पाठे तिर्यक्प्रसारिणश्च ते कराश्चेति। अहनीत्यत्र तत्पुरुषलाभावादृजभावः ॥ ६ ॥

इदानीं सन्ध्यानक्षत्रयोगं वर्णयति। महानट इति। अङ्ग हे भैमि महान् सन्ध्योपासनादिविषयेऽतिप्रशस्तस्तथाऽटति गच्छतीत्येवम्भूतः कालः स प्रकृतः सायन्तनो, यद्वा महान् परमेश्वरो नटो नर्त्तको यस्मिन्, सन्ध्याकाले हि ईश्वरो नृत्यति स प्रकृतः सायंसन्ध्यासमयः। भानोः सूर्य्यस्य रागे लौहित्ये सति अस्तमयानन्तरं सूर्य्यस्य रागमात्रेऽवशिष्टे सति सन्ध्यां सन्ध्याकान्तिं किञ्चित् पीतरक्तवर्णत्वात् कुनटीं, नेपाली कुनटी गोलेत्याद्यभिधानान्मनःशिलारूपां, तथा ईशामपि स्वकालस्वामिनीं वा अथ पिहमस्तरूपत्रह्मत्वाद्देवतारूपां, अथ च सम्-

अस्ताद्रिचूडालयपक्कणालि-
च्छेकस्य किं कुक्कुटपेटकस्य ।
यामान्तकूजोल्लसितैः शिखौघै-
र्दिग्वारुणी द्रागरुणीकृतेयं ॥ ५ ॥
पश्य द्रुतास्तद्रुतदर्श्यनिर्यत्-
करावलीचेङ्गुलवेत्रयाऽत्र ।

अस्तेति । हे प्रिये कुक्कुटानां पेटकस्य समूहस्य यामान्ते प्रहरान्ते या कूजा शब्दितं तद्वशादुल्लसितैः प्रकाशमानैः किञ्चिदुच्चीभूतैः उत्फुल्लजपाकुसुमतुल्यैः शिखानां शिरसि रक्तचर्ममयकेसराणामोघैर्वृन्दैः किमियं वारुणी दिक् द्राक् अकस्मादरुणीकृता रक्तीकृतेत्युत्प्रेचा । किम्भूतस्य । अस्ताद्रेश्चूडा शिखरं सैव लयः स्थानं यस्य स च पक्कणः शबरगृहं तस्यालिः समूहस्तत्र छेकस्यासक्तस्य शबरैर्गृहेषु सङ्गृहीतस्य, कुक्कुटानां कूजने उन्नमितशिखत्वं जातिः, ते च यामान्ते कूजन्ति सायं समये कूजनादुत्फुल्लशिखावृन्दसम्बन्धादरुणीभवनसम्भवार्थं यामान्तेत्याद्युक्तम् । पक्कणः शबरालयः । गृहासक्ताः पक्षिमृगाश्छेकास्ते इत्यमरः । पेटकं पुस्तकादीनां मञ्जूषायां कदम्बकमिति विश्वः ॥ ५ ॥

पश्येति । सन्ध्ययाऽत्र सायसमये चन्द्रस्य नायिका रात्रिः तत्सम्बन्धिनः प्रतीहारस्य दौवारिकस्य पदेऽधिकारमासदमपि पश्य विलोकय । किम्भूतया । द्रुतं शीघ्रं अस्तङ्गतस्य सूर्यस्य निर्यन्ती बहिर्निर्गच्छन्ती करावली किरणपरम्परैव, हैङ्गुल

कृत्वा इदानीं सन्ध्यावन्दनानन्तरं अङ्गहारं मुखकरपार्श्वीयाङ्गानां विक्षेपं करोति किमिति वितर्कः। अमूर्त्तस्याङ्गहारकरणं विचित्रमिति विरोधार्थोऽपिशब्दः। न केवलं चन्द्रसूर्य्यभोगादिभूषितयैव तन्वाऽङ्गहारं करोति किन्तु वियताऽपि तन्वेति समुच्चयार्थो वा। ईश्वरोऽपि सायं समये नृत्यति। भानुरागे मनःशिलातुल्यवर्णां सन्ध्यामपोश्य सहचरीं पार्व्वतीं विचिन्त्य विशिष्टया वियद्रूपयाऽपि तन्वाऽङ्गहारं तनोति। पार्व्वतीसमीपेऽपीश्वरो नृत्यति। अथ च महानतिप्रवीणो नटः कुत्सितां नटीं नृत्तेऽनतिचतुरामपि सन्ध्यां वयःसन्धौ वर्त्तमानां तरुणीं रसभावसन्धौ वर्त्तमानां वा रसभावज्ञां। अत एव सभायां अनुरागे ईशां सन्ध्यानुरागजनने समर्थां अचिन्त्य वियत्तुल्ययाऽतिविशालया शुद्धमौक्तिकपरम्परारूपया मालयोपलक्षितया तन्वा अङ्गहारं तनोति तदसाम्प्रतं किन्तु रसभावादिजनयन्त्या तया सभ्यानुरागे समुपपादितेऽपि नृत्तकर्म्मकौशलेनापि सभ्यानुरागार्थं स्वयमङ्गहारं तनोतीति युक्तमेवेत्यर्थः। अथ च महानर्त्तको वयःसन्धौ रसादिसन्धौ वा वर्त्तमानां तया सम्टङ्गिमतीमपि स्त्रियं कुत्सितां नटीं नृत्तानभिज्ञां ज्ञात्वा सभानुरागे निमित्ते विशिष्टया तन्वा स्वयमङ्गहारं तनोति तदसाम्प्रतं किं नु अपि तु तस्या नृत्तकौशलाभावान्नृत्तेन सभानुरञ्जने सामर्थ्याभावात् सभानुरञ्जनार्थं स्वयमेव निपुणं नृत्यतीति युक्तमेवेत्यर्थः। अथ वा अन्योऽपि महानतिसमृद्धो अटति सर्व्वत्र गच्छति तादृशोऽतिचञ्चलोऽतिप्रसिद्धो

तनोति तन्वा वियताऽपि तार-
श्रेणिस्रजा साम्प्रतमङ्गहारं ॥ ७ ॥

द्बिमतीं सन्ध्याय सम्यग्विचिन्त्य साम्प्रतमिदानीं तन्वा किञ्चि-
दुन्नतया सन्ध्यारागतिरोहितकान्तितया वा कृशया किञ्चि-
द्दृश्यया। तथा वियताऽपि गगनरूपया लक्षणया यावद्गगनं
विस्तीर्णया च। यद्वा आसामस्त्येन व्याप्तं वियद्यया गगनव्यापि-
न्या च तारश्रेण्या नक्षत्रपरम्परारूपया स्रजा पुष्पादिमालया
हारं तनोति विरचयति किं। यद्वा ताराणां शुद्धमौक्ति-
कानां श्रेणिर्यत्र तादृश्या ग्रथितमौक्तिकमालया हारविर-
चनं युक्तमिति सन्ध्याकालः सन्ध्यामेवंविधां सञ्चिन्त्य नक्षत्रपर-
म्परामेव विरचयति किमित्यर्थः। सन्ध्यारागः कियानवशि-
ष्टोऽस्ति मुक्तातुल्यानि नक्षत्राणि च किञ्चिद्दृश्यानि जाता-
नीति भावः। तथा तारश्रेणिस्रजोपलक्षितेन तद्युक्तेन वियता
गगनेनैव हारं तनोतीति वा। सन्ध्यामेवंविधां विज्ञाय दूष्णी-
भूत, इति न किन्त्वौचित्यादिशिष्टया तारश्रेणिस्रजा हारमपि
विरचयतीत्यर्थ इति वा अपिशब्दार्थः। अथ च स प्रसिद्धो
महानटस्ताण्डवनृत्तकर्त्ता शिवः भानोः सूर्यस्य रागे सति.
अस्तमितार्द्धे सूर्ये सतीति यावत्। तत्र सन्ध्यासमये मनःशि-
लातुल्यवर्णां अचिरस्याकुलात् कुत्सितनर्तकीरूपां वा ईशां देवीं
सन्ध्याय सम्यग् ध्यात्वा सायं सन्ध्यावन्दनं कृत्वाऽष्टमूर्त्तिषु मध्ये
तारापरम्परैव माला यस्यां तया गगनरूपयाऽपि अमूर्त्तयाऽपि

कृत्वा इदानीं सन्ध्यावन्दनानन्तरं अङ्गहारं मुखकरपार्श्वीयाङ्गानां विक्षेपं करोति किमिति वितर्कः। अमूर्त्तस्याङ्गहारकरणं विचित्रमिति विरोधार्थोऽपिशब्दः। न केवलं चन्द्रसूर्य्यभोगादिभूषितयैव तन्वाऽङ्गहारं करोति किन्तु वियताऽपि तन्वेति समुच्चयार्थो वा। ईश्वरोऽपि सायं समये नृत्यति। भानुरागे मनःशिलातुल्यवर्णां सन्ध्यामपीशां सहचरीं पार्व्वतीं विचिन्त्य विशिष्टया वियद्रूपयाऽपि तन्वाऽङ्गहारं तनोति। पार्व्वतीसमीपेऽपीश्वरो नृत्यति। अथ च महानतिप्रवीणो नटः कुत्सितां नटीं नृत्तेऽनतिचतुरामपि सन्ध्यां वयःसन्धौ वर्त्तमानां तरुणीं रसभावसन्धौ वर्त्तमानां वा रसभावज्ञां। अत एव सभायां अनुरागे ईशां सन्ध्यानुरागजनने समर्थां सञ्चिन्त्य वियत्तुल्ययाऽतिविशालया शुद्धमौक्तिकपरम्परारूपया मालयोपलक्षितया तन्वा अङ्गहारं तनोति तदसाम्प्रतं किन्तु रसभावादिजनयन्त्या तया सभ्यानुरागे समुपपादितेऽपि नृत्तकर्मकौशलेनापि सभ्यानुरागार्थं स्वयमङ्गहारं तनोतीति युक्तमेवेत्यर्थः। अथ च महान्नर्त्तको वयःसन्धौ रसादिसन्धौ वा वर्त्तमानां तथा समृद्धिमतीमपि स्त्रियं कुत्सितां नटीं नृत्तानभिज्ञां ज्ञात्वा सभानुरागे निमित्ते विशिष्टया तन्वा स्वयमङ्गहारं तनोति तदसाम्प्रतं किं नु अपि तु तस्या नृत्तकौशलाभावान्नृत्तेन सभानुरञ्जने सामर्थ्याभावात् सभानुरञ्जनार्थं स्वयमेव निपुणं नृत्यतीति युक्तमेवेत्यर्थः। अथ वा अन्योऽपि महानतिसमृद्धो अटति सर्व्वत्र गच्छति तादृशोऽतिचञ्चलोऽतिप्रसिद्धो

भूषास्थिदाम्नस्त्रुटितस्य नाट्यात्
पतद्भिरुडुकोटीकपटं वहद्भिः ।
दिङ्मण्डलं मण्डयतीव खण्डैः
सायं नटस्तारकराट्किरीटः ॥ ८ ॥

नटः कुनटीमपि नृत्तविद्यायामपि मया कान्त्या कलाऽपि यो ऽनुरागस्तद्विषये ईर्शो सौन्दर्यातिशयेनैव रागमुत्पादयन्तीं तया शैशवतारुण्ययोः सन्धौ वर्त्तमानां प्रादुर्भूतयौवनां रसभावसन्धिस्थत्वाद्रसभावज्ञां वा सञ्चिन्त्य कायकान्त्याऽनुरागे सति कुनटीमपि तरुणीं रसभावज्ञां वा तयेशां सम्पन्नाञ्च विचिन्त्य तन्वा तदीयशरीरस्यातिविशिष्टतया शुद्धमौक्तिकमालया हारं विरचयति तत्रानुरक्तः सन् तस्यै मुक्ताहारं वितरतीत्यर्थः। एवमन्या अपि योजनाः सुधियोहनीयाः। सभानुरागैः सन्ध्येति पाठो बहुषु पुस्तकेष्वदृष्टत्वादुपेक्ष्यः। अटः पचाद्यच्। सन्ध्या दिगादित्वाद्यत्। तारशब्दस्य नक्षत्रकनीनिकाभिधायित्वं दशमसर्ग एवोक्तं ॥ ७ ॥

भूषेति। हे भैमि तारकराट् चन्द्रः किरीटे यस्य स शम्भुः सायं नटति सायं नटनर्त्तकः सन् उद्धतात् नाट्यात् नृत्ताद्धेतो- स्त्रुटितस्य भूषास्थिदाम्नो भूषणास्थिमालाया उच्छलितैः खण्डैः शकलैः तैरेव उडुकोटीकपटं कोटिसङ्ख्यनक्षत्रव्याजं वहद्भिर्धारयद्भिरिव सायं समये दिङ्मण्डलं मण्डयति पश्य। एतानि नक्षत्राणि न किन्तु 'ताण्डवत्रुटितास्थिमालोच्छलच्छकलान्येव

कालः किरातः स्फुटपद्मकस्य
वधं व्यधाद्यस्य दिनद्विपस्य ।
तस्यैव सन्ध्या रुचिराऽस्रधारा
ताराश्च कुम्भस्थलमौक्तिकानि ॥ ९ ॥
सन्ध्यासरागः ककुभो विभागः
शिवाविवाहे विभुनाऽयमेव ।

दिक्षु शोभन्त इत्यर्थः । अन्योऽपि चन्द्रतुल्यकिरीटो नटो नृत्यत्त्रुटितहारखण्डैरवीटन्दं मण्डयति । मण्डयतीवेति पाठे उत्प्रेक्षा ॥ ८ ॥

काल इति । हे प्रिये कालः सन्ध्यासमय एव किरातो ऽथ च कृष्णवर्णो हिंसकलान्मृत्युरूपो वा कालो गिरिमहारण्यसञ्चारी शबरः स्फुटानि विकसितानि पद्मानि यस्मिन्, यद्वा विकसितकमलं कं जलं यस्मिन्, अथ च प्रकटीभूतशुण्डदण्डाग्रे प्रकाशमानं पद्मकं रक्तबिन्दुवृन्दं यस्मिन् तादृशस्य दिनरूपस्य द्विपस्य वधं व्यधादकरोत् । तस्यैवेह तस्य करिणो रुचिरा रम्या सन्ध्याऽस्रधारा रुधिरधारा । ताराश्च नक्षत्राणि विदारिततदीयकुम्भस्थलमौक्तिकानि, सन्ध्यारागो रक्तधारा ताराश्च स्थूलमुक्ता इव शोभन्त इत्यर्थः । स्फुटपद्मकस्येति बहुव्रीहौ कप् ॥ ९ ॥

सन्ध्येति । विभुना प्रभुणा हरेण पूर्वं शिवायाः पार्वत्याः विवाहावसरे सन्ध्यया सरागो रक्तवर्णोऽयमेव ककुभः पश्चि-

दिग्वाससा पूर्व्वमवैमि पुष्प-
सिन्दूरिकापर्व्वणि पर्य्यधायि ॥ १० ॥
सतीमुमामुद्वहता च पुष्प-
सिन्दूरिकार्थं वसने सुनेत्रे।

आशाया विभागः प्रदेशः पुष्पवर्णयुक्ता सिन्दूरिका रक्तवर्णं तत्सम्बन्धिनि तद्योगात् पुष्पसिन्दूरिकाख्ये पर्व्वण्युत्सवे पर्य्यधायि परिहितः। यतो दिग्वलयमेव वासो यस्य तेन रक्तवस्त्रपरिधानावसरेऽपि दिग्वसनादौचित्या रक्तदिग्भाग एव परिहित इत्यवैमि शङ्के। विवाहस्य चतुर्थे दिने प्रथमदिनपरिहितानि वस्त्राणि प्रक्षालनार्थं परित्यज्य पुष्पसिन्दूरकाख्यपर्व्वणि कौसुम्भादिरक्तवस्त्राणि वधूवरेण परिधीयन्त इति वृद्धाचारः। तदेशस्य दिग्वसनत्वाद्रक्तपश्चिमभाग एवानेन परिहित इत्यर्थः। वर्णकभूतपुष्पस्थाने ताराः सिन्दूरिकास्थाने सन्ध्यारागः पश्चिमदिग्भाग इति भावः ॥ १० ॥

प्रातःसायंसन्ध्ययोः प्राचीप्रतीच्योर्द्वयोरपि तुल्यवर्णत्वात् सायंसन्ध्यारक्तपश्चिमदिश एव पुष्पसिन्दूरिकात्वं कथं वर्ण्यत इत्याक्षेपे तस्य परिहारार्थं प्राच्या अपि तद्भावमाह। सतीमिति। हे सुनेत्रे सतीं दाक्षायणीमुमां पार्व्वतीं च उद्वहता परिणयता दिग्वाससा हरेण पूर्व्वोक्तपुष्पसिन्दूरिकार्थं द्विसन्ध्यीभि द्वे अपि प्रातःसायंसन्ध्ये स्वीकृत्य द्वे प्राचीप्रतीच्यौ दिशावेव रागेण रक्तवर्णेन शोभा यथोक्ते रक्तवर्णेन शोभते

दिशौ द्विसन्ध्यीमभि रागशोभे
दिग्वाससोऽभे किमलम्भिपातां ॥ २२ ॥
आदाय दण्डं सकलासु दिक्षु
योऽयं परिभ्राम्यति भानुभिक्षुः।

इति वा। तादृशे रक्ते उभे द्वे वसने ऽलम्भिपातां प्राप्ते किं। विवाहद्वये सन्ध्याद्वयरक्तदिग्द्वयमेव दिग्वसनत्वाद् रक्तवस्त्रद्वयं शिवेन लब्धमित्यहं मन्य इत्यर्थः। शिवेन द्वे दिशावेव वस्त्रे द्वे सन्ध्ये लघीकृत्य रागेण रञ्जकद्रव्येण कृत्वा ये शोभे कर्मभूते ते प्रापिते किं। विवाहे वस्त्रं रञ्जनाय कस्यचित् करे समर्प्यते तस्माच्छिवेन दिग्द्वयरूपे मम वस्त्रे भवतीभ्यां रक्तशोभे प्रापनीये इति सन्ध्याद्वयं प्रार्थितं स दिग्द्वयं रक्तशोभं चकारेत्यर्थ इति वा। सुनेचीति पाठे संयोगोपधादिति (पा० ४।१।६३) निषेधात् ङीप् चिन्त्यः। द्विसन्ध्यी समाहारे द्विगोरेकत्वे आवन्तो वेति (पा० २।४।३०।वा० ४) स्त्रीत्वे च द्विगोरिति (पा० ४।१।२१) ङीपि सन्ध्याशब्दस्य तद्धितान्तपदत्वाद्धलस्तद्धितस्येति (पा० ६।४।१५०) यलोपः, अभिरभागे इत्यभेः (पा० १।४।९१) कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वं ॥ २२ ॥

आदायेति। योऽयं भानुरेव भिक्षुः परिव्राट् दण्डं पारिपार्श्विकमेव वेणवयष्टिमादाय सकलासु दिक्षु परिभ्रमति सोऽयं तापसः परिव्राट् सायङ्काले अब्धौ निमज्जन् पातालं

अब्धौ निमज्जन्निव तापसोऽयं
सन्ध्याभ्रकाषायमधत्त सायं ॥ १२ ॥
अस्ताचलेऽस्मिन्निकषोपलाभे
सन्ध्याकषोल्लेखपरीक्षितो यः ।
विक्रीय तं चेल्लिहिरण्यपिण्डं
तारावराटानियमादित द्यौः ॥ १३ ॥

प्रविशन्नथ च बहुजले जलाशये स्नानं कुर्व्वन् सन्ध्यायामभ्रं गगनं तदेव काषायं रक्तवस्त्रमधत्तेव, उपरि स्वस्योर्द्धभागः अथ चोच्चतटस्योपरि दण्डस्योपरि वा निजमस्तकोपरि वा धृतवानिव। एवं यतिरपि बहुकालावस्थानस्य निषिद्धत्वादुक्तलक्षणः सन् परिभ्रमन् काषायं वस्त्रं धारयति। काषाया इव सन्ध्या शोभत इत्यर्थः। माठरः पिङ्गलो दण्डः, भिक्षुः परिव्राट् कर्म्मन्दीति चामरः। काषायं तेन रक्तं (पा० ४।२।१) इत्यण् ॥ १२ ॥

अस्तेति। यः सूर्य्यः अस्मिन् प्रतीच्यां वर्त्तमाने निकषोपलाभे सुवर्णपरीक्षापाषाणतुल्येऽस्ताचले सन्ध्याराग एव कषोल्लेखः घर्षणोल्लेखस्तेन परीक्षित इयं द्यौस्तं चेल्लिं सूर्य्यमेव हिरण्यपिण्डं विक्रीय विनिमयेन कस्मैचिद्दत्वा ताराख्यान् वराटकान् कपर्द्दकान् आदित जग्राह। उत्तमं सुवर्णं रक्तपीतं भवति। तथा च रक्तपीतसुवर्णसूर्य्यगोलकस्य निकषपरीक्षितसुवर्णरेखेव सन्ध्या दृश्यते। ताराश्च वराटका इव दृश्यन्त इत्यर्थः।

पचेलिमं दाड़िममर्कविम्ब-
मुत्तार्य्य सन्ध्या त्वगिवोज्झिताऽस्य ।
तारामयं वीजभुजाऽदसीयं
कालेन निष्ठ्यूतमिवास्थियूथं ॥ १४ ॥

द्यौरिति लोकव्यवहारानभिज्ञत्वद्योतनार्थं स्त्रीलिङ्गनिर्देशः । स्त्री हि सुवर्णं दत्त्वा मूर्खतया वराटकान् गृह्णाति धूर्त्तेन वञ्च्यते च । वराटकस्य व्यवहारे देशे सुवर्णमपि दत्त्वा वराट एव गृह्यते ॥ १३ ॥

पचेलिममिति । दाड़िमवीजभुजा कालेन रक्तमर्कविम्बमेव पचेलिमं तरोरुपर्य्येव स्वयं पक्वं दाड़िमफलमुत्तार्य्य गगनतरोस्त्रोटयित्वा वीजग्रहणार्थं भित्त्वा वा सन्ध्यात्वगिव अस्य दाड़िमस्य पक्वत्वाद्रक्तछल्लिरेवोज्झिता परित्यक्ता, तद्वीजभक्षणार्थमुपरितनवीजकोशवत् सन्ध्या पृथक् कृता । तथा वीजभक्षणानन्तरं तारमयं ताराकरूपं अदसीयममुष्य दाड़िमस्य अमीषां वीजानां वा सम्बन्धि अस्थ्नां वीजमध्यस्थले श्वेतकणानां यूथं वृन्दं निष्ठ्यूतमिवोद्गीर्णमिव, वीजानि भक्षयित्वा गृहीतं रसमन्तर्गतश्वेतकणावृन्दं पुनः फूत्कृतमिव । न हि कालाकृतेः सूर्य्यदाड़िमं भक्षितुं समर्थः । अन्योऽपि दाड़िममुत्तार्य्य तत्त्वचं परित्यज्य वीजान्यास्वाद्य गृहीतरसान् वीजकणान् फूत्कृत्य त्यजति ॥ १४ ॥

तारालतिर्बीजमिवादमाद्द-
मियं निरष्ठीवि यदस्थियूथं।
तन्निष्कुलीकृत्य रविं त्वगेषा
सन्ध्योज्झिता पक्विमदाडिमं वा॥ १५॥
सन्ध्यावशेषे कृतताण्डवस्य
चण्डीपतेर्यत्पतनाभिघातात्।

तारेति। सामर्थ्यात् कालेन कार्चा रविमेव तत् पक्विमं पचेलिमं दाडिमं निष्कुलीकृत्य निर्गतबीजकुलं कृत्वा बीजरूपं सारं गृहीत्वा तदीया त्वगेवैषा सन्ध्या उज्झिता, वाशब्दः सम्भावनायामुज्झिता किमित्यर्थः। तत्किमित्याशङ्क्याह। बीजानि आदमादं भक्षयित्वा अस्य सूर्यरूपस्य पक्वदाडिमस्य संबन्धि अस्थियूथमिव इयं तारातति: निरष्ठीवि निष्ठ्यूता। जग्ध्वा-जग्ध्वा इति आदमादं अदेराभीक्ष्ण्येन द्विर्वचनञ्च। निरष्ठीवि कर्मणि चिण् निष्कुलीकृत्य निष्कुलन्निष्कोषणे (पा० ५।४।६२) इति डाच्। क्षेपकोऽयं श्लोकः॥ १५॥

सन्ध्येति। हे प्रिये सन्ध्यावशेषे सन्ध्यावन्दनान्ते कृत ताण्डवं नृत्यं येन तस्य चण्डीपतेः पदोश्चरणयोर्दृढयत्नेनाभिघाताद्धेतोः उत्पतयालुभिरुत्पतनशीलैरुच्छलितैः कैलासशै-

कैलासशैलस्फटिकाश्मखण्डै-
रमण्डि पश्चोत्पतयालुभिर्द्यौः ॥ १६ ॥
इत्थं ह्रिया वर्णनजन्मनेव
सन्ध्यामपक्रान्तवतीं प्रतीत्य।
तारातमोदन्तुरमन्तरिक्षं
निरीक्षमाणः स पुनर्बभाषे ॥ १७ ॥
रामेषुमर्मव्रणनार्त्तिवेगा-
द्रत्नाकरः प्रागयमुत्पपात।

उत्पतयालुभिः स्पृहि गृहीत्यालुच् (पा०३।२।१५८) ॥ १६ ॥

इत्थमिति। स नलः पुनर्भैमीं बभाषे। किम्भूतः। इत्थमुक्तप्रकारेण वर्णनजन्मना स्तुतिजातया ह्रियेव अपक्रान्तवतीं निर्गतां सन्ध्यां प्रतीत्य निश्चित्य अन्तरिक्षं गगनं तारातमोभ्यां दन्तुरितं मिश्रितं निरीक्षमाणः। अन्योऽप्युत्तमो निजवर्णनजातलज्जयाऽपक्रामति ॥ १७ ॥

रामेति। भोः हे कामशरासनभ्रूः कामशरासनमेव भ्रुवौ यस्याः भ्रूदर्शनमात्रेण कामोदयकारिणि भैमि रामस्य राघवस्य जामदग्न्यस्य वा इषुणा मर्मणो व्रणनाद्भेदनाद्धेतोरुत्पन्ना आर्त्तिः पीडा तस्या वेगादाधिक्याद्धेतोर्निजस्थाने स्थातुमशक्तः सन् भीत्या रत्नाकर एवायं प्राक् तस्मिन्नवसरे उत्पपात ऊर्द्ध्वमागात्, नेदं नभो यः पूर्वमुत्पपात सः श्यामजलः स्फुटरत्नगर्भो रत्नाकर एवायं न लेतन्नभ इत्यर्थः। कीदृशः। ग्राहाणां जल-

आर्द्रौघकिर्मीरितमीनकम्बु
नभो न भोः कामशरासनभूः॥ १८॥
मोदाय देवाप्सरसां विमुक्ता-
स्ताराः शराः पुष्पशरेण शङ्के।

वारिणां जन्तूनामोघैः किर्मीरिता मिश्रिता तत्खचिता मीनाः कम्बवः शङ्खाश्च यस्मिन्। नभस्तु ग्रहसम्बन्धि ओघः शुक्रहस्त्यादितारापदसमूहो ध्रुवमण्डलग्रहसम्बन्धी समूहो वा, तेन मिश्रितो मानाख्यो राशिः कम्बुः शङ्खाकारविशाखानक्षत्रञ्च यस्मिन्। रघुनाथेन किल सेतुबन्धसमये शरेण समुद्रो भेत्तुमारब्ध इति तावन्मात्रेण पीडातिशयादुत्पतित इत्युच्यते। परशुरामेणापि निजवसत्यर्थं समुद्रो बाणेन परास्तः सन्नुत्पतितः, समुद्रजलस्यैवायं कालिमा न तु गगनस्येत्यर्थः। समुद्रस्याधोदेशे स्थितानि रत्नग्राहादीनि अधःस्थितेन जलेन सुखेन द्रष्टुं शक्यन्ते। मकरकर्कटादयः साक्षान्मीनादय एव। न तु राश्यादिभूताः शिष्टाश्च ताराः समुद्रमौक्तिकान्येव न तु तारा इत्यादि ज्ञातव्यं। शरासनभूरित्युक्त्स्थानत्वान्नदीलाभावाद्भ्रखलाभावः। द्वयपाठस्तु सदैकवंशप्रभवन्निति वत् समर्थनीयः। यद्वा श्लिष्टकविप्रयोगदर्शनात् ज्ञातव्यं॥ १८॥

मोदायेति। हे भैमि पुष्पशरेण कामेण देवानामप्सरसाञ्च मोदायान्योन्यमत्यन्तानुरागमञ्जननार्थं देवादीनामुपरि वर्त्तमानत्वाद्विमुक्ता ऊर्द्ध्वं क्षिप्ताः, शुभ्रपुष्परूपाः शरा एव तारा

पञ्चास्यवत् पञ्चशरस्य नाम्नि
प्रपञ्चवाची खलु पञ्चशब्दः ॥ १९ ॥
नभोनदीकूलकुलायचक्री-
कुलस्य नक्तं विरहाकुलस्य ।

इत्यत्र शङ्के । ननु कामस्य पुष्पशरत्वेऽपि पञ्चबाणत्वात् ताराणां बहुतरत्वात् कथं कामबाणत्वमित्याशङ्क्य समर्थयते । खलु यस्मात् पञ्चशरस्य नाम्नि पूर्व्वपदत्वेन वर्त्तमानः पञ्चशब्दः प्रपञ्चवाची प्रकृष्टः पञ्चो विस्तारः तद्वाचकः, न तु सङ्ख्यावाचकः, पचि विस्तारवचने इति स्वार्थणिजन्ताद्धातोः पचाद्यचि पञ्चयन्ति विस्तृता भवन्ति पञ्चाः शरा यस्येति विग्रहो न तु पञ्चसङ्ख्याकाः शरा यस्येति, तस्मात् पुष्पबाणत्वं ताराणां युक्तमेवेत्यर्थः । कस्येव । पञ्चास्यवत् "सिंहो मृगेन्द्रः पञ्चास्यः" इति सिंहाभिधायिनि पञ्चास्यशब्दे सिंहस्य पञ्चसङ्ख्यमुखत्वाभावात् पञ्चयति विस्तृतं भवति पञ्चं विस्तृतमास्यं यस्यासौ पञ्चास्य इति व्युत्पत्त्या पञ्चशब्दो यथा विस्तारवाची तथेति भावः । प्रपञ्चो विस्तार इति हलायुधः ॥ १९ ॥

नभ इति । नक्तं विरहेणाकुलस्य पीडितस्य नभोनद्या मन्दाकिन्याः कूलमेव कुलायः स्थानं यस्य तस्य चक्रीकुलस्य चक्रवाकीसमूहस्य दृशोर्नयनयोरपामश्रुजलानां पृषन्ति बिन्दवः सन्ति त एव तारकाः अधःस्थितैर्जनैर्दृश्यन्ते । तथा तासां ताराणां सङ्क्रमणानि पुण्यक्षयवशाद्भूमिं प्रत्यागमनानि 'गलदा-

ग्राहौघकिर्मीरितमीनकम्बु
नभो न भोः कामशरासनभूः ॥ १८ ॥
मोहाय देवाप्सरसां विमुक्ता-
स्ताराः शराः पुष्पशरेण शङ्के ।

चारिणां जन्तूनामोघैः किर्मीरिता मिश्रिता तत्सहिता मीनाः कम्बवः शङ्खाश्च यस्मिन् । नभस्तु ग्रहसम्बन्धि श्रोघः शुक्रवृह-स्पत्यादिताराग्रहसमूहो ध्रुवमण्डलग्रहसम्बन्धी समूहो वा, तेन मिश्रितो मीनाख्यो राशिः कम्बुः शङ्खाकारविशाखानक्षत्रञ्च यस्मिन् । रघुनाथेन किल सेतुबन्धसमये शरेण समुद्रो भेत्तुमा-रब्ध इति तावन्मात्रेण पीडातिशयादुत्पतित इत्युच्यते । परशु-रामेणापि निजवसत्यर्थं समुद्रो बाणेन परास्तः सन्नुत्पतितः, समुद्रजलस्यैवायं कालिमा न तु गगनस्येत्यर्थः । समुद्रस्या-धोदेशे स्थितानि रत्नपाषाणादीनि अधःस्थितेन जलेन सुखेन द्रष्टुं शक्यन्ते । मकरकर्कटादयः साक्षान्मीनादय एव । न तु रा-श्यादिभूताः शिष्टाश्च ताराः समुद्रमौक्तिकान्येव न तु तारा इत्यादि ज्ञातव्यं । शरासनभूरित्युवङ्स्थानत्वान्नदीत्वाभावाद्ध्र-स्वत्वाभावः । ह्रस्वपाटस्तु सद्वैकवंशप्रभवन्निति वत् समर्थनीयः । यद्वा शिष्टकविप्रयोगदर्शनाद् ज्ञातव्यं ॥ १८ ॥

मोहायेति । हे भैमि पुष्पशरेण कामेन देवानामप्सरसाञ्च मोहायान्योन्यमत्यन्तानुरागसञ्जननार्थं देवादीनामुपरि वर्त्त-मानत्वाद्विमुक्ता ऊर्द्धं क्षिप्ताः, शुभ्रपुष्परूपाः शरा एव तारा

पञ्चास्यवत् पञ्चशरस्य नाम्नि
प्रपञ्चवाची खलु पञ्चशब्दः ॥ १८ ॥
नभोनदीकूलकुलायचक्री-
कुलस्य नक्तं विरहाकुलस्य।

इत्यहं शङ्के। ननु कामस्य पुष्पशरत्वेऽपि पञ्चबाणत्वात् ताराणां बहुतरत्वात् कथं कामबाणत्वमित्याशङ्का समर्थयते। खलु यस्मात् पञ्चशरस्य नाम्नि पूर्वपदत्वेन वर्त्तमानः पञ्चशब्दः प्रपञ्चवाची प्रकृष्टः पञ्चो विस्तारः तद्वाचकः, न तु सङ्ख्यावाचकः, पचि विस्तारवचने इति स्वार्थणिजन्ताद्धातोः पचाद्यचि पञ्चयन्ति विस्तृता भवन्ति पञ्चाः शरा यस्येति विग्रहो न तु पञ्चसङ्ख्याकाः शरा यस्येति, तस्मात् पुष्पबाणत्वं ताराणां युक्तमेवेत्यर्थः। कस्येव। पञ्चास्यवत् "सिंहो मृगेन्द्रः पञ्चास्यः" इति सिंहाभिधायिनि पञ्चास्यशब्दे सिंहस्य पञ्चसङ्ख्यमुखत्वाभावात् पञ्चयति विस्तृतं भवति पञ्चं विस्तृतमास्यं यस्यासौ पञ्चास्य इति व्युत्पत्त्या पञ्चशब्दो यथा विस्तारवाची तथेति भावः। प्रपञ्चो विस्तार इति हलायुधः ॥ १८ ॥

नभ इति। नक्तं विरहेणाकुलस्य पीडितस्य नभोनद्या मन्दाकिन्याः कूलमेव कुलायः स्थानं यस्य तस्य चक्रीकुलस्य चक्रवाकीसमूहस्य दृशोर्नेत्रयोरपाश्रुजलानां पतन्ति बिन्दवः सन्ति त एव तारका अधःस्थितैर्जनैर्दृश्यन्ते। तथा तासां ताराणां सद्मगमनानि पुष्पचयवशाद्भूमिं प्रत्यागमनानि 'गलदा-

दृशोरपां सन्ति पृषन्ति तारा:
पतन्ति तत्सङ्क्रमणानि धारा: ॥ २० ॥
अमूनि मन्ये सुरनिर्झरिण्या
यादांसि गोधा मकर: कुलीर:।
तत्पूरखेलत्सुरभीतिदूर-
मग्नान्यध: स्पष्टमित: प्रतीम: ॥ २१ ॥

प्यजलानां धारा एव पतन्ति। दृशोः सन्ति चिरस्थितिमन्ति यानि वाष्पपृषन्ति तानि तारा इति वा। तत्सङ्क्रमणानि स्थितताराप्रतिबिम्बभूतानि तत्तुल्यानि पतन्त्यध:पातीनि यानि पृषन्ति तानि धारा अश्रुप्रवाहाः तासां ताराणां सङ्क्रमणानि वीथ्यो मेषादिसङ्क्रान्तयो वा। धारा अश्रूणां प्रवाहा इति वा। स्त्रियो हि विरहमसहमाना रुदन्ति। पतन्तीति तिङन्तं। पृषद्विशेषणं वा ॥ २० ॥

अमूनीति। हे प्रिये गोधाख्यास्तारा गोधा मकरराशिसन्निवेश्यस्तारा: मकर: कुलीर: कर्कटराशिस्तत्सन्निवेश्यस्तारा अमूनि प्रत्यक्षदृश्यानि अमरनिर्झरिण्या मन्दाकिन्या यादांसि जलजन्तव एवेत्यहं मन्ये। गोधा मत्स्या: कर्कटा अपि जले वर्त्तन्ते उपरि च दृश्यन्ते तस्माद्देवनद्याया यादांस्येवैतानीत्यर्थ:। तर्हि उपरिवर्त्तमानेन द्रष्टुं योग्या न त्वध:स्थितेनेत्यत आह तस्या नाकनद्या: पूरे प्रवाहे खेलन्त: क्रीडन्त: सुरास्तेभ्य: सकाशाद्भीत्या दूरतलपर्य्यन्तमग्नानि, अत एव जलतलगामित्वादधो-

स्मरस्य कम्बुः किमयञ्चकास्ति
दिवि त्रिलोकीजयवादनीयः ।
कस्यापरस्योडुमयैः प्रसूनै-
र्वादित्रसृष्टिर्घटते भटस्य ॥ २२ ॥
किं योगिनीयं रजनी रतीशं
याऽजीजिवत् पद्ममभूमुचच्च ।

भागे इतो भूदेशादपि स्पष्टं सुखेन जानीमः । भूभागे स्थिता अपि जलगामिलाञ्छनगोधादियादांसि व्यक्तं जले पश्याम इत्यर्थः । गोधाकारं भुवमण्डलं, गोधा ज्येष्ठा वा ॥ २१ ॥

स्मरस्येति । त्रिलोकीविजये वादनीयो वादनार्हः स्मरस्य सम्बन्धी अयं प्रत्यक्षदृश्यो विशाखानक्षत्ररूपः कम्बुः शङ्खः दिवि चकास्ति किं । उच्चतरदेशे वादितवाद्यं सर्व्वैराकर्ण्यत इति गगने स्थापितो लोकत्रयविजयवादनार्हः कामस्यैव कम्बुः किमित्यर्थः । यस्मादपरस्य कस्य भटस्योडुमयैस्ताराररूपैः प्रसूनैः कृत्वा वादित्रसृष्टिः वाद्यनिर्म्माणं घटते, स्मरस्यैव धनुषः पुष्परूपत्वदर्शनात् तदीयस्यैव वाद्यस्य पुष्परूपत्वसम्भावनायुक्तत्वात् । ताराकुसुमरूपः कामशङ्ख एवायं गगने शोभते न त्वन्यदीय इत्यर्थः ॥ २२ ॥

किमिति । इयं रजनी योगिनी स्त्रीपुंसयोगवती, अथ च शास्त्रमन्त्रसिद्धा मारणोच्चाटनाद्यभिज्ञा स्त्री किं । या रतीशं दिवा निर्ज्जीवमिव वीजसन्निधेरजीजिवत् सञ्जीवं चक्रे, पद्मम-

योगर्द्धिमस्या महतीमलग्न-
मिदं वदत्यम्बरचुम्बि कम्बु ॥ २३ ॥
प्रबोधकालेऽहनि बाधितानि
ताराः खपुष्पाणि निदर्शयन्ती।

मूमुदत् पद्मानि च समकोचयत्। रात्रौ च स्त्रीपुंसयोगे काम उद्दीतो भवति पद्मानि च सङ्कुचन्ति। अलग्नं निराधारं अम्बरचुम्बि आकाशवासि ताराभावात्मकत्वादलग्नमराशिभूतं वा इदं प्रत्यचरूपं कम्बु ताराहृपः शङ्खोऽस्या रात्रियोगिन्या महतीं योगर्द्धिं वदति, दिवा दर्शनाभावादिदानीं दृश्यमानः शङ्खेन रात्रिर्जातेति कथयति। योगशक्तिं विना निराधारं वस्तु कथं स्थापयेत्। योगिन्यपि मृतमपि जीवयति किञ्चिच मोहयति मूर्च्छां प्रापति भ्रान्तं करोति वा, तस्माद्योगिनी किमित्युत्प्रेचा। कम्बुशब्दस्य नपुंसकत्वमप्यस्तीति पूर्वमेवोक्तं सत्त्वार्थं। अमीजिवदमूमुददिति णौचङ्गीत्युपधा ह्रस्वः ॥२३॥

प्रबोधेति। हे प्रिये प्रबोधकाले जागरणसमयेऽथ च सम्यग्ज्ञानोत्पत्तिसमयेऽहनि दिवा बाधितानि सूर्यदीप्तिध्वस्तकान्तीनि ताराः नचत्ररूपाणि खपुष्पाणि गगनसम्बन्धीनि कुसुमानि नितरां दर्शयन्ती प्रकाशयन्ती, अथ च दृष्टान्तीकुर्वती शून्याध्वनि बौद्धाध्वनि शून्यादिदर्शने विपत्तयोगिनी काचित् प्रमजितैवेयं निशा स्फुटाभमतितरां दृश्यमपि प्रत्यचेण प्रतीयमानमपि स्थावरजङ्गमात्मकं सकलं जगन्मृषाऽसत्यमाह मूते।

निशाऽऽह पुष्पाध्वनि योगिनीयं
मृषा जगद्दृश्यमपि स्फुटाभं ॥ २४ ॥
एणः स्मरेणाङ्कमयः सपत्नी-
कृतो भवद्भ्रूयुगधन्वना यः।
मुखे तवेन्दौ लसता स तारा-
पुष्पालिबाणानुगतो गतोऽयं ॥ २५ ॥

बौद्धादिदर्शने हि ज्ञानस्यैव घटाद्याकारस्थानातिरिक्तं सर्वं मिथ्येति बोध्यते। योगिन्यपि प्रपञ्चो मिथ्येति दर्शयति तथेयमपि रात्रिरद्दन्यपि पुष्पतुल्यानि नक्षत्राणि निजयोगात् गगने दर्शयतीति भावः। निदर्शनं करोति वेति प्रतीयमानोत्प्रेक्षा ॥ २४ ॥

एण इति। हे भैमि तव मुखे एवेन्दावाह्लादकलादिगुणयोगाच्चन्द्रे लसता प्रकाशमानेन, तथा भवद्भ्रूयुगमेव धनुर्यस्य तेन स्मरेण तव मुखेन्दौ विमतो मृगवांश्चन्द्रत्वात् सम्प्रतिपन्नवदित्यनुमानप्रसिद्धो योऽङ्कमयः कलङ्करूप एणो मृगः सपत्नीकृतः मुखे, तच्चापदर्शनाज्जठरावस्थितपक्षस्यैव बाणस्यापरपार्श्वे निर्गमनं यथा भवति तथा व्यथितः, स एव मृगः तारापुष्पालिर्नक्षत्ररूपपुष्पपङ्क्तिस्तल्लक्षणो बाणस्तेनानुगतः सन् सहित एव पलाय्य गतोऽयं गगने दृश्यते किं। चन्द्रे मृगेण भाव्यं स चात्र नास्ति, सचापः कामश्च मुखे लसति, गगने च मृगशिरो नक्षत्रं मृगाख्यबाणाकारपुष्पतुल्यतारानुगतं दृश्यते,

लोकाश्रयो मण्डपमाद्यिसृष्टि-
ब्रह्माण्डमाभात्यनुकाष्ठमस्य ।
स्वकान्तिरेणूत्करवान्ति सन्ति
घुणव्रणद्वारनिभानि भानि ॥ २६ ॥

तर्हि कामेन विध्यान्तर्गतपत्त्रपार्श्ववहिर्निर्गतबाणसहितो व्यधितः पलाय्य गतः स एणोऽयं मृगो दृश्यते किमिति प्रतीयमानोत्प्रेक्षा । सपत्त्रनिष्पत्त्रादति व्यथन इति (पा॰५।४।६१) डाच् ॥ २५ ॥

लोकेति । हे भैमि ब्रह्माण्ड आदौ सर्व्वस्मादपि पूर्व्वं सृष्टिर्निर्म्माणं यस्य, अथ च चिरकालनिर्म्मितं पुराणं मण्डपमिति आभाति तत्र इव शोभत इत्यर्थः । यतस्त्रयाणामपि लोकानामाश्रयः ब्रह्माण्डाधारत्वाज्जगतां मण्डपोऽपि लोकानामाश्रयः तच्छायानिवासित्वाल्लोकानामाश्रयनामत्वाच्च तस्य । अत एवास्य ब्रह्माण्डमण्डपस्याऽनुकाष्ठं दिशि दिशि एतत्सम्बन्धिनीषु सर्व्वासु दिक्षु, अथ चैतत्सम्बन्धीनि काष्ठानि दारूणि लक्षीकृत्य तेषु भानि नक्षत्राणि स्वकान्तिरूपस्य उत्खातरेणूत्करस्य सम्बन्धीनि वान्तिरुद्गारस्तद्वन्ति सन्ति घुणाख्यकीटनिर्म्मितो व्रणः छिद्रन्तस्य द्वारं मुखं तन्निभानि तत्तुल्यानि घुणोत्कीर्णदारुरजोयुक्तानि दारुच्छिद्रमुखानीव दृश्यन्त इत्यर्थः । जनाश्रयनामा मण्डपोऽप्यतिजीर्णो यदा भवति तदा तदीयकाष्ठेषु घुणाः पतन्ति घुणोत्कीर्णरन्ध्ररजोयुक्ताश्च घुण-

शचीसपत्न्यां दिशि पश्य भैमि
शक्रेभदानद्रवनिर्झरस्य।
पीयूयते वासरसेतुनाम्ना-
दुच्छृङ्खलः पूर इवान्धकारः ॥ २७ ॥
रामालिरोमावलिदिग्विगाहि
ध्वान्तायते वाहनमन्तकस्य।

छतच्छिद्रमुखानि वृत्तानि च दृश्यन्ते तानीव भानीति भावः। मण्डपोऽस्त्री जनाश्रय इत्यमरः। अनुकाष्ठं वीप्सायामव्ययीभावः ॥ २६ ॥

इदानीं सर्वदिग्व्यापितमोवर्णनं प्राच्यादिक्रमेणोपक्रमते। शचीति। हे भैमि अन्धकारः शच्याः सपत्नी दिक् प्राची तस्या वासररूपस्य सेतोः सूर्यस्य प्रभामर्यादाया नाम्नादुच्छृङ्खलो निरर्गलः शक्रेभस्य दानद्रवो दानोदकं तस्य निर्झरप्रवाहस्तस्य श्यामः पूर इव पीयूयते स्वयं प्रसरति प्राचीं प्राप्नोतीत्यर्थः। त्वं पश्य प्राच्यामेव चैरावतदानजलप्रवाहपूरसम्भवः जलपूरोऽपि बन्धोपगमादप्रतिहतप्रसरः सन्नितरां प्रसरति। पुङ् सर्पण इत्यस्माद्भृशार्थे यङ् द्विर्वचनं ॥ २७ ॥

दक्षिणदिग्व्यापितमो वर्णयति। रामेति। श्रीरामस्यालिः सेतुः सेतुबन्ध एव श्यामलाद्रोमावलिर्यस्यास्तस्या दक्षिणस्या दिशो विगाहि नितरां व्यापकं अन्तकस्य दिक्पतित्वाद्दक्षिणदिक्स्थं तद् वाहनं महिष एव ध्वान्तायते कज्जलनीलो

यदीक्ष्य दूरादिव बिभ्यतः स्वा-
न्यान् गृहीत्वाऽपसृतो विवस्वान्॥ २८॥
पक्वं महाकालफलं किलासीत्
प्रत्यग्गिरेः सानुनि भानुबिम्बं।
भिन्नस्य तस्यैव दृषन्निपाता-
द्बीजानि जानामितमां तमांसि॥ २९॥

ऽन्धकार इवाचरति। विवस्वान् सूर्यः यदेमवाहनं दूराद्दीक्ष्य *महजात्यमहिषवैरस्मरणाद्बिभ्यतः स्वांशान् स्वानश्वान्* गृहीत्वाऽपसृतः पलायित इव। दक्षिणदिशि तिमिरं यममहिषवच्छोभत इत्यर्थः। अन्तकपदेन तद्वाहनस्य दारुणत्वं सूचितं, अत एव ततोऽश्वानां भयं युक्तं। ध्वान्तायते उपमानादाचारे कर्त्तुः क्यङिति (पा० ३।१।११) क्यङन्तात् तङ्। सेतुराशौ स्त्रियां पुमानित्यमरः॥ २८॥

प्रतीचीव्यापितमो वर्णयति। पक्वमिति। भानुबिम्बं प्रत्यग्गिरेः प्रतीच्यां वर्त्तमानस्यास्ताचलस्य सानुनि कालवशात् पक्वं महाकालसंज्ञवाहन्याः फलमासीत् किलैवमहं मन्य इत्यर्थः। तथाऽहमतिपक्वत्वादतिश्रयत्वादुच्चतरदेशादधस्ताद् दृशदि शिलायां निपातात् तदभिघाताद्धेतोर्भिन्नस्य विदीर्णस्य तस्य भानुबिम्बरूपस्य महाकालफलस्य कृष्णतमानि बीजान्येव तमांसीति जानामितमां नितरां मन्ये। पूर्व्वतादिकठिनभूमुद्भवं गम्भीरकर्त्तुलं पक्वं सदंतिरिक्तकृष्णबीजं महाकालफलं०इदीप-

पत्युर्गिरीणामयशः सुमेरु-
प्रदक्षिणाह्नास्तदनादृतस्य ।
दिशस्तमश्चैत्ररथान्यनाम-
पत्रच्छटाया मृगनाभिशोभि ॥ ३० ॥
ऊर्द्धं धृतं व्योम यदुष्णरश्मे-
र्दिवा सहस्रेण करैरिवासीत् ।

मर्गनिवारणार्थं गृहद्वारे दृढैर्बध्यते। अस्तमयसम्बन्धात् परिणतकालं रक्तं महतः कालस्य फलभूतञ्च भानुबिम्बं महाकालफलमिव। तमांसि विदीर्णस्य तस्य कृष्णतमानि बीजानीव प्रसरन्तीत्यर्थः। अन्यदिगपेक्षया प्रतीच्यां सायंसमये सूर्यसन्ध्यासम्बन्धिनः प्रकाशस्यासन्नत्वादल्पान्धकारसूचनार्थं तमसां बीजत्वेन निरूपणं ॥ २८ ॥

उदीचीव्यापितमो वर्णयति। पत्युरिति। चैत्ररथं कुबेरवनं तदेवान्यनाम यस्यास्तादृशी पत्रच्छटा पत्रवल्ली यस्याश्चैत्ररथाख्यवनरूपपत्रवल्लिकाया उत्तरस्या दिशो मृगनाभिः पत्रवल्लीरचनासाधनभूता कस्तूरी तद्वच्छोभते एवंशीलं कृष्णतमं तमो गिरीणां पत्युर्हिमाचलस्यायश एव, यतः सुमेरोः प्रदक्षिणीकरणाह्नास्तता सूर्येणानादृतस्यावज्ञातस्य। हिमाद्रिर्यद्यपि गिरीणां पतिस्तथापि सूर्येणानादृतत्वाद्धीन एव। मेरुरेव महान्। अस्योद्यानं चैत्ररथमित्यमरः ॥ ३० ॥

ऊर्द्धदिग्व्यापितमो वर्णयति। ऊर्द्धमिति। तमाल्श्यामलं

पतत्तदेवांशुमता विनेदं
नेदिष्ठतामेति कुतस्तमिस्रं ॥ २१ ॥
ऊर्द्धार्पितन्युब्जकटाहकल्पे
यद्व्योम्नि दीपेन दिनाधिपेन।

यद्व्योम दिवा सहस्ररश्मेः सहस्रसङ्ख्यैः करैः किरणैरथ च हस्तैरूर्द्धं दूरोच्चप्रदेशे धृतमिवासीत्, तन्नभ एवेदं तमालश्यामलं अंशुमता विना सायंसमये सूर्यविनाशाद्धारकेणानेन विनाऽधःपतत् सत् नेदिष्ठतामतितमां नैकट्यमेति, तमिस्रं कुतः कस्मादकस्मादागतमपि तिमिरं नाम किमपि नास्ति, किन्तु निकटीभवद्गगनमेव तमिस्रमित्यर्थः। पतत्व्योमैव तमिस्रं कुतो भूमौ निकटतामेति, न तु तदतिरिक्तं नभोऽस्तीति वा। अन्यदपि यत् कस्यचित् कराभ्यामूर्द्धं धार्य्यते तदभावेऽधः पतत्येव। नेदिष्ठतां अतिशयने इष्ठनि, अन्तिकवाढयोरिति (पा० ५।३।६३) नेदादेशः। कुतः। पक्षे सार्व्वविभक्तिकस्तसिः ॥ २१ ॥

अधोदिग्व्यापितमो वर्णयति। ऊर्द्धेति। सामर्थ्याद्विधिना ऊर्द्धं सूर्यदीपस्योपरिभागेऽर्पितो न्युब्जःकज्जलधारणार्थमधोमुखोऽतितमां महाकटाहः कर्परं तत्कल्पे तत्तुल्ये .....तमे व्योम्नि अधिकरणे प्रकाशका,रणा कज्जलधारणार्थेन दिनाधिपेनैव दीपेन करणेन यत् कज्जलं न्यधायि न्यस्तं तत्कज्जलमेव तमो भूम्या क्रममज्ञातमाऊर्धेन हला गिरत् युक्तं भवत् पतनाख्यकर्म्मकारणं गुरुत्वं यस्य तादृशं सत् भूमावस्मात् किं

न्यधायि तद्भूमिलद्गुरुत्वं
भूमौ तमः कज्जलमस्खलत् किं ॥ ३२ ॥
ध्वान्तैणनाभ्या शितिनाऽम्बरेण
दिशः शरैः स्मरस्य तारैः।

अतिभारेण पतितं किं। गुरुत्वाद्धि पतनं युक्तं। तत् कज्जलमेव भूमौ पतितं किं, अपि तु तमो नाम न किञ्चिदित्यर्थ इति वा। कज्जलमपि कर्परे धृतं क्रमेण वृद्धं भवद् गुरुत्वादधः पतति। कटाहः कर्परे तथेति निघण्टुः। ईषदसमाप्तौ कल्पप्प्रत्ययः ॥ ३२ ॥

ध्वान्तेति। ध्वान्तेनैवैणनाभ्या कस्तूर्या तया शितिना नीलेनाम्बरेण गगनेनाथ च वस्त्रेण। यद्वा। ध्वान्तैणनाभ्या कृत्वा नीलेन गगनेनोपलक्षितास्तथा निशितात् पुष्पतुल्यरूपत्वाच्चोज्ज्वलैस्तारैर्नक्षत्रैरेव स्मरस्य कामस्य शरैरुपलक्षिताः, अथ च तारैरुज्ज्वलैः पुष्पैरुपलक्षितास्तथा प्रकाशाभावान्मन्दार्चिर्मन्दनयनैर्नरैर्लक्ष्या लक्षणीयाः, अथ च मन्दाक्षस्य लज्जाया विषयभूताः सलज्जा अत एवाभिसारिकाभाः स्वैरिणीतुल्याः दिशः, अनिन्दौ चन्द्ररहितायां अनुदितचन्द्रत्वाच्छायायां निशि सामायान्ति प्रत्यागच्छन्ति तस्मात् सपत्नीभ्रान्त्या त्वं सेर्ष्या भव। अभिसारिका अपि शुभ्रायां रात्रौ शुभ्रवस्त्राद्याभरणाः, कृष्णायाञ्च रात्रौ कृष्णवस्त्राद्याभरणाः समायान्तीति। ता अपि कस्तूरीकृताङ्गरागा नीलवसनाः प्रच्छन्नधृतपुष्पाः

मन्दाक्षलक्ष्या निशि मामनिन्दौ
सेर्ष्या भवायान्त्यभिसारिकाभाः ॥ ३३ ॥
भास्वन्मयीं मीलयतो दृशं द्राङ्
मिथोमिलद्व्यञ्चलमादिपुंसः ।
आचक्ष्महे तन्वि तमांसि पद्म
श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म ॥ ३४ ॥

कामबाणपीडिताः सलज्जाः सत्यः कामुकं प्रति समायान्ति तदीयनायिकास्तु सेर्ष्या भवन्ति, तथा दिशोऽपीत्यर्थः । सर्वा अपि दिश एकत्र मिलिता इति प्रतीतिः । तिर्यग्व्यापित्वमेो वर्णितमनेन । कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिकेत्यमरः । मन्दाक्षमन्दा इति पाठे मन्दनयनानामल्पदृश्यात्समोबाहुल्यात् । अथ च तमोबाहुल्यान्मन्दाक्षा अत एव मन्दगमनाः, लज्जया वा मन्दगमना इत्यर्थः । तारशब्दः पूर्ववत् ॥ ३३ ॥

भास्वदिति । हे तन्वि कृशाङ्गि भास्वन्मयीं रविरूपां दक्षिणां दृशमस्तमयव्याजेन द्राक् शीघ्रं मीलयतः सङ्कोचयतः आदिपुंसः श्रीविष्णोर्मिथोऽन्योन्यं मिलन्तौ द्वावञ्चलावूर्ध्वाधःपुटे यस्य निमीलनवशादन्योन्यसंलग्नपुटत्वान्निविडरोमक, अत एव श्यामत्वलक्ष्म्या विजितं नितरां पराभूतं इन्दुलक्ष्म येन तादृशं पक्ष्म नेत्रसम्बन्ध्यूर्ध्वाधःपुटे पुनर्घनीभूतरोमाण्येव तमांसि वयमाचक्ष्महे ब्रूमः, न तु ततोऽन्यानि तमांसीत्यर्थः । तिमिर-

विवस्वताऽनायिषतेव मिश्राः
स्वगोसहस्रेण समञ्जनानां ।
गावोऽपि नेत्रापरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः ॥ ३५ ॥
ध्वान्तस्य वामोरु विचारणायां
वैशेषिकं चारु मतं मतं मे ।

व्याप्तत्वात् किमपि न दृश्यत इति भावः। पद्मेति जात्यैकवचनं ॥ ३४ ॥

विवस्वतेति। विवस्वता नेत्रमित्यपरनामधेयं यासां ताश्चक्षूरूपा जनानां गावोऽपि स्वस्य गवां किरणानां सहस्रेण समं सह मिश्रा दिने निमीलिताः सत्यः अनायिषतेव नीता इव यस्मात् तेन खलु तेनैवेदमान्ध्यं प्रकाशाभावान्नेत्रापगमाच्च रूपाग्रहणं, नत्वन्धकारैः कृतेदमान्ध्यं, तमोवशात् किमपि न दृश्यत इति भावः। अन्येनापि गोपालेन स्वगोसहस्रेण मिश्रिताः परेषामपि गावो नीयन्त इति ॥ ३५ ॥

ध्वान्तस्येति। हे वामोरु अतिसुन्दरोरु ध्वान्तस्य विचारणायां तमःस्वरूपनिरूपणे विषये वैशेषिकं मतं षट्पदार्थसाधर्म्यवैधर्म्यनिरूपणात्मकं काणाददर्शनं चारु सदुपपत्तिकं न त्वन्यदिति मे मतं सम्मतं। खलु यस्मात् कारणात् सम्प्रदायविदः तद्दर्शनं वैशेषिकं शास्त्रमौलूक्यमाऊचुर्वदन्ति। अत एव तमसस्तत्त्वनिरूपणाय अनारोपितस्वरूपनिरूपणाच्च समं सन्दर्थमुलू-

औलूकमाहुः खलु दर्शनं तत्
क्षमं तमस्तत्त्वनिरूपणाय ॥ ३६ ॥

कस्य घूकस्य सम्बन्धि, दृश्यते अनेनेति दर्शनं, चारु सदुपपत्तिकं न त्वन्यदिति मे मतं सम्मतं। खलु यस्मात् कारणात् तद्दर्शनं वैशेषिकं शास्त्रमौलूकमाहुर्वदन्ति। वैशेषिकमप्युलूकापरनाम्ना काणादमुनिना प्रोक्तमित्यौलूकदर्शनं, ततश्चैतदपि तमस्तत्त्वनिरूपणाय समर्थमिति युक्तमित्यर्थ इति शब्दच्छलं। वैशेषिकदर्शने च किमिदं तमो भावरूपं, अभावरूपं वेति सन्देहे भासामभाव एव तम इति सूत्राविरोधेन व्योमशिवाचार्यादयः षट्पदार्थवैधर्म्येणाभावरूपमेव तमो न्यरूपयन्। श्रीधराचार्य्यास्त्वारोपितं भूरूपमेव तम इति निर्वर्ण्य भाभावे सत्येव तमःप्रतीतिर्भाभाव एव तम इत्युक्तमिति सूत्रविरोधं पर्य्यहार्षुः। एतदसहमानाः श्रीमदुदयनाचार्य्यादयः पुनर्भासामभावमेव तमस्त्वेन निरनैषुः, यस्मात्तदौलूकं दर्शनं वैशेषिकशास्त्रं तमस्तत्त्वनिरूपणाय क्षममाहुरिति वाऽन्वयः। महत्यन्धकारे सत्यपि घटादिपदार्थं को वा पश्यतीति भ्रान्तविचारणायां क्रियमाणायां घूकनेत्रमेव चारु सर्व्वेभ्योऽप्यधिकमिति मे मतं पुनः पुनः सम्मतमित्यर्थः। उलूकनेत्रमेव महान्धकारे घटादिविलोकयितुं समर्थं, अन्यदीयनेत्राणां त्वान्ध्यमेव जातमिति भावः। यतो वैशेषिकं घटादीन् विशेषान्वेति तादृशं महान्धकारे घूकनेत्रमेव घटादीन् भेदेन जानाति न त्वन्यदीयं नेत्रं, तस्मात् तदेव चार्व्विति। तत्र

म्लानिस्पृशः स्पर्शनिषेधभूमेः
सेयं त्रिशङ्कोरिव सम्पदस्य।
न किञ्चिदन्यत् प्रति कौशिकीये
दृशौ विहाय प्रियमातनोति ॥ ३७ ॥

वृद्धसम्मत्यर्थमुत्तरार्द्धं। उलूकवृत्त्या कणानत्तीति कणादस्यैवो-लूक इति नाम तेन प्रोक्तत्वादौलूकं। वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे, इति विश्वः। वामोरु संहितशफेत्यादिना (पा० ४।१।७०) ऊङ् नदीत्वाद्ध्रस्वः। औलूकं तेन प्रोक्तं (पा० ४।३। १०१) इत्यण् पक्षे तस्येदमिति च (पा० ४।३।१२०) ॥ ३६ ॥

म्लानीति। म्लानिस्पृशः कालिमस्पर्शिनः श्यामस्याथ च वैद्यलत्वान्मालिन्ययुक्तस्य निःश्रीकस्य तथाऽभावरूपत्वात् स्पर्श-गुणनिषेधस्य भूमेः स्थानस्याथ च चण्डालत्वादेवास्पृश्यस्यास्य-तमसः राज्ञस्त्रिशङ्कोरिव सेयं प्रसिद्धा प्रत्यक्षेण दृश्यमाणा च सम्पद् बाहुल्येन स्वरूपलाभोऽथ च राज्यसमृद्धिः कौशिकीये औलूकेऽथ च वैश्वामित्रदृशौ नेत्रे विहायान्यत् किञ्चिदपि अपरं किमपि वस्तु लक्षीकृत्य प्रियं चितं नातनोति, किन्तु तदीये एव नेत्रे लक्षीकृत्य चितं करोति। अन्यत्रापि किञ्चिदन्यदपि प्रियं नातनोतीति वा। अन्धकारे घूकनेत्रे एव पदार्थान् पश्यत इति तत्सम्पत्तयोः प्रिया। त्रिशङ्कोश्च सम्पद्विश्वामित्रस्यैव नेत्रयोः प्रिया नान्यस्य। एतदुपाख्यानं रामायणादौ प्रसिद्धं। कौशिकीये वृद्धाच्छः (पा० ४।२।११४) ॥ ३७ ॥

मूर्द्धाभिषिक्तः खलु यो ग्रहाणां
तद्भासमास्कन्दितऋक्षशोभां।

मूर्द्धेति। यो रविर्नवानां ग्रहाणां मध्ये खलु निश्चितं मूर्द्धाभिषिक्तो राजा, उलूकानां लोकः सङ्घः तस्य रवेर्भया दीप्त्या समास्कन्दिता नितरां पराभूता ऋक्षशोभा नक्षत्रकान्तिर्यस्मिन् तत्तथा स्फुटं उपलब्धानि अन्यजनेन दृष्टानि घटादिस्वरूपाणि यस्मिंस्तादृशमपि दिवा कर्म्मीभूतं दिनमन्धकारमेवावलोकत, अपश्यत् दिने तस्य दर्शनाशक्तेः दिनमन्धकाररूपत्वेनैव मेन इत्यर्थः। तथा व्यक्तं लब्धानि घटादिरूपाणि यत्र तादृशमन्धकारमेवालोकमपश्यद्दर्शनसहकारिप्रकाशरूपत्वेनैव मेने, अर्थाद्रात्राविति अर्थः। अन्धकारं स्फुटलब्धरूपमित्यात्वत्या योज्यं तेन तामसा विपरीतदृश एव भवन्तीति व्यज्यते। एवंविधमन्धकारञ्च स्फुटमतिप्रसिद्धं शुक्लभास्वरात्मकं लब्धं रूपं येन तादृशमालोकमेवापश्यत्। कृष्णरूपमपि तमः शुक्लभास्वरालोकत्वेनापश्यदिति विरुद्धमित्यर्थः। अथ च यो ग्रहराजः सूर्य्यः, आक्रान्तनक्षत्रलक्ष्मीकान्तद्भासं सूर्य्यदीप्तिमेवायमुलूकलोको दिवा दिनेऽन्धकारमपश्यत्, रात्रौ चान्धकारमालोकमपश्यत्, दिने सूर्य्यालोक एव तमो रात्रौ च तम एव सूर्य्यालोक इति ददर्शेत्यर्थः। कीदृशीं तद्भासं कीदृगन्धकारं स्फुटमुपलब्धानि घटादिरूपाणि यस्यामन्यजनैस्तादृशीं स्फुटं सञ्जातस्वरूपलाभ येत्यन्धकारस्य नपुंसकत्वान्नपुंसकैकशेषैकवद्भावेन वा या-

दिवाऽन्धकारं स्फुटलब्धरूप-
मालोकतालोकमुलूकलोकः ॥ ३८ ॥
दिने मम द्वेषिणि कीदृगेषां
प्रचार इत्याकलनाय चारीः।

रुथेयं सूर्यदीप्त्याऽसमास्कन्दिताऽपराभूता नक्षत्रलक्ष्मीर्यत्र तं, अन्धकारविशेषणं वा। रात्रौ सूर्यदीप्तेरभावादतिरस्कृतनक्षत्रशोभमित्यर्थः। सूर्यदीप्तेरेव समास्कन्दनसामर्थ्यात् तमसैव रात्रौ यत् तिरस्करणं तेनैव नक्षत्रशोभा यस्मिन्निति वा, इत्यादिव्याख्यानानि ज्ञातव्यानि। लक्ष्मीमिति पाठे नदीत्वेऽपि समासान्तविधेरनित्यत्वात् कबभावः। मूर्द्धाभिषिक्तो राजन्यः, अन्धकारोऽस्त्रियाञ्चेत्यमरः ॥ ३८ ॥

दिन इति। अन्धकार इत्याकलनाय सामस्त्येन ज्ञानार्थं प्रतिवस्तुलग्नाः पदार्थमात्रसम्बद्धाः प्रतिच्छाया एव चारीः गूढार्थवेदिकाश्चारनारीर्विधाय चारपदं ताभ्यो दत्त्वा दिनं प्रति सम्प्रेष्य समागतास्ताः तत्रत्यवृत्तान्तं प्रष्टुमिव पुनः प्रावेशयत्, निजनैकट्यमित्यर्थात्। इति किं। ममान्धकारस्य द्वेषिणि मामसहमाने दिने विषये एषां वस्तूनां कीदृक् प्रचारो विहरणं खेलादिव्यवहारश्चेति। दिवा प्रतिपदार्थसम्बद्धाः छाया एव रात्रौ समागत्य मिलिता निजस्वामिनमन्धकारं प्राविशन्। रात्रौ हि प्रकाशाभावे छाया अन्धकारेण सहैकीभवतीति तत्सम्बन्धादेव महानन्धकारः प्रतीयत इति भावः। एतेन

छाया विधाय प्रतिवस्तुलग्नाः
प्रवेशयत् प्रष्टुमिवान्धकारः ॥ ३९ ॥
ध्वान्तस्य तेन क्रियमाणयेत्थं
द्विषः शशी वर्णनयाऽथ रुष्टः।
उद्यन्नुपाश्लोकि जपारुणश्री-
र्नराधिपेनानुनयेच्छयेव ॥ ४० ॥

प्रतिच्छायाऽपि तम एवेति वर्णितं। अन्योऽपि राजा लोकस्थितिं ज्ञातुकामः स्त्रीणां सर्वत्र प्रवेष्टुं शक्यत्वात् चारनारीः सम्प्रेष्य तत्रत्यवृत्तान्तं विचार्य समागतास्ताः प्रष्टुमात्मसविधं प्रवेशयति। छाया एव चारीः प्रतिवस्तुलग्ना विधायेति वा। चारपदं दत्त्वा यद्दिनं मत्येव प्रेषयामास, अत एव ताः दिने प्रतिवस्तुलग्ना दृश्यन्त इति वा। चारी पुंयोगान्ङीप् ॥ ३८ ॥

इदानीं चन्द्रोदयं वर्णयितुमुपक्रमते। ध्वान्तस्येति। तेन नराधिपेन नलेनेत्थं क्रियमाणया द्विषः शत्रुभूतस्य ध्वान्तस्य वर्णनया रुष्टः क्रुद्ध इव जपाकुसुमवदरुणा श्रीर्यस्य स उदयन् उदयं प्राप्नुवन् शशी तेनैव राज्ञा अथानन्तरं अनुनयेच्छयेव प्रसादनवाञ्छयेवोपाश्लोकि श्लोकैःस्तोतुमारब्धि। अन्योऽपि वैरिवर्णनया रुष्टः सन् अरुणो भवति, तत्परिहारार्थमुदितः सन् वर्णकेन प्रसादनार्थं स्तूयत इति प्रतीयमानोत्प्रेक्षा। इव शब्द-स्योभयत्र योजना वा। उपा॰ ‌।कि सत्येति (पा॰३।१।२५) णिजन्तात् कर्म्मणि चिण् ॥ ४० ॥

पश्यावृतोऽप्येष निमेषमद्रे-
रधित्यकाभूमितिरस्करिण्या।
प्रवर्षति प्रेयसि चन्द्रिकाभि-
श्चकोरचञ्चूचुलुकान् प्रतीन्दुः ॥ ४१ ॥
ध्वान्ते द्रुमान्तानभिसारिकास्त्वं
शङ्कस्व सङ्केतनिकेतमाप्ताः।

पश्येति। हे प्रेयसि प्राणप्रिये एष इन्दुश्चन्द्रिकाभिश्चकोराणां चन्द्रिकास्वदमृतपायिनां पक्षिणां चञ्चू एव चुलुकास्तान् प्रति पूरयित्वा प्रकर्षेण वर्षति सुधामित्यर्थात्। यावता चकोरचञ्चूपूरणं भवति तावत्प्रमाणं वर्षतीत्यर्थः। त्वं पश्य। किम्भूतः। अद्रेरुदयाचलस्याधित्यकाभूम्योर्ध्वशिखरेणैव तिरस्करिण्या जवनिकया निमेषलक्षणमत्यल्पकालमावृतोऽपि सन् सम्पूर्णानुदितोऽपि प्रथमचन्द्रिकाभिरेव चकोराणामानन्दं करोति किं पुनरुदितः सन्निति भावः। अन्योऽप्युपकारी दूरस्थोऽप्युदयोन्मुखोऽन्येषामुपकरोति ॥ ४१ ॥

ध्वान्त इति। हे प्रिये त्वं चन्द्रोदयात् पूर्वं ध्वान्ते सति द्रुमान्तान्, तरुनिकटदेशानेव वृक्षाधोभागानेव सम्भोगार्थं कामुकदत्तसङ्केतनिकेतं प्राप्ताः ता अभिसारिकाः स्वैरिणीः शङ्कस्व सम्भावय। तथा इदानीं चन्द्रोदये सति वृक्षाधोभागवर्त्तिच्छायाच्छलादुज्झितं पूर्वधृतं तमोऽनुकूलं चेलं वस्त्रं याभिस्तादृशीः सतीः सवर्णत्वाज्ज्योत्स्नानुकूलैश्चन्द्रिकानुगुणैर्धवलतरैर्दुकू-

क्वाथाच्छ्वासादुज्झितनीलचेला
ज्योत्स्नानुकूलैश्चलिता दुकूलैः ॥ ४२ ॥
त्वदास्यलक्ष्मीमुकुरं चकोरैः
स्वकौमुदीमादयमानमिन्दुः ।

लैरुपलचिताः सतीश्चलिताः सम्भोगं कृत्वा स्वगृहं प्रति पुनः परावृत्तास्त्वं सम्भावय। तमसि सत्येव केनापि न ज्ञातव्यमिति बुद्ध्या नीलं वस्त्रं परिधाय सङ्केतस्थानमागताः, चन्द्रोदये पुनर्नीलवस्त्रपरिधाने पूर्ववद्भीत्या तत् तत्रैव विहाय श्वेतं दुकूलं सवर्णत्वात् परिधाय केनापि न ज्ञाताः। नीलचोला इति पाठे चोलः कूर्पासः ॥ ४२ ॥

त्वदिति। हे रम्भातरुपीवरोरु रम्भातरुवदतिपीवरौ ऊरू यस्यास्तत्सम्बुद्धिः त्वं निशायामिन्दीवरं नीलोत्पलं तद्वाहभा यस्यास्तया दृशा ऊरु सादरमिन्दुं पिब विलोकय। किम्भूतं। तवास्यलक्ष्म्याः मुखशोभाया अवलोकनार्थं मुकुरं दर्पणमिव। तथा चकोरैः प्रयोज्यैः स्वकौमुदीमादयमानं निजकौमुदीं चकोरान् पाययमानं। उदिते चन्द्रे चकोराः सानन्दा जाताः नीलोत्पलानि च विकसितानीति भावः। एतेनेन्दोः परोपकारित्वं सूचितं। विकसितेन्दीवरतुल्यया दृशा पिबेत्यनेन चन्द्रोदये चेन्दीवरं विकसति त्वं चैवम्भूतया दृशा यदा चन्द्रमवलोकयिष्यसि तदा जनस्त्वद्दृशं चन्द्रावलोकनविकसितमिन्दीवरमेवैतदिति ज्ञास्यतीति सूचितं। दिवासङ्कोचादस्मादृग्

दृशा निशेन्दीवरचारुभासा
पिबोरु रम्भातरुपीवरोरु ॥ ४३ ॥
असंशयं सागरभागुदस्थात्
पृथ्वीधरादेव मयः पुराऽयं।
अमुष्य यस्मादधुनाऽपि सिन्धौ
स्थितस्य शैलादुदयं प्रतीमः ॥ ४४ ॥

मिति। इन्दीवरस्य विकसितत्वद्योतनार्थं निशापदं। चकोरैः गतिबुद्धीति (पा० १।४।५२) कर्म्मत्वप्राप्तावपि, आदिखाद्योर्न (पा० १।४।५२।वा० २) इति प्रतिषेधात् कर्त्तरि तृतीया। आद्यमानं निगरणार्थत्वात् परस्मैपदप्राप्तावपि अदेः प्रतिषेधो वक्तव्यः (पा० १।३।८७।वा० १) इति निषेधात्, णिचश्चेति (पा० १।३।७४) तङ्॥ ४३ ॥

असंशयमिति। पुरा पूर्वं सागरभाक् समुद्रगर्भस्थोऽयं चन्द्रः मयो दृष्टभूतात् पृथ्वीधरात् पर्व्वतान्मन्दरादेव हेतोरुदस्थादुत्पन्न इत्यसंशयं निश्चितं पुराणादौ यदेवं श्रूयते तत् सत्यमित्यर्थः। पुरा उदस्थात् प्रथमसम्भवावसरे तस्मादेव समुत्थित इति वा। तत्र हेतुमाह, यस्माद्धेतोरधुनाऽपि सम्भवान्तरावसरेऽपि सिन्धौ स्थितस्य सागरगर्भस्थस्याप्यमुष्य चन्द्रस्य शैलादुदयाचलादेवोदयमुत्पत्तिं प्रतीमो जानीमः। सत्यहं सागरस्थस्याप्यस्याचलोत्पत्तिशीलत्वरूपलिङ्गदर्शनात्, समुद्रम-

ततस्तदीयाधरयावयोगा-
दुदेति बिम्बारुणबिम्ब एषः ॥ ४६ ॥
विलोमिताङ्कोत्किरणाद्दृक्-
दृगादिना दृश्यविलोचनादि ।

द्धेतोः बिम्बवत् पक्वबिम्बीफलवदरुणं बिम्बं मण्डलं यस्य तादृश उदेति । अन्योऽपि समानः सखसविधमागतः सन् सख्या प्रीत्या चुम्ब्यते । मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात् सकलस्यापि चन्द्रबिम्बस्य रक्तत्वं युक्तमिति सूचितम् ॥ ४६ ॥

विलोमितेति । विधिः विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन बिम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किं । किम्भूतेन । विलोमितः पराङ्मुखः कृतः स्वप्रभया जितोऽङ्कः कलङ्को येन एतादृशादुत्कृष्टादतितेजस्विनः किरणाद्धेतोर्दुर्लक्ष्यो दुस्तर्क्यः दृगादिर्नेत्राद्यवयवो यस्य, अथ च विपरीतीकृतानामङ्कानां नेत्रादिनिर्माणार्थं निम्नोन्नतांशचिह्नस्थानानामुत्किरणं सद्घट्टनं तस्माद्धेतोः, साक्षादलक्ष्यनेत्रकर्णनासिकाद्यवयवेन, आननस्य साक्षाद्दृश्या विलोचनादयो नासाकर्णाद्यवयवा यस्य तादृशं, तस्मिन् ब्रह्मा स्त्रीमुखं चन्द्ररूपेण मद्वाराप्रभायया कृत्वा इत्याशयेन स्वर्णस्य सञ्चकेण निर्ममे, सञ्चके हि निष्पाद्यस्य वस्तुनो निम्नोन्नतभागा विपरीता एवोत्कीर्यन्ते तत्र च नेत्राद्यवयवा दुर्ज्ञेया भवन्ति, भवन्निर्मितमुखादौ च दृश्या भवन्ति तस्मादेवं

निजानुजेनातिथितामुपेतः
प्राचीपतेर्वाहनवारणेन।
सिन्दूरसान्द्रे किमकारि मूर्द्धि
तेनारुणश्रीरयमुज्जिहीते ॥ ४५ ॥
यत् प्रीतिमद्भिर्वदनैः स्वसाम्या-
दचुम्बि नाकाधिपनायिकानां।

थने प्रथमसम्भवावसरेऽप्ययमचलादेवोत्पन्न इति निश्चिनुम इत्यर्थः। उदयाचलशिखरं चन्द्रोऽतिक्रामतीति भावः ॥ ४४ ॥

निजेति। निजानुजेन एकस्मात् सिन्धोरुत्पन्नतया अस्माच्चन्द्रात् पश्चाज्जातेन कनी[illegible]२ ॥ [illegible] प्राचीपतेरिन्द्रस्य वाहनवारणेन प्राच्यां स्थितेनै[illegible]पीवरोऽतिथितामुपेतः प्राप्तः प्राच्यामुदितत्वात् तत्सविधं प्राप्तःसन्नयं चन्द्रोऽग्रजत्वात् सिन्दूरेण सान्द्रे मूर्द्धि अकारि कृतः किं। गौरवान्नमस्कारपूर्व्वं शिरस्यारोपितः किमित्यर्थः। तेन सान्द्रसिन्दूरशिरःस्थापनेन हेतुना लग्नसिन्दूरवशादयमरुणश्रीरारक्तशोभ उज्जिहीते, उदयते। उज्जिहीते किमिति वा। उदयंश्चन्द्रः सिन्दूररक्तो दृश्यत इत्यर्थः ॥ ४५ ॥

यदिति। वृत्तत्वादिगुणयोगेन स्वसाम्यात् प्रीतिमद्भिः नाकाधिपस्येन्द्रस्य नायिकानां वदनैर्यस्मात् स्वसविधमागत एष चन्द्रोऽचुम्बि तस्माद्धेतोस्तच्चुम्बनाद्वा तदीयानां देवेन्द्रनायिकानामधरेषु न्यस्तो यावोऽलक्तकस्तस्य योगात् सम्बन्धा-

ततस्तदीयाधरयावयोगा-
दुदेति बिम्बारुणबिम्ब एषः ॥ ४६ ॥
विलोमिताङ्कोत्किरणाद्दुरूह-
दृगादिना दृश्यविलोचनादि ।

द्धेतोः बिम्बवत् पक्वबिम्बीफलवदरुणं बिम्बं मण्डलं यस्य तादृश उदेति । अन्योऽपि समानः सख्यसविधमागतः सन् सख्या प्रीत्या चुम्ब्यते । मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात् सकलस्यापि चन्द्रबिम्बस्य रक्तत्वं युक्तमिति सूचितम् ॥ ४६ ॥

विलोमितेति । विधिः विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन बिम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किं । किम्भूतेन । विलोमितः पराङ्मुखः कृतः स्वप्रभया जितोऽङ्कः कलङ्को येन एतादृशादुत्कृष्टादतितेजस्विनः किरणाद्धेतोर्दुरूहो दुस्तर्क्यः दृगादिर्नेत्राद्यवयवो यस्य, अथ च विपरीतीकृतानामङ्कानां नेत्रादिनिर्माणार्थं निम्नोन्नतांशचिह्नस्थानानामुत्किरणं सन्दृष्टनं तस्माद्धेतोः, साक्षादलक्ष्यनेत्रकर्णनासिकाद्यवयवेन, आननस्य साक्षाद्दृश्या विलोचनादयो नासाकर्णाद्यवयवा यस्य तादृशं, तस्मिन् ब्रह्मा स्त्रीमुखं चन्द्ररूपेण महारादृभायया कृत्वा रत्याख्येन स्वर्णस्य सञ्चकेण निर्ममे, सञ्चके हि निष्पाद्यस्य वस्तुनो निम्नोन्नतभागा विपरीता एवोत्कीर्य्यन्ते तत्र च नेत्राद्यवयवा दुर्ज्ञेया भवन्ति, भवन्निर्मितमुखादौ च दृश्या भवन्ति तस्मादेवं

विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥ ४७ ॥
अनेन वेधा विपरीतरूप-
विनिर्मिताङ्कोत्किरणाङ्ककेन ।
त्वदाननं दृश्यदृगाद्यलक्ष्य-
दृगादिनैवाकृत सञ्चकेन ॥ ४८ ॥
अस्याः सुराधीशदिशः पुराऽऽसी-
द्यदम्बरं पीतमिदं रजन्या ।

तर्क्य इत्यर्थः। उदितमात्रश्चन्द्रोऽत्यतमसुवर्णसञ्चकवद्रक्तो दृश्यत इति भावः। उत्तमं सुवर्णं रक्तवर्णं भवति। आननमिति जात्यैकवचनं ॥ ४७ ॥

अनेनेति। वेधा विपरीतरूपं यथा तथा विनिर्मितमुत्कविधमङ्कोत्किरणं यत्र तादृशमङ्कं यस्य तेन तथाऽलक्ष्यदृगादिना अनेन चन्द्रेणैव सञ्चकेन दृश्यं सुन्दरमथच प्रत्यक्षदर्शनयोग्यं दृगादि यस्य तादृशं त्वदाननमकृत त्वदाननमेव कृतं, नतन्याननमिति वा, अयमेवात्र श्लोके विशेषः। अयं श्लोकः क्षेपकः॥ ४८ ॥

अस्या इति। हे भैमि अस्याः सुराधीशस्येन्द्रस्य दिशः यदम्बरं गगनं वस्त्रञ्च पुरा चन्द्रोदयात् पूर्वं रजन्या रात्र्या दरिद्रया च पीतं तमोव्याप्तत्वाद्दृश्यं पीतवर्णं वा आसीत् तेन गगनेन वस्त्रेण वा अधुना चन्द्रोदये चन्द्रांशूनां चूर्णैः अस्याः

चन्द्रांशुचूर्णव्यतिचुम्बितेन
तेनाधुना नूनमलोहितायि॥ ४९ ॥
तानीव गत्वा पितृलोकमेन-
मरञ्जयन् यानि स जामदग्न्यः।
छित्त्वा शिरोऽस्त्राणि सहस्रबाहो-
र्विस्राणि विश्राणितवान् पितृभ्यः॥ ५० ॥

सूक्ष्मतेजोलेशैः कर्दमैर्व्यतिचुम्बितेनातितरां स्पृष्टेन सता चन्द्रांशुवच्छुभ्रतरेण चूर्णेन ताम्बूलसाधनचूर्णद्रव्येण स्पृष्टेन सता नूनमलोहितायि, आरक्तीभूतं। यत् तमसा पूर्वं नीलमभूत् तदेवेदानीमुद्यचन्द्रलोहितकरसंस्पर्शाद्रक्तं जातमित्यर्थः। हरिद्रया पीतवर्णं वस्त्रं चूर्णेन युक्तं सद् रक्तं भवति। देवेन्द्रस्त्रियाश्च वस्त्राणि नानावर्णयुक्तानि। चन्द्रांशव एव चूर्णमिति वा। अलोहितायि लोहितादिडाज्भ्य इति(पा०३।१।१३) क्यषन्ताद्भावे चिण्॥४९॥

तानीति। सोऽतिवीरो जामदग्न्यः सहस्रबाहोः शिरश्छित्त्वा विस्राणि आमगन्धीनि यान्यस्राणि रक्तानि पितृभ्यः जमदग्न्यादिभ्यो विश्राणितवान् दत्तवान्, यै रक्तैः प्रतिज्ञातं पितृतर्पणं कृतवान्, तान्येव रक्तानि मन्त्रबलात् पितृलोकं गत्वा प्राप्य पितृलोकाधीशमेनं चन्द्रमरञ्जयन्, रक्तं चक्रुरिव। "चन्द्रो वै पितृलोकः" इति श्रुतेः। चन्द्रो रक्तवर्णो दृश्यत इति भावः। परशुरामः सहस्रार्जुनं हत्वा तदीयै रक्तैः पितृतर्पणं कृतवानितीतिहासः। विस्रं स्यादामगन्धि यदित्यमरः॥ ५०॥

विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥ ४७ ॥
अनेन वेधा विपरीतरूप-
विनिर्मिताङ्कोत्किरणाङ्ककेन।
त्वदाननं दृश्यदृगाद्यलच्य-
दृगादिनैवाङ्कत सञ्चकेन ॥ ४८ ॥
अस्याः सुराधीशदिशः पुराऽऽसी-
द्यदम्बरं पीतमिदं रजन्या।

तर्क्य इत्यर्थः। उदितमात्रचन्द्रोऽल्पतमसुवर्णसञ्चकवद्रक्तो दृश्यत इति भावः। उत्तमं सुवर्णं रक्तवर्णं भवति। आननमिति जात्यैकवचनं ॥ ४७ ॥

अनेनेति। वेधा विपरीतरूपं यथा तथा विनिर्मितमुक्तविधमङ्कोत्किरणं यत्र तादृशमङ्कं यस्य तेन तथाऽलच्यदृगादिना अनेन चन्द्रेणैव सञ्चकेन दृश्यं सुन्दरमथच प्रत्यचदर्शनयोग्यं दृगादि यस्य तादृशं त्वदाननमङ्कत त्वदाननमेव कृतं, नलन्याननमिति वा, अयमेवात्र लोके विशेषः। अयं श्लोकः चेपकः ॥ ४८ ॥

अस्या इति। हे भैमि अस्याः सुराधीशस्येन्द्रस्य दिशः यदम्बरं गगनं वस्त्रञ्च पुरा चन्द्रोदयात् पूर्वं रजन्या रात्र्या हरिद्रया च पीतं तमोव्याप्तत्वादृश्यं पीतवर्णं वा आसीत् तेन गगनेन वस्त्रेण वा अधुना चन्द्रोदये चन्द्रांशूनां चूर्णैः श्लच्ण-

चन्द्रांशुचूर्णव्यतिचुम्बितेन
तेनाधुना नूनमलोहितायि॥ ४९ ॥
तानीव गत्वा पितृलोकमेन-
मरञ्जयन् यानि स जामदग्न्यः।
छित्त्वा शिरोऽस्राणि सहस्रबाहो-
र्विस्राणि विश्राणितवान् पितृभ्यः॥ ५० ॥

सूक्ष्मतेजोलेशैः कर्दैभिर्व्यतिचुम्बितेनातितरां स्पृष्टेन सता चन्द्रांशुवच्छुभ्रतरेण चूर्णेन ताम्बूलसाधनचूर्णद्रव्येण स्पृष्टेन सता नूनमलोहितायि, आरक्तीभूतं। यत् तमसा पूर्वं नीलमभूत् तदेवेदानीमुद्यचन्द्रलोहितकरसंसर्गाद्रक्तं जातमित्यर्थः। हरिद्रया पीतवर्णं वस्त्रं चूर्णेन युक्तं सद् रक्तं भवति। देवेन्द्रस्त्रियाश्च वस्त्राणि नानावर्णयुक्तानि। चन्द्रांशव एव चूर्णमिति वा। अलोहितायि लोहितादिडाज्भ्य इति(पा० ३।१।१३) क्यषन्ताद्भावे चिण्॥४९॥

तानीति। सोऽतिवीरो जामदग्न्यः सहस्रबाहोः शिरश्छित्त्वा विस्राणि आमगन्धीनि यान्यस्राणि रक्तानि पितृभ्यः जमदग्न्यादिभ्यो विश्राणितवान् दत्तवान्, यै रक्तैः प्रतिज्ञातं पितृतर्पणं कृतवान्, तान्येव रक्तानि मन्त्रबलात् पितृलोकं गत्वा प्राप्य पितृलोकाधीशमेनं चन्द्रमरञ्जयन्, रक्तं चक्रुरिव। "चन्द्रो वै पितृलोकः" इति श्रुतेः। चन्द्रो रक्तवर्णो दृश्यत इति भावः। परशुरामः सहस्रार्जुनं हत्वा तदीयै रक्तैः पितृतर्पणं कृतवानितीतिहासः। विस्रं स्यादामगन्धि यदित्यमरः॥ ५० ॥

अकर्णनासस्त्रपते मुखं ते
पश्यन्न सीतास्यमिवाभिरामं।
रक्तोस्रवर्षी बत लक्ष्मणाभि-
भूतः शशी शूर्पनखामुखाभः ॥ ५१ ॥
आदत्त दीप्रं मणिमम्बरस्थ
दत्त्वा यदस्मै खलु सायधूर्त्तः।

अकर्णेति। हे प्रिये शशी सीतास्यमिवाभिरामं कर्णादिकृत-शोभनं ते मुखं पश्यन् न त्रपते लज्जते, बत चित्रं। किम्भूतः। न विद्यते कर्णनासं स्वभावादेव यस्य सः। तथा रक्ता आरक्ता उस्राः किरणास्तद्वर्षणशीलः रक्तः शोणश्चासौ किरणवर्षी च तादृशो वा। तथा लक्ष्मणा कलङ्केन अभिभूत आक्रान्तमध्योऽत एव शूर्पनखाया रावणभगिन्या मुखवदाभा यस्य सः, तद्वदनतुल्यः, एषु लज्जाकारणेषु सत्स्वपि न लज्जते तच्चित्रमित्यर्थः। त्वन्मुख पश्यन्नप्युदयत्येव स्वप्रकाशयति च तस्मादेव न लज्जते इत्यपि चित्रमेव। शूर्पनखामुखमपि लक्ष्मणेन पराभूतं छिन्नकर्णना-सत्वात् रुधिरवर्षि सत् राममभिलक्षीकृत्य वर्त्तमानमत एवा-तिभयरहितश्च सीतामुखं पश्यदपि न लज्जते तदनन्तरमपि सौहित्यादमदर्शनात्। अभिशब्दस्यावृत्तिः कार्य्या। लक्ष्मशब्दो नान्तः, पक्षेऽकारान्तः ॥ ५१ ॥

आदत्तेति। हे भैमि सायङ्कालरूपो धूर्त्तो यत् रज्यन् उदयकाले रक्तीभवन्नुपारद्युतिश्चन्द्र एव लेपवशाद्रज्यत् कूट-

रज्यत्तुपारद्युतिकूटहेम
तत् पाण्डु जातं रजतं क्षणेन ॥ ५२ ॥
बालेन नक्तं समयेन मुक्तं
रौप्यं लसड्डिम्बमिवेन्दुबिम्बं।

हेम कृत्रिमं सुवर्णमस्मै गगनाय मूल्यरूपेण दत्त्वा दीप्रं प्रकाशमानमम्बरस्य मणिं सूर्य्यमादत्त जग्राह तद्लीकं हेम क्षणमात्रेण पाण्डु शुभ्रं रजतं खलु रूप्यमिव जातं। धूर्त्तो हि रूप्यं लेपादिभिरूपलिप्तं सुवर्णीकृत्य ददाति, वस्त्रान्तरस्थमपि प्रसरद्दीप्तिकं रत्नञ्च गृह्णाति। उपयानन्तरमतिक्रान्तकियत्कालत्वाद्रक्तिमानं परित्यज्य चन्द्रो रूप्यवदुज्ज्वलो जात इति भावः। घञन्तोऽत्र शायशब्दः शायंशब्दसमर्थनार्थः ॥ ५२ ॥

बालेनेति। हे प्रिये रौप्यं रजतं रजतमयं लसद् विलसमानं डिम्बं बालक्रीडासाधनं भ्रमरकमिवेन्दुबिम्बं कर्त्तृ भ्रमिक्रमाद्भ्रमणपरिपाट्याऽथ च ऊर्द्धदेशगमनक्रमणेन उज्झिता त्यक्ता या पट्टसूत्रस्य नेत्रं दोरकं तत्कृता आवृत्तिर्वेष्टनं तद्रूपं, अथ च पट्टसूत्रजालिकावच्चन्द्रावरणं येन तं शोणिमानं रक्तिमानं मुञ्चति। किम्भूतमुभयं। नक्तसमयरूपेण बालेनाथ च बालेन प्रदोषरूपेण रात्रिसमयेन मुक्तं भ्रामणार्थं करात् कृतमोचनं, अथ च उद्गीर्णं जनितोदयं। शिशुक्रीडासाधनं हि भ्रमरकं काष्ठमयं भवति। ईश्वराणां च डिम्बं सम्पद्धातिशयाद्राजतं पट्टसूत्रवलितदोरकसंवनात् तत्सम्बन्धजातं रक्तिमानं मुञ्चति।

भ्रमिक्रमादुज्झितपट्टसूत्र-
नेत्रावृतिं मुञ्चति शोणिमानं॥ ५३ ॥
ताराक्षरैर्यामसिते कठिन्या
निशाऽलिखद् व्योम्नि तमःप्रशस्तिं।

तथेदं चन्द्रबिम्बमपीत्यर्थः। इदानीं चन्द्रो धवलो जात इति भावः। नेत्रावृतेरिति पाठे भ्रमिक्रमाद्धेतोरुज्झिता पट्टसूत्र-नेत्रावृतिर्यंत्र तादृशात् भ्रमिक्रमाद्धेतोरिति वा। डिम्बं ल-ड्डिम्बमिति वा गौडदेशभाषाया भ्रमरकस्य सञ्ज्ञा। महाराष्ट्र-भाषायां कान्यकुब्जभाषायाञ्च भ्रमरा इति सञ्ज्ञा। शैर्षं समन्वे विकारे वा अण्। नेत्रं मन्थगुणे वस्त्र इत्यभिधाना-न्नेत्रशब्दो यद्यपि मन्थवेष्टनगुणे मुख्यस्तथाऽप्यत्र गुणमात्रपर इति ज्ञेयं॥ ५३॥

तारेति। निशाऽसिते श्यामे व्योम्नि गगन एव कज्जला-दिलिप्तश्यामलपट्टिकायां कठिन्याः शुभ्रधातुविशेषस्य सन्नि-भिस्ताराक्षरैः शुभ्रैरक्षरैरिव नक्षत्ररूपैरक्षरैः कृत्वा यां तमः-प्रशस्तिं तमोवर्णनश्लोकादिलिपिमलिखत्, ताराक्षरैः उपल-क्षितां तमःप्रशस्तिं रात्रिः कठिन्याऽलिखदिति वा, तां लिपिं विलुप्य प्रौञ्छ्यालयतः परिमेयताराक्षरं कुर्व्वतो हिमांशोर-रुणेऽपि करे किरणेऽग्र च पाणौ पाण्डुरिमा जातः। प्ररूढ-किरणे हि चन्द्रे नक्षत्राणामल्पता भवतीति, खटिकालिखि-ताक्षराणि मार्ज्जयतश्चारुणोऽपि करः खटिकाशङ्काद्धवलो

विलुप्य तामल्पयतोऽरुणेऽपि
जातः करे पाण्डुरिमा हिमांशोः ॥ ५४ ॥
सितो यदाऽत्रैष तदाऽन्यदेशे
चकास्ति रज्यच्छविरुज्जिहानः।
तदित्थमेतस्य निधेः कलानां
को वेद वा रागविरागतत्त्वं ॥ ५५ ॥

भवतीति। तमसि नक्षत्राणि बहून्युज्ज्वलतराणि च दृष्टानि, चन्द्रे उदितेऽल्पानि निःप्रभाणि च जातानि, चन्द्रश्च धवलो जात इति भावः ॥ ५४ ॥

सित इति। एष चन्द्रो यदा यस्मिन् कालेऽत्र देशे सितो धवलश्चकास्ति तदा तस्मिन्नेव कालेऽन्यदेशे रज्यच्छवी रक्तकान्तिरुज्जिहानः उदयन् शोभते। एवमत्रोदयन् रक्तोऽन्यत्र च श्वेत इत्यपि सामर्थ्यात् लभ्यं, एतद्देशस्थं प्रति इदानीं सितो दृश्यते द्वीपान्तरस्थं प्रति उदयन्निदानीमेव दृश्यते यस्मात् तस्मात् कलानां निधेः पूर्णस्य चन्द्रस्य रागविरागयोर्लोहितलालोहितलयोस्तत्त्वं याथात्म्यमित्यममुनोक्तप्रकारेण को वा वेद, अपि तु कोऽपि निश्चेतुं न शक्नोतीत्यर्थः। उदयास्तमययोरतात्त्विकत्वाद्व्यवहितस्य यत्र यदा प्रथमदर्शनं तदा तत्रोदय इति दूरस्थस्य रक्तत्वप्रत्ययः क्रमसामीप्यात् तु धावल्यप्रत्यय इति तत्त्वं। अन्यस्यापि चतुःषष्टिकलाभिज्ञस्यानुरागाननुरागयोर्याथात्म्यं क्वचानुरक्तः क्व वा नेति कोऽपि न जानाति॥५५।

काश्मीरजैरश्मिभिरौपसन्ध्यै-
र्मृष्टं धुतध्वान्तकुरङ्गनाभि।
चन्द्रांशुना चन्दनचारुणाऽङ्गं
क्रमात् समालम्भि दिगङ्गनाभिः ॥ ५६ ॥
विधिस्तुषारर्तुदिनानि कर्त्तुं
कर्त्तं विनिर्म्माति तदन्तभिन्नैः।

काश्मीरजैरिति। दिग्भिरेवाङ्गनाभिः सन्ध्यायाः समीपं उपसन्ध्यं तत्र जातैरश्मिभिरेव काश्मीरजैः कुङ्कुमैः कृत्वा मृष्टं पूर्व्वं कृतोद्वर्त्तनं ततः सन्ध्यायामपगतायां धुता ध्वान्तरूपा मृगनाभिः कस्तूरी येन तादृशमङ्गं, क्रमात् कस्तूरीलेपनानन्तरं चन्द्रांशुनैव चन्दनेषु मध्ये चारुणोत्तमेन चन्दनेन कृत्वा समालम्भि, अलेपि। अन्या अपि अङ्गनाः कुङ्कुमादिक्रमेणाङ्गमनुलिम्पन्ति, चन्दनधवलैश्चन्द्रकरैः सर्व्वा अपि दिशो वितमस्काः कृता इति भावः। औपसन्ध्यैः सामीप्येऽव्ययीभावाद्भवार्थेऽण्। ५६ ॥

विधिरिति। विधिः तुषारर्त्तोः शिशिरर्त्तोर्दिनानि कर्त्तुं कर्त्तं छित्त्वा तेषां दिनानामन्तभिन्नैः मध्यसम्बन्धिभिः सारभूतैः सकलैः शुभ्रैः खण्डैः कृत्वा ज्योत्स्नीर्निशा विनिर्म्माति न चेदेवं नाङ्गीक्रियते यदि तदेमाश्चन्द्रिकायुक्ता रात्रयः तत्प्रतिमाः तैर्दिनैस्तुल्याः शीतलत्वप्रकाशत्वाभ्यां तत्सदृश्यः कथं। तानि च दिनानि वामनानि न्यूनपरिमाणानि न्यूनशीलत्वाद्विगुणानि

ज्योत्स्नीर्न चेत् तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥ ५७ ॥
इत्युक्तिशेषे स वधूं बभाषे
सूक्तिश्रुतासक्तिनिबद्धमौनाम् ।

कथं वा, अपि तु दिनवामनतारात्रिदीर्घताऽन्यथानुपपत्तेः शिशिरतोर्दिनापेक्षया च ज्योत्स्नीनामतितमां शीतलप्रकाशवत्त्वानुपपत्तेश्च । शिशिरर्तुर्दिनानि छित्त्वैव तत्सारभूतैश्च शकलैश्चन्द्रिकान्विता रात्रयो ब्रह्मणा वर्द्धिता इत्यर्थः । चन्द्रचन्द्रिकया रात्रिः शीतला धवलतरा च कृतेति भावः । कर्त्तं कर्त्तं कृती छेदन इत्यस्मादाभीक्ष्ण्ये नमुल् द्विर्वचनञ्च । ज्योत्स्नी ज्योत्स्नायस्यामस्तीत्यर्थे ज्योत्स्नातमिस्रेति (पा० ५।२।११४) साधुकृतात् ज्योत्स्नाशब्दादण्प्रकरणे ज्योत्स्नादिभ्यः उपसङ्ख्यानमित्यर्थे अणि (पा० ५।२।१०३।वा०१) ङीप् ॥ ५७ ॥

इतीति । स नलः इत्युक्तिशेषे एव चन्द्रवर्णनावसाने सूक्तीनां प्रसादादिगुणयुक्तानां शोभनवचनानां श्रुते श्रवणे विषये आसक्त्या रसातिशयात् तदेकतानतया बद्धं स्वीकृतं मौनं यया तां तूष्णीभावमास्थितां वधूं भैमीं प्रति इदं बभाषे । इति किं । हे प्रेयसि इन्दौ विषये तवेयं मूकस्येव मुद्रा वाङ्निरोधरीतिः का किंकारणिका, त्वमपि किमिति न चन्द्रवर्णयसीत्यर्थः । मौने स्वयमेव हेतुमुत्प्रेक्षते । मुखस्य चन्द्रकृतवदनसाम्यस्याभ्यसूयया स्पर्द्धा तज्जन्यात्मद्रतोऽनुशयात् ननोदेषादिव स्वस्पर्द्धा-

मुखाभ्यसूयानुशयादिवेन्दौ
केयं तव प्रेयसि मूकमुद्रा ॥ ५८ ॥
शृङ्गारभृङ्गारसुधाकरेण
वर्णस्रजाऽनूपय कर्णकूपौ ।
त्वचारुवाणीरसवेणितीरे
तृणानुकारः खलु कोपकारः ॥ ५९ ॥

कारियो हि वर्णने अन्येन क्रियमाणे अन्योऽपि कोपात् तूष्णीं तिष्ठति नानुमोदते स्वयञ्च न तं वर्णयति, तथा त्वन्मुखस्पर्द्धाकरणे सञ्जातकोपादिवेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः। नलसूक्तिश्रवणादरकृतं मौनं कोपादिवेत्युत्प्रेक्षितं ॥ ५८ ॥

शृङ्गारेति। हे प्रिये त्वं शृङ्गारसम्बन्धी भृङ्गारः स्वर्णकलशः तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु, वर्णस्रजः सरसत्वात् कर्णकूपयोर्जलपूर्णत्वकरणं युक्तं। अथ च शृङ्गारसम्बन्धिसुवर्णकलशरूपस्य भवन्मुखस्य सम्बन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय। खलु यस्मात् कोपकारः इचुविशेषः तव चारुवाण्या वक्रोक्त्यादिरूपाया वाचः सम्बन्धिनः शृङ्गारादयो रसास्तेषां वेणिः प्रवाहः तस्यास्तीरे समुद्गत् यत्तृणं तस्यानुकारः तत्सदृशः। अतिस्वादुरसोऽपीचुविशेषो यदीयरसवाणीतीरतृणमनुकरोति न तु समो जातः, तां वाणीं श्रावय

अत्रैव वाणीमधुना तवापि
श्रोतुं समीहे मधुनः सनाभिं।
इति प्रियप्रेरितया तयाऽथ
प्रस्तोतुमारम्भि शशिप्रशस्तिः॥ ६०॥
पूरं विधुर्वर्द्धयितुं पयोधेः
शङ्केऽयमेणाङ्कमणिं कियन्ति।
पयांसि दोग्धि प्रियविप्रयोगात्
सशोककोकीनयने कियन्ति॥ ६१॥

चन्द्रं वर्णयेति भावः। कोषकाराद्या इत्युविशेषा इति चोरस्वामी। अनूपय अनूपशब्दात् तत्करोतीति (पा० ३।१।२६। वा० १) णिचि लोट्॥ ५९॥

अत्रैवेति। प्रियेण इति प्रेरितया तया भैम्या अथानन्तरं शशिनः प्रशस्तिर्माहात्म्यं प्रस्तोतुमारम्भि, आरब्धा। इति किं। हे भैमि अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे, इच्छामीति॥ ६०॥

पूरमिति। हे प्रिय अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्द्धयितुमेणाङ्कमणिं चन्द्रकान्तं कियन्ति पयांसि दोग्धि तस्माद् गृह्णाति, तथा प्रियस्य चक्रवाकस्य विप्रयोगात् सशोकायाः कोक्या नयने अपि कियन्ति जलानि दोग्धि, ताभ्यामपि संकाशाद् गृह्णातीत्यहं शङ्के मन्ये, इति भैमी प्रियमवदत्।

मुखाभ्यसूयानुशयादिवेन्दौ
कोयं तव प्रेयसि मूकमुद्रा ॥ ५८ ॥
शृङ्गारभृङ्गारसुधाकरेण
वर्णस्रजाऽनूपय कर्णकूपौ ।
त्वच्चारुवाणीरसवेणितीरे
तृणानुकारः खलु कोपकारः ॥ ५९ ॥

कारिणो हि वर्णने अन्येन क्रियमाणे अन्योऽपि कोपात् तूष्णीं तिष्ठति नानुमोदते स्वयञ्च न तं वर्णयति, तथा त्वन्मुखसदृशीकरणे सञ्जातकोपादिवेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः। नलसूक्तिश्रवणादरकृत मौनं कोपादिवेत्युत्प्रेक्षितम् ॥ ५८ ॥

शृङ्गारेति। हे प्रिये त्वं शृङ्गारसम्बन्धी भृङ्गारः स्वर्णकलशः तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु, वर्णस्रजः सरसत्वात् कर्णकूपयोर्जलपूर्णत्वकरणं युक्तं। अथ च शृङ्गारसम्बन्धिसुवर्णकलशरूपस्य भवन्मुखस्य सम्बन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय। खलु यस्मात् कोपकारः इक्षुविशेषः तव चारुवाण्याः वक्रोक्त्यादिरूपायाः वाचः सम्बन्धिनः शृङ्गारादयो रसास्तेषां वेणिः प्रवाहः तस्यास्तीरे समुद्यत् यत्तृणं तस्यानुकारः तत्सदृशः। अतिस्वादुरसोऽपीक्षुविशेषो यदीयरसश्राणीतास्तृणमनुकरोति न तु समो जातः, तां वाणीं श्रावय

अत्रैव वाणीमधुना तवापि
श्रोतुं समीहे मधुनः सनाभिं।
इति प्रियप्रेरितया तयाऽथ
प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥ ६० ॥

पूरं विधुर्वर्द्धयितुं पयोधेः
शङ्केऽयमेणाङ्कमणिं कियन्ति।
पयांसि दोग्धि प्रियविप्रयोगात्
सशोककोकीनयने कियन्ति ॥ ६१ ॥

चन्द्रं वर्णयेति भावः। कोषकाराद्या दनुविशेषा इति चीरखामी। अनूपय अनूपशब्दात् तत्करोतीति (पा० ३।१।२६। वा० १) णिचि लोट् ॥ ५९ ॥

अत्रैवेति। प्रियेण इति प्रेरितया तया भैम्या अथानन्तरं शशिनः प्रशस्तिर्माहात्म्यं प्रस्तोतुमारम्भि, आरब्धा। इति किं। हे भैमि अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे, इच्छामीति ॥ ६० ॥

पूरमिति। हे प्रिय अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्द्धयितुमेणाङ्कमणिं चन्द्रकान्तं कियन्ति पयांसि दोग्धि तस्मात् गृह्णाति, तथा प्रियस्य चक्रवाकस्य विप्रयोगात् सशोकायाः कोक्या नयने अपि कियन्ति जलानि दोग्धि, ताभ्यामपि शंकाशाद् गृह्णातीत्यहं शङ्के मन्ये, इति भैमी प्रियमवदत्।

ज्योत्स्नामयं रात्रिकलिन्दकन्या-
पूरानुकारेऽप्रसृतेऽन्धकारे ।
परिस्फुरन्निर्मलदीप्तिदीपं
व्यक्तायते सैकतमन्तरीपं ॥ ६२ ॥
हासत्विषैवाखिलकैरवाणां
विश्वं विशङ्केऽजनि दुग्धमुग्धं ।

उदिते चन्द्रे सागरपूरो वृद्धिं प्राप्तश्चन्द्रकान्ताः स्रवन्ति चक्रवाकी च भृशं रोदितीति भावः। दुहिर्द्विकर्मा ॥ ६१ ॥

ज्योत्स्नेति। हे प्राणेश तमोऽवसरेऽतिश्यामा रात्रिरेव कलिन्दकन्या यमुना तस्याः पूर आगन्तुकातिनीलजलप्रवाहस्तदनुकारे तत्सदृशे तद्वदतिकृष्णेऽन्धकारेऽपसृते सति परिस्फुरन्ती निर्मला दीप्तिर्यस्य प्रकाशमानश्चासौ धवलद्युतिश्च तादृशो वा यश्चन्द्रः स एव दीपो यत्र तादृशं चन्द्रिकारूपसैकतं धवलतरवालुकामयं रात्रियमुनाया एव जलमध्यस्थितमन्तरीपं व्यक्तायते स्फुटमिव भवति प्रकटं दृश्यते। पूर्वावसरेऽस्फुटमपीदानीं स्फुटीभवतीति शङ्के। चन्द्रचन्द्रिकया सकलं धवलीकृतमिति भावः। व्यक्तायते, व्यक्तमिव भवतीत्यर्थे कर्तुः क्यङ्गीति (पा० ३।१।११) क्यङ्। अव्यक्तं व्यक्तं भवतीत्यर्थः। सैकतं, सिकताशर्कराभ्याञ्च (पा० ५।२।१०४) इत्यस्यार्थेऽण् ॥ ६२ ॥

हासेति। अखिलकैरवाणां सकलकुमुदानां हासत्विषेव विकासरोचिषेव विश्वं सकलं जगत् दुग्धवन्मुग्धं शीतलं धवलञ्चा-

यतो दिवा वद्धमुखेषु तेषु
स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ ६२ ॥
मृत्युञ्जयस्यैष वसन् जटायां
न चीयते तद्भयदूरमृत्युः ।

जनि जातं न तु चन्द्रेणेत्यहं विशङ्के विशेषेण मन्ये । यतो हेतो-र्दिवा तेषु सकलकैरवेषु वद्धमुखेषु सङ्कुचितेष्वविकस्वरेषु सत्सु चन्द्रे स्थिते विद्यमानेऽपि सकलकुमुदविकाशाभावात् सकलं जगत् तथा रात्राविव शीतलधवलतया न चकास्ति तस्मादिदं जगत् कुमुदहासलिप्येव शीतलं धवलञ्च कृतं न तु चन्द्रेणे-त्यर्थः । कुमुदवत् दुग्धवच्च शीतला धवला चन्द्रिकाऽस्तीति भावः ॥ ६२ ॥

मृत्युमिति । मृत्युञ्जयस्य मृत्युञ्जितवतः शिवस्य जटायां वसन् एष चन्द्रः षोडशांशभूतो न चीयते, न अल्पपरिमाणो भवति । कलामात्रस्वरूपेणैव तत्र सदा वसंस्ततोऽपि न्यूनपरि-माणो न भवतीत्यर्थः । अथ च न चीयते न क्षीयते यस्मात् तस्मात् मृत्युञ्जयात् सकाशाद्भयेन दूरो मृत्युर्मरणहेतुर्देवता यस्य सः, मृत्युञ्जयजटाजूटनिवासान्मृत्युना स्प्रष्टुमपि न शक्यते तस्मान्न चीयतेऽयमित्यर्थः । तर्हि तत्र वसन् वर्द्धते किं नेत्या-शङ्क्याह । वर्द्धते च न उपचितोऽपि न भवतीत्यर्थः । यतः खस्य सुधया प्राप्ता जीवद्धेतन्यं यैस्तानि स्रजो मुण्डानि भूप-षीभूतशिरोमानांयाः शिरःकपालानि तान्येव राहवस्तेभ्य

न वर्द्धते च स्वसुधाप्तजीव-
स्वमुण्डराशिव्रजभीरतीव ॥ ६४ ॥
त्विषं चकोराय सुधां सुराय
कलामपि स्वावयवं हराय।
ददज्जयत्येष समस्तमस्य
कल्पद्रुमभ्रातुरथाल्पमेतत् ॥ ६५ ॥

उद्भवा समुत्पन्ना भीर्यस्य, कथं, अतीव, नितरां भीत इत्यर्थः। सजीवमुण्डेषु बहवो राशव एवैते इति धिया भिया न वर्द्धते। भीतो हि सौख्याभावात् क्षयतर एव भवति, अथच पूर्वस्य राशेः सकाशाद्भयमतः कारणाद्भयान्न चीयते न च वर्द्धत इत्येककल एव शिवशिरश्चन्द्र इत्यर्थः। एतेन चन्द्रस्य षोडशी कला वर्णिता। शिवशिरसि वर्त्तमानत्वादस्य माहात्म्यमपि वर्णितं। स्वत्वुञ्चयेति सञ्ज्ञायां भृतवृजीति (पा० ३।२।४६) खच्, अरुर्द्विषेति (पा० ६।३।६७) मुम् ॥ ६४ ॥

त्विषमिति। एष चन्द्रो जयति सर्व्वोत्कर्षेण प्रकाशते यतः। किम्भूतः। चकोराय स्वावयवं त्विषं निजांशभूतां चन्द्रिकां ददत्, तथा सुराय अग्न्यादिदेवेभ्यो निजांशभूतां सुधां ददत्, तथा हराय निजांशभूतां कलामपि ददत्, अथाऽपि अस्य चन्द्रस्यैतत् समस्तं परोपकारकरणमल्पमेवातिचमत्कारि न भवति, यतः समुद्रोत्पन्नत्वात् कल्पद्रुमस्य भ्रातुः। कल्पद्रुमस्तु कल्पित सर्व्वं सर्व्वेभ्यो ददाति, अयन्तु न तथेत्यल्पमेवेत्यर्थः।

अङ्केणनाभेर्विषकृष्णकण्ठः
सुधाप्तशुद्धेः कटभस्मपाण्डुः ।
अर्हन्नपीन्दोर्निजमौलिधाना-
न्मृडः कलामर्हति षोडशीं न ॥ ६६ ॥

एवंविधः परोपकारी न कोऽपीति भावः । चकोराय सुरा- येति जात्येकवचनं ॥ ६५ ॥

अङ्केति । मृडः शिवो निजमौलौ धारणात् स्थापनाद्धेतोः षोडशीं कलामर्हन् प्राप्नुवन्, अथ च पूजयन्नपि षोडशीं कलां नार्हति न प्राप्नोति, न पूजयति वा । निजशिरसि धारणादेव तस्याः प्राप्तिः पूजा च सम्भावनीया, अतितरां पूज्यते स्वशिरसि धार्यते च । तथा चैतस्य षोडशीं कलां मृडः प्राप्नुवन्, पूजयन्, अपि च तां प्राप्नोतीति विरोधपरिहारो यतः । किम्भूतस्ये- न्दोः, किम्भूतश्च मृडः । अङ्कभूतो य एणो हरिणस्तद्युक्ता ना- भिर्मध्यभागो यस्य, अथचाङ्करूपा कलङ्करूपा एणनाभिः क- स्तूरी यत्र । मृडस्तु विषेण कृष्णकण्ठः तथा सुधयाऽमृतेनाप्ता शुद्धिर्धावल्यं येन, मृडस्तु कटभस्मना चिताभस्मना पाण्डुः तस्माच्चन्द्रस्याल्पमपि साम्यं शिवो न प्राप्नोति । किञ्च चन्द्रा- दधिकश्चेच्छिवोऽभविष्यत् तर्हि तदीयकलां मौलौ नाधार- यिष्यत्, सा तु मौलौ धृता तेन, तस्माच्चन्द्र एव शिवादधिक इत्यर्थः । शुभस्याशुभस्य च महदन्तरमिति भावः । षोडशी- नपि कलां नार्हतीत्यनेन पूर्णचन्द्रं नार्हतीति वाच्यं, इत्यपि

पुष्पायुधस्यास्थिभिरर्द्धदग्धैः
सितासितश्रीरघटि द्विजेन्द्रः।
स्मरारिणा मूर्द्धनि यद्धृतोऽपि
तनोति तत्तौष्टिकपौष्टिकानि ॥ ६७ ॥
मृगस्य लोमात् खलु सिंहिकायाः
सूनुर्मृगाङ्कं कवलीकरोति।

सूचितं। हरस्यापकर्षे विषं चिताभस्म च हेतुः। चन्द्रोत्कर्षे मृगमदोऽमृतञ्च ॥ ६६ ॥

पुष्पेति। ब्रह्मणा द्विजेन्द्रः पुष्पायुधस्य कामस्यार्द्धदग्धैरस्थिभिः कलाऽघटि निर्मितः, अत एव सितासितश्रीः, उपान्तधवलमध्यश्यामलकान्तिभिः स्मरास्थिभिरेव निर्मित इत्यत्र हेतुमाह। स्मरारिणा मूर्द्धनि धृतोऽपि अत एव च कृतसम्मानोऽपि तस्य स्मरस्यैव तौष्टिकानि हर्षकारीणि पौष्टिकानि अभिवृद्धिकारीणि च यद्यस्मात् तनोति, कामारिणा पूज्यमानोऽपि कामहितमेव यस्मात् करोति, तस्मात् तदस्थिभिरेव घटित इत्यर्थः। एतादृक्कामोद्दीपकं किमपि नास्तीति भावः। अस्थिभिरिवेति प्रतीयमानोत्प्रेक्षा। अन्याश्रितोऽपि तदीयमनुचितं यः करोति स तदस्थिभिर्घटित इति लौकिकयुक्तिः। तौष्टिकपौष्टिकानि, प्रयोजनमिति (पा० ५।१।१८) ठञ् ॥ ६७ ॥

मृगस्येति। सिंहिकायाः सुतो राहुः मृगाङ्कं यत् कवलीकरोति तद्धृतमृगस्य लोभात् खलु मांसाभिलाषादिव सिंहि-·

स्वस्यापि दानादमुमङ्कसुप्तं
नैोज्झन्मुदा तेन च मुच्यते ऽसौ ॥ ६८ ॥
सुधाभुजो यत् परिपीय शून्य-
मेतं वितन्वन्ति तदर्हमेव ।
पुरा निपीयास्य पिताऽपि सिन्धु-
रकारि तुच्छः कलशोद्भवेन ॥ ६९ ॥

कायाः सुतः सिंहो मृगैरङ्कितं खलं मृगग्रासाभिलाषादेव स्वाधीनं करोति । तर्हि किमयं मुञ्चतीत्यत आह । अङ्कसुप्तं मध्यवर्त्तिनमथ चोत्सङ्गे विश्वासात् सुखेन निद्रितममुं मृगं स्वस्यापि दानाद्राजक्षतदन्तखण्डनादपि नैोज्झत्, नात्यजत्, अथ च स्वशरीरस्यापि वितरणान्नात्यजत्, अयं चन्द्रस्तेन राज्ञा तेन पुण्येन च हेतुना मुदा शरणागतरक्षणनिमित्तहर्षेण कृत्वा मुच्यते त्यज्यते। अन्योऽपि शरणागतं मृगं जिघांसोः सिंहाद्रक्षितमात्मानमपि ददानो हि तेन पुण्येन सिंहान्मुच्यते, अत एव स्वस्यापि दानादङ्कसुप्तममुं यतो नामुञ्चत् तेन हेतुनाऽयं विमुच्यते, अर्थाद्राज्ञेत्यर्थः ॥ ६८ ॥

सुधेति। सुधाभुजो देवा एनं चन्द्रं परिपीय साकल्येन पीत्वा तुच्छं रिक्तं यद्वितन्वन्ति कुर्व्वन्ति तदर्हं, उचितमेव। यतोऽस्य पिता सिन्धुरपि कलशोद्भवेन अगस्त्येन पुरा निपीय तुच्छो रिक्तोऽकारि तस्मात् कुलक्रमागततुच्छत्वमित्यर्थः ।

चतुर्दिगन्तीं परिपूरयन्ती
ज्योत्स्नैव कृत्स्ना सुरसिन्धुबन्धुः ।
क्षीरोदपूरोदरवासनाश-
वैरस्यमेतस्य निरस्यतीयं ॥ ७० ॥
पुत्री विधोस्ताण्डविकाऽस्तु सिन्धो-
राभ्या चकोरस्य दृशोर्वयस्या ।

एतस्य पूर्व्वेऽपि परोपकारनिरता तस्मादयमपि तथैवेति भावः । कलशादुत्पन्नेनापि सागरस्य पानमित्याश्चर्यं ॥ ६९ ॥

चतुरिति । चतुर्णां दिगन्तानां समाहारस्तां चतुर्दिक्-प्रान्तानित्यर्थः । तां परिपूरयन्ती सामस्त्येन व्याप्नुवती । तथा श्वैत्यात् सुरसिन्धोर्मन्दाकिन्या बन्धुः सदृशी । तथा कृत्स्ना पूर्णा इयं ज्योत्स्ना एका-क्षीरोदरपूरोदरे वासः स्थितिः तस्य वा-नाद्दृढकालं परित्यागाद्धेतोरेतस्य चन्द्रस्य वैरस्यं क्षीरसागर-विरहजनितं दुःखं निरस्यति नाशयति । अमौ चन्द्रिकायामेव क्षीरसागरबुध्या पितृवियोगदुःखं परित्यजतीत्यर्थः । सकलदि-गन्तव्यापिधवलचन्द्रिकामध्यवर्त्ती चन्द्रः क्षीरसागरमध्यस्थ इव शोभत इति भावः । गङ्गावद्दुग्धवच्चेयं कौमुदीति भावः । चतु-र्दिगन्ती । समाहारे द्विगोर्ङीप् ॥ ७० ॥

पुत्रीति । इयं चन्द्रिका यद्यपि चन्द्रात् प्रसूतत्वाद्विधोः पुत्री अस्तु, सिन्धोः समुद्रस्य ताण्डविका नृत्योपदेशिकाऽपि नट-विधी अस्तु । चन्द्रिकया हि सिन्धुर्नाट्यते सा च तस्य,नप्त्री

तथाऽपि सेयं कुमुदस्य काऽपि
ब्रवीति नामैव हि कौमुदीति ॥ ७१ ॥
ज्यौत्स्नापयःस्नातटवास्तुवस्तु-
च्छायाच्छलच्छिद्रधरा धरायां।

भवति, यद्वा इयं विधोः पुत्री सिन्धोस्ताण्डविका भवतु, तथा चकोरस्याश्या पेया भवतु, सकललोकस्य दृशोः प्रेमपात्रतया वयस्या सखी भवतु, तथाऽपि सेयं चन्द्रिका कुमुदस्य काऽप्यनिर्व्वचनीया सम्बन्धिनी भवतु, पूर्व्वनिर्द्दिष्टसर्व्वापेक्षया कुमुदस्यैव निरतिशयानन्दकारित्वात् केनाप्यनिर्व्वचनीयेन सम्बन्धिनी भवत्वित्यर्थः। हि यस्मात् कौमुदीति नामैव कर्त्तृ ब्रवीति सर्व्वेषां तत्र तत्सम्बन्धसम्भवेऽपि कुमुदानामियं कौमुदीति तस्येदमिति सम्बन्धेऽणि कुमुदानामेव प्रीत्यतिशयेन सम्बन्धं वदतीत्यर्थः। कौमुदीति नामैव हि स्वयं ब्रवितीति च चन्द्रिकया सर्व्वेषामप्यानन्दः कृतः, कुमुदानान्तु विशेषत इति भावः। कार्य्येण कारणानुमानं। ताण्डविका, अर्शआद्यजन्तान्मतुबन्ताद्वा ताण्डवशब्दात् तत्करोतीति (पा० ३।१।२६।वा० १) ण्यन्तात्कृक्। अशनमशि दण्डादित्वा यत्। अश्येति च पाठः ॥ ७१ ॥

ज्योत्स्नेति। शुभ्रांशोश्चन्द्रस्य शुभ्रांशा धवलभागास्त्र ते कराः किरणाश्च धरायां भूम्यां कलङ्कस्य नीलीभिः प्रभाभिर्मिश्रा निभा कान्तिर्येषां ते कलङ्कनीलकान्तिच्छुरिता इव विभान्ति। यतो ज्योत्स्नैव पयो जलं दुग्धं वा यस्मिंस्तादृश

शुभ्रांशुशुभ्रांशकराः कलङ्क-
नीलप्रभामिश्रनिभा विभान्ति ॥ ७२ ॥
कियान् यथाऽनेन वियद्विभाग-
स्तमोनिरासाद्विशदीकृतोऽयं ।

क्ष्मातटं दुग्धधवलचन्द्रिकाधवलीकृतभूतलं तदेव वास्तु वसतिस्थलं येषां तानि वस्तूनि वृक्षादिपदार्थास्तेषां छाया छलं येषां तादृशानि छिद्राणि प्रकाशेन रिक्तलादिस्थानि पदार्थप्रतिच्छायारूपाणि तानि धरन्तीति तादृशाः। चन्द्रिकाधवलिताः पदार्थाश्चन्द्ररश्मय इव वृक्षादिप्रतिच्छायाश्चन्द्रकलङ्कनीलरश्मय एवेति धरायामपि निपतिताश्चन्द्रकिरणा नीलधवला एव शोभन्त इत्यर्थः। अन्यस्य करा हस्ताः कलङ्कवन्नीलस्य नीलमणेः प्रभया मिश्रकान्तयो नीलमणियुक्ताङ्गुलीयकप्रभामिश्रा विभान्ति। शुभ्रांशुशुभ्रांश्विति पाठेऽप्यंशुर्लेशे रवे रश्मावित्यभिधानादंशुशब्दस्य लेशवाचित्वात् स एवार्थः। ज्योत्स्नैव पयो जलं तस्य क्ष्मा भूमिः तस्यास्तटं तदेव वास्तु निवासस्थानं येषां तेषां वस्तूनां छायाव्याजेन छिद्राणि धरन्तीति वा ॥ ७२ ॥

कियानिति। उदितमात्रेणानेन चन्द्रेण तमोनिरासाद्धेतोः कियान् किञ्चिन्मात्रोऽयं वियद्विभागः पूर्वाकाशदेशो यथा विशदीकृतः तथा चन्द्रकिरणैरुद्भासिताभिर्वृद्धिं प्रापिताभिर्धावल्यवीचिभिरद्भिः कियानयं वियद्विभागः क्षितिः, स्नातो

अङ्भिस्तथा लावणसैन्धवीभि-
रुद्भासिताभिः शितिरप्यकारि ॥ ७३ ॥
गुणौ पयोधेर्निजकारणस्य
न वृद्धिवृद्धी कथमेतु चन्द्रः ।
चिरेण सोऽयं भजते तु यत् ते
न नित्यमम्भोधिरिवात्र चित्रं ॥ ७४ ॥

ऽप्यकारि । अप्रौढप्रभे चन्द्रे पूर्व्वाकाशदेशस्तिमिरनिराशाङ्क-वतो भवति ततो निरस्तस्य च तमसः प्रतीच्यां घनीभूतत्वात् पश्चिमाकाशदेशः श्यामलो भवतीति तत्रैवमुत्प्रेक्षा । समुद्रजलञ्च नील पूर्व्वाकाशदेश एव नीलैः समुद्रजलैः पुनर्नीलोऽप्यकारीति वा । लावणसैन्धवी, लवणसिन्धोरिमास्तस्येदं (पा० ४।३।१२०) इत्यणि हृद्भगेति (पा० ७।३।१९) उभयपदवृद्धिः ॥ ७३ ॥

गुणाविति । चन्द्रो निजकारणस्य पयोधेर्हानिवृद्धिरूपौ गुणौ कथमेतु प्राप्नोतु, अपि तु कार्य्यगुणानां कारणगुणपूर्व्व-कत्वनियमादवश्यमपचयोपचयौ चन्द्र आप्नुत इति युक्तमेवेत्यत्र न किञ्चिच्चित्रमित्यर्थः । तर्हि कुत्र चित्रमित्याशङ्क्याह । सोऽयं चन्द्रस्ते हानिवृद्धी यच्चिरेण पक्षान्तपरिमितेन बहुना कालेन भजते न तु अम्भोधिरिव नित्यं प्रत्यहं भजतेऽत्र विषये चित्र-माश्चर्य्यं । समुद्रो यथा प्रत्यहं हानिवृद्धी भजते तथा पुत्रोऽपि चन्द्रो नेत्याश्चर्य्यमित्यर्थः ॥ ७४ ॥

आदर्शदृश्यत्वमपि श्रितोऽय-
मादर्शदृश्यां न बिभर्त्ति मूर्त्तिं।
त्रिनेत्रभूरप्ययमत्रिनेत्रा-
दुत्पादमासादयति स्म चित्रं ॥ ७५ ॥

आदर्शेति। अयं चन्द्र आदर्शवद्दृश्यत्वं वृत्तत्वादिना रमणीयत्वं श्रितो भजमानोऽपि आदर्शवद् दृश्यां रमणीयां मूर्त्तिं न बिभर्त्ति चित्रं। यो ह्यादर्शवद् दृश्यो भवति स एवादर्शवद् दृश्यां मूर्त्तिं न बिभर्त्ति तद्दृश्यो न भवतीति विरोधादाश्चर्यमित्यर्थः। अथ च दर्पणवद्दृश्यत्वं श्रितोऽप्यादर्शे दर्शमभिव्याप्य दृश्याममावास्यायां दर्शनयोग्यां मूर्त्तिं न बिभर्त्ति, इदानीं पूर्णत्वेन दृश्यमानोऽपि दर्शे लेशेनापि न दृश्यत इत्यर्थः, इति विरोधपरिहारः। दर्पणवद्दृश्यत्वं श्रितोऽपि आदर्शं दर्शं मर्य्यादीकृत्य अप्राप्तदर्शमभिव्याप्य दृश्यां मूर्त्तिं न बिभर्त्ति, अपि तु तावत्पर्यन्तं दृश्यो भवत्येवेति वा। तथाऽयं चन्द्रः, त्रिनेत्राद्भवति यस्मादृषिस्त्रिनेत्रादुत्पन्नोऽपि,न त्रिनेत्रोऽत्रिनेत्रस्तस्मात्त्रिनेत्रव्यतिरिक्तात् सकाशादुत्पादमुत्पत्तिमासादयति स्म प्रापेत्यपि चित्रं। त्रिनेत्रादुत्पन्नोऽपि त्रिनेत्रादुत्पन्नो न भवतीत्याश्चर्यमित्यर्थः। अथ च त्रिनेत्रादुत्पन्नोऽप्यत्रेर्नेत्रादुत्पत्तिमापेत्येतदपि विरुद्धं। अथ च त्रिनेत्रो भूर्वसतिस्थानं यस्य तादृशः, तथाऽत्रेर्मुनेर्नेत्राच्चिषमाश्चर्यरूपमुत्पादं प्रापेति विरोधपरिहारः। यद्वा सौन्दर्यमाश्चर्यमाश्चर्यं, कुहस्य मायात्म्यस्थानेन चन्द्रस्य वर्णितं।।चन्द्रस्यात्रिनेत्रसमुद्भवत्वं पुराणप्रसिद्धम् ॥ ७५ ॥

इज्येव देवव्रजभोज्यऋद्धिः
शुद्धा सुधादीधितिमण्डलीयं।
हिंसां यथा सैव तथाऽङ्गमेषा
कलङ्कमेकं मलिनं बिभर्त्ति ॥ ७६ ॥
एकः पिपासुः प्रवहानिलस्य
च्युतो रथाद्वाहनरङ्कुरेषः।

इज्येति। देवानां व्रजैः समूहैर्भोज्या पेया ऋद्धिः समृद्धिर्यस्याः सा शुद्धा धवला इयं सुधादीधितेरमृतकरस्य मण्डली इज्येव याग इव शोभत इति शेषः। इज्याऽपि देवव्रजभोज्यचरुपुरोडाशादिसमृद्धिशुद्धा पवित्रा च भवति। तथैषा चन्द्रमण्डली कलङ्काख्यमेकं मध्यवर्त्तिनमङ्गमवयवं मलिनाकारं तथा बिभर्त्ति। यथा सैवेज्यैव पूर्वोक्तगुणविशिष्टा सत्यपि एकं हिंसां पशुहिंसात्मकमङ्गं कर्मसाधनं मलिनं पातकहेतुभूतं बिभर्त्ति। परोपकारशीलायाः सर्वात्मना शुद्धाया अपि चन्द्रमण्डल्या दैवादेकमङ्गं मलिनं जातमित्यर्थः। यागे हि हिंसामात्रमेव मालिन्यं। मुधाऽङ्गमिति पाठे कलङ्करूपमेकमङ्गं मलिनं मुधा वृथैव बिभर्त्ति, शुद्धाया मालिन्ययोगस्यानौचित्यादित्यर्थः। शुद्धस्यापि श्रौतधर्मस्य साङ्ख्यैर्दोषारोपणान्मालिन्यं मुधैवेत्यर्थः। इज्या यजयजोः (पा० ३।३।९८) इति क्यप्॥ ७६ ॥

एक इति। एष मृगाङ्को दृश्यमानः प्रसिद्ध एकः पिपासुः तृष्णाक्रान्तः सप्तवायुस्कन्धमध्यवर्त्तिनः प्रवहाख्यस्यानिलस्य

अस्त्यम्बरेऽनम्बुनि लेलिहास्यः
पिबन्नमुष्यामृतबिन्दुवृन्दं ॥ ७७ ॥
अस्मिन् शिशौ न स्थित एव रङ्कु-
र्यूनि प्रियाभिर्विहितोपदाऽयं ।

मृगवाहनस्य गगनचारिणो रथच्युतो वाहनभूतो रङ्कुर्मृगोऽनम्बुनि निर्जलेऽम्बरे लेलिहास्यो नितरां पौनःपुन्येन वा स्वादनकारि मुखं यस्य तादृशो भवन्नमुष्य चन्द्रस्यामृतबिन्दुवृन्दं पिबन् सन्नस्ति। तृष्णाक्रान्तो रथं परित्यज्य पतितो निर्जलेऽपि गगने चन्द्रामृतबिन्दुमास्वादयन् वायुवाहनमृग एवायं, न तु कश्चित् कलङ्कमृगो नामेत्यर्थः। अस्तीति वर्त्तमानप्रत्ययेनामृतास्वादनेन चन्द्रं परित्यज्य गन्तुमशक्तोऽधुनाऽपि वर्त्तत इति सूचितम्। एवमन्योऽपि तृष्णाक्रान्तो निर्जले देशे प्रस्रवणादेः पतज्जलबिन्दुवृन्दं पिबन्ननुपशान्तपिपासो लेलिहास्यः संस्तत्रैव चिरं तिष्ठति। सप्तवायुस्कन्धाः पुराणप्रसिद्धाः। लेलिहेति नितरां पुनः पुनर्वा लेढीत्यर्थे यङि पचाद्यचि यङोऽचि चेति (पा० २।४।७४) यङो लुक् ॥ ७७ ॥

अस्मिन्निति। शिशौ बाले एककलात्मकेऽस्मिंश्चन्द्रे रङ्कुर्मृगो न स्थितो नाधीदेव तस्यां दशायामदर्शनात्, किन्तु प्रियाभिरोषधीभिर्यूनि तद्रूपे पूर्णावयवेऽस्मिंश्चन्द्रेऽयं रङ्कुरुपदेव विहिता प्रेषिता। कीदृशी। अरण्ये भवः शब्द्यते प्रख्याप्यते सन्देशस्तद्रूपा। अरण्यभवानां सन्देशरूपा वा। यच भवत्प्रिया निर्जने वने

आरण्यसन्देश इवौषधीभि-
रङ्के स शङ्के विधिना न्यधायि ॥ ७८ ॥
अस्यैव सेवार्थमुपागतानां-
मास्वादयन् पल्लवमोषधीनाम्।
धयन्नमुष्यैव सुधाजलानि
सुखं वसत्येष कलङ्करङ्कुः ॥ ७९ ॥

मृगैः सह वसामस्त्वं तु स्वर्गे विजयी सुखेन वर्तस इति गूढार्थोपलम्भसूचिकेति यावत्। अनन्तरं विधुना प्रेयसीसन्देशरूपः स रङ्कुरङ्के मध्येऽस्य चोत्सङ्गे प्रियाप्रेमभरेण न्यधायि, स्थापित इत्यहं शङ्के। अन्याऽपि प्रिया तरुणं प्रियं प्रति किञ्चित् सन्देशमुपदारूपेण प्रेषयति, स च तत् हृदयादौ धारयति। ओषध्यो हि वनवासिन्यः तदनुरूपमेव सन्देशं मृगं स्वप्रिये चन्द्रे प्रेषितवत्यः। आरण्यसन्देश इवायमुपदा प्रहितेति वा। यदेति पाठे यदाप्रभृति प्रेषितस्तदाप्रभृति तारुण्यदशायां चन्द्रेणायमङ्के न्यधायि, न तु पूर्वमित्यर्थः। आरण्येति भवार्थेऽण् ॥ ७८ ॥

अस्येति। एष कलङ्करङ्कुर्विरहपीडितत्वादस्यैव चन्द्रस्य सेवार्थमुपगतानामोषधीनां पल्लवमास्वादयन्, तथाऽमुष्यैव सुधारूपाणि जलानि धयन् पिबन् सुखमनायासलब्धवृत्तिरिव वसति, आहारलोभाच्चैव वसतीत्यर्थः। अन्योऽपि मृगो जलकिशलययुते देशे सुखेन वसति कदाचिदपि न त्यजति। पल्लवं जात्येकवचनं ॥ ७९ ॥

रुद्रेषुविद्रावितमार्त्तमारा-
त्तारामृगं व्योमनि वीक्ष्य बिभ्यत्।
मन्येऽयमन्यः शरणं विवेश
मत्वेशचूडामणिमिन्दुमेणः ॥ ८० ॥
पृष्ठेऽपि किं तिष्ठति नाथ नाथ-
रङ्कुर्विधोरङ्क इवेति शङ्का।

रुद्रेति। दक्षयज्ञे वीरभद्रावतारस्य रुद्रस्येषुणा विद्रावितं, अत एवार्त्तं ताराख्यं मृगं व्योमनि आरात् समीपे दूरे वा वीक्ष्य बिभ्यत् त्रस्यन्नयमन्योऽपरो मृग इन्दुमीशस्य चूडामणिं मत्वा शरणं विवेश, शिवेन शिरसि स्थापितत्वादयं मान्य इत्येतदाश्रयेण रुद्रान्मामयं रक्षिष्यत्येवेत्याशयेनान्यो मृगश्चन्द्रं शरणं प्रविष्ट इत्यर्थः, इत्यहं मन्ये। अन्यः सजातीयं कस्माचिद्भीतं दृष्ट्वा स्वयमपि भीतःसन् कमपि शरणं याति। गत्वेत्यपिपाठः। तारामृगस्य रुद्रेषु द्रावणं काशीखण्डादौ ज्ञातव्यं ॥ ८० ॥

पृष्ठ इति। हे नाथ विधोरङ्क इव यथा चन्द्रस्योत्सङ्गे कलङ्कमृगो वर्त्तते तथा रङ्कुः पृष्ठेऽपि पश्चाद्भागेऽपि किं तिष्ठति, अथ न तिष्ठति इति तवाशङ्का चेद्वर्त्तत इति शेषः, तर्हि त्वं तत्त्वाय याथार्थ्यज्ञानार्थं स्वे निजे मुखे एव विषये तिष्ठस्व निजमुखमेव निर्णयं पृच्छेत्यर्थः। यत्तन्मुखं दैर्घ्ये समानशोभाभिलाषाद् दिरथसन्निभिनि द्वन्द्वयुद्धेऽस्य त्वन्मुखाद्भज्यमानत्वात पलायमानस्य चन्द्रस्य पृष्ठं पश्चाद्भागमपश्यत् तस्मात् तत्

तत्त्वाय तिष्ठस्व मुखे स्व एव
यद्द्वैरथे पृष्ठमपश्यदस्य ॥ ८१ ॥
उत्तानमेवास्य वलक्षकुक्षिं
देवस्य युक्तिः शशमङ्कमाह ।
तेनाधिकं देवगवेष्वपि स्वां
श्रद्धालुरुत्तानगतौ श्रुतायां ॥ ८२ ॥

स्वमुखमेव निर्वर्त्तलेन पृच्छेत्यर्थः । त्वन्मुखचन्द्रादधिकमिति भङ्ग्या नलमुखवर्णनं कृतं। तत्त्वाय तत्त्वं ज्ञातुं क्रियार्थोपपदेति (पा० २।३।१४) तादर्थ्यमात्रे वा चतुर्थी । तिष्ठस्व स्थेयाख्यायां तङ्। स्वे वैकल्पिकत्वात् स्मिन्भावः ॥ ८१ ॥

उत्तानमिति। युक्तिरर्थापत्तिरनुमानं वाऽस्य देवस्य चन्द्रस्य मध्यवर्त्तिनमङ्कं कलङ्करूपं शशमुत्तानं स्वर्गसम्मुखमस्मदादिदृश्यमानपृष्ठभागमाह ब्रूते यतो वलक्षकुक्षिं धवलोदरं। यद्ययं शशकोऽस्मत्सम्मुखोदरोऽनुत्तानो भविष्यत् तर्हि मध्यवर्त्तिशशकोदरस्य धवलत्वाच्चन्द्रमध्यभागोऽपि धवलोऽभविष्यत्, न च तथा दृश्यते, किन्तु मलिनः, तस्मादुत्तान एव शशकश्चन्द्रेऽस्तीति युक्तिराहेत्यर्थः । तेन चन्द्रशशकनिश्चितोत्तानत्वेनैव हेतुनाऽहं देवगवेष्वपि सुरभीप्रभृतिषु विषये वेदे श्रुतायामुत्तानगतौ सुरलोकसम्मुखचरणतया गमने विषये पूर्वापेक्षयाऽधिकमतितरां श्रद्धालुरास्तिक्ययुक्तः स्वां "उत्ताना वै देवगवाश्चरन्ति" इति श्रुतिर्न्यायोपपन्नार्थतया सत्यैवेत्यह-

दूरस्थितैर्वस्तुनि रक्तनीले
विलोक्यते केवलनीलिमा यत्।
शशस्य तिष्ठन्नपि पृष्ठलोम्नां
तन्नः परोक्षः खलु रागभागः ॥ ८३ ॥
भङ्क्त्वम्भुर्व्याकरणस्य दर्प-
स्पद्प्रयोगाध्वनि लोक एषः।

मिदानीमधिकं मन्य इत्यर्थः। देवगवेषु गारतद्धितलुकीति (पा॰५।४।९२) टच्। देवगवीष्विति पाठे टित्वात् ङीप् ॥ ८२ ॥

उक्तरीत्योत्तानगतौ सिद्धायामपि शशकस्य रक्तपृष्ठत्वान्नीलत्वेन प्रतीतिः कथमित्यत आह। दूरेति। दूरस्थितैर्द्रष्टृभी रक्तनीले मिश्रितोभयवर्णे वस्तुनि केवलत्यक्तरागभागो नीलिमैव यद्यस्मादिलोक्यते तत् तस्मात् कारणाच्छशस्य पृष्ठवर्त्तिरोम्णां तिष्ठन्नपि रागभागो रक्तिमांशो नोऽस्माकमतिदूरस्थितानां खलु निश्चितं परोक्षो दृग्गोचरो न भवति, किन्तु नीलिमैव दृश्यत इत्यर्थः। तिष्ठन् वर्त्तमानोऽपि परोक्ष इति विरोधाभासः। दूरस्थत्वान्न दृश्यत इति तत्परिहारः। खलूत्प्रेक्षायां वा ॥ ८३ ॥

भङ्क्त्वेति। एष कविलोकः पदानां सुप्तिङन्तानां प्रयोगाध्वनि विषये व्याकरणस्य प्रकृतिप्रत्ययविभागपूर्वं शब्दव्युत्पादनकारिणः शास्त्रस्य मदधीन एव सकलशब्दप्रयोग इति

शशो यदस्यास्ति शशी ततोऽय-
मेवं मृगोऽस्यास्ति मृगीति नोक्तः ॥ ८४ ॥
यावन्तमिन्दुम्प्रतिपत् प्रसूते
प्रासावि तावानयमब्धिनाऽपि ।

दर्पं गर्वं, यदा लक्षणया वैयाकरणस्य व्याकरणाधीन एव सकलशब्दप्रयोग इति गर्वं भङ्क्तुं त्याजयितुं प्रभुः समर्थः। यद्यस्माद्धेतोरयं चन्द्रः शशोऽस्यास्तीति ततो हेतोः शशी यथोक्तः, लोकेनेति शेषः। एवममुनैव प्रकारेण मृगोऽस्यास्तीति मृगीति नोक्तः। शशोऽस्यास्तीति मतुबर्थेऽत इनिठनौ (पा० ५।२।११५) इतीनौ यथायं शशीत्युच्यते तथा तेनैव सूत्रेण मृगोऽस्यास्तीत्यत्र इनः प्राप्तौ सत्यामपि मृगीति नोक्तः, तस्मादतिव्याप्त्यादिदोषाद् व्याकरणमूल एव लोकप्रयोग इति नियमो न युक्तः किन्तु कृत्तद्धितसमासानामभिधानं नियामकमिति। लक्ष्यमुद्दिश्य लक्षणप्रवृत्तिर्न तु लक्षणमुद्दिश्य लक्ष्यप्रवृत्तिरिति, तस्मात् प्रयोगमूलं व्याकरणमिति व्याकरणाल्लोक एव प्रयोग एव बलीयानिति भावः। अप्रस्तुतप्रशंसा ॥ ८४ ॥

यावन्तमिति। प्रतिपद् यावन्तं यत्प्रमाणमेककलमिन्दुं प्रसूते, अब्धिनाऽपि तावांस्तत्प्रमाण एककल एवायं प्रासावि न तु पूर्ण इत्यर्थः। एतत् कथं ज्ञातमित्यत आह। 'तत्काल' तस्मिन् काले समुद्रादुत्पत्तेरवसर एव ईशेन मूर्ध्नि

तत्कालमीशेन धृतस्य मूर्द्धि
विधेरणीयस्त्वमिहास्ति लिङ्गं ॥ ८५ ॥
आरोप्यते चेदिह केतकत्व-
मिन्दौ दलाकारकलाकलापे।
तत् संवदत्यङ्कमृगस्य नाभि-
कस्तूरिका सौरभवासनाभिः ॥ ८६ ॥

धृतस्य विधेरणीयस्त्वं नितरां कार्श्यमेवैकैककलत्वे लिङ्गं ज्ञापकमनुमापको हेतुरस्ति। यदि समुद्रेण सम्पूर्णोऽयमजनयिष्यत् तर्हि शिवेनापि तदानीमेव शिरसि तावानेवाधास्यत्, न तु तथा, तस्मात् प्रतिपदा एककलप्रसूतः तावान् समुद्रेणापीति। प्रतिपदुत्पन्नोऽप्ययमेककललादेव न दृश्यत इति भावः ॥ ८५ ॥

आरोप्यत इति। केतकत्वमिह इन्दौ चेद् यदि आरोप्यते किम्भूते दलाकारः केतकीपत्रसदृशो धवलः कलानां कलापः समूहो यस्य तस्मिन् केतकदलवच्छुभ्रकलापत्वाच्चन्द्रः केतकमेवेति यदि रूप्येत तत् तर्हि अङ्कमृगस्य मृगत्वेन नाभि-, कस्तूरिका कर्त्री आरोपितं तत्केतकत्वं कर्म्मभूतं सौरभवासनाभिः छत्वा संवदति। चन्द्रे केतकत्वं युक्तमित्यनुमन्यत इत्यर्थः। नाभिरिति पाठे, अङ्कमृगस्य नाभिः कर्त्री कस्तूरिकासम्बन्धीभिः सौरभवासनाभिः छत्वा संवदतीति वा। केतक्यां कस्तूरीपरिमलो वर्त्तते, चन्द्रे च कलङ्कमृगनाभिरूपा कस्तूरी वर्त्तते, तस्माच्चन्द्रे केतकत्वमारोपयितुं युक्तमित्यर्थः।

आसीद् यथाज्योतिषमेव गोलः
शशी समचं चिपिटस्ततोऽभूत्।
स्वर्भानुदंष्ट्रायुगयन्त्रकृष्ट-
पीयूषपिण्याकदशावशेषः ॥ ८७ ॥

तत्केतकलमङ्गमस्य नाभिकस्तूरिकायाः परिमलस्य वासनाभिः सङ्क्रमणैः छला संवदति युक्त्या संवादं प्राप्नोत्येति वा। ताभिरिति पाठे, अतिप्रसिद्धाभिर्वासनाभिरित्यर्थः ॥ ८६ ॥

आसीदिति। एष शशी यथाज्योतिषं गर्गादिप्रणीतग्रहगणितशास्त्रानतिक्रमेण गोलो नारिकेलफलवद्वर्तुलोपरितनभाग एव पूर्व्वमासीत्, तर्हीदानीं कथमन्यथा दृश्यत इत्याशङ्क्याह। ततोऽनन्तरं कालक्रमेण स्वर्भानो राहोरूर्द्धाधोभागस्थितदंष्ट्रायुगमेव यन्त्रं निष्पीडनचक्रं तेन कृष्टं निष्कृष्य गृहीतं पीयूषममृतं यस्य यस्माद्वा स चासौ पिण्याकदृशो गृहीतरसनीरसतिलादिपिण्डीमात्ररूपोऽवशेष उद्धृतो भागो यस्य एवम्भूतः सन् चिपिटः पर्यटप्रायोऽभूदिति समचमिदानीं प्रत्यक्षेणानुभूयत एवेत्यर्थः। ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषं, अधिकृत्य कृते ग्रन्थे (पा० ४।३।८७) इत्यण्। ततो यथार्थेऽव्ययीभावः। ज्योतिःशास्त्रे चयोदशाङ्गुलश्चन्द्रः षोडशाङ्गुलसूर्य्यस्याधोभागस्थो जलपूर्णकाचकूपिकाप्रायो यथोदितस्तथैव पूर्व्वमासीदित्युक्तं ॥ ८७ ॥

असावसाम्यादितनोः सखा नो
कर्पूरमिन्दुः खलु तस्य मित्रं।
दग्धौ हि तौ द्वावपि पूर्व्वरूपाद्
यद्वीर्य्यवत्तामधिकां दधाते॥ ८८॥

असाविति। असौ चन्द्रो वितनोरनङ्गस्य सखा नो भवति। कुतः। असाम्यादसादृश्यात्। "विवाहमैत्रवैराणि भवन्ति समशीलयोः" इति शास्त्रादनयोः साङ्गानङ्गयोः सादृश्याभावान् मैत्री न सङ्गच्छत इत्यर्थः। तर्हि अनयोर्लोकप्रसिद्धा मैत्री कथमित्यत आह। खलु निश्चितं कर्पूरापरनामैवेन्दुस्तस्यानङ्गस्य मित्रं तावतैव लोकप्रसिद्धिविरोधाभाव इत्यर्थः। तत्र हेतुमाह। यत् यस्मात् तौ द्वावपि कामकर्पूरौ दग्धौ सन्तौ पूर्व्वरूपाद्दग्धदशायाः सकाशादधिकां वीर्य्यवत्तां हि स्फुटं दधाते। पक्वो हि कर्पूरो वीर्य्यवत्तरो भवति। कामोऽपि दाहानन्तरं अधिकं वीर्य्यवान् अनुभूयते। तदुक्तं,

"कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने।
नमोऽस्त्ववारवीर्य्याय तस्मै कुसुमधन्वने"॥

इति। तस्मात् कामकर्पूरयोर्मैत्री युक्ता। घनसारचन्द्रसञ्ज्ञ इतिघण्टुः। कर्पूरमस्त्रियामित्यमरवचनात् कर्पूरशब्दो नपुंसकोऽपि॥ ८८॥

स्थाने विधोर्वा मदनस्य सख्यं
स शम्भुनेत्रे ज्वलति प्रलीनः।
अयं लयं गच्छति दर्शभाजि
भास्वन्मये चक्षुषि चादिपुंसः ॥ ८८ ॥
नेत्रारविन्दत्वमगान्मृगाङ्कः
पुरा पुराणस्य यदेष पुंसः।

स्थान इति। वाऽथवा विधोर्मदनस्य सख्यं स्थाने युक्तमेवेत्यर्थः। तत्रायं हेतुः। स कामः ज्वलति दीप्यमाने शम्भुनेत्रे प्रलीनः प्रकर्षेण लीन एकतां गतः प्रलयं गतो विनष्ट इत्यर्थः। अयं चन्द्रश्च दर्शभाजि दर्शनं दर्शसञ्ज्ञावारयुक्तेऽथ चामावास्यां गते भास्वन्मये सूर्यरूपे आदिपुंसो विष्णोश्चक्षुषि लयमेकतां गच्छति। दर्शे हि चन्द्रः सूर्यं गच्छति अत एव दर्शस्य सूर्येन्दुसङ्गम इति नाम। सूर्यो विष्णोर्दक्षिणचक्षुः, तथा च तुल्ययोर्हरिहरयोर्नेत्रयोर्द्वयोरपि चन्द्रकामयोः प्रलीनत्वाद्दर्शे चन्द्रस्याप्यनङ्गतया च समशीलत्वादुचितैव मैत्रीत्यर्थः। तथा च कामस्य चन्द्रसखिताप्रसिद्धिर्मुख्यैवसुक्तेति भावः॥ ८८॥

नेत्रेति। पुरा पूर्वं यदा यस्मिन् काले एष मृगाङ्कः पुराणस्य पुंसः श्रीविष्णोर्नेत्रारविन्दत्वं नयनकमलत्वमगात्, तदानीं तस्मिन् कालेऽस्य विष्णुनेत्रारविन्दभूतस्यास्य चन्द्रस्यायमङ्कः कलङ्क एव कनीनिकाया इन्दीन्दिरस्य भ्रमरस्य सुन्दरमगात् प्रायात्। अदादिति पाठे, अयं श्रीविष्णुरस्य चन्द्रस्याङ्के

अस्याङ्क एवायमगात् तदानीं
कनीनिकेन्दीन्दिरसुन्दरत्वं ॥ ९० ॥
देवेन तेनैष च काश्यपिश्च
साम्यं समीच्योभयपक्षभाजौ।
द्विजाधिराजौ हरिणाश्रितौ च
युक्तं नियुक्तौ नयनक्रियायां ॥ ९१ ॥

विषये कनीनिकेन्दीन्दिरसुन्दरत्वमदात्। नेत्रे हि कनीनिकया भाव्यं, अरविन्दे च भ्रमरेण, तथा चास्य नेत्रारविन्दरूपत्वादङ्कमेवोभयं श्रीविष्णुः कृतवानित्यर्थः। अङ्क एव कनीनिका कर्त्री भ्रमरेण सुन्दरत्वमस्यादादिति वा। इन्दीन्दिरालिषट्चरणचञ्चरीकालिनो द्विरेफाः स्युरिति हलायुधः ॥ ९० ॥

देवेनेति। तेन देवेन श्रीविष्णुनैव चन्द्रः काश्यपिर्गरुडश्चैतौ द्वावपि साम्यं समानधर्मतां समीक्ष्य तुल्यायां नयनक्रियायां क्रमेण नेत्रव्यापारे वाहनव्यापारे च यन्नियुक्तौ तद् युक्तमुचितमित्यर्थः। चावन्योन्यसमुच्चये। साम्यमेवाह। उभयपक्षौ शुक्लपक्षकृष्णपक्षौ भजति चन्द्रः। गरुडस्तु द्वौ पक्षौ छदौ भजति। तादृशौ द्वावपि। तथा द्विजानां ब्राह्मणानां राजा चन्द्रः। गरुडस्तु पक्षिणां राजा तादृशौ। तथा हरिणेन कलङ्कमृगेणाश्रितश्चन्द्रः। गरुडस्तु हरिणा विष्णुना वहनार्थमाश्रितः। तादृशौ। एवमुभयोः साम्यात् समे एव व्यापारे नियुक्तौ। तदुचितं कृतमिति भावः। काश्यपिः। वाज्यादित्यादिष्ट् ॥ ९१ ॥

येरन्वमायि ज्वलनस्तुषारे
सरोजिनीदाहविकारहेतोः।
तदीयधूमौघतया हिमांशौ
शङ्के कलङ्कोऽपि समर्थितस्तैः ॥ ९२ ॥
खेदस्य धाराभिरिवापगाभि-
र्व्याप्ता जगद्भारपरिश्रमार्त्ता।
छायापदेशाद्वसुधा निमज्ज्य
सुधाम्बुधावुज्झति खेदमत्र ॥ ९३ ॥

येरिति। यैः पण्डितैः सरोजिन्या दाहरूपाद्विकाराद्धेतोः तुषारे हिमे ज्वलनोऽग्निरन्वमायि, तुषारः साग्निर्भवितुमर्हति सम्बन्धे सति दाहकारित्वात् साग्निहृदेशवत् तप्तोदकवद्वेति हिमे विषये वह्निरनुमित इत्यर्थः, तैः पण्डितैर्हिमांशौ तुषारमये चन्द्रे वर्त्तमानः कलङ्कोऽपि तदीयधूमौघतया हिमाग्निसम्बन्धिधूमसमूहरूपत्वेन समर्थित इत्यहं शङ्के। वह्नौ हि धूमेन भाव्यं चन्द्रस्य तुषारमयत्वादुक्तरीत्या वह्निमान्, तथा च कलङ्को धूमसमूह एवेति तैः समर्थितमित्यहं सम्भावयामीत्यर्थः ॥९२॥

खेदस्येति। वसुधा छायापदेशात् स्वीयप्रतिबिम्बव्याजेन सुधाम्बुधावत्र चन्द्रे निमज्ज्यान्तःप्रविश्य खेदं जगद्भारपरिश्रमपीडामुज्झतीव। किम्भूता। जगद्भारवहननिमित्तः परिश्रमः तेनार्त्ता नितरां पीडीताऽत एव खेदस्य धाराभिरिवापगा-

ममानुमैवं बहुकालनीले-
निपातनीलः खलु हेमशैलः।
इन्दोर्जगच्छायमयेऽन्यथाऽङ्के
पीतो विभागः प्रतिबिम्बितः स्यात्॥ ९४॥

भिर्व्याप्ता समन्तात् पूरिता। अमृतसमुद्रनिमज्जने हि खेदो गच्छत्येव यस्माच्च तत्तन्नदीरूपः खेदः तस्याः अमरैरणे सुधासमुद्र एव उचित। एतेन कलङ्कस्य मृगशशभूच्छायप्रभृतिमतभेदा वर्णिताः॥ ९३॥

ममेति। हेमशैलो मेरुः खलु निश्चितं सर्गमारभ्याद्ययावदतिक्रान्तेन बहुना कालेन हला नीलीनीपातः श्यामिकालगन तेन हला नीलो बहुकालीनलान्नीलमलसम्बन्धान्नीलवर्णः स जात एवम्प्रकारा ममानुमाऽनुमानमेवमहं सम्भावयामीत्यर्थः। अन्यथा यदि स्वर्णाचलः कालभूयस्त्वेन न नीलीभूतः किन्तु हेममयत्वात् पीत एव स्यात्, तर्हि इन्दोर्जगच्छायमये जगत्प्रतिबिम्बभूते कलङ्करूपे प्रतीकेऽवयवे मेरोः पीतोऽपि भागः प्रतिबिम्बितः स्यात् पीतोऽंशो दृश्येत, तस्मात् स्वर्णाचलो नील एव जातस्तया च सकलाया अपि भूमेर्नीलवर्णत्वात् तत्प्रतिबिम्बरूपः कलङ्कोऽपि नील एव युक्त इत्यर्थः। जगच्छायेति विभाषासेनेति (पा० २।४।२५) षण्डत्वं ॥ ९४॥

माऽवापदुन्निद्रसरोजपूजा-
श्रियं शशी पद्मनिमीलितेजाः ।
अचिद्वयेनैव निजाङ्करङ्को-
रलङ्कृतस्तामयमेति मन्ये ॥ ९५ ॥

य एष जागर्त्ति शशः शशाङ्के
बुधो विधत्ते क इवात्र चित्रं ।
अन्तः किलैतत् पितुरम्बुराशे-
रासीत् तुरङ्गोऽपि मतङ्गजोऽपि ॥ ९६ ॥

मेति। शशी उन्निद्रैर्विकसितैः सरोजैः कृता या पूजा तज्ज-निताां श्रियं माऽवापत् मा स्म लभत यतः पद्मनिमीलि कमल-सङ्कोचकं तेजो यस्य सः। विकसितानामपि कमलानां पूजार्थं चन्द्रसविधे क्रियमाणानां चन्द्रतेजसा सङ्कोचस्यैव सम्भवादुन्निद्र-सरोजपूजाश्रियं कथं प्राप्नोति। प्रकारान्तरेण प्राप्नोतीत्याह निजाङ्कभूतस्य रङ्कोर्मृगस्याचिद्वयेनैवालङ्कृतोऽयं चन्द्रः तामु-न्निद्रपूजाश्रियमेति प्राप्नोति, तन्नयनयोरुन्निद्रकमलरूपत्वादि-त्यहं मन्ये। अङ्कमृगनेत्राभ्यां कृत्वाऽयं चन्द्रो विकसितकमलाभ्यां पूजामिव शोभां प्राप्नोतीति भावः, इति वा ॥ ९५ ॥

य इति। य एष प्रत्यक्षदृश्यः शशः शशाङ्के जागर्त्ति स्फुरति, अत्र विषये क इव बुधश्चित्रमाश्चर्यं विधत्ते, अपि तु न कोऽपि। किन्तु यस्मादेतत्पितुरम्बुराशेरन्तर्मध्ये उच्चैःश्रवसञ्ज्ञकस्तुर-ङ्गोऽप्यासीदैरावताख्यो मतङ्गजोऽप्यासीत्। यदीयपितुर्मध्ये

गौरे प्रिये भातितमां तमिस्रा
ज्यौत्स्नी च नीले दयिता यदस्मिन्।
शोभातिलोभादुभयोस्तयोर्वा
सितासितां मूर्त्तिमयं बिभर्त्ति ॥ ९७ ॥
वर्षातपानावरणं चिराय
काष्ठौघमालम्ब्य समुत्थितेषु।

ऽश्वगजादिकं भवति तदीयपुत्रमध्ये शशस्याचसम्भवे किमाश्चर्य्यमित्यर्थः ॥ ९६ ॥

गौर इति। तमिस्रा तमोवहुलाऽस्य दयिता रात्रिर्गौरे प्रिये चन्द्रे विषये भातितमां, तथा ज्यौत्स्नी च चन्द्रिकायुक्ता धवलाऽस्य दयिता रात्रिर्नीले प्राणेशेऽस्मिन् चन्द्रे नितरां शोभते भिन्नवर्णे हि शोभेत इत्यर्थः। तस्माद्धेतोस्तयोस्तमिस्राज्यौत्स्न्योरुभयोरपि विषये स्वस्य शोभाप्राप्तेर्विलोभादभिलाषात् तयोरेव पत्न्योर्या शोभाप्राप्तिस्तदभिलाषाद्धवलश्यामलसम्बन्धात् तमिस्राज्यौत्स्न्योः शोभया भवितव्यमित्यर्थः। अयं चन्द्रः सितासितां धवलां श्यामलाञ्च मूर्त्तिं कायं बिभर्त्तीव। वा इवार्थे। शोभातिलोभादिवेत्यन्वयः। नीलभागे ज्योत्स्नीं प्रियां धारयितुं, धवले च तामसीमिति यथासङ्ख्यं ॥ ९७ ॥

वर्षेति। अयं बालेषु तनुषु अविकसितेषु चेद प्रत्यग्रद्वयेषु (तारासु नक्षत्रेष्वेव) कवकेषु छत्राकेषु मध्ये चिरकालोत्पन्नत्वादिकिस्तरीभूतं विकसितमतिस्थूलमेकच्छत्राकमेव चन्द्रः

वालेषु ताराकवकेष्विवैकं
विकस्वरीभूतमवैमि चन्द्रं ॥ ९८ ॥
दिनावसाने तरणेरकस्मा-
न्निमज्जनादिश्वविलोचनानि ।
अस्य प्रसादादुडुपस्य नक्तं
तमोविपद्दीपवतीन्तरन्ति ॥ ९९ ॥

मवैमि मन्ये। किम्भूतेषु ताराकवकेषु । चिराय बहुकालं वर्षा-र्त्तौ आतपे ग्रीष्मर्त्तौ च वर्षेषु जलवृष्टिषु आतपेपूष्णेषु च सत्सु अनावरणमनाच्छादितं काष्ठैघन्दिकसमूहमेव दारुसमूहमा-लम्ब्य समुत्थितेषूत्पन्नेषु, वर्षाकाले ह्यनावृतेषु जलस्तिमितेषु पश्चादुष्णतमेषु च। काष्ठेषु सूक्ष्मस्थूलानि छत्राकानि भवन्ति तथा च तारा अल्पकवकानि भवन्ति, चन्द्रस्तु स्थूलकवकमिवे-त्युत्प्रेक्षा ॥ ९८ ॥

दिनेति । विश्वस्य जगतो विलोचनानि दिनावसाने तरणेः सूर्य्यस्याकस्मादसम्भावितहेतोर्निमज्जनात् प्रतीचीसागरनीर-प्रवेशाद्धेतोर्नक्तं रात्रौ तमोनिमित्तां स्खलनादिरूपां विपद-मेव दीपवतीं महानदीमस्योडुपस्य चन्द्रस्य प्रकाशरूपात् प्रसा-दात् तरन्ति, चन्द्रेण तमो निरस्य सर्व्वं प्रकाशितमिति भावः । अन्येऽपि रात्रौ तरणेर्नौकाया अकस्मान्मज्जनाद्धेतोर्वुडनरूपा-मापन्नदीमुडुपस्याकस्मादागतस्याल्पस्य यानपात्रस्य प्रसादात् तरन्ति ॥ ९९ ॥

किं नाक्षिण नोऽपि क्षणिकोऽणुरेषो ऽयं
भानोऽस्ति तेजोमयबिन्दुरिन्दुः ।
अत्रेस्तु नेत्रे घटते यदासी-
न्मासेन नाशी महतो महीयान् ॥ १०० ॥
त्रातुं पतिन्नौषधयः स्वशक्त्या
मन्त्रेण विप्रा क्षयिणं न शेकुः ।

किमिति । नोऽस्माकममहतां पामराणामपि अक्षिण नेत्रे विषये तेजोमयः तेजोरूपो बिन्दुरेवायमिन्दुरङ्गुल्या नयनप्रान्तचिपिटीकरणे धवलवर्त्तुलाकारेण भानः शोभमानः किं नास्ति अपि त्वस्मदादिनेत्रेऽपीन्दुर्वर्त्तत एव । अणुकोऽल्पीयांस्तथा क्षणिकः क्षणमात्रावस्थायी यावच्चिपिटीकरणमेव दृश्यत इत्यर्थः । तर्ह्यस्माच्चन्द्रात् तस्य वैलक्षण्यं कथमित्यत आह । अत्रेर्मुनेर्नेत्रे तु पुनस्तेजोमयबिन्दुरयमिन्दुर्महीयानितरापेक्षया नितरां महापरिमाण आसीत् । तथा मासेन कृत्वा नाशी मासावसानप्राप्तविनाशस्वाभूदिति यत् तद्घटते, एतद्युज्यत इत्यर्थः । यतो महतो महानुभावस्य । सर्वं हि महतां महदिति न्यायेन महतोऽत्रेर्नेत्रतेजोमयबिन्दुरप्ययमिन्दुर्महापरिमाणश्चिरकालस्थायी चेत्यस्मन्नेत्रतेजोमयबिन्दोरिन्दोर्वैलक्षण्यं युक्तमेवेति भावः । अणुकः, अल्प इति (पा० ५।३।८५) कन् । नाशी, अस्त्यर्थे इनिः ॥ १०० ॥

त्रातुमिति । मृतसञ्जीविन्यादय ओषधयः स्वशक्त्या स्वसा-

एनं पयोधिर्मणिभिर्न पुत्रं
सुधा प्रभावैर्न निजाश्रयं वा ॥ १०१ ॥
मृषा निशानायमहः सुधा वा
हरेदसौ वा न जराविनाशौ।

मर्थेन निजरसवीर्य्यविपाकाभ्यां कृत्वा श्रोषधीशत्वात् पतिमेनं चन्द्रं क्षयिणं प्रतिदिनं कलाक्षयवन्तमथ च क्षयरोगिणं सन्तं त्रातुं रक्षितुं न शेकुः। तथा विप्रा द्विजराजत्वान्निजं स्वामिनं क्षयिणं मन्त्रेण श्रुतिसामर्थ्येन कृत्वा रक्षितुं न शेकुः। तथा पयोधिरपि पुत्रं क्षयिणमेनं मणिभिरनेकप्रभावैरन्तरस्थै रत्नैः कृत्वा रक्षितुं न शशाकेति वचनपरिणामः। तथा सुधाऽपि स्वाधारभूतं क्षयिणमेनमजरामरत्वजनकैः प्रभावैः कृत्वा त्रातुं न शशाक, वा समुच्चये। श्रोषध्यादयः स्वशक्त्यादिरक्षणसाधने सत्यपि पतित्वात् प्रभुत्वात् पुत्रत्वान्निजाश्रयत्वाच्च क्षयाद्रक्षितुमर्हमप्येनं रक्षितुं समर्था न बभूवुरिति विशेषोक्त्या पूर्व्वकर्मजो रोगो नऔषधानुभावैरप्यपनेतुं न शक्यत इति व्यज्यते। अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति श्रोषध्यादीनां सामर्थ्यं प्रसिद्धं ॥ १०१ ॥

मृषेति। निशानायस्य चन्द्रस्य महः तेजः सुधा वा पीयूषरूपमेवेति लोकवादो मृषा असत्य एव भवेत्। वा अथ वा यदि चन्द्रतेजः सुधेति लोकप्रवादः सत्य एव तर्ह्यसौ चन्द्रतेजोरूपा सुधा जराविनाशौ जरामरणे न हरेद्विनाशयेत् चन्द्रतेजः सुधा नैवेत्यङ्गीकार्य्यं। अथ चैतद्रूपा सुधाऽपि जरा-

पीत्वा कथं नाऽपरथा चकोरा
विधोर्मरीचीनजरामराः स्युः ॥ १०२ ॥
वाणीभिराभिः परिपक्किमाभि-
र्नरेन्द्रमानन्दजडञ्चकार।
मुहूर्त्तमाश्चर्य्यरसेन भैमी
दैमीव वृष्टिस्तिमितञ्च तं सा ॥ १०३ ॥

मरणे नाशयतीत्यङ्गीकार्य्यमित्यर्थः। अपरथाऽन्यथा यदि चन्द्रतेजः सुधेति प्रवादः सत्यस्तद्रूपा सुधा जरामरणे विनाशयेत् तर्हि चकोराख्याः पक्षिणो विधोर्मरीचीन् पीत्वाऽपि कथं किमिति नाजरामराः स्युर्जरामरणरहिता भवेयुः। चन्द्रतेजःसुधात्वे एतस्याश्च सुधाया जरामरणविनाशे सामर्थ्यसद्भावे तत्पाने चकोरैरप्यजरामरैर्भाव्यं, न च ते तथा, तस्मात् तत्तेजसः सुधात्वं वा मृषा भवेत्। सुधाभूतस्यापि जरामरणापहारे सामर्थ्यं नास्तीत्येतदङ्गीकर्त्तव्यं, तथा सुधाऽभावेन निशाश्रयं वेति पूर्व्वश्लोकाशयसमाधानमित्याशयः। अजरामरोस्युरिति पाठे च्विः ॥ १०२ ॥

वाणीभिरिति। सा भैमी आभिः पूर्व्वोक्ताभिः परिपाकेन निर्वृत्ताभिः परिणतकवित्वशक्तितया प्रमादादिगुणयुक्ताभिर्वाणीभिः कृत्वा तं नरेन्द्रमानन्दजडं हर्षपरवशञ्चकार। तथा मुहूर्त्तमद्भुतापरनामाश्चर्य्यस्य रसेनाय च तद्रूपेण जलेन दैमीत्युपास्यमन्त्रिमी दृष्टिरिव भैमी स्तिमितमतिस्नेहात् प्रा-

इतो मुखाद्वागियमाविरासीत्
पीयूषधारामधुरेति जल्पन्।
अचुम्बदस्याः स मुखेन्दुबिम्बं
संवावदूकश्रियमम्बुजानां ॥ १०४ ॥

शस्त्रम् वाऽयचार्द्रञ्चकार हिमदृष्टिर्यथा अन्यं जडमार्द्रञ्च करोति तथेयमपि आनन्दजडं सातिखेदञ्च चकारेत्यर्थः। परिपक्तिमाभिः डिलान्निवृत्तेऽर्थे क्तिः, क्तेर्मम् ॥ १०३ ॥

इत इति। इत्येवं जल्पन्, वदन्, स नलोऽम्बुजानां संवावदूका नितरां संवादिनी श्रीर्यस्य तादृशं कमलतुल्यशोभमस्या मुखेन्दुबिम्बमचुम्बत्, चन्द्रकमलतुल्यं भैमीमुखं प्रीत्यतिशयादचुम्बदित्यर्थः। इति किं। हे भैमि, इयमुक्तप्रकारा पीयूषधारावन्मधुरा वागितः प्रत्यक्षदृश्याद्भवन्मुखादाविरासीन्निःसृतेति। इत इत्यनेन सामीप्याभिनयकारिणा करेण भैमीमुखं चिबुके धृतमिति ध्वन्यते। मुखस्येन्दुबिम्बत्वेन च पीयूषधारासम्बन्धौचिती सूच्यते। तथा च पीयूषधारया मधुरेत्यपि व्याख्येयं। संवावदूकेत्यादिना च भैम्याः पद्मिनीत्वं प्रसिद्धं। चन्द्रबिम्बस्य कमलैः सह विसंवादो विरोधित्वात्। एतन्मुखचन्द्रबिम्बस्य तु कमलैः सह संवादः कमलसौभाग्यभाक्त्वादित्यर्थः। प्रसिद्धचन्द्रबिम्बादेतन्मुखचन्द्रबिम्बमधिकमिति सूच्यते। भृशमर्थे संवदति संवावदूका सम्पूर्णोऽयं मैत्र्यां वर्त्तते ॥ १०४ ॥

प्रियेण साऽथ प्रियमेवमुक्ता
विदर्भभूमीपतिवंशमुक्ता ।
स्मितांशुजालं वितनान तारा
दिवः स्फुरन्तीव कृतावतारा ॥ १०५ ॥
स्ववर्णना न स्वयमर्हतीति
नियुज्य मां त्वन्मुखमिन्दुरूपं ।

प्रियेणेति। प्रियेण 'इतो मुखादित्यादिपूर्वोक्तरूपं प्रियवचनमुक्ता भाषिता विदर्भभूमीपतेर्वंशेन कुलेन मुक्ता जनिता, तथा स्फुरन्ती दीप्यमानकान्तिः सोल्लासा सा भैमी, अथ नलवचनानन्तरं स्मितांशुजालं वितताम, तदेव नलाय प्रीतिदानमिव ददावित्यर्थः । केव । दिवः सकाशात् क्षीणपुण्यतया स्वेच्छया वा कृतावतारा भूलोकमागता रोहिणी तारेव । स्फुरन्ती किरणजालं वितनारेति उत्प्रेक्षा, उपमा वा । वंशः कुलमेव वंशो वेणुस्तत्र जाता देवधार्य्या मुक्ता मौक्तिकरूपा । कृतावतारेत्यत्र तरणं तारः, ऋदोरप् (पा० ३।३।५७)। तदन्तात् अर्शआदित्वात् स्वार्थेऽणि, पश्चादवशब्देन सह सुपा (पा० २।१।४) इति समासः ॥ १०५ ॥

स्वेति। सा धरातुरासाहं भूमीन्द्रमित्याह स्म। इति किं। हे प्रिय, इन्दुरूपं त्वन्मुखमितिहेतोरिन्द्ररूपत्वेनात्मस्तुतो मां नियुज्याज्ञाप्य शशिनः प्रशस्तौ वर्णनविषयेऽत्युदासोऽतितरामुदासीनो भवसि, एतद्युक्तं युक्तं । हेतुमेवाह । इति किं "सतामेत-

स्थानेऽत्युदास्ते शशिनः प्रशस्तौ
धरातुरासाहमिति स्म साऽऽह ॥ १०६ ॥
तयेरितः प्राणसमः सुमुख्या
गिरं परीहासरसोत्किरां सः ।
भूलोकसारः स्मितभाक् तुषार-
भानुम्भणिष्यन् सुभगाम्बभाण ॥ १०७ ॥

इकर्त्तव्यं परनिन्दाऽऽत्मनः स्तुतिः" इत्यादिवचनात् स्वयमात्मनैव स्ववर्णना आत्मस्तुतिर्नार्हेति न युक्तेति। इयत्पर्य्यन्तं मया चन्द्रो वर्णित इदानीं त्वया वर्णनीयस्तूष्णींभावो युक्त इत्याशयेन भैमी चन्द्रस्तुतौ तं सोत्प्रासं प्रावर्त्तयदिति भावः। तुरासाहमित्यत्र तृतीयसर्गे धरातुरासाहेत्येतच्छ्लोकस्थाऽऽशङ्का ज्ञातव्या। तत्रोत्तरं। इन्दुरूपं त्वन्मुखं चन्द्ररूपात्मस्तुतौ मां नियुज्य शशिनः प्रशस्तौ अत्युदास्ते साऽहं धरावद्तुराऽनुत्तानवेगा वा पृथ्वीवद् गम्भीरेत्यर्थः। अर्थात् तमाह स्मेति ज्ञातव्यं ॥ १०६ ॥

तयेति। स भूलोके सारः श्रेष्ठतमो नलः स्मितवाक् तुषारभानुं चन्द्रं भणिष्यन् वर्णयिष्यन् सन् सुभगां सौभाग्यवतीं भैमीं बभाण। किम्भूतः। तया सुमुख्या भैम्या परीहासरसोत्किरामुद्भावयित्रीं गिरमीरित उक्तः। तया प्राणसमोऽतिप्रेयान्, तया चन्द्रवर्णने प्रेरितः सन् परीहासरसोत्किराङ्गिरं बभाणेति वा। उत्किरां, इगुपधेति (पा० ३।१।१३५) कः, पूर्व्वेण षष्ठीसमासः। भणिष्यन् हेतोर्लटःशता ॥ १०७ ॥

तवानने जातचरीं निपीय
गीतिन्तदाकर्णनलोलुपोऽयं।
हातुं न जातु स्पृहयत्यवैमि
विधुं मृगस्त्वद्वदनभ्रमेण॥ १०८॥
इन्दोर्भ्रमेणोपगमाय योग्ये
जिह्वा तवास्ये विधुवास्तुमन्तं।

तवेति। हे प्रिये, अयं मृगः, तवानने जातचरीभूतपूर्वां गीतिं स्वरमाधुरीं निपीय सादरमाकर्ण्येदानीमपि तस्या भवद्गीतेराकर्णनाय लोलुपोऽतितरां लुब्धोऽतिसादृश्यात् त्वद्वदनभ्रमेण विधुं हातुं जातु कदाचिदपि न स्पृहयतीत्यहमवैमि। मृगा हि गानप्रिया भवन्तीति चन्द्रं त्वन्मुखभ्रान्त्या त्यक्तुं नेच्छतीत्यहं शङ्के इत्यर्थः। जातचरी भूतपूर्व्वे चरट् (पा० ५। ३।५३) लोलुपः यङन्तात् पचाद्यचि, यङोचि चेति (पा० २।४। ७२) यङो लुक्॥ १०८॥

इन्दोरिति। अतिसादृश्यादिन्दुरेवेदमिति इन्दोर्भ्रमेण मृगस्योपगमाय योग्ये प्राप्तुमर्हे तवास्ये वर्त्तमाना जिह्वा कर्त्री गीत्या वर्णस्वरमाधुर्य्या कृत्वा विधुरूपं वास्तु वसतिगृहं तद्विद्यते यस्य तं विधुवास्तुमन्तं चन्द्रमध्यस्थमपि मृगं कर्षति। गितेर्मधुरतरत्वान्मृगस्य च प्रियगानत्वात् स्वसमीपमानयतीत्यर्थः। तदाकर्षणमाधनमुत्प्रेचते, वल्गता आगमिष्यतो मृगस्य वाशार्थं बन्धनं करिष्यता, नेचद्वयेन पाशीबभूवे किं, तद्रूपया मृग्धन-

गीत्या मृगं कर्षति वल्गता किं
पाशीबभूवे नयनद्वयेन॥ १०९ ॥
आप्यायनाद्वा रुचिभिः सुधांशोः
शैत्यात्तमःकाननजन्मनो वा।
यावन्निशायामथ घर्मदुःस्थ-
स्तावद् व्रजत्यह्नि न शब्दपान्थः॥ ११०॥

रज्ज्वा समाकर्षतीत्यर्थः। अन्याऽपि शवरी गीत्या मृगमाकृष्य पाशेन बध्नाति। भवन्मुखं निष्कलङ्कममृताधिकगीतियुक्तञ्च। चन्द्रस्तु सकलङ्क इति भावः। चन्द्रवर्णनावसरेऽपि मध्ये मध्ये भैमीमुखवर्णना अनुरागातिशयसूचनार्था। अयं श्लोकः क्षेपक इति केचित्॥ १०९॥

गगनस्थोऽपि मृगो भैमीमुखगीतिं कथमशृणोदित्याशङ्क्याह। आप्यायनादिति। शब्दरूपः पान्थो नित्यपथिको निशायां यावद् व्रजति तावदथ पश्चात् साकल्येन वाऽह्नि न गच्छति यस्माद्दिने घर्मेणातपेन दुःस्थः सन्तप्तः, तस्माद्दिनेऽल्पमेव गच्छतीत्यर्थः। रात्रौ दूरगमने हेतुमाह। सुधांशोरमृतरूपाभी रुचिभिराप्यायनादुज्जीवितवललाद्वा तम एव काननं वनं तस्माज्जन्म यस्य गाढान्धकारजाताच्छैत्याद्वा तेजसोऽभावे तमसः सम्भवादौष्ण्याभावाच्छैत्यं। अत एव रात्रौ बहु गच्छति दिने चोष्णे न, श्रान्त इव बहु न गच्छति। शब्दा हि स्वभावादतिदूरेऽपि श्रूयन्ते दिवा तु न तथा। पथिकोऽपि रात्रौ

दूरेऽपि तत्तावकगानपाना-
ल्लब्धावधिः स्वादुरसोपभोगे।
अवज्ञयैव क्षिपति क्षपायाः
पतिः खलु स्वान्यमृतानि भासः॥ १११॥
अस्मिन्न विस्मापयतेऽयमस्मा-
श्चक्षुर्बभूवैष यदादिपुंसः।

शैत्याद् दूरं गच्छति, दिने चाल्पं। दूरश्रवणप्रतिपादकोऽयं श्लोकः॥ ११०॥

दूरेऽपीति। हे प्रिये खलु निश्चितं क्षपायाः पतिश्चन्द्रो भासश्चन्द्रिका एव स्वान्यमृतानि क्षिपति, अधो मुञ्चति। किम्भूतः। दूरेऽपि अतितरां देशव्यवधानेऽपि तत्प्रसिद्धं मधुरतरं तावकं गानं तस्य पानात् सादरश्रवणाद्धेतोः स्वादुरसोपभोगे माधुर्यातिशयानुभवे विषये लब्धावधिः प्राप्तमर्यादः। उत्प्रेक्ष्यते। अवज्ञयेव अनुभूतभवद्गीतमाधुर्यापेक्षयाऽल्पमाधुर्यतयाऽवमाननयैवेत्यर्थः। अयं श्लोको भिन्न एव न तु युग्मं॥ १११॥

अस्मिन्निति। हे तन्वि एष चन्द्र आदिपुंसः श्रीविष्णोर्यदासं चक्षुर्बभूवेत्यस्मिन्नीचीभवने विषयेऽयं नीचभूतश्चन्द्रोऽस्मान्न विस्मापयते आश्चर्यं न प्रापयति। अत्रार्थेऽस्माकमाश्चर्यं न भवतीत्यर्थः। किल यस्माद्धेतोरक्षिनेत्रादुदितस्योत्पन्नस्यास्य तच्चक्षुर्भवनं कुलानुरूपं कुलोचितं स्वरूपं नेत्ररूपात् कारणाज्जातस्य नेत्रीभवनमुचितमेव तस्मादस्य पुराणपुरुषनेत्रीभवने न कि-

तदन्निर्नैनादुदितस्य तन्वि
कुलानुरूपं किल रूपमस्य ॥ ११२ ॥
आभिर्मृगेन्द्रोदरि कौमुदीभिः
क्षीरस्य धाराभिरिव क्षणेन।
अक्षालि नीलीरुचिरम्बरस्था
तमोमयीयं रजनीरजक्या ॥ ११३ ॥

च्चिदस्माकं चित्रमित्यर्थः। विस्मापयते नित्यं स्मयतेः (पा० ६।१।५७) इत्यात्वं, भीस्म्योर्हेतुभये (पा० १।३।६८) इति तङ्। अस्माच्छनान्तरापेक्षया वक्तुं ॥ ११२ ॥

आभिरिति। हे मृगेन्द्रोदरवत् कृशमुदरं यस्यास्तत्सम्बुद्धि रजन्येव रजकी तया क्षीरस्य दुग्धस्य धाराभिरेव दृश्यमानाभिर्धवलतराभिः कौमुदीभिः कृत्वाऽम्बरस्था तमोमयीयं नीली कज्जलवत् कालीरुचिः क्षणमात्रेणाक्षालि निरस्ता। रजक्या वसनस्था काली कान्तिर्दुग्धधाराभिः क्षणेन क्षाल्यते। तदुक्तं कलाकोषे।

तैलं घृतेन तच्चोष्णजलैर्दुग्धेन कज्जलं।
नाशयेदम्बरस्थं तु मलं क्षारेण शेमुषा ॥ इति ॥

चन्द्रिकादिभिर्गगनं निर्मलीकृतमिति भावः। मृगेन्द्रोदरी (पा० ४।१।५५) नासिकोदरेति ङीप्। अपधी प्राणिवाचित्वाभावान्नीलीति ङीप्समर्थनीयः। रजकी पुनः पित्वाङ्कीप् ॥ ११३ ॥

पयोमुचां मेचकिमानमुच्चै-
रुच्चाटयामास ऋतुः शरद्या।
अतारि वामोरु तयाऽपि किञ्चि-
न्न प्रोञ्छितुं लाञ्छनकालिमाऽस्य॥ ११४॥
एकादशैकादशरुद्रमौली-
नस्तं यतो यान्ति कलाः किमस्य।
प्रविश्य शेषाश्च भवन्ति पञ्च
पञ्चेषु तूणीमिषवोऽर्द्धचन्द्राः॥ ११५॥

पय इति। हे वामोरु या शरत् ऋतुः पयोमुचां मेघानां वर्षाकालीनमुच्चकैरतिशयितमपि मेचकीमानं कालिमानमुच्चाटयामास। तया कालिमापनयने दृष्टसामर्थ्यया शरदा यस्य चन्द्रस्य लाञ्छनरूपः कालिमा किञ्चिदल्पमपि प्रोञ्छितुं स्फोटयितुं नापारि। शरद्यपि चन्द्रे मलिनः कलङ्कोऽतितरां शोभत इति भावः। मेचकिमानं वर्णवाचित्वादिमनिच् ॥ ११४॥

एकेति। अस्तं यतो गच्छतोऽस्य चन्द्रस्यैकादश कला एकादशानां रुद्राणां मौलीन् प्रतियान्ति, किल गच्छन्तीव। शेषाः पञ्च कलास्तु पुनः पञ्चेषोः कामस्य तूणीमल्पमिषुधिं प्रविश्यार्द्धचन्द्राकारत्वादर्द्धचन्द्राख्या इषवो भवन्ति, विनाशसमयेऽप्ययं परोपकारनिरत इति ध्वन्यते। तूणी अल्पत्वविवक्षया स्त्रीत्वे गौरादित्वान्ङीप् ॥ ११५॥

निरन्तरत्वेन विधाय तन्वि
तारासहस्राणि यदि क्रियेत ।
सुधांशुरन्यः स कलङ्कमुक्त-
स्तदा त्वदास्यश्रियमाश्रयेत ॥ ११६ ॥
यत् पद्ममादित्सु नवाननीयां
कुरङ्गलक्ष्मा च मृगाक्षि लक्ष्मीं ।
एकार्थलिप्साकृत एष शङ्के
शशाङ्कपङ्केरुहयोर्विरोधः ॥ ११७ ॥

निरन्तरेति। हे तन्वि ताराणां नक्षत्राणां सहस्राणि निरन्तरत्वेनान्योन्यसम्बन्धतया विधायैकीकृत्य यदि अन्यः सुधांशुः क्रियेत, निर्मीयेत, तदा तर्हि स चन्द्रस्ताराणामकलङ्कत्वात् तन्मयत्वाच्च कलङ्केन मुक्तः सन् त्वदास्यस्य श्रियं शोभामाश्रयेत। क्रियानियतेरविवक्षितत्वाल्लुङ्भावः ॥ ११६ ॥

यदिति। हे मृगाक्षि यत् पद्मं तवाननीयां मुखसम्बन्धिनीं लक्ष्मीमादित्सु ग्रहीतुकामं कुरङ्गलक्ष्मा चन्द्रश्च तव मुखशोभां ग्रहीतुकामः तयोः शशाङ्कपङ्केरुहयोरेष विरोधः स त्वन्मुखशोभालक्षण एकोऽर्थस्तस्य लिप्साकृतः प्राप्तिवाञ्छानिमित्त एवेत्यहं शङ्के। एकद्रव्याभिलाषित्वेन विरोधः सुप्रसिद्धः। चन्द्रपद्मयोरपि विरोधः प्रसिद्ध एव। चन्द्रपद्माभ्यां सकाशात् ते मुखमधिकमिति भावः। आदित्सुः, चन्द्रपक्षे लिङ्गविपरिणामः। लक्ष्मीं, न लोकेति (पा०२।३।६९) षष्ठीनिषेधः ॥ ११७ ॥

लब्धं न लेखप्रभुणाऽपि पातुं
पीत्वा मुखेन्दोरधरामृतन्ते।
निपीय देवैर्विवशीकृतायां
घृणां विधोरस्य दधे सुधायां ॥११८॥

एनं स बिभ्रद्विधुमुत्तमाङ्गे
गिरीन्द्रपुत्रीपतिरोषधीशं।
अश्नाति घोरं विषमब्धिजन्म
धत्ते भुजङ्गञ्च विमुक्तशङ्कः ॥ ११९ ॥

लब्धमिति। हे प्रिये, अहं सर्व्वैरपि देवैर्विवशीकृतायां निःशेषं पीत्वा भुक्तशेषीकृतायामस्य विधोश्चन्द्रस्य सुधायां घृणां जुगुप्सां दधे धारयामि। किं कृत्वा। लेखानां देवानां प्रभुणेन्द्रेणापि पातुं न लब्धं, कृतप्रयत्नस्यापि तस्यावरणात् तेन दुष्प्रापं, केनाप्यनुच्छिष्टमित्यर्थः। ते मुखेन्दोरधररूपममृतं निपीय पीत्वा। चन्द्रसुधायाः सकाशात् त्वदधरामृतं स्वादुतरमिति भावः। अतोऽप्युच्छिष्टभोजने जुगुप्सां धारयतीत्यर्थः ॥११८॥

एनमिति। स गिरीन्द्रपुत्रीपतिः शम्भुरेनमोषधीशं विधुमुत्तमाङ्गे शिरसि बिभ्रद्धारयन् सन्, अब्धिजन्म समुद्रोत्पन्नं घोरं दारुणमपि विषमश्नाति, मुक्तशङ्को भुजङ्गं सर्पं वासुकिञ्च धत्ते। *अमोरप्युपकारकत्वेन पूज्यः, श्रेष्ठोऽयमिति भावः।* औषधिस्वामिनोऽस्य शिरसि धारणादेव निःशङ्कः विषं भक्षयति सर्पांश्च धारयतीत्युत्प्रेक्षा। भुजङ्ग जात्यभिप्रायेणैकवचनं ॥११९॥

नास्य द्विजेन्द्रस्य बभूव पश्य
दारान् गुरोर्यातवतोऽपि पातः।
प्रवृत्तयोऽप्यात्ममयप्रकाशान्
नघ्नन्ति न घ्नन्तिमदेहमाप्तान्॥ १२० ॥

नेति। हे प्रिये द्विजेन्द्रस्यास्य चन्द्रस्यास्य गुरोर्बृहस्पतेर्दारान् भार्य्यां यातवतोऽपि गुरुतल्पगामिनोऽपीत्यर्थः पातः स्वर्गाद् भ्रंशः, अथ च पातित्यं न बभूव पश्य। चित्रमेतद्विलोकयेत्यर्थः। अथ वा युक्तमेतत्। प्रवृत्तयो धर्म्माधर्म्महेतुकर्म्मारम्भा अपि आत्ममय आत्मस्वरूपमेव प्रकाशो येषां तान् प्रकाशान्तरनिरपेक्षान् प्रकाशस्वरूपान्, अथ च परमात्मैव प्रकाशो येषां तान् परमात्मस्वरूपातिरिक्तप्रकाशानभिज्ञान् स्वप्रकाशात्मवादिनो ब्रह्मज्ञानिनोऽन्तिमदेहं तेजोरूपशरीरं पूर्णतां वा प्राप्तान्, अथ चानन्तरभाविमोक्षत्वात् प्राचीनशरीरप्रवाहापेक्षया शेषशरीरं प्राप्तान् जीवन्मुक्तान् पुरुषान् हि यस्मान्न नघ्नन्ति शुभाशुभफलसम्बन्धेन न संबध्नन्तीत्यर्थः। तेषां तेजोविशेषेण प्रत्यवायो न विद्यत इति प्रामाणिकवचनात् तेजोरूपस्यास्य चन्द्रस्य पातो नाभूदिति युक्तमेव, नात्र चित्रमिति भावः। चन्द्रोऽप्यात्ममयप्रकाशः, अन्तिमदेहं सम्पूर्णतां प्राप्तः॥ १२० ॥

स्वधाकृतं यत् तनयैः पितृभ्यः
श्रद्धापवित्रं तिलचित्रमम्भः।
चन्द्रं पितृस्थानतयोपतस्थे
तदङ्करोचिः खचिता सुधेव ॥ १२१ ॥

पश्योच्चसौधस्थितिसौख्यलक्ष्ये
त्वं केलिकुल्याम्बुनि बिम्बमिन्दोः।
चिरं निमज्ज्येव सतः प्रियस्य
भ्रमेण यच्चुम्बति राजहंसी ॥ १२२ ॥

स्वधेति। तनयैः पुत्रैः श्रद्धया परलोकाखिलबुद्ध्या वितीर्णत्वात् पवित्रं कृष्णतिलैश्चित्रं मिश्रितं पितृभ्यः स्वधाकृतं यदम्भः पितृस्थानतया "चन्द्रो वै पितृलोकः" इति श्रुतेः। पितृलोकतया चन्द्रमुपतस्थे चन्द्रेण सङ्गतमभूदित्यर्थः। तत् कृष्णतिलमिश्रजलमेवाङ्कस्य कलङ्कस्य या रोचिः कान्तिः तया खचिता मिश्रिता सुधा पीयूषं। कृष्णतिला एव कलङ्कस्तत्संलग्नं जलमेव पीयूषं न त्वन्य', कलङ्को न चान्यत् पीयूषमित्यर्थः। श्रद्धेति पितृलोकप्राप्तौ हेतुगर्भविशेषणं। उपतस्थे सङ्गतकरणे तङ् ॥ १२१ ॥

पश्येति। हे प्रिये त्वमुच्चसौधस्थित्या कृत्वा सौख्येन निरन्तरायं लक्ष्ये दृश्ये केलिकुल्याया अम्बुनि तदिन्दोर्बिम्बं पश्य। तत् किं। राजहंसी इव कुल्याजले निमज्ज्य चिरं सतोऽन्तर्वर्तमानस्य प्रियस्य राजहंसस्य भ्रमेण यच्चन्द्रबिम्बं चुम्बति। सौख्ये स्वार्थे सुष्ठिः भाव इति भावे वा ष्यञ्। सौहृश्येति पाठे

सौवर्गवर्गैरमृतं निपीय
क्षतोऽह्नि तुच्छः शशलाञ्छनोऽयम्।
पूर्णोऽमृतानां निशि तेऽत्र नद्यां
मग्नः पुनः स्यात् प्रतिमाच्छलेन ॥ १२३ ॥
समं समेते शशिनः करेण
प्रसूनपाणाविह कैरविण्याः।

सूक्ष्मलेन लक्ष्ये। उच्चतरदेशस्थितं प्रत्यधोदेशस्थितं वस्तु सूक्ष्मं प्रतिभातीत्यर्थः ॥ १२२ ॥

सौवर्गेति। स्वर्गे भवा सौवर्गा देवास्तेषां वर्गैर्वृन्दैरमृतं निपीयाह्नि तुच्छो रिक्तः क्षतोऽयं शशलाञ्छनो निशि ते तवात्र क्रीडानद्यां प्रतिमाच्छलेन प्रतिबिम्बव्याजेन मग्नः सन् पुनरमृतानां जलस्य च पीयूषैः पूर्णः स्यात्, भवेदित्यहं सम्भावयामीत्यर्थः। एतेन नदीजलस्यामृतत्वं सूचितम्। अह्नि तुच्छः क्षतोऽपि पुनः क्रमेणामृतैः पूर्णः सन् रात्रौ तत्र क्रीडानद्यां प्रतिमाव्याजेन मग्नः पुनः पानभयादिव पलाय्य निलीनः स्यादित्यहं शङ्के इति वा। पूर्णोऽमृतानां तृप्त्यर्थत्वात् करणे षष्ठी ॥ १२३ ॥

सममिति। इह तव क्रीडानद्यां कैरविण्याः कुमुदिन्याः प्रसूनरूपे पाणौ शशिनः करेण रश्मिनाऽथ च पाणिना समं सह समेते सङ्गते सति मधु पुष्परस एव जलं यस्य तस्य त्यागजलस्य कन्यादानसम्बन्धिसङ्कल्पोदकस्याभिषेकः कर्त्ताऽनयोश्च-

विवाहलीलामनयोरिवाह-
मधुच्छलत्यागजलाभिषेकः ॥ १२४ ॥
विकासिनीलायतपुष्पनेत्रा
मृगीयमिन्दीवरिणी वनस्था।
विलोकते कान्तमिवोपरिष्टा-
न्मृगन्तदेषाऽऽननचन्द्रभाजं ॥ १२५ ॥

न्द्रकुमुदिन्योर्विवाहलीलामाह्वेव सूचयतीव। चन्द्रकरस्पर्शमा-
त्रेण कुमुदानि विकसितानि मकरन्दपूर्णानि च जातानीति
भावः। विवाहे उभयोः पाणिमेलनं, पाणौ दानजलाभिषे-
कोऽपि भवति॥ १२४ ॥

विकासीति। हे प्रिये इह तव केलिनद्यां वनस्था जलनि-
वासिनी अथ च काननस्था, तथा विकासि नीलमायतं विस्तृतञ्च
पुष्पमेव नेत्रं यस्यास्तत्तुल्यनेत्रा चेयं प्रत्यक्षदृश्या इन्दीवरिणी
यस्मान्मृगी वनस्थत्वाद्विकासिनीलायतपुष्पनेत्रत्वाच्च हरिणी
तत्तस्मादिन्दीवरिणीरूपा मृगी आननमिव यश्चन्द्रः साम-
र्थ्यात् त्वदाननतुल्यो यश्चन्द्रस्तद्भाजं तत्स्थं कान्तं सुन्दरमथ
च तुल्यजातीयं स्वप्रियं मृगमुपरिष्टाद्विलोकते। विकसितकुसु-
मनेत्राणि ऊर्द्ध्वप्रसारितानि दृश्यन्ते तर्हि प्रायेण चन्द्रस्योपरि
वर्त्तमानं निजभर्त्तारं मृगं मृगी पश्यतीत्यर्थः। त्वदाननमेव
यश्चन्द्रस्तस्य चन्द्रत्वादनुमेयमृगमुपरिष्टात् पश्यति। त्वं प्रा-
सादोपरि वर्त्तसे, इयञ्चाधोदेशे वर्त्तते नवेति पदच्छेदं कृत्वा

तपस्यतामम्बुनि कैरवाणां
समाधिभङ्गे विबुधाङ्गनायाः ।
अवैमि रात्रेरमृताधरोष्ठं
मुखं मयूखस्मितचारु चन्द्रं ॥ १२६ ॥

चन्द्रभाजं निजप्राणेशं मृगमुपरिष्ठान्न पश्यतीति न किन्तु पश्यत्येवेति व्याख्येयं । वनस्था मृगी हि नीलायतनेत्रा सती स्वकान्तं मृगमितस्ततो विलोकयतीत्यर्थः । मृगमित्यपपाठः । मृगपर एव वा व्याख्येय ॥ १२५ ॥

तपस्यतामिति । हे प्रिये, अम्बुनि सदा निवासात् तत्र तपस्यतां कैरवाणां कुमुदानां समाधेर्दिवासङ्कोचस्यैव ध्यानस्य भङ्गे त्याजने विषये निमित्ते वा विबुधाङ्गनाया अप्सरोरूपाया रात्रेश्चन्द्र मुखमेवाहमवैमि मन्ये । किम्भूतं मुख । अमृतमेवाधरोष्ठं यस्या, अथ चामृततुल्योऽधरोष्ठं यस्य यदाऽमृतमधरं यस्मात् पीयूषादधिकरस श्रेष्ठो यस्य, तथा मयूखा एव स्मित । अथ च तत्समाधिभङ्गादेव चन्द्रकरवदुज्ज्वलं यत् स्मित तेन वा चारु । चन्द्रविशेषणे लिङ्गविपरिणामः । देवाङ्गनानामप्येवंविधं मुख रात्रौ जले तपस्यतां दुश्चर तपश्चरतामपि मुनीनां समाधिभङ्गं करोति । तपस्यतामिति तपश्चरन्तीत्यर्थे कर्म्मणो रोमन्थतपोभ्यामिति (पा० ३।१।१५) क्यप्, तपसः परस्मैपदञ्चेति मता ॥ १२६ ॥

अल्पाङ्कपङ्का विधुमण्डलीयं
पीयूषनीरा सरसी स्मरस्य ।
पानात् सुधा नाम जलेऽप्यमृत्यु
चिह्नं बिभर्त्त्यत्रभवं स मीनं ॥ १२७ ॥

तारास्थिभूषा शशिजङ्कुजाम्य-
चन्द्रांशुपांशुच्छुरितद्युतिर्द्यौः ।
छायापथाम्बुद्वाफणीन्द्रहारा
खं मूर्त्तिमाह स्फुटमष्टमूर्त्तेः ॥ १२८ ॥

अल्पेति। अल्पोऽङ्क एव पङ्को यस्यां, तथा पीयूषमेव नीरं यस्या सेय विधुमण्डली स्मरस्य सरसी विशाल सर एव, अत एव स स्मरोऽत्रभवमस्यां चन्द्रसरस्यां समुत्पन्न सुधानामेतदीयामृतपानीयजले जलरहितेऽपि स्थले जलाभावेऽपि वाऽमृत्यु मरणरहित मीनं चिह्नमथ च सुधासरोजातत्वादनुमापक लिङ्ग बिभर्त्ति। मीना हि जलाद्बहिर्भूता म्रियन्त एव, अयन्तु न म्रियते तस्माचन्द्रामृतसरसीभवत्वात् सदामृतपानाज्जलाभावेऽपि मृत्युरहित इति सर्व्वं युक्तमित्यर्थः ॥ १२७ ॥

तारेति। द्यौः खमात्मानमष्टमूर्त्तेर्हरस्य मूर्त्तिं शरीर स्फुट व्यक्तमाह ब्रवीति, यत. तारा एवास्थीनि तद्रूपा भूषा यस्याः, तथा शशिनमेव अङ्कुशं गङ्गां बिभर्त्तीति तद्वत्, तथा चन्द्रांशव एव पांशवो भस्मानि तैः छुरिता कृताङ्गरागा द्युतिर्यस्याः सा, तथा छायापथो गगने दण्डाकारा दक्षिणोत्तरस्थाः

एकैव तारा मुनिलोचनस्य
जाता किलैतज्जनकस्य तस्य।
तताधिका सम्पदभूदियं तु
सप्तान्विता विंशतिरस्य ताराः ॥ १२९ ॥
मृगाक्षि यन्मण्डलमेतदिन्दोः
स्मरस्य तत्पाण्डुरमातपत्रं।

धवला रेखा छद्म यस्य छायापथरूपः फणीन्द्रो वासुकिः स एव मुक्ताहारो यस्या सा हरमूर्त्तिरयुक्तविशेषणविशिष्टा, द्यौरप्येतादृशीति मूर्त्त्यन्तरापेक्षया व्यक्तमेव महेशस्य मूर्त्तिर्गगनं कथयतीवेत्यर्थः ॥ १२८ ॥

एकेति। एतस्य चन्द्रस्य जनकस्य तस्य प्रसिद्धस्यात्रिमुनिलोचनस्य तारा कनीनिका किलैकैव जाताऽभूत् किल पुराणादौ। अस्य तत्पुत्रस्य तु पुनरियं दृश्यमाना सम्पत् तातान्निजपितुरत्रिनेत्रात् सकाशादधिका,यद्यस्मादस्य ताराः कनीनिका अथ च नक्षत्राणि सप्तभिरन्विता विंशतिरभूदिति छलं। पितुः सकाशादधिकसम्पत्तिलात् सभाग्योऽयमिति भावः। "सप्तविंशतिमिन्दवे" इति दक्षः सप्तविंशतिकन्या अश्विन्यादिकाश्चन्द्राय ददाविति पुराणं ॥ १२९ ॥

मृगाक्षीति। हे मृगाक्षि हरिणीनेत्रे यदेतत् प्रत्यक्षदृश्यमिन्दोर्मण्डलं, तत् स्मरस्य पाण्डुरं श्वेतं साम्राज्यसूचकमातपत्रमेव। श्वेतच्छत्रदर्शने सति सम्राजो वशा भवन्ति पूर्णधवल-

यः पूर्णिमानन्तरमस्य भङ्गः
स छत्रभङ्गः खलु मन्मथस्य ॥ १३० ॥
दशाननेनापि जगन्ति जित्वा
योऽयं पुराऽपारि न जातु जेतुं।
ग्लानिर्विधोर्मानिनि सङ्गतेयं
तस्य त्वदेकाननिर्जितस्य ॥ १३१ ॥

चन्द्रमण्डलस्य चोद्दीपकत्वात् तद्दर्शने सर्व्वेऽपि कामस्य वश्या भवन्ति तस्मादेतत् कामस्य श्वेतातपत्रमेवेति भावः। यस्य पूर्णिमानन्तरमेतस्य छत्रभूतस्येन्दुमण्डलस्य भङ्गो मोटनं कलाचयश्च स मन्मथस्य छत्रभङ्गः खलु, छत्रस्य मोटनं राज्यचयं सूचयति। कृष्णपक्षे चोद्दीपकमित्रचन्द्रक्षये कामः क्षीण एव तस्मात् कृष्णपक्षे योऽस्य भङ्गः स कामस्य छत्रभङ्ग इव सएवेति भावः। खलूत्प्रेक्षायां, निश्चये वा ॥ १३० ॥

दशेति। दिग्विजयोद्यतेन दशाननेनापि जगन्ति जित्वाऽपि योऽयं चन्द्रः पुरा पूर्व्वं जातु कदाचिदपि जेतुं नापारि हे मानिनि स्वमुखस्पर्द्धिनं चन्द्रमपश्यमाने नैमित्तस्यास्य विधोरिय प्रत्यक्षदृश्यकलङ्करूपा ग्लानिर्लज्जा सङ्गता लग्ना, अथ च युक्तैव। यतस्त्वयैकेनाननेन नितरां जितस्य। यो हि दशाननेन दशभिरपि मुखैर्जेतु नाशकि तस्य त्वियाऽस्त्वयैकेन मुखेन निर्जितत्वे त्वन्यथा मालिन्दमुचितमेवेत्यर्थः। त्वन्मुखमेतस्मादधिकमिति भावः। लज्जया ग्लानिर्भवतीति प्रतीयमानोत्प्रेक्षा।

दृष्टा निजां तावदियन्त्यहानि
जयन्नयं पूर्व्वदशां शशाङ्कः ।
पूर्णस्त्वदास्येन तुलां गतश्चे-
दनन्तरं द्रक्ष्यसि भङ्गमस्य ॥ १३२ ॥
चन्द्राणि रामः परिभूय रामात्
चन्द्राद्यथाऽभज्यत स द्विजेन्द्रः ।

रावणश्चन्द्रं जेतुं प्रवृत्तस्तुषाराग्निना दह्यमानः कम्पमानतनुः तमजित्वैव परावृत्त इति उत्तरकाण्डे कथा ॥ १३१ ॥

दृष्ट इति । अयं शशाङ्क इयन्त्येतावन्ति अहानि शुक्लपक्षदिनानि तावदवधीकृत्य निजां पूर्व्वदशां पूर्व्वपूर्व्वदिनावस्थां जयन् निकाममुत्तरोत्तरदिनेषु कलावृद्ध्याऽधिकीभवंस्त्वया दृष्टः, इयन्ति दिनानि जयंस्तावज्जयन्नेव दृष्ट इत्यवधारणार्थो वा तावच्छब्दः, अनयैव परिपाट्या पूर्णबिम्बोऽयं त्वदास्येन सह तुल्यं साम्यमथ च तोलनकाष्ठं गत आरूढश्चेत्तर्ह्यनन्तरं निकटं त्वमेव श्वः प्रभृत्येवास्य भङ्गं पराजयं कलाचयञ्च द्रक्षसि, उत्तमेन सह स्पर्द्धमानो हि भङ्गं प्राप्नोत्येव । तुलादिव्येन हि हीनस्य पराजयः सर्व्वैर्दृश्यते । अहानि अत्यन्तसंयोगे द्वितीया । त्वदास्येनेति तुल्यार्थैरतुलोपमाभ्यामिति (पा० २।३।७२) निषेधेऽपि सह योगे तृतीया । तथा च कालिदासस्तुलां यदारोहति दन्तवाससेत्यादि ॥ १३२ ॥

चन्द्राणीति । द्विजेन्द्रो शमन्यपत्यत्वात् सोऽतिप्रसिद्धपराक्र-

तथैष पद्मानभिभूय सर्व्वान्
त्वदास्यपद्मात् परिभूतिमेति ॥ १३२ ॥
अन्तः सलक्ष्मीक्रियते सुधांशो
रूपेण पश्ये हरिणेन पश्य।

सो रामः परशुरामः सर्व्वाणि क्षत्त्राणि परिभूयापि क्षत्त्रादेव रामाद्दाशरथेः सकाशात् यथाभज्यत पराभवं प्राप तथा तेनैव प्रकारेण एषोऽपि द्विजराजः सर्व्वान् पद्मानभिभूय सङ्कोचकरणात् पराभूयापि त्वदास्यपद्मात् सकाशात् परिभूतिं पराभवमेति सकलक्षत्त्रियाधिक्यं यथा श्रीरामस्य तथा सर्व्वपद्माधिक्यं त्वन्मुखपद्मस्येति भावः। वा पुंसि पद्ममित्यमरः ॥ १३२ ॥

अन्तरिति। हे पश्ये चन्द्रदर्शनप्रवृत्ते भैमि हरिणेन पाण्डुरेण रूपेण वर्णेन कर्त्रा सुधांशोरन्तः प्रान्तभागः पूर्व्वमश्रीकोऽपीदानीं सलक्ष्मीक्रियते सलक्ष्मीकः क्रियते त्वं पश्य। अथ च चन्द्रस्य मध्यं हरिणेन मृगेन कर्त्रा रूपेण स्वीयनीलवर्णेन कृत्वा अमलत्त्य सलक्ष्म क्रियते सलक्ष्मीक्रियते सकलङ्कं क्रियत इत्यर्थः। पश्य एव स नल इत्यमुना प्रकारेणास्य चन्द्रस्यान्तं पर्य्यन्तभागं कदाचिदीक्षणमाणां भैमीमदर्शत्, दर्शयामास। कदाचिच्चान्तर्मध्यभागं दर्शयामास। अङ्गुल्यादिना चन्द्रस्येतमीक्षमाणान्तमध्यभागप्रदर्शनपूर्व्वश्लिष्टपदैस्तया सह क्रीडां चकारेति भाव इति मध्ये कवेरुक्तिः। हरिणः पाण्डुरः पाण्डुरित्यमरः। अन्त इत्यकारान्तमेकञ्च, अन्तरित्यव्ययमपरञ्च मध्यवाचि। स-

इत्येष भैमीमददर्शदस्य
कदाचिदन्तं स कदाचिदन्तः ॥ १३४ ॥
सागरान्मुनिविलोचनोदरा-
द्यद्द्वयादजनि तेन किं द्विजः ।
एवमेव च भवन्नयं द्विजः
पर्य्यवस्यति विधुः किमन्त्रिजः ॥ १३५ ॥

च्छीशब्दस्य समासान्तविधेरनित्यत्वात् कवभावे सलच्छीशब्दाचिः । पक्षे सलच्मशब्दाच्चिः । पश्ये पाघ्राध्मेत्यादिना (पा० ७। ३।७८) कर्त्तर्य्येव शः । दृशेर्बुध्यर्थत्वाद्गति बुद्धीति (पा० १।४। ५७) अणौ कर्त्तुर्णौ कर्मत्वाद्भैमीमिति द्वितीया ॥ १३४ ॥

सागरादिति । अयं चन्द्रः सागरान्मुनिविलोचनोदराचेतद्रूपाद्द्वयात् सकाशाद् यद्यस्मादजनि, उत्पन्नस्तेन कारणेन द्वाभ्यां जातत्वाद् द्विजः किं, एवमेव चानयैव रीत्या द्वाभ्यां जातत्वादेव द्विजो भवन्नप्ययं विधुरत्रेर्मुनेर्जातः किं कथ पर्य्यवस्यति, द्वाभ्यां जातत्वे सत्यपि अत्रिमुनेरेव जात इति तात्पर्य्यवृत्त्या कथमुच्यत इत्यर्थः । अथ चैवमेव यथा अनेन प्रकारेण द्विजत्व तथैवात्रिमुनिजो भवन्नयं द्विजः पर्य्यवस्यति । किं द्वाभ्यां जातत्वात् यथा द्विज उच्यते तथा द्विजादत्रिमुनेर्जातत्वादपि द्विज उच्यते, द्विजोत्पन्नो हि द्विज एव भवतीत्यर्थः । अथ च द्वाभ्यां जातत्वाद्द्विजोभवन्नेव न त्रिभ्यो जात इत्यत्रिज इति तात्पर्य्यवृत्त्या कल्प्यते । यो हि द्वाभ्यां जायते स त्रिजो न

तारविहारभुवि चन्द्रमयीं चकार
यन्मण्डलीं हिमभुवं मृगनाभिवासाम्।
तेनैव तन्वि सुकृतेन मते जिनस्य
स्वर्लोकलोकतिलकत्वमवाप धाता॥ १२६॥

भवति, एवमेवायमद्विजः कथ्यते किमित्यर्थः। द्विजस्त्रिजो न भवत्येव॥ १२५॥

तारेति। हे तन्वि कृशाङ्गि धाता ताराणां नक्षत्राणां विहारभुवि गगने चन्द्रमयीं मण्डलीं बिम्बं जिनस्य पुराणपुरुषस्य श्रीविष्णोर्मते ऽनुमतौ सत्यां तदादिष्टः सन् यच्चकार निर्ममे तेनैव सुकृतेन शोभनेन लोकोत्तरव्यापारेण हेतुना स्वर्लोकः स्वर्गभुवनं तत्सम्बन्धिनां लोकानां सुराणां मध्ये तिलकत्वं श्रैष्ठ्यमाप। किम्भूतां मण्डलीम्। हिमस्य तुषारस्य भुवं स्थानभूतामतिशीतलां, तथा मृगस्य नाभौ मध्ये वासो यस्यास्तां, यस्या मध्ये मृगोऽस्तीति यावत्। तादृशीम्। अन्येषां सुराणामेतादृग्व्यापारकरणे सामर्थ्याभावात् ब्रह्मैव श्रेष्ठोऽभूदित्यर्थः। अथ च तारायाः बुद्धदेव्या विहारस्थाने हिमभुवं शीतलां शुभ्रलाङ्गिमाच्छस्वरूपां वा, तथा मृगनाभेः कस्तूर्याः वासः परिमलोऽवस्थानं वा यस्यां तां कस्तूरीमिश्रितां चन्द्रमयीं कर्पूरमयीं कर्पूरराशिं यच्चकार तेनैव पुण्येन जिनमते बौद्धदर्शने ब्रह्मा सुरश्रेष्ठत्वमधत्त। बौद्धा हि बुद्धदेवप्रासादे यस्मात् पूजार्थं कस्तूरीराशिं करोति स लोकमध्ये श्रेष्ठो भवतीति स्वदर्शने प्रत्यपा-

इन्दुं मुखाद्बहुतृणं तव यद्गृणन्ति
नैनं मृगस्त्यजति तन्मृगतृष्णयेव।
अत्येति मोहमहिमा न हिमांशुबिम्ब-
लक्ष्मीविडम्बिमुखि वृत्तिषु पाशवीषु॥ १३७॥

दयन्। ब्रह्मा चैवमकृत तस्मादेव सर्व्वश्रेष्ठो जात इत्यर्थः। तेनैवेति पाठे उत्प्रेक्षा। बुद्धदेव्यां मता तारा॥ १३६॥

इन्दुमिति। हे हिमांशुबिम्बस्य लक्ष्म्याः शोभाया विडम्बि खस्मात् न्यूनत्वात् परिहासकारि ततोऽप्यधिकशोभं मुखं यस्यास्तादृशि भैमि पण्डिता इन्दुं तव मुखात् सकाशात् त्वन्मुखमपेक्ष्य वा बहुतृणमीषदसमाप्तं तृणं तृणत्वमपि यस्य पूर्णमसम्पन्नं तृणादपि निःसारमिति यावत्। अथ च बहुधिकं तृणं यस्मात् तृणादपि निःसारं यद्यस्मात् गृणन्ति, तत्तस्माद्धेतोर्मृग एनं चन्द्रं मृगसम्बन्धिन्या तृष्णया कोमलतृणकवलनाभिलाषेणेवाथ वा चन्द्रे प्रयुक्तस्य बहुतृणशब्दस्य बहुचतत् तृणञ्च बहूनि तृणानि यस्मिंस्तादृशमित्येव रूपार्थयहणरूपया भ्रान्त्येव न त्यजति। मृगो हि बहु च तृणं बहुतृणं देशं वा न मुञ्चति। नन्वनुभवे सत्यप्यासंसारं कथं भ्रान्तिबाहुल्यमित्याशङ्क्यार्थान्तरन्यासमाह। पाशवीषु पशुसम्बन्धिनीषु वृत्तिषु व्यापारेषु विषये मोहमहिमा भ्रान्तिबाहुल्यं नात्येति, बहुकालातिक्रमे नापयाति। पशवो हि सर्व्वदा मूढा एवेत्यद्यापि मृगस्य भ्रान्तिर्नापयाति तस्मादेनं न त्यजतीति युक्तमित्यर्थः। मुखात्

स्वर्भानुना प्रसभपानविभीषिकाभि-
र्दुःखाकृतैनमवधूय सुधा सुधांशुं
स्वं निह्नुते सितिमचिह्नममुष्य रागै-
स्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठं ॥ १३८ ॥

लुब्लोपे पञ्चमी। वज्रव्रणमीषदसमाप्तौ विभाषासुपो बहु-
जिति (पा०।६।३।७४) बहुच् ॥ १३७ ॥

स्वर्भानुरिति। हे प्रिये सुधा एनं सुधांशुमवधूय त्यक्ता-
तवाधरोष्ठमवलम्ब्यामुष्य रक्तौष्ठस्य रागै रक्तवर्णैः कृत्वा सि-
तस्य भावः सितिमा धावल्यमेव चिह्नं यस्य तादृशं धवलरूप-
मपि स्वमात्मानं निह्नुते पुनः स्वर्भानुपानभिया तिरो दधाति।
यतः स्वर्भानुना वारंवारं प्रसभपानेन विभीषिकाभिर्भयोत्पा-
दनैः कृत्वा दुःखाकृता प्रातिलोम्याचरणोत्पादितदुःखा। कि-
म्भूतमधरोष्ठं। प्रसिद्धस्य ताम्बूलस्येव ताम्रो वर्णो यस्य ताम्बू-
लेनैव वा ताम्रं रक्तवर्णं। पुना राहुपानभिया त्वदधरमेव स्था-
नान्तरमाश्रित्य रूपान्तरेणात्मानं गोपायतीत्यर्थः। अन्योऽपि
सभयं स्थानं हित्वा स्थानान्तरमाश्रित्य तत्रापि रूपान्तरं
धृत्वा स्वं निह्नुते। सुधया चन्द्रस्य परित्यागात् त्वन्मुखाश्रयणात्
त्वन्मुखं चन्द्रादधिकमिति भावः। ताम्बूलताम्रमित्युभयोरप्यप-
मेयापेक्षया। दुःखाकृता दुःखात् प्रातिलोम्ये इति (पा०।५।
४।६४) डाच् ॥ १३८ ॥

हर्य्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं
जातस्फीततनोरमुष्य हरिता ख्यातस्य पत्या हरेः।

हर्य्यक्षीति। हे प्रिये मतभेदेन कलङ्करूपं कुरङ्गं यद्वा शश-मुदरे मध्ये प्रक्षिप्य जाता स्फीता पूर्णा तनुर्यस्य हरेरिन्द्रस्य पत्या हरिता प्राच्या दिशा ख्यातस्य तत्रोदितस्य पूर्णत्वात एव हरेः श्रीविष्णोर्वामाक्षीभवतः। यद्वा सञ्जातपूर्णशरीरस्य मृगं यद्वा शशं कलङ्कं मध्ये निक्षिप्य मध्यस्थितकलङ्कस्य कनीनिकातुल्यत्वात् श्रीविष्णोर्वामनेत्रीभवतोऽमुष्य चन्द्रस्य त्वद्वदनाम्बुजात् सकाशाद्यद्भङ्गः पराजयोऽजनि तदेकाकिनः सर्व्वदा असहायादेकस्मात् पद्मात्,न त्वस्मात् कमलात्,न त्वन्यैः पद्मैरयं पराजीयते प्रत्युतायमेव पद्मानि पराजयतीत्यर्थः। अथ वाऽम्बुजतुल्यात् त्वद्वदनादेव पद्मादस्य च पद्मसङ्काकात् त्वद्वदनरूपादम्बुजाद् यदस्य भङ्गो जातस्तदेकाकिनोऽसहायस्य स्यात्,भवेत्,बहुभिरेकः पराजीयत इति युक्तमेवेत्यर्थः। यः सिंहिकायाः सुतो राहुः स पुनरेकोऽन्योऽस्य प्रतिभटः प्रतिमल्लः पराभावुको राहुरेव न त्वन्य इति। सम्प्रतीति पाठे,अद्य पुनरस्येकः भटः प्रतिभटः सिंहिकायाः सुतः स्यादेकाकिनोऽस्य त्वन्मुखपद्मः प्रतिद्वन्द्वी न भवति अतुल्यत्वात्, किन्त्वेकाकी राहुरेवास्य प्रतिभटो युक्त इत्यर्थः। किञ्च स्वशत्रुभूताद्राहोरप्यस्यान्यः पराजय इति महदस्य कष्टं प्राप्तमित्यर्थः। अथ च हरिर्दर्णया हरेः सिंहस्य पत्या सिंहिकया प्रसूतस्य तथा मृगं शशं वा य कश्चन पशु जठरे निक्षिप्य

भङ्गस्त्वद्वदनाम्बुजादजनि यत् पद्मात्तदेकाकिनः
स्यादेकः पुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः॥१३८॥
यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात् पद्मभू-
र्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये तावकं।

भक्षयित्वा स्थितस्यात एव सञ्जातपुष्टशरीरस्यात एव हर्य्यचो-भवतः सिंहतां प्राप्नुवतोऽस्य त्वन्मुखाद् यः पराजयोऽजनि स एकाकिनः केवलात् पद्मादम्बुजादेव पराजयः। सिंहस्य गजा-द्भङ्गो यथा तद्वदेतन्मद्दचित्रमित्यर्थः। अथ च पद्मसञ्ज्ञाकादे-कस्य पराजयः। सिंहोऽप्येको वङ्कसञ्ज्ञैः पराजीयत एवेत्यर्थः। अथ च पद्माच्छरभादष्टपदादेव भङ्गः सिंहस्य केवलमष्टपदा-देव भङ्गः,पद्मचन्द्राभ्यां सकाशात् त्वन्मुखमधिकमिति भावः। हर्य्यचः केसरी हरीत्यमरः। गजाश्चशरभाः पद्मा इत्यनेकार्थ-भाजः। प्रथमपचे हर्य्यचिशब्दाच्चिः, द्वितीयपचे हर्य्यचशब्दा-देव॥१३८॥

यदिति। हे प्रिये वेधा नयनद्वयमेवोत्पलं तन्मयीं तद्रूपां तदुचितां यस्य पद्मस्य पूजां व्यधात्, व्यरचयत्। यतोऽसौ श्रीविष्णोर्नाभौ वर्त्तमानात् पद्माद्भवतीति पद्मभूः। स हि स्व-जनकस्य पद्मस्य पितृभक्त्या नेत्रद्वयेनैव नीलोत्पलयुगेन भवतीं पूजामकतेति भावः। वाक्पारीणा वाचः परतीरे भवा वाचा वर्णयितुमशक्यां रुचिर्यस्य सोऽयं पद्मयेत् तावकं मुखं स एव भव-त्पद्मदपो अस्त इत्यर्थः। अनन्तरं मद्मणा स्वपितृमुद्या नेत्र-

कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थल-
स्थाणुस्वस्तटिनीतटावनिवनीवानीरवासी वकः ॥ १४० ॥

नीलोत्पलाभ्यां कृतपूजनत्वादच तव मुखे नीलोत्पलं दृश्यत इत्यर्थ इति चेत् तर्हि असौ शीतांशुः को नाम, अपि तु न कश्चित्, त्वन्मुखस्य पुरस्तादयं कः, स्मरणार्होऽपि नेत्यर्थः। तर्हि असौ क इति चेत् तत्राह। अयं वकः। किम्भूतः मखो दक्षमख एव मृगस्तस्य व्याधो हरस्तस्योत्तमाङ्गं शिरस्तल्लक्षणे स्थले स्थाणुः स्थितिशीला स्वस्तटिनी गङ्गा तस्यास्तटावन्यां तीरभूम्यां या वनी महदल्पं वा यत् काननं तत्र ये वानीरा वेतसास्तन्मध्यवासी। चन्द्रस्य हरजटाजूटवासीति प्रसिद्धं। वाक्पारीणरुचिरिति ब्रह्मविशेषणं वा। अत्र यद्यपत्यस्य ब्रह्मणोऽपि सौन्दर्यं वागगोचरस्तत्पितुः पद्मस्य सौन्दर्यं मनसोऽपि गोचरो न भवतीत्यर्थः। त्वन्मुखस्य चन्द्रस्य च महदन्तरं साम्यसम्भावनाऽपि नास्तीति भावः। एतेन चन्द्रादिसुन्दरवृन्दं ब्रह्मणा सृष्टं, भवदीयमुखपद्मं तु ब्रह्मणोऽपि स्रष्टृत्वात् सर्व्वाधिकमिति सूचितं। मखमृगेत्यादिना चन्द्रस्यातिदैन्यं सूचितं, त्वन्मुखसाम्यप्राप्त्यर्थं तपश्चरणं सूचितं। अन्योऽपि विशिष्टवस्तुप्राप्तये शिवस्थानयुक्तनदीतीरवानीरवासी तपस्यति। नदीतीरवानीरवासित्वं वकजातिः। वाक्पारीणा, भवार्थे राष्ट्रावारपाराद् घखौ (पा॰४।२।८३वा॰१) इत्यत्रापि विगृहीतादपीति वचनात् खः ॥ १४० ॥

जातं शातक्रतव्यां हरिति विहरतः काकतालीयमस्या-
मश्यामत्वैकमत्यस्थितसकलकलानिर्म्मितेर्निर्म्मलस्य।
इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्ड-
द्वन्द्वापादानदानद्रवलवगलनादङ्कमङ्के विशङ्के॥ १४१॥

जातमिति। अहं इन्दोरङ्के बलविजयिन इन्द्रस्य गजग्रामणीर्हस्तिषु मध्ये प्रधानं प्राच्यामेव वर्त्तमानो य ऐरावतस्तस्य गण्डयोःकपोलयोः पिण्डयोः शिरःस्थितकुम्भस्थलयोश्च ये द्वे द्वन्द्वे गण्डद्वन्द्वं पिण्डद्वन्द्वञ्च ते एवापादानं निर्गमनस्थानं येषां ते च ते दानद्रवलवा मदजललेशाश्च तेषां गलनात् सम्पर्कात् काकतालीयमाकस्मिकं दैवसिद्धमिन्दीवराभं नीलोत्पलतुल्यं जातमेकं कलङ्कं विशङ्के मन्ये। किम्भूतस्येन्दोः। अस्यामङ्गुलीनिर्दिष्टायां पुरोदृष्टायां शतक्रतोरियं शातक्रतवी तस्यां हरिति दिशि विहरत उद्गच्छतः, तथाऽश्यामत्वे विषये ऐकमत्यं सर्व्वसंवादस्तेन तत्र वा स्थिताभिर्वर्त्तमानाभिः सकलाभिः पञ्चदशभिरपि कलाभिः छता निर्म्मितिर्यस्य, अश्यामत्वैकमत्येन स्थिता सकलकलानिर्म्मितिर्यस्य तादृशस्य वा। अत एव निर्मलस्य प्रत्येकं कलानां धावल्यस्य दृष्टत्वाद्धवलसकलकलानिर्म्मितत्वात् कारणधावल्याद्धवलस्य, अश्यामत्वैकमत्येन स्थिता याः सकलाः कलास्ताभिर्या निर्म्मितिस्तस्या वा हेतोर्धवलस्य पूर्व्वकारणधावल्यात् सकलोऽप्ययं धवल एवाभूत्, पश्चात् तु पूर्व्वदिग्भ्रमणवशात् तथैव भ्रमत ऐरावतस्य कपोलकुम्भस्थलगलन्मदजलं दैववशा-

अंशं षोडशमामनन्ति रजनीभर्तुः कला वृत्तय-
न्त्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्द्धिष्णवः ।

इत्यं तेनायं मध्ये कालः प्रतिभातीत्यर्थः । तालतरुतले यदैव काकस्य उपवेशनं तदैव दैवात् काकस्योपरि तालफलपात इति काकतालमिव काकतालीयं समासान्ताच्छः । निर्मितेः पचे हेतौ पञ्चमी ॥ १४२ ॥

अंशमिति । हे प्रिये लोका रजनीभर्तुः शोडशमंशं कलामामनन्ति सत्यं कथयन्ति, ताश्च षोडशांशरूपाः प्रतिपत् आदिर्यस्मिन् कर्मणि राकां पूर्णिमामभिव्याप्य वर्द्धिष्णवः प्रतितिथि एकैकाभिहद्ध्या वर्द्धमानाः पञ्चदशसङ्ख्याका एव कला एनं चन्द्रं वृत्तयन्ति वर्त्तुलं कुर्व्वन्ति तिथिसङ्ख्यासाम्यात् पूर्णमण्डलं कुर्व्वन्तीत्यर्थः । या पुनः कला षोडशीं तिथिमृते उद्धृता प्रयोजनाभावाच्चन्द्राद्दहिष्कृता सा षोडशी कला शेषा पञ्चदशकलाभ्योऽवशिष्टा सती, यद्वा षोडशीं तिथिं विना प्रयोजनाभावाद्याऽवशिष्टा, सा निष्प्रयोजनत्वादुद्धृता चन्द्राद्दहिर्निष्काशिता सती हरालङ्कृतिः शिवशिरोभूषणं जाता किं, चन्द्रे प्रयोजनाभावाद्धरालङ्कृतिरिवाभूत् किमित्यर्थः । अहं तस्याश्चोद्धृतायाः षोडश्याः कलायाः सम्बन्धिकं नभोनीलिम्ना सह वर्त्तमानं स्थानस्य पूर्व्वावस्थितेः सम्बन्धि विलं विवरं तत्कालानवस्थित्या कृत्वा शून्यं नीलं नभोभागमेवेह चन्द्रमण्डलमध्ये कलङ्कं पश्यामि किं, मध्यवर्त्तिनीलं तत् स्थानं विलमेवाहं कलङ्कत्वेन शङ्क इत्यर्थः । शेषशब्दस्याभिधेयलिङ्गत्वं पूर्व्वमेव दर्शितं ।

या शेषः पुनरुद्धृता तिथिमृते सा किं वराखङ्कृति-
स्तस्याःस्थानविलं कलङ्कमिह किं पश्यामि सश्यामिकं॥१४२॥
ज्योत्स्नामादयते चकोरशिशुना द्राघीयसी लोचने
लिप्सुर्मूलमिवोपजोवितुमितः सन्तर्पणात्मीकृतात्।

पूर्णे राका निशाकर इत्यमरः। वृत्तयन्ति तत्करोतीति (पा० ३।१।२६वा०१) णिच्। वर्द्धिष्णवः, अलङ्कृञिति (पा० ३।२।१३६) इष्णुच्। तिथिमृते ऋतेन पाशमिति वत्। श्यामिकेति मनोज्ञादेराकृतिगणत्वाद्भावे वुञ् ॥ १४२ ॥

ज्योत्स्नामिति। हे मुग्धे सुन्दरि त्वदक्षां वृत्तत्वादिगुणैः समानमपि नयनश्रियाऽपि कलाऽनधिकं समानमेव, विधिलुरत एव स्वस द्राघीयसी अतिदीर्घे लोचने लिप्सुर्लब्धुमिच्छुर्विधुश्चकोरशिशुना प्रयोज्येन स्त्रीयां ज्योत्स्नामादयते भक्षयति। तचोत्प्रेचते। चन्द्रिकामृतपानकृतसम्यक्तर्पणेनात्मीकृतात् स्ववशीकृतादितश्चकोरबालकात् सकाशान्मूलं स्वचन्द्रिकापानहेतुभूतमेतदीयातिदीर्घनेत्रद्वयगध्येषु उपजोवितुमादातुमिव। यद्वा किञ्चित् स्वचन्द्रिकां पाययित्वा ततो नेत्रद्वयलक्षमीशाप्त्वा मूलं चन्द्रिकारूपमूलधनं वर्द्धयितुमिव। अन्योऽप्युत्तमर्णोऽधमर्णस्य किञ्चिद्दत्त्वा तं वशीकृत्योत्तममिष्टं वस्तु ततो गृह्णाति तथा ऽयं चन्द्र आदृत आदरयुक्तः सन्नङ्के मध्येऽपचोत्सङ्गे रङ्कुस करोति, उत्सङ्गधारणेन लालयतीत्यर्थः। किमर्थमित्याशङ्क्याह। तन्मूलभूतमतिविशालं तदीयनयनयुगलं परिप्राप्तुमिव मंसशं क-

अङ्के रङ्कुमयं करोति च परिम्प्रष्टुन्तदेवाद्दत-
स्त्वद्वक्त्रं नयनश्रियाऽप्यनधिकं मुग्धे विधित्सुर्विधुः ॥ १४३ ॥
लावण्येन तवास्यमेव वडुना तत्यात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्द्धमलिनेनारम्भि शेषेण तु ।

त्तुमेव। त्वन्मुखसाम्यनिमित्तरमणीयत्वेनेदमयं मन्यादृतोयं। चन्द्र-
मकोरत्त्वरिणो वञ्चयतीत्यर्थः। चन्द्रादुत्कृष्टं त्वन्मुखमिति भावः।
परिमष्टुमिति पाठे, एतन्नेत्ररामणीयकप्राप्तुपायं प्रष्टुमिवेत्यर्थः।
शिशुः सुप्रतार्य्य इति सूचयितुं शिशुपदं। आद्दयते, आदेर्निगर-
णार्थलेऽप्यदेः प्रतिषेधो वक्तव्यः (पा० १।३।८७वा० १) इति वक्तथा-
न्निगरणादिपरस्मैपदाभावे णिचश्चेति (पा० १।३।७४) तङ्। शि-
शुना आदिखाद्योर्नेति (पा० १।४।५२वा०१) अणौ कर्मत्वाभावः।
द्राघीयसी अतिशायने इष्ठनि प्रियस्थिरेति (पा० ६।४।१५७)
द्राघादेशः,विधित्सुर्विधित्सुरिति च नलोकेति षष्ठीनिषेधः॥१४३॥

. लावण्येति। हे प्रिये वडुना कचित् पात्रे सञ्चितेनाखिलेन
लावण्येन कत्वा तवास्यमेवारम्भि निर्मितं, चन्द्रस्तु पुनः तस्य
लावण्यस्याधारपात्रं स्पृशतीति स्पृक् तेन लावण्यस्यानपात्रमात्र-
लग्नेनात एव प्रोञ्छनेन पात्रनिघर्षणेन कत्वा लब्धता उपार्जि-
तत्वं तेनार्द्धं कियत् खण्डं मलिनं यस्य तेन किञ्चिन्मलिनेन शे-
षेण भवन्मुखनिर्माणावशिष्टेनांशेन कत्वाऽऽरम्भि निर्मितः। अत
एव शेषमण्डलोऽयं शोभत इत्यर्थः। शेषेण तु निर्मित इति वा।
विधिना एतत्त्वन्मुखमृगाङ्कखण्डद्वयं निर्माय हृष्टा अप्सु पाणी

निर्म्माय द्वयमेतदप्सु विधिना पाणी खलु चालितौ
तल्लेशैरधुनाऽपि नीरनिलयैरम्भोजमारभ्यते ॥ १४४ ॥
लावण्येन तवाखिलेन वदनं तत्यात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्द्धमलिनेनारम्भि शेषेण यः।

प्रचालितौ खलु, लावण्यलेपक्षतजलचालनाविव, तस्मात् तस्य चालनरजोमिलितलावण्यलेपस्य लेशैरल्पैरंशैरेव कर्त्तृभिरधुनाऽपि नीरनिलयैर्जलस्थायिभिः सद्भिरम्भोजमारभ्यते, निर्म्मीयते, कमलनिर्म्माणे ब्रह्मणः कोऽपि प्रयासो नेत्यर्थः। कमलाच्चन्द्रोऽधिकस्तस्मादपि त्वन्मुखलावण्यं साकल्येन निर्म्मितत्वादधिकमिति भावः। अम्भोजं जात्येकवचनं ॥ १४४ ॥

लावण्येति। अखिलेन लावण्येन तव वदनमारम्भि: ततो भवद्वदनकामनीयवर्णनाचिन्ताऽपि दूरे तिष्ठतु, अशक्यकरत्वादित्यर्थः। उक्तरीत्या तत्पात्रमात्रस्पृशा प्रोञ्छनलब्धतार्द्धमलनेन शेषेण यश्चन्द्रो विधिना निरमायि तस्य लेखाऽपि लावण्यनिर्म्मितस्य चन्द्रस्य षोडशांशरूपकलामात्रत्वादेव निष्कलङ्कत्वात् सुषमया परमशोभया हत्वा अहंकृत्या अस्यापेक्षयाऽहमेव रमणीयेति दर्पमवलम्ब्य शम्भोः शिखामणिः शिरोभूषणमभूत्, शिवशिरोऽध्यारोहत्। अन्यदपि सदर्पमुत्तमशिरोऽधिरोहति। अब्जं कुमुदं कर्त्तृ यस्मात् तस्य चन्द्रस्य पदं प्रतिविम्बस्थानं जलमस्पृशत्, अतः श्रियः सद्माभूत्, चन्द्रकरस्पर्शादेव हि कुमुदं सश्रीकं भवति यद्वा श्रियः पद्माभूत्

यल्लेखाऽपि शिखामणिः सुषमयाऽस्य शम्भोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मञ्च सद्म श्रियः ॥ १४५ ॥
सप्रीतिः सम्प्रीतेरजनि रजनीशः परिषदा
परीतस्ताराणां दिनमणिमणिग्रावमणिकः ।

जलस्य चन्द्रकिरणस्पर्शात् पद्मस्य तत्रोत्पन्नत्वाद्वर्त्तमानत्वात् कुमुदसाहचर्य्याच्च पद्ममपि लक्ष्म्याः स्थानमभूत्। यद्वा पद्मञ्चातः कुमुदाद्धेतोः श्रियः सद्माभूत्, अब्जजातियोगात् कुमुदाधारजलयोगाच्च कुमुदादेव परम्परया पद्मानां लक्ष्मीगृहत्वमभूदित्यर्थः। यद्वा या लेखा शम्भोः शिखामणिरभूत् तस्य शिखामणिभूतस्य चन्द्रस्य पदं स्थानं शिवमस्तकपूजासमये यस्मात् कुमुदं पद्मञ्चास्पृशत्, अतस्तदुभयं श्रियः सद्माभूत्, चन्द्रस्य तद्धशिरःसम्बन्धादुभयं श्रीगृहमभूदित्यर्थः। यद्वा तस्य शम्भोः पदं चरणं पूजावशाद्यस्मात् कुमुदं पद्मञ्चास्पृशत् तस्मादुभयं श्रीसद्माभूत्। तस्य लावण्यस्थानं विधिहस्तलावण्यलेपचालनजलं यस्मात् कुमुदं पद्मञ्चास्पृशत्, यद्वा पद्ममेवास्पृशत्, यतोऽब्जं तस्मात् कुमुदं पद्मञ्च पद्ममेव वा श्रीसद्माभूदिति वा। त्वन्मुखलावण्यलेशपरम्परासंस्पर्शप्राप्तशोभानि चन्द्रादीनीति। त्वन्मुखलावण्यं वाङ्मनसगोचरं न भवतीति भावः। अर्थान्तरस्य स्पष्टत्वात् पूर्वार्द्धस्य त्वर्थान्तरप्रतिपादनार्थमनुवादत्वान्नायं श्लोकः पुनरुक्तः। अदमिति विभक्तिप्रतिरूपकमव्ययं ॥ १४५ ॥

सप्रीतेरिति। हे प्रिये सम्प्रीतेस्ताराणामन्योऽन्यं सम्यग्याः

प्रिये पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः
सुधामभ्युद्धर्त्तुं धृतशशकनीलाश्मचषकः ॥ १४६ ॥

प्रीतिः मैत्री तस्माद्धेतोर्या सपीतिः सहपानं, सुहृदो हि सहपानं कुर्व्वन्ति, तस्माद्धेतोः, यद्वा सहपानाद्धेतोर्या सम्यक् प्रीतो रुच्यभिवृद्धिस्तस्माद्धेतोस्ताराणां परिषदा सङ्घेन परीतः समन्तात् व्याप्य रजनीशो दिनमणिमणिः सूर्य्यकान्तमणिस्तस्य ग्रावा शिला तेन घटितोऽतिधवलः स्थूलः पेयद्रव्याधारभूतो मणिकोऽलिञ्जर एवाजनि, सम्भूतः। विधिना तारापरिषदा वा व्यरचि इति पश्य। कीदृशः। सादृश्येन वस्त्वन्तरसम्भावनारूपायामुत्प्रेक्षायां विषये कविभिर्विशिष्टसम्भावनाचतुरैः श्रीहर्षादिभिर्महाकविभिस्तारापरिषदैव सुधामभ्युद्धर्त्तुं धृतो यो मध्यस्थितः शशकः कलङ्कः स एव नीलाश्मा नीलमणिस्तेन घटितं चषकं पानपात्रं यस्मिन्नेवम्भूत इवायमिति अभिधानाय वर्णयितुं सुशकः सुखेन शक्यः। चन्द्रो धावल्यात् पीयूषपूर्णः सूर्य्यकान्तमणिक इव, कलङ्कश्च नीलमणिघटितं चषकमिव दृश्यते तत् पश्येत्यर्थः। यथा मणिकस्योदकाद्युद्धरणाय मणिकमुखे चषकः स्थाप्यते तथा ताराभिः परस्परं मिलित्वा सुधापानं कर्त्तुं परिवेष्टितस्य सुधापूरितस्यास्यापि चन्द्रमणिकस्य मुखे सुधोद्धरणाय शशनामनीलमणिचषको निक्षिप्त इत्युत्प्रेक्षितुं शक्यत इत्यर्थः। चषकोऽस्त्री पानपात्रमित्यमरः। सपीतिः, वोपसर्जनस्येति (पा० ६।३।८२) वा। सहस्य इति (पा० ६।३।

आस्यं शीतमयूखमण्डलगुणानाकृष्य ते निर्म्मितं
शङ्के सुन्दरि शर्व्वरीपरिवृढस्तेनैष दोषाकरः।
आदायेन्दुमृगादपीह निहिते पश्यामि सारे दृशौ
त्वद्दृक्षे सति वा विधौ धृतिमयं दध्यादनन्धः कुतः॥१४७॥

७८) योगविभागाद्वा समस्य सः। कविभिः खलर्थयोगान्न षष्ठी। सुशक इति खलू॥१४६॥

आस्यमिति। हे सुन्दरि विधिना शीतमयूखस्य मण्डलं विम्बं तस्य वृत्तत्वाह्लादकत्वादिगुणानाकृष्य गृहीत्वा ते आस्यं यतो निर्म्मितं तेन गुणगणोत्कर्षेण हेतुना शर्व्वर्याः परिवृढः प्रभुश्चन्द्रो दोषाणामाकर उत्पत्तिस्थानं न तु दोषा रात्रिस्तत्कारित्वाद्दोषाकर इत्यहं शङ्के। तथा अहं इन्दोर्मृगात् सकाशात् सारे दृशावादाय अतिश्रेष्ठे नेत्रे गृहीत्वा इह भवन्मुखे निहिते स्थापिते इत्यहं शङ्के। तेन कुतो ज्ञातमित्यत आह सुन्दरतरे त्वद्दृक्षे जागरूके सति अनन्धश्चक्षुष्मानुभयतारतम्यविचारचतुरोऽयं मृगो विधौ चन्द्रे धृतिं स्थितिमथ च समीचीनाधारपरितोषं कुतो वा दध्याद्धारयेदपि तु न कथञ्चित्, अपकलङ्केन्दुरपरदस्त्येतेनैव त्वन्मुखरसास्वादपरित्यागादन्यत्र गन्तुमशक्येव त्वन्मुखं त्यक्त्वाऽन्यत्रैवायं स्थित इत्यर्थः। त्वन्मुखं चन्द्राधिकं। नेत्रे च मृगनेत्राभ्यामधिके इति भावः। सारमिति क्वचित् पाठः॥१४७॥

शुचिरुचिमुडुगणमगणनममुमति
कलयसि क्षमतनु न गगनतटमनु।
प्रतिनिशशशितलविगलदमृतमृत-
रविरथहयचयखुरबिलकुलमिव ॥ १४८ ॥
उपनतमुडुपुष्पजातमास्ते
भवतु जनः परिचारकस्तवायं।

शुचीति। हे क्षमतनु त्वं गगनतटं नभःस्थलमनु लक्षीकृत्य शुचिरुचिं श्वेतकान्तिं, तथा बहुलादगणनं सङ्ख्यातुमशक्यममुमङ्गुल्या निर्द्देश्यं प्रत्यक्षगम्यमुडुगणं प्रतिनिशं रात्रौ शशितलाचन्द्राधोभागाद्विगलता स्रवताऽमृतेन भृतं पूर्णं रविरथस्य हयचयस्य खुराणां यानि बिलानि न्यासस्थानविवराणि तेषां कुलं वृन्दमिव नातिशयेन कलयसि, अपि तु तद्विवातितरां जानीहीत्यर्थः। प्रतिनिशं चन्द्राङ्गलता धवलेनामृतेन पूर्णाः सूर्याश्वखुरगर्त्ता इव तारकाः शोभन्त इति भावः। गगनतटं कर्म्मप्रवचनीययोगे द्वितीया। प्रतिनिशं वीप्सायामव्ययीभावः। सर्व्वं लघु ॥ १४८ ॥

उपनतमिति। हे प्रिये रक्तो भौमः शनिः कृष्णो गुरुः पीतः सितः कविरित्यादिज्योतिःशास्त्रादिप्रसिद्धानानावर्णाङ्कतीन्युडूनि नक्षत्राण्येव पुष्पजातमुपनतं सम्पन्नमास्ते। अयं मल्लक्षणो जनः प्रारब्धकामदेवपूजायान्तव परिचारकश्चन्दनाद्युपचारोपनायकोऽस्य च सम्भोगकारी भवतु, त्वं तिलैस्तिलकितः सञ्जा-

3304

तिलतिलकितपर्प्पटाभमिन्दुं
वितर निवेद्यमुपास्य पञ्चबाणं ॥ १४९ ॥
स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः।

तत्तिलकस्तिलैरेव वा तिलकवान् कृतो यः पर्प्पटः शालितण्डुलपिष्टरचितश्चिपिटस्तिलशष्कुलीसञ्ज्ञ उपदंशविशेषस्तद्वदाभा यस्य तत्तुल्यं सकलङ्कमध्यत्वादिविशिष्टपर्प्पटसदृशमिन्दुमेव निवेद्य कामाय वितर, एवं पञ्चबाणं कामदेवमुपास्य पूजय। अन्योऽपि देवपूजकः पुष्पादिसामग्र्या देवं पूजयति, कश्चित् परिचारकोऽपि तस्य भवति, एवमत्रापि सर्वाणि नक्षत्राण्युदितानि, कामोद्दीपकश्चन्द्रोऽप्युदितः, सुरताकार्य्यकारी निषिद्धः सन्ध्यासमयोऽतिक्रान्तस्तस्मात् काममुपास्व सुरतेच्छुरस्मीति भावः। पञ्चबाण इत्यनेन कामस्यातिपीडाकारित्वं सूच्यते। सामान्यमित्यभिधानात्तिलातशब्दः सामान्यवाची पुष्पमात्रे पर्य्यवस्यति। तिलकितेति तारकादित्वात् तत्करोतीति वा (पा०३।१।२६ वा०१) णिजन्ताद्विष्ठा ॥ १४९ ॥

इदानीं काव्यसमाप्तिं चिकीर्षुः श्रीहर्षो नायकमुखेनाशिषमाशास्ते। स्वर्भानुरिति। हे प्रिये देवः प्रकाशमानस्तुषारद्युतिर्हिमकरोऽयं च हिमकर एव देवो वर्षनां पूजाश्च कुर्वतां नोऽस्मदादीनामावयोर्वा तुष्टये परमानन्दायास्तु। किम्भूतः। स्वर्भानो राहोः प्रतिवारं पौनः पुन्येन यत् पारणं चन्द्रस्यैव गिलनं

पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥ १५० ॥

तेन तत्र वा मिलन् संलग्नो यो दन्तौघस्तद्रूपं यन्त्रं छिद्रकरणसाधनं तस्मादुद्भवो यस्याः सा श्वभ्राली दन्तदशनकृतविवरपरम्परा तया तस्याः सकाशाद्वा पतयालुः पतनशीला दीधितिसुधा किरणामृतं तद्रूपः सारः श्रेष्ठो भागो यस्य दीधितिसुधाया वा। यद्वा दीधितिसुधाया आसारो धारासम्पातो दीधितिसुधारूपो वा आसारो यस्य स अत एव पुष्पेष्वासनस्य पुष्पधनुषस्तत्प्रियाया रतेश्च परिणयानन्दो विवाहरूप आनन्दस्तत्सम्बन्धिन्यभिषेकोत्सवे महाभिषेकार्थं प्राप्ता सहस्रधारस्य सहस्रच्छिद्रगलज्जलधारस्य कलशस्येव श्रीः शोभा येन सः। महोत्सवे हि सहस्रधारेण सुवर्णकलशेन महाभिषेकः क्रियते तथा च राऊदन्तक्षतच्छिद्रपरम्परागलदमृतधारश्चन्द्रो गलज्जलधारसहस्रच्छिद्रसुवर्णकलश इव शोभमानः पूर्वोक्तवर्णनयोक्तविधलक्षतपूजया च सुरतप्रवृत्तयोरावयोरुद्दीपकतया परमानन्दं कुर्यादिति भावः। एतेन तत्समयोचितरतिकामविवाहोत्सवाभिधानेन चन्द्रोऽस्तु नस्तुष्टये इत्यनेन च विलासिना नलेन स्वनिर्वर्त्यद्वितीयपुरुषार्थपयोधिपीयूषरसास्वादनलालसोऽभिव्यज्यते। सुधाधार इत्यपि पाठे दीधितिसुधाया धारा यस्य सुधाया आधार इति वा, आनन्दपदेन तुष्टयेऽस्त्वित्याशिषा च पन्यसमाप्तिं द्योतयति। महाभारतादौ वर्णितस्याप्युत्तरनलच-

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं ।
द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १५१॥
यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी
कुमाराणामन्तःकरणहरणं कैव कुरुते ।

रित्वस्य नीरमलान्नायकानुदयवर्णने रसभङ्गसद्भावाच्च काव्यस्य च सहृदयहृदयाह्लादनफलत्वाच्चोत्तरचरितं श्रीहर्षेण न वर्णितमित्यादि ज्ञातव्यं। न इति पचेऽस्मदोर्द्वयोश्चेति (पा० १। २।५९) द्वित्वेऽपि बहुवचनं ॥ १५० ॥

श्रीहर्षमिति। पूर्वार्द्धार्थः स्पष्टः। द्वाविंशतेः पूरणः सर्गो गतः समाप्तिं प्राप। किम्भूतस्य श्रीहर्षस्य। नवो यः साहसाङ्को नाम राजा तस्य चरिते विषये चम्पूं गद्यपद्यमयीं कथां करोतीति क्रृत् तस्य विनिर्मितवतः सोऽपि ग्रन्थो येन कृत इति सूच्यते। नृपसाहसाङ्केति पाठे नृपस्यासौ साहसाङ्कश्च तस्य गौडेन्द्रस्य चरिते विषये, चम्पूकृतो भोजराजस्य विक्रमार्कस्य वेति केचित्। द्वाविंश इति पूरणे डटि टिलोपः ॥ १५१ ॥

यथेति। यथा परमरमणीयाऽपि रमणी यूनस्तरुणस्य कामिनोऽन्तःकरणं कुरुते तद्वत् तथा कुमाराणां बालिशानां चीरलाभमात्रेण परमपुरुषार्थप्राप्तिमभिमन्यमानानामनुभूतकामसुखानां चित्त स्ववशं कैव कुरुते, अपि तु न काऽपि, तथेयं का-

मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः ॥ १५२ ॥
दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं
तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बरां।

व्यरचनारूपा परमरमणीया मदुक्तिरपि श्रवणमननादिवशात् सुधीभूय, अमृतत्वं प्राप्य सुधियः सकलदर्शनरहस्यवेदिनोऽतिसरसस्य पण्डितस्य चेतश्चेद्यदि मदयति आनन्दयति तर्ह्यस्याः सुधियोऽत्यादृताया मदुक्तेररसानां नीरसानां सर्वथैवासंस्पृष्टरसशब्दानामपि चलदुपलप्रायाणामत एवाद्यपुच्छपशूनां पुरुषाणामनादरभरैस्तत्कृतावज्ञासमूहैः किं नाम स्यात्, अपि तु: न किञ्चिदप्यस्यास्तैरपकर्त्तुं शक्यते। सुधीभिरादरे कृते सति नीरसैरकृते वाऽप्यादरे न किञ्चिदित्यर्थः। सुधीभिरादृतत्वात् सकलगुणपूर्णातिसरसेयं मदुक्तिरिति भावः। मदुक्तेः सुधारूपत्वाभावात् चेदानन्तरच्च सरसत्वप्रतीतेः सुधात्वात्। सुधीभूयेति च्विः। सुधिय इति जात्यभिप्रायेणैकेनापि सुधाया आदरे कृते मद्गौरवं, बहुभिरप्यज्ञैरनादरेषु कृतेष्वपि न किञ्चिद् लाघवमित्यभिप्रायेण वा। पून इति प्रतियोगिन एकवचनात्तत्वाद्येकवचनं। कवेः स्वग्रन्थमुद्दिश्येयमुक्तिः ॥१५२॥

कविरर्थान्तरोक्त्या स्वीयामुक्तिं वर्णयति। दिशीति। गिरिग्रावाणोऽद्रिपाषाणाः दिशि दिशि स्वां निजां सरस्वतीं नदीं अनागतजलप्रवृत्तवर्णा वमन्तु मुञ्चन्तु, आपातेन समन्तादूर्द्धे-

स परमपरः क्षीरोदन्वान् यदीयमुदीर्य्यते
मथितुरमृतं खेदच्छेदि प्रमोदनमोदनं ॥ १५३ ॥

शादधःपतनेन स्फुरन् प्रकाशमानो ध्वनिडम्बरः शब्दाडम्बरो यस्याः तां च नदीं मिथस्तुलयतु, अन्यनद्या समीकरोतु जन इत्यर्थः। अथ वाऽऽपाते प्रथमारम्भ एव स्फुरद्ध्वनिडम्बरां स्फुरत्प्रपातघोषां तां जनो मिथस्तुलयतु, उभयव्याख्यानेऽपि परिणामे तु न नदी न च तस्याः शब्दाडम्बरश्चिरन्तन इत्यर्थः। स क्षीरोदन्वान् परं केवलमपरो न विद्यते पर उत्कृष्टो यस्मादत्युत्कृष्टोऽथ वाऽन्य एव यतो यस्य क्षीरोदस्येदं यदीयममृतमेतादृशमुदीर्य्यते उत्पद्यते। कीदृशं। मथितुर्देवादेः खेदच्छेदि मथनजनितक्लेशापहं। तथा प्रमोदनं नितरामानन्ददायि, तथा ओदनं भक्तमास्वाद्य सिद्धान्नरूपं, अथ चैवम्भूतं परमुत्कृष्टममृतं यदीयमुदीर्य्यते स क्षीरोदन्वानपरः परोऽन्यो नास्ति किन्त्वेक एव। अथ च प्रतिदिशं सर्व्वदेशेषु गिरिवाग्मिनां विषये पाषाणतुल्या जडा अन्ये कवयः स्वीयां वाणीमुद्गिरन्तु, आपातेन प्रतिभामात्रेण स्फुरन् ध्वन्याख्यकाव्यविशेषस्याडम्बरो यस्यां प्रथमारम्भ एव स्फुरन् शब्दाडम्बरोऽनुप्रासो यत्र वा तां वाणीं मिथोऽन्योऽन्यं जनः समीकरोतु तस्य कवेरुक्तिरस्यैवास्य च तस्यैवेत्येव तुलयतु। आपात इति विसर्जनीयान्तपाठे। आपातः प्रतिभासः तां तुलयतीत्यर्थः। एवंविधं परं काव्यामृतं यदीयमुत्पद्यते स क्षीरसमुद्रतुल्यः श्रीहर्षकविः,

ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु।

श्रोदर्यस्तु चीरसमुद्रतुल्य इत्यर्थः। यथा चीरसागरो नीरार्थिनोऽपि तीरमाचस्थान् चीरेण तर्पयति लक्ष्मीकौस्तुभामृतादिभिः परमानन्ददायिभिः कृतार्थयति, मदीयकाव्यविचारकस्येव खेदच्छेदि प्रमोदनवचनामृतमुत्पद्यते नान्यकाव्यविचारकस्येत्यन्ये यावतुल्या चीरोदतुल्यस्याहमिति भावः ॥ १५२ ॥

इदानीं प्रसादरूपमुख्यगुणाभावादतिदुर्बोधत्वादकाव्यमिति ये वदन्ति तच्छङ्कामपनुदन् खलदर्पदलनार्थं गुरुसम्प्रदायेन विना दुर्बोधमित्यतिगाम्भीर्यप्रतिपादनार्थञ्च बुद्धिपूर्वमेव मयेदं काव्यं तत्र दुर्बोधं व्यरचीत्याह। ग्रन्थेति। आत्मानं प्राज्ञं मन्यते प्राज्ञंमन्यं मनो यस्यैवंविधोऽस्मिन् काव्ये हठेन स्वीयप्रज्ञाबलेन पठितमस्यास्ती पठितीदंकाव्यस्य पाठकः खलो मा खेलतु किमत्रास्ति अश्रुतमेव व्याकर्तुं शक्यते इत्यवज्ञापूर्वं दर्पाभिव्यक्तिं माकार्षीदित्येवमर्थः। इह काव्ये क्वचित् क्वचिदपि तत्र तत्र स्थले मया प्रयत्नाद् बुद्धिपूर्वं ग्रन्थग्रन्थिर्ग्रथ्यमानशब्दार्थकुटिलिकाऽन्यासि विन्यस्ता खलमुखभङ्गार्थं बुद्धिपूर्वं मयेदं काव्यं दुर्बोधं व्यरचि न तु प्रसन्नकाव्यकरणाशक्तेरित्यर्थः। क्वचित् क्वचिदपीत्यनेन तत्र प्रसन्नताऽप्यस्तीति न काव्यलक्षणहानिरिति सूच्यते। सज्जनस्य तु ग्रन्थविवेचनोपायमाह। श्रद्धेति। श्रद्धया गुरौ दैवतिकबुद्ध्या राद्धेन पूजितेन

अद्वाराद्धगुरुस्त्रयीदृलदृढग्रन्थिः समासादय
त्वेतत्काव्यरसोर्म्मिमज्जनसुखव्यासज्जनं सज्जनः ॥ १५४ ॥
ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वराद्
यः साक्षात् कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवं ।

गुरुणा पूर्व्वमश्लथा अपि श्लथाः कृता व्याख्यया सुबोधाः कृता दृढाः खरूपतो दुर्बोधा ग्रन्थयोऽस्मिं स गुरुसम्प्रदायावगतार्थो-ऽत एव दर्पराद्धित्वात् सज्जनः माधुरैतत्काव्यस्य रसोर्म्मिरमृतलहरी तस्यां मज्जनं तज्जनितसुखेषु विशेषेण आसमन्ताद्भावेन च सज्जनमवस्थानं समासादयतु प्राप्नोतु, गुरुपरम्परया-ऽपि विना एकस्यापि पद्यस्यार्थो बोद्धुं न शक्यते तस्माद् गुरुपरम्परया एवाध्येयमिदं काव्यमित्यर्थः। यश्चेदं गुरुपरम्परया अधीते स सततं सुखी भवति इति महाकविस्तस्याशिषं ददाति। अस्मिन् पठितेत्यस्य च विषयस्येति कर्म्मणि सप्तमी। आराद्धेति राधेरनुदात्तत्वादिडभावः ॥ १५४ ॥

इदानीं पण्डितानन्दजननद्वारा स्वकृतेरभ्युदयमाशास्ते। ताम्बूलेति। यः कान्यकुब्जेश्वरात् सकाशात् सकलपण्डिताधिक्यव्यञ्जनं ताम्बूलद्वयं विद्वद्योग्यमासनञ्च लभते। न केवलं राजपूज्य एव किन्तु यः समाधिषु अष्टाङ्गयोगेषु ध्यानेषु वा विषये प्रमोदार्णवं परमानन्दस्वरूपं परं वागाद्यगोचरं ब्रह्म साक्षात्कुरुते। न परं पूर्व्वोक्तगुणविशिष्टो ब्रह्म विदेव किन्तु यदीयं काव्यं मधुवर्षि, अतिसरसत्वादमृतवर्षि। न परं पूर्व्वोक्तगुणविशि-

यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियं ॥ १५५ ॥

श्रीऽतिमधुरो महाकविरेव, किन्तु तर्कशास्त्रेष्वपि यस्योक्तयः धर्षिताः पराभूताः परे प्रतिवादिनो याभिस्तादृश्यः। तस्य विद्वच्चक्रचूडामणेः श्रीहर्षकवेरियं काव्यरचनारूपा कृतिः सुकृतिनां सुधियां मुदे आनन्दायाभ्युदीयात्, कृतिनामानन्दं कुर्व्वती सती आकल्पमतिवृद्धिं प्राप्नुयादित्याशीः। सर्व्वत्र यच्छब्दनिर्व्वाहो गुण एव। अभ्युदीयादिति इण् गतावित्यस्य रूपं ॥ १५५ ॥

सन्तः सन्तु परप्रयोजनकृतः कल्पद्रुमन्तः सदा
यस्मिन्नेव पथि प्रवर्त्तनपराः सत्कीर्त्तयश्चापरे।
अन्ये निःस्पृहणाश्रितश्रुतिपथा दीव्यन्तु भव्याशयाः
काकन्तः कलहप्रियाः खलजना नश्यन्तु जीवन्तु वा ॥
वासनामस्य रामस्य किङ्करस्य जगत्पतेः।
न चेत्पूरय कल्पेश कल्पते तव किङ्करः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते उत्तरनैषधीयप्रकाशे द्वाविंशतितमः सर्गः ॥ २२ ॥

समाप्तोऽयं ग्रन्थः ॥